अच्युतग्रन्थमालायाः (क) विभागे १२ तं कुसुमम्

माध्यन्दिनशाखीयं

शतपथब्राह्मणम्

[सप्तमतश्चतुर्दशकाण्डान्तः]

(द्वितीयो भागः)

तच्च

सर्वतन्त्रस्वतन्त्राणामाम्नायविद्यावतारणां तत्रभवतां सुगृहीतनामधेयानां
महामहोपाध्यायपण्डितप्रवरश्रीविद्याधरशर्मणामन्तेवासिना
वेदाचार्येण मिश्रोपाह्वपण्डित-
श्रीवंशीधरशास्त्रिणा
सम्पादितम्

प्रकाशनस्थानम्—

अच्युतग्रन्थमालाकार्यालयः, काशी

प्रथमावृत्तिः १०००] संवत् १९९७ [मूल्यम् सजिल्दम् ३॥)

प्रकाशकः—
श्रेष्ठिप्रवरः श्रीगौरीशङ्करगोयनकाः
अच्युतग्रन्थमालाकार्यालयः
काशी



मुद्रकः—नारायण राजाराम सोमणः
श्रीलक्ष्मीनारायण प्रेस
काशी .

* श्रीः *

प्राक्कथनम्

प्रसिद्धाश्चत्वारो वेदाः, शाखाश्च प्रसिद्धाः सङ्ख्यया महाभाष्यादौ— "एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, नवधाथर्वणो वेदः, एकविंशतिधा बाह्वृच्यम्" इति । नामानि चोपलभ्यन्ते कतिचित् । तत्र यजुर्वेदो द्विधा शुक्लः कृष्णश्चेति । कृष्णयजुर्वेदस्य षडशीतिशाखाः । शुक्लस्य पञ्चदश । पूर्वत्र एकशतमित्यस्य एकाधिकं शतम् (१०१) इत्यर्थः । ताश्च माध्यन्दिन-कण्व-तित्तिरि-हिरण्यकेशि-सत्यापाढ़-बौधायनापस्तम्बप्रभृतयश्चरणव्यूहबौधायनादिगृह्यसूत्रेषूपलभ्यन्ते । एतासु शाखासु काश्चन शुक्लस्य काश्चन कृष्णस्य । अथ को वेदः ? काः शाखाः ? प्राधान्येनालौकिकैरुपायैः पुरुषार्थान् यो वेदयति स वेदः । प्रासङ्गिकतयाऽऽध्यात्मिकाधिदैविकाधिभौतिकानि तत्त्वानि बोधयतीत्यपि वेदस्य वेदत्वम् । स च वेदः केनापि रूपेण एक एवासीदिति पुराणेषु दृश्यते । न च तस्य क्रमः क्वाप्युपलभ्यते । ऋग्यजुःसाम्नां पृथग्गणानुद्धृत्य चतस्रः संहिता भगवता वेदव्यासेन संगृहीता इति तु लभ्यत एव । अतोऽनुमीयते पूर्वं कमप्येकं विषयमवलम्ब्य तस्य विधिः, ततस्तस्य प्रशंसा, ततस्तत्रेतिकर्तव्यता, फलम्, तत्रैव विधेयधर्मविनियुक्तानामृग्यजुःसाम्नां शिष्यबुद्धौ पदार्थप्रतिबिम्बनार्थं दृष्टान्ता इत्यादिविषयक्रमेण वा देवतास्तुतिक्रमेण वा मन्त्रब्राह्मणात्मकस्य वेदस्य पिण्डितः पाठ आसीदिति दधिमथनादिव तक्रनवनीतविभागो जातः । एवं सति मन्त्रब्राह्मणयोरुभयोरपि नित्यत्वं नितरां सिद्ध्यति । एवं मन्त्रसमुदायात् पृथक् समुद्धृते ऋगादिमन्त्रगणेऽवशिष्टं ब्राह्मणमपि तत्तन्मन्त्रलिङ्गैः पृथक् संगृहीतम् । ततस्तद्विभाजकर्षिशिष्यैर्यावद्भिः पदवर्णवाक्यस्वरभेदैरुच्चारितैर्विनियुक्तैर्जपैः स्मृतैर्वा विहितकर्मापूर्वसाधकता सगुणा भवति तावद्भिः पाठैः कल्पान्तरीयैरीश्वरीयसङ्केतविषयैः शाखाभेदः स्वतपोबलेन दृष्टः । येन यस्याः शाखाभेदो दृष्टस्तेन तस्या एव प्रवचनमपि कृतमिति तस्यैव नाम्ना प्रसिद्धा सा शाखा । ततस्तच्छिष्यपरम्परायां प्रचलिता या शाखा तच्छाखीयास्ते जाताः । अतस्तेषां स्वशाखीय एव विधिः, पाठः, क्रिया, क्रमश्चेत्यादिरपूर्वसाधक इति तथैवानुष्ठीयतेऽद्यापि तत्तच्छाखीयैः ।

तत्र यजुषां माध्यन्दिनशाखा प्रधानभूतेति नात्र विवादः । तथा हि 'इमन्देवाः' इति (यजु० ९ । ४०) राज्याभिषेकमन्त्रे 'एष वोऽमी राजा' इति सामान्यतः सर्वनाम्ना

पाठो माध्यन्दिनशाखायाम्। 'एष वः कुरवो राजा', 'एष पञ्चालो राजा' इत्यूहविवरणरूपेण काण्वशाखायाम्। 'एष वो भरतो राजा' इति तैत्तिरीयशाखायाम्, 'एष ते जनते राजा' इति काठकादौ। तथा च सामान्यविशेषयोरभेदेऽपि व्याप्यव्यापकभावस्याऽवश्यंभावात् सामान्यपाठस्य व्यापकत्वात् प्रधानभूता माध्यन्दिनसंहिता, तदनुसारित्वाद् ब्राह्मणमपि प्रधानं तस्याः। किञ्चेदं ब्राह्मणम् 'हिङ्कृत्यान्वाह' इति साम विधत्ते। 'नासामा यज्ञोऽस्ति' इति सामहीनस्य वैगुण्यं प्रतिपादयति, हिङ्कारपूर्वकमेव सामगानमिति च नियच्छति। प्रकृतकर्मोपयोगिनमौद्गात्रमपि स्वयमेव विशदं विधत्ते नान्यदपेक्षत इति। एवं तत्प्रकरणे हौत्रमपि स्वयं विधत्ते। तस्मात् समग्राङ्गोपदेशः प्रकृतियागेषु माध्यन्दिनीयशतपथविहितेषु।

इदं शतपथब्राह्मणं माध्यन्दिनशाखायाः। सा च शाखा प्रधानतमा सर्ववेदशाखासु, प्रकृतिभूतानामिष्टिपशुसोमानां प्रयोगसमवेतार्थस्मारकाणां मन्त्राणां साकल्येन पाठवत्त्वात्। तद्विधायकत्वादिदं ब्राह्मणमपि प्रधानम्। समग्राङ्गोपदेशकं चेदमेव ब्राह्मणम्। अन्यानि तु परिशिष्टरूपाण्येवेति प्रतिभाति, तेषामेतदवशिष्टविधायकत्वात्। तथाहि—इष्टिषु दर्शपूर्णमासेष्टी प्रधानभूते, तयोरुपक्रमे शालाप्रवेशमारभ्य आचमनादिक्रियाकलापस्य सयुक्ति सदृष्टान्तं सेतिकर्तव्यतं सप्रयोजनं च विधायकत्वात्। तत्र 'व्रतमुपैष्यन्'···अप उपस्पृशति' इति विधायकं वाक्यम्। 'लिङर्थे लेट्' (पा० सू० ३।४।७) इति स्पृशति इत्यस्य लेडन्तत्वात्। आहवनीयगार्हपत्ययोर्मध्ये प्राङ्मुखस्तिष्ठन्निति इतिकर्तव्यता। 'तद्यदप उपस्पृशति' इत्यादि युक्तिः। ततोऽपां प्रशस्तिः। 'मेध्यो भूत्वा' इत्यादि प्रयोजनम्। एवं 'सोऽग्निमेवाभीक्षमाणो व्रतमुपैति' इति व्रतग्रहणविधिः। 'अग्ने व्रतपते व्रतं चरिष्यामि' इति उपक्रमः। तत्रैव 'अथ संस्थिते विसृजते' इत्यादिना उपसंहारोऽपि दर्शितः। अन्ये ब्राह्मणग्रन्थाः कर्मारम्भभूतमाचमनादिकं नाधिकुर्वते। नापि स्वस्मिन् विहितानां कर्मणां समग्राण्यङ्गान्युपदिशन्ति, किन्तु साकाङ्क्षाण्येव दृश्यन्ते। आग्नावैष्णवाद् द्वादशकपालादारभ्य ऐतरीये ब्राह्मणे कर्माणि दृश्यन्ते। ताण्ड्ये महाब्राह्मणे गवामयनादिकं प्रथमं दृश्यते। तत्रापि न समग्राङ्गोपदेश इति हेतोस्तत्र प्रकृतियागा अपेक्ष्यन्ते। ते च माध्यन्दिनीये इति समायातं तस्यैव प्राधान्यम्। अत्र तु इष्टिमात्रस्य प्रकृतिभूता दर्शपूर्णमासेष्टिः साङ्गोपाङ्गा प्रथमकाण्डे विहिता। यस्या मन्त्राः संहितायां प्रथमाध्यायस्य पञ्चमकण्डिकात आरभ्य द्वितीयाध्यायस्याष्टाविंशतिकण्डिकापर्यन्तम्। 'अग्ने व्रतपते व्रतं चरिष्यामि' इति प्रतिज्ञापूर्वकं पठित्वा द्वितीयाध्यायस्याष्टाविंशतितमायां कण्डिकायाम् 'अग्ने व्रतपते व्रतम-

चारिषम्'इत्युपसंहृताः। एवमस्मिन् ब्राह्मणे पृथक् पृथक् क्रियासु विनियुक्ता व्याख्याताः समर्थिता निदर्शिताश्च मन्त्राः। प्रथमकाण्डान्ते उपसंहारश्चैवम्। 'अथ व्रतं विसृजते····इदमहं य एवास्मि सोऽस्मि' इति प्रतीकमादाय 'तदु खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत' इति। एवं सोमयागानां प्रकृतिभूतोऽग्निष्टोमः। तस्य च मन्त्रा माध्यन्दिनसंहितायाश्चतुर्थाध्यायमारभ्याष्टमाध्यायस्य द्वात्रिंशत्कण्डिकापर्यन्तं साङ्गोपाङ्गाः क्रमशः पठिताः। स एवास्मिन् ब्राह्मणे तृतीयकाण्डे शालाप्रवेशमारभ्य प्रपञ्चितः। ततस्तस्यैव विकृतिभूता ज्योतिष्टोमादयो निदर्शिताश्चतुर्थपञ्चमकाण्डयोः। किं बहुना, सर्वे प्रकृतियागा अत्रैव विहिताः श्रूयन्ते। अतः प्रधानताऽस्य स्वतः सिद्धा।

ननु शताध्यायवत्त्वादन्वर्थनामधेयं प्रथमशाखीयं चेति काण्वशतपथब्राह्मणं कथं न प्रधानमिति चेत्, न; सापेक्षत्वाद् व्युत्क्रमत्वाच्चेति। तत्र हि—'स यद्वा इतश्चेतश्च सम्भरति' इत्युपक्रमो दृश्यते। तत्र 'स' इति पदमधिकृतं कर्तारमपेक्षते। न चात्राधिकृतः कर्ता इति पूर्वोक्तहेतुभिः सिद्धप्रधानत्वं माध्यन्दिनं पाठमपेक्षते। तत्र हि व्रतमुपैष्यन्निति कर्ताऽधिक्रियते। अधिकृत एव स इति पराम्रष्टुं योग्य इति सापेक्षता। काण्वेऽपि शतपथे द्वितीयकाण्डादौ व्रतमुपैष्यन्निति दृश्यते। अतस्तस्यैव परामर्श इति चेत्, सर्वादीनां पूर्वपरामर्शकत्वस्यैव प्रसिद्धत्वान्न परपरामर्शित्वम्। ननु कथमन्यग्रन्थस्थस्तच्छब्दोऽन्यग्रन्थस्थं व्रतमुपेतारं कर्तारं परामृशेदिति चेत्, सजातीयत्वेनैककार्यविधायकत्वेन व्याप्यव्यापकभावात्। शतपथत्वेन समानत्वेऽपि कथं व्याप्यव्यापकभाव इति चेत्, मा भूत्परिमाणकृतो व्याप्यव्यापकभावः, प्रधानकृतस्त्वस्त्येव। सापेक्षमसमर्थं निरपेक्षं समर्थमिति न्यायेन निरपेक्षस्य माध्यन्दिनस्य प्राधान्यात्, पूर्वोक्तहेतुभिश्च। ननु

"याज्ञवल्क्यस्य शिष्यास्ते कण्वैर्वैधेयैः शालिनः।
मध्यन्दिनश्च शापेयी विदग्धश्चाप्यौ उद्दलः॥
ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरौ[12]।
आटवी च तथा पर्णी वीरणी सपरायणः॥
इत्येते वाजिनः प्रोक्ता दश पञ्च च संस्मृताः" (वायुपु० अ० ६१)

इति शुक्लयजुःशाखाप्रवर्तकेषु कण्वस्य प्रथमपाठात् प्रथमा कण्वशाखा। तच्छाखीयं ब्राह्मणमपि प्राथम्यात् कथन्न प्रधानमिति चेत्, प्राथम्यादुपविशतु प्रथमासने, न तु क्रमिककर्मकलापबोधने। ननु काण्वे एव क्रमिकः कर्मकलापः। तत्र हि प्रथमं

संभारसंपादनम् , पुनरग्न्याधानं प्रतिपाद्यते । नह्यग्न्याधानमन्तरेण किमपि वैदिकं कर्म कर्तुं शक्यते, अनधिकारित्वात् । अतः काण्वब्राह्मणस्य प्राधान्यमिति चेत्, तदपि न बलवत्तरं साधनम्। आधाने पवमानेष्टिर्विधीयते। सा च दर्शपूर्णमासविकृतिः । विकृतौ च समग्राङ्गोपदेशाभावात् प्रकृतिसापेक्षता । तथा चाधाने स्मृतिविषयीभूते सापेक्षतया बलादुपस्थिता दर्शपौर्णमासेष्टिः प्रथमा सम्पद्यते क्रियाकलापबुभुत्सुहृदयारोहणायेति तदुपक्रम्य प्रवर्तमानं माध्यन्दिनीयमेव ब्राह्मणं प्रधानम् । नहि व्याप्यव्यापकभावमवलम्ब्य वेदस्यैकत्वमेकवाक्यत्वमेककर्मविधायकत्वमेकापूर्वसाधकत्वं च कर्मणां सेत्स्यति । यथा खलु त्रयाणां दर्शयागानां त्रयाणां पौर्णमासयागानां भिन्नकालिकानामपि साङ्गोपाङ्गानामेकापूर्वसाधकता, तथैव हौत्राध्वर्यवौद्गात्रविनियुक्तानामृग्यजुःसाम्नामेककर्मसंपादकत्वम्, तथैव ब्राह्मणानां मिलित्वैव कर्मकलापविधायकत्वमिति सिद्धं कस्यचित् समग्राङ्गोपदेशकत्वं कस्यचिदवशिष्टप्रतिपादकत्वमिति सिद्धो व्याप्यव्यापकभावः।

अथ कीदृक्स्वरूपा देवताऽभिमताऽस्मिन् शतपथे ? मूर्तिमती पञ्चभूतात्मिका दृश्यत एव सूर्यादिबिम्बस्था नारायणमूर्तिश्चन्द्रादिमण्डलस्था च चेतना । ननु 'भूम्यै स्वाहा, 'अन्तरिक्षाय स्वाहा' इत्यादौ जडानामपि पदार्थानामुद्देश्यत्वेन देवतात्वं प्रतीयते तत्कथं चेतनावत्त्वमिति चेत् , पुराणपुरुषस्य व्यापकस्य यज्ञाधिष्ठातुर्महाभाग्यत्वात् प्रत्येकव्यक्तिगत्वेन तत्तद्द्रव्यकर्माधिष्ठातृत्वात् तदभिमानी पृथक् पृथक् देवता चेतना एव । यथा खलु मनुष्यादीनां शरीरस्य जडत्वेऽपि तदधिष्ठातुर्जीवस्य चेतनत्वेन शरीरस्यापि चेतनाभिमानिता, एवं भूम्यादीनामभिमानिनी देवता चेतना इति ध्येयम् । ननु यदि मूर्तिमती देवता तर्हि हविरादिसम्प्रदानार्थमाहूताऽपि स्वाहेति समर्पितं हविः कथं न स्वीकुरुते ? यदि स्वीकुरुतेऽदृश्या महेश्वर्यवती, तर्हि समकालमनेकेषु देशेषु सत्सु यागेषु न शक्नोति सा सर्वत्र गन्तुम्। यत्रैव सा न गच्छेत्तत्रैव वैगुण्यम् । यागवैगुण्यात् फलवैगुण्यम् । फलवैगुण्यात्तद्बोधकवेदाप्रामाण्यमिति महती कष्टपरम्परा । न कापि कष्टपरम्परा, व्यापिका देवता द्रव्यमात्रेषु व्याप्ता स्वकीयायां प्रियायां संज्ञायामपि व्याप्ता । संज्ञासंज्ञिनोश्चाभेदात् संज्ञामयी देवता कर्मकाले मन्त्रोच्चारणस्यावश्यकत्वादुपस्थितैव । ननु संज्ञायाः शब्दरूपत्वात् शब्दस्य च गुणत्वात् गुणस्य द्रव्यसमवेतत्वात् कथमन्यत्रगामित्वम् इति चेत् , न; शब्दो द्रव्यं देशान्तरगामित्वात् आघातजनकत्वात् । सति पटहप्रणादे हृदयकम्पादेस्तार्किकैरपि अनुभूयमानत्वात् । एवं सिद्धे शब्दस्य द्रव्यत्वे नित्यत्वं नानोपायैः साध्यते मीमांसकैर्वैयाकरणैः। वेदान्तिभिश्च व्यावहारिकनित्यत्वं स्वीकृतमेवेति शक्नोति नानादेशानुपस्थातुं मन्त्र-

मयी चेतना देवता यज्ञकर्मणि । नैतावता सूर्यादीनां तैजसी चेतना सूर्यमण्डलवर्तिनी मूर्तिरपलपितुं शक्यते प्रत्यक्षत्वात् । यथा भूलोके भौमं शरीरं तथा द्युलोके तैजसं शरीरं भवितुर्महति, लोकत्वात् । भोगायतनशरीरं विनाऽदृष्टकार्ययोर्जन्यजनकभावानुपपत्तेः । यद्यत्कार्यं तत्तददृष्टजन्यमिति व्याप्तेः सिध्यति नानारूपवती देवता । यज्ञादौ कर्मणि तु शब्दमय्या एव भावना कर्तव्या तद्द्वारैवेष्टफलसिद्धिरिति नियमात् । अतएव जैमिनिना सिद्धान्तितमन्यथयति श्रीहर्षः—

'विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ (नै. ५।३९) ।

एवं हि दार्शनिकाः सिद्धान्ताः स्वसरणिसंशोधनाय प्रसरन्ति । यथा तार्किकैः सुवर्णादेः पदार्थजातस्य प्रतिज्ञातसप्तपदार्थान्तर्गतद्रव्याणां नवत्वरक्षायै युक्त्या तेजसि कृतेऽप्यन्तर्भावे नापलपितुं शक्यते गुरुत्वं तेजस्यविद्यमानमपि । वस्तुतः संयुक्तद्रव्यं सुवर्णादिकम् । एवं विग्रहवतोऽपि पुरुहूतादेः स्वनिग्रहपरिहाराय पुरुहूतमयत्वस्वीकारेऽपि न पुरुहूतवाच्यत्वतिरस्कारः, वाच्यवाचकयोर्भेदस्य सर्वलोकवेदप्रसिद्धत्वात् । यत्रापि शब्दस्य शब्द एव वाच्यः 'त्रेस्त्रयः' (पा. सू. ७।१।५३) इत्यादौ भेदः सिद्ध एव, अर्थभेदात् । एवं चास्तु याज्ञिकेऽवसरे जैमिनीयः सिद्धान्तः फलदायकः । पुरुहूतादीनां पुरुरूपत्वे साधिते तु रूपवतामपि तेषां कथं न चाक्षुषविषयतेति निग्रहापत्तिः । अतस्तथाभावनाः । शब्दो हि प्रथमा प्रतिमा देवतानाम् । तस्य तादात्म्यरूपेण तादात्म्यं भावनीयमित्येव तात्पर्यम् । अत एव "इन्द्रो वज्रेण वृत्रस्य शिर.", "वज्रहस्तः पुरन्दरः", "अपां फेनेन नमुचेः शिरः" इत्यादिप्रकरणस्थं ब्राह्मणं संवदति ।

ननु 'उर्वशी हाप्सरा ऐडं पुरूरवमकायत' 'जनमेजयं पारीक्षितम्' इत्यादिभिः प्रतीयते प्रत्यासन्नोऽयं वेद इति चेत्, न; अनादीनीमानि नामानि । प्रतिकल्पं तादृशनामवतां दर्शनात् । तथाहि देवीभागवतोक्तः परीक्षितः सप्तविंशतितमकलियुगस्य । श्रीमद्भागवतस्य तु अष्टाविंशतितमकलियुगस्येति । सूर्यवंशेऽपि जनमेजयस्त्रेतादावासीत् । देवीभागवतप्रामाण्येन यस्य समयः कोटिभ्य उपरितनः सिध्यति, दृश्यतामवतारोध्याये श्रीरामचन्द्रस्य समयः । तस्मात्पूर्वकालिकः सः । एवं 'स्यू' शब्दः केतुमालीयभाषासु सूच्यां प्रसिद्धः । किमेतावता भाषाभ्यो वेदे शब्दा आगता इति कुकल्पना क्रियते, न कदापि । नेपालेऽपि स्यूशब्देन सूची

गृह्यते। 'विष्णोः स्यूरसि' (शु० य० ५। ३०) इत्यादित एव वेदात् प्रसृताः सर्वे शब्दास्तासु तासु भाषासु यत्र तत्र प्रसिद्धाः। कः खलु विषयो न दर्शितो ब्राह्मणेषु। विशेषतः प्रकृतशतपथे। शतपथत्वं च न केवलमस्य शताध्यायवत्त्वेनैव। अपि तु शतशो विषयप्रतिपादनमार्गदर्शनेनापि। तथाहि सर्वाणि विधिवाक्यानि पठ्यन्तेऽत्र। अत एव श्रौतसूत्राणां खनिः। तथैवानुक्रमदर्शनेन सर्वानुक्रमणिकानाम्। स्वाध्यायप्रशंसादिनिदर्शनेन स्मृतीनाम्। तदश्वमेधस्याश्वमेधत्वम्, तद्वेदस्य वेदत्वम्, इत्यादिविवृतिव्याकृतेर्व्याकरणस्य। क्वचित् संज्ञाशब्दानां निर्वचनात् देवतास्वरूपनिर्वचनाच्च निरुक्तस्यापि खनिरेव। अत्र 'एका च मे तिस्रश्च मे' इति विषमाङ्कसंकलनया 'चतस्रश्च मे' इत्यादि समाङ्कसंकलनया 'एकयाऽस्तुवत' इत्यादिस्थलेषु च संख्येयगणनया गणितमूलभूतो योगो दर्शितः। ग्रहनक्षत्रादिवर्णनेन ज्योतिर्विज्ञानं दर्शितम्। वृत्रोदाहरणनिदर्शनेन नमुचिवधनिदर्शनेन समुद्रमथनादिनिदर्शनेन च पुराणेतिहासानामाकरभूतमिदं ब्राह्मणम्। लौकिकान्यपि संख्यातीतानि विज्ञानानि दृश्यन्ते प्रासङ्गिकानि, ग्रन्थविस्तारभयपरिहारायात्र नोदाह्रियन्ते। दृश्यन्तां पुस्तकावलोकनरसिकैर्विषयसूच्यां प्रकरणशीर्षकेषु च।

अस्मिन् ब्राह्मणे उदात्तानुदात्तौ द्वावेव स्वरौ न स्वरान्तरम्। यकारस्य जकारोच्चारणम्, षकारस्य खकारोच्चारणम्, अनुस्वारस्य ँकारोच्चारणम्, पदादिस्थवकारस्य द्वित्ववकारोच्चारणम्, रेफस्योष्म-ऋकारैः संयुक्तस्य रेकारोच्चारणम्, लकारस्योष्मसंयुक्तस्य लेकारोच्चारणम्, माध्यन्दिनसंहितावदेव भवति। विसर्गेष्वङ्गुलिप्रक्षेपणं तु न क्रियते। यत्र द्वयोरक्षरयोस्त्रयाणां वाऽनुदात्तता तत्र सर्वाण्यप्यक्षराणि हस्तेन कण्ठेन च अनुदात्तानि उच्चारणीयानि।

कृष्णयजुर्ब्राह्मणेऽपि त्रयः स्वराः सन्ति। ब्राह्मणान्तरेषु स्वराणामभाव एव।

सामवेदे गाने मध्यम-गान्धार-ऋषभ-षड्ज-धैवत-निषाद-पञ्चमेति क्रमेण सप्त स्वराः क्रियन्ते। तत्र मध्यमे हस्तो रिक्त एव स्थाप्यते। गान्धारे अङ्गुष्ठेन तर्जन्या मध्यं पर्व स्पृश्यते। ऋषभेऽङ्गुष्ठेन मध्यमाङ्गुलिमध्यपर्व, षड्जेऽनामिकामध्यपर्व, धैवते कनिष्ठामध्यपर्व, निषादे कनिष्ठामूलम्, पञ्चमे तर्जन्यग्रं स्पृश्यते।

यस्य वर्णस्योपरि ∧ एतच्चिह्नं तस्य दीर्घमुच्चारणं तर्जनीमध्यस्पर्शो हस्तस्य तिर्यक्करणं च भवति।

यत्र—एतद्दण्डसदृशं चिह्नं तत्र तर्जनीमारभ्य कनिष्ठिकापर्यन्तं स्पृशेत्।

यत्र $\frac{उ}{२}$ एतच्चिह्नं भवेत् तत्र पूर्ववत् तर्जनीमारभ्य कनिष्ठान्तं कनिष्ठामारभ्य तर्जनीं यावत् स्पृष्ट्वा मध्यमामन्तः क्षिपेत् ब्राह्मतीर्थसंस्पृष्टां कुर्यादिति ।

यत्र $\frac{क}{३}$ एतच्चिह्नं भवेत् तत्र मध्यमामग्रमारभ्य मूलं यावत् स्पृशेत् ।

यत्र वर्णस्योपरि ९ लिखितं स्यात्तत्र तर्जनीमूलमारभ्य अग्रं यावत् स्पृशेत् ।

विरामे विसर्गं सानुनासिकमुच्चरेत् । अनुनासिकस्य चोच्चारणं ङकारतुल्यं भवति । दीर्घमृकारं रे इत्युच्चरेत् । ऋकारस्य च रे इत्युच्चारणं षकारहकारयोर्योगे विधेयम् । सामसंहितायां मध्यम-गान्धार-ऋषभास्त्रय एव स्वराः क्रमेण स्वरितोदात्तानुदात्ता भवन्ति ।

अत्र वैदिकानां सौकर्यार्थं दर्शपूर्णमासादिवेदिनिर्माणप्रकार उच्यते—

तत्र दर्शपूर्णमासवेदिनिर्माणप्रकारः—

गार्हपत्यमध्यादाहवनीयस्य मध्यपर्यन्तं मध्येऽन्तरमष्टौ, एकादश, द्वादश वा प्रक्रमाः । गार्हपत्यमध्यं केन्द्रत्वेन परिकल्प्य सार्धत्रयोदशाङ्गुलमितरज्ज्वा वृत्तं कार्यम् । इदं गार्हपत्याग्नेः स्थानम् । आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम् । गार्हपत्याहवनीयान्तरस्य द्वादशपदपरिमितत्वपक्षे तदन्तरस्य षड्ढस्तात्मकत्वात् षड्ढस्तां तदीयषष्ठभागेन हस्तात्मकेन संयोज्य अर्थात् सप्तहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा, मध्ये च तृतीये तृतीये भागे चिह्नं कृत्वा, एकं पाशं गार्हपत्यमध्यशङ्कौ आसज्य द्वितीयपाशमाहवनीयमध्यशङ्कौ आसज्जयेत् । रज्जुमध्यवर्तिनोर्द्वयोश्चिह्नयोः पश्चिमचिह्नस्थाने रज्जुं गृहीत्वा दक्षिणत आकर्षयेत्, यत्र तच्चिह्नं पतति तत्र तच्चिह्नं कृत्वा तस्मात्स्थानाद् उत्तरतः सार्धनवाङ्गुलव्यवहिते देशे शङ्कुर्देयः । शङ्कुस्थानं केन्द्रत्वेन परिकल्प्य यवाधिकोनविंशत्यङ्गुलमितरज्ज्वा वृत्तं कार्यम् । वृत्तमध्ये केन्द्रसंलग्ना परिधिपूर्वभागमादाय परिधिपश्चिमं यावत्सरलरेखा कार्या । रेखात उत्तरभागस्य त्यागः कार्यः । वृत्तस्य दक्षिणार्धं दक्षिणाग्निस्थानम् । पूर्वोक्तयोश्चिह्नयोः पूर्वचिह्नस्थाने रज्जुं गृहीत्वा उत्तरत आकर्षणे यत्र चिह्नं पतति तदुत्करस्थानम् । आहवनीयमध्यशङ्कुसकाशात् पश्चिमतस्त्र्यरत्निव्यवहिते देशे शङ्कुर्देयः । आहवनीयप्राचीशङ्कुसकाशात् सार्धारत्निव्यवहिते देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः । चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद् विषमचतुरस्रं भवति । प्राचीशङ्कुमारभ्य पश्चिमशङ्कुपर्यन्तं कोणद्वयवेष्टनेन सूत्रं प्रदेयम् । तत्सूत्रार्धपरिमितेन सूत्रेण प्राचीशङ्कुमारभ्य दक्षिणकोणस्थशङ्कुवेष्टनेन दक्षिणतः, उत्तरकोणस्थशङ्कुवेष्टनेन

उत्तरतश्च शङ्कुर्देयः । ताभ्यां शङ्कुभ्यां पूर्वार्धचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ कार्यौ । द्वादशाङ्गुलं पदम् । अष्टयवमङ्गुलम् । चतुर्विंशत्यङ्गुलो हस्तः । (का० शु० प० १।२६–३०) इति ।

चातुर्मास्यवेदिनिर्माणप्रकारः—

चातुर्मास्ययागे पूर्वस्यां दिशि वेदिद्वयं निर्मातव्यम् । तत्र दक्षिणस्यां प्रतिप्रस्थातुः, उत्तरस्यामध्वर्योः । प्रतिप्रस्थातुर्वेर्दिदर्शपूर्णमासवद्भवति । अत्र गार्हपत्यदक्षिणाग्नी न भवतो नाप्युत्करः । अध्वर्योर्वेदिरपि दर्शपूर्णमासवदेव भवति परन्तु तत्र पूर्वपश्चिमयोर्दैर्घ्यं सप्तारत्निमितं षडरत्निमितं वा भवति । विस्तारस्तु दर्शपूर्णमासवदेव । अत्र संग्रहौ न भवतः । आहवनीयस्थाने द्वात्रिंशदङ्गुलदीर्घा तावद्विस्तारा समचतुरस्रा चतुरङ्गुलोच्चा उत्तरवेदिः कर्तव्या । तन्मध्ये प्रादेशदीर्घा तावद्विस्तारा एकाङ्गुलोच्चा नाभिर्भवति । पश्चाद्भागे उभयोर्वेद्योरन्तरालं प्रादेशमितं भवति । उत्करो दर्शपूर्णमासवत्पूर्ववृतीये वेद्या बहिर्भवति । स च षडङ्गुलवृत्तश्रामणेन द्वादशाङ्गुलवृत्तो व्यङ्गुलखातश्च निष्पाद्यः । उत्करात्पूर्वस्यां दिशि द्वात्रिंशदङ्गुलमितं देशं त्यक्त्वा द्वात्रिंशदङ्गुलदीर्घस्तावद्विस्तारोऽष्टाङ्गुलषडङ्गुलान्यतरपरिमाणखातवान् चात्वालनामको गर्तो निष्पादनीयः । अध्वर्युवेदेः पश्चिमदिशि अरत्निद्वयं मुक्त्वा गार्हपत्यस्थरः ४१ अथवा ४८ अङ्गुलमितहस्तेन दर्शपूर्णमासवत् संपादनीयः । दक्षिणाग्निस्थरश्च पश्चिमवितृतीये देशे दक्षिणस्यां दिशि गार्हपत्यात् संपादहस्तद्वयमितमन्तरालं त्यक्त्वा संपादनीयः । दक्षिणाग्नेः पश्चिमदिशि व्यङ्गुलमितमन्तरालं मुक्त्वा प्रतिप्रस्थातृवेदिमध्यस्य समानसूत्रा प्राकृती वेदिः सभ्यावसथ्यगार्हपत्यदक्षिणाग्निसंग्रहोत्कराहवनीययुता कार्या । प्राकृत्या एतद्वेद्याः संबन्धिनो दक्षिणाग्निहस्तमितमन्तरालं मुक्त्वा दक्षिणस्यां दिशि दक्षिणाग्निमध्यसमसूत्रा पितृयज्ञवेदिर्दर्शपूर्णमासवत् कार्या । इयं वेदिर्दक्षिणस्यां त्र्यरत्निविस्तारा उत्तरस्यां चतुररत्निविस्तारा त्र्यरत्निदीर्घा मध्ये दक्षिणाग्नियुता भवति । अत्र गार्हपत्याहवनीयसंग्रहोत्करा न भवन्ति । एवमुत्तरस्यां दिशि चतुष्पथे वा त्र्यम्बकेष्ट्यर्थं प्राकृती वेदिराहवनीययुता प्रकृतिवत कार्या । इयं वेदिरुत्तरस्यां दिशि त्र्यरत्निविस्तारा दक्षिणस्यां चतुरत्निविस्तारा त्र्यरत्निदीर्घा भवति । गार्हपत्यदक्षिणाग्निसंग्रहोत्कराणामभावोऽत्रेति ।

सौमिकवेदिनिर्माणप्रकारः—

आदौ यागयोग्यां भूमिं निश्चित्य तत्र पश्चिमभागे द्वादशभिर्दशभिर्वा अरत्निभिः

परिमितं चतुरस्रं मण्डपमनुदग्द्वारं प्राग्वंशं पञ्चहस्तमितैश्चतुर्भिः स्तम्भैर्युतं सर्वत उपरि च समाच्छादितं निर्मिमीते । उपरि दक्षिणोत्तरं तृणबलिकादिनिधानम् । अयं मण्डपः प्राचीनवंशशब्देन विमितशब्देन च व्यपदिश्यते । प्राचीनः प्रागग्रो वंशो मध्यबलो यस्येति । अरत्निद्वयविस्ताराणि द्वाराणि सर्वत्र । विमितस्य पूर्वस्मादन्ताद् द्व्यरत्निव्यवहिते देशे शङ्कुर्देयः स आहवनीयमध्यः । आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम् । तस्मात्पश्चात् सप्तारत्निव्यवहिते देशे शङ्कुर्देयः स गार्हपत्यमध्यः । तत्र सार्धत्रयोदशाङ्गुलमितरज्ज्वा वृत्तं कार्यं स गार्हपत्यः । चतुरङ्गुलविस्तारा द्वादशाङ्गुलोत्सेधा मेखलाः सर्वत्र । आहवनीयमध्यशङ्कोरारभ्य गार्हपत्यमध्यं यावद्वर्तमानस्य भूभागस्य सप्तारत्निपरिमितत्वात् सप्तारत्निपरिमितां रज्जुं गृहीत्वा तदीयसप्तमभागेन अरत्न्यात्मकेन संयोज्य, अर्थादष्टहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा मध्ये च तृतीये तृतीये भागे चिह्नं कृत्वा एकं पाशं गार्हपत्यमध्यशङ्कौ आसज्य द्वितीयपाशमाहवनीयमध्यशङ्कौ आसञ्जयेत् । रज्जुमध्यवर्तिनोर्द्वयोश्चिह्नयोः पश्चिमस्थाने रज्जुं गृहीत्वा दक्षिणत आकर्षयेत् । यत्र तच्चिह्नं पतति तत्र तच्चिह्नं कृत्वा तस्मात्स्थानादुत्तरतः सार्धनवाङ्गुलव्यवहिते देशे शङ्कुर्देयः । शङ्कुस्थानं केन्द्रत्वेन परिकल्प्य यथाधिकोनविंशत्यङ्गुलमितरज्ज्वा वृत्तं कार्यम् । वृत्तमध्ये केन्द्रसंलग्ना परिधिपूर्वभागमादाय परिधिपश्चिमं यावत् सरलरेखा कार्या । रेखात उत्तरस्य भागस्य त्यागः कार्यः । वृत्तस्य दक्षिणार्धं दक्षिणाग्निस्थानम् । पूर्वोक्तयोश्चिह्नयोः पूर्वचिह्नस्थाने रज्जुं गृहीत्वा उत्तरत आकर्षणे यत्र तच्चिह्नं पतति स उत्करमध्यः । तत्र त्र्यङ्गुलेन भ्रमणं कार्यम्, एकाङ्गुलो गर्तश्च कार्यः । आहवनीयमध्यशङ्कोः पश्चात् त्र्यरत्निव्यवहिते देशे शङ्कुर्देयः । तस्माद्दक्षिणत उत्तरतश्च द्व्यरत्निव्यवहिते देशे शङ्कू देयौ, ते श्रोणी । आहवनीयपूर्वशङ्कोर्दक्षिणत उत्तरतश्च सार्धारत्नि-सार्धारत्निव्यवहिते देशे शङ्कू देयौ तावंसौ । चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद्विषमचतुरस्रं भवति । वेदेर्दक्षिणकोणमारभ्य दक्षिणपार्श्वे द्वात्रिंशदङ्गुले देशे शङ्कुर्देयः स सङ्ग्रहमध्यः । तत्र एकोनविंशत्यङ्गुलमितकर्कटेन वेदिमध्येऽर्धवृत्तं कार्यम्, स सङ्ग्रहः । एवमुत्तरतोऽपि सङ्ग्रहः कार्यः । त्र्यङ्गुलस्वाता वेदिः । अस्रातौ सङ्ग्रहौ मतौ । गार्हपत्यस्योत्तरेऽवकाशं विहाय गार्हपत्यवत्सभ्यायतनं कर्तव्यम् । एवमाहवनीयस्योत्तरे आवसथ्यायतनं गार्हपत्यवत् । अयमेव प्राकृतिको विहारः । विशेषस्तु गार्हपत्यमध्यशङ्कोरुदक् सार्धद्व्यरत्निव्यवहिते देशे शङ्कुर्देयः स स्वरस्य मध्यः । तत्र चतुर्विंशत्यङ्गुलमितं द्व्यङ्गुलोत्सेधं चतुरस्रं मृदा कुर्यात् स स्वर इत्युच्यते । एवमेवा-

हनीयस्योत्तरतो द्वितीयः स्वरः कर्तव्यः। विमितस्य पश्चादुत्तरतश्च पञ्चारत्निपरिमितं परिवृतद्वयं कर्तव्यम्। तत्रैकं पत्नीशाला, अपरं दीक्षास्नानस्थानम्, घर्मपात्रपाकस्थानं च। परिवृतद्वयेऽपि उत्तरे द्वारं कार्यम्। विमितपूर्वद्वारमध्यशङ्कोः सकाशात् पूर्वस्यां दिशि द्विपदात्मकप्रक्रमत्रयव्यवहिते देशे शङ्कुर्देयः सोऽन्तःपात्यः। सोमे द्विपद-प्रक्रमेणैव मानम्। पदं तु दशाङ्गुलम्, द्वादशाङ्गुलम्, पञ्चदशाङ्गुलं वेति। दशाङ्गुल-पदपक्षे सदोमानमरत्निनैव कार्यम्। अन्तःपात्याद्दक्षिणत उत्तरतश्च पञ्चदशसु पञ्चदशसु प्रक्रमेषु शङ्कू देयौ, ते महावेदेः श्रोणी। अन्तःपात्यशङ्कोः सकाशात् पूर्वस्यां दिशि द्विपदात्मकषट्त्रिंशत्प्रक्रमव्यवहिते देशे शङ्कुर्देयः, तस्माद्दक्षिणत उत्तरतश्च द्वादशसु द्वादशसु प्रक्रमेषु शङ्कू देयौ, तावंसौ। अन्तःपात्यशङ्कोः पूर्वस्यां दिशि द्विपदात्मक-सार्धप्रक्रमव्यवहिते देशे शङ्कुर्देयः, स सदसः पश्चिमप्रान्तः। तस्माद्दक्षिणत उत्तर-तश्च नवारत्निव्यवहिते देशे शङ्कू देयौ, ते सदसः श्रोणी। सदसः पश्चिमशङ्कोः पुरस्तान्नवारत्नि-नवारत्निव्यवहिते देशे शङ्कुर्देयः, स सदसः पूर्वप्रान्तः। तस्मा-द्दक्षिणत उत्तरतश्च नवारत्निव्यवहिते देशे शङ्कू देयौ, तावंसौ सदसः। सदसः पश्चिमे पूर्वे च द्वारे कार्ये। अन्तःपात्यात्पूर्वस्यां दिशि षट्सु प्रक्रमेषु शङ्कुर्देयः, तस्माद्दक्षिणतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः, तदौदुम्बरीस्थानम्। षट्प्रक्रमान्ते निहितशङ्कोः पूर्वस्यां दिशि एकविंशत्यङ्गुले शङ्कुर्देयः, तद्दक्षिणत एकोनत्रिंशदधिक-शताङ्गुलेषु शङ्कुर्देयः, स प्रशास्तृधिष्ण्यमध्यः। एवं पृष्ठ्यात उत्तरतो नवाङ्गुले शङ्कुर्देयः स होतृधिष्ण्यमध्यः। वेदिमध्ये वर्तमाना प्राचीरेखा पृष्ठ्या। तस्मा-दुत्तरतः षट्त्रिंशदङ्गुलान्तरालाश्चत्वारः शङ्वो निखेयाः। ते ब्राह्मणाच्छंसि-पोतृ–नेष्टृच्छावाकधिष्ण्यानां मध्याः। शङ्कुषु अष्टादशाङ्गुलानि चतुरस्राणि चतुरङ्गुलोच्चानि स्थण्डिलानि मृदा कर्तव्यानि, ते धिष्ण्या उच्यन्ते। यूपावट-देशात्पश्चिमतः पदं त्यक्त्वा शङ्कुर्देयः, तस्मात्पश्चिमतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः, तस्माद्दक्षिणत उत्तरतश्च सार्धद्व्यरत्नि-सार्धद्व्यरत्निव्यवहिते देशे शङ्कू देयौ, ते उत्तरवेदेः श्रोणी। एवं पूर्वस्मादंसौ। इयं दशपद्योत्तरवेदिः कार्या सा च चतुरङ्गुलोच्चा हस्तोन्नता वा। उत्तरवेदेः पश्चात् पदद्वयात्मकप्रक्रमव्यवहिते देशे हविर्धानपूर्वद्वारमध्ये शङ्कुर्देयः। तस्मात्पश्चाद्दशसु प्रक्रमेषु पश्चिमद्वारमध्यशङ्कुः। द्वारशङ्कोर्दक्षिणे उत्तरे च पदद्वयात्मकपञ्च-पञ्चप्रक्रमव्यवहिते देशे शङ्कुचतुष्टयं देयम्। एवं कृते दशप्रक्रममितश्चतुरस्रश्चतुस्तम्भो हविर्धानमण्डपः संपद्यते। हविर्धान-मण्डपे समप्रमाणानि चत्वारि कोष्ठकानि भावयित्वा आग्नेयकोष्ठस्य मध्ये चतुर्विंशत्य-

ङ्गुलमितं समचतुरस्रं प्रकल्प्य तस्य चतुर्षु कोणप्रान्तेषु प्रादेशमात्रविस्तारान् प्रादेशान्तरालान्बाहुमात्रनिम्नान् गर्तान् खनेत्। तेषामुपरि वारणानि फलकानि भूसंलग्नानि स्थपुटयेत्। एते गर्ता उपरवशब्देन व्यपदिश्यन्ते। हविर्धानस्य वायव्यकोणादुत्तरे समसूत्रतया पदद्वयात्मकचतुःप्रक्रमव्यवहिते देशे शङ्कुर्देयः स आग्नीध्रीयस्य नैर्ऋत्यकोणः। तस्मादुत्तरतः पञ्चारत्निव्यवहिते देशे शङ्कुर्देयः स आग्नीध्रीयस्य वायव्यकोणः। तयोः शङ्क्वोरार्जवेन पुरस्तात् पञ्चारत्निव्यवहिते देशे शङ्कू देयौ। तौ आग्नेयैशानौ। पञ्चारत्निपरिमितं चतुरस्रमाग्नीध्रीयं कार्यम्। तस्य दक्षिणे पूर्वे च द्वारे कर्तव्ये। एवमेव दक्षिणे आग्नीध्रीयस्य समसूत्रतया मार्जालीयागारं पूर्वद्वारवर्जमुदग्द्वारमाग्नीध्रीयवत्कर्तव्यम्। उभयोर्मध्ये ऽष्टादशाङ्गुलपरिमितौ धिष्ण्यौ कर्तव्यौ। महावेदेरुत्तरांसादुदक् त्रिंशदङ्गुले शङ्कुर्देयः। तस्मात्प्रत्यक् चतुस्त्रिंशदङ्गुलव्यवहिते देशे शङ्कुर्देयः स चात्वालमध्यः। द्वात्रिंशदङ्गुलपरिमितश्चतुरस्रश्चात्वालः कार्यः। उत्तरांसात्पश्चाद् द्वादशसु प्रक्रमेषु पृष्ठ्याया उत्तरतश्च चतुर्दशसु प्रक्रमेषु उत्करमध्यः। तत्र षडङ्गुलेन भ्रमणं कार्यम्, चतुरङ्गुलो गर्तश्च कार्यः। चात्वालादुत्तरतः पूर्वद्वारं पञ्चारत्निमितं शामित्रम्। हविर्धानमण्डपस्योपरि च्छदिस्त्रयेण, सदसो नवभिश्छदिर्भिरुदगग्रैराच्छादनम्। सदोमण्डपे कोणेषु स्तम्भचतुष्टयम्। महावेद्या अवशिष्टांशस्य आच्छादनं भवेन्न वा। उत्तरवेद्यास्तु आच्छादनं क्रियते। सदोहविर्धानयोः परितोऽपि च्छादनम्। व्यङ्गुलखाता महावेदिः।

अयं सौमिकवेदिनिर्माणप्रकारस्तृतीयकाण्डेऽत्रैव विहितः। एवमन्योऽपि पैतृक्यादिवेदिनिर्माणप्रकारस्तत्र तत्रोक्तो बोध्यः। इत्थमनेकविधानां विधिमन्त्रार्थवादनिषेधादीनामाकरोऽयं ग्रन्थः। तत्र विधिः—प्रमाणान्तराज्ञातफलवति कार्ये पूर्वमप्रवृत्तं पुरुषं यः प्रवर्तयति स विधिरित्युच्यते। अत एव प्रवर्तना, प्रेरणा, प्रैष इत्यादयो विधेः पर्यायशब्दाः। अज्ञातज्ञापकोऽप्रवृत्तप्रवर्तकश्च विधिरिति च न्यायविदः। स च लोके आचार्यादिपुरुषनिष्ठोऽभिप्रायविशेषः। लोके हि आचार्यादिः स्वशिष्यं भृत्यं वा क्वचित्कर्मणि प्रेरयितुमिच्छन् लिङ्घटितं वाक्यमुच्चारयति तच्छ्रुत्वा च शिष्यादिः तस्मिन् कार्ये झटिति प्रवर्तते प्रवृत्तश्च केनचित्पृष्ट आचार्यप्रेरितोऽहमिदं करोमि इति वदति सोऽपि आचार्यादिरहमेनमस्मिन्कार्ये प्रवर्त्तयामि इति अभिमनुते अनेन व्यवहारेण आचार्यादिप्रेरकनिष्ठोऽभिप्रायविशेष एव विधिप्रेरणादिशब्दाभिधेय इत्यवगम्यते। वेदे च स धर्मविशेषो विध्यादिशब्दनिष्ठ एवेति वेदस्यापौरुषेयत्वमभिदधतां मीमांसकानां सिद्धान्तः। ईश्वरकर्तृकत्वं तु

वेदस्याङ्गीकुर्वतां नैयायिकादीनां मते ईश्वरेच्छैव स इति सिद्ध्यति। तत्तत्क्रिया-जन्यमपूर्वमेव नियोगशब्दाभिधेयं विधिशब्दवाच्यं मन्यन्ते मीमांसैकदेशिनः प्राभाकराः। विधेयधात्वर्थादिनिष्ठमिष्टसाधनत्वमेव विधिरिति मण्डनमिश्रप्रभृतयः केचित्। वैयाकरणा अपि मण्डनमिश्राशयमेवानुरुन्धते।

इष्टसाधनत्वम्, बलवदनिष्टाननुबन्धित्वम्, कृतिसाध्यत्वम् इति त्रितयमपि विधिः इत्यपि केचन नैयायिकाः। एवं प्रेरणादिपदार्थस्य लिङ्बोध्यस्यैव मुख्यतो विधित्वेऽपि तद्घटितवाक्यस्य विधिरिति व्यवहारः क्रियते लोके वेदे च। तादृशो विधिश्चतुर्विधः। उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति।

तत्रोत्पत्तिविधिः—

येन विधिना इदं कर्म कर्तव्यम् इत्यवबोध्यते स उत्पत्तिविधिः। उत्पत्तिरत्राज्ञातज्ञापनम्, एतद्वाक्याभावे प्रमाणान्तरेण केनापि एतत्कर्मस्वरूपं नावगमितम्, अतश्च अनेनैव विधिना कर्मस्वरूपं कर्तव्यतया अवबोध्यत इति कर्मस्वरूपमात्रबोधकस्य विधेरुत्पत्तिविधिरिति व्यवहारः। यथा—'अग्निहोत्रं जुहुयात्', सोमेन यजेत' इत्यादयः।

विनियोगविधिः—

उत्पन्नस्य कर्मणः अर्थात् प्रमाणान्तरेणावगतस्य द्रव्यदेवतादेर्वा लोकावगतस्य अन्याङ्गतो बोधको विधिर्विनियोगविधिः। यथा—'दध्ना जुहोति' अत्र लोकावगतस्य दध्नः अग्निहोत्राङ्गत्वमनेन विधिना बोध्यत इति, अयं विधिर्विनियोगविधिरित्युच्यते। एवं 'यदग्नये च प्रजापतये च सायं जुहोति' इत्यादावपि लोकावगताग्न्यादिदेवताया होमाङ्गत्वमवगम्यत इत्ययमपि विधिर्विनियोविधिरित्युच्यते। विनियोगोऽङ्गत्वबोधनम्, तत्सम्बन्धी विधिर्विनियोगविधिरित्यर्थः।

प्रयोगविधिः—

दर्शपूर्णमासादिप्रकरणेषु पृथक् पृथक् श्रुतानां प्रधानविधीनामङ्गविधीनां च एकवाक्यतासम्पादनेन अनुष्ठानस्य यथावत्सिद्धये यो विधिः कल्प्यते स प्रयोगविधिः। यथा—दर्शपूर्णमासप्रकरणे एव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति प्रधानविधिः श्रूयते, तत्रैव 'समिधो यजति' इत्यादयोऽङ्गविधयोऽपि। तेषां क्रमेणानुष्ठानसिद्धये 'समिदाद्यङ्गविशिष्टाभ्यां दर्शपूर्णमासाभ्यां स्वर्गं सम्पादयेत्' इति यो विधिः कल्प्यते स प्रयोगविधिः। प्रयोगोऽनुष्ठानम्, तद्बोधको विधिः प्रयोगविधिः।

अधिकारविधिः—

विहितस्य कर्मणः फलसम्बन्धो येन विधिना बोध्यते सोऽधिकारविधिः।

अधिकारः फलभोक्तृत्वम्, तत्सम्बन्धबोधको विधिरधिकारविधिरित्यर्थः। यथा—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति। यः स्वर्गं कामयते स तत्सम्पादनाय अग्निहोत्रहोमं कुर्यादिति। एवं च अस्य कर्मण इदं फलमिति यो विधिर्बोधयति सोऽधिकारविधिरिति फलितम्। स विधिः पुनस्त्रिविधः—अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति।

अपूर्वविधिः—

एतद्विधिप्रवृत्तेः पूर्वं यः पदार्थः प्रमाणान्तरेण सर्वथाऽज्ञातः तादृशार्थबोधको विधिरपूर्वविधिः। यथा 'व्रीहीन् प्रोक्षति', 'अग्निहोत्रं जुहोति' इत्यादिः। अत्र हि एतद्विध्यभावे प्रोक्षणादि केनापि प्रमाणान्तरेण न प्राप्तं तादृशमर्थमवबोधयत्येव विधिः।

नियमविधिः—

एतद्विधिप्रवृत्त्यभावेऽपि विधेयार्थस्य यत्र विकल्पेन (पाक्षिकतया) प्राप्तिः तत्र यः प्राप्यमाणस्य अप्राप्तांशः तादृशांशप्रापको विधिर्नियमविधिः। यथा 'व्रीहीनवहन्ति' अत्र एतद्विध्यभावेऽपि अवहननस्य प्रमाणान्तरेण प्राप्तिरस्ति। कथमिति चेत्? 'यदाग्नेयोऽष्टाकपालः पुरोडाशः पौर्णमास्याममायां चाच्युतो भवति' इति वाक्येन पुरोडाशद्रव्यको यागो विहितः, तेनैव पुरोडाशसम्पादनमर्थप्राप्तम्। पुरोडाशश्च पिष्टपिण्डरूपः, पिष्टानि च तण्डुलैः सम्पाद्यानि, तण्डुलाश्च विमुक्ततुषा व्रीहय उच्यन्ते, वितुषीभावश्च अवहननेन सम्पाद्यते, एवं च अवहननमन्तरा वितुषीभावस्यासम्भवाद् अवहननं पुराडाशान्यथानुपपत्तिरूपया अर्थापत्त्या अन्वयव्यतिरेकाभ्यां चावगम्यत एव। तथापि अवघातस्य वितुषीभावसाधनत्वेनैव प्राप्तेर्वक्तव्यत्वाद् वितुषीभावसाधनानां नखविदलनादीनामपि प्राप्तिः कदाचिद् भवतीति, तत्पक्षे अवहननस्य प्राप्तिर्नास्ति। अतश्च अवहननस्य पाक्षिकी एव प्राप्तिरिति। नखविदलनदशायां या अप्राप्तिरस्ति तादृशाप्राप्तांशपूरकत्वाद् विधिरयं नियमविधिरित्युच्यते। नियमोऽप्राप्तांशपूरणम्, तद्बोधको विधिर्नियमविधिरित्यर्थः।

परिसंख्याविधिः—

उभयोः साधनयोः प्राप्तौ इतरव्यावृत्तिफलको विधिः परिसंख्याविधिः। परिसंख्या व्यावृत्तिः तद्बोधको विधिः परिसंख्याविधिरित्यर्थः। यथा—'पञ्च पञ्चनखा भक्ष्याः' अत्र शशादिपञ्चनखपञ्चकस्य तदतिरिक्तपञ्चनखस्य च भक्ष्यत्वेन प्राप्तौ सत्यां पञ्चातिरिक्तपञ्चनखभक्षणव्यावृत्तावेव विधेस्तात्पर्यमिति परिसंख्या-

विधिः । शशादीतरपञ्चनखभक्षणव्यावृत्तिरनेन विधिना क्रियत इति विधिरयं परिसंख्याविधिः । नियमविधेरप्राप्तांशपूरणं व्यापारः, इतरनिवृत्तिस्तु आर्थिकी । परिसंख्याविधौ तु इतरनिवृत्तिरेव व्यापार इति तयोर्भेदः ।

मन्त्रः—

अनुष्ठेयक्रियादिस्वरूपप्रकाशका मन्त्रा इत्युच्यन्ते । विधिना हि तत्तत्कर्म कर्तव्यतया विहितम् । अनुष्ठेयस्य कर्मणोऽप्रमादायानुष्ठानकाले स्मरणमपि अवश्य-कर्तव्यतया समापतति, तच्च स्मरणं तदर्थबोधकैर्मन्त्रैः क्रियत इति मन्त्राणां प्रयोग-समवेतार्थस्मारकत्वं सिद्धयति ।

यद्यपि उपायान्तरेणापि स्मरणं कर्तुं शक्यते तथापि अन्येनोपायेन स्मरणे कारिते तत्तत्प्रकरणपठिता मन्त्रा निरर्थका भवेयुः । नह्यन्यत् प्रयोजनं तेषामुपपादयितुं शक्यते । अतस्तदानर्थक्यभिया मन्त्रैरेव स्मरणमुपादेयं नान्येनोपायेनेति नियमः क्रियते । नियमस्वरूपं तु नियमविधिस्वरूपनिरूपणावसरे निरूपितम् । ते च मन्त्रा अनेक-प्रभेदभिन्ना अपि प्राधान्येन चातुर्विध्यभाजः । करणमन्त्रः, क्रियमाणानुवादिमन्त्रः, अनुमन्त्रणमन्त्रः, जपमन्त्रश्चेति । तत्र पूर्वं मन्त्रमुक्त्वा मन्त्रान्ते यत्र कर्म क्रियते स करणमन्त्रः, यथा—याज्यापुरोऽनुवाक्यादयः । तत्र हि यद्देवताकं हविरग्नौ प्रक्षेप्तु-मिष्यते तद्देवताकां याज्यां पठित्वा याज्यान्ते वषट्कारे कृते हविरग्नौ प्रक्षिप्यते । अतः प्रक्षेपपूर्वभावित्वात् मन्त्रोऽयं करणमन्त्र इत्युच्यते ।

क्रियमाणानुवादी मन्त्रः—

यत्र मन्त्रोच्चारणकाल एव कर्म क्रियते स क्रियमाणानुवादी मन्त्रः क्रियमाणस्य कर्मणोऽनुवादकरणात् । यथा—यूपपरिव्याणमन्त्रः । स हि त्रिवृता रशनया अध्वर्युणा यूपे परिवेप्ट्यमाने तत्काल एव 'युवा सुवासा' इति मन्त्रोऽध्वर्युणा पठ्यते । अतः क्रियमाणकर्मसमकालमेव मन्त्रपाठात् मन्त्रोऽयं क्रियमाणानुवादी उच्यते ।

अनुमन्त्रणमन्त्रः—

हविःप्रक्षेपाद्यनन्तरं यो मन्त्रः पठ्यते सोऽनुमन्त्रणमन्त्रः । यथा—'एको मम एका तस्य योऽस्मान् द्वेष्टि यं च वयं द्विष्मः त्विषिमान् भूयासम्' इति । स हि अध्वर्युणा हविःप्रक्षेपे कृते स्वेनापि 'इदमग्नये न मम' इति उद्देश्यत्यागरूपे यागेऽनु-ष्ठिते समनन्तरमेव यजमानेन पठ्यते । अतः अनु यागानन्तरं मन्यते उच्चार्यते इत्यनु-मन्त्रणमन्त्र इति व्युत्पत्त्याऽनुमन्त्रणमन्त्रत्वमस्य ।

जपमन्त्रः—

केवलमदृष्टार्थमपि जपरूपत्वेन ये पठ्यन्ते ते जपमन्त्राः । 'मयीदमिति यजमानो जपति' इत्येवमादिः । अत्र पूर्वोक्तानां त्रयाणां प्रयोगसमवेतार्थस्मारकविधया दृष्टार्थत्वम् । अन्तिमस्य तु केवलमदृष्टार्थत्वमिति केषाञ्चिन्मतम् । जपमन्त्रस्यापि अर्थस्मारकविधमेव प्रयोजनवत्त्वमिति केचित् । एतेषामृग्यजुःसामरूपेण पुनस्त्रैविध्यम् । तत्र पादबद्धा अर्थात् छन्दोबद्धा मन्त्रा ऋचः, प्रश्लिष्टतया संहितारूपेण पठिता मन्त्रा यजूंषि, ऋचामुपरि क्रियमाणो गीतिविशेषः साम इत्युच्यते ।

अर्थवादः—

विधिसमीपे विधेयार्थस्तावकतया प्रवृत्तं वाक्यमर्थवादः । विधिर्हि यं कञ्चनार्थं विदधाति तत्र पुरुषाणां प्रवृत्तिसिद्धये तद्विषयिणीं स्तुतिमपेक्षते । अर्थवादश्च तादृशमर्थं स्तौति । यथा लोके इयं गौः क्रेतव्येत्युक्ते तावन्मात्रेण पुरुषाणां प्रवृत्तिर्न जायते, इयं बहुक्षीरा जीवदपत्या साध्वी इत्यादिस्तुतौ कृतायां समनन्तरमेव प्रवृत्तिर्जायते पुरुषाणाम् । वेदेऽपि विधिमात्रेण पुरुषाणां प्रवृत्त्यनुदयात् तत्सिद्ध्यर्थं स्तुत्या कयाचन भाव्यम् । तादृशी स्तुतिरर्थवादेन क्रियते । एवं निषेधस्थलेऽपि निषेध्यादर्थात् पुरुषाणां निवृत्तिसिद्धये निषेधोऽपि निषेध्यस्य निन्दामभिलषति । सा निन्दा च तत्सहितेनार्थवादेन क्रियते । एवं च अर्थवादस्य विधिसन्निहितस्य प्रवृत्तिजनकत्वम्, निषेधसन्निहितस्य निवृत्तिजनकत्वमिति भेदोऽपि फलितः । अस्य च चातुर्विध्यमुपलभ्यते वेदे निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात् । निन्दाप्रशंसयोः स्वरूपमधुनैवोपवर्णितम् । यत्रैककर्तृकमुपाख्यानं श्रूयते सा परकृतिः । यत्र त्वनेककर्तृकमुपाख्यानं स पुराकल्पः । इतोऽप्यधिकतया भेदा उपात्ता भाष्यादौ—

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः
परक्रिया पुराकल्पो व्यवधारणकल्पना ।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु" इति ।

ते च भेदाः पूर्वोक्तेषु चतुर्ष्वेवान्तर्भूताः ॥

वस्तुतस्तु अर्थवादानां स्तुतिनिन्दान्यतरबोधकत्वेनैव फलवत्त्वस्याप्यङ्गीकरणीयतया स्तुतिनिन्दान्यतरबोधकं वाक्यमर्थवाद इति लक्षणमनुगमय्य तेषां द्वैविध्याङ्गीकरणमेवोचितं प्रतीयते ।

ग्रन्थेऽस्मिन् मुख्यतया यागो विहितो होमो दानञ्च ।

तत्र यागो नाम—

देवतोद्देशेन अग्नौ प्रक्षेपविशिष्टो द्रव्यत्यागो यागः । सर्वत्र हि यजति-चोदना-चोदितस्थले अर्थात् 'सोमेन यजेत' इत्यादौ यजिधात्वर्थः कश्चित्प्रतीयते । तस्मिन्नेव वाक्ये तदुद्देशेन किञ्चिद् द्रव्यमपि विधीयते । वाक्यान्तरेण च देवताया अपि विधानमस्ति । तत्र तां देवतामुद्दिश्य तस्य द्रव्यस्य यस्त्यागः 'इदमिन्द्राय न मम' इत्यादिरूपो मानसिकव्यापारः स एव यागपदार्थः । स च त्यागरूपत्वाद्यजमानेनैव कर्तव्यो न तु ऋत्विगादिभिः । तेषां यजमानद्रव्ये स्वत्वाभावेन त्यागकरणेऽसामर्थ्यात् ।

ते च यागाः प्रकृतिभूता विकृतिभूताश्च सन्ति । तत्र यस्य कर्मणः सन्निधाने तदपेक्षितं सर्वमप्यङ्गजातं पठितम् अन्यतश्चाङ्गापेक्षा नास्ति सा प्रकृतिः । अथवा यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः । यथा दर्शपूर्णमासौ । तत्र हि अन्वाधानादिब्राह्मणतर्पणान्तानि सर्वाण्यङ्गानि स्वसन्निधान एवाम्नातानि । नान्यतोऽङ्गान्यागच्छन्ति । अस्मादेव सर्वास्विष्टिषु धर्मा अतिदेशेन गच्छन्ति, अतो दर्शपूर्णमासयागः सर्वासामिष्टीनां प्रकृतिरुच्यते । इयं प्रकृतिर्द्विधा मूलप्रकृतिः, अवान्तरप्रकृतिश्च । यत्कर्म सर्वथा स्वाङ्गविषये कर्मान्तरं नापेक्षते स्वापेक्षितसर्वाङ्गविशिष्टमेव पठितं सा मूलप्रकृतिरित्युच्यते । यथा दर्शपूर्णमासादिः । यत्तु कर्म स्वाङ्गविषये किञ्चित्कर्मान्तरमपेक्षते साऽवान्तरप्रकृतिरित्युच्यते । यथाऽग्नीषोमीयः पशुः । अयं च प्रयाजानुयाजाद्यङ्गविषये दर्शपूर्णमासावपेक्षते । सवनीयादीनां पशुयागानां यूपादिविषये

---

१ प्रयाजा—समिधो यजति, तनूनपात यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति इति पञ्चभिर्वाक्यैर्विहिताः समिदादिसंज्ञकाः पञ्च यागाः प्रयाजा इत्युच्यन्ते । इमे च दर्शपूर्णमासप्रकरणे पठितास्तदङ्गभूताः । तत्र दर्शपूर्णमासयोः पञ्चैव प्रयाजाः । विकृतौ क्वचिन्नव प्रयाजा इज्यन्ते । 'एकादशप्रयाजान् यजति' इत्यादिना संख्याधिक्यमपि यत्र विहितं तत्र एतेषामेव पञ्चानामावृत्त्या संख्याधिक्यं संपादनीयम् । अत्र समिन्, तननपात्, इड्, बर्हि इति चत्वारि चतुर्णां प्रयाजानां नामधेयानि तानि च तन्नामकदेवतासम्बन्धं निमित्तीकृत्यैव प्रवृत्तानि । अत एव तादृशेषु चतुर्षु प्रयाजेषु समिदादयः क्रमेण देवताः, पञ्चमे परप्रयाजे यक्ष्यमाणदेवतानां स्वाहाग्निमित्यादिनामसंकीर्तनात् ता एव देवताः । यत्र तु संख्याधिक्यं तत्र देवताभेदः ।

२ अनुयाजाः—दर्शपूर्णमासयागे त्रयोऽनुयाजाः । अत्र समिदादिवत् न त्रयाणां नाम श्रुतं किन्तु मन्त्रवर्णबोध्याया एव देवताया अत्रापि स्वीकारात्, तन्नाम्नैव बर्हिः, नराशंसः, स्विष्टकृत्, इति नाम्ना व्यवहियन्ते । इमेऽनुयाजा अपि प्रयाजवद्विकृतौ नवैकादशादिसंख्याधिक्यं भजन्ते तत्रापि प्रयाजवदेव देवतान्तरं बोध्यम् ।

अपेक्षा भवति । तत्र तिस्रो मूलप्रकृतयः—दर्शपूर्णमासौ, अग्निहोत्रम्, अग्निष्टोमसंस्थाको ज्योतिष्टोमश्च । एषु च न कुतश्चित्कर्मणोऽङ्गान्यतिदिश्यन्ते ।

विकृतिः—यत्र कानिचिदेवाङ्गानि पठितानि इतराणि तु अपेक्षितानि अन्यत आनीयन्ते सा विकृतिः । यथा 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति विहिता सौर्येष्टिः । तत्र हि स्वसन्निधाने न समग्राङ्गोपदेशः किन्तु 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादिकतिपयानामेवाङ्गानाम् । इतराणि तु दर्शपूर्णमासत एवानीयन्ते ।

त्यक्तस्य हविषो विहितदेशे आहवनीयादौ यः प्रक्षेपः स होम इत्युच्यते । स द्विविधः प्रधानहोमः, अङ्गहोमश्चेति । 'अग्निहोत्रं जुहोति' इत्यादयः प्रधानहोमाः तत्तत्फलोद्देशेन विहिताः । तत्र न प्रक्षेपमात्रं धात्वर्थः किन्तु प्रक्षेपः, उद्देशः, त्याग इति त्रितयमपि ।

यद्यपि एतदंशत्रयं यागेऽप्यविशिष्टं देवतोद्देशेन द्रव्यत्यागस्य प्रक्षेपविशिष्टस्यैव यागपदार्थत्वात्, होमेऽपि देवतोद्देश्यकद्रव्यत्यागस्य सत्त्वात् । तथापि त्रयाणामंशानां समप्राधान्यं होमस्थले, यागस्थले तु प्रक्षेपस्याङ्गत्वम्, इतरयोः समप्राधान्यमिति विशेषः । अयमेव प्रक्षेपो यागाङ्गभूतोऽङ्गहोम इत्युच्यते । अयमेव प्रभेदः सूत्रकारेण जैमिनिना 'यजतिचोदना द्रव्यदेवताक्रियं समुदायं कृतार्थत्वात्', 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्" (जै० सू० ४।२।२८,२९) इति सूत्राभ्यां प्रकटीकृतः । 'यज्ञं व्याख्यास्यामः,' 'द्रव्यं देवतात्यागः' (का० श्रौ० सू० १।२।१,२) इति कात्यायनोऽपि ।

अत्राङ्गत्वनिर्णायकानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या रूपाणि षट् प्रमाणान्युक्तानि, तान्यपि सुखावबोधाय प्रसङ्गत उदाह्रियन्ते ।

तत्र श्रुतिर्नाम—

अङ्गत्वबोधने प्रमाणान्तरापेक्षां विना स्वातन्त्र्येण यः समर्थः शब्दः स श्रुतिरित्युच्यते । इयं श्रुतिस्त्रिविधा—विधात्री, अभिधात्री, विनियोक्त्री चेति । तत्र यः प्रवर्तनारूपविधिबोधकः शब्दः स विधात्रीत्युच्यते । स च लिङ्-लेट्-लोट्-तव्यप्रत्ययादिः, तस्यैव हि विधायकत्वं शास्त्रकारैरभिमतं यथा-यजेत, यजानि, यष्टव्यमित्यादि ।

शक्त्या स्वार्थाभिधायकः शब्दः अभिधात्रीत्युच्यते । यथा—'व्रीहीनवहन्ति' इत्यत्र व्रीहिपदं सतुषद्रव्यव्रीहिरूपस्वार्थाभिधायकम् । यद्यपि इयं श्रुतिर्लिङ्गप्रमाणेऽन्तर्भूतेवाभाति शब्दगतस्यार्थप्रतिपादनसामर्थ्यस्यैव लिङ्गत्वात्, तथापि मन्त्रघटकीभूतपदानां यत् सामर्थ्यं तल्लिङ्गमित्युच्यते । विधिवाक्यगतस्य तस्यैव सामर्थ्यस्य श्रुतित्वमिति

बोध्यम्। अङ्गत्वबोधने या प्रमाणान्तरं नापेक्षते सा विनियोक्त्री श्रुतिस्तृतीया यथा—'दध्ना जुहोति' इत्यत्र दधिपदोत्तरं तृतीया श्रूयते सा च 'कर्तृकरणयोस्तृतीया' (पा० सू० २।३।१८) इत्यनेन करणत्वे कर्तृत्वे च विहिता। करणत्वं च, साधकतमं करणम्' (पा० सू० १।४।४२) इत्यनेन यत्क्रियानिर्वृत्तौ अन्तरङ्गं साधनं तदेवोच्यते। एवं च दध्नेति तृतीयया श्रुतमात्रया स्ववाक्योपात्तहोमं प्रति स्वप्रकृत्यर्थस्य दध्नः साधकतमत्वरूपकरणत्वं बोध्यते। नात्र प्रमाणान्तरमपेक्ष्यते। तच्च करणत्वमेव अङ्गत्वापरपर्यायम् इति व्यवह्रियते। इयं द्वितीयातृतीयादिविभक्तिः श्रुतिरित्युच्यते। अत एव 'निरपेक्षो रवः श्रुतिः'इति लक्षणमुक्तं मीमांसकैः। इयं विभक्तिरूपा श्रुतिः। अत्र सत्यपि सर्वासां विभक्तीनां विभक्तित्वे समाने न सर्वासां श्रुतित्वम्, किन्तु द्वितीया-तृतीया-चतुर्थी-पञ्चमी-सप्तमीरूपाणां पञ्चानामेव विभक्तीनां श्रुतित्वम्। षष्ठ्यास्तु सम्बन्धमात्रबोधिकाया न श्रुतित्वम्। प्रथमाविभक्तेस्तु केषाञ्चिन्मते श्रुतित्वं केषाञ्चिन्मते न। अत्र द्वितीयाश्रुतेरुदाहरणं 'व्रीहीन् प्रोक्षति' इति। तृतीयाश्रुतेः 'दध्ना जुहोति', 'व्रीहिभिर्यजेत' इत्यादि। चतुर्थीश्रुतेः 'विप्राय गां ददाति', 'आत्रेयाय हिरण्यं ददाति' इत्यादि। पञ्चमीश्रुतेः 'अग्नेस्तृणान्यपचिनोति', 'धान्याद्गां वारयति' इत्यादि (लोके)। सप्तमीश्रुतेः—यदाहवनीये जुहोति', 'पदे जुहोति' इत्यादि।

कर्मषष्ठ्या अपि अङ्गत्वं केचनेच्छन्ति यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र इन्द्रियकामस्येति द्वितीयार्थे षष्ठी। दध्ना इन्द्रियं भावयेदिति हि तदर्थः। श्रुतेरस्या विनियोक्त्र्या अन्ये अपि द्वे विधे स्तः समानाभिधानरूपा, एकपदरूपा चेति। तत्र यः शब्दः प्रकृतिप्रत्ययाद्यात्मना अविभाज्यः सन् अनेकधर्मविशिष्टः तत्तद्धर्मावच्छिन्नत्वपुरस्कारेणानेकमर्थमभिदधाति स समानाभिधानश्रुतिरित्युच्यते। यथा 'रामेण' इत्यत्र रामप्रातिपदिकोत्तरं श्रूयमाणा एकैव विभक्तिः सा च विभागानर्हा, परन्तु तत्र विभक्तित्वम्, एकवचनत्वम्, पुंलिङ्गत्वमिति धर्मत्रयमस्ति। तत्र विभक्तित्वधर्मपुरस्कारेण करणत्वं ब्रूते, एकवचनत्वधर्मपुरस्कारेण एकत्वम्, पुंलिङ्गत्वपुरस्कारेण च पुंस्त्वमभिधत्ते। एतेषां त्रयाणामर्थानामभिधायक एक एव शब्दः समान एवेति समानाभिधानश्रुतिरित्युच्यते। एवं यजेतेत्याद्याख्यातस्थलेऽपि बोध्यम्। तत्रापि लिङ्त्वावच्छिन्नेन तेन प्रवर्तनायाः, आख्यातत्वावच्छिन्नेन तेन आर्थीभावनायाः, एकत्वावच्छिन्नेन एकत्वसंख्यायाश्च बोधनात्। अनेकेषामर्थानामभिधायकस्य शब्दस्य समानत्वात् समानाभिधानश्रुतिरिति।

यत्प्रकृतिप्रत्ययरूपेण एकं पदं सत् प्रकृत्यात्मना कञ्चिदर्थम्, प्रत्ययात्मना च कञ्चिदर्थमवबोधयति सा एकपदश्रुतिः। यथा 'यजेत' इत्यत्र प्रकृत्या यागोऽभिधीयते, प्रत्ययेन च एकत्वम्। तत्र एकत्वात्मिकायाः संख्याया यागाङ्गत्वं तदेकपदश्रुत्या। इयं समानपदश्रुतिरित्यपि क्वचिदभिधीयते। अत्र विनियोक्तव्या एव श्रुतेस्त्रिविधाया अङ्गत्वे प्रामाण्यम्। इतरयोस्तु प्रकारान्तरेण प्रामाण्यमङ्गीकृतं मीमांसकैः। इयं च श्रुतिरङ्गत्वबोधिका पूर्वमीमांसायां द्वितीयेऽध्याये निरूपिता। अन्या च काचित्पञ्चमाध्यायगोचरा। साऽनुष्ठेयपदार्थानां क्रमबोधिका। 'अथ ततः प्रथमं कृत्वा परिवीय' इत्येवमादिरूपा यथा—'अथैष ज्योतिः', 'ततो होतारं वृणीते, 'वषट्कर्तुः प्रथममक्षः', 'वेदं कृत्वा वेदिं करोति', यूपं परिवीय सवनीयं पशुमुपाकरोति, अत्र पूर्वं किञ्चिदनुष्ठाय अनन्तरं कर्तव्यत्वेन बोधनीये पदार्थे 'अथ' 'ततः' इत्यादिशब्दः प्रयुक्तः। एवं च आनन्तर्यक्रमरूपबोधको यः शब्दः स श्रुतिपदवाच्यः पाञ्चमिकः। अनश्च तृतीयाध्यायनिरूपिता श्रुतिरङ्गत्वबोधिका। पञ्चमाध्यायगता चानन्तर्यरूपक्रमबोधिकेत्यवगन्तव्यम्।

लिङ्गम्—

तत्तत्पदार्थगतं सामर्थ्यं लिङ्गमित्युच्यते। तथा चोक्तं 'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते'। एवं च यस्य यत्सामर्थ्यं तल्लिङ्गम्। यथा खनित्रस्य मृत्खनने सामर्थ्यम्। कुठारस्य वृक्षच्छेदने सामर्थ्यमित्यादि।

तच्च द्विधा विभक्तं शब्दगतम्, पदार्थपदार्थगतं चेति। पदार्थगतं सामर्थ्यं च अनन्तरोदाहृतम्। शब्दगतं सामर्थ्यं च तत्तदर्थप्रकाशनरूपं यथा—'अग्निर्मूर्द्धा-दिवः' (शु० य० ३।१२) इति मन्त्रः अग्निं प्रकाशयति। 'इमं मे वरुण, (शु० य० २१।१) इति मन्त्रो वरुणं प्रकाशयति। एवं च तत्तत्पदार्थगतं स्वमर्थमालोच्य तत्तत्कार्ये तेषां तेषां यो विनियोगः क्रियते स लिङ्गात्। यथा खनित्रस्य खननसामर्थ्यं पर्यालोच्य खनने विनियोगः क्रियते। यथा वा 'हस्तेनावद्यति' इत्यत्र हस्तस्य कठिनद्रव्यावदान एव सामर्थ्यमवगम्य चरुपुरोडाशरूपहविरवदानं[1] एव विनियोगः क्रियते न तु मांसाद्यवदाने ऽपि। एवं 'स्वधितिनावद्यति' इत्यत्र स्वधितेः सामान्यतोऽवदानाङ्गत्वश्रवणेऽपि मांसावदाने एव तस्य सामर्थ्यं दृष्ट्वा तत्रैव तस्याङ्गत्वं प्रकल्प्यते न तु चरुपुरोडाशाद्यवदानेऽपि। इदमेवार्थगतं लिङ्गमित्युच्यते।

शब्दगतं तु लिङ्गमर्थप्रकाशनरूपसामर्थ्यं पूर्वमुक्तम्। तेन तत्तन्मन्त्राणां तेषु तेषु

---

१ अवदानं नाम समुदायरूपेण तत्तद्यागसिद्धये सम्पादितानां हविषा स्रुवहस्तादिना हवनार्थं यद्ग्रहणं तदुच्यते।

कार्येषु अङ्गत्वं बोध्यते। यथा 'बर्हिर्देवसदनं दामि' (मै० सं० १।१२) इति मन्त्रस्य बर्हिर्लवनप्रकाशकत्वरूपं सामर्थ्यं बुद्ध्वा अनेन मन्त्रेण दर्शपूर्णमासाङ्गभूतबर्हिर्लवनं कर्तव्यमिति बर्हिर्लवने विनियुज्यते। एवं सत्यपि लिङ्गस्य द्वैविध्ये शब्दगतस्यैव सामर्थ्यस्य लिङ्गत्वमित्यभिप्रयन्त्यर्थसंग्रहकारादयः सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयत इति वाक्यमुदाहरन्तः। परन्तु शब्दगतार्थगतयोरुभयोरेव सामर्थ्ययोर्लिङ्गत्वं ग्रन्थकारैरुक्तं तदेव युक्तमित्युत्पश्यामः।

वाक्यम्—

'समभिव्याहारो वाक्यम्' इति सामान्यतो वाक्यलक्षणं कथयन्ति। समभिव्याहारश्च एकस्मिन्वाक्ये अङ्गित्वेन अङ्गत्वेन च अभिमतयोः पदार्थयोरुपादानं यथा 'औदुम्बरो यूपो भवति'इत्यत्र यूपः अङ्गित्वेनाभिमतः, औदुम्बरत्वं चाङ्गत्वेन। तयोरौदुम्बरो यूपो भवतीत्येकस्मिन्वाक्ये सहोपादनमेव वाक्यम्। अत्र च लक्षणे अङ्गत्वबोधकद्वितीयातृतीयाद्यभावे सतीति निवेशनीयम्, अन्यथा 'दध्ना जुहोति'इति श्रुतिविनियोगस्थानेऽपि वाक्यविनियोगः प्रसज्येत। यद्यप्यत्रापि समभिव्याहारोऽस्त्येव तथापि तत्र दध्नेति तृतीयाविभक्तेः श्रवणात् तस्याश्च श्रुतिरूपत्वात् श्रुतेश्च सर्वापेक्षया प्रबलत्वात् प्रधानेन व्यपदेशो भवतीति न्यायेन श्रुतेरेवोदाहरणमिदं न तु वाक्यस्य। एवं च श्रुतिवाक्यस्थलयोरुभयत्रापि एकवाक्योपादानरूपसमभिव्याहारसत्त्वेऽपि तत्र यदि द्वितीयातृतीयादिसंयोगस्तदा श्रुत्या विनियोगः, तदभावे तु वाक्यीयो विनियोग इति ध्येयम्। यत्तु 'एकतिङ् वाक्यम्' इत्यपि वाक्यस्य लक्षणं क्रियते वैयाकरणैः, 'पदसमूहो वाक्यम्' इति तु नैयायिकाः, तत्सर्वमर्थावबोधकस्य लौकिकस्य वाक्यस्य लक्षणम्, न तत्राङ्गाङ्गिभावावबोधनमस्ति। पूर्वोक्तं तु वाक्यमङ्गत्वबोधकप्रमाणेष्वन्तर्गतं मीमांसकैरभिधीयते।

एकवाक्यम्—

एकवाक्यस्य लक्षणम्—"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" (जै० सू० २।१।४६) इति जैमिनिनोक्तम्, तस्यायमर्थः—वाक्यत्वेनाभिमतानां पदसमूहानां मध्ये एकस्य द्वयोस्त्रयाणां वा ततो विभागे यदि पदान्तराणि साकाङ्क्षाण्येवावतिष्ठन्ते न कञ्चनार्थमबोधयितुं शक्नुवन्ति, सर्वाणि पदानि मिलितानि च सन्ति एकमेवार्थमवबोधयन्ति तदेकं वाक्यमिति, यथा 'देवस्य त्वा० गृह्णामि' (शु. य. १. १०) अत्र सर्वाणि पदानि मिलित्वा निर्वापरूपमेकमर्थं प्रतिपादयन्ति। देवस्यत्वेत्यादिनिर्वपामीत्यन्तेषु पदेषु मध्ये कस्यापि पदस्य विभागे सति इतराणि पदानि साकाङ्क्षाण्येव सन्ति,

न च कञ्चनार्थमवबोधयन्ति समुदितान्येव हि निर्वापरूपार्थप्रतिपादकानि । अतः साकाङ्क्षत्वे सति एकार्थप्रतिपादकत्वरूपमेकवाक्यत्वं सर्वैरपि शास्त्रकारैरङ्गीक्रियते ।

प्रकरणम्—

'उभयाकाङ्क्षाप्रकरणम्' उभयोरङ्गभावेन अङ्गित्वभावेन चाभिमतयोर्वस्तुनोर्या परस्पराकाङ्क्षा सा प्रकरणमित्युच्यते । तथा हि दर्शपूर्णमासप्रकरणे—'आग्नेयोऽष्टाकपालः पुरोडाशः, इत्यादिवाक्यैराग्नेयादयो यागा विहिताः, तेषां च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्येन स्वर्गरूपफलार्थत्वमवगमितम् । दर्शपूर्णमासशब्दवाच्यैराग्नेयादिभिर्यागैः स्वर्गं सम्पादयेदिति । तेषां च आकाङ्क्षा उदेति कथं स्वर्गः सम्पादनीय इति । यथा हि लोके कुठारेण छिनत्तीत्येतावदुक्ते यो नाम छेदनप्रकारं न जानाति तस्य आकाङ्क्षोदेति कथमनेन कुठारेण द्वैधीभावः सम्पादयितुं शक्यत इति तद्वदत्रापि । अत्र लोके कुठारं हस्ताभ्यामुद्यम्य कुठाराग्रभागं काष्ठोपरि पातयेत् , एवं बहुवारं निपातने कृते द्वैधीभावः सम्पद्यत इति वक्तव्यं भवति । एवमुक्ते तत्प्रकारमभिज्ञाय तथैव कुर्वन्पुरुषः काष्ठे द्वैधीभावरूपं फलं प्राप्नोति । एवं कथमेभिः स्वर्गः सम्पादयितुं शक्यत इत्याकाङ्क्षायामुदितायामन्वाधानादीनि ब्राह्मणतर्पणान्तान्यङ्गानि एवमेवानुष्ठेयानि, एवमनुष्ठितेषु तेषु तैरुपकृता आग्नेयादयो यागाः स्वर्गरूपं फलं जनयन्ति इत्युक्ते अन्वाधानादीन्यङ्गान्यनुष्ठातुमुद्यतः पुरुषो यथोक्तमनुतिष्ठन् तदुपकृतैर्दर्शपूर्णमासयागैः स्वर्गरूपं फलं प्राप्नोति । अतश्च दर्शपूर्णमासयागानां कथंभावाकाङ्क्षायाः सत्त्वाद् अन्वाधानादीनां क्रियाणां प्रयोजनाकाङ्क्षायाश्च सत्त्वाद् उभयाकाङ्क्षा वर्तते । अनया चोभयाकाङ्क्षया परस्परं सम्बन्धो भवति । अन्वाधानादिभिरङ्गकलापैर्दर्शपूर्णमासोपकारं भावयेत् । तदुपकृतैर्दर्शपूर्णमासयागैः स्वर्गं सम्पादयन्ति । एवं च या दर्शपूर्णमासयागानामन्वाधानादीनां च कर्मणां परस्पराकाङ्क्षा सैवोभयाकाङ्क्षारूपं प्रकरणं तेन च उभयेषामङ्गाङ्गिभावः सिद्ध्यति । इदं च प्रकरणं द्वेधा कथ्यते मीमांसकैः—महाप्रकरणम् , अवान्तरप्रकरणं चेति । तत्र प्रधानयागस्य तदङ्गानां च या परस्परमुपकार्योपकारकभावविषयिणी आकाङ्क्षा सा महाप्रकरणमित्युच्यते यथा—दर्शपूर्णमासप्रयाजयोः परस्पराकाङ्क्षा । दर्शपूर्णमासाः प्रधानानि प्रयाजाश्चाङ्गानि, तेषां च याकाङ्क्षा सा महाप्रकरणम् । तदङ्गानां च या परस्परमाकाङ्क्षा सा अवान्तरप्रकरणम् । यथा—प्रयाजा दर्शपूर्णमासाङ्गभूताः तेषां तदङ्गानामभिक्रमणादीनां च याऽऽकाङ्क्षा सा ऽवान्तरप्रकरणम् । अभिक्रमणं नाम—प्रयाजहोमकाले एकैकामाहुति

प्रति किंचित् किंचिदग्रे पदनिक्षेपणरूपं गमनम्। इतिकर्तव्यता नाम—कथमिदं कर्तव्यमित्याकारिका याऽऽकाङ्क्षा सोच्यते। 'पचेत्' इत्युक्ते कथमहं पचेयमित्याकाङ्क्षोदेति अस्या एवेतिकर्तव्यतायाः कथम्भावाकाङ्क्षा, इत्थम्भावाकाङ्क्षा, प्रकरणविशेषाकाङ्क्षा इत्यादिव्यवहार इति।

स्थानम्—

अन्यतराकाङ्क्षा स्थानम्। अङ्गत्वेनाङ्गित्वेन च सम्बन्धयोग्ययोः पदार्थयोरन्यतरस्य स्वापेक्षितोपकारकलाभेन उपकार्यलाभेन वा निवृत्ताकाङ्क्षत्वे सति अन्यतरस्य तादृशाकाङ्क्षासत्त्वे इतरस्यापि आकाङ्क्षामुत्थाप्य यः परस्परं सम्बन्धः स स्थानमित्युच्यते। यथा—'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत् स्वर्गकामः' इत्यनेन काचनेष्टिः नक्षत्रेष्टिसंज्ञका विहिता। सा च औषधद्रव्यका दर्शपूर्णमासविकृतिः। तस्याश्च साध्याकाङ्क्षायां स्ववाक्योपात्तं स्वर्गादिकं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां समानपदोपात्तो धात्वर्थः करणत्वेनान्वेति। तत इतिकर्तव्यताकाङ्क्षोदेति। उदितायां च तस्यां तच्छामकत्वेन स्वप्रकृतिभूताद् दर्शपूर्णमासयागात् प्रयाजादयो धर्मा अतिदिश्यन्ते। यद्यपि सौर्ययागसन्निधावपि उपहोमसंज्ञकाः केचन होमाः पठिताः। ते च सौर्ययागेन सह इतिकर्तव्यतया सम्बद्धुं शक्नुवन्ति। तथापि सौर्ययागो न तान् प्रथमतः स्वाकाङ्क्षाशामकत्वेन परिगृह्णाति, तेषां प्रथमतया स्वसन्निधावेव पठितत्वेन ततः पूर्वं क्वचिदपि तैरुपकाराजननात्, स्वापेक्षितोपकारजननेऽनिश्चितत्वात् निश्चिततया कृतोपकाराणि प्रयाजादीनि प्राकृतान्येव स्वोपकारजनकत्वेनापेक्षन्ते, तेषां तु प्रकृतावुपकारसम्पादनेन कृतार्थत्वाद् आकाङ्क्षा विनिवृत्ता। शान्ताकाङ्क्षाणामपि तेषां पुनराकाङ्क्षामुत्थाप्य सौर्ययागेन साकं सम्बन्धः सम्पाद्यते। अतश्च सौर्ययागस्य साकाङ्क्षत्वात् प्रयाजादीनां च निराकाङ्क्षत्वाद् अन्यतराकाङ्क्षैव वर्वर्ति, नोभयाकाङ्क्षा इति विकृतिप्राकृताङ्गयोर्योऽङ्गाङ्गिभावेन सम्बन्धः सोऽन्यतराकाङ्क्षारूपस्थानप्रमाणेनैव। एवं प्राकृताङ्गसम्बन्धेन विनिवृत्ताकाङ्क्षायां प्रकृत्यां तस्याः पुनराकाङ्क्षामुत्थाप्य स्वसन्निधिपठिताङ्गैः साकं यः सम्बन्धः क्रियते सोऽप्यन्यतराकाङ्क्षयैव। विकृतिसन्निधौ पठितान्युपहोमादीनि अनन्यप्रयोजनानि स्वप्रयोजनलाभार्थं विकृतिसम्बन्धमपेक्षन्ते। विकृतिस्तु प्राकृतैरङ्गैर्निराकाङ्क्षा तिष्ठति। एवं निराकाराकाङ्क्षया प्रकृत्या सह साकाङ्क्षाणामुपहोमानां विकृतेराकाङ्क्षामुत्थाप्य यः सम्बन्धः सोऽप्यन्यतराकाङ्क्षारूपस्थानप्रमाणेन।

एवं च यत्राङ्गाङ्गिनोरुभयोरपि स्वारसिकैवाकाङ्क्षा प्रकरणम्। यत्र तु द्वयो-

रन्यतरत्र प्रकारान्तरेण शान्ताकाङ्क्षत्वम्, अन्यतरस्य च साकाङ्क्षत्वम्, तत्र यो निराकाङ्क्षस्यापि आकाङ्क्षामुत्थाप्य इतरेण सम्बन्धः स स्थानमिति। इदमेव च क्रम इत्यप्युच्यते। इदमङ्गत्वग्राहकेषु प्रमाणेषु पञ्चमं प्रमाणम्। इदमेव सादेश्यमित्युच्यते। सादेश्यं च समानदेशवत्त्वम्। समानदेशश्च पाठतोऽपि संभवत्यनुष्ठानतोऽपि। अत इदं पाठसादेश्यमनुष्ठानसादेश्यमिति द्विधा विभक्तम्। तत्र पाठतः सादेश्यं यथा 'दैव्याय कर्मणे शुन्धदूध्वं देवयज्यायै' (शु० य० १।) इति मन्त्रः सान्नाय्ययागसन्निधौ पठित इति कृत्वा सान्निध्यपाठात् सान्नाय्यपात्राङ्गं भवति। अनुष्ठानेन ययोः पदार्थयोरेकस्मिन्काले एकस्मिन्देशे वाऽनुष्ठानं तयोरङ्गाङ्गिभावोऽनुष्ठानसादेश्यात्। यथा सोमयागाङ्गभूतोऽग्नीषोमीयपशुयागो द्वितीयदिनकर्तव्यस्य सोमक्रमस्य सन्निधौ पठितः, तथापि तत्र पाठे औपवसथ्याख्ये चतुर्थेऽहनि अनुष्ठानं तस्य विहितम्, तद्दिनकर्तव्यताङ्गमध्ये उपाकरणनियोजनादयः पदार्थाः पठिताः, तेषां च तद्दिन एवानुष्ठानं कर्तव्यम्। तस्मिन्नेव च दिनेऽग्नीषोमीयः पशुरनुष्ठेय इति तेषां पदार्थानामग्नीषोमीयपशुयागाङ्गत्वमनुष्ठानसादेश्यात् समानदेशेऽनुष्ठानात्। अत्र देशशब्देन कालोऽभिधीयते एकस्मिन्काले चतुर्थेऽहनीति यावत्। पाठसादेश्यमपि द्विधा विभक्तम्—यथाक्रमपाठः, सन्निधिपाठश्चेति। यथाक्रमपाठः—प्रथमं पठितस्य यागस्य प्रथमपठितो मन्त्रोऽङ्गम्। द्वितीयं पठितस्य यागस्य द्वितीयपठितो मन्त्रोङ्गमित्येवं रीत्या। सन्निधिपाठस्तूदाहृत एव।

समाख्या—

इदमङ्गत्वबोधने षष्ठं प्रमाणम्। समाख्या संज्ञा। सा च यौगिकी गृह्यते तयाऽप्यङ्गत्वं बोध्यते। यथा—आध्वर्यवम्, औद्गात्रम्, हौत्रमित्यादिसंज्ञया तत्तद्भागपठितेषु मन्त्रेषु पदार्थेषु वाऽध्वर्य्वादीनां कर्तृतयाऽङ्गत्वम्। रूढसंज्ञा तु लिङ्गेऽन्तर्भवति इति। अलं विस्तरेण।

अस्मिन् संस्करणे पाठकसुखाय वर्णाः स्थूलाः सुस्पष्टा योजिताः। काण्डादौ काण्डप्रतिपाद्या विषयाः समुल्लिखिताः। अध्यायादौ तद्विषयाः। प्रकरणादौ प्राकरणिका विषयाः शीर्षके लिखिताः। भूमिकाविस्तारहेतुर्विषयानुक्रमणिका च पृथङ् निवेशिता। अतः पूर्वं प्रतिज्ञातादपि विस्तारादनावश्यकतया विरम्यते।

मन्येऽनेन संस्करणेन पाठकानां स्यादेव विशेषलाभ इति। एवं विश्वेश्वरकृपया समाप्तमुद्रणस्यास्य ग्रन्थस्य सम्पादनकार्ये विषयसूची-कण्डिकासूचीनिर्माणादौ च यदस्मत्प्रियशिष्येण गोयनकासंस्कृतमहाविद्यालयेऽच्युतग्रन्थमालासहायकसम्पादकेन वेदाचार्येण श्रीवंशीधरशर्मणा सुबहुपरिश्रान्तमुपकृतं च तत्सर्वथा प्रशंसनीयम्।

अतस्तस्मै सकलकल्याणास्पदायाशीःपरम्परां प्रयुञ्जे । अथ च प्रार्थये भगवन्तं यज्ञ-पुरुषमेतादृशकार्योद्यतं श्रीगौरीशङ्करगोयनकाश्रेष्ठिनं सपुत्रमायुष्मन्तं करोत्विति । अन्ततो विबुधवरानधीतिनश्च सानुनयमभ्यर्थये—ग्रन्थमिमं यथावदुपयुज्य सफल-यन्तु सम्पादकीयं परिश्रमं वर्धयन्तु च प्रकाशयितुरतुलमुत्साहमिति ।

काशी
वसन्तपञ्चमी
१९९७

श्रीविद्याधरशर्मा
(महामहोपाध्यायः)

* श्रीगुरुः शरणम् *

सम्पादकीयम्

इह खलु सम्पादनीयेषु धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु प्रथमो धर्म एवेतरमूलस्तम्भतया समाद्रियते धार्मिकप्रवरैः। सोऽयं धर्मो वेदप्रतिपाद्य इति वेद एव सर्वस्वं नामास्तिकधुरन्धराणाम्। वेदशब्दो हि विद्धातोः करणार्थे घञ्प्रत्यये कृते निष्पद्यते। वेद्यन्ते धर्मादिपुरुषार्थचतुष्टयोपाया येन स वेद इति। सायणाचार्यस्त्वाह 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' इति।

तथा च स्मर्यते—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥" इति।

इत्थं हि प्रत्यक्षादिभिरन्यैश्च प्रमाणैर्योऽर्थो नावगम्यते स्वर्गादिरूपश्रेयःसाधनीभूतं तमर्थं यः शब्दमुदाय आवेदयति स एव वेदशब्दार्थ इति प्रत्येतव्यम्।

तत्र 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति हि अद्यावधि प्रसिद्धिरस्ति। तत्र सन्ति बहूनि प्रमाणि तेषु कानिचिदिह निर्दिश्यन्ते—

'मन्त्रब्राह्मणमित्याहुः' (बौ० गृ० २।६।२)। 'आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च' (कौ० सू० १।३)। 'मन्त्रब्राह्मणं वेद इत्याचक्षते' (बौ० गृ० २।६।३)।

'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप० श्रौ० सू० २४।१।३१। सत्या० श्रौ० सू० १।१।७। कात्यायन परि० प्र० सू०। बौधा० गृ० सू० २।६।३)।

'त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः॥' (च० व्यू०)।

'ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम्' (मे० को०)। इत्यादिवचनैर्बहुभिराचार्यैर्ब्राह्मणभागस्य वेदत्वमेवाङ्गीकृतम्।

अत एव 'तच्चोदकेषु मन्त्राख्या' (पू० मी० २।१।३२) इति मन्त्रलक्षणमाचक्षाणस्य जैमिनिमुनेः 'शेषे ब्राह्मणशब्दः' (पू० मी० २।१।३३) इति ब्राह्मणलक्षणे मन्त्रभागादवशिष्टे वेदैकदेशे ब्राह्मणशब्द इत्यर्थकं 'शेषे' पदं सङ्गच्छते। अतस्तन्मतेऽप्युभयोरेव वेदत्वम्। अन्यथा 'शेषे' पदं व्यर्थं स्यात्।

'मन्त्रब्राह्मणयोराहुर्वेदशब्दं महर्षयः' (षड्गुरुशिष्यः)।

'मन्त्रब्राह्मणात्मकत्वं तावद्वेदस्यादुष्टं लक्षणम्' इति सायणः।

'मन्त्रब्राह्मणयोर्वेदनाम प्रोक्तमृगादिषु' (शु० नी० ४।२७१)।

'विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात्' (पू० मी० २।१।३०) । विधिर्ब्राह्मणम्, तेन विधिमन्त्रयोरेकार्थता सिद्धा । 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (पू० मी० १।२।१) इत्यर्थवादखण्डनात्मकपूर्वपक्षसूत्रेऽपि जैमिनिमहर्षिणा ब्राह्मणस्य वेदत्वं निर्दिष्टम्, यतोऽर्थवादः प्राधान्येन ब्राह्मणस्यैव विषयः ।

तथा च जैमिनिसूत्राणां प्रख्यातव्याख्याता तत्र भवान् शबरस्वाम्यप्याह—'मन्त्राश्च ब्राह्मणं च वेदः' (पू० मी० १।२।३३) । अथ च 'वेदोऽखिलो धर्ममूलम्' (मनु० २।६) इति वचनात्सकलस्य वेदस्य धर्ममूलता निर्दिष्टा । धर्मस्य लक्षणं च—'चोदनालक्षणोऽर्थो धर्मः' इत्यादि । 'अष्टवर्षं ब्राह्मणमुपनयीत' 'अहरहः सन्ध्यामुपासीत' 'स्वर्गकामो यजेत' इत्यादिविधिवाक्यान्येव चोदना । मन्त्रभागे तु केवलं प्रार्थनैव दृश्यते न विधयः । विधीनां तु ब्राह्मणभागे एव सत्तास्ति । 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' (मनु० २।१३) इति मनुवचने श्रुतिशब्देन ब्राह्मणभागस्यैव ग्रहणं धर्मस्य तस्मिन्नेव सत्त्वात् । अनेनापि ब्राह्मणभागस्य वेदत्वं सिद्धम् । 'ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ'[1] (प्र० परि० ८) इति ब्राह्मणे स्वरविधानाद् ब्राह्मणभागस्य वेदत्वं सिध्यति । स्वरनियमश्च वेद एव, तथा चोक्तम्—'स्वरसंस्कारयोश्छन्दसि नियमः' (शु० प्राति० १।१) । अत एव मन्त्रभागो ब्राह्मणभागश्चोभावेव वेदशब्देनोच्येते प्राक्तनैर्विद्वद्भिर्गृह्येते च ।

तत्र मन्त्रभागे यथर्ग्वेदस्य प्राधान्यमेवं ब्राह्मणभागे माध्यन्दिनीयशतपथब्राह्मणस्यैव प्राधान्यम् । कथं चास्य प्रधानता इति तु श्रीगुरुचरणैः प्राक्कथने दर्शितमेव ।

ऋग्यजुःसामाथर्वभेदेन वेदस्य चातुर्विध्यं प्रसिद्धम् । एवं चतुर्धा विभक्ता अपि वेदा बहुशाखाभिन्नाः सन्ति । तथा चाह भगवान् पतञ्जलिः—

'एकशतमध्वर्युशाखाः' सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः' (म० भा० पस्पशा०) इति ।

'सहस्राध्वा सामवेदो यजुरेकशताध्वकम् ।
एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः ॥
नवाध्वाऽथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम्' (षड्गुरुशिष्यः) ।

तथा च—

एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानां तु शतेनाथ यजुर्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानां च विभेदतः ।
आथर्वणमथो वेदं विभेद नवकेन तु ॥

(कूर्मपुरा० ४९।५१–५२)

---

१ छान्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः ।
उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते ॥

इत्यनेन तु केषाञ्चिन्मतेऽथर्ववेदस्य पञ्चदशशाखावत्त्वमपि सिध्यति। एवं प्रतिवेदं बहुशाखानां नामानि ग्रन्थान्तरेषु श्रूयन्ते तासु कतिचिदेवोपलभ्यन्ते कतिचिच्च कालवशाद्विनष्टाः।

एवं प्रतिशाखं ब्राह्मणं भवेदिति न्यायेनानुमीयते यद् बहूनि ब्राह्मणान्यासन् तेषु कतिचिदिह निर्दिश्यन्ते—

उपलभ्यमानानि ब्राह्मणानि—

तत्रर्ग्वेदे—

(१) ऐतरेयब्राह्मणम्—अत्र ब्राह्मणे अष्टौ पञ्चिकाः, चत्वारिंशदध्यायाः, पञ्चाशीत्युत्तरद्विशतं खण्डाः सन्ति। तत्रादितः पञ्चिकापट्के सोमयागनिरूपणम्। अवशिष्टे पञ्चिकाद्वये च राज्याभिषेककथनम्।

(२) शाङ्खायनब्राह्मणम्—अत्र त्रिंशदध्यायाः सन्ति।

अस्यैव कौषीतकीतिनामान्तरं केचन मन्यन्ते। केचिच्च तस्य पृथगस्तित्वं स्वीकुर्वते।

यजुर्वेदे—

(१) माध्यन्दिनीयशतपथब्राह्मणम्—शतं पन्थानो यस्येति व्युत्पत्त्याऽस्य शतपथाभिधेयता। के च ते पन्थान इति जिज्ञासायां पथिशब्दस्यात्राध्यायपरत्वमङ्गीकार्यम्। अस्ति ह्यस्मिन्नध्यायशतकम्। अत्र चतुर्दशकाण्डानि, शतमध्यायाः, अष्टषष्टिः (६८) प्रपाठकाः, अष्टात्रिंशदुत्तरचतुःशतं (४३८) ब्राह्मणानि, चतुर्विंशत्युत्तरषट्शताधिकसप्तसहस्रं (७६२४) कण्डिकाश्च सन्ति। तत्र प्रथमकाण्डे—दर्शपूर्णमासयागः। द्वितीयकाण्डे—अग्निहोत्रम्, पिण्डपितृयज्ञः, दाक्षायणयज्ञः, नवान्नेष्टिः, चातुर्मास्यानि च। तृतीयचतुर्थकाण्डयोः—सोमयागः। पञ्चमकाण्डे—वाजपेयराजसूयौ। षष्ठादिदशमान्त (६–१०) काण्डेषु चयनम्। एकादशे—पशुबन्धः, पञ्चमहायज्ञाः, मित्रविन्देष्टिः, दर्शपूर्णमासादिशेषश्च। द्वादशे—द्वादशाहसत्रम्, संवत्सरसत्रम्, सौत्रामणी च। त्रयोदशे—अश्वमेधः, पुरुषमेधः, सर्वमेधः, पितृमेधश्च। चतुर्दशे—प्रवर्ग्यः, बृहदारण्यकं च।

(२) काण्वशतपथब्राह्मणम्—अत्र सप्तदश काण्डानि, चतुरधिकमेकशतम् (१०४) अध्यायाः, पञ्चत्रिंशदधिकचतुःशतं (४३५) ब्राह्मणानि, षडुत्तराष्टशताधिकषट्सहस्राणि (६८०६) कण्डिकाश्च विद्यन्ते।

अत्रापि माध्यन्दिनीयशतपथोक्ता एव विषयाः किञ्चिद्व्यत्ययेन प्रतिपादिताः। यथा प्रथमकाण्डे—अग्निहोत्रम्, पिण्डपितृयज्ञः, दाक्षायणयज्ञः, चातुर्मास्यानि। द्वितीयकाण्डे—दर्शपूर्णमासेष्टिः। तृतीयकाण्डे—अग्निहोत्रार्थवादः, दर्शपूर्णमासार्थवादः। चतुर्थकाण्डे—सोमयागः। पञ्चमकाण्डे—सोमयागशेषः। षष्ठकाण्डे—

वाजपेयः। सप्तमकाण्डे—राजसूयः। अष्टमकाण्डे—उखासम्भरणम्। नवमादि-द्वादशान्तकाण्डेषु—चयनम्। त्रयोदशे काण्डे—आधानकालः, पथिकृत्, शंयुवाकः, पत्नीसंयाजाः, पशुबन्धः। चतुर्दशे—सौत्रमणी। पञ्चदशे—अश्वमेधः। षोडशे—प्रवर्ग्यः। सप्तदशे—बृहदारण्यकम्।

(३) तैत्तिरीयब्राह्मणम्—अत्र त्रीण्यष्टकानि, क्वचिदष्टकस्थाने काण्डशब्दोऽपि प्रयुक्तः। अष्टाविंशतिः प्रपाठकाः, त्रिपञ्चाशदुत्तरत्रिशतम् (३५३) अनुवाकाश्च सन्ति।

सामवेदे—

(१) ताण्ड्यब्राह्मणम्—अत्र पञ्चविंशतिः प्रपाठकाः, सप्तचत्वारिंशदधिकत्रिशतं (३४७) खण्डाश्च वर्तन्ते। सायणाचार्यस्तु प्रपाठकस्थानेऽध्यायशब्दं प्रयुक्तवान्। अस्मिन् ह्यग्निष्टोमसंस्थाकं ज्योतिष्टोममारभ्य सहस्रसंवत्सरपर्यन्ताः सर्वे सोमयागाः प्रतिपादिताः।

(२) षड्विंशब्रा०—अत्र पञ्च प्रपाठकाः, अष्टाचत्वारिंशत् खण्डाश्च सन्ति।

(३) मन्त्रब्राह्म०—अस्मिन्द्वौ प्रपाठकौ, षोडश खण्डाश्च सन्ति।

(४) दैवतब्राह्म०—अस्मिन्त्रयः खण्डाः, द्विषष्टिः कण्डिकाश्च सन्ति। अत्र विशेषतश्छन्दसामेव वर्णनम्।

(५) आर्षेयब्रा०—अत्र त्रयः प्रपाठकाः, द्व्यशीतिः खण्डाश्च सन्ति। अस्मिन्ब्राह्मणे साम्नामार्षानुक्रमणी।

(६) सामविधानब्रा०—अत्र त्रयः प्रपाठकाः, पञ्चविंशतिः खण्डाश्च सन्ति। अस्मिन्नभिचारादिकर्मणां वर्णनम्।

(७) संहितोपनिषद्ब्राह्म०—अत्रैकः प्रपाठकः पञ्च खण्डाश्च।

(८) वंशब्राह्म०—अत्र खण्डत्रयमस्ति। तत्र सामवेदाचार्याणां वंशपरम्परा निरूपिता।

(९) जैमिनीयब्राह्म०—अत्र द्व्यशीत्युत्तरैकादशशतं (११८२) खण्डा विद्यन्ते। अस्यैव तलवकारब्राह्मणमित्यपि नामान्तरम्।

(१०) जैमिनीयार्षेयब्रा०—अत्र चतुरशीतिः खण्डाः सन्ति।

अथर्ववेदे—

(१) गोपथब्राह्मणम्—अत्रास्ति पूर्वभाग उत्तरभागश्चेतिभागद्वयम्। पूर्वभागे पञ्च प्रपाठकाः, उत्तरभागे च षट् प्रपाठकाः सन्ति। 'तत्र गोपथः शतप्रपाठकं ब्राह्मणमासीत्। तस्यावशिष्टे द्वे ब्राह्मणे पूर्वमुत्तरं च' (आ० च०) अनेन त्वनुमीयते यद्ब्राह्मणमिदं पुरा बृहदासीत्।

ग्रन्थान्तरेषु नामत उपलभ्यमानानि ब्राह्मणानि यथा—

(१) चरकब्राह्मणम् । (२) श्वेताश्वरब्रा० । (३) काठकब्रा० । (४) मैत्रायणीयब्रा० । (५) जाबालब्रा० । (६) खाण्डिकेयब्रा० । (७) औखेयब्रा० । (८) हारिद्रविकब्रा० । (९) आह्वरकब्रा० । (१०) कङ्कतिब्रा० । (११) गालवब्रा० । (१२) तुम्बरुब्रा० । (१३) आरुणेयब्रा० । (१४) पैङ्गायनिब्रा० । (१५) सौलभब्रा० । (१६) शैलालिब्रा० । (१७) पराशरब्रा० । (१८) माषशराविब्रा० । (१९) कापेयब्रा० । (२०) अन्वाख्यानब्रा० । (२१) भाल्लविब्रा० । (२२) शाट्यायनब्रा० । (२३) कालबविब्रा० । (२४) रौरुकिब्रा० ।

एतेषां ब्राह्मणानां ग्रन्थान्तरेषु नामान्येव श्रूयन्ते । आकृतितस्त्वेतानि नोपलभ्यन्ते । एवमन्यान्यपि बहूनि ब्राह्मणान्यासन्नित्यनुमीयते ।

सम्पूर्णमिदं माध्यन्दिनीयं शतपथब्राह्मणमद्यावधि स्थानद्वय एव मुद्रितम् । अजमेरनगर्यां जर्मनप्रदेशे च ।

तत्र पुस्तकद्वये बह्व्योऽक्षन्तव्या अशुद्धयो दरीदृश्यन्ते । अतोऽच्युतग्रन्थमालाव्यवस्थापकैः संशुद्धं संस्करणं प्रकाशयितुमेतत्सम्पादनकार्ये मत्सतीर्थ्यो वेदाचार्यः श्रीचन्द्रधरशर्मा नियोजितः । स चास्य प्रथमभागं सम्पाद्य द्वितीयभागारम्भ एव पञ्चत्वं गतः । पूर्ववत्तत्कार्यं संचालयितुं कृतमतिना मयास्य शोधनसमये पुस्तकचतुष्टयात्सहाय्यमलायि ।

तत्र प्रथममादर्शपुस्तकं हस्तलिखितमतिप्राचीनं च पं० श्रीमदमरनाथशास्त्रिणाम् ।
द्वितीयं हस्तलिखितमस्मदाराध्यश्रीगुरुचरणानाम् ।
तृतीयं लिपजिग् (जर्मन) नगरे मुद्रितम् ।
चतुर्थम् अजमेरनगर्यां मुद्रितम् ।

प्रणतयः

यैराबाल्याच्छुकशावक इवाहं स्नेहाल्लालितः पालितोऽध्यापितश्च येषां चाशिषैवैतत्सम्पादनकार्यक्षमोऽभवं तेषामाराध्यचरणानां सर्वतन्त्रस्वतन्त्राणां साक्षाद्वेदमूर्तीनां विद्वन्मूर्द्धन्यानां महामहोपाध्यायादिविविधविरुदभाजामस्मद्गुरूणां पण्डितप्रवरश्रीविद्याधरशर्मगौडमहोदयानां चरणसरोरुहेषु सादरं सविनयं च समर्पयामि प्रणतिततोः ।

कृतज्ञता

यैरतिप्राचीनहस्तलिखितादर्शपुस्तकप्रदानेनानुगृहीतस्तेषां पण्डितप्रवरश्रीमदमरनाथदीक्षितमहोदयानां कृते च चिरकृतज्ञतां प्रकटयामि ।

धन्यवादाः

ये च मध्ये मध्ये स्वसम्मतिप्रदानेनोपकृतवन्तस्तेभ्योऽच्युतग्रन्थमाला-विश्वनाथपुस्तकालययोरध्यक्षेभ्यः साहित्याचार्यपण्डितप्रवरश्रीकृष्णपन्तशास्त्रिभ्यो वितरामि धन्यवादाननेकान् ।

यत्र तत्रोपलब्धान् पाठभेदानधो निवेश्य दुरूहस्थलेषु च टिप्पणमपि संयोज्याऽत्र प्रतीकनिर्दिष्टानां तत्तद्वेदस्थमन्त्राणां स्थानसङ्केतञ्चाधो निवेश्य प्रकाश्यतेऽयं माध्यन्दिनीयशतपथब्राह्मणद्वितीयभागः ।

माध्यन्दिनीयशतपथब्राह्मणकण्डिकानामकाराद्यनुक्रमणिका चान्ते निवेशिता, या चाद्यावधि कुत्रापि न मुद्रितासीत् । अत आशासे सर्वमेवैद्वद्बहूपयोगि सम्पत्स्यते स्वाध्यायशीलेभ्यो वैदिकधर्मावलम्बिभ्यः ।

एवं भूयांसमायासमङ्गीकृत्य सविशेषावधानं संशोधितेऽप्यत्र ग्रन्थे मदीयाल्पमतिदोषाद् दृष्टिदोषादक्षरयोजकमुद्रकादिदोषाद्वा यत्र क्वचिदुपलब्धा अशुद्धीरुपेक्षमाणा गुणैकपक्षपातिनो विपश्चिद्वर्य्या मात्सर्य्यमुत्सार्य्य स्वयमेवात्र नयनार्पणायासमङ्गीकृत्य वेदसुधासौहित्यं भजन्तः करिष्यन्त्येव मामकीनं परिश्रमं सफलमिति सुदृढमवधारयन् प्रसादयामि स्वतः प्रकाशं शाश्वतं श्रीवेदपुरुषमनेन व्यापारेणेति निवेदयति—

अधिकाशि
महाशिवरात्रिः १९९७
सोमवासरः

म० म० पण्डितप्रवरश्रीविद्याधरशर्मणामन्तेवासी
वेदाचार्यः श्रीवंशीधरमिश्रगौडः

माध्यन्दिनीयशतपथब्राह्मणद्वितीयभाग-

विषयसूची

—❀—

सप्तमं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—गार्हपत्यचयनम्—तत्र गार्हपत्यचितिस्थाने पतितानां तृणपर्णादीनां पलाशशाखयापसारणम्, तत्स्थाने क्षारमृत्तिकानिपातनम्, सिकतानिवापः, एकविंशत्या परिश्रिद्भिः परिश्रयणम्, एकविंशत्येष्टकाभिश्चयनम्, तत्रोख्याग्नेः स्थापनादि च।

द्वितीयब्राह्मणे—प्रजापतिशरीरविश्लेषप्रतिपादनादि। गार्हपत्यस्य त्रिचितित्वमेकचितित्वं वा, चितिधिष्ण्याद्यर्थवादश्च।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—आख्यायिकया प्रयोजनप्रतिपादनपुरःसरं नैर्ऋत्यां तिसृणां नैर्ऋतीष्टकानामुपधानम्, शिक्यादीनां प्रक्षेपः, शालाद्वार्योपस्थानञ्चेति।

द्वितीयब्राह्मणे—औदुम्बरे सीरेऽनड्वहां योजनम्, क्षेत्रकर्षणम्, अनड्वहां सीराद्विमोचनम्, तेषां दानञ्चेति।

तृतीयब्राह्मणे—कुशस्तम्बोपधानम्, अभिहोमादिकम्, कुशस्तम्बोपरि पञ्चगृहीताज्यहोमश्च।

चतुर्थब्राह्मणे—कर्षणक्रमेण सीतासूदकप्रक्षेपः, सर्वौषधवपनञ्च।

तृतीयाध्यायस्य प्रथमब्राह्मणे—साग्निचित्ये क्रतौ सोमक्रयणकालविधानम्, आतिथ्येष्टिः, आहवनीयपरिश्रितोऽभिमन्त्रणम्, तत्र पुष्करपर्णोपधानम्, लोगेष्टकोपधानम्, उत्तरवेदिनिर्माणम्, इष्टकाप्रोक्षणञ्च।

द्वितीयब्राह्मणे—आनड्वहे चर्मणि प्रथमचितीष्टकानामुपधानादि, इष्टकाप्रोक्षणम्, अग्निक्षेत्राश्वरोहणादि च।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—अग्निग्रहणम्, सत्यसामगानम्, कुशस्तम्बपुष्करपर्णोपधानम्, रुक्मसुवर्णपुरुषोपधानम्, सर्पनामभिरुपस्थानम्, पञ्चगृहीताज्यहोमः, दक्षिणोत्तरतः सचोरुपधानञ्च।

द्वितीयब्राह्मणे—स्वयमातृण्णादूर्वेष्टकाद्वियजूरेतःसिग्विश्वज्योतिर्ऋतव्याषाढेष्टकोपधानम् ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—कूर्मोपधानम्, तस्य दधिमधुघृतैरभ्यञ्जनम्, कूर्मस्य कम्पनम्, उलूखलमुसलोपधानम्, उखोपधानम्, तत्राज्येन होमश्च ।

द्वितीयब्राह्मणे—उखायां पशुशीर्षाणामुपधानम्, पशुशीर्षेषु सुवर्णशकलप्रक्षेपः, पशुशीर्षाणां स्थापनक्रमः, चित्याग्नेरुपस्थानम्, अपस्येष्टकानामुपधानञ्च ।

सप्तमं काण्डं समाप्तम् ।

अष्टमं काण्डम्

प्रथमाध्यायस्य प्रथमद्वितीयब्राह्मणयोः—प्राणभृत्संज्ञकेष्टकोपधानम्, तासां संख्या च ।

तृतीयब्राह्मणे—प्राणभृच्छन्दनिर्वचनम्, तत्स्तुतिश्च ।

चतुर्थब्राह्मणे—प्राणभृदिष्टकानिधानस्थानादिनिरूपणम् ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—द्वितीयायां चितावश्विनीलोकम्पृणा-ऋतव्येष्टकोपधानम्, पुरीषावापश्च ।

द्वितीयब्राह्मणे—द्वितीयस्यां चितौ वैश्वदेवीष्टकोपधानम् ।

तृतीयचतुर्थब्राह्मणयोः—द्वितीयस्यां चितौ प्राणभृदपस्या-वयस्या-लोकम्पृणोपधानम् ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—तृतीयस्याश्चितेश्चयनम्—तत्र स्वयमातृण्णादिश्येष्टकोपधानम् ।

द्वितीयब्राह्मणे—तृतीयस्यां चितौ विश्वज्योतिर्ऋतव्याप्राणभृदिष्टकोपधानम् ।

तृतीयब्राह्मणे—तृतीयस्यां चितौ छन्दस्येष्टकोपधानादि ।

चतुर्थब्राह्मणे—बालखिल्या-लोकम्पृणोपधानम्, पुरीषावापश्च ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—चतुर्थचितेश्चयनम्—तत्र जङ्घामाख्यादिस्तोमेष्टकोपधानम् ।

द्वितीयब्राह्मणे—चतुर्थ्यां चितौ स्पृतर्तव्येष्टकोपधानम् ।

तृतीयब्राह्मणे—सृष्टीष्टकोपधानम्, लोकम्पृणोधानञ्च ।

चतुर्थब्राह्मणे—स्तोमचित्यर्थवादः ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—पञ्चम्याश्चितेश्चयनम्—तत्रासपत्नेष्टकोपधानम् ।

द्वितीयब्राह्मणे—पञ्चम्यां चितौ छन्दस्येष्टकोपधानम्, तदर्थवादश्च ।

तृतीयचतुर्थब्राह्मणयोः—पञ्चम्यां चितौ स्तोमेष्टकोपधानम्, तदुपधानस्थान निरूपणम्, पुरीषावापश्च ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—नाकसत्पञ्चचूडेष्टकोपधानम् ।

द्वितीयब्राह्मणे—छन्दस्येष्टकोपधानादिकम् ।

तृतीयब्राह्मणे—गार्हपत्यचयनम्, तत्प्रशंसा च ।

सप्तमाध्यायस्य प्रथमब्राह्मणे—ऋतव्या विश्वज्योतिः स्वयमातृण्णाविकर्ण्यर्थवादः ।

द्वितीयब्राह्मणे—लोकम्पृणेष्टकोपधानम्, इष्टकापरिमाणञ्च ।

तृतीयब्राह्मणे—इष्टकासु पुरीषनिवापः, स्वयमातृण्णा-विकर्ण्युपधानञ्च ।

चतुर्थब्राह्मणे—पञ्चम्याश्चितेः सुवर्णशकलसहस्रेण प्रोक्षणम्, पुरीषेणाच्छादनञ्च ।

अष्टमं काण्डं समाप्तम् ।

नवमं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—शतरुद्रियहोमः निरूपणम्, तत्र होमफलम्, हवनीयद्रव्यम्, होमाधिकरणीभूतं साधनम्, होमाधारभूतं स्थानञ्च ।

द्वितीयब्राह्मणे—चित्याग्नेः परिषेकः, मण्डूकादियुक्तवेणुनाग्निक्षेत्रे विकर्षणादिकञ्च ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—औपवसथ्यदिवसकर्तव्यतानिरूपणम्, यजमानस्य वाग्विसर्जनम्, अध्वर्योराज्यग्रहणम्, चित्यारोहणम्, तत्र होमादिविधिः, प्रवर्ग्योत्सादनं च ।

द्वितीयब्राह्मणे—प्रवर्ग्योत्सादनानन्तरं सञ्चिते इष्टकासमूहे स्थापनायाऽग्निं प्रणेतुं तावच्छालाद्वार्ये पञ्चगृहीताज्यहोमः, षोडशगृहीताज्यहोमः, औदुम्बरसमिदाधानञ्च ।

तृतीयब्राह्मणे—अग्निप्रणयनम्, प्रतिप्रस्थातृकर्तृकोऽध्वर्वादीनां प्रैषः । अपतिरथजपादि च ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—वैश्वानरपुरोडाशहोमः, मारुतपुरोडाशहोमः, तदधिश्रयणासादने, समिदाधानम्, पूर्णाहुतिहोमश्च ।

द्वितीयब्राह्मणे—वसोर्धाराहोमः, तत्प्रशंसा, ग्रहहोमश्च ।

तृतीयब्राह्मणे—यज्ञक्रतुहोमः, अयुग्मस्तोमहोमः, युग्मस्तोमहोमः, वयोहोमः, नामग्रहहोमः, रूपहोमः, वसोर्धाराहोमस्याऽर्थवादश्च ।

चतुर्थब्राह्मणे—वाजप्रसवीयहोमः, पार्थहोमः, यजमानाभिषेकश्च ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—राष्ट्रभृद्धोमः, तदर्थवादः, रथशिरसि पञ्चगृहीताज्यहोमश्च ।

द्वितीयब्राह्मणे—वातहोमादिः, रथस्याऽश्वानां दानञ्च ।

तृतीयब्राह्मणे—धिष्ण्यचयनविधिः ।

चतुर्थब्राह्मणे—अग्नियोजनाख्यं कर्म, अग्निविमोचनञ्च ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—पयोव्रतादिमीमांसा ।

द्वितीयब्राह्मणे—चित्युपस्थानम् ।

नवमं काण्डं समाप्तम् ।

दशमं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—चित्याग्नेः संवत्सररूपत्वम्, तस्य प्राजापत्यात्मना स्तुतिः, स्तोत्रशस्त्रस्तुतिश्च ।

द्वितीयब्राह्मणे—चितिसम्पत्तयः—पूर्वं महाव्रतयज्ञे सहप्रयुक्तानि अग्निचयनमहाव्रतसाममहदुक्थशस्त्राणि त्रीण्यपि पक्ष्याकाराणि अधिदेवं पृथिव्यन्तरिक्षद्युलोकात्मकानि, अध्यात्मं मनःप्राणवाग्रूपाणि इति, ज्योतिष्टोमयज्ञ एवैतेषां त्रयाणां सम्पादनप्रकारकथनञ्च ।

तृतीयब्राह्मणे—प्रजापतेर्मर्त्यामृतादिकृत्स्नशरीरसम्पादकत्वेन स्तुतिः ।

चतुर्थब्राह्मणे—प्रजापतेर्मरणधर्मकस्थूलशरीरगतमज्जादिरूपत्वेन हिरण्यरूपत्वेन देवतानामन्नरूपत्वेन च स्तुतिः, पक्षिभक्षणवर्जनं व्रतञ्च ।

पञ्चमब्राह्मणे—अग्निचयनकर्मणोऽग्न्याधानाग्न्याधेयहविरग्निहोत्रदर्शपौर्णमासेष्टिपशुचातुर्मास्यसोमाध्वरराजसूयादिसर्वयज्ञात्मकत्वप्रतिपादनम्, यज्ञवीर्याणां मीमांसा च ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—चित्याग्नेः पक्षिरूपत्वप्रतिपादनम्, तत्पक्षपुच्छयोः परिमाणकथनञ्च ।

द्वितीयब्राह्मणे—चित्याग्नेः सप्तपुरुषपरिमाणत्वनिरूपणम्, पक्षपुच्छयोश्चाऽरत्निवितस्तिपरिमाणत्वप्रतिपादनम् ।

तृतीयब्राह्मणे—प्राकृतस्य सप्तविधाग्नेर्वैकृतेष्वन्त्यस्यैकशतविधाग्नेश्च वेदिमानम्, तत्रेतिकर्तव्यता च ।

चतुर्थब्राह्मणे—एकशतविधस्याऽग्नेः सर्वकामरूपत्वेन आदित्यात्मना स्तुतिः, तस्य सप्तविधप्राकृताग्निसंख्यया सम्पत्तिप्रकारः, सप्तविधस्य चैकशतविधसंख्यया सम्पत्तिश्च ।

पञ्चमब्राह्मणे—चित्याग्नेः कालप्रतिपादनम्, चितिपुरीषमीमांसा च ।

षष्ठब्राह्मणे—प्रजापतेः प्रकारान्तरेणैकशतसंख्याकत्वम्, सप्तविधाग्निना सम्पत्तिः, अधिदैवाधियज्ञाध्यात्मत्रयविषये संवत्सरचित्याग्निपुरुषाणां पञ्चविधत्वम्, चयनस्यामृतत्वप्राप्तिःफलञ्च ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—चित्याग्नेः चक्षुरादिसप्तावयवानां छन्दोमयत्वम्, गायत्र्यादिसप्तच्छन्दसां वीर्यरूपत्वेन स्तुतिश्च ।

द्वितीयब्राह्मणे—वेदवादिप्रश्नोत्तराभ्यां शिरोग्रीवादीनां छन्दोमयत्वनिरूपणम् ।

तृतीयब्राह्मणे—धीरमहाशालनाम्नोर्महर्ष्योः प्रश्नप्रतिवचनाभ्यामग्नेः सर्वदेवतासमष्टिरूपप्राणवाय्वात्मकत्वप्रतिपादनम् ।

चतुर्थब्राह्मणे—बहुविधैः प्रश्नप्रतिवचनैः पुरुषस्याऽर्करूपतया स्तुतिः ।

पञ्चमब्राह्मणे—यजुषो विधायकब्राह्मणयोर्निर्वचनम्—तत्राधिदैवाध्यात्मभेदेनार्थप्रतिपादनम्, मन्त्रब्राह्मणप्रसङ्गादुपनिषदः स्तुतिः, तत्स्वरूपनिर्वचनादि, यजुषामुपांश्वनुष्ठानप्रतिपादनञ्च ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—आहवनीयाग्निरूपप्रजापतेश्चित्याग्निमन्त्रत्वेन परिकल्प्य तयोर्भोक्तृभोग्ययोरग्निचित्ययोर्द्वन्द्वस्यार्क्यमहाव्रतोक्थनामभिर्ऋग्यजुःसामवेदत्रयपरिभाषासिद्धैर्व्यवहार्यत्वेन स्तुतिः, रुक्मपुरुषयोरिष्टकापुरीषचित्योश्चित्याहवनीययोश्चेन्द्राग्न्यात्मना स्तुतिः, प्रजापतिरूपाहवनीयस्य तत्र हूयमानमहाव्रतीयग्रहरसस्य यद् द्वन्द्वं सम्पद्यते तस्यार्क्यव्रतोक्थनामभिर्व्यपदेश्यत्वम्, कलाभिः सप्तदशात्मकस्य चित्याग्निरूपस्य प्रजापतेः सोमयागोऽयं तयोरधिदैवमादित्यचन्द्रात्मना, अध्यात्मं प्राणान्नात्मना च स्तुतिः, त्रिष्वपि स्थानेष्वर्क्यादिनामत्रयप्रतिपाद्यत्वञ्च ।

द्वितीयब्राह्मणे—अग्नेरिष्टकानां च संवत्सरतदवयवाहोरात्रमुहूर्तात्मकत्वप्रतिपादनम्, मन्त्ररूपत्वप्रतिपादनञ्च ।

तृतीयब्राह्मणे—संवत्सररूपप्रजापतेर्मृत्यवन्तकरूपत्वम्, तद्रूपोपासनस्य फलम्, अग्निचयनस्यामृतलक्षणं फलम्, परिश्रित्यजुष्मतीलोकम्पृणेष्टकानां संख्या च ।

चतुर्थब्राह्मणे—संवत्सररूपाग्नेः, तदवयवानां च सहस्ररूपत्वेनोपासनम्, तत्फलञ्च ।

पञ्चमब्राह्मणे—व्यष्टिरूपाग्निविषयोपासना, वाय्वादित्यसंवत्सराणामग्नित्वप्रतिपादनञ्च ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—त्रयीमयादित्येऽग्न्युपासना ।

द्वितीयब्राह्मणे—सूर्यमण्डलार्चिःपुरुषत्रयस्याधिदैवाधियज्ञाध्यात्मपरत्वेनार्थप्रतिपादनम्, तत्राधिदैवमयमर्थः—चयनगतबृहदुक्थमहाव्रताग्नित्रयं क्रमेण मण्डलार्चिःपुरुषरूपत्वेनोपासनीयमिति, अधियज्ञमयमर्थः—चयनगतरुक्मपुष्करपर्णहिरण्मयपुरुषाणां मण्डलादित्रयम्, एवं दक्षिणाग्निगतशुक्लकृष्णवर्णतदन्तर्वर्तिपुरुषाणां मण्डलादित्रयरूपत्वेनोपसनमिति । लोचने हि शुक्लरूपं कृष्णरूपं चास्ति तदन्तर्वर्ती पुरुषश्च दृश्यते, एतत्प्रसङ्गेन सव्यलोचनगतपुरुषस्य मिथुनत्वसम्पादनम्, अथ पुरुषस्य मृत्युत्वमुपजीव्यम्, मृत्युगतैकत्वबहुत्वान्तिकदूरत्वमीमांसा, तस्यैव पुरुषस्य बहुधोपासनम्, तत्फलञ्च ।

तृतीयब्राह्मणे—सकलपुरुषवर्तिमनोवाक्प्राणचक्षुःश्रोत्रकर्माग्निवृत्तिसम्पाद्यचित्याग्निविषयोपासनानिरूपणम् ।

चतुर्थब्राह्मणे—भूम्यादिलोकत्रयादित्यनक्षत्रच्छन्दःसंवत्सरात्मनां चित्याग्निरूपत्वेनोपासना, 'विद्यया तदारोहन्ति' (क० १६) इत्यादिना केवलकर्मनिन्दापुरःसरं विद्याप्रशंसा च ।

पञ्चमब्राह्मणे—चित्याग्नेः सर्वदिगभिमुखत्वनिरूपणम्, पृथक् शिरसो निरूहणाभावश्च ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—वैश्वानरविद्यानिरूपणम् ।

द्वितीयब्राह्मणे—पुरुषस्याग्निविधत्वार्कविधत्वोक्थविधत्वनिरूपणम् ।

तृतीयब्राह्मणे—शाण्डिल्यविद्याप्रतिपादनम् ।

चतुर्थब्राह्मणे—अश्वावयवेषु विराडवयवोपासना ।

पञ्चमब्राह्मणे—'नैवेह किञ्चनाग्र आसीत्, इत्यादिना उपास्यहिरण्यगर्भस्वरूपप्रतिपादनम्, 'अथ वंशः' इत्यग्निरहस्यविद्याप्रवर्तकर्षिप्रवाहप्रतिपादनम् ।

दशमं काण्डं समाप्तम् ।

एकादशं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—अग्न्याधानकालनिरूपणम् ।

द्वितीयब्राह्मणे—दर्शपूर्णमासाहुतिसंख्याविशेषकथनम् ।

तृतीयब्राह्मणे—पौर्णमासयागे दर्शयागे च हविषो विधानम् ।

चतुर्थब्राह्मणे—दर्शयागे पुरस्ताच्चन्द्रदर्शनप्रायश्चित्तेष्टिनिरूपणम् ।

पञ्चमब्राह्मणे—पश्चाच्चन्द्रदर्शने नैमित्तिकेष्टिः ।

षष्ठब्राह्मणे—दर्शपूर्णमासयोः सर्वात्मकलक्षणवैराजपदप्राप्तिसाधनतां वक्ष्यन् तदुपोद्घातत्वेनाख्यायिकया सृष्टिप्रतिपादनम्, पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृदिडा त्रयोऽनुयाजाश्चत्वारः पत्नीसंयाजा इति षोडशाहुतीनां सर्वसाधारणत्वम् ।

सप्तमब्राह्मणे—दर्शपूर्णमासयोर्व्रतोपायनविषयकमीमांसा ।

अष्टमब्राह्मणे—व्रतमुपेयुषो यजमानस्य हविरुपब्रुवंस्तस्मिन्निष्क्रयणहेतुतां दर्शपूर्णमासस्य प्रतिपादयितुमाख्यायिकया यज्ञोत्पत्तिकथनम् ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—पुरुषस्य जन्मत्रयप्रतिपादनम्, सामिधेनीप्रशंसा च ।

द्वितीयब्राह्मणे—याज्यानुवाक्ययोश्छन्दोविशेषत्वविधानपूर्वकं स्तवनम् ।

तृतीयब्राह्मणे—आघारौ स्तोतुमाख्यायिकया तत्सृष्टिप्रतिपादनम् ।

चतुर्थब्राह्मणे—दर्शपूर्णमासनामात्मना आघारौ स्तोष्यन् अधिदैवाध्यात्मभेदेन दर्शपूर्णमासप्रतिपादनम् ।

पञ्चमब्राह्मणे—दर्शपूर्णमासयागयोरश्वमेधात्मना स्तुतिः ।

षष्ठब्राह्मणे—यज्ञशरीरावयवत्वेन प्रणीतादीनामनुष्ठेयपदार्थानामधियज्ञाध्यात्मभेदेन सम्पत्तिकथनम् ।

सप्तमब्राह्मणे—यज्ञादीनां संवत्सराद्यात्मनोपासनं विधायैतद्वैशिष्ट्येन दर्शपूर्णमासयागस्य विशिष्टफलसाधनतापतिपादनम् ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—अग्निहोत्रावयवोपासनाप्रकारत्वप्रदर्शनम् ।

द्वितीयब्राह्मणे—अग्निहोत्रे मिथुनत्वप्रदर्शनम् ।

तृतीयब्राह्मणे—आख्यायिकापूर्वकं ब्रह्मचारिधर्मनिरूपणम् ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—प्रश्नप्रतिवचनाभ्यां दर्शपूर्णमासकर्मण एव सर्वोत्पत्तिनिमित्तत्वेन स्तुतिः ।

द्वितीयब्राह्मणे—प्रयाजादियागेषु स्रुगादानप्रभृतिहोमान्तधर्माणां विचारः ।

तृतीयब्राह्मणे—मित्रविन्देष्टिः—तत्राधिकारिविशेषप्रदर्शनम्, तत्रादौ श्रिय उत्पत्तिः, उत्पन्नायाश्च तस्या दैवेरभिधानम् ।

चतुर्थब्राह्मणे—दाहविपतनादिदोषदुष्टस्यापि हविषः समृद्धिः ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—दर्शपूर्णमासविकृतिभूतचातुर्मास्यादीनां प्रशंसा, तत्राग्निमन्थनसद्भावात्तत्साधनभूतयोररण्योरश्वत्थविकृतित्वसाधनम् ।

द्वितीयब्राह्मणे—चातुर्मास्ययाजिन आत्मयाजित्वं देवयाजित्वं वेति द्वैविध्यं दर्शयितुं तत्रत्यैर्यागैः शरीरावयवकल्पनमाख्यायिकया ।

तृतीयब्राह्मणे—प्रश्नप्रतिवचनाभ्यामग्निहोत्रस्य सर्वदेवतातृप्तिकरत्वप्रतिपादनम् ।

चतुर्थब्राह्मणे—'तं होपनिन्ये' इत्यनेन पूर्वब्राह्मणे उपनयनस्य प्रस्तुतत्वात्तद्धर्मनिरूपणम् ।

पञ्चमब्राह्मणे—आख्यायिकापूर्वकं शतातिरात्राख्यसत्रविधानम् ।

षष्ठब्राह्मणे—यावज्जीवमनुष्ठेयानां पञ्चमहायज्ञानां निरूपणम्, तेषां च महासत्रत्वविधानम् ।

सप्तमब्राह्मणे—ब्रह्मयज्ञस्वाध्याये पुरुषाणामादरातिशयं जनयितुं तस्य प्रशंसा ।

अष्टमब्राह्मणे—आख्यायिकया व्याहृत्युत्पत्तिकथनम् ।

नवमब्राह्मणे—अंशुदाभ्याख्ययोः सोमग्रहयोर्विधित्सया तयोरात्मवागादिरूपतया समुचित्यानुष्ठानम् ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—आख्यायिकया समिदाधानादीनां वनस्पत्यादिरूपफलसाधनताकथनम् ।

द्वितीयब्राह्मणे—आख्यायिकयाऽग्निहोत्राहुतिप्राशस्त्यप्रतिपादनम् ।

तृतीयब्राह्मणे—आख्यायिकयाऽग्निहोत्रदर्शपूर्णमासादियागदेवतानां तत्त्वतः प्राणशब्दाभिधेयपरमात्मरूपतापतिपादनम् ।

सप्तमाध्यायस्य प्रथमब्राह्मणे—पशुबन्धप्रशंसा, दर्शपूर्णमासवन्नित्यं प्रतिसंवत्सरमेष्टव्यपशुयागविधानम् ।

द्वितीयब्राह्मणे—पशुबन्धस्येष्टिविधत्वं सोमविधत्वं चेति द्वैविध्यप्रदर्शनम्, षड्ढोतृहोमविधानञ्च ।

तृतीयब्राह्मणे—बहुसारस्य यूपस्य पशुविरोधित्वनिरूपणम्, अल्पसारस्य पशुसमृद्धिकरणत्वप्रतिपादनञ्च ।

चतुर्थब्राह्मणे—यूपपरिमाणम्, आज्यभागयोरवश्यकर्तव्यता, पश्ववयवपाक-विषयको विधिविशेषः, वपावदानस्य पश्चावत्तत्वप्रकारश्च ।

अष्टमाध्यायस्य प्रथमब्राह्मणे—अग्निहोत्रे कर्मणि मह इत्युपस्थानदार्ढ्याय कर्तव्यनिमित्तत्वविधानमाख्यायिकया ।

द्वितीयब्राह्मणे—आहवनीयात्प्राक् प्रकृते औत्तरवेदिकेऽग्नौ पशुयागः कर्तव्य इति विधातुमग्नेराहितादिभेदेन चतुर्विधत्वप्रदर्शनम् ।

तृतीयब्राह्मणे—पशोः प्रजापतिः सूर्य इन्द्राग्नीति देवतात्रयप्रतिपादनम् ।

चतुर्थब्राह्मणे—आख्यायिकापूर्वकं पशुप्रायश्चित्ततया स्पृत्याख्यहोमविधानम् ।

एकादशं काण्डं समाप्तम् ।

द्वादशं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—द्वादशाहे सोपपत्तिकदीक्षाक्रमनिरूपणम् ।

द्वितीयब्राह्मणे—द्वादशाहस्याहां कल्पिः ।

तृतीयब्राह्मणे—द्वादशाहाहां कल्पस्यर्थवादः ।

चतुर्थब्राह्मणे—द्वादशाहस्य संवत्सरात्मना स्तुतिः ।

द्वितीयाध्यायस्य प्रथमद्वितीयब्राह्मणयोः—संवत्सरसत्रस्याहःकल्पितिः ।

तृतीयब्राह्मणे—दशरात्रनिरूपणम् ।

चतुर्थब्राह्मणे—संवत्सरस्याभिप्लवात्मना स्तुतिः ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—संवत्सरस्याभिप्लवात्मना स्तुतिः ।

द्वितीयब्राह्मणे—संवत्सरसत्रस्याहःकल्पितिः ।

तृतीयब्राह्मणे—संवत्सरादिदीक्षापक्षः ।

चतुर्थब्राह्मणे—ज्योतिष्टोमे उद्गात्राद्यन्वारम्भः ।

पञ्चमब्राह्मणे—सोमादीनां नित्यत्वम् ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—अग्निहोत्रप्रायश्चित्तनिरूपणम्, तत्र दोह्यमानाया अग्निहोत्र्या गोरुपवेशने शब्दकरणे च प्रायश्चित्तम् ।

द्वितीयब्राह्मणे—अग्निहोत्र्या लोहितादिदुहने प्रायश्चित्तम् ।

तृतीयब्राह्मणे—गार्हपत्याद्यनुगमने प्रायश्चित्तम् ।

चतुर्थब्राह्मणे—अग्निहात्रे अन्यन्तरसंसर्गादौ प्रायश्चित्तम् ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—मृताग्निहोत्रेतिकर्तव्यता ।

द्वितीयब्राह्मणे—मृताग्निहोत्रौर्ध्वदेहिककृत्यम् ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—ज्योतिष्टोमप्रायश्चितम् ।

सप्तमाध्यायस्य प्रथमब्राह्मण—सौत्रामणीहविस्तत्राख्यायिका ।

द्वितीयब्राह्मणे—सौत्रामण्यामधिकारनिरूपणम्, सुराद्रव्याणां क्रयः, पशुपुरोडाशादिविधानञ्च ।

तृतीयब्राह्मणे—सुरानिर्माणप्रकारः, सुरापावनप्रकारः, पयोग्रहग्रहणम्, सुराग्रहग्रहणञ्च ।

अष्टमाध्यायस्य प्रथमब्राह्मणे—पयोग्रहाणां सुराग्रहाणां च होमो भक्षणं च विकल्पेन ।

द्वितीयब्राह्मणे—सौत्रामणीप्रशंसा ।

तृतीयब्राह्मणे—आसन्दीनिधानम्, सामगानम्, यजमानाभिषेकश्च ।

नवमाध्यायस्य प्रथमब्राह्मणे—सौत्रामणीशेषः ।

द्वितीयब्राह्मणे—अवभृथेष्टिः । आदित्यश्चरुर्निर्वपश्च ।

तृतीयब्राह्मणे—सौत्रामण्यर्थवादः ।

द्वादशं काण्डं समाप्तम् ।

त्रयोदशं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—ब्रह्मौदनपचनम्, तद्दानम्, तत्प्राशनञ्च । अश्वमेधस्योत्पत्तिः, तत्फलञ्च ।

द्वितीयब्राह्मणे—अश्वरशनादानम्, तस्याः परिमाणम्, अश्वस्य बन्धनप्रोक्षणादि च ।

तृतीयब्राह्मणे—सहस्रमाहुतयः ।

चतुर्थब्राह्मणे—सावित्रीष्टीनां विधानम् ।

पञ्चमब्राह्मणे—सोमे गाथागानम् ।

षष्ठब्राह्मणे—अश्वकर्णे जपः, धृतिहोमश्च ।

सप्तमाष्टमब्राह्मणयोः—औदुम्बरभक्षणहोमः ।

नवमब्राह्मणे—अध्वर्युकर्तृकजपः ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—आज्यसक्तुधानालाजहोमः, सर्वरात्रश्च ।

द्वितीयब्राह्मणे—पर्यङ्क्यपशुनिरूपणम् ।

तृतीयब्राह्मणे—उद्गातृगानप्रशंसा ।

चतुर्थब्राह्मणे—ग्राम्यपश्वालम्भः, आरण्यपशूनामत्सर्गश्च ।

पञ्चमब्राह्मणे—पश्वेकादशिनी ।

षष्ठब्राह्मणे—आश्वमेधिकस्याश्वस्य नियोजनाञ्जनमणिबन्धनादि ।

सप्तमब्राह्मणे—अश्वस्य प्रोक्षणादि ।

अष्टमब्राह्मणे—मृतस्याश्वस्य परिक्रमणादि ।

नवमब्राह्मणे—अध्वर्यवादीनां कुमारीभिः सह सवादः ।

दशमब्राह्मणे—अश्वशरीरे सूचीभिर्वितोदः ।

एकादशब्राह्मणे—महिमानौ ग्रहौ परिपशव्याहुती च ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—अश्वमेधप्रशंसा, अश्वस्यावदानस्थाननिरूपणञ्च ।

द्वितीयब्राह्मणे—वपाप्रचारः ।

तृतीयब्राह्मणे—यूपैकविंशतिः ।

चतुर्थब्राह्मणे—अश्वस्य लोहितश्रपणादि ।

पञ्चमब्राह्मणे—अश्वमेधेनापमृत्युनिरासः ।

षष्ठब्राह्मणे—अश्वस्तोमीयाख्यहोमः ।

सप्तमब्राह्मणे—अश्वमेधस्य यौगिकानां द्वादशनाम्नां प्रदर्शनम् ।

अष्टमब्राह्मणे—अश्वे रोगादिनाभिभूते प्रायश्चित्तम् ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—अश्वमेधारम्भकालः, तत्रत्येतिकर्तव्यता, ब्रह्मौदनपाकः, निष्कविमोकः, चतसृणां यजमानपत्नीनामागमनम्, यजमानस्य वावाताया ऊर्वोरन्तराले शयनादिकम्, आग्नेयीष्टिः, पौष्णीष्टिश्च ।

द्वितीयब्राह्मणे—सावित्र्य इष्टयः, तत्रत्येतिकर्तव्यता, पारिप्लवशंसनम्, गाथागानञ्च ।

तृतीयब्राह्मणे—अध्वर्यवादीनां सौवर्णेषु कूर्चेषूपवेशनम्, पारिप्लवस्य प्रतिगरः, यजमानस्य स्तुतिश्च ।

चतुर्थब्राह्मणे—यूपकाष्ठनिरूपणम्, संवत्सरादिपक्षेण दीक्षाद्यनुष्ठानक्रमश्च ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—सवनीयाः पशवः, चातुर्मास्यपशवश्च ।

द्वितीयब्राह्मणे—संवादः, ऋत्विजां प्रश्नप्रतिवचनानि च ।

तृतीयब्राह्मणे—वपाहोमः, एकविंशतिः सवनीयाः पशवश्च ।

चतुर्थब्राह्मणे—प्रत्यृतु षण्णां षण्णां पशूनामालम्भः ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—पुरुषमेधयागफलम्, तत्रत्या अह्नां संस्था च ।

द्वितीयब्राह्मणे—पुरुषमेधार्थनिर्वचनम्, ब्राह्मणादीनामष्टाचत्वारिंशत्संख्यकानामग्निष्ठे यूपे नियोजनादि, नियुक्तानां तेषां पुरुषसूक्तेन ब्रह्मद्वारा स्तुतिः, ब्राह्मणादीनामुत्सर्गः, पुरुषमेधान्ते वानप्रस्थाश्रमस्वीकृतेर्वैकल्पिकत्वनिरूपणञ्च ।

सप्तमाध्यायस्य प्रथमब्राह्मणे—सर्वमेधः—तत्रादौ तस्योत्पत्तिः, तत्रत्याहःसंस्था च ।

अष्टमाध्यायस्य प्रथमब्राह्मणे—पितृमेधः—तत्रादौ श्मशानशब्दार्थः, तस्यारम्भकालः, भूमिजोषणादि च ।

द्वितीयब्राह्मणे—तस्य परिश्रिद्धि परिश्रयणम्, पलाशशाखया व्युदूहनम्, वलीवर्दनियोजनम्, चतुःसीताकर्षणम्, वलीवर्दविमोकश्च ।

तृतीयब्राह्मणे—तत्र सर्वौषधीनां वपनम् ।

चतुर्थब्राह्मणे—शङ्कुनिखननम्, अपामार्गमार्जनञ्च ।

त्रयोदशं काण्डं समाप्तम् ।

चतुर्दशं काण्डम्

प्रथमाध्यायस्य प्रथमब्राह्मणे—धर्मोपक्रमः—तत्राख्यायिका, रात्रित्रयं यावद्व्रताचरणञ्च ।

द्वितीयब्राह्मणे—प्रवर्ग्यः—महावीरसम्पादनार्थं सम्भाराः, तन्निर्माणप्रकारः, तेषां गर्ते सादनम्, धूपनम्, श्रपणञ्च ।

तृतीयचतुर्थब्राह्मणयोः—महावीरसंस्काराः । पात्रासादनम्, महावीरप्रोक्षणम्, स्थूणानिखननम्, सम्भाडासन्दीस्थापनम्, महावीराञ्जनम्, अङ्गारैस्तदाच्छादनम्, पवित्रैराघवनम्, उपस्थानञ्च ।

द्वितीयाध्यायस्य प्रथमब्राह्मणे—रौहिणहोमः, रज्ज्वादानम्, गोराह्वानम्, वत्सोत्सर्गः, गोदोहनम्, विप्रुषामभिमन्त्रणम्, महावीरेषु अजापयस आसेकश्च ।

द्वितीयब्राह्मणे—प्रवर्ग्यानुष्ठानम्, वातनामजपः, महावीरे घृतासेकः, शकलैराज्यहोमः, रौहिणहोमादि च ।

तृतीयाध्यायस्य प्रथमब्राह्मणे—प्रवर्ग्योत्सादनाख्यं कर्म ।

द्वितीयब्राह्मणे—घर्मभेदे प्रायश्चित्तम् प्रवर्ग्यप्रशंसा च ।

चतुर्थाध्यायस्य प्रथमब्राह्मणे—कोऽसौ पाप्मा मृत्युः, कुतो वा तस्योद्भवः, केन वा तस्यातिक्रमणम्, कथं चेत्यादिनिरूपणमाख्यायिकया ।

द्वितीयब्राह्मणे—ज्ञानकर्मणोः स्तुत्यर्थं तत्फलभूतस्य प्रजापतेर्जगत्सर्जनस्थितिसंहारेषु स्वातन्त्र्यविभूतिवर्णनेन फलोत्कर्षवर्णनम् ।

तृतीयब्राह्मणे—पाङ्क्तज्ञानकर्मभ्यां केवलज्ञानेन वा अद्यमानत्वेन सृष्टस्यान्नभूतस्य जगत उपासनार्थं विभागेन सप्तधानिरूपणम् ।

चतुर्थब्राह्मणे—उक्तस्यैव प्रतिपत्तिसौकर्यार्थं नाम रूप-कर्मात्मत्वेनोपसंहारः ।

पञ्चमाध्यायस्य प्रथमब्राह्मणे—अविद्याविषयमेवात्मत्वेनोपगतवन्तं गार्ग्यं तद्वीपरीतात्मदर्शिनमजातशत्रुं सिद्धान्तवादिनं चोपस्थाप्य आख्यायिकाप्रदर्शनम् ।

द्वितीयब्राह्मणे—प्राणोपनिषदो व्याख्यानम् ।

तृतीयब्राह्मणे—ब्रह्मण उपाधिभूतयोर्मूर्तामूर्तयोः कार्यकरणाध्यात्माधिदैवतयोः विभागप्रदर्शनम् ।

चतुर्थब्राह्मणे—प्रस्तुताया ब्रह्मविद्याया अङ्गत्वेन सन्यासविधानार्थं याज्ञवल्क्यमैत्रेयीसंवादरूपाऽऽख्यायिका ।

पञ्चमब्राह्मणे—उक्तस्याध्यायद्वयस्यार्थोपसंहारः, आचार्यपरम्पराक्रमरूपवंशकथनञ्च ।

षष्ठाध्यायस्य प्रथमब्राह्मणे—तत्त्वज्ञाने आगमोपपत्त्योरावश्यकत्वप्रतिपादनम् तत्र ब्रह्मविद्यास्तुत्यर्थाऽऽख्यायिका ।

द्वितीयब्राह्मणे—बन्धनं विना ततो विश्लेषायोगान्मुमुक्षोः सप्रयोजकबन्धज्ञानार्थत्वेन प्रहातिप्रहलक्षणाद्बन्धनान्मृत्योरतिमुक्तिकथनमाख्यायिकया ।

तृतीयब्राह्मणे—कर्मफलानां संसारत्वप्रदर्शनायैव भुज्युयाज्ञवल्क्यसंवादः ।

चतुर्थब्राह्मणे—ससंन्यासात्मज्ञानविषयकथनं कहोडयाज्ञवल्क्यसंवादेन ।

पञ्चमब्राह्मणे—आत्मविषये, उषस्तयाज्ञवल्क्यसंवादः ।

षष्ठब्राह्मणे—अनात्मभूतानां सर्वेषां पदार्थानां कथनम् ।

सप्तमब्राह्मणे—ब्रह्मलोकानामन्तरतमं सूत्रं दर्शयितुमुद्दालकयाज्ञवल्क्यसंवादः ।

अष्टमब्राह्मणे—अशनायादिविनिमुक्तस्य निरुपाधिकस्य साक्षादपरोक्षात्सर्वान्तस्य ब्रह्मणो वर्णनम् । तत्र गार्गीयाज्ञवल्क्यसंवादः ।

नवमब्राह्मणे—ब्रह्मणो नियन्तव्यदेवतामेदसंकोचविकासद्वारेणाधिगन्तव्यस्य साक्षादपरोक्षत्वस्य निरूपणम् । तत्र शाकल्ययाज्ञवल्क्यसंवादः ।

दशमब्राह्मणे—उक्तस्यैव ब्रह्मणः प्राणाद्यधिष्ठात्रीषु वाग्वादिदेवतासु ब्रह्मदृष्टिद्वारा निरूपणम् ।

एकादशब्राह्मणे—पूर्वोक्तैः साधनैर्ज्ञेयस्य ब्रह्मणो जगदादिद्वारा ज्ञानम् ।

सप्तमाध्यायस्य प्रथमब्राह्मणे—प्रस्तुतस्य ब्रह्मणो देहादिव्यतिरिक्तशुद्धस्वयम्प्रकाशानतिशयानन्दस्वभावलक्षणस्य प्रदर्शनम् ।

द्वितीयब्राह्मणे—उक्तस्यात्मनोऽङ्गेभ्यः संप्रमोक्षणस्य विस्तरेणोपपादनम् ।

तृतीयब्राह्मणे—आत्मज्ञाने आगमेनाधिगतस्यामृतत्वसाधनत्वस्य तर्केणापि प्रतिपादनम्, याज्ञवल्क्यकाण्डस्याचार्यपरम्परोपदेशश्च ।

अष्टमाध्यायस्य प्रथमब्राह्मणे—(सर्वोपनिषदर्थस्य ब्रह्मण उत्तरसम्बन्धार्थमनुवादः) सर्वोपास्तिसाधनमोंकार इति कथनम् ।

द्वितीयब्रह्मणे—दमदानदयानां सकलब्रह्मोपासनाङ्गत्वेन प्रतिपादनम् ।

तृतीयब्राह्मणे—कृते पासनस्य योगिनोऽन्तकाले प्रार्थना ।

चतुर्थब्राह्मणे—हृदयस्य ब्रह्मवेनोपसनम् ।

पञ्चमब्राह्मणे—हृदयाख्यस्य ब्रह्मणः सत्यत्वेनोपासनम् ।

षष्ठब्राह्मणे—सत्यस्य ब्रह्मणः प्रथमजत्वप्रतिपादनम् ।

अष्टमाध्यायस्य सप्तमब्राह्मणे—विद्युद्ब्रह्मेत्युपासनविधानम् ।

अष्टमब्राह्मणे—मन उपाधिविशिष्टस्य ब्रह्मण उपास्तिनिरूपणम् ।

नवमब्राह्मणे—तस्यैव ब्रह्मणो वाङ्मयधेनुसम्बन्धेनोपासनम् ।

दशमब्राह्मणे—वैश्वानराग्न्युपाधिकस्य ब्रह्मण उपासनम् ।

एकादशब्राह्मणे—व्याधिसन्तप्यमानस्य तापे तप इति दृष्टिः ।

द्वादशब्राह्मणे—एतत्प्रकरणस्थानां सर्वेषामुपासनानां गतिकथनम्, अश्रुतफलोपासनानां ब्रह्मलोकफलकथनञ्च ।

त्रयोदशब्राह्मणे—वि रमिति गुणद्वयविशिष्टान्नप्राणोपाधिकब्रह्मोपासनं विशिष्टफलकम् ।

चतुर्दशब्राह्मणे—उक्तस्य ब्रह्मण उक्थादिगुणपूर्वविशिष्टत्वेनोपासनम्, प्राणस्य पालकगुणत्वेनोपासनञ्च ।

पञ्चदशब्राह्मणे—सर्वोपाध्युपसंहारिगायत्र्युपाधिकब्रह्मोपासनम्, गायत्र्युपस्थानञ्च ।

नवमाध्यायस्य प्रथमब्राह्मणे—विहितस्य केवलस्य कर्मणस्तत्सहितस्य च ज्ञानस्य निषिद्धयोश्च तयोः क्रमेण दक्षिणोदगधोमार्गकथनम् ।

द्वितीयब्राह्मणे—ज्येष्ठत्वश्रेष्ठत्वादिगुणविशिष्टप्राणोपासनम् ।

तृतीयब्राह्मणे—श्रीमन्थाख्यं कर्म—तत्र समयः, अधिकारी, आज्यहोमः, संस्रवस्य मन्थाख्यौदुम्बरपात्रे त्यागः, हस्तेन मन्थाभिमर्शनम्, मन्थस्थद्रव्यस्य हस्ते ग्रहणम्, तस्य प्राशनम्, आचमनम्, हस्तप्राक्षलनम्, शयनम्, प्रातरादित्योपस्थानञ्च ।

चतुर्थब्राह्मणे—विशिष्टपुत्रार्थिनः पुत्रमन्थाख्यं कर्म-तत्रादौ पुत्रोत्पत्तिहेतुनो रेतसः स्तुतिः, । प्रमादाद्रेतःपाते प्रायश्चित्तम्, ऋतुकालाभिगमनविधानम्, दम्पत्योः परस्परं वशीकरणोपायः, गर्भाधानेतिकर्तव्यता, जातकर्म, आयुष्यकर्म, सकलस्यापि वेदस्याध्यापकपरम्परानिरूपणञ्चेति ।

चतुर्दश काण्ड समाप्तम् ।



अथ शुक्लयजुर्वेदीयमाध्यन्दिनशाखीयं

शतपथब्राह्मणम्

हस्तिघटं * नाम सप्तमं काण्डम् ।

अस्मिन् काण्डे प्रतिपाद्या विषयाः — गार्हपत्यचयनम्, निर्ऋतिचयनम्, अग्निक्षेत्रसंस्कारः, दर्भस्तम्बोपधानादि, सोमक्रयः, पुष्करपर्णोपधानम्, रुक्मोपधानम्, स्वयमातृण्णोपधानाद्यपस्यासादनान्तम् ।

[गार्हपत्यचितिस्थाने पतितानां तृणपर्णादीनामपसारणादि]

॥ ॐ ॥ गार्हपत्यं चेष्यन्पलाशशाखया † व्यूदूहति । अवस्यति हैतद्यद् गार्हपत्यं चिनोति य ऽउ वै के चाग्निचितोऽस्यामेव तेऽवसितास्तद्यद्व्यूदूहत्यवसितानेव तद्व्यूदूहति नेदवसितानद्ध्यवस्यानीति ॥ १ ॥ 'अपेत वीत वि च सर्पतात' ऽइति । अप चैवेत वि चेत व्यु च

---

* एतस्य सप्तमकाण्डस्याभिधानं 'हस्तिघटम्' इति । क्वचित्पुस्तके 'हस्तिषट्' इत्यपि दृश्यते, तल्लेखकप्रमादजमेवेति ध्येयम् ।

† गार्हपत्यचितेः स्थाने मध्यादारभ्य प्रतिदिशं प्रादक्षिण्येन पलाशशाखया पतितं तृणपर्णादिनिरसनं व्यूदूहनमित्युच्यते । (का० श्रौ० सू० १७. १. ३ ।)

(१) शु० य० सं० अ० १२ क० ४५ ।

सर्प्पतात ऽइत्त्येतद्य ऽउदरसर्प्पिणस्तानेतदाह 'ये ऽत्र स्थ पुराणा ये च नूतना' ऽइति ये ऽत्र स्थ सनातना ये चाधुनातना ऽइत्त्येतत् ॥२॥ 'अदाद्यमो ऽवसानं पृथिव्या' ऽइति । यमो ह वा ऽअस्या ऽअवसानस्येष्टे स ऽएवास्मा-ऽअस्यामवसानं ददाति ॥ ३ ॥ 'अक्रन्निमं पितरो लोकमस्मा' ऽइति । क्षत्रं वै यमो विशः पितरो यस्मा ऽउ वै क्षत्रियो विशा संविदानो ऽस्यामवसानं ददाति तस्मुदत्तं तथो हास्मै क्षत्रं न्यमो विशा पितृभिः संविदानो ऽस्यामवसानं ददाति ॥ ४ ॥ पलाशशाखया व्यूदूहति । ब्रह्म वै पलाशो ब्रह्मणैव तदवसिताञ्व्यूदूहति मन्त्रेण ब्रह्म वै मन्त्रो ब्रह्मणैव तदवसिताञ्व्यूदूहति तामुदीचीमुदस्यति ॥ ५ ॥ * अथोषान्निवपति । अयं वै लोको गार्हपत्यः पशव ऽऊषा ऽअस्मिँस्तल्लोके पशून्दधाति तस्मादिमे ऽस्मिँल्लोके पशवः ॥ ६ ॥ यद्वेवोषान्निवपति † । प्रजापतिः प्प्रजा ऽअसृजत ता नानोल्वा ऽअसृजत ता न समजानन्त सो ऽकामयत सञ्ज्ञानीरन्निति ताः समानोल्बा ऽअकरोत्तासामुषानुल्वमकरोत्ताः समजानत तस्मादुप्येतर्हि समानोल्वाः समेव जानते देवैः समानोल्वो ऽसानीत्यु वै यजते यो यजते तद्यदुषान्निवपति देवैरेव तत्समानोल्वो भवति ॥ ७ ॥ 'संज्ञानमसी'ति । समजानत ह्येतेन 'कामधरण-

(१) शु० य० सं० अ० १२ क० ४५। (२) शु० य० सं० अ० १२ क० ४५। (३) शु० य० सं० अ० १२ क० ४५।

* अत्र शतम् ४००।

† का० श्रौ० सू० १७. १. ४।

(४) शु० य० सं० अ० १२ क० ४६। (५) शु० य० सं० अ० १२ क० ४६।

मि'ति पशवो वा ऽऊषाः पशवः कामधरणं 'मयि ते कामधरणं भूयाद्धि'ति मयि ते पशवो भूयासुरित्येतत्तैः सर्वं गार्हपत्यं प्रच्छादयति योनिर्वै गार्हपत्या चितिरुल्बमूषाः सर्वा तद्योनिमुल्बेन प्रच्छादयति ॥ ८ ॥ अथ सिकता ‡ निवपति । अग्नेरेतद्वैश्वानरस्य भस्म्म यत्सिकता अग्निमु वा ऽएतं वैश्वानरं चेष्यन्नभवति न वा ऽअग्निः स्वं भस्म्मातिदहत्यनतिदाहाय ॥ ९ ॥ यद्वेव सिकता निवपति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता ऽअग्निमु वा ऽएतं वैश्वानरं चेष्यन्नभवति न वा ऽअरेतस्कात्किञ्चन व्विक्रियतेऽस्म्माद्रेतसोऽधि व्विक्रियाता ऽइति ॥ १० ॥ 'अग्नेर्व्भस्म्मास्यग्नेः पुरीषमसी'ति । यातयाम वा ऽअग्नेर्व्भस्म्मायातयाम्न्यः सिकता ऽअयातयाममेवैनदेतत्करोति ताभिः सर्वं गार्हपत्यं प्रच्छादयति योनिर्वै गार्हपत्या चिती रेतः सिकताः सर्वस्यां तद्योनौ रेतो दधाति ॥ ११ ॥ अथैनं परिश्रिद्भिः परिश्रयति । योनिर्वै परिश्रित ऽइदुमेवैतद्रेतः सिक्तं योन्या परिगृह्णाति तस्म्माद्योन्या रेतः सिक्तं परिगृह्यते ॥ १२ ॥ यद्वेवैनं * परिश्रिद्भिः परिश्रयति । अयं वै लोको गार्हपत्य ऽआपः परिश्रित ऽइमं तं लोकमद्भिः परितनोति समुद्रेण हैनं तत्परितनोति सर्वतस्तस्म्मादिमं लोकः सर्वतः समुद्रः पर्य्येति दक्षि-

(१) शु० य० सं० अ० १२ क० ४६ ।
‡ का० श्रौ० सू० १७ १ ६ ।
(२) शु० य० सं० अ० १२ क० ४६ ।
* का० श्रौ० सू० १७. १. ७ ।

णावृत्तस्मादिमं लोकं दक्षिणावृत्समुद्रः पर्य्येति खातेन तस्मादिमं लोकं खातेन समुद्रः पर्य्येति ॥ १३ ॥ 'चितं स्थे'ति । चिनोति ह्येनाः 'परिचितं स्थे'ति परि ह्येनाश्चिनो[1]त्यूर्द्ध्वचितः श्रयद्धमि[2]त्यूर्द्ध्वा ऽउपदधदाह तस्मादूर्द्ध्व ऽएव समुद्रो विजतेऽथ यत्तिरश्चीरुपदध्यात्सकृद्वेदः सर्वः समुद्रो निर्म्मृज्यान्न सादयत्यसन्ना ह्यापो न सूददोहसाधिवदति ॥ १४ ॥ अस्थीनि वै परिश्रितः । प्राणः सूददोहा न वा ऽअस्थिषु प्राणोऽस्त्येकेन यजुषा * बह्वीरिष्टका ऽउपदधात्येकꣳ ह्येतद्रूपं यदापोऽथ यद् बह्वयः परिश्रितो भवन्ति बह्वयो ह्यापः ॥ १५ ॥ तद्वै योनिः परिश्रितः । उल्वमूषा रेतः सिकता वाह्याः परिश्रितो भवन्त्यन्तर ऽऊषा वाह्या हि योनिरन्तरमुल्वं वाह्य ऽऊषा भवन्त्यन्तराः सिकता वाह्यꣳ ह्युल्वमन्तरः रेत ऽएतेभ्यो वै जायमानो जायते तेभ्य ऽएवैनमेतज्जनयति ॥ १६ ॥ अथैनमतश्चिनोति । इदमेवैतद्रेतः सिक्तं विक्रोति तस्मादयोनौ रेतः सिक्तं विक्रियते ॥ १७ ॥ स चतस्रः प्राचीरुपदधाति । द्वे पश्चात्तिरश्च्यौ द्वे पुरस्तात्तद्याश्चतस्रः प्राचीरुपदधाति स ऽआत्मा तद्यत्ताश्चतस्रो भवन्ति चतुर्विधो ह्ययमात्माथ ये पश्चात्ते सक्थ्यौ ये पुरस्तात्तौ बाहू यत्र वा ऽआत्मा तदेव शिरः ॥ १८ ॥ तं वा-

(१) शु० य० सं० अ० १२ क० ४६ । (२) शु० य० सं० अ० १२ क० ४६ । (३) शु० य० सं० अ० १२ क० ४६ ।

* आप० श्रौ० सू० १६. १३. १० ।

ऽएतम् । अत्र पक्षपुच्छवन्तं विकरोति यादृग्वै योनौ रेतो विक्रियते तादृग्जायते तद्यदेतमत्र पक्षपुच्छवन्तं विकरोति तस्मादेषोऽमुत्र पक्षपुच्छवाञ्जायते ॥ १९ ॥ तं वै पक्षपुच्छवन्तमेव सन्तम् । न पक्षपुच्छवन्तमिव पश्यन्ति तस्माद्योनौ गर्भं न यथारूपं पश्यन्त्यथैनममुत्र पक्षपुच्छवन्तं पश्यन्ति तस्माज्जातं गर्भं यथारूपं पश्यन्ति ॥ २० ॥ स * चतस्रः पूर्वा ऽउपदधाति । आत्मा ह्येवाऽग्रे सम्भवतः सम्भवति दक्षिणत ऽउदङ्ङासीन ऽउत्तरार्ध्यां प्रथमामुपदधाति तथो हास्यैषोऽभ्यात्ममेवाग्निश्चितो भवति ॥ २१ ॥ 'अयꣳ सो ऽअग्निः । यस्मिन्त्सोममिन्द्रः सुतं दध' ऽइत्ययं वै लोको गार्हपत्य ऽआपः सोमः सुतोऽस्मिँस्तल्लोकेऽप ऽइन्द्रोऽधत्त 'जठरे वावशान' ऽइति मध्यं वै जठरꣳ 'सहस्रियं वाजमत्यं न सप्तिमि'त्यापो वै सहस्रियो वाजः 'ससवान्त्सन्त्स्तूयसे जातवेद' ऽइति चितः संश्चीयसे जातवेद ऽइत्येतत् ॥ २२ ॥ 'अग्ने यत्ते दिवि वर्च' ऽइति । आदित्यो वा ऽअस्य दिवि वर्चः पृथिव्यामित्यग्निः 'पृथिव्यां यदोषधीष्वप्स्वा यजत्रे'ति य ऽएवौषधिषु चाप्सु चाग्निस्तमेतदाह 'येनान्तरिक्षमुर्वाततन्थे'ति वायुः स 'त्वेषः स भानुरर्णवो नृचक्षा' ऽइति महान्त्स भानुरर्णवो

* का० श्रौ० सू० १७. १. ८ ।

(१) शु० य० सं० अ० १२. क० ४७ । (२) शु० य० सं० अ० १२ क० ४७ । (३) शु० य० सं० अ० १२ क० ४७ । (४) शु० य० सं० अ० १२ क० ४७ ।

(५) शु० य० सं० अ० १२ क० ४८ । (६) शु० य० सं० अ० १२ क० ४८ । (७) शु० य० सं० अ० १२ क० ४८ । (८) शु० य० सं० अ० १२ क० ४८ ।

नृचक्षा ऽइत्त्येतत् ॥ २३ ॥ 'अग्ने दिवो ऽअर्ण्णमच्छा जिगासी'ति । आपो वा ऽअस्य दिवोऽर्ण्णस्ता ऽएष धूमेनाच्छै'त्यच्छो देवाँ२॥ ऽऊचिषे धिष्ण्या ष' ऽइति प्राणा वै देवा धिष्ण्यास्ते हि सर्व्वा धिय ऽइष्णन्ति 'या रोचने परस्तात्सूर्य्यस्य याश्चावस्तादुपतिष्ठन्त ऽआप' ऽइति रोचनो ह नामैष लोको यत्रैष ऽएतत्तपति तद्याश्चैतं परेणापो याश्चावरेण ता ऽएतदाह ॥ २४ ॥ 'पुरीष्यासो ऽअग्नय' ऽइति । पशव्व्यासोऽग्नय ऽइत्त्येत'त्प्रावणेभिः सजोषस' ऽइति प्रायणरूपं प्रायणꣳ ह्येतदग्नेर्य्यद्गार्हपत्यो 'जुषन्तां य्यज्ञमद्रुहोऽनमीवा ऽइषो महीरि'ति जुषन्तां य्यज्ञमद्रुहोऽनशनाया ऽइषोमहीरित्येतत् ॥ २५ ॥ नानोपदधाति । ये नाना कामा ऽआत्मँस्ताँस्तद्दधाति सकृत्सादयत्येकं तदात्मानं करोति सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैनमेतत्सन्तनोति सन्दधाति ॥ २६ ॥ अथ जघनेन परीत्य । * उत्तरतो दक्षिणासीनोऽपरयोर्द्दक्षिणाम ऽउपदधा'तीडाँमग्ने पुरुदꣳसः सानिं गोरि'ति पशवो वा ऽइडा पशूनामेवास्मा ऽएतामाशिषमाशास्ते 'शश्वत्तमः हवमानाय साधे'ति यजमानो वै हवमानः

(१) शु० य० सं० अ० १२ क० ४९ । (२) शु० य० सं० अ० १२ क० ४९ । (३) शु० य० सं० अ० १२ क० ४९ ।

(४) शु० य० सं० अ० १२ क० ५० । (५) शु० य० सं० अ० १२ क० ५० । (६) शु० य० सं० अ० १२ क० ५० ।

* का० श्रौ० सू० १७. १. ११ ।

(७) शु० य० सं० अ० १२ क० ५१ । (८) शु० य० सं० अ० १२ क० ५१ ।

'स्यान्नः सूनुस्तनयो विजावे'ति प्रजा वै सूनु'रग्ने सा ते सुमतिर्भूत्वस्मे' ऽइत्याशिषमाशास्ते ॥ २७ ॥ अथोत्तराम् । 'अयं ते योनिर्ऋत्वियो यतो जातो ऽअरोचथा' ऽइत्ययं ते योनिर्ऋतव्यः सनातनो यतो जातोऽदीप्यथा ऽइत्येत'त्तं जानन्नग्न ऽआरोहाथा नो वर्द्धया रयिमि'ति यथैव यजुस्तथा बन्धुः ॥ २८ ॥ सक्थ्यावस्यैते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हीमे सक्थ्यौ द्वे भवतो द्वे हीमे सक्थ्यौ पञ्चादुपदधाति पञ्चाद्धीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे भवत ऽएवꣳ हीमे सक्थ्यावग्राभ्याꣳ सꣳस्पृष्टे ॥ २९ ॥ अथ तेनैव पुनः परीत्य । * दक्षिणत ऽउदङ्डासीनः पूर्वयोरुत्तरामग्र ऽउपदधाति 'चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदे'त्यथ दक्षिणां 'परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीदे'ति ॥ ३० ॥ बाहू ऽअस्यैते । ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हीमौ बाहू द्वे भवतो द्वौ हीमौ बाहू पूर्वार्द्धऽउपदधाति पुरस्ताद्धीमौ बाहू ऽअग्राभ्याꣳ सꣳस्पृष्टे भवत ऽएवꣳ हीमौ बाहू ऽअग्राभ्याꣳ सꣳस्पृष्टौ स वाऽइतीमा ऽउपदधातीतीमे ऽइतीमे तद्दक्षिणावृत्तद्धि देवत्रा ॥ ३१ ॥ अष्टाविष्टका † ऽउपदधाति । अष्टाक्षरा गायत्री

(१) शु० य० सं० अ० १२ क० ५१ । (२) शु० य० सं० अ० १२ क० ५२ । (३) शु० य० सं० अ० १२ क० ५२ । (४) शु० य० सं० अ० १२ क० ५० ।

* का० श्रौ० सू० १७. १. १२ ।

(५) शु० य० सं० अ० १२ क० ५१ । (६) शु० य० सं० अ० १२ क० ५३ ।

† का० श्रौ० सू० १७. १. १६ ।

गायत्रोऽग्निर्ष्यावानग्निर्ष्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोति पञ्चकृत्वः सादयति पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्ष्यावानग्निर्ष्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोत्यष्टाविष्टकाः पञ्चकृत्वः सादयति तत्त्रयोदश त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि षावानग्निर्ष्यावत्यस्य मात्रा तावत्तद्भवति ॥ ३२ ॥ अथ * लोकम्पृणामुपदधाति । तस्या ऽउपरि बन्धुस्तिस्रः पूर्वास्त्रिवृदग्निर्ष्यावानग्निर्ष्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोति दशोत्तरास्तासामुपरि बन्धुर्द्वे वाग्रेऽथ दशाथैकामेवः हि चितिं चिन्वन्ति तास्त्रयोदश सम्पद्यन्ते तस्योक्तो बन्धुः ॥ ३३ ॥ ता ऽउभयस्य ऽएकविंशतिः सम्पद्यन्ते । द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविंशोऽमुं तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयति ॥ ३४ ॥ एकविंशतिर्वै व परिश्रितः । द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअयमग्निरमुतोऽध्येकविंश ऽइमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति तद्यदेता ऽएवमुपदधात्येतावैवैतदुभयोऽभयस्मिन्प्रतिष्ठापयति तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ तौ वा ऽएतावत्र द्वावेकविंशौ सम्पादयत्यत्र ह्येवेमौ तदोभौ भवत ऽआहवनीयश्च गार्हपत्यश्च ॥ ३५ ॥ अथ † पुरीषं निवपति । तस्योपरि बन्धुस्तच्चात्वालवेलाया ऽआहरत्यग्निरेष यच्चात्वालस्तथो

* का० श्रौ० सू० १७. १. १७ ।

† का० श्रौ० सू० १७. १. १८ ।

हास्यैतदाग्नेयमेव भवति सा समम्बिला स्यात्तस्योक्तो बन्धुः ॥ ३६ ॥ व्याममात्री भवति । व्याममात्रो वै पुरुषः पुरुषः प्रजापतिः प्रजापतिरग्निरात्मसम्मितां तद्योनिं करोति परिमण्डला भवति परिमण्डला हि योनिरथोऽअयं वै लोको गार्हपत्यः परिमण्डल ऽउ वा ऽअयं लोकः ॥ ३७ ॥ अथैनौ * सन्निवपति । संज्ञामेवाभ्यामेतत्करोति 'समितंः सङ्कल्पेथाꣳ, सं वां मनाꣳसि सं व्रताऽग्ने त्वं पुरीष्यो, भवतं नः समनसावि'ति शमयत्येवैनावेतद्हिः सायै यथा नाऽन्योऽन्यः हिꣳस्याताम् ॥ ३८ ॥ चतुर्भिः सन्निवपति । तद्ये चतुष्पादाः पशवस्तैरेवाभ्यामेतत्सज्ञां करोत्यथो ऽअन्नं वै पशवोऽन्नेनैवाभ्यामेतत्संज्ञां करोति ॥ ३९ ॥ तां न रिक्तामवेक्षेत नेद्रिक्तामवेक्षा ऽइति यद्रिक्तामवेक्षेत ग्रसेत हैनम् ॥ ४० ॥ अथास्याꣳ सिकता-ऽआवपति । अग्नेरेतद्वैश्वानरस्य रेतो यत्सिकता ऽअग्नि-मेवास्यामेतद्वैश्वानरः रेतो भूतः सिञ्चति सा † समम्बिला स्यात्तस्योक्तो बन्धुः ॥ ४१ ॥ अथैनां विमुञ्चति । अप्र-दाहाय यद्धि युक्तं न विमुच्यते प्र तद्ब्रूत ऽएतद्वा-ऽएतद्युक्ता रेतोऽभार्षीदेतमग्निं तमत्राजीजनदथापरं धत्ते योषा वा ऽउखा तस्माद्यदा योषा पूर्वः रेतः प्रजन-यत्यथापरं धत्ते ॥ ४२ ॥ 'मातेव पुत्रं पृथिवी पुरीष्यमि'ति ।

* का० श्रौ० सू० १७. १ १९ ।
(१) शु० य० सं० अ० १२ क० ५७-६० ।
† का० श्रौ० सू० १७. १. २१ ।
(२) शु० य० सं० अ० १२ क० ६१ ।

मातेव पुत्रं पृथिवी पशव्यमित्येतदग्निꣳ 'स्वे योनावभारुखे'त्यग्निꣳ स्वे योनावभार्षीदुखेत्येत'त्तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्म्मा विमुञ्चत्वि'त्यृतवो वै विश्वे देवास्तदेनां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्म्मा विमुञ्चति तामुत्तरतोऽग्नेर्निदधात्यरत्निमात्रे तस्योक्तो बन्धुः ॥ ४३ ॥ अथास्यां पय ऽआनयति । एतद्वाऽएतद्व्रतो धत्तेऽथ पयो धत्ते योषा वा ऽउखा तस्माद्यदा योषा रेतो धत्तेऽथ पयो धत्तेऽधराः सिकता भवन्त्युत्तरं पयोऽधरः हि रेत ऽउत्तरं पयस्तन्मध्य ऽआनयति यथा तत्प्रतिपुरुषशीर्षमुपदध्यात् ॥ ४४ ॥ (A)

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[प्रजापतिशरीरविश्लेषप्रतिपादनादि]

प्रजापतिः प्रजा ऽअसृजत । स प्रजाः सृष्ट्वा सर्वमाजिमित्वा व्यस्रꣳसत तस्माद्विस्रस्तात्प्राणो मध्यत ऽउदक्रामदथास्माद्वीर्य्यमुदक्रामत्तस्मिन्नुत्क्रान्तेऽपश्यत तस्मात्पन्नादन्नमस्रवद्यच्चक्षुरध्यशेत तस्मादस्यान्नमस्रवन्नो हेह तर्हि का चन प्रतिष्ठास ॥ १ ॥ ते देवा ऽअब्रुवन् । न वा ऽइतोऽन्या प्रतिष्ठास्तीममेव पितरं प्रजापतिꣳ संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति ॥ २ ॥ तेऽग्नि-

(१) शु० य० सं० अ० १२ क० ६१। (२) शु० य० सं० अ० १२ क० ६१। एतद्ब्राह्मणस्था विषया अन्यत्रापि उपलभ्यन्ते यथा— कठ० सं० १६. २, कपि० २५. २; मै० सं० ११. ७. ११; तै० सं० ४. २. ४।

मब्रुवन्। न वा ऽइतोऽन्या प्रतिष्ठास्ति त्वयीमं पितरं प्रजापतिः संस्करवाम सैव नः प्रतिष्ठा भविष्यतीति किं मे ततो भविष्यतीति ॥ ३ ॥ तेऽब्रुवन्। अन्नं वा ऽअयं प्रजापतिस्त्वन्मुखा ऽएतदन्नमदाम त्वन्मुखानां न ऽएषो ऽन्नमसदिति तथेति तस्मादेवा ऽअग्निमुखा ऽअन्नमदन्ति यस्यै हि कस्यै च देवतायै जुह्वत्यग्नावेव जुह्वत्यग्निमुखा हि तद्देवा ऽअन्नमकुर्वत ॥ ४ ॥ स योऽस्मात्प्राणो मध्यत ऽउदक्रामत्। अयमेव स वायुर्य्योऽयं पवतेऽथ यदस्माद्वीर्य्यमुदक्रामदसौ स ऽआदित्योऽथ यदस्मादन्नमस्रवद्यदेव संवत्सरेऽन्नं तत्तत् ॥ ५ ॥ तं देवा ऽअग्नौ प्रावृञ्जन्। तद्य ऽएनं प्रवृक्तमग्निरारोहद्य ऽएवास्मात्स प्राणो मध्यत ऽउदक्रामत्स ऽएवैनः स ऽआपद्यत तमस्मिन्नदधुरथ यदस्माद्वीर्य्यमुदक्रामत्तदस्मिन्नदधुरथ यदस्मादन्नमस्रवत्तदस्मिन्नदधुस्तः सर्वं कृत्स्नः संस्कृत्योर्द्धमुदश्रयँस्तद्यं तमुदश्रयन्निमे स लोकाः ॥ ६ ॥ तस्यायमेव लोकः प्रतिष्ठा। अथ योऽस्मिँल्लोकेऽग्निः सोऽस्यावाङ् प्राणोथास्यान्तरिक्षमात्माथ योऽन्तरिक्षे वायुर्य्य ऽएवायमात्मन्प्राणः सोऽस्य स द्यौरेवास्य शिरः सूर्य्याचन्द्रमसौ चक्षुषी यच्चक्षुरक्ष्यशेत स चन्द्रमास्तस्मात्स मीलितरोऽन्नः हि तस्मादस्रवत् ॥ ७ ॥ तदेषा वै सा प्रतिष्ठा। यां तद्देवाः समस्कुर्वन्तस्सैवेयमद्यापि प्रतिष्ठा सो ऽएवाप्यतोऽधि भविता ॥ ८ ॥ स यः स प्रजापतिर्व्व्यस्रक्षत। अयमेव स योऽयमग्निश्चीयते तद्यदेषोखा रिक्ता शेते पुरा प्रव-

र्ज्जनाद्यथैव तत्प्रजापतिरुत्क्रान्ते प्राण ऽउत्क्रान्ते व्रीर्य्ये स्रुतेऽन्ने रिक्तोऽशयदेतदस्य तद्रूपम् ॥ ९ ॥ तामग्नौ प्रवृणक्ति । यथैवैनमदो देवाः प्रावृञ्जँस्तद्य ऽएनां प्रवृक्तामग्निरारोहति य ऽएवास्मात्स प्राणो मक्ष्यत ऽउदुक्कामत्स ऽएवैनꣳ स ऽआपद्यते तमस्मिन्दधात्यथ यद्रुक्मं प्रतिमुच्च्य बिभर्त्ति यदेवाऽस्माद्वीर्य्यमुदुक्कामत्तदस्मिन्दधात्यथ षाः समिध ऽआदधाति यदेवास्म्मादुन्न मस्रवत्तदस्मिन्दधाति ॥ १० ॥ [अर्धप्रपाठकः ५४ ॥] ता वै सायं प्रातरादधाति । अह्नश्च हि तद्रात्रेश्च्चान्नमस्रवत्तान्येतानि सर्वस्मिन्नेव संवत्सरे स्युः संवत्सरो हि स प्रजापतिर्य्यस्मात्तान्युदुक्रामँस्तदस्मिन्नेतत्सर्वस्मिन्नेव सर्वं दधाति यस्मिन्न्हास्यै * तदतो न कुर्य्यान्न हास्य तस्मिन्नेतद्दध्यान्नासंवत्सरभृतस्येक्षकेण च न भवितव्यमिति ह स्माह वामकक्षायणो नेदिमं पितरं प्रजापतिं विच्छिद्यमानं पश्यानीति तꣳ संवत्सरे सर्वं कृत्स्नꣳ संस्कृत्योर्द्धमुच्छ्रयति यथैवैनमदो देवा ऽउदश्रयन् ॥ ११ ॥ तस्य गार्हपत्य ऽएवायं लोकः । अथ यो गार्हपत्येऽग्निर्य्य ऽएवायमस्मिँल्लोकेऽग्निः सोऽस्य सोऽथ यदन्तराहवनीयं च गार्हपत्यं च तदन्तरिक्षमथ य ऽआग्नीध्रीयेऽग्निर्य्य ऽएवायमन्तरिक्षे वायुः सोऽस्य स ऽआहवनीय ऽएव द्यौरथ य ऽआहवनीयेऽग्निस्तौ सूर्य्याचन्द्रमसौ सोऽस्यैष ऽआत्मैव ॥ १२ ॥ तस्य शिर ऽएवाहव-

* 'तद्दधौ' इति पाठ 'क' पुस्तके ।

नीयः । अथ य आहवनीयेऽग्निर्य एवायः शीर्ष-
न्प्राणः सोऽस्य स तद्यत्स पक्षपुच्छवान्भवति पक्षपुच्छ-
वान्ह्ययः शीर्षन्प्राणश्चक्षुः शिरो दक्षिणꣳ श्रोत्रं दक्षिणः
पक्ष उत्तरꣳ श्रोत्रमुत्तरः पक्षः प्राणो मध्यमात्मा वाक्पुच्छं
प्रतिष्ठा तद्यत्प्राणा वाचान्नं जग्ध्वा प्रतितिष्ठन्ति तस्मा-
* त्प्राणानां वाक्पुच्छं प्रतिष्ठा ॥ १३ ॥ अथ यदन्तरा-
हवनीयं च गार्हपत्यं च । स ऽआत्माथ य ऽआग्नीध्रीये-
ऽग्निर्य एवायमन्तरात्मन्प्राणः सोऽस्य स प्रतिष्ठैवास्य
गार्हपत्योऽथ यो गार्हपत्येऽग्निः सोऽस्यावाङ् प्राणः ॥ १४ ॥
तः हैके त्रिचितं चिन्वन्ति । त्रयो वा ऽइमेऽवाञ्चः
प्राणा ऽइति न तथा कुर्य्यादिति ते रेचयन्त्येकविꣳश-
सम्पदमथो ऽअनुष्टुप्सम्पदमथो बृहतीसम्पदं ये तथा
कुर्वन्त्येकꣳ ह्येवैतद्रूपं स्योनिरेव प्रजातिरेव यदेतेऽवाञ्चः
प्राणा यद्धि मूत्रं करोति यत्पुरीषं प्रैव तज्जायते ॥ १५ ॥
अथातः सम्पदेव । एकविꣳशतिरिष्टका नव यजूꣳषि
तत्त्रिꣳशत्सादनं च सूददोहाश्च तद् द्वात्रिꣳशद् द्वात्रिꣳशद-
क्षराऽनुष्टुप्सैषाऽनुष्टुप् ॥ १६ ॥ एकविꣳशतिर्वेव परिश्रितः ।
यजुर्द्वाविꣳशं व्युदूहनस्य यजुरुपाश्च यजुश्च सिकताश्च
यजुश्च पुरीषं च यजुश्च चतुर्भिः संनिवपति त्रिमु-
श्चति पञ्चमेन ततस्त्रिभिरियं द्वात्रिꣳशदक्षरानुष्टुप्सैषा-
नुष्टुप् ॥ १७ ॥ अथैते द्वे यजुषी । सो ऽअनुष्टुबेव वाग्वा-
ऽअनुष्टुसद्यदिदं द्वयं वाचो रूपं दैवं च मानुषं चोच्चैश्च

+ 'प्राणानाम्' इति पाठो न दृश्यते 'ख-ग' पुस्तकयोः ।

शनैश्च तदेते द्वे ॥ १८ ॥ ता वा ऽएतास्तिस्रोऽनुष्टुभः । चित ऽएष गार्हपत्यस्तद्यदेता ऽअत्र तिस्रोऽनुष्टुभः सम्पादयन्त्यत्र ह्येवेमे तदा सर्वे लोका भवन्ति ततोऽन्यतरां द्वात्रिंशदक्षरामनुष्टुभमाहवनीयः हरन्ति स ऽआहवनीयः सा द्यौस्तच्छिरोऽथेहान्यतरा परिशिष्यते स गार्हपत्यः सा प्रतिष्ठा स ऽउ ऽअयं लोकः ॥ १९ ॥ अथ ये ऽएते द्वे यजुषी । एतत्तद्यदन्तराहवनीयं च गार्हपत्यं च तदन्तरिक्षः स ऽआत्मा तद्यत्ते द्वे भवतस्तस्मादेतत्तनीयो यदन्तराहवनीयं च गार्हपत्यं च तस्मादेषां लोकानामन्तरिक्षलोकस्तनिष्टुः ॥ २० ॥ सैषा त्रेधाविहिता वागनुष्टुप् । नामेषोऽग्निः प्राणो भूत्वानुसञ्चरति य ऽआहवनीयेऽग्निः स प्राणः सोऽसावादित्योऽथ य ऽआग्नीध्रीयेऽग्निः स व्यानः स ऽउ ऽअयं वायुर्योऽयं पवतेऽथ यो गार्हपत्येऽग्निः स ऽउदानः स ऽउ ऽअयं योऽयमस्मिन्मल्लोकेऽग्निरेवं विद्ध वाव सर्वां वाचः सर्वं प्राणः सर्वमात्मानः संस्कुरुते ॥ २१ ॥ सैषा बृहत्येव । ये वै द्वे द्वात्रिंशतौ द्वात्रिंशदेव तदुथैते द्वे यजुषी तच्चतुस्त्रिंशदग्निरेव पञ्चत्रिंशो नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्याꣳ स ऽउद्व्यक्षरस्तत्पदत्रिंशत्पदत्रिंशदक्षरा बृहतीं बृहतीं वा ऽएष सञ्चितोऽभिसम्पद्यते यादृग्वै योनौ रेतः सिच्यते तादृगजायते तद्यदेतामत्र बृहतीं करोति तस्मादेष सञ्चितो बृहतीमभिसम्पद्यते ॥ २२ ॥ तदाहुः । यदयं लोको गार्हपत्योऽन्तरिक्षं

धिष्ण्या द्यौराहवनीयोऽन्तरिक्षलोक ऽउ ऽअस्माल्लोकादुनन्तर्हितोऽथ कस्माद् गार्हपत्यं चित्त्वाहवनीयं चिनोत्यथ धिष्ण्यानिति सह हैवेमावग्रे लोकावासतुस्तयोर्वियतोर्य्योऽन्तरेणाकाश ऽआसीत्तदन्तरिक्षमभवद्दीक्षः हैतन्नाम ततः पुरान्तरा वा ऽइदमीक्षमभूदिति तस्मादन्तरिक्षं तद्यद् गार्हपत्यं चित्त्वाहवनीयं चिनोत्येतौ ह्यग्रे लोकावसृज्येतामथ प्रत्येत्य धिष्ण्यान्निवपति कर्म्मणऽएवानन्तरयायाथो ऽअन्तयोर्वाव संस्क्रियमाणयोर्म्मध्यः संस्क्रियते ॥ २३ ॥

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

[नैर्ऋतीष्टकाहरणादि]

अथातो * नैर्ऋतीर्हरन्ति । एतद्वै देवा गार्हपत्यं चित्त्वा समारोहन्नयं वै लोको गार्हपत्य ऽइममेव तँ लोकः संस्कृत्य समारोहँस्ते तम ऽएवानतिदृश्यमपश्यन् ॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथेदं तमः पाप्मानमपहनामहा ऽइति तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेदं तमः पाप्मानमपहनामहा ऽइति ॥ २ ॥ ते चेतयमानाः । एता ऽइष्टका ऽअपश्यन्नैर्ऋतीस्ता ऽउपादधत ताभिस्तत्तमः पाप्मानमपाघ्नत

* का० श्रौ० सू० १७. १. २३ ।

पाप्मा वै निर्ऋतिस्तद्यदेताभिः पाप्मानं निर्ऋतिमपाघ्नत तस्मादेता नैर्ऋत्यः ॥ ३ ॥ तद्वा ऽएतत्क्रियते । यद्देवाऽअकुर्वन्निदं नु तत्तमः स पाप्मा देवैरेवापहतो यत्त्वेतत्करोति यद्देवा ऽअकुर्वꣳस्तत्करवाणीत्यथो य ऽएव पाप्मा या निर्ऋतिस्तमेताभिरपहते तद्यदेताभिः पाप्मानं निर्ऋतिमपहते तस्मादेता नैर्ऋत्यः ॥ ४ ॥ यद्वै वैता नैर्ऋतीर्हरन्ति । प्रजापतिं विस्रस्तं स्यत्र देवाः समस्कुर्वꣳस्तमुखायां स्योनौ रेतो भूतमसिञ्चन्योनिर्वा ऽउखा तस्मा ऽएताꣳ संवत्सरे प्रतिष्ठाꣳ समस्कुर्वन्निममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्राजनयँस्तस्य यः पाप्मा यः श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभिरपाघ्नँस्तद्यदस्यैताभिः पाप्मानं निर्ऋतिमपाघ्नँस्तस्मादेता नैर्ऋत्यः ॥ ५ ॥ तथैवैतद्यजमानः । आत्मानमुखायां स्योनौ रेतो भूतꣳ सिञ्चति योनिर्वा ऽउखा तस्मा ऽएताꣳ संवत्सरे प्रतिष्ठाꣳ संस्करोतीममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्रजनयति तस्य यः पाप्मा यः श्लेष्मा यदुल्वं यज्जरायु तदस्यैताभिरपहन्ति तद्यदस्यैताभिः पाप्मानं निर्ऋतिमपहन्ति तस्मादेता नैर्ऋत्यः ॥ ६ ॥ पादमात्र्यो भवन्ति । अधस्पदुमेव तत्पाप्मानं निर्ऋतिं कुरुतेऽलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसन्तमेव तत्पाप्मानं निर्ऋतिं कुरुते तुषपक्वा भवन्ति नैर्ऋता वै तुषा नैर्ऋतैरेव तन्नैर्ऋतं कर्म्म करोति कृष्णा भवन्ति कृष्णꣳ हि तत्तम ऽआसीद्यो कृष्णा वै निर्ऋतिः ॥ ७ ॥ ताभिरेतां दिशं स्यन्ति । एषा वै नैर्ऋती दिङ् नैर्ऋत्यामेव तद्दिशि

निर्ऋतिं दधाति स यत्र स्वकृतं वेरिणꣳ श्वभ्रप्प्रदरो वा स्यात्तदेना ऽउपदधाद्यत्र वा ऽअस्या ऽअवदीर्य्यते यत्र वास्या ऽओषधयो न जायन्ते निर्ऋतिर्हास्यै तद्गृह्णाति नैर्ऋत ऽएव तद् भूमेर्न्निर्ऋतिं दधाति ताः पराचीर्ल्लोकभाजः कृत्वोपदधाति ॥८॥ 'असुन्वन्तमयजमानमिच्छे'ति । यो वै न सुनोति न यजते तं निर्ऋतिर्ऋच्छति 'स्तेनस्येत्यामन्विहि तस्करस्ये'ति स्तेनस्य चेत्यामन्विहि तस्करस्य चेत्येतदुथो यथा स्तेनस्तस्करः प्रलायमेत्येवं प्रलायमिहीत्यन्न्यमस्म दिच्छ सा त' ऽइत्येत्यनित्थं विद्वाꣳसमिच्छेत्येत'न्नमो देवि निर्ऋते तुभ्यमस्त्वि'ति नमस्कारेणैवैनामपहते ॥ ९ ॥ 'नमः सु ते निर्ऋते तिग्मतेज' ऽइति । तिग्मतेजा वै निर्ऋतिस्तस्या ऽएतन्नमस्करोत्ययस्म्मयं विचृता बन्धमेतमि'त्ययस्म्मयेन ह वै तं बन्धेन निर्ऋतिर्बध्नाति यं बध्नाति 'यमेनं त्वं यम्या संविदाने'त्यग्निर्वै यम ऽइयं यम्याऽभ्याꣳ हीदꣳ सर्व्वं यतमाभ्यां त्वꣳ संविदाने'त्येत'दुत्तमे नाके ऽअधि रोहयैनमि'ति स्वर्गो वै लोको नाकः स्वर्गे लोके यजमानमधिरोहयेत्त्येतत् ॥ १० ॥ 'यस्यास्ते घोर ऽआसञ्जुहोमी'ति । घोरा वै निर्ऋतिस्तस्या ऽएतदासञ्जुहोति यत्तद्देवत्यं कर्म्म करोत्येषां

(१) शु० य० सं० अ० १२ क० ६२। (२) शु० य० सं० अ० १२ क० ६२। (३) शु० य० सं० अ० १२ क० ६२। (४) शु० य० सं० अ० १२ क० ६२। (५) शु० य० सं० अ० १२ क० ६३। (६) शु० य० सं० अ० १२ क० ६३। (७) शु० य० सं० अ० १२ क० ६३। (८) शु० य० सं० अ० १२ क० ६३। (९) शु० य० सं० अ० १२ क० ६४।

बन्धानामवसर्जनाये'ति यैर्बन्धैर्बद्धो भवति 'यां त्वा जनो भूमिरिति प्रमन्दत' ऽइतीयं वै भूमिरस्यां वै स भवति यो भवति 'निर्ऋतिं त्वाहं परिवेद विश्श्वत' ऽइति निर्ऋतिरिति त्वाहं परिवेद सर्वत ऽइत्येतदियं वै निर्ऋतिरियं वै तं निरर्प्पयति यो निर्ऋच्छति तद्यथा वै ब्रूयादुसावामुष्यायणोऽसि वेद त्वा मा मा हिꣳसीरित्येवमेतदाह नतराꣳ हि विदित ऽआमन्त्रितो हिनस्ति ॥ ११ ॥ नोपस्पृशति । पाप्मा वै निर्ऋतिर्नेत्पाप्मना सꣳस्पृशाऽइति न सादयति प्रतिष्ठा वै सादनं नेत्पाप्मानं प्रतिष्ठाप्यानीति न सुददोहसाधिवदति प्राणो वै सुददोहा नेत्पाप्मानं प्राणेन सन्तनवानि सन्दधानीति ॥ १२ ॥ ता हैके परस्तादर्वाचीरुपदधति । पाप्मा वै निर्ऋतिर्नेत्पाप्मानं निर्ऋतिमन्ववायामेति न तथा कुर्य्यात्परार्चीरेवोपदध्यात्पराञ्चमेव तत्पाप्मानं निर्ऋतिमपहते ॥ १३ ॥ तिस्र ऽइष्टका ऽउपदधाति । त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥ १४ ॥ अथासन्दीꣳ * शिक्यꣳ । रुक्मपाशमिण्ड्वे तत्परार्द्धं न्यस्यति नैर्ऋतो वै पाशो निर्ऋतिपाशादेव तत्प्रमुच्यते 'यं ते देवी निर्ऋतिरा बबन्ध पाशं ग्रीवास्वविचृत्यमि'त्यनेवं विदुषा हाविचृत्य'स्तं ते विष्यामि'त्यायुषो न मध्या-

(१) शु० य० सं० अ० १२ क० ६४। (२) शु० य० सं० अ० १२ क० ६४। (३) शु० य० सं० अ० १२ क० ६४।

* का० श्रौ० सू० १७. २. ३।

(४) शु० य० सं० अ० १२ क० ६५। (५) शु० य० सं० अ० १२ क० ६५।

द्वि'त्यग्निर्वा ऽआयुस्तस्यैतन्मद्ध्यं य्यच्चितो गार्हपत्यो भवत्यचित ऽआहवनीयस्तस्माद्यदि युवाग्निं चिनुते यदि स्थविर ऽआयुषो न मद्ध्यादित्येवा'ह्यथैतं पितुर्मद्धि प्रसूत' ऽइत्यन्नं वै पितुरथैतदुन्नमद्धि प्रमुक्त ऽइत्येतत्त्रिष्टुब्भिर्व्रज्रो वै त्रिष्टुब्व्रज्रेणैव तत्पाप्मानं निर्ऋतिमपहते ॥ १५ ॥ तिस्र ऽइष्टका भवन्ति । आसन्द्री शिक्यꣳ रुक्मपाश ऽइष्ट्वे तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैव तत्पाप्मानं निर्ऋतिमपहते ॥ १६ ॥ अथान्तरेणोदचमसं * निनयति । व्रज्रो वा ऽआपो व्रज्रेणैव तत्पाप्मानं निर्ऋतिमन्तर्द्धत्ते 'नमो भूत्यै येदं चकारे'त्युपोत्तिष्टन्ति भूत्यै वा ऽएतदग्रे देवाः कर्म्माकुर्वत तस्या ऽएतन्नमोऽकुर्वन्भूत्या ऽउ ऽएवायमेतत्कर्म्म कुरुते तस्या ऽएतन्नमस्करोत्यप्रतीक्षमायन्त्यप्रतीक्षमेव तत्पाप्मानं निर्ऋतिं जहति ॥ १७ ॥ प्रत्येत्याग्निमुपतिष्ठते । एतद्वा ऽएतदुयथायथं करोति यदग्नौ सामिचित ऽएतां दिशमेति तस्मा ऽएवैतन्निह्नुतेऽहिꣳसायै ॥ १८ ॥ † यद्वेवोपतिष्ठते । अयं वै लोको गार्हपत्यः प्रतिष्ठा वै गार्हपत्य ऽइयमु वै प्रतिष्ठाथैतदुपथमिवैति यदेतां दिशमेति तद्यदुपतिष्ठत ऽइमामेवैतत्प्रतिष्ठामभिप्रत्यैत्यस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति

(१) शु० य० सं० अ० १२ क० ६५ ।
* का० श्रौ० सू० १७. २ ४ ।
(२) शु० य० सं० अ० १२ क० ६५ ।
† का० श्रौ० सू० १७ २. ५ ।

॥ १९ ॥ 'निवेशनः संगमनो वसूनामि'ति । निवेशनो ह्ययं लोकः संगमनो वसूनां 'विश्वा रूपाभिचष्टे शचीभिरिति' सर्वाणि रूपाण्यभिचष्टे शचीभि रित्येत'देव ऽइव सविता सत्यधर्म्मेन्द्रो न तस्थौ समरे पथीनामि'ति यथैव यजुस्तथा बन्धुः ॥ २० ॥ (A)

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[प्रायणेष्टिः]

(तत्र प्रायणीयहविषः प्रचारः, सीरोपादानभूतवृक्षविशेषविधानादिकञ्च)

अथ प्रायणीयं निर्वपति । तस्य हविष्कृता वाचं विसृजते वाचं विसृज्य स्तम्बयजुर्हरति स्तम्बयजुर्हृत्वा पूर्वेण परिग्रहेण परिगृह्य लिखित्वाह हर त्रिरिति हरति त्रिराग्नीध्रः ॥ १ ॥ प्रत्येत्य प्रायणीयेन प्रचरति । प्रायणीयेन प्रचर्य्य सीरं युनक्त्येतद्वा ऽएनं देवाः संस्करिष्यन्तः पुरस्तादुन्नेन समार्द्धयँस्तथैवैनमयमेतत्संस्करिष्यन्पुरस्तादुन्नेन समर्द्धयति सीरं भवति सेरः हैतयत्सीरमिरामेवास्मिन्नेतद्दधाति ॥ २ ॥ औदुम्बरं भवति । ऊर्ग्वै रस ऽउदुम्बर ऽऊर्जैवैनमेतद्रसेन समर्द्धयति मौञ्जं परिसीर्य्यं त्रिवृत्तस्योक्तो बन्धुः ॥ ३ ॥ * सोऽग्ने-

(१) शु० य० सं० अ० १२ क० ६६। (२) शु० य० सं० अ० १२ क० ६६। (३) शु० य० सं० अ० १२ क० ६६।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा का० श्रौ० १. १. १, कठ० सं० १६. १२; कपि० सं० २१. ३, मै० सं ११. ७. १२, तै० सं० ८. २. ५।

* का० श्रौ० सू० १७. २. १०।

र्दक्षिणाꣳ श्रोणिम् । जघनेन तिष्ठन्नुत्तरस्याꣳसस्य पुरस्ताद्युज्यमानमभिमन्त्रयते 'सीरा युञ्जन्ति कवयो युगा वितन्वते पृथगि'ति ये विद्वाꣳसस्ते कवयस्ते सीरं च युञ्जन्ति युगानि च वितन्वते पृथ'ग्धीरा देवेषु सुम्मन-ये'ति यज्ञो वै सुम्मनं धीरा देवेषु यज्ञं तन्वाना ऽइत्येतत् ॥ ४ ॥ 'युनक्त सीरा वियुगा तनुद्वमि'ति । युञ्जन्ति हि सीरं वियुगानि तन्वन्ति 'कृते योनौ वपतेह वीजमि'ति वीजाय वा ऽएषा योनिष्क्रियते यत्सीता यथा ह वा-ऽअयोनौ रेतः सिञ्चेदेवं तद्यदुकृष्टे वपति 'गिरा च श्रुष्टिः सभरा ऽअसन्न' ऽइति वाग्वै गीरन्नꣳ श्रुष्टि'न्नेंदीय-ऽइत्सृण्ण्यः पक्वमेयादि'ति यदा वा ऽअन्नं पच्यतेऽथ तत्सृ-ण्ण्योपचरन्ति द्वाभ्यां स्युनक्ति गायत्र्या च त्रिष्टुभा च तस्योक्तो वन्धुः ॥ ५ ॥ स दक्षिणमेवाग्रे युनक्ति । अथ स-व्यमेवं देवत्रेतरथा मानुषे षड्गवं भवति द्वादशगवं वा चतु-र्विꣳशतिगवं वा संवत्सरमेवाभिसम्पदम् ॥६॥ अथैनं विकृ-षति । अन्नं वै कृषिरेतद्वा ऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तादुन्नमदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तादुन्नं दधाति ॥ ७ ॥ स वा ऽआत्मानमेव * विकृषति । न पक्षपुच्छाभ्यात्मँस्तदुन्नं दधाति यदु वा ऽआत्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुच्छान्यथ यत्पक्षपुच्छेषु

(१) शु० सं० अ० १२ क० ६७। (२) शु० सं० अ० १२ क० ६७। (३) शु० सं० अ० १२ क० ६८। (४) शु० सं० अ० १२ क० ६८। (५) शु० सं० अ० १२ क० ६८। (६) शु० सं० अ० १२ क० ६८।

* का० श्रौ० सू० १७. २. ११।

नैव तदात्मानमवति न पक्षपुच्छानि ॥ ८ ॥ स दक्षिणार्द्धेनाग्नेः । अन्तरेण परिश्रितः प्राचीं प्रथमाꣳ सीतां कृषति 'शुनः सु फाला वि कृषन्तु भूमिः शुनं कीनाशा ऽअभि यन्तु वाहैः'ति शुनः शुनमिति यद्वै समृद्धं तच्छुनः समर्द्धयत्येवैनामेतत् ॥ ९ ॥ अथ जघनार्द्धेनोदीचीम् । 'घृतेन सीता मधुना समज्यताम्'ति यथैव यजुस्तथा वन्धु'र्विश्वैर्देवैरनुमता मरुद्भिरि'ति विश्वे च वै देवा मरुतश्च वर्षस्येशत 'ऽऊर्ज्जस्वती पयसा पिन्वमाने'ति रसो वै पय ऽऊर्ज्जस्वती रसेनान्नेन पिन्वमानेत्येत'दस्मान्त्सीते पयसाऽभ्याववृत्स्वे'त्यस्मान्त्सीते रसेनाऽभ्याववृत्स्वेत्येतत् ॥ १० ॥ अथोत्तरार्द्धेन प्राचीम् । लाङ्गलं पवीरवदु'ति लाङ्गलः रयिमदित्येत'त्सुशेवः सोमपित्सर्वि'त्यन्नं वै सोमस्त'दुद्वपति गोमविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणमि'त्येतद्धि सर्वः सीतोद्वपति ॥ ११ ॥ अथ पूर्वार्द्धेन * दक्षिणाम् । 'कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ऽओषधीभ्य' ऽइति सर्वदेवत्या वै कृषिरेताभ्यो देवताभ्यः सर्वान्कामान्धुक्ष्वेत्येतदित्यग्रे कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥ १२ ॥ चतस्रः सीता

(१) शु० य० सं० अ० १२ क० ७०। (२) शु० य० सं० अ० १२ क० ७०। (३) शु० य० सं० अ० १२ क० ७०। (४) शु० य० सं० अ० १२ क० ७०। (५) शु० य० सं० अ० १२ क० ७१। (६) शु० य० सं० अ० १२ क० ७१। (७) शु० य० सं० अ० १२ क० ७१। (८) शु० य० सं० अ० १२ क० ७२। (९) शु० य० सं० अ० १२ क० ६९।

* 'दक्षिणा' इति पाठः 'क' पुस्तके।

यजुषा कृषति । तद्यच्चतसृषु दिक्ष्वन्नं तदस्मिन्नेतद्दधाति तद्वै यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमा दिशः ॥ १३ ॥ अथात्मानं विकृषति । तद्यदेव संवत्सरेऽन्नं तदस्मिन्नेतद्दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वा ऽअनिरुक्तः सर्वेणैवास्मिन्नेतदुन्नं दधातीत्यग्ने कृषत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥ १४ ॥ तिस्रस्तिस्रः सीताः कृषति । त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदुन्नं दधाति ॥ १५ ॥ द्वादश सीतास्तूष्णीं कृषति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदुन्नं दधाति ॥ १६ ॥ ता ऽउभयतः षोडश सम्पद्यन्ते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसम्मितमेवास्मिन्नेतदुन्नं दधाति यदु वा ऽआत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥ १७ ॥ यद्वैवैनं विकृषति । एतद्वा ऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तात्प्राणानदधुस्तथैवास्मिन्नयमेतत्संस्करिष्यन्पुरस्तात्प्राणान्दधाति लेखा भवन्ति लेखासु हीमे प्राणाः ॥ १८ ॥ * चतस्रः सीता यजुषा कृषति । तद्य ऽइमे शीर्षञ्चत्वारो निरुक्ताः प्राणास्तानस्मिन्नेतद्दधाति तद्वै यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमे शीर्षन्प्राणाः ॥ १९ ॥ यद्वैवात्मानं विकृषति । य ऽएवेमेऽन्तरात्मन्प्राणास्तानस्मिन्नेतद्दधाति तूष्णीं को हि तद्वेद यावन्त ऽइमेऽन्तरात्मन्प्राणाः

* अत्र शतम् ४१०० ।

॥ २० * अथैनान्न्यवमुञ्चति । आप्त्वा तं कामं रुद्रस्मै कामायैनान्न्युङ्क्ते 'विमुच्यद्धमग्घ्न्या' ऽइत्यग्घ्न्या हैते देवत्रा 'देवयाना' ऽइति दैवꣳ ह्येभिः कर्म्म करो[1]त्यगन्म तमसस्परमस्ये[2]त्यशनाया वै तमोऽगन्मास्या ऽअशनायायै परमित्त्ये[3]तज्ज्योतिरापामेति ज्योतिर्ह्याप्नोति यो देवाभ्यो यज्ञमथैनानुदीचः प्राचः प्रसृजति तस्योक्तो बन्धुस्तानद्भ्यस्त्वेव ददाति स हि तैः करोति ताँस्तु दक्षिणानां काले ऽनुदिशेत् ॥ २१ ॥ (B)

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥
कण्डिकासंख्या ॥ १०८ ॥

[आत्ममध्ये कुशगुच्छोपधानादि]

अथ † दर्भस्तम्बमुपदधाति । एतद्वै देवा ऽओषधीरुपादधत तथैवैतद्यजमान ऽओषधीरुपधत्ते ॥ १ ॥ यद्वेव दर्भस्तम्बमुपदधाति । जायत ऽएष ऽएतद्यच्चीयते स ऽएष सर्वस्मा ऽअन्नाय जायत ऽउभयम्वेतदुन्न रुद्दर्भा ऽआपश्च ह्येता ऽओषधयश्च या वै वृत्राद्बीभत्समाना-

* का० श्रौ० सू० १७. २. १९ ।

(१) शु० य० सं० अ० १२ क० ७३ । (२) शु० य० सं० अ० १२ क० ७१ । (३) शु० य० सं० अ० १२ क० ७३ । (४) शु० य० सं० अ० १२ क० ७३ ।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा- का० श्रा० ९१. २ कट० १६. ११, कपि० २५. ४; मै० सं० ११. ७. १३; तै० सं० ४. २. ६ ।

† कुशस्तम्बमुपदधाति मध्ये तूष्णीम् (का० श्रौ० सू० १७. १. १) ।

ऽआपो धन्व दृभन्त्य ऽउदायँस्ते दर्भा ऽअभवन्यदृभन्त्य-ऽउदायँस्तस्माद्दर्भास्ता हैताः शुद्धा मेध्या ऽआपो व्वृत्राभिप्रक्षरिता यद्दर्भा यदु दर्भास्तेनौषधय ऽउभये-नैवैनमेतदुन्नेन प्रीणाति ॥ २ ॥ सीतासमरे । वाग्वै सीता समरः प्राणा वै सीतास्तासामयः समयो वाचि वै प्राणेभ्योऽन्नं धीयते मध्यतो मध्यत ऽएवास्मिन्नेत-दुन्नं दधाति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वा-ऽअनिरुक्तः सर्वेणैवास्मिन्नेतदुन्नं दधाति ॥ ३ ॥ अथैन-मभिजुहोति । जायत ऽएष ऽएतद्यच्चीयते स ऽएष सर्वस्मा ऽअन्नाय जायते सर्वस्यो ऽअस्यैष रसो यदाज्यमपां च ह्येष ऽओषधीनां च रसोऽस्यैवैनमेतत्सर्वस्य रसेन प्रीणाति यावानु वै रसस्तावानात्मानेनैवैनमेतत्सर्वेण प्रीणाति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चर्त्तवः संव-त्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतै-वैनमेतदुन्नेन प्रीणाति ॥ ४ ॥ यद्वैवैनमभिजुहोति । एतद्वै यत्रैतं प्राणा ऽऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तदस्मिन्नेतं पुर-स्ताद्भागमकुर्वत तस्मात्पुरस्ताद्भागास्तद्यदभिजुहोति य-ऽएवास्मिँस्ते प्राणा ऽऋषयः पुरस्ताद्भागमकुर्वत तानेवै-तत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ५ ॥ यद्वैवै-नमभिजुहोति । एतद्वै याज्येतस्मिन्नग्नौ रूपाण्युपधास्य-ऽभवति यान्स्तोमाज्यानि पृष्ठानि यानि च्छन्दाꣳसि तेभ्य ऽएतं पुरस्ताद्भागं करोति ताज्येवैतत्प्रीणात्याज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ६ ॥ यद्वैवैनमभिजुहोति ।

एतद्वै देवा ऽबिभयुर्दीर्घं वा ऽइदं कर्म्म यद्वै न ऽइममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति त ऽएतामेतस्य कर्म्मणः पुरस्तात्सꣳस्थामपश्यँस्तमत्रैव सर्वेः समस्थापयन्नत्राचिन्वँस्तथैवैनमयमेतदुत्रैव सर्वेः सꣳस्थापयत्यत्र चिनोति ॥ ७ ॥ 'सजूरब्द' ऽइति चितिः । 'अयवोभिरि'ति पुरीषः 'सजूरुषा' ऽइति चिति'ररुणीभिरि'ति पुरीषः 'सजोषसावश्विने'ति चितिर्द्विः 'सोभिरि'ति पुरीषः 'सजूः सूर' ऽइति चिति'रेतशेने'ति पुरीषः 'सजूर्वैश्वानर' ऽइति चिति'रिडये'ति पुरीषं 'घृतेने'ति चितिः 'स्वे'ति पुरीषः 'हेति' चितिः ॥ ८ ॥ त्रयोदशैता व्याहृतयो भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्य्यावत्यस्यमात्रा तावन्तमेवैनमेतच्चिनोत्याज्येन जुहोत्यग्नेरेष यदाज्यमग्निमेवैतच्चिनोति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चिनोत्यूर्द्धामुदगृह्णञ्जुहोत्यूर्द्धं तदग्निं चितिभिश्चिनोति ॥ ९ ॥ (C)

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

(१) शु० य० सं० अ० १२ क० ७४। (२) शु० य० सं० अ० १२ क० ७४। (३) शु० य० सं० अ० १२ क० ७४। (४) शु० य० सं० अ० १२ क० ७४। (५) शु० य० सं० अ० १२ क० ७४। (६) शु० य० सं० अ० १२ क० ७४। (७) शु० य० सं० अ० १२ क० ७४। (८) शु० य० सं० अ० १२ क० ७४। (९) शु० य० सं० अ० १२ क० ७४। (१०) शु० य० सं० अ० १२ क० ७४। (११) शु० य० सं० अ० १२ क० ७४। (१२) शु० य० सं० अ० १२ क० ७४। (१३) शु० य० सं० अ० १२ क० ७४।

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा-का० श्रौ० ९. १. ३।

[कर्षणक्रमेण सीतासूदकप्रक्षेपः]

अथोदचमसान्निनयति * । एतद्वै देवा ऽअब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमाना व्वृष्टिमेव चितिमपश्यँस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १ ॥ उदचमसा भवन्ति । आपो वै व्वृष्टिर्व्वृष्टिमेवास्मिन्नेतद्दधात्यौदुम्बरेण चमसेन तस्योक्तो वन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य ऽएवास्मिन्नेतद्दिग्भ्यो व्वृष्टिं दधाति ॥ २ ॥ त्रींस्त्रीनुदचमसान्निनयति । त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥ ३ ॥ द्वादशोदचमसाञ्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥ ४ ॥ स वै कृष्टे निनयति । तस्मात्कृष्टाय वर्षति स यत्कृष्टे ऽएव निनयेन्नाकृष्टे कृष्टायैव वर्षेन्नाकृष्टायाथ यदकृष्टे ऽएव निनयेन्न कृष्टेऽकृष्टायैव वर्षेन्न कृष्टाय कृष्टे चाकृष्टे च निनयति तस्मात्कृष्टाय चाकृष्टाय च वर्षति ॥ ५ ॥ त्रीन्कृष्टे † चाकृष्टे च निनयति । त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतद्वृष्टिं दधाति ॥ ६ ॥ यद्वेवोदचमसान्निनयति । एतद्वा ऽअस्मिन्देवाः संस्करिष्यन्तः पुरस्तादपो दधुस्तथैवास्मिन्नयमेतत्संकरिष्यन्पुरस्तादपो दधाति ॥ ७ ॥ त्रींस्त्रीनुदचमसान्निनयति । त्रिवृ-

* का० श्रौ० सू० १७. १. ३ ।

† का० श्रौ० सू० १७. १. ४, ५ ।

दग्निर्ग्र्यावानग्निर्ग्र्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥ ८ ॥ द्वादशोदचमसान्कृष्टे निनयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्ग्र्यावानग्निर्ग्र्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥९॥ स वै कृष्टे निनयति । प्राणेषु तदपो दधाति स यत्कृष्ट एव निनयेन्नाकृष्टे प्राणेष्वेवापः स्युर्नेतरस्मिन्नात्मन्नथ यदकृष्ट एव निनयेन्न कृष्ट आत्मन्नेवापः स्युर्न्न प्राणेषु कृष्टे चाकृष्टे च निनयति तस्मादिमा उभयत्रापः प्राणेषु चात्मँश्च ॥ १० ॥ त्रीन्कृष्टे चाकृष्टे च निनयति । त्रिवृदग्निर्ग्र्यावानग्निर्ग्र्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदपो दधाति ॥ ११ ॥ पञ्चदशोदचमसान्निनयति । पञ्चदशो वै वज्रः एतेनैवास्यैतत्पञ्चदशेन वज्रेण सर्वं पाप्मानमपहन्ति ॥१२॥ अथ * सर्वौषधं वपति । एतद्वै देवा अब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमाना अन्नमेव चितिमपश्यँस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१३॥ सर्वौषधं भवति । † सर्वमेतदन्नं यत्सर्वौषधः सर्वमेवास्मिन्नेतदन्नं दधाति तेषामेकमन्नमुद्धरेत्तस्य नाश्नीयाद्यावज्जीवमौदुम्बरेण चमसेन तस्योक्तो बन्धुश्चतुःस्रक्तिना चतस्रो वै दिशः सर्वाभ्य एवास्मिन्नेतद्दिग्भ्योऽन्नं दधात्यनुष्टुब्भिर्वपति वाग्वा अनुष्टुब्वाचो वा अन्नमद्यते ॥ १४ ॥ तिसृभिस्तिसृभिर्ऋग्भिर्वपति । त्रिवृदग्निर्ग्र्यावा-

* का० श्रौ० सू० १७. ३. ६ ।

† 'सर्वमेव तदन्नम्' इति 'ख-ग' पुस्तकयोः ।

नग्निर्ऱ्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदुन्नं दधाति ॥१५॥ द्वादशभिर्ऋग्भिः कृष्टे वपति । द्वादशमासाः संवत्सरः संवत्सरोऽग्निर्ऱ्यावानग्निर्ऱ्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदुन्नं दधाति ॥ १६ ॥ स वै कृष्टे वपति । तस्मात्कृष्टेऽन्नं पच्च्यते * स यत्कृष्ट एव वपेन्नाकृष्टे कृष्ट एवान्नं पच्च्येत नाकृष्टेऽथ यदकृष्ट एव वपेन्न कृष्टेऽकृष्टएवान्नं पच्च्येत न कृष्टे कृष्टे चाकृष्टे च वपति तस्मात्कृष्टे चाकृष्टे चान्नं पच्च्यते ॥ १७ ॥ तिसृभिः कृष्टे चाकृष्टे च वपति । त्रिवृदग्निर्ऱ्यावानग्निर्ऱ्यावत्त्यस्य मात्रा तावतैवास्मिन्नेतदुन्नं दधाति ॥ १८ ॥ यद्वेव सर्वौषधं वपति । एतद्वा एनं देवाः सँस्करिष्यन्तः पुरस्तात्सर्वेण भेषजेनाभिषज्यँस्तथैवैनमयमेतत्संकरिष्यन्पुरस्तात्सर्वेण भेषजेन भिषज्यति ॥ १९ ॥ सर्वौषधं भवति । सर्वमेतद्भेषजं यत्सर्वौषधः सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २० ॥ तिसृभिस्तिसृभिर्ऋग्भिर्वपति । त्रिवृदग्निर्ऱ्यावानग्निर्ऱ्यावत्त्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २१ ॥ द्वादशभिर्ऋग्भिः कृष्टे † वपति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्ऱ्यावानग्निर्ऱ्यावत्त्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २२ ॥ स वै कृष्टे वपति । प्राणाँस्तद्भिषज्यति स यत्कृष्ट एव वपेन्नाकृष्टे प्राणानेव भिषज्येन्नेतरमात्मानमथ यदकृष्ट एव वपेन्न कृष्ट आत्मानमेव

* 'यत्कृष्टे' इति 'ख-ग' पुस्तकयोः ।
† का० श्रौ० सू० १७. ३. ८ ।

भिषज्येन्न प्राणान्कृष्टे चाकृष्टे च वपति प्राणाँश्च तदात्मानं च भिषज्यति ॥ २३ ॥ तिसृभिः कृष्टे चाकृष्टे च वपति । त्रिवृदग्निर्ऋग्वानग्निर्ऋग्वत्यस्य मात्रा तावतैवैनमेतद्भिषज्यति ॥ २४ ॥ पञ्चदशोदचमसान्निनयति । पञ्चदशभिर्ऋग्भिर्वपति तत्त्रिःशत्त्रिःशदक्षरा विराड्विराडु कृत्स्नमन्नः सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥ २५ ॥ 'या ऽओषधीः पूर्वा जाताः । देवेब्भ्यस्त्रियुगं पुरे'त्यृतवो वै देवास्तेब्भ्य ऽएनास्त्रिः पुरा जायन्ते वसन्ता प्रावृषि शरदि 'मनै नु बब्भ्रूणामहमि'ति सोमो वै बब्भ्रुः सौम्या ऽओषधय ऽओषधः पुरुषः शतं धामानी'ति यदिदुः शतायुः शतार्घः शतवीर्य्य ऽएतानि हास्य तानि 'शतं धामानि सप्त चे'ति य ऽएवेमे सप्त शीर्षन्प्राणास्तानेतदाह ॥ २६ ॥ 'शतं वो ऽअम्ब धामानि । सहस्रमुत वो रुह ऽइति यदिदुः शतधा च सहस्रधा च विरूढा 'ऽअधाँ शतक्रत्वो यूयमिमं मे ऽअगदं कृते'ति यमिमं भिषज्यामीत्येतत् ॥ २७ ॥ ता ऽएता ऽएकव्व्याख्यानाः । एतमेवाभि यथैतमेव भिषज्येदेतं पारयेत्ता ऽअनुष्टुभो भवन्ति वाग्वा ऽअनुष्टुब्वागु सर्वं भेषजः सर्वेणैवैनमेतद्भेषजेन भिषज्यति ॥ २८ ॥ अथातो निरुक्तानिरुक्तानामेव । यजुषा द्रावनद्राहौ युनक्ति तूष्णीमितराभ्यजुषा चतस्रः सीताः कृषति तूष्णीमितरास्तूष्णीं दर्भस्तम्ब-

(१) शु० य० सं० अ० १२ क० ७५ । (२) शु० य० सं० अ० १२ क० ७५ । (३) शु० य० सं० अ० १२ क० ७५ । (४) शु० य० सं० अ० १२ क० ७६ । (५) शु० य० सं० अ० १२ क० ७६ ।

मुपदधाति यजुषाभिजुहोति तूष्णीमुदचमसान्निनयति यजुषा वपति ॥ २९ ॥ प्रजापतिरेषोऽग्निः । उभयम्वेतत्प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद्यद्यजुषा करोति यदेवास्य निरुक्तं परिमितः रूपं तदस्य तेन संस्करोत्यथ यत्तूष्णीं यदेवास्यानिरुक्तमपरिमितः रूपं तदस्य तेन संस्करोति स ह वा ऽएतः सर्वं कृत्स्नं प्रजापतिं संस्करोति य ऽएवं विद्वानेतदेवं करोति वाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि पशुरेष यदग्निस्तस्मात्पशोर्वाह्यानि रूपाणि निरुक्तानि भवन्त्यन्तराण्यनिरुक्तानि ॥ ३० ॥ (D)

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

[सोमक्रयादि]

चितो गार्हपत्यो भवति । अचित ऽआहवनीयोऽथ राजानं क्रीणात्ययं वै लोको गार्हपत्यो द्यौराहवनीयोऽथ योऽयं वायुः पवत ऽएष सोम ऽएतं तदिमौ लोकावन्तरेण दधाति तस्मादेष ऽइमौ लोकावन्तरेण पवते ॥ १ ॥ यद्वेव चिते गार्हपत्ये । अचित ऽआहवनीयेऽथ राजानं क्रीणात्यात्मा वा ऽअग्निः प्राणः सोम ऽआत्मँस्तत्प्राणं मद्ध्यतो दधाति तस्मादयमात्मन्प्राणो मद्ध्यतः ॥ २ ॥

एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ९. १. ४. कठ० सं० १६. ११; कपि० सं० २५. ४; मै० सं० ११. ७. ११; तै० सं० ४. २. ६ ।

यद्वेव चिते गार्हपत्ये। अचित ऽआहवनीयेऽथ राजानं क्रीणात्यात्मा वा ऽअग्नी रसः सोम ऽआत्मानं तद्रसेनानुषजति तस्मादयमान्तमेवात्मा रसेनानुषक्तः ॥ ३ ॥ राजानं क्रीत्वा पर्य्युह्य। अथास्मा ऽआतिथ्यꣳ हविर्न्निर्व्वपति तस्य * हविष्कृता वाचं विसृजतेऽथ वा ऽएतद्व्यतिषजत्यद्धरकर्म्म चाग्निकर्म्म च कर्म्मणः समानतायै समानमिदं कर्म्मासदिति ॥ ४ ॥ यद्वेव व्यतिषजति। आत्मा वा ऽअग्निः प्राणोऽद्धर ऽआत्मँस्तत्प्राणं मद्ध्यतो दधाति तस्मादयमात्मन्प्राणो मद्ध्यतः ॥ ५ ॥ यद्वेव व्यतिषजति। आत्मा वा ऽअग्नी रसोऽद्धर ऽआत्मानं तद्रसेनानुषजति तस्मादयमान्तमेवात्मा रसेनानुषक्तोऽथाहवनीयस्यार्द्धमैति ॥ ६ ॥ तद्धैके। उभयत्रैव † पलाशशाखया व्युदूहन्त्युभयत्र वै चिनोतीति न तथा कुर्य्यादवस्यति वाव गार्हपत्येनोर्द्ध ऽएवाहवनीयेन रोहति तस्मात्तथा न कुर्य्यात् ॥ ७ ॥ अथ गार्हपत्य ऽएवोपान्निवपति। नाहवनीयेऽयं वै लोको गार्हपत्यः पशव ऽऊषाऽअस्मिँस्तल्लोके पशून्दधाति तस्मादिमेऽस्मिँल्लोके पशवः ॥ ८ ॥ अथाहवनीय ऽएव पुष्करपर्ण्णमुपदधाति। न गार्हपत्य ऽआपो वै पुष्करपर्ण्णं द्यौराहवनीयो दिवि तदपो दधात्युभयत्र सिकता निवपति रेतो वै सिकता ऽउभयत्र वै विक्रियते तस्माद्रेतसोऽधि विक्रियाता ऽइति ॥ ९ ॥ ता नाना मन्त्राभ्यां निवपति। मनुष्यलोको वै गार्हपत्यो

* शु० य० सं० १. १५. १।
† का० श्रौ० सू० १७. १. १।

देवलोक ऽआहवनीयो नानो वा ऽएतद्यद्देवं च मानुषं च द्राघीयसा मन्त्रेणाहवनीये निवपति ह्रसीयसा गार्हपत्ये द्राघीयो हि देवायुषश्छ ह्रसीयो मनुष्यायुषः स पूर्वाः परिश्रिद्भ्यो गार्हपत्ये सिकता निवपति रेतो वै सिकता-ऽअस्माद्रेतसोऽधीमा विक्रियान्ता ऽइति ॥ १० ॥ तदाहुः । यद्योनिः परिश्रितो रेतः सिकता ऽअथ पूर्वाः परिश्रिद्भ्यो गार्हपत्ये सिकता निवपति कथमस्यैतद्रेतोऽपरासिक्तं परिगृहीतं भवतीत्युल्वं वा ऽऊषास्तद्यदूषान्पूर्वान्निवपत्येतेनो हास्यैतदुल्वेन रेतोऽपरासिक्तं परिगृहीतं भवत्यथाहवनीये परिश्रितोऽभिमन्त्रयते तस्योक्तो बन्धुरथ सिकता निवपति रेतो वै सिकता ऽएतयो ऽअस्यैतद्योन्न्या रेतोऽपरासिक्तं परिगृहीतं भवति ॥ ११ ॥ अथाहवनीय * ऽएवाप्यानवतीभ्यामभिमृशति । न गार्हपत्येऽयं वै लोको गार्हपत्यः स्वर्गो लोक ऽआहवनीयोऽद्धो वा ऽअयमस्मिँल्लोके जातो यजमानः स्वर्ग ऽएव लोके प्रजिजनयिषितव्यस्तद्यदाहवनीय ऽएवाप्यानवतीभ्यामभिमृशति न गार्हपत्ये स्वर्ग ऽएवैनं तल्लोके प्रजनयति ॥ १२ ॥ अथ लोगेष्टका ऽउपदधाति । इमे वै लोका ऽएषोऽग्निर्दिशो लोगेष्टका ऽएषु तल्लोकेषु दिशो दधाति तस्मादिमा ऽएषु लोकेषु दिशः ॥ १३ ॥ बाह्येनाग्निमाहरति । आत्मा वा ऽअस्य ता दिशो या-ऽएषु लोकेष्वथ या ऽइमाँल्लोकान्परेण दिशस्ता ऽअस्मि-

* का० श्रौ० सू० १७. १. ९ ।

न्नेतद्दधाति ॥१४॥ [अर्धप्रपाठकः ५३॥] बहिर्वेदेरियं वै वेदिः । आत्मा वा ऽअस्य ता दिशो या ऽअस्यामथ या ऽइमां परेण दिशस्ता ऽअस्मिन्नेतद्दधाति ॥ १५ ॥ यद्वेव * लोगेष्टका-ऽउपदधाति । प्रजापतेर्विस्रस्तस्य सर्वा दिशो रसोऽनु व्यक्षरत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताभिर्लोगेष्टकाभिस्तः रसमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १६ ॥ बाह्येनाग्निमाहरति । आत्मो वा ऽअस्य स रसो य ऽएषु लोकेष्वथ य ऽइमाँल्लोकान्पराङ्रसोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥ १७ ॥ बहिर्वेदेरियं वै वेदिः । आत्मो वा ऽअस्य स रसो योऽस्यामथ य ऽइमां पराङ्सोऽत्यक्षरत्तमस्मिन्नेतद्दधाति ॥ १८ ॥ स्फ्येनाहरति । वज्रो वै स्फ्यो वीर्यं वै वज्रो वित्तिरियं वीर्येण वै वित्तिं विन्दते ॥ १९ ॥ स पुरस्ताद्वाहरति । 'मा मा हिꣳसीज्जनिता यः पृथिव्या' ऽइति प्रजापतिर्वै पृथिव्यै जनिता मा मा हिꣳसीत्प्रजापतिरित्येत'द्यो वा दिवः सत्यधर्मा व्यानडि'ति यो वा दिवः सत्यधर्मा सृजतेत्येत'द्इन्द्वापश्चन्द्राः प्रथमो जजाने'ति मनुष्या वा ऽआपश्चन्द्रा यो मनुष्यान्प्रथमोऽसृजतेत्येत'त्कस्मै देवाय हविषा विधेम'ति प्रजापतिर्वै कस्तस्मै हविषा विधेमेत्येतत्तामाहृत्यान्तरेण परिश्रित ऽआत्मन्नुपदधाति स यः प्राच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्राचीमेवास्मिन्नेतद्दिशं दधा-

* का० श्रौ० सू० १०. ३. ११,१२ ।

(१) शु० य० सं० अ० १२ क० १०२ । (२) शु० य० सं० अ० १२ क० १०२ । (३) शु० य० सं० अ० १२ क० १०२ । (४) शु० य० सं० अ० १२ क० १०२ ।

ति ॥ २० ॥ अथ दक्षिणतः । 'अब्भ्यावर्त्तस्व पृथिवि यज्ञेन पयसा सहे'ति यथैव यजुस्तथा बन्धु'र्वपां ते ऽअग्निरिषितो ऽअरोहद्दि'ति यद्वै किञ्चास्याꣳ सास्यै वपा तामग्निरिषित ऽउपादीसो रोहति तामाहृत्यान्तरेण पक्षसन्धिमात्मन्नुपदधाति स यो दक्षिणायां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो दक्षिणामेवास्मिन्नेतद्दिशं दधाति ॥ २१ ॥ अथ पश्चात् । 'अग्ने यत्ते शुक्रं ज्यच्चन्द्रं ज्यत्पूतं ज्यच्च यज्ञियमि'तीयं वा ऽअग्निरस्यै तदाह 'तद्देवेभ्यो भरामसी'ति तदस्मै दैवाय कर्म्मणे हराम ऽइत्येतत्तामाहृत्यान्तरेण पुच्छसन्धिमात्मन्नुपदधाति स यः प्रतीच्च्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो प्रतीचीमेवास्मिन्नेतद्दिशं दधाति स न सम्प्रति पश्चाद्धारेन्नेयज्ञपथाद्धरसमाहराणीतीत ऽइवाहरति ॥ २२ ॥ अथोत्तरतः । 'इषमूर्ज्जमहमित ऽआदमि'तीषमूर्ज्जमहमित ऽआदद ऽइत्येत'दृतस्य योनिमि'ति सत्यं वा ऽऋतꣳ सत्यस्य योनिमित्येत'न्महिषस्य धारामि'त्यग्निर्वै महिषः स ह्येदं जातो महान्त्सर्व्वमैष्णा'दा मा गोषु विशत्वा तनूष्वि'त्यात्मा वै तनूरा मा गोषु चात्मनि च विशत्वित्येत'ज्जहोमि सेदिमनिराममीवामि'ति सिकताः प्रद्धꣳसयति तथैव

(१) शु० य० सं० अ० १२ क० १०३। (२) शु० य० सं० अ० १२ क० १०३। (३) शु० य० सं० अ० १२ क० १०४। (४) शु० य० सं० अ० १२ क० १०४। (५) शु० य० सं० अ० १२ क० १०५। (६) शु० य० सं० अ० १२ क० १०५। (७) शु० य० सं० अ० १२ क० १०५। (८) शु० य० सं० अ० १२ क० १०५। (९) शु० य० सं० अ० १२ क० १०५।

सेदिर्ऋानिरा यामीवा तामेतस्यां दिशि दधाति तस्मादेतस्यां दिशि प्रजा ऽअशनायुकास्तामाहृत्यान्तरेण पक्षसन्धिमात्मन्नुपदधाति स य ऽउदीच्यां दिशि रसोऽत्यक्षरत्तमस्मिन्नेतद्दधात्यथो ऽउदीचीमेवास्मिन्नेतद्दिशं दधाति ॥ २३ ॥ ता ऽएता दिशः । ताः सर्वत ऽउपदधाति सर्वतस्तद्दिशो दधाति तस्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः समीच्यो दिशस्ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हि दिशस्तिष्टन्नुपदधाति तिष्टन्तीव हि दिशोऽथो तिष्टन्त्वै व्रीर्यवत्तरः ॥ २४ ॥ ता ऽएता यजुष्मत्य ऽइष्टकाः । ताऽआत्मन्नेवोपदधाति न पक्षपुच्छेष्वात्मन्ह्येव यजुष्मत्य ऽइष्टका ऽउपधीयन्ते न पक्षपुच्छेषु ॥ २५ ॥ तदाहुः । कथमस्यैताः पक्काः श्रृता ऽउपहिता भवन्तीति रसो वाऽएताः स्वयः श्रृत ऽउ वै रसोऽथो यद्वै किञ्चैतमग्निं वैश्वानरमुप निगच्छति तत ऽएव तत्पक्वः श्रृतमुपहितं भवति ॥ २६ ॥ * अथोत्तरवेदिं निवपति । इयं वै वेदिर्द्यौरुत्तरवेदिर्दिशो लोगेष्टकास्तद्यदन्तरेण वेदिं चोत्तरवेदिं च लोगेष्टका ऽउपदधातीमौ तल्लोकावन्तरेण दिशो दधाति तस्मादिमौ लोकावन्तरेण दिशस्तां त्र्युगमात्रीं वा सर्वतः करोति चत्वारिंशत्पदां वा यतरथा कामयेताथ सिकता निवपति तस्योक्तो बन्धुः ॥ २७ ॥ ता-

* का० श्रौ० सू० १७. १. १४ ।

ऽउत्तरवेदौ * निवपति । योनिर्वा ऽउत्तरवेदिर्योनौ तद्रेतः सिञ्चति यद्वै योनौ रेतः सिच्च्यते तत्प्रजनिष्णु भवति ताभिः सर्वमात्मानं प्रच्छादयति सर्वस्मिँस्तदात्मन्रेतो दधाति तस्मात्सर्वस्मादेवात्मनो रेतः सम्भवति ॥ २८ ॥ 'अग्ने तवं श्रवो वय' ऽइति । धूमो वा ऽअस्य श्रवो वयः स ह्येनममुष्मिँल्लोके श्रावयति 'महि व्राजन्ते ऽअर्चयो विभावसवि'ति महतो व्राजन्तेऽर्चयः प्रभूवसवित्येतद्-'बृहद्भानो शवसा वाजमुक्थ्यमि'ति बलं वै शवो बृहद्भानो बलेनान्नमुक्थ्यमित्येतद्दधासि 'दाशुषे कव' ऽइति यजमानो वै दाश्वान्दधासि यजमानाय कव ऽइत्येतत् ॥ २९ ॥ 'पावकवर्चाः शुक्रवर्चा' ऽइति । पावकवर्चा ह्येष शुक्रवर्चा-'ऽअनूनवर्चा ऽउदियर्षि भानुने'त्यनूनवर्चा ऽउद्दीप्यसे भानुनेत्येत'त्पुत्रो मातरा विचरन्नुपावसी'ति पुत्रो ह्येष मातरा विचरन्नुपावति 'पृणक्षि रोदसी ऽउभे' ऽइतीमे वै द्यावापृथिवी रोदसी ते ऽएष ऽउभे पृणक्ति धूमेनामूं व्वृष्ट्ये-माम् ॥ ३० ॥ 'ऊर्जो नपाज्जातवेदः सुशस्तिभिरि'ति । ऊर्जो नपाज्जातवेदः सुष्टुतिभिरित्येत'न्मन्दस्व धीतिभिर्हित' ऽइति दीप्यस्व धीतिभिर्हित ऽइत्येत'त्त्वे ऽइषः सन्दधुर्भूरि-

* का० श्रौ० सू० १७. ३. १५ ।

(१) शु० य० सं० अ० १२ क० १०६ । (२) शु० य० सं० अ० १२ क० १०६ । (३) शु० य० सं० अ० १२ क० १०६ । (४) शु० य० सं० अ० १२ क० १०६ । (५) शु० य० सं० अ० १२ क० १०७ । (६) शु० य० सं० अ० १२ क० १०७ । (७) शु० य० सं० अ० १२ क० १०७ । (८) शु० य० सं० अ० १२ क० १०७ । (९) शु० य० सं० अ० १२ क० १०८ । (१०) शु० य० सं० अ० १२ क० १०८ । (११) शु० य० सं० अ० १२ क० १०८ ।

वर्प्पस' ऽइति त्वे ऽइषः सन्दधुर्बहुवर्प्पस ऽइत्येत'च्चित्रोतयो वामजाता' ऽइति यथैव यजुस्तथा बन्धुः ॥३१॥ 'इरज्यन्नग्ने प्रथयस्व जन्तुभिरि'ति । मनुष्या वै जन्तवो दीप्यमानो-ऽग्ने प्रथस्व मनुष्यैरित्येत'दस्मे रायो ऽअमर्त्ये'त्यस्मे रयिं दधदमर्त्येत्येत'त्स दर्शतस्य वपुषो विराजसी'ति दर्शतस्य ह्येष वपुषो विराजति 'पृणक्षि सानसिं क्रतुमि'ति पृणक्षि सनातनं क्रतुमित्येतत् ॥ ३२ ॥ 'इष्कर्तारमद्भुरस्य प्रचेतसामि'ति । अद्भुरो वै यज्ञः प्रकल्पयितारं ह्यज्ञस्य प्रचेतसमित्येत'त्क्षयन्तः राधसो मह' ऽइति क्षयन्तः राधसि महतीत्येत'द्रातिं वामस्य सुभगां महीमिषमि'ति रातिं वामस्य सुभगां महतीमिषमित्येत'द्धासि सानसिः रयिमि'ति दधासि सनातनः रयिमित्येतत् ॥ ३३ ॥ 'ऋतावानमि'ति । सत्यावानमित्येत'न्महिषमि'त्यग्निर्वै महिषो 'विश्वदर्शतमि'ति विश्वदर्शतो ह्येषो 'ऽग्निः सुम्नाय दधिरे पुरो जना' ऽइति यज्ञो वै सुम्नं यज्ञाय वा ऽएतं पुरो दधते 'श्रुत्कर्णः सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगे'त्याशृण्वन्तः सप्रथस्तमं त्वा गिरा देवं मनुष्या हवामह ऽइत्येतत् ॥ ३४ ॥ स ऽएषोऽग्निरेव

(१) शु० य० सं० अ० १२ क० १०८। (२) शु० य० सं० अ० १२ क० १०८।
(३) शु० य० सं० अ० १२ क० १०९। (४) शु० य० सं० अ० १२ क० १०९।
(५) शु० य० सं० अ० १२ क० १०९। (६) शु० य० सं० अ० १२ क० १०९।
(७) शु० य० सं० अ० १२ क० ११०। (८) शु० य० सं० अ० १२ क० ११०।
(९) शु० य० सं० अ० १२ क० ११०। (१०) शु० य० सं० अ० १२ क० ११०।
(११) शु० य० सं० अ० १२ क० १११। (१२) शु० य० सं० अ० १२ क० १११।
(१३) शु० य० सं० अ० १२ क० १११। (१४) शु० य० सं० अ० १२ क० १११।

वैश्वानरः । एतत्षड्चमारम्भायैवेमाः * सिकता न्युप्यन्तेऽग्निमेवास्मिन्नेतद्वैश्वानरꣳ रेतो भूतꣳ सिञ्चति षड्चेन षड्तवः संवत्सरः संवत्सरो वैश्वानरः ॥ ३५ ॥ तदाहुः । यद्वेतः सिकता ऽउच्च्यन्ते किमासाꣳ रेतो रूपमिति शुक्ला ऽइति ब्रूयाच्छुक्लꣳ हि रेतोऽथो पृश्नय ऽइति पृश्नीव हि रेतः ॥ ३६ ॥ तदाहुः । यदार्द्रꣳ रेतः शुष्काः सिकता निवपति कथमस्यैता ऽआर्द्रा रेतोरूपं भवन्तीति रसो वै छन्दाꣳस्यार्द्र ऽउ वै रसस्तद्यदेनाश्छन्दोभिर्न्निवपत्येवमु हास्यैता ऽआर्द्रा रेतोरूपं भवन्ति ॥ ३७ ॥ तदाहुः । कथमस्यैता ऽअहोरात्राभ्यामुपहिता भवन्तीति द्वे वा ऽहोरात्रे शुक्लं च कृष्णं च द्वे सिकते शुक्ला च कृष्णा चैवमु हास्यैता ऽअहोरात्राभ्यामुपहिता भवन्ति ॥ ३८ ॥ तदाहुः । कथमस्यैता ऽअहोरात्रैः सम्पन्ना ऽअन्यूना ऽअनतिरिक्ता ऽउपहिता भवन्तीत्यनन्तानि वा ऽअहोरात्राण्यनन्ताः सिकता ऽएवमु हास्यैता ऽअहोरात्रैः सम्पन्ना ऽअन्यूना ऽअनतिरिक्ता ऽउपहिता भवन्त्यथ कस्मात्समुद्रियं छन्द ऽइत्यनन्तो वै समुद्रोऽनन्ताः सिकतास्तस्मात्समुद्रियं छन्दः ॥३९॥ तदाहुः। कथमस्यैताः पृथङ् नाना यजुर्भिरुपहिता भवन्तीति मनो वै यजुस्तदिदं मनो यजुः सर्वाः सिकता ऽअनुविभवत्येवमु हास्यैताः पृथङ् नाना यजुर्भिरुपहिता भवन्ति ॥ ४० ॥ तदाहुः ।

* का० श्रौ० सू० १७. ३. १५ ।

कथमस्यैताः सर्वैश्छन्दोभिरुपहिता भवन्तीति यदेवैना-ऽएतेन षड्वृचेन निवपति यावन्ति हि सप्तानां छन्दसाम-क्षराणि तावन्त्येतस्य षड्वृचस्याक्षराण्येवमु हास्यैताः सर्वैश्छन्दोभिरुपहिता भवन्ति ॥ ४१ ॥ यद्वेव सिकता निवपति । प्रजापतिरेषोऽग्निः सर्वमु ब्रह्म प्रजापतिस्तद्धैतद् ब्रह्मण ऽउत्सन्नं यत्सिकता ऽअथ यदुत्सन्नमिदं तद्यो-ऽयमग्निश्चीयते तद्यत्सिकता निवपति यदेव तद् ब्रह्मण-ऽउत्सन्नं तदास्मिन्नेतत्प्रतिदधाति ता ऽअसंख्याता ऽअप-रिमिता निवपति को हि तद्वेद यावत्तद् ब्रह्मण ऽउत्सन्नः स ह वा ऽएतः सर्वं कृत्स्नं प्रजापतिः संस्करोति य-ऽएवं विद्वान्त्सिकता निवपति ॥ ४२ ॥ तदाहुः । कैतासाम-संख्यातानाꣳ संख्येति द्वे ऽइति ब्रूयाद् द्वे हि सिकते शुक्ला च कृष्णा चाथो सप्तविꣳशतिशतानीति ब्रूयादेतावन्ति हि संवत्सरस्याहोरात्राण्यथो द्वे द्वापञ्चाशे शते ऽइत्येता-वन्ति ह्येतस्य षड्वृचस्याक्षराण्यथो पञ्चविꣳशतिरिति पञ्चविꣳशः हि रेतः ॥ ४३ ॥ ता ऽएता यजुष्मत्य-ऽइष्टकाः । ता ऽआत्मन्नेवोपदधाति न पक्षपुच्छेष्वात्म-न्ह्येव यजुष्मत्य ऽइष्टका ऽउपधीयन्ते न पक्षपुच्छेषु न सादयति नेद्रेतः प्रजातिः स्थापयानीति ॥ ४४ ॥ अथैना * ऽआप्यायनवतीभ्यामभिमृशति । इदमेवैतद्रेतः सिक्तमाप्यायायति तस्मान्मोनौ रेतः सिक्तमाप्यायते सौमीभ्यां प्राणो वै सोमः प्राणं तद्रेतसि दधाति

* का० श्रौ० सू० १७. ३. १६ ।

तस्माद्रेतः सिक्तं प्राणमभिसम्भवति पयेद्ध यद्दते प्राणान्त्सम्भवेदेषो हैवात्र सूददोहाः प्राणो वै सोमः प्राणः सूददोहाः ॥ ४५ ॥ 'आप्यायस्व समेतु ते। विश्वतः सोम वृष्ण्यमि'ति रेतो वै वृष्ण्यमाप्यायस्व समेतु ते सर्वतः सोम रेत ऽइत्येत'द्भवा वाजस्य सङ्गथ' ऽइत्यन्नं वै वाजो भवान्नस्य सङ्गथ ऽइत्येत'त्सं ते पयाꣳसि समु यन्तु वाजा' ऽइति रसो वै पयोऽन्नं वाजाः सं ते रसाः समु यन्त्वन्नानीत्येत'त्सं वृष्ण्या-न्यभिमातिषाह' ऽइति सः रेताꣳसि पाप्मानह ऽइत्ये-त'दाप्यायमानो ऽअमृताय सोमे'ति प्रजात्यां तदमृतं दधाति तस्मात्प्रजातिरमृता 'दिवि श्रवाꣳस्युत्तमानि धिष्वे'ति चन्द्रमा वा ऽअस्य दिवि श्रव ऽउत्तमः सह्येन-ममुष्मिँल्लोके श्रावयति द्वाभ्यामाप्यायायति गायत्र्या च त्रिष्टुभा च तस्योक्तो बन्धुः ॥ ४६ ॥ अथातः सम्प-देव। चतस्रो लोगेष्टका ऽउपदधाति पङ्क्त्येन निवपति द्वाभ्यामाप्यायायति तद् द्वादश द्वादश मासाः संव-त्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावत्त-द्भवति ॥ ४७ ॥ (A)

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(१) शु० य० सं० अ० १२ क० ११२। (२) शु० य० सं० अ० १२ क० ११२। (३) शु० य० सं० अ० १२ क० ११३। (४) शु० य० सं० अ० १२ क० ११३। (५) शु० य० सं० अ० १२ क० ११३। (६) शु० य० सं० अ० १२ क० ११३।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा– का० श्रौ० ९. २. १; कठ० सं० १६. १४; कपि० सं० २५. ५; मै० सं० ११. ७. १४; तै० सं० ४. २. ७।

[आनडुहे चर्मणि प्रथमचितीष्टकानामुपधानादि]

आप्प्यानवतीभ्यामभिमृश्य। प्रत्येत्यातित्थ्येन * प्रचरत्यातित्थ्येन प्रचर्ष्य प्रवग्र्योपसद्भ्यां प्रचरति प्रवग्र्योपसद्भ्यां प्रचर्ष्याथैतां चर्म्मणि चितिꣳ समवशमयन्ति तच्चर्म्मणि चर्म्म वै रूपꣳ रूपाणामुपाप्त्यै लोमतो लोम वै रूपꣳ रूपाणामुपाप्त्यै रोहिते रोहिते ह सर्वाणि रूपाणि सर्वेषाꣳ रूपाणामुपाप्त्या ऽआनडुहेऽग्निरेष यदनड्वानग्निरूपाणामुपाप्त्यै प्राचीनग्रीवे तद्धि देवत्रा ॥ १ ॥ तदुग्रेण गार्हपत्यम्। अन्तर्वेद्युत्तरलोम प्राचीनग्रीवमुपस्तृणाति तदेतां चितिꣳ समवशमयन्त्यथ प्रोक्षति तद्यत्प्रोक्षति शुद्धमेवैतन्मेध्यं करोत्याज्येन तद्धि शुद्धं मेद्ध्यमथो ऽअनभ्यारोहाय न हि किञ्चनान्यद्धविराज्येन प्रोक्षन्ति तूष्णीमनिरुक्तं वै तद्यत्तूष्णीꣳ सर्वं वा ऽअनिरुक्तꣳ सर्वेणैवैतच्छुद्धं मेध्यं करोत्यथो ऽअनभ्यारोहाय न हि किञ्चनान्यद्धविस्तूष्णीं प्रोक्षन्ति ॥ २ ॥ यद्वेव प्रोक्षति। हविर्वा ऽएतत्तदेतदभिघारयति यद्वै हविरभ्यक्तं स्यादभिघारितं तज्जुष्टं तन्मेद्ध्यमाज्येनाज्येन हि हविरभिघारयन्ति तूष्णीं तूष्णीꣳ हि हविरभिघारयन्ति दर्भैस्ते हि शुद्धा मेध्या ऽअग्रैरग्रꣳ हि देवानाम् ॥ ३ ॥ तदाहुꣳ। यत्प्रथमामेव चितिं प्रोक्षति कथमस्यैष सर्वोऽग्निꣳ प्रोक्षितो भवति कथं चर्म्मणि प्रणीतꣳ कथमश्वप्रणीत-

* प्रथमचितेः सिकताप्रच्छादनमारभ्य तस्या आलम्भनान्तं कर्मजातं निष्पाद्य आतिष्ठाया अवशिष्टं यच्छूर्पाद्धविरुद्वपन-निष्पवनादि तत आरभ्य उपसदन्तं कर्म कृत्वा अन्तःपात्यस्य पुरस्ताद्वेदिमध्ये प्रागग्रीवस्योत्तरलोम्नश्चर्मणः स्तृतस्योपरि प्रथमचितेः सर्वा इष्टका निदध्यात्। (का० श्रौ० सू० पृ० १७. ३. १७)।

ऽइति यदेवात्र सर्वासां चितीनामिष्टकाः प्रोक्षत्येवमु हास्यैष सर्वोऽग्निः प्रोक्षितो भवत्येवं चर्म्मणि प्रणीत-ऽएवमश्वप्रणीत ऽउद्यच्छन्त्येतां चितिम् ॥ ४ ॥ अथा-हाग्निभ्यः प्रहियमाणेभ्योऽनुब्रूहीति । एतद्वै देवानुप-प्रैष्यत ऽएतं यज्ञं तथंस्यमानान्रक्षाथंसि नाष्ट्रा ऽअजि-घाथंसन्न यक्ष्यद्धे न यज्ञं तथंस्यद्ध ऽइति तेभ्य ऽएता-नग्नीनेता ऽइष्टका ब्रजान्क्षुरपवीन्कृत्वा प्राहरँस्तैरेनानस्तृ-ण्वत तान्स्तृत्वाभयेऽनाष्ट्र ऽएतं यज्ञमतन्वत ॥ ५ ॥ तद्वा ऽएतत्क्रियते । यदेवा ऽअकुर्वन्निदं नु तानि रक्षा-थंसि देवैरेवोपहतानि यत्त्वेतत्करोति यदेवा ऽअकुर्वंस्त-त्करवाणीत्यथो यदेव रक्षो यः पाप्मा तेभ्य ऽएता-नग्नीनेता ऽइष्टका ब्रजान्क्षुरपवीन्कृत्वा प्रहरति तैरेनान्स्तृणुते तान्स्तृत्वाभयेऽनाष्ट्र ऽएतं यज्ञं तनुते ॥ ६ ॥ तद्यदग्निभ्य ऽइति । बहवो ह्येतेऽग्नयो यदेता-श्चितयोऽथ यत्प्रहियमाणेभ्य ऽइति प्र हि हरति ॥ ७ ॥ तद्धैकेऽन्वाहुः । 'पुरीष्यासो ऽअग्नयः प्रावणेभिः सजो-षस' ऽइति प्रायणरूपं न तथा कुर्य्यादाग्नेयीरेव गायत्रीः कामवतीरनुब्रूया'द्वा ते वत्सो मनो यमत्तुभ्यं ता ऽअङ्गिर-स्तमाग्निः प्रियेषु धामस्वि'ति ॥ ८ ॥ आग्नेयीरन्वाह । अग्निरूपाणामुपाप्त्यै कामवतीः कामानामुपाप्त्यै गायत्री-र्गायत्रोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतः सिञ्चति तिस्रस्त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा

(१) ऋ० सं० १. २१. ४; शु० य० सं० १२. ५०। (२) शु० य० सं० अ० १२ क० ११५-११७।

तावतैवैनमेतद्रेतो भूतः सिञ्चति ताः सप्त सम्पद्यन्ते सह त्रिरनूक्ताभ्याꣳ सप्तचितिकोऽग्निः सप्तर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावत्तद्भवत्युपाꣳशुयाजꣳयजन्वाह रेतो वा ऽअत्र यज्ञ ऽउपाꣳशु वै रेतः सिच्यते पशुच्छादनुब्रुवन्नन्वेति छन्दोभिरेवैतद्यज्ञं पशुच्छादभिरक्षन्नेति ॥ ९ ॥ अथाश्वः शुक्लं पुरस्तान्नयन्ति । एतद्वै देवा ऽअबिभयुर्य्यद्वै न ऽइह रक्षाꣳसि नाष्ट्रा न हन्युरिति त ऽएतं व्रज्रमपश्यन्नमुमेवादित्यमसौ वा ऽआदित्य ऽएषोऽश्वस्त ऽएतेन व्रज्रेण पुरस्ताद्रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्रे स्वस्ति समाशनुवत तथैवैतद्यजमान ऽएतेन व्रज्रेण पुरस्ताद्रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्रे स्वस्ति समश्नुत ऽआगच्छन्त्यग्निं दक्षिणतः * पुच्छस्य चितिमुपनिदधत्युत्तरतोऽश्वमाक्रमयन्ति ॥ १० ॥ तमुत्तरार्द्धेनाग्नेः । अन्तरेण परिश्रितः प्राञ्चं नयन्ति तत्प्राच्यै दिशः पाप्मानमपहन्ति तं दक्षिणा तद्दक्षिणायै दिशः पाप्मानमपहन्ति तं प्रत्यञ्चं तत्प्रतीच्यै दिशः पाप्मानमपहन्ति तमुदञ्चं तदुदीच्यै दिशः पाप्मानमपहन्ति सर्वाभ्य ऽएवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा ऽअपहत्याथैनमुदञ्चं प्राञ्चं प्रसृजति तस्योक्तो बन्धुः ॥ ११ ॥ † तं प्रत्यञ्चं शयन्तम् । एतां चितिमवग्रापयत्यसौ वा ऽआदित्य ऽएषोऽश्व ऽइमा ऽउ सर्वाः प्रजा या ऽइमा ऽइष्टकास्तद्यदवग्रापयत्यसावेव तदादित्य-

* का० श्रौ० सू० १७. ३. २२ ।

† अत्र शतम् ४२००; का० श्रौ० सू० १७. ३. २६ ।

ऽइमाः प्रजा ऽअभिजिग्घ्रति तस्मादु हैतत्सर्वोऽस्मीति मन्यते प्रजापतेर्व्रीड्येण तद्यत्प्रत्यञ्चं श्यन्तमवघ्रापयति प्रत्यङ् ह्येवैष यन्निमाः सर्वाः प्रजा ऽअभिजिघ्रति ॥ १२ ॥ यद्वेवावघ्रापयति । असौ वा ऽआदित्य ऽएषोऽइश्व ऽइम ऽउ लोका ऽएताः स्वयमातृण्णास्तद्यदवघ्रापयत्यसावेव तदादित्य ऽइमाँल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्रमुपरि तस्य बन्धुः ॥ १३ ॥ यद्वेवावघ्रापयति । अग्निर्देवेभ्य ऽउदक्रामत्सोऽपः प्राविशत्ते देवाः प्रजापतिमब्रुवँस्त्वमिममन्विच्छ स नुभ्यꣳ स्वाय पित्र ऽआविर्भविष्यतीति तमश्वः शुक्लो भूत्वान्वैच्छत्तमद्भ्य ऽउपोदास्तं पुष्करपर्णे विवेद तमभ्यवेक्षाञ्चक्रे स ह एनमुदुवोप तस्मादुश्वः शुक्र ऽउदुष्टमुख ऽइवाथो ह दुरक्षो भावुकस्तमु वा ऽऋत्वेव हिꣳसित्वेव मेने तꣳ होवाच वरं ते ददामीति ॥ १४ ॥ स होवाच । यस्त्वानेन रूपेणान्विच्छाद्विन्दादेव त्वा स ऽइति स यो हैनमेतेन रूपेणान्विच्छति विन्दति हैनं वित्त्वा हैवैनं चिनुते ॥ १५ ॥ स शुक्रः स्यात् । तद्धेयतस्य रूपं श्य ऽएष तपति यदि शुक्रं न विन्देदप्यशुक्रः स्यादुश्वस्त्वेव स्याद्यद्यश्वं न विन्देदुप्यनड्वानेव स्यादाग्नेयो वा ऽअनड्वानग्निरु सर्वेषां पाप्मनामपहन्ता ॥ १६ ॥ अथातोऽधिरोहणस्यैव । तꣳ हैके पुरस्तात्प्रत्यञ्चमधिरोहन्ति पश्चाद्वा प्राञ्चं न तथा कुर्य्यात्पशुरेष यदग्निर्य्यो वै पशुं पुरस्तात्प्रत्यञ्चमधिरोहति विषाणाभ्यां तꣳ हन्त्यथ यः पश्चात्प्राञ्चं

पद्भ्यां तमात्मनैवैनमारोहेद्यं वा ऽआत्मना पशुमारोहन्ति स पारयति स न हिनस्त्युत्तरतो यद्ध हि कञ्च पशुमारोहन्त्युत्तरत ऽएवैनमारोहन्त्यारुह्याग्निमौत्तरवेदिकं कर्म्म कृत्वात्मन्नग्निं गृह्णीत ऽआत्मन्नग्निं गृहीत्वा सत्यद्ध साम गायति पुष्करपर्ण्णमुपदधाति तस्यातः ॥ १७ ॥ अथैतद्ध साये भूतेऽश्वं परिणयन्ति । एतद्वै देवा ऽअबिभयुर्य्यद्वै न ऽइममिह रक्षाꣳसि नाष्ट्रा न हन्युरिति तस्मा ऽएतं वज्रमभिगोप्तारमकुर्वन्नमुमेवादित्यमसौ वा ऽआदित्य ऽएषोऽश्वस्तथैवास्मा ऽअयमेतं वज्रमभिगोप्तारं करोति ॥ १८ ॥ तं वा ऽउपास्तमयमादित्यस्य * परिणयति । एष वा ऽअस्य प्रत्यक्षं दिवा गोप्ता भवति रात्रिसाचयान्यु वै रक्षाꣳसि रात्र्या ऽएवास्मा ऽएतं वज्रमभिगोप्तारं करोति सर्व्वतः परिणयति सर्व्वत ऽएवास्मा ऽएतं वज्रमभिगोप्तारं करोति त्रिष्कृत्वः परिणयति त्रिवृतमेवास्मा ऽएतं वज्रमभिगोप्तारं करोत्यथैनमुदञ्चं प्राञ्चं प्रसृजति तस्योक्तो बन्धुरथ स पुनर्विपल्ययते तस्योपरि बन्धुः ॥ १९ ॥ (B)

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥

कण्डिकासंख्या ॥ १०५ ॥

---

* का० श्रौ० सू० १७. ३. २५ ।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ९ २. २, कट सं० १६. ११; कपि० २५. २; मै० सं० ११. ७. ११ तै० सं० ४. २. ४ ।

[अग्निग्रहणम्, सत्यसामगानम्, पुष्करपर्णोपधानं च]

आत्मन्नग्निं गृह्णीते चेष्यन्। आत्मनो वा ऽएतमधिजनयति यादृशाद्वै जायते तादृङ्ङेव भवति स यदात्मन्नगृहीत्वाग्निं चिनुयान्मनुष्यादेव मनुष्यं जनयेन्मर्त्यान्मर्त्यमनपहतपाप्मनोऽनपहतपाप्मानमथ यदात्मन्नग्निं गृहीत्वा चिनोति तदग्नेरेवाध्यग्निं जनयत्यमृतादमृतमपहतपाप्मनोऽपहतपाप्मानः ॥ १ ॥ † स गृह्णाति। 'मयि गृह्णाम्यग्ने ऽअग्निमिति तदात्मन्नेवाग्रेऽग्निं गृह्णीते 'रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्यायेति तदु सर्वाऽआशिष ऽआत्मन्गृह्णीते 'मामु देवताः सचन्तामिति तदु सर्वान्देवानात्मन्गृह्णीते तद्यत्किञ्चात्मनोऽधि जनयिष्यन्भवति तत्सर्वमात्मन्गृह्णीते स वै निष्टन्नात्मन्नग्निं गृहीत्वानूपविश्य चिनोति पशुरेष यदग्निस्तस्मात्पशुस्तिष्टन्गर्भं धित्वानूपविश्य विजायते ॥ २ ॥ अथ सत्यः ‡ साम गायति। एतद्वै देवा ऽअब्रुवन्त्सत्यमस्य मुखं करवाम ते सत्यं भविष्यामः सत्यं नोऽनुवर्त्स्यति सत्यो नः स कामो भविष्यति यत्कामा ऽएतत्करिष्यामह ऽइति ॥ ३ ॥ त ऽएतत्सत्यः साम पुरस्तादगायन्। तदस्य सत्यं मुखमकुर्वंस्ते सत्यमभवन्त्सत्यमेनानन्ववर्त्तत सत्यऽएषाऽ स कामोऽभवद्यत्कामा ऽएतदकुर्वत ॥ ४ ॥

† का० श्रौ० सू० १७. १. २७।

(१) शु० य० सं० अ० १३ क० १। (२) शु० य० सं० अ० १३ क० १। (३) शु० य० सं० अ० १३ क० १।

‡ का० श्रौ० सू० १७. १. २८।

तथैवैतद्यजमानः । यत्सत्यः साम पुरस्ताद्गायति तदस्य सत्यं मुखं करोति स सत्यं भवति सत्यमेनमनुवर्त्तते सत्योऽस्य स कामो भवति यत्काम एतत्कुरुते ॥ ५ ॥ तद्यत्तत्सत्यम् । आप एव तदापो हि वै सत्यं तस्माद्येनापो यन्ति तत्सत्यस्य रूपमित्याहुरप एव तदस्य सर्वस्याग्रमकुर्वंस्तस्माद्यदैवापो यन्त्यथेदः सर्वं जायते यदिदं किञ्च ॥ ६ ॥ अथ * पुष्करपर्णमुपदधाति । योनिर्वै पुष्करपर्णं स्योनिमेवैतदुपदधाति ॥ ७ ॥ यद्वेव पुष्करपर्णमुपदधाति । आपो वै पुष्करं तासामियं पर्णं स्यथा ह वाऽइदं पुष्करपर्णमप्स्वक्ष्याहितमेवमियमप्स्वक्ष्याहिता सेयं स्योनिरग्नेरियꣳ ह्यग्निरस्यै हि सर्वोऽग्निश्चीयत ऽइमामेवैतदुपदधाति तामनन्तर्हिताꣳ सत्यादुपदधातीमां तत्सत्ये प्रतिष्ठापयति तस्मादियः सत्ये प्रतिष्ठिता तस्माद्वियमेव सत्यमियꣳ ह्येवैषां लोकानामद्धातमाम् ॥ ८ ॥ 'अपां पृष्ठमसि योनिरग्ने'रिति । अपाꣳ हीयं पृष्ठं स्योनिर्हीयमग्नेः 'समुद्रमभितः पिन्वमाने'ति समुद्रो हीमामभितः पिन्वते 'वर्द्धमानो महाँ२॥ ऽआ च पुष्कर' ऽइति वर्द्धमानो महीयस्व पुष्कर ऽइत्येत'द्दिवो मात्रयाँ वरिम्णा प्रथस्वे'त्यनुविमाष्टर्यसौ वा ऽआदित्य एषोऽग्निर्यो हैतमन्यो दिवो वरिमा यन्तुमर्हति द्यौर्भूत्वैनं यच्छेत्येवैतदाह स्वराजोपदधाति स्वाराज्यꣳ ह्यपाꣳ

* पुष्करपर्णमुपदधाति स्तम्बे पूर्ववत् (का० श्रौ० सू० १७. ४. १) ।

(१) शु० य० सं० अ० १३ क० २ । (२) शु० य० सं० अ० १३ क० २ । (३) शु० य० सं० अ० १३ क० २ । (४) शु० य० सं० अ० १३ क० २ ।

सादयित्वा सूददोहसाधिवदति तस्योक्तो वन्धुः ॥ ९ ॥ अथ † रुक्मममुपदधाति । असौ वा ऽआदित्य ऽएष रुक्मम-ऽएष हीमाः सर्वाः प्रजा ऽअतिरोचते रोचो ह वै नः रुक्मम ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवा ऽअमुमे-वैनदादित्यमुपदधाति स हिरण्मयो भवति परिमण्डल-ऽएकविंशतिनिर्वाधस्तस्योक्तो वन्धुरधस्तान्निर्वाधमुप-दधाति रश्मयो वा ऽएतस्य निर्वाधा ऽअवस्तादु वा-ऽएतस्य रश्मयः ॥ १० ॥ तं पुष्करपर्ण ऽउपदधाति । योनिर्वै पुष्करपर्णं योनावेवैनमेतत्प्रतिष्ठापयति ॥ ११ ॥ यद्वेव पुष्करपर्ण ऽउपदधाति । प्रतिष्ठा वै पुष्करपर्णमियं वै पुष्करपर्णमियमु वै प्रनिष्ठा यो वा ऽअस्यामप्रतिष्ठि-तोऽपि दूरे सन्नप्रतिष्ठित ऽएव स रश्मिभिर्वा ऽएषो-ऽस्यां प्रतिष्ठितोऽस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥ १२ ॥ यद्वेव पुष्करपर्ण ऽउपदधाति । इन्द्रो वृत्रः हत्वा नास्तृपीति मन्यमानोऽपः प्राविशत्ता ऽअब्रवीद्वि-भेमि वै पुरं मे कुरुतेति स योऽपाꣳ रस ऽआसीत्तमूर्द्धः-समुदौहँस्तामस्मै पुरमकुर्वंस्तद्यदस्मै पुरमकुर्वंस्तस्मा-त्पुष्करं पुष्करः ह वै तत्पुष्करमित्याचक्षते परोक्षं परोक्षकामा हि देवास्तद्यत्पुष्करपर्ण ऽउपदधाति यमे-वास्मै तमापो रसः समुदौहन्न्यामस्मै पुरमकु-र्वंस्तस्मिन्नेवैनमेतत्प्रतिष्ठापयति ॥ १३ ॥ 'ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि'ति । असौ वा ऽआदित्यो ब्रह्माहरहः

† का० श्रौ० सू० १७ ४. २।
(१) शु० य० सं० अ० १३ क० ३।

पुरस्ताज्जायते 'द्वि सीमतः सुरुचो वेन ऽआवरि'ति मध्यं वै सीमेमे लोकाः सुरुचोऽसावादित्यो वेनो यद्वै प्रजिजनिषमाणोऽवेनत्तस्माद्वेनस्तानेष सीमतो मध्यतो विवृण्वन्नुदेति 'स बुध्न्या ऽउपमा ऽअस्य विष्ठा' ऽइति दिशो वाऽअस्य बुध्न्या ऽउपमा विष्ठास्ता ह्येष ऽउपवितिष्ठते 'सतश्च योनिमसतश्च विवरि'तीमे वै लोकाः सतश्च योनिरसतश्च यच्च ह्यस्ति यच्च न तदेभ्य ऽएव लोकेभ्यो जायते त्रिष्टुभोपदधाति त्रैष्टुभो ह्येष सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥१४॥ अथ * पुरुषमुपदधाति । स प्रजापतिः सोऽग्निः स यजमानः स हिरण्मयो भवति ज्योतिर्वै हिरण्यं ज्योतिरग्निरमृतꣳ हिरण्यममृतमग्निः पुरुषो भवति पुरुषो हि प्रजापतिः ॥ १५ ॥ यद्वेव पुरुषमुपदधाति । प्रजापतेर्विस्रस्ताद्रम्या तनूर्मर्मृज्यत ऽउदक्रामत्तस्यामेनमुत्क्रान्तायां देवा ऽअजहुस्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताꣳ रम्यां तनूं मृज्यतोऽदधुस्तस्यामस्य देवा ऽअरमन्त तद्यदस्यैतस्याꣳ रम्यायां तन्वां देवा ऽअरमन्त तस्माद्धि रम्यः हि रम्यः ह वै तद्धिरण्यमित्याचक्षते परोक्षं परोक्षकामा हि देवास्तथैवास्मिन्नयमेताꣳ रम्यां तनूं मृज्यतो दधाति तस्यामस्य देवा रमन्ते प्राणो वा ऽअस्य सा रम्या तनूः प्राणमेवास्मिन्नेतं मृज्यतो दधाति ॥१६॥ तꣳ रुक्मम ऽउपदधाति । असौ वा ऽआदित्य ऽएष रुक्मोऽथ

(१) शु० य० सं० अ० १३ क० ३ । (२) शु० य० सं० अ० १३ क० ३ । (३) शु० य० सं० अ० १३ क० ३ ।

* का० श्रौ० सू० १७. ८. ३ ।

ष ऽएष ऽएतस्मिन्मण्डले पुरुषः स ऽएष तमेवैतदुपदधाति ॥ १७ ॥ उत्तानमुपदधाति । एतद्वै देवा ऽअब्रुवन्यदि वा ऽइमावर्वाञ्चा ऽउपधास्यामः सर्वमेवेदं प्रधक्ष्यतो यद्यु पराञ्चौ पराञ्चावेव तप्स्यतो यद्यु सम्म्यञ्चावन्तरैवैतावेतज्ज्योतिर्भविष्यत्यथो ऽअन्योऽन्यं हिंसिष्यत ऽइति तेऽर्वाञ्चमन्यमुपादधुः पराञ्चमन्यं स ऽएष रश्मिभिरर्वाङ् तपति रुक्मः प्राणैरेष ऽऊर्द्धः पुरुषः प्राञ्चमुपदधाति प्राङ् ह्येषोऽग्निश्चीयते ॥ १८ ॥ 'हिरण्यगर्भः समवर्त्तताग्र' ऽइति । हिरण्यगर्भो ह्येष समवर्त्तताग्रे 'भूतस्य जातः पतिरेक ऽआसीदि'त्येष ह्यस्य सर्वस्य भूतस्य जातः पतिरेक ऽआसी'त्स दाधार पृथिवीं द्यामुतेमामि'त्येष वै दिवं च पृथिवीं च दाधार 'कस्मै देवाय हविषा विधेमे'ति प्रजापतिर्वै कस्तस्मै हविषा विधेमेत्येतत् ॥ १९ ॥ 'द्रप्सश्चस्कन्द पृथिवीमनु द्यामि'ति । असौ वा ऽआदित्यो द्रप्सः स दिवं च पृथिवीं च स्कन्दतीत्यमूमितीमा'मिमं च योनिमनु यश्च पूर्व' ऽइतीमं च लोकममुं चेत्येतदथो यच्चेदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति 'समानं योनिमनु सञ्चरन्तमि'ति समानमेष ह्येष एतं योनिमनु सञ्चरति 'द्रप्सं जुहोर्म्यनु सप्त होत्रा' ऽइत्यसौ वा ऽआदित्यो द्रप्सो दिशः सप्त होत्रा ऽअमुं

(१) शु० य० सं० अ० १२ क० ४। (२) शु० य० सं० अ० १२ क० ४। (३) शु० य० सं० अ० १२ क० ४। (४) शु० य० सं० अ० १२ क० ४। (५) शु० य० सं० अ० १२ क० ५। (६) शु० य० सं० अ० १२ क० ५। (७) शु० य० सं० अ० १२ क० ५। (८) शु० य० सं० अ० १२ क० ५।

तदादित्यं दिक्षु प्रतिष्ठापयति ॥ २० ॥ द्वाभ्यामुपदधाति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिष्टुब्भ्यां त्रैष्टुब्भ्यो ह्येष सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ २१ ॥ अथ * साम गायति । एतद्वै देवा ऽएतं पुरुषमुपधाय तमेतादृशमेवापश्यन्यथैतच्छुष्कं फलकम् ॥ २२ ॥ तेऽब्रुवन् । उप तज्जानीत यथास्मिन्पुरुषे वीर्यं दधामेति तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथास्मिन्पुरुषे वीर्यं दधामेति ॥ २३ ॥ ते चेतयमानाः । एतत्सामापश्यँस्तदगायँस्तदस्मिन्वीर्यमदधुस्तथैवास्मिन्नयमेतद्दधाति पुरुषे गायति पुरुषे तद्वीर्यं दधाति चित्रे गायति सर्वाणि हि चित्राण्यग्निस्तमुपधाय न पुरस्तात्परीयात्रेन्मायमग्निर्हिनसदिति ॥ २४ ॥ अथ † सर्पनामैरुपतिष्ठते । इमे वै लोकाः सर्पास्ते हानेन सर्वेण सर्पन्ति यदिदं किञ्च सर्वेषामु हैष देवानामात्मा यदग्निस्ते देवा ऽएतमात्मानमुपधायाबिभयुर्यद्वै न ऽइमे लोका ऽअनेनात्मना न सर्पेयुरिति ॥ २५ ॥ त ऽएतानि सर्पनामान्यपश्यन् । तैरुपातिष्ठन्त तैरस्मा ऽइमाँल्लोकानस्थापयँस्तैरनमयन्यदनमयँस्तस्मात्सर्पनामानि तथैवैतद्यजमानो यत्सर्पनामैरुपतिष्ठत ऽइमानेवास्मा ऽएतल्लोकान्त्स्थापयतीमाँल्लोकान्नमयति तथो हास्यैत ऽएतेना-

* का० श्रौ० सू० १७. ४ ४ ।
† का० श्रौ० सू० १७. ४. ६ ।

त्मना न सर्प्पन्ति ॥ २६ ॥ यद्वेव सर्प्पनामैरुपतिष्ठते । इमे वै लोकाः सर्प्पा यद्धि किञ्च सर्प्पत्येष्वेव तँल्लोकेषु सर्प्पति तद्यत्सर्प्पनामैरुपतिष्ठते यैवैषु लोकेषु नाष्ट्रा यो व्यद्वरो या शिमिदा तदेवैतत्सर्व्वः शमयति ॥ २७ ॥ 'नमोऽस्तु सर्प्पेभ्यः । ये के च पृथिवीमनु । ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नम' ऽइति य ऽएवैषु त्रिषु लोकेषु सर्प्पास्तेभ्य ऽएतन्नमस्करोति ॥ २८ ॥ 'या-ऽइषवो यातुधानानामि'ति । यातुधानप्रेषिता हैके दशन्ति 'ये वाँ वनस्पतीँ रनु । ये वावटेषु शेरते तेभ्यः सर्प्पेभ्यो नम' ऽइति ये चैव वनस्पतिषु सर्प्पा ये चावटेषु शेरते तेभ्य ऽएत्तन्नमस्करोति ॥ २९ ॥ 'ये वाँमी रोचने दिवः । ये वा सूर्य्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्प्पेभ्यो नम' ऽइति यत्र-यत्रैते तदेवैभ्य ऽएतन्नमस्करोति नमो नम ऽइति यज्ञो वै नमो यज्ञेनैवैनानेतन्नमस्कारेण नमस्यति तस्मादु ह नायज्ञियं ब्रूयान्नमस्त ऽइति यथा हैनं ब्रूयाद्यज्ञस्त ऽइति तादृक्तत् ॥ ३० ॥ त्रिभिरुपतिष्ठते । त्रय ऽइमे लोका ऽअथो त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मा ऽएतदिमाँल्लोकान्त्स्थापयत्यथो तावतैवैतदिदꣳ सर्व्वꣳ शमयति तिष्ठनुपतिष्ठते तिष्ठन्तीव वा ऽइमे लोका ऽअथो तिष्ठन्नेवै वीर्य्यवत्तरः ॥ ३१ ॥ * अथैनमुपविश्याभिजुहोति

(१) शु० य० सं० अ० १३ क० ६। (२) शु० य० सं० अ० १३ क० ७। (३) शु० य० सं० अ० १३ क० ७। (४) शु० य० सं० अ० १३ क० ९।
* का० श्रौ० सू० १७. ४. ७।

आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः सर्वतः परिसर्पः सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेन प्रीणाति ॥ ३२ ॥ यद्वैवैनमभिजुहोति * । एतद्वै देवा एतमात्मानमुपधाया-बिभयुर्यद्वै न इमामिह रक्षाꣳसि नाष्ट्रा न हन्न्युरिति त एतान्राक्षोघ्नान्प्रतिसरानपश्यꣳस्तूष्णीं प्राजः प्रसितिं न पृथ्वीमि'ति राक्षोघ्ना वै प्रतिसरास्त एतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षाꣳसि नाष्ट्रा अपहत्या-भयेऽनाष्ट्र एतमात्मानः समस्कुर्वत तथैवैतद्यजमान एतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षाꣳसि नाष्ट्रा-अपहत्याभयेऽनाष्ट्र एतमात्मानः संस्कुरुते ॥ ३३ ॥ आज्येन जुहोति । † वज्रो वा आज्यं वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति पञ्चगृहीतेन पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्त्याग्नेयीभिरग्निर्वै ज्योती रक्षोहाग्निनैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति सर्वतः परिसर्पः सर्वाभ्य एवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा-अपहन्ति ॥ ३४ ॥ पश्चादग्नेः प्राङासीनः । अथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्ङथ जघनेन परीत्य दक्षिणत-उदङ्ङासीनस्तद्दक्षिणावृत्तद्धि ‡ देवत्राथानुपरीत्य पश्चा-

---

* का० श्रौ० सू० १७. ४. ७ ।

(१) शु० य० सं० अ० १३ क० ८-१२; ऋ० सं० ४. ४. १ ।

† तैत्तिरीयकेऽपि घृतस्य वज्ररूपत्वसम्प्रतिपन्नम् (तै० सं० ६. २. २. ७) ।

‡ का० श्रौ० सू० १७. ४. ८-१० ।

त्प्राङासीनस्तथो हास्यैतत्प्रागेव कर्म्म कृतं भवति ॥ ३५ ॥ अथ * स्रुचा ऽउपदधाति । वाहू वै स्रुचौ वाहु ऽएवास्मिन्नेतत्प्रतिदधाति ते यत्स्रुचौ भवतः स्रुचौ हि वाहू ऽइदमेव † कपुत्सलमयं दण्डो द्वे भवतो द्वौ हीमौ वाहू पाइर्श्वत ऽउपदधाति पाइर्श्वतो हीमौ वाहू ॥ ३६ ॥ कार्ष्मर्य्यमयीं ‡ दक्षिणत ऽउपदधाति । एतद्वै देवा ऽअबिभयुर्ष्वद्वै नो यज्ञं दक्षिणतो रक्षाꣳसि नाष्ट्रा न हन्युरिति त ऽएतद्रक्षोहणं बनस्पतिमपइत्यइकार्ष्मर्य्यं त ऽएतेन बनस्पतिना दक्षिणतो रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्र ऽएतं क्रयज्ञमतन्वत तथैवैतद्यजमान ऽएतेन बनस्पतिना दक्षिणतो रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्र ऽएतं क्रयज्ञं तनुत ऽआज्येन पूर्णा भवति बज्रो वा ऽआज्यं बज्रेणैवैतद्दक्षिणतो रक्षाꣳसि नाष्ट्रा ऽअपहन्ति ॥ ३७ ॥ अथौदुम्बरीमुत्तरत ऽउपदधाति § । ऊर्ग्वै रस ऽउदुम्बर ऽऊर्जमेवास्मिन्नेतद्रसं दधाति दध्ना पूर्णा भवति रसो वै दधि रसमेवास्मिन्नेतद्दधाति ॥ ३८ ॥ यद्वेव स्रुचा ऽउपदधाति । प्रजापतेर्ब्विस्रस्तस्याग्निस्तेज ऽआदाय दक्षिणाकर्षत्सो ऽत्रोदरमद्यत्कृष्ट्वोदरमत्तस्मात्कार्ष्मर्य्यो ऽथास्येन्द्र ऽओज ऽआदायोदङ्डुदत्क्रामत्स ऽउदुम्बरोऽभवत् ॥ ३९ ॥ तावब्रवीत् । उप मेतं प्रति म ऽएतद्धत्तं श्येन मे युवमुदु-

* का० श्रौ० सू० १७. ४. ११ ।

† 'क पुच्छलम्' इति 'ख-ग' पुस्तकयो ।

‡ का० श्रौ० सू० १७. ४ १२ ।


§ का० श्रौ० सू० १७. ४. १३ ।

क्रमिष्टमिति ताभ्यां वै नौ सर्वमन्नं प्रयच्छेति तौ वै मा बाहू भूत्वा प्रपद्येथामिति तथेति ताभ्यां वै सर्वमन्नं प्रायच्छत्तावेनं बाहू भूत्वा प्रापद्येतां तस्माद्बाहुभ्यामेवान्नं क्रियते बाहुभ्यामद्यते बाहुभ्याꣳ हि स सर्वमन्नं प्रायच्छत् ॥ ४० ॥ स कार्ष्मर्य्यमयीं दक्षिणत ऽउपदधाति । 'अग्नेष्ट्वौ' तेजसा सादयामी'ति यदेवास्य तदग्निस्तेज ऽआदाय दक्षिणाकर्षत्तदस्मिन्नेतत्प्रतिदधा'त्यग्निर्म्मूर्द्धा दिवः ककुदि'त्येष ऽउ सोऽग्निर्ग्गायत्र्या गायत्रोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनामेतदुपदधाति घृतेन पूर्ण्णा भवत्याग्नेयं वै घृतꣳ स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ४१ ॥ अथोदुम्बरीमुत्तरत * ऽउपदधाति । 'इन्द्रस्य त्वौजसा सादयामी'ति यदेवास्य तदिन्द्र ऽओज ऽआदायोदङ्डुदक्रामत्तदस्मिन्नेतत्प्रतिदधाति 'भुवो यज्ञस्य रजसश्च नेते'त्येष ऽउ स ऽइन्द्रः सा यदाग्नेय्यग्निकर्म्म ह्यथ यत्त्रिष्टुप्त्रैष्टुभो ह्यैन्द्र ऽऐन्द्राग्नोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनामेतदुपदधातीन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनामेतदुपदधाति दध्ना पूर्ण्णा भवत्यैन्द्रं वै दधि स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ४२ ॥ तावस्यैताविन्द्राग्नी ऽएव बाहू । तावेनं तेजसा च वीर्य्येण च सह प्रपद्येते स सम्प्रत्युरः

(१) शु० य० सं० अ० १३ क० १३ । (२) शु० य० सं० अ० १३ क० १४ ।
* का० श्रौ० सू० १७. ४. १३ ।
(३) शु० य० सं० अ० १३ क० १४ । (४) शु० य० सं० अ० १३ क० १५ ।

पुरुषमाकाङ्क्ष्य यत्राब्भ्याप्नोति तदालिख्यैने ऽउपदधात्येष हैतयोर्श्लोकः ॥४३॥ [अर्धप्रपाठकः ४३॥] ते हैके तिरश्च्या ऽउपदधति । तिर्य्यञ्चौ वा ऽइमौ बाहू ऽइति न तथा कुर्य्यात्प्राच्यावेवोपदध्यात्प्राङ् ह्येषोऽग्निश्चीयतेऽथो ऽएवं वै बाहू वीर्य्यवत्तरौ ते नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हीमौ बाहू ॥ ४४ ॥ तदाहुः । नैतस्य पुरुषस्य बाहू कुर्य्यादेतौ वा ऽअस्य बाहू येऽएते स्रुचौ नेदतिरेचयानीति स वै कुर्य्यादेवैतौ वा ऽअस्य बाहू ऽअन्वेते स्रुचावथो ऽएतौ पक्षावथो यान्येतस्मिन्नग्नौ रूपाण्युपधास्यन्भवति यान्स्तोमान्यानि पृष्ठानि यानि च्छन्दाꣳस्येतयोरेव सा संस्कृतिरेतयोर्व्वृद्धिस्तस्मादु कुर्य्यादेवैतस्य पुरुषस्य बाहू ॥ ४५ ॥ (A)

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



[स्वयमातृण्णेष्टकोपधानादि]

स्वयमातृण्णामुपदधाति । इयं वै स्वयमातृण्णेमामेवैतदुपदधाति तामनन्तार्हितां पुरुषादुपदधात्यन्नं वै स्वयमातृण्णेयं वै स्वयमातृण्णेयमु वा ऽअन्नमस्याꣳ हि सर्व्वमन्नं पच्यतेऽनन्तार्हितमेवास्मादेतदुन्नं दधात्युत्तरामुत्तरमेवास्मादेतदुन्नं दधाति ॥ १ ॥ यद्वेव स्वयमातृण्णामुप-

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ९. १. ३,४. कठ० सं० १६ १५,१६; कपि० २५. ६. मै० सं० ११. ७. १५; तै० सं० ४. २. ८ ।

दुधाति । प्राणो वै स्वयमातृण्णा प्राणो ह्येवैतत्स्वयमात्मन-ऽआतृन्ते प्राणमेवैतदुपदधाति तामनन्तर्हितां पुरुषादुप-दधाति प्राणो वै स्वयमातृण्णेयं वै स्वयमातृण्णेयमु वै प्राणो यद्धि किञ्च प्राणीयं तत्सर्वं बिभर्त्यनन्तर्हितमे-वास्मादेतत्प्राणं दधात्युत्तरामुत्तरमेवास्मादेतत्प्राणं दधाति ॥ २ ॥ यद्वेव स्वयमातृण्णामुपदधाति । प्रजापतिं विस्रस्तं देवता ऽआदाय व्युदक्रामँस्तासु व्युत्क्रामन्तीषु प्रति-ष्ठामभिपद्योपाविशत् ॥ ३ ॥ स यः स प्रजापतिर्व्यस्रंसत । अयमेव स योऽयमग्निश्चीयतेऽथ या सा प्रतिष्ठैषा सा प्रथमा स्वयमातृण्णा तद्यदेतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रो-पदधाति ॥ ४ ॥ तां वै प्रजापतिनोपदधाति । प्रजापति-र्ह्येवैतत्स्वयमात्मनः प्रत्यधत्त 'ध्रुवासी'ति स्थिरासीत्ये-तदुथो प्रतिष्ठितासीति 'धरुणे'ति प्रतिष्ठा वै धरुण-'मास्तृता विश्वकर्म्मणे'ति प्रजापतिर्वै विश्वकर्म्मा तेनास्तृ-तासीत्येत'न्मा त्वा समुद्र ऽउदधीन्मा सुपर्ण' ऽइति रुक्मो वै समुद्रः पुरुषः सुपर्णस्तौ त्वा मोद्वधिष्टामित्येत-'द्व्यथमाना पृथिवीं दृꣳहे'ति यथैव यजुस्तथा बन्धुः ॥ ५ ॥ 'प्रजापतिष्ट्वा सादयत्वि'ति । प्रजापतिर्ह्येतां प्रथमां चितिमपश्यय'दपां पृष्ठे समुद्रस्येमन्नि'त्यपाꣳ ह्ययं पृष्ठः

(१) शु० य० सं० अ० १३ क० १६ । (२) शु० य० सं० अ० १३ क० १६ । (३) शु० य० सं० अ० १३ क० १६ । (४) शु० य० सं० अ० १३ क० १६ । (५) शु० य० सं० अ० १३ क० १६ । (६) शु० य० सं० अ० १३ क० १७ । (७) शु० य० सं० अ० १३ क० १७ ।

समुद्रस्य * हीयमेम 'व्यचस्वतीं प्रथस्वतीमि'ति व्यचस्वती च हीयं प्रथस्वती च 'प्रथस्व पृथिव्यसी'ति प्रथस्व पृथिवी चासीत्येतत् ॥ ६ ॥ 'भूरसी'ति । भूर्हीयं 'भूमिरसी'ति भूमिर्हीय'मदितिरसी'तीयं वा ऽअदितिरियꣳ हीदꣳ सर्वं ददते 'विश्वधाया' ऽइत्यस्याꣳ हीदꣳ सर्वꣳ हितं 'विश्वस्य भुवनस्य धर्त्री'ति सर्वस्य भुवनस्य धर्त्रीत्येत'त्पृथिवीं द्यꣳह्य पृथिवीं मा हिꣳसीरि'त्यात्मानं द्यꣳह्यात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥ ७ ॥ 'विश्वस्मै प्राणायापानाय । व्यानायोदानाये'ति प्राणो वै स्वयमातृण्णा सर्वस्मा ऽउ वा ऽएतस्मै प्राणः 'प्रतिष्ठायै चरित्रायै'तीमे वै लोकाः स्वयमातृण्णा ऽइम ऽउ लोकाः प्रतिष्ठा चरित्र'मग्निष्ट्वाभिपात्वि'त्यग्निष्ट्वाभिगोपायत्वित्येत'दमह्वा स्वस्त्ये'ति महत्या स्वस्त्येत्येत'च्छर्दिषा शन्तमेने'ति यच्छर्दिः शन्तमं तेनेत्येतत्सादयित्वा सुददोहसाधिवदति तस्योक्तो बन्धुरथ † साम गायति तस्योपरि बन्धुः ॥ ८ ॥ तदाहुः । कथमेष पुरुषः स्वयमातृण्णयानभिनिहितो भव-

* 'हीयमेव' इति पाठो 'ज' पुस्तके ।

(१) शु० य० सं० अ० १३ क० १७ । (२) शु० य० सं० अ० १३ क० १७ । (३) शु० य० सं० अ० १३ क० १८ । (४) शु० य० सं० अ० १३ क० १८ । (५) शु० य० सं० अ० १३ क० १८ । (६) शु० य० सं० अ० १३ क० १८ । (७) शु० य० सं० अ० १३ क० १८ । (८) शु० य० सं० अ० १३ क० १८ । (९) शु० य० सं० अ० १३ क० १९ । (१०) शु० य० सं० अ० १३ क० १९ । (११) शु० य० सं० अ० १३ क० १९ । (१२) शु० य० सं० अ० १३ क० १९ । (१३) शु० य० सं० अ० १३ क० १९ ।

† का० श्रौ० सू० १७. ४. १६ ।

तीत्यन्नं वै स्वयमातृण्णा प्राणः स्वयमातृण्णानभिनिहितो वै पुरुषोऽन्नेन च प्राणेन च ॥ ९ ॥ अथ * दूर्वेष्टकामुपदधाति । पशवो वै दूर्वेष्टका पशूनेवैतदुपदधाति तद्यैरदोऽग्निरनन्तर्हितैः पशुभिरुपैत्त ऽएते तानेवैतदुपदधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया ऽउपदधातीयं वै स्वयमातृण्णानन्तर्हितास्तदस्यै पशून्दधात्युत्तरामुत्तराꣳस्तदस्यै पशून्दधाति ॥ १० ॥ यद्वेव दूर्वेष्टकामुपदधाति । प्रजापतेर्विस्रस्तस्य यानि लोमान्यशीयन्त ता ऽइमा ऽओषधयोऽभवन्नथास्मात्प्राणो मह्यत ऽउदक्रामत्तस्मिन्नुत्क्रान्तेऽपयत ॥ ११ ॥ सोऽब्रवीत् । अयं वाव मा ऽधूर्वीदिति यदब्रवीद्धूर्वीन्मेति तस्माद्धूर्वा धूर्वा ह वै नां दूर्वेत्याचक्षते परोक्षं परोक्षकामा हि देवास्तदेतत्क्षत्रं प्राणो ह्येष रसो लोमान्यन्या ऽओषधय ऽएतामुपदधत्सर्वा ऽओषधीरुपदधाति ॥ १२ ॥ तं यत्र देवाः समस्कुर्वन् । तदस्मिन्नेतं प्राणꣳ रसं मह्यतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति तामनन्तर्हिताꣳ स्वयमातृण्णाया ऽउपदधातीयं वै स्वयमातृण्णानन्तर्हितास्तदस्या ऽओषधीर्दधात्युत्तरामुत्तरास्तदस्या ऽओषधीर्दधाति सा स्यात्समूला साग्रा कृत्स्नतायै यथा स्वयमातृण्णायामुपहिता भूमिं प्राप्नुयादेवमुपदध्यादस्याꣳ ह्येवैता जायन्त ऽइमामनु प्ररोहन्ति ॥ १३ ॥ 'काण्डात्काण्डात्प्ररोहन्ती । परुषः परुषस्परी'ति काण्डात्काण्डाद्ध्येषा पर्वणः—पर्वणः प्ररो-

* का० श्रौ० सू० १७. ४. १८ ।

(१) शु० य० सं० अ० १३ क० २० ।

ह'त्येवा॑ नो दू॒र्वे प्र॒तनु सह॒स्रेण श॒तेन॒ चे'ति॒ यथै॒व यजु॒स्तथा॒ ब॒न्धुः ॥ १४ ॥ 'यो॑ श॒तेन॒ प्रतनो॒षि । सह॒स्रेण॒ विरो॑हसी'ति श॒तेन॒ ह्ये॒षा प्रतनो॒ति सह॒स्रेण॒ विरो॑हति 'त॒स्यास्ते॑ देवीष्टके॒ विधे॑म ह॒विषा॒ व॒यमि॒'ति॒ यथै॒व यजु॒स्तथा॒ ब॒न्धुर्द्वाभ्या॒मुप॒दधा॑ति॒ त॒स्योक्तो॒ ब॒न्धुः सादयित्वा॒ सू॒ददोहसा॒धिव॒दति॒ त॒स्योक्तो॒ ब॒न्धुः ॥ १५ ॥ अ॒थ * द्वि॒यजु॑षमुप॒दधा॑ति । इन्द्राग्नी ऽअकामयेताꣳ स्व॒र्गं लो॒कमि॑यावे॒ति॒ तावे॒ताम॒ष्टका॑मपश्य॒तां द्वि॒यजु॑षमि॒मामे॒व तामुपा॒दधा॑तां॒ तामुप॒धाया॑स्यै॒ प्रति॑ष्ठायै स्व॒र्गं लो॒कमै॑तां॒ तथै॒वैत॒द्यजमानो यद्द्वि॒यजु॑षमुप॒दधा॑ति॒ येन॒ रू॒पेण॒ यत्क॒र्म्म कृ॒त्वेन्द्राग्नी स्व॒र्गं लो॒कमै॑तां॒ तेन॒ रू॒पेण॒ तत्क॒र्म्म कृ॒त्वा स्व॒र्गं लो॒कम॑यानी॒ति सा यद्द्वि॒यजु॒र्न्नाम॒ द्वे ह्ये॒तां दे॒व॒ते ऽअ॑पश्य॒तां यद्वै॒व द्वि॒यजु॑षमुप॒दधा॑ति॒ यज॑मानो॒ वै द्वि॒यजुः ॥ १६ ॥ त॒दा॒हुः । यद॒सावे॒व यज॑मानो॒ योऽसौ॑ हिरण्म॒यः पु॒रु॒षोऽथ॑ कत॒मद॒स्येदु॒ः रू॒पमि॒ति॒ दैवो॒ वा ऽअ॒स्य स॒ऽआ॒त्मा मानु॑षोऽयं तद्यत्स॒ हिरण्म॒यो भ॒व॒त्यमृ॑तं॒ वा ऽअ॒स्य त॒द्रू॒पं दे॒व॒रू॒पम॒मृत॒ः हिरण्य॒म॒थ य॒दि॒यं मृ॒दु॒ः कृ॒ता भ॒व॒ति मानु॑षꣳ ह्य॒स्येदु॒ः रू॒पः ॥ १७ ॥ स य॒दमू॒मे॒वोप॑दध्या॒त् । नेमा॒मप॑शिꣳष्या॒त्क्षिप्रे॑ हास्मा॒ल्लोका॒द्य॒जमा॑न॒ः प्रे॒या॒दु॒थ य॒दि॒मा॒मप॑शिनष्टि य॒देवा॑स्ये॒दं मानु॑षः॒ रूपं॑ त॒दस्यै॒तदु॒पशि॑नष्टि त॒थो हा॒ने॒नात्म॒ना स॒र्व॒मा॒यु॒रे॒ति॒ ॥ १८ ॥

(१) शु॰ य॰ सं॰ अ॰ १३ क॰ २०। (२) शु॰ य॰ सं॰ अ॰ १३ क॰ २१। (३) शु॰ य॰ सं॰ अ॰ १३ क॰ २१।

* का॰ श्रौ॰ सू॰ १७. ४. २०।

स यन्नानूपदध्यात् । न हैतं दैवमात्मानमनुप्रजानीयादथ यदनूपदधाति तथो हैतं दैवमात्मानमनुप्रजानाति तामनन्तर्हितां दूर्वेष्टकाया ऽउपदधाति पशवो वै दूर्वेष्टका यजमानं तत्पशुषु प्रतिष्ठापयति ॥ १९ ॥ तदाहुः । कथमस्यैतावात्मानौ प्राणेन सन्ततावव्यवच्छिन्नौ भवत ऽइति प्राणो वै स्वयमातृण्णा प्राणो दूर्वेष्टका यजमानो द्वियजुः स यदनन्तर्हिताꣳ स्वयमातृण्णायै दूर्वेष्टकामुपदधाति प्राणेनैव तत्प्राणः सन्तनोति सन्दधात्यथ यदनन्तर्हितां दूर्वेष्टकायै द्वियजुषमुपदधाति प्राणो वै दूर्वेष्टका यजमानो द्वियजुरेवमु हास्यैतावात्मानौ प्राणेन सन्ततावव्यवच्छिन्नौ भवतः ॥ २० ॥ 'यास्ते ऽअग्ने सूर्य्ये रुचः । या वो देवाः सूर्य्ये रुच' ऽइति रुचः रुचमित्यमृतत्वं वै रुगमृतत्वमेवास्मिन्नेतद्दधाति द्वाभ्यामुपदधाति तस्योक्तो बन्धुरथो द्वयꣳ ह्येवैतद्रूपं मृच्चापश्च सादयित्वा सृददोहमाधिवदति तस्योक्तो बन्धुः ॥ २१ ॥ अथ * रेतःसिचा ऽउपदधाति । इमौ वै लोकौ रेतःसिचाविमौ ह्येव लोकौ रेतः सिञ्चत ऽइतो वा ऽअयमूर्द्धः रेतः सिञ्चति धूमः सामुत्र व्वृष्टिर्भवति तामसावमुतो व्वृष्टिं तदिमा ऽअन्तरेण प्रजाः प्रजायन्ते तस्मादिमौ लोकौ रेतःसिचौ ॥ २२ ॥ 'विराड्ज्योतिरधारयदि'ति । अयं वै लोको विराट् स ऽइममग्निं ज्योतिर्द्धारयति 'स्वराड्-

(१) शु० य० सं० अ० १३ क० २२,२३ ।
* का० श्रौ० सू० १७. ४. २२ ।
(२) शु० य० सं० अ० १३ क० २४ । (३) शु० य० सं० अ० १३ क० २४ ।

ज्योतिरधारयद्दि'त्यसौ वै लोकः स्वराट् सोऽमुमादित्यं ज्योतिर्द्धारयति विराट् च हेमौ लोकौ स्वराट् च नानोपदधाति नाना हीमौ लोकौ सकृत्साद्यति समानं तत्करोति तस्माद्दु हानयोर्लोकयोरन्ताः समायन्ति ॥ २३ ॥ यद्वेव रेतःसिचा ऽउपदधाति । आण्डौ वै रेतःसिचौ यस्य ह्याण्डौ भवतः स ऽएव रेतः सिञ्चति विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयदिति विराट् च हेमावाण्डौ स्वराट् च तावेतज्ज्योतिर्द्धारयतो रेत ऽएव * प्रजापतिमेव नानोपदधाति नाना हीमावाण्डौ सकृत्साद्यति समानं तत्करोति तस्मात्समानसम्बन्धनौ ते ऽअनन्तर्हिते द्वियजुषऽउपदधाति यजमानो वै द्वियजुरनन्तर्हितौ तद्यजमानादाण्डौ दधाति ॥ २४ ॥ अथ † विश्वज्योतिषमुपदधाति । अग्निर्वै प्रथमा विश्वज्योरग्निर्ह्येवास्मिँल्लोके विश्वं ज्योतिरग्निमेवैतदुपदधाति तामनन्तर्हिताꣳ रेतःसिग्भ्यामुपदधातीमौ वै लोकौ रेतःसिचावनन्तर्हितं तदाभ्यां लोकाभ्यामग्निं दधात्यन्तरेवोपदधात्यन्तरेव हीमौ लोकावग्निः ॥ २५ ॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वज्योतिः प्रजननमेवैतदुपदधाति तामनन्तर्हिताꣳ रेतःसिग्भ्यामुपदधात्याण्डौ वै रेतःसिचावनन्तर्हितां तदाण्डाभ्यां प्रजातिं दधात्यन्तरेवोपदधात्यन्तरेव ह्याण्डौ प्रजाः प्रजायन्ते ॥ २६ ॥

* 'प्रजातिमेव' इति 'क' पुस्तके ।

† का० श्रौ० सू० १७. ४ २१ ।

'प्रजापतिष्ट्वा सादयत्विति। प्रजापतिर्ह्येतां प्रथमां चितिमुपश्श्रय'[1]त्पृष्ठे पृथिव्या[2] ज्योतिष्मतीमि'ति पृष्ठे ह्ययं पृथिव्यै ज्योतिष्मानग्निः ॥ २७ ॥ 'विश्वस्मै[3] प्राणायापानाय। व्यानाये'ति प्राणो वै विश्वज्योतिः सर्वस्माऽउ वा ऽएतस्मै प्राणो विश्वज्ज्योतिर्य्यच्छेति सर्वं ज्योतिर्य्यच्छेत्येतदग्निष्टेऽधिपतिरित्यग्निमेवास्या ऽअधिपतिं करोति सादयित्वा सुददोहसाधिवदति तस्योक्तो बन्धुः ॥ २८ ॥ अथर्त्तव्ये ऽउपदधाति *। ऋतव ऽएते यदृतव्ये ऽऋतूनेवैतदुपदधाति 'मधुश्च[4] माधवश्च वासन्तिकावृतू' ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने ऽएतदुपदधाति द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥ २९ ॥ तद्यदेते ऽअत्रोपदधाति। संवत्सर ऽएषोऽग्निरिम ऽउ लोकाः संवत्सरस्तस्यायमेव लोकः प्रथमा चितिरयमस्य लोको वसन्त ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ ३० ॥ यद्वैवैते ऽअत्रोपदधाति। प्रजापतिरेषोऽग्निः संवत्सर ऽउ प्रजापतिस्तस्य प्रतिष्ठैव प्रथमा चितिः प्रतिष्ठो ऽअस्य वसन्त ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ते ऽअन-

(१) शु० य० सं० अ० १३ क० २४। (२) शु० य० सं० अ० १३ क० २४। (३) शु० य० सं० अ० १३ क० २४।

* का० श्रौ० सू० १७. ४. २४।

(४) शु० य० सं० अ० १३ क० २५।

न्तर्हिते विश्वज्योतिष ऽउपदधाति प्रजा वै विश्वज्योतिर्-
नन्तर्हितास्तत्प्रजा ऽऋतुभ्यो दधाति तस्मात्प्रजा-
ऽऋतूनेवानुप्रजायन्त ऽऋतुभिर्ह्येव गर्भे सन्तः सम्पश्यन्-
त्यृतुभिर्जातम् ॥ ३१ ॥ अथाषाढामुपदधाति * । इयं
वा ऽअषाढेमामेवैतदुपदधाति तां पूर्वार्द्ध ऽउपदधाति
प्रथमा हीयमसृज्यत ॥ ३२ ॥ सा यदुषाढा नाम । देवा-
श्चासुराश्चोभये प्राजापत्या ऽअस्पर्द्धन्त ते देवा ऽएता-
मिष्टकामपश्यन्नषाढामिमामेव तामुपादधत तामुपधाया-
सुरान्त्सपत्नान्भ्रातृव्यानस्मात्सर्वस्मादसहन्त यदुसहन्त
तस्मादुषाढा तथैवैतद्यजमान ऽएतामुपधाय द्विषन्तं
भ्रातृव्यमस्मात्सर्वस्मात्सहते ॥ ३३ ॥ यद्वै वाषाढामुप-
दधाति । वाग्वा ऽअषाढा वाचैव तद्देवा ऽअसुरान्त्सपत्ना-
न्भ्रातृव्यानस्मात्सर्वस्मादसहन्त तथैवैतद्यजमानो
वाचैव द्विषन्तं भ्रातृव्यमस्मात्सर्वस्मात्सहते वाचमेव
तद्देवा ऽउपादधत तथैवैतद्यजमानो वाचमेवोपधत्ते ॥ ३४ ॥
सेयं वामभृत् । प्राणा वै वामं यद्धि किञ्च प्राणीयं तत्सर्वं
बिभर्त्ति तेनेयं वामभृद्वाग्घ त्वेव वामभृत्प्राणा वै वामं
वाचि वै प्राणेभ्योऽन्नं धीयते तस्माद्वाग्वामभृत् ॥ ३५ ॥
त ऽएते सर्वे प्राणा यदुषाढा । तां पूर्वार्द्ध ऽउपदधाति
पुरस्तात्तत्प्राणान्दधाति तस्मादिमे पुरस्तात्प्राणास्तान्ना-
न्यया यजुष्मत्येष्टकया पुरस्तात्प्रत्युपदध्यादेतस्यां चितौ
नेत्प्राणानपिदधानीति ॥ ३६ ॥ यद्वपस्याः पञ्च पुरस्तादु-

* का० श्रौ० सू० १७. ४. २५।

पद्धाति । अन्नं वा ऽआपोऽनपिहिता वा ऽअन्नेन प्राणास्तामनन्तार्हितामृतव्याभ्यामुपदधात्यृतुषु तद्वाचं प्रतिष्ठापयति सेयं वागृतुषु प्रतिष्ठिता वदति ॥ ३७ ॥ तदाहुः । यत्प्रजा विश्श्वज्योतिर्वागषाढाथ कस्माद्दन्तरेणर्त्तव्ये ऽउपदधातीति संवत्सरो वा ऽऋतव्ये संवत्सरेण तत्प्रजाभ्यो वाचमन्तर्द्दधाति तस्मात्संवत्सरवेलायां प्रजा वाचं प्रवदन्ति ॥ ३८ ॥ 'अषाढासि[1] सहमाने'ति । असहन्त ह्येतया देवाऽअसुरा'न्सहस्व[2] वारातीः सहस्व पृतनायत' ऽइति यथैव यजुस्तथा बन्धुः 'सहस्त्रवीर्य्यासि[3] सा मा जिन्वे'ति सर्व्वं वै सहस्रः सर्व्ववीर्य्यासि सा मा जिन्वेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ ३९ ॥ तदाहुः । कस्माद्भिस्वयमातृण्णमन्या ऽइष्टका ऽउपधीयन्ते प्राच्च्यऽएता ऽइति * द्वे वै योनी ऽइति ब्रूयाद्देवयोनिरन्यो मनुष्ययोनिरन्यः प्राचीनप्रजनना वै देवाः प्रतीचीनप्रजनना मनुष्यास्तद्यदेताः प्राचीरुपदधाति देवयोनेरेवैतद्यजमानं प्रजनयति ॥ ४० ॥ (B)

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति चतुर्थोऽध्यायः ।

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥

कण्डिकासंख्या ॥ ८५ ॥

(१) शु० य० सं० अ० १३ क० २६ । (२) शु० य० सं० अ० १३ क० २६ । (३) शु० य० सं० अ० १३ क० २६ ।

* 'द्वौ वै' इति 'क' पाठः ।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ९. ४. १; कठसं० १६. १५,१६; मै० सं० ११. ७ १५,१६; तै० सं० ४. २. ८,९ ।

[कूर्मादीनामुपधानादि]

कूर्म्ममुपदधाति । रसो वै कूर्म्मो रसमेवैतदुपदधाति यो वै स ऽएषां लोकानामप्सु प्रविद्धानां पराङ् रसोऽत्यक्षरत्स ऽएष कूर्म्मस्तमेवैतदुपदधाति यावानु वै रसस्तावानात्मा स ऽएष ऽइम ऽएव लोकाः ॥ १ ॥ तस्य यदुधरं कपालम् । अयः स लोकस्तत्प्रतिष्ठितमिव भवति प्रतिष्ठित ऽइव ह्ययं लोकोऽथ यदुत्तरः सा द्यौस्तद् व्यवगृहीतान्तमिव भवति व्यवगृहीतान्तेव हि द्यौरथ यदन्तरा तदन्तरिक्षः स ऽएष ऽइम ऽएव लोकाऽइमानेवैतल्लोकानुपदधाति ॥ २ ॥ तमभ्यनक्ति * । दध्ना मधुना घृतेन दधि हैवास्य लोकस्य रूपं घृतमन्तरिक्षस्य मद्धुष्य स्वेनैवैनमेतद्रूपेण समर्द्धयत्यथो दधि हैवास्य लोकस्य रसो घृतमन्तरिक्षस्य मद्धुष्य स्वेनैवैनमेतद्रसेन समर्द्धयति ॥ ३ ॥ 'मधु वाता ऽऋतायत' ऽइति । यां वै देवतामृगभ्यनूक्ता यां यजुः सैव देवता सक्सो देवता तद्यजुस्तद्धैतन्मद्धुवैष त्रिचो रसो वै मधु रसमेवास्मिन्नेतद्दधाति गायत्रीभिस्तिसृभिस्तस्योक्तो बन्धुः ॥ ४ ॥ स यत्कूर्म्मो नाम । एतद्वै रूपं कृत्वा प्रजापतिः प्रजा ऽअसृजत यदसृजताकरोत्तद्यदकरोत्तस्मात्कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्वाः प्रजाः काश्यप्य ऽइति ॥५॥ स यः स कूर्म्मो ऽसौ स ऽआदित्यः । अमुमेवै-

* का० श्रौ० सू० १७. ४. २७ ।

(१) शु० य० स० अ० १३ क० २७ ।

तदादित्यमुपदधाति तं पुरस्तात्प्रत्यञ्चमुपदधात्यमुं तदादित्यं पुरस्तात्प्रत्यञ्चं दधाति तस्मादसावादित्यः पुरस्तात्प्रत्यङ् धीयते दक्षिणतोऽषाढायै व्वृषा वै कूर्म्मो योषाषाढा दक्षिणतो वै व्वृषा योषामुपशेतेऽरत्निमात्रेऽरत्निमात्राद्धि व्वृषा योषामुपशेते सैषा सर्व्वासामिष्टकानां महिषी यदुषाढैतस्यै दक्षिणतः सन्त्सर्व्वासामिष्टकानां दक्षिणतो भवति ॥ ६ ॥ यद्वेव कूर्म्ममुपदधाति । प्राणो वै कूर्म्मः प्राणो हीमाः सर्व्वाः प्रजाः करोति प्राणमेवैतदुदधाति तं पुरस्तात्प्रत्यञ्चमुपदधाति पुरस्तात्तत्प्रत्यञ्चं प्राणं दधाति तस्मात्पुरस्तात्प्रत्यङ् प्राणो धीयते पुरुषमभ्यावृत्तं यजमाने तत्प्राणं दधाति दक्षिणतोऽषाढायै प्राणो वै कूर्म्मो व्वागषाढा प्राणो वै व्वाचो व्वृषा प्राणो मिथुनम् ॥ ७ ॥ * 'अपां गम्भन्त्स्तीदे'ति † । एतद्धापां गम्भिष्ठं य्यत्रैष ऽएतत्तपति 'मा त्वा सूर्योऽभिताप्सीन्मा ग्निर्व्वैश्वानर' ऽइति मैव त्वा सूर्य्यो हिꣳसीन्मो ऽअग्निर्व्वैश्वानर ऽइत्येत'दुच्छिन्नपत्राः प्रजा ऽअनुवीक्षस्वे'तीमा वै सर्व्वाः प्रजा या ऽइमा ऽइष्टकास्ता ऽअरिष्टा ऽअनार्त्ता ऽअनुवीक्षस्वेत्येत'दनु त्वा दिव्या व्वृष्टिः सचताम्इ'ति यथैवैनं दिव्या व्वृष्टिरनुसचेतैवमेतदाह ॥ ८ ॥ अथैनमेजयति । 'त्रीन्त्समुद्रान्त्समस्तपस्त्वर्ग्गानि'

* अत्र शतम् ४२०० ।

† का० श्रौ० सू० १७. ५. १ ।

(१) शु० य० सं० अ० १३ क० ३० । (२) शु० य० सं० अ० १३ क० ३० । (३) शु० य० सं० अ० १३ क० ३० । (४) शु० य० सं० अ० १३ क० ३० । (५) शु० य० सं० अ० १३ क० ३१ ।

तीमे वै त्रयः समुद्राः स्वर्गा लोकास्तानेष कूर्मो भूत्वानुसः ससर्प्पा'पांपतिर्व्वृषभ ऽइष्टकानामि'त्यपाछ्ष ह्येष पतिर्व्वृषभ ऽइष्टकाना'म्पुरीषं वसानः सुकृतस्य लोक' ऽइति पशवो वै पुरीषं पशून्वसानः सुकृतस्य लोक ऽइत्येत'त्तत्र गच्छ यत्र पूर्वे परेता' ऽइति तत्र गच्छ यत्रैतेन पूर्वे कर्म्मणेयुरित्येतत् ॥ ९ ॥ 'मही द्यौः पृथिवी च न' ऽइति । महती द्यौः पृथिवी च न ऽइत्येत'दिमं यज्ञं मिमिक्षताम्ि'तीमं यज्ञमवताम्ित्येत'त्पिपृतां नो भरीमभिरि'ति विभृतां नो भरीमभिरित्येतद् द्यावापृथिव्ययोत्तमयोपदधाति द्यावापृथिव्यो हि कूर्मः ॥ १० ॥ त्रिभिरुपदधाति । त्रय ऽइमे लोका ऽअथो त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिभिरभ्यनक्ति तत्षट् तस्योक्तो बन्धुरवका ऽअधस्ताद्भवन्त्यवका ऽउपरिष्टादापो वा ऽअवका ऽअपामेवैनमेतन्मध्यतो दधाति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥११॥ अथोलूखलमुसले ऽउपदधाति*। विष्णुरकामयतान्नादः स्यामिति स ऽएत ऽइष्टके ऽअपश्यदुलूखलमुसले ते ऽउपाधत्त ते ऽउपधायान्नादोऽभवत्तथैवैतद्यजमानो यदुलूखलमुसले ऽउपदधाति येन रूपेण यत्कर्म्म कृत्वा विष्णुरन्नादोऽभवत्तेन रूपेण तत्कर्म्म कृत्वान्नादोऽसानीति तदेतत्सर्व्वमन्नं यदुलूखल-

(१) शु० य० सं० अ० १३ क० ३१। (२) शु० य० सं० अ० १३ क० ३१। (३) शु० य० सं० अ० १३ क० ३१। (४) शु० य० सं० अ० १३ क० ३२। (५) शु० य० सं० अ० १३ क० ३२। (६) शु० य० सं० अ० १३ क० ३२।

* का० श्रौ० सू० १७. ५. ३।

मुसले ऽउलूखलमुसलाभ्याꣳ ह्येवान्नं क्रियत ऽउलूखलमुसलाभ्यामद्यते ॥ १२ ॥ ते रेतःसिचोर्बिलयोपदधाति । पृष्ठ्यो वै रेतःसिचौ मद्ध्यमु पृष्ठ्यो मद्ध्यत ऽएवास्मिन्नेतदन्नं दधात्युत्तरे ऽउत्तरमेवास्मादेतदन्नं दधात्यरत्निमात्रेऽरत्निमात्राद्ध्यन्नमद्यते ॥ १३ ॥ प्रादेशमात्रे भवतः । प्रादेशमात्रो वै गर्भो विष्णुरन्नमेतदात्मसम्मितमेवास्मिन्नेतदन्नं दधाति यदु वा ऽआत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥ १४ ॥ औदुम्बरे भवतः । ऊर्ग्वै रस ऽउदुम्बर ऽऊर्जमेवास्मिन्नेतद्रसं दधात्यथो सर्व ऽएते वनस्पतयो यदुदुम्बर ऽएते ऽउपदधत्सर्वाꣳ्वनस्पतीनुपदधाति रेतःसिचोर्बिलयेमे वै रेतःसिचावनयोस्तद्वनस्पतीन्दधाति तस्मादनयोर्वनस्पतयश्चतुःस्त्रक्ति भवति चतस्रो वै दिशः सर्वासु तद्दिक्षु वनस्पतीन्दधाति तस्मात्सर्वासु दिक्षु वनस्पतयो मद्ध्ये सङ्गृहीतं भवत्युलूखलरूपतायै ॥ १५ ॥ यद्वेवोलूखलमुसले ऽउपदधाति । प्रजापतेर्बिस्रस्तात्प्राणो मद्ध्यत ऽउदचिक्रमिषत्तमन्नेनागृह्णात्तस्मात्प्राणोऽन्नेन गृहीतो यो ह्येवान्नमत्ति स प्राणिति ॥ १६ ॥ प्राणे गृहीते । अस्मादुन्नमुदचिक्रमिषत्तत्प्राणेनागृह्णात्तस्मात्प्राणेनान्नं गृहीतं ग्यो ह्येव प्राणिति सोऽन्नमत्ति ॥ १७ ॥ एतयोरुभयोर्गृहीतयोः । अस्मादूर्गुदचिक्रमिषत्तामेताभ्यामुभाभ्यामगृह्णात्तस्मादेताभ्यामुभाभ्यामूर्गृहीता यो ह्येवान्नमत्ति स प्राणिति तमूर्जयति ॥ १८ ॥ ऊर्जि गृहीतायाम् । अस्मादेते ऽउभे

ऽउदचिक्रमिषतां ते ऽऊर्जागृह्णात्तस्मादेते ऽउभे ऽऊर्जा गृहीते यꣳ ह्येवोर्ज्जयति स प्राणिति सोऽन्नमत्ति ॥ १९ ॥ ताꣳयेताꣳयꣳयोऽꣳयेन गृहीतानि । तान्यꣳयन्योऽन्येन गृहीत्वात्मन्प्रापादयत तदेतदन्नं प्रपद्यमानꣳ सर्वं देवा ऽअनुप्रापद्यन्तान्नजीवनꣳ हीदꣳ सर्वम् ॥ २० ॥ तदेष श्लोकोऽभ्युक्तः । तद्वै स प्राणोऽभवदिति तद्धि स प्राणोऽभवन्महा भूत्वा प्रजापतिरिति महान्हि स तदुभवद्यदेनमेते देवाः प्रापद्यन्त भुजो भुजिष्या वित्वेति प्राणा वै भुजोऽन्नं भुजिष्या ऽएतत्सर्वं वित्वेत्येतद्यत्प्राणान्प्राणयत्पुरीत्यात्मा वै पूर्यर्द्वै प्राणान्प्राणयत्तस्मात्प्राणा देवा ऽअथ यत्प्रजापतिः प्राणयत्तस्मादु प्रजापतिः प्राणो यो वै स प्राण ऽएषा सा गायत्र्यथ यत्तदन्नमेष स विष्णुर्देवताथ या सोग्गेष स ऽउदुम्बरः ॥ २१ ॥ सोऽब्रवीत् । अयं वावत्र मा सर्वस्मात्पाप्मन ऽउदभार्षीदिति यदब्रवीदुदभार्षीन्मेति तस्मादुदुम्भर ऽउदुम्भरो ह वै तमुदुम्बर ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवा ऽउरु मे करदिति तस्मादुरुकरमुरुकरꣳ ह वै तदुलूखलमित्याचक्षते परोक्षं परोक्षकामा हि देवाः सैषा सर्वेषां प्राणानां ऋयोनिर्ऋदुलूखलꣳ शिरो वै प्राणानां ऋयोनिः ॥ २२ ॥ तत्प्रादेशमात्रं भवति । प्रादेशमात्रमिव हि शिरश्चतुःस्रक्ति भवति चतुःस्रक्तीव हि शिरो मध्ये सङ्गृहीतं भवति मध्ये सङ्गृहीतमिव हि शिरः ॥ २३ ॥ तं ऋत्र देवाः समस्कुर्वन् । तदस्मिन्नेतत्सर्वं मह्यतोऽदधुः

प्राणमन्नमूर्ज्जं तथैवास्मिन्नयमेतद्दधाति रेतःसिचोर्व्वेलया पृष्ठ्यो वै रेतःसिचौ मद्ध्यमु पृष्ठ्यो मद्ध्यत ऽएवास्मिन्नेतत्सर्व्वं दधाति ॥ २४ ॥ 'विष्णोः[1] कर्म्माणि पश्यते'ति । वीर्य्यं वै कर्म्म विष्णोर्वीर्य्याणि पश्यतेत्येत'द्यतो व्रतानि[2] पस्पश' ऽइत्यन्नं वै व्रतं यतोऽन्नꣳ स्पाशयाञ्चक्र ऽइत्येत 'द्विन्द्रस्य[3] युज्यः सखे'तीन्द्रस्य ह्येष युज्यः सखा द्विदेवत्ययोपदधाति द्वे ह्युलूखलमुसले सकृत्सादयति समानं तत्करोति समानꣳ ह्येतदन्नमेव सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ २५ ॥ अथोखामुपदधाति * । योनिर्व्वाऽउखा योनिमेवैतदुपदधाति तामुलूखल ऽउपदधात्यन्तरिक्षं वा ऽउलूखलं यद्वै किञ्चास्या ऽऊर्द्ध्वमन्तरिक्षमेव तन्मद्ध्यं वा ऽअन्तरिक्षं मद्ध्यतस्तद्योनिं दधाति तस्मात्सर्व्वेषां भूतानां मद्ध्यतो योनिरपि वनस्पतीनाम् ॥ २६ ॥ यद्वेवोखामुपदधाति । यो वै स प्रजापतिर्व्व्यस्रꣳसतैषा सोखेमे वै लोका ऽउखेमे लोकाः प्रजापतिस्तामुलूखलऽउपदधाति तदेनमेतस्मिन्त्सर्व्वास्मिन्प्रतिष्ठापयति प्राणेऽन्नऽऊर्ज्यथो ऽएतस्मादेवैनमेतत्सर्व्वस्मादनन्तार्हितं दधाति ॥ २७ ॥ अथोपशयां पिष्ट्वा । लोकभाजमुखां कृत्वा पुरस्तादुखाया ऽउपनिवपत्येष हैतस्यै लोकस्तथो हास्यैषानन्तरिता भवति ॥ २८ ॥ तदाहुः । कथमस्यैषा पक्वा श्रृतोपहिता भवतीति यदेव यजुष्कृता तेनाथो यद्वै किञ्चै-

(१) शु० य० सं० अ० १३ क० ३३ । (२) शु० य० सं० अ० १३ क० ३३ । (३) शु० य० सं० अ० १३ क० ३३ ।

* का० श्रौ० सू० १७. ५. ४ ।

तमाग्निं वैश्वानरमुपनिगच्छति तत ऽएव तत्पक्वः श्रृतमुपहितं भवति ॥ २९ ॥ 'ध्रुवासि धरुणे'ति। तस्योक्तो बन्धुरितो 'जज्ञे प्रथममेब्भ्यो योनिब्भ्यो ऽअधि जातवेदा' ऽइत्त्येतेब्भ्यो हि योनिब्भ्यः प्रथमं जातवेदा ऽअजायत 'स गायत्र्या त्रिष्टुभानुष्टुभा च देवेब्भ्यो हव्यं वहतु प्रजानन्नित्त्येतैर्वा ऽएष छन्दोभिर्देवेब्भ्यो हव्यं वहति प्रजानन् ॥ ३० ॥ 'ईषे राये रमस्व। सहसे द्युम्नऽऊर्ज्जे ऽअपत्त्याये'त्त्येतस्मै सर्वस्मै रमस्वेत्ये'तत्सम्म्राडसि स्वराडसी'ति सम्म्राट् च ह्येष स्वराट् च 'सारस्वतौ त्वोत्सौ प्रावतामि'ति मनो वै सरस्वान्वाक्सरस्वत्येतौ सारस्वता ऽउत्सौ तौ त्वा प्रावतामित्येतद् द्वाब्भ्यामुपदधाति तस्योक्तो बन्धुरथो द्वयꣳ ह्येवैतद्रूपं मृच्चापश्च सादयित्वा सुदोहसाधिवदति तस्योक्तो बन्धुः ॥ ३१ ॥ * अथैनामभिजुहोति। एतद्वा ऽअस्यामेतत्पूर्वः रेतः सिक्तं भवति सिकतास्तदेतदभिकरोति तस्माद्योनौ रेतः सिक्तमभिक्रियत ऽआज्येन जुहोति स्रुवेण स्वाहाकारेण द्वाब्भ्यामाग्नेयीब्भ्यां गायत्रीब्भ्यां तस्योक्तो बन्धुः ॥३२॥ 'अग्ने युक्ष्वा हि ये तव। युक्ष्वा हि देवहूतमानि'ति युक्तवतीब्भ्यामिदमेवैतद्योनौ रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न निष्पद्यते ॥ ३३ ॥ स यदि संवत्सरभृतः

(१) शु० य० सं० अ० १३ क० ३४। (२) शु० य० सं० अ० १३ क० ३४। (३) शु० य० सं० अ० १३ क० ३४। (४) शु० य० सं० अ० १३ क० ३५। (५) शु० य० सं० अ० १३ क० ३५। (६) शु० य० सं० अ० १३ क० ३५।

* का० श्रौ० सू० १७. ५, ५।

(७) शु० य० सं० अ० १३ क० ३६, ३७।

स्यात् । अथाभिजुहुयात्सर्वं वै तद्यत्संवत्सरभृतः सर्वं तद्यदभिजुहोत्यथ यद्यसंवत्सरभृतः स्यादुपैव तिष्ठेतासर्वं वै तद्यदसंवत्सरभृतोऽसर्वं तद्यदुपतिष्ठतेऽभित्त्वेव जुहुयात् ॥ ३४ ॥ पशुरेष यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्यावाङ् प्राणः स्वयमातृण्णा श्रोणी द्वियजुः पृष्ट्यो रेतःसिचौ कीकसा विश्श्वज्योतिः ककुदमृतव्ये ग्रीवा ऽअषाढा शिरः कूर्म्मो ये कूर्म्मे प्राणा ये शीर्षन्प्राणास्ते ते ॥ ३५ ॥ तं वा ऽएतम् । इत ऽऊर्द्धं प्राञ्चं चिनोत्यसौ वा ऽआदित्य ऽएषोऽग्निरमुं तदादित्यमित ऽऊर्द्धं प्राञ्चं दधाति तस्मादसावादित्य ऽइत ऽऊर्द्धः प्राङ् धीयते ॥ ३६ ॥ अथैनं प्रसलव्यावर्त्तयति । अमुं तदादित्यं प्रसलव्यावर्त्तयति तस्मादसावादित्य ऽइमाँल्लोकान्प्रसलव्यनुपर्य्येति ॥ ३७ ॥ उदुरमुखा । योनिरुलूखलमुत्तरोखा भवत्यधरमुलूखलमुत्तरछ ह्युदुरमधरा योनिः शिश्नं मुसलं तद् वृत्तमिव भवति व्वृत्तमिव हि शिश्नं तद्दक्षिणत ऽउपदधाति दक्षिणतो वै व्वृषा योषामुपशेते यदु पशोः संस्कृतस्यान्नं तद्दूर्व्वेष्टका तस्य वा ऽएतस्योत्तरोऽर्द्ध ऽउदाहिततरो भवति पशुरेष यदग्निस्तस्मात्पशोः सुहितस्योत्तरः कुक्षिरुन्नततरो भवति ॥ ३८ ॥ (A)

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा– का० श० ९. ४. १; कठ० सं० ३. २. ३; कपि० सं० १६. १६ ३९. ३; मै० सं० ११. ७. १६; तै० सं० ४. २. ९ ।

[उखायां पशुशीर्षोपधानादि]

पशुशीर्षाण्यु॒पद॑धाति । पश॒वो वै पशुशीर्षा॒णि पशू॑ने॒-वैतदु॒पद॑धाति ता॒न्युख॒यामु॒पद॑धातीमे वै लोका॒ ऽउख॒ा पश॒वः॑ पशुशीर्षा॒ण्येषु॒ त॒ल्लोके॒षु पशू॒न्द॑धाति त॒स्मादि॒म॒-ऽए॒षु॒ लोके॒षु॒ पश॒वः॑ ॥ १ ॥ य॒द्वै॒वोख॒ायाम् । यो॒निर्वा॒-ऽउख॒ा पश॒वः॑ पशुशीर्षा॒णि यो॒नौ त॒त्पशू॒न्प्र॒तिष्ठा॑पयति त॒स्मादद्य॒माना॑ः पच्च्य॒माना॑ः पश॒वो न॒ क्षी॒य॒न्ते॒ यो॒नौ ह्येना॒न्प्रतिष्ठा॑पयति ॥ २ ॥ य॒द्वै॒व॒ पशुशीर्षा॒ण्युप॒द॑धाति । या वै ता॑ः श्रि॒य ऽए॒ता॒नि॒ ता॒नि पशुशीर्षा॒ण्य॒थ॒ यानि ता॒नि कु॒सिन्धा॒न्येतास्ता॑ः प॒ञ्च चि॒तय॒स्तद्यास्ता॑ः प॒ञ्च चि॒तय॒-ऽइमे ते॒ लोकास्तद्ये त॒ ऽइमे॒ लोका॒ ऽए॒षा सोखा॒ तद्य॒दु-ख॒ायां पशुशीर्षा॒ण्युप॒द॑धात्ये॒तैरे॒व॒ त॒च्छीर्ष॒भिरे॒ता॒नि॒ कु॒सि-न्धानि॒ स॒न्द॒धा॒ति॒ ॥ ३ ॥ ता॒न्पु॒र॒स्ता॒त्प्र॒ती॒च॒ ऽउ॒प॒द॒धा॒ति॒ । एतद्वै य॒त्रैता॒न्प्र॒जा॒पति॑ः पशू॒नालि॑प्सत त॒ ऽआलि॑प्स्य॒माना॒-ऽउ॒दचि॑क्रमिषँस्ता॒न्प्राणे॒षु॒ स॒म॒गृ॒ह्णा॒त्ता॒न्प्राणे॒षु॒ संगृ॒ह्य॒ पु॒र॒स्ता॒त्प्र॒ती॒च॒ ऽआ॒त्म॒न्न॒ध॒त्त॒ ॥ ४ ॥ तद्वा ऽए॒त॒त्क्रि॒यते॑ । य॒द्वै॒वा॒ ऽअ॒कुर्व॒न्निदं॒ न्वस्मा॑त्ते॒ पश॒वो नो॒च्चि॒क्रमि॑षन्ति य॒त्त्वे॒त॒त्क॒रो॒ति॒ य॒द्वै॒वा॒ ऽअ॒कुर्व॑स्त॒त्क॒र॒वा॒णी॒त्य॒थो॒ प्राणे॒ष्वे॒-वैनाने॒त॒त्त्संगृ॒ह्य॒ पु॒र॒स्ता॒त्प्र॒ती॒च॒ ऽआ॒त्म॒न्ध॒त्ते॒ ॥ ५ ॥ य॒द्वै॒व॒ पशुशीर्षा॒ण्युप॒द॑धाति । प्र॒जा॒पति॒र्वा ऽइ॒द॒मग्र॒ ऽआसी॒दे॒क॒-ऽए॒व॒ सोऽका॑मयता॒न्नः॒ सृ॒जेय॒ प्प्र॒जाये॒ये॒ति॒ स॒ प्राणे॒ब्भ्य॒-ऽए॒वा॒धि॒ पशू॒न्नि॒रमि॑मीत म॒नस॑ः पुरु॒षं च॒क्षुषो॒ऽश्वं॑ प्राणाद्गा॒ꣳ श्रोत्रा॒दविं॑ वा॒चोऽज॑ं त॒द्य॒देना॒न्प्राणे॒ब्भ्यो॒ऽधि॒-

निरमिमीत तस्माद्दाहुः प्राणाः पशव ऽइति मनो वै प्राणानां प्रथमं तद्यन्मनसः पुरुषं निरमिमीत तस्माद्दाहुः पुरुषः प्रथमः पशूनां वीर्य्यवत्तम ऽइति मनो वै सर्वे प्राणा मनसि हि सर्वे प्राणाः प्रतिष्ठितास्तद्यन्मनसः पुरुषं निरमिमीत तस्माद्दाहुः पुरुषः सर्वे पशव ऽइति पुरुषस्य ह्येवैते सर्वे भवन्ति ॥ ६ ॥ तदेतदन्नः सृष्ट्वा । पुरस्तात्प्रत्यगात्मन्नधत्त तस्माद्यः कश्चान्नः सृजते पुरस्तादेवैनत्प्रत्यगात्मन्धत्ते तद्वा ऽउखायामुदरं वा उखोदरे तदन्नं दधाति ॥ ७ ॥ अथैषु हिरण्यशकलान्प्रत्यस्यति । प्राणा वै हिरण्यमथ वा ऽएतेभ्यः पशुभ्यः संज्ञप्प्यमानेभ्य ऽएव प्राणा ऽउत्क्रामन्ति तद्यद्धिरण्यशकलान्प्रत्यस्यति प्राणानेवैष्वेतद्दधाति ॥ ८ ॥ सप्त प्रत्यस्यति । सप्त वै शीर्षन्प्राणास्तानस्मिन्नेतद्दधात्यथ यदि पञ्च पशवः स्युः पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्येत्पञ्च वा ऽएतान्पशूनुपदधाति सप्त-सप्त वा ऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दधाति ॥ ९ ॥ तद्धैकेऽपि । यद्येकः पशुर्भवति पञ्चैव कृत्वः सप्त-सप्त प्रत्यस्यन्ति पञ्च वा ऽएतान्पशूनुपदधाति सप्त-सप्त वा ऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दधम ऽइति न तथा कुर्य्यादेतस्मिन्वै पशौ सर्वेषां पशूनाꣳ रूपं तद्यदेतस्मिन्प्रत्यस्यति तदेवैषु सर्वेषु प्राणान्दधाति ॥ १० ॥ मुखे * प्रथमं प्रत्यस्यति । 'सम्म्यक्स्रवन्ति सरितो न धेना' ऽइत्यन्नं

* का० श्रौ० सू० १७. ५ ७ ।

(१) शु० य० सं० अ० १३ क० ३८ ।

वै धेनास्तदिदꣳ सम्म्यङ् मुखमभिसꣳस्तव[1]'त्यैन्तर्हृदा मनसा पूयमाना' ऽइत्यन्तर्वै हृदयेन मनसा सतान्नं पूतं स्य ऽऋजुस्तस्य 'घृतस्य[2] धारा ऽअभिचाकशीमी'ति या ऽएवैतस्मिन्नग्नावाहुतीर्होष्यन्भवति ता ऽएतदाह 'हिरण्ययो[3] वेतसो मध्ये ऽअग्नेरि'ति य ऽएवैष हिरण्मयः पुरुषस्तमेतदाह ॥ ११ ॥ * 'ऋचे त्वे[4]'तीह । प्राणो वा ऽऋक्प्राणेन ह्यर्च्चति 'रुचे त्वे[5]'तीह प्राणो वै रुक् प्राणेन हि रोचतेऽथो प्राणाय हीदꣳ सर्वꣳ रोचते 'भासे[6] त्वे'तीह 'ज्योतिषे[7] त्वे'तीह भास्वती हीमे ज्योतिष्मती चक्षुषी 'ऽर्अभूदिदं विश्श्वस्य भुवनस्य वाजिनमग्नेर्वैश्श्वानरस्य चे'ती-'हाग्निर्ज्योतिषा[8] ज्योतिष्मान्रुक्मो वर्च्चसा वर्च्चस्वानि'तीह विश्श्ववतीभ्यां विश्श्वꣳ हि श्रोत्रम् ॥ १२ ॥ [अर्धप्रपाठकः ५० ॥] अथ पुरुषशीर्षमुद्गृह्णाति । महयत्यैवैनदेत[9]'त्सꣳहस्रदा-ऽअसि सहस्राय त्वे'ति सर्वं वै सहस्रꣳ सर्वस्य दातासि सर्वस्मै त्वेत्येतत् ॥ १३ ॥ अथैनानुपदधाति । पुरुषं प्रथमं पुरुषं नद्रीरर्यो[10]णाप्त्वा दधाति मध्ये पुरुषमभित ऽइतरान्प-शून्पुरुषं तत्पशूनां मध्यतोऽत्तारं दधाति तस्मात्पुरुष ऽएव पशूनां मध्यतोऽत्ता ॥ १४ ॥ अश्वं[11] चाविं चोत्तरतः ।

(१) शु० य० सं० अ० १३ क० ३८ । (२) शु० य० सं० अ० १३ क० ३८ । (३) शु० य० सं० अ० १३. ३८ ।

* का० श्रौ० सू० १७. ५. ८ १४ ।

(४) शु० य० सं० अ० १३ क० ३९ । (५) शु० य० सं० अ० १३ क० ३९ । (६) शु० य० सं० अ० १३ क० ३९ । (७) शु० सं० अ० १३ क० ३९ । (८) शु० सं० अ० १३ क० ३९ ।

(९) शु० य० सं० अ० १३ क० ४० । (१०) शु० य० सं० अ० १३ क० ४० ।

† 'णात्या' इति 'क' पाठः । ‡ का० श्रौ० सू० १७. ५. १५,१६ ।

एतस्यां तद्दिश्श्येतौ पशू दधाति तस्मादेतस्यां दिश्श्येतौ पशू भूयिष्ठौ ॥ १५ ॥ गां चाजं च दक्षिणतः । एतस्यां तद्दिश्श्येतौ पशू दधाति तस्मादेतस्यां दिश्श्येतौ पशू भूयिष्ठौ ॥ १६ ॥ पयसि पुरुषमुपदधाति । पशवो वै पयो यजमानं तत्पशुषु प्रतिष्ठा*पय'स्यादित्यं गर्भं पयसा समङ्ग्धी'-त्यादित्यो वा ऽएष गर्भो यत्पुरुषस्तं पयसा समङ्ग्धी-त्येत'त्सहस्रस्य प्रतिमां विश्श्वरूपमि'ति पुरुषो वै सहस्रस्य प्रतिमा पुरुषस्य ह्येव सहस्रं भवति 'परिवृङ्ग्धि हरसा माभिमथ्स्था' ऽइति पर्य्येनं वृङ्क्ते'र्च्चिषा मैनꣳ हिꣳसीरित्येत'च्छतायुषं कृणुहि चीयमान' ऽइति पुरुषं तत्पशूनाꣳ शतायुं करोति तस्मात्पुरुष ऽएव पशूनाꣳ शतायुः ॥ १७ ॥ अथोत्तरतोऽश्श्वम् । 'वातस्य जूतिमि'ति वातस्य वा ऽएष जूतिर्य्यदुश्श्वो 'वरुणस्य नाभिमि'ति वारुणो ह्यश्श्वोऽश्श्वं जञ्जानꣳ सरिरस्य मद्ध्य' ऽइत्यापो वै सरिरमप्स्वुजा ऽउ वा ऽअश्श्वः 'शिꣳशुं नदीनाꣳ हरिमद्रि-बुध्नमि'ति गिरिर्वा ऽअद्रिर्गिरिबुध्ना ऽउ वा ऽआपो'ऽग्ने मां हिꣳसीः परमे व्व्योमन्नि'तीमे वै लोकाः परमं व्व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥ १८ ॥ अथ दक्षिणतो गाम् । 'अजस्रमिन्दुमरुषमि'ति सोमो वा

* का० श्रौ० सू० १७. ५ १७ ।

(१) शु० य० सं० अ० १३ क० ४१ । (२) शु० य० सं० अ० १३ क० ४१ । (३) शु० य० सं० अ० १३ क० ४१ । (४) शु० य० सं० अ० १३ क० ४१ । (५) शु० य० सं० अ० १३ क० ४२ । (६) शु० य० सं० अ० १३ क० ४३ । (७) शु० य० सं० अ० १३ क० ४२ । (८) शु० य० सं० अ० १३ क० ४२ । (९) शु० य० सं० अ० १३ क० ४२ । (१०) शु० य० सं० अ० १३ क० ४३ ।

ऽइन्दुः स हैष सोमोऽजस्रो यद्द्यौर्ब्भुरण्युमि'ति भर्त्तार-मित्येत'दग्निमीडे पूर्व्वचित्तिं नमोभिरि'त्याग्नेयो वै गौः पूर्व्वचित्तिमिति प्राञ्चꣳ ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्ति 'स पर्व्वभिर्ऋतुशः कल्पमान' ऽइति यद्वा ऽएष चीयते तदेष पर्व्वभिर्ऋतुशः कल्पते 'गां मा हिꣳसीरदिति विराजमि'ति विराड्वै गौरन्नं वै विराडन्नमु गौः ॥ १९ ॥ अथोत्तरतोऽविम् । 'वरूत्रीं त्वष्टुर्व्वरुणस्य नाभिमि'ति वारुणी च हि त्वाष्ट्री चावि'रविं जज्ञानाꣳ रजसः परस्म्मादि'ति श्रोत्रं वै परः रजो दिशो वै श्रोत्रं दिशः परः रजो 'महीꣳ साꣳहस्त्रीमसुरस्य मायामि'ति महतीꣳ साहस्त्रीमसुरस्य मायामित्येत'दग्ने मा हिꣳसीः परमे व्योमन्निती'मे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतत् ॥ २० ॥ अथ दक्षिणतोऽजम् । 'यो ऽअग्निरग्नेरध्यजायते'त्यग्निर्वा ऽएषोऽग्नेरध्यजायत 'शोकात्पृथिव्या ऽउत वा दिवस्परी'ति यद्वै प्रजापतेः शोकादुजायत तद्दिवश्च पृथिव्यै च शोकादजायत 'येन प्रजा विश्वकर्म्मा जजाने'ति वाग्वा ऽअजो वाचो वै प्रजा विश्वकर्म्मा जजान 'तमग्ने हेडः परि ते वृणक्त्व'ति यथैव यजुस्तथा

(१) शु० य० सं० अ० १३ क० ४३। (२) शु० य० सं० अ० १३ क० ४३। (३) शु० य० सं० अ० १३ क० ४३। (४) शु० य० सं० अ० १३ क० ४३। (५) शु० य० सं० अ० १३ क० ४४। (६) शु० य० सं० अ० १३ क० ४४। (७) शु० य० सं० अ० १३ क० ४४। (८) शु० य० सं० अ० १३ क० ४४। (९) शु० य० सं० अ० १३ क० ४५। (१०) शु० य० सं० अ० १३ क० ४५। (११) शु० य० सं० अ० १३ क० ४५। (१२) शु० य० सं० अ० १३ क० ४५।

बन्धुः ॥ २१ ॥ त ऽएते पशवः । तान्नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना ह्येते पशवः ॥ २२ ॥ अथ पुरुषशीर्षमभिजुहोति । आहुतिर्वै यज्ञः पुरुषं तत्पशूनां ष्यजियं करोति तस्मात्पुरुष ऽएव पशूनां ष्यजते ॥ २३ ॥ यद्वेवैनदभिजुहोति । शीर्षंस्तद्वीर्य्यं दधात्याज्येन जुहोति वज्रो वा ऽआज्यं वीर्य्यं वै वज्रो वीर्य्यमेवास्मिन्नेतद्दधाति स्रुवेण ष्वृषा वै स्रुवो वीर्य्यं वै ष्वृषा वीर्य्यमेवास्मिन्नेतद्दधाति स्वाहाकारेण ष्वृषा वै स्वाहाकारो वीर्य्यं वै ष्वृषा वीर्य्यमेवास्मिन्नेतद्दधाति त्रिष्टुभा वज्रो वै त्रिष्टुब्वीर्य्यं वै वज्रो वीर्य्यं त्रिष्टुब्वीर्य्येणैवास्मिन्नेतद्वीर्य्यं दधाति ॥ २४ ॥ स वा ऽअर्द्धर्चमनुद्रुत्य स्वाहाकरोति । अस्थि वा ऽऋगिदं तच्छीर्षकपालं विहाप्य यदिदमन्तरतः शीष्णो वीर्य्यं तदस्मिन्दधाति ॥ २५ ॥ अथोत्तरमर्द्धर्चमनुद्रुत्य * स्वाहाकरोति । इदं तच्छीर्षकपालꣳ सन्धाय यदिदमुपरिष्टाच्छीष्णो वीर्य्यं तदस्मिन्दधाति ॥ २६ ॥ 'चित्रं देवानामुदगादनीकमि'ति । असौ वा ऽआदित्य ऽएष पुरुषस्तदेतच्चित्रं देवानामुदेत्यनीकं 'चक्षुर्मित्रस्य वरुणस्याग्नेरि'त्युभयेषाꣳ हैतद्देवमनुष्याणां चक्षु'रा प्रा द्यावापृथिवी ऽअन्तरिक्षमि'त्युद्यन्वा ऽएष ऽइमाँल्लोकानापूरयति 'सूर्य्य ऽआत्मा जगतस्तस्थुषश्चे'त्येष ह्यस्य सर्वस्यात्मा यच्च जगद्यच्च तिष्ठति

* का० श्रौ० सू० १७. ५. १८ ।

(१) शु० य० सं० अ० १३ क० ४६ । (२) शु० य० सं० अ० १३ क० ४६ । (३) शु० य० सं० अ० १३ क० ४६ । (४) शु० य० सं० अ० १३ क० ४६ ।

॥ २७ ॥ अथोत्सर्गैरुपतिष्ठते । एतद्वै यत्रैतान्प्रजापतिः पशूनालिप्सत तु ऽआलिप्स्यमाना ऽअशोचँस्तेषामेतैरुत्सर्गैः शुचं पाप्मानमपाहँस्तथैवैषामयमेतदेतैरुत्सर्गैः शुचं पाप्मानमपहन्ति ॥ २८ ॥ तद्धैके । यं-यमेव पशुमुपदधति तस्य-तस्य शुचमुत्सृजन्ति नेच्छुचं पाप्मानमब्भ्युपदधामहा ऽइति ते ह ते शुचं पाप्मानमब्भ्युपदंधति याꣳ हि पूर्वस्य शुचमुत्सृजन्ति तामुत्तरेण सहोपदधति ॥ २९ ॥ विपरिक्राममु हैक ऽउपतिष्ठन्ते । ऊर्द्धाꣳ शुचमुत्सृजाम ऽइति ते ह ते शुचं पाप्मानमनूद्यन्त्यूर्द्धो ह्येतेन कर्म्मणैत्यूर्द्धामु शुचमुत्सृजन्ति ॥ ३० ॥ बाह्येनैवाग्निमुत्सृजेत् । इमे वै लोका ऽएषोऽग्निरेभ्यस्तल्लोकेभ्यो बहिर्द्धा शुचं दधाति बहिर्वेदीयं वै वेदिरस्यै तद्बहिर्द्धा शुचं दधात्युदङ् तिष्ठन्नेतस्याꣳ ह दिꣳश्येते पशवस्तद्यत्रैते पशवस्तदेवैष्वेतच्छुचं दधाति ॥ ३१ ॥ पुरुषस्य * प्रथममुत्सृजति । तद्ध हि प्रथममुपदधा'तीमम्मा हिꣳसीर्द्विपादं पशुमि'ति द्विपाद्वा ऽएष पशुर्य्यत्पुरुषस्तं मा हिꣳसीरित्येत'त्सहस्राक्षो मेधाय चीयमान' ऽइति हिरण्मयशकलैर्वा ऽएष सहस्राक्षो मेधायेत्यन्नायेत्येत'द्ध्मयुं[3]पशुम्मेधमग्ने जुषस्वे'ति किम्पुरुषो वै मयुः किम्पुरुषमग्ने जुषस्वेत्येत'त्ते[4]न चिन्वानस्तन्वो निषीदे'त्यात्मा वै तनू-

* का० श्रौ० सू० १७. ५. १९ ।

(१) शु० य० सं० अ० १३ क० ४७ । (२) शु० य० सं० अ० १३ क० ४७ । (३) शु० य० सं० अ० १३ क० ४७ । (४) शु० य० सं० अ० १३ क० ४७ ।

स्तेन चिन्वान ऽआत्मानः सँस्कुरुष्वेत्येत'न्मयुन्ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्वि'ति तन्मयौ च शुचं दधाति यं च द्वेष्टि तस्मिँमश्च ॥ ३२ ॥ अथाश्वस्य । 'इमं मा हिꣳसीरेकशफं पशुमि'त्येकशफो वा ऽएष पशुर्यदश्वस्तं मा हिꣳसीरित्येत'त्कनिक्रदं वाजिनं वाजिनेष्वि'ति कनिक्रदो वा ऽएष वाज्यु वाजिनेषु 'गौरमारण्यमनु ते दिशामी'ति तदस्मै गौरमारण्यमनुदिशति 'तेन चिन्वानस्तन्वो निषीदे'ति तेन चिन्वान ऽआत्मानः संस्कुरुष्वेत्येत'द्गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्वि'ति तद्गौरे च शुचं दधाति यं च द्वेष्टि तस्मिँमश्च ॥ ३३ ॥ अथ गोः । 'इमꣳ साहस्रꣳ शतधारमुत्समि'ति साहस्रो वा ऽएष शतधार ऽउत्सो यदु गौ'र्व्यर्च्यमानः सरिरस्य मध्य' ऽइतीमे वै लोकाः सरिरमुपजीव्यमानमेषु लोकेष्वित्येत'द्घृतं दुहानामदितिं जनाये'ति घृतं वा ऽएषादितिर्जनाय दुहे'ऽग्ने माँ हिꣳसीः परमे व्योमन्नि'तीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येतद् 'गवयमारण्यमनु ते दिशामी'ति तदस्मै गवयायारण्यमनुदिशति 'तेन चिन्वानस्तन्वो निषीदे'ति तेन चिन्वान ऽआत्मानः संस्कुरुष्वेत्येतद्-

(१) शु० य० सं० अ० १३ क० ४७। (२) शु० य० सं० अ० १३ क० ४८। (३) शु० य० सं० अ० १३ क० ४८। (४) शु० य० सं० अ० १३ क० ४८। (५) शु० य० सं० अ० १३ क० ४८। (६) शु० य० सं० अ० १३ क० ४८। (७) शु० य० सं० अ० १३ क० ४९। (८) शु० य० सं० अ० १३ क० ४९। (९) शु० य० सं० अ० १३ क० ४९। (१०) शु० य० सं० अ० १३ क० ४९। (११) शु० य० सं० अ० १३ क० ४९। (१२) शु० य० सं० अ० १३ क० ४९।

'गवयं[1] ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्वि'ति तद्गवये च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥ ३४ ॥ अथावेः । 'इमामूर्ण्यायुमि'त्यूर्ण्यावलमित्येत'द्रुरुणस्य[3] नाभि मि'ति वारुणो ह्यवि'स्त्वचं पशूनां द्विपदां चतुष्पदामि'त्युभयेषाꣳ हैष पशूनां त्वद्द्विपदां च चतुष्पदां च 'त्वष्टुः[4] प्रजानां प्रथमं जनित्रमि'त्येतद्ध त्वष्टा प्रथमः रूपं विचका'रा[5]ग्ने मा हिꣳसीः परमे व्योमन्नि'तीमे वै लोकाः परमं व्योमैषु लोकेष्वेनं मा हिꣳसीरित्येत-'दुष्ट्रमारण्यँयमनु ते दिशामी'ति तदस्मा ऽउष्ट्रमारण्य-मनुदिशति 'तेन चिन्वानर्स्तन्वो निषीदे'ति तेन चिन्वान-ऽआत्मानः संस्कुरुष्वेत्येत'दुष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्वि'ति तदुष्ट्रे च शुचं दधाति यं च द्वेष्टि तस्मिंश्च ॥ ३५ ॥ अथाजस्य । 'अजो ह्यग्नेरजनिष्ट शोकाद्धि'ति यद्वै प्रजापतेः शोकादजायत तदग्नेः शोका-दजायत 'सो ऽअपश्यज्जनितारमग्र' ऽइति प्रजापतिर्वै जनिता सोऽपश्यत्प्रजापतिमग्र ऽइत्येत'त्तेन देवा देवता-मग्रमायन्नि'ति वाग्वा ऽअजो वाचो वै देवा देवता-मग्रमायँस्तेन 'रोहमायन्नुप मेद्ध्यास' ऽइति स्वर्गो वै

(१) शु० य० सं० अ० १३ क० ४९। (२) शु० य० सं० अ० १३ क० ५०। (३) शु० य० सं० अ० १३ क० ५०। (४) शु० य० सं० अ० १३ क० ५०। (५) शु० य० सं० अ० १३ क० ५०। (६) शु० य० सं० अ० १३ क० ५०। (७) शु० य० सं० अ० १३ क० ५०। (८) शु० य० सं० अ० १३ क० ५०। (९) शु० य० सं० अ० १३ क० ५०। (१०) शु० य० सं० अ० १३ क० ५१। (११) शु० य० सं० अ० १३ क० ५१। (१२) शु० य० सं० अ० १३ क० ५१। (१३) शु० य० सं० अ० १३ क० ५१।

लोको रोहस्तेन स्वर्गं लोकमायन्नुप मेद्ध्यास ऽइत्येत'च्छर-[1]भमारण्यमनु ते दिशामी'ति तदस्मै शरभमारण्यमनु-दिशति 'तेन चिन्न्वा[2]नस्तन्न्वो निषीदे'ति तेन चिन्न्वान-ऽआत्मानꣳ संस्कुरुष्वेत्येत'च्छर[3]भं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छत्रि'ति तच्छरभे च शुचं दधाति यं च द्वेष्टि तस्मिँश्च ॥ ३६ ॥ तदाहुः । यां वै तत्प्रजापतिरेतेषां पशूनाꣳ शुचं पाप्मानमपाहँस्त ऽएते पञ्च पशवो-ऽभवँस्त ऽएत ऽउत्क्रान्तमेधा ऽअमेद्ध्या ऽअयज्ञियास्तेषां ब्राह्मणो नाश्नीयात्तानेतस्यां दिशि दधाति तस्मादेतस्यां दिशि पर्ज्जन्यो न वर्षुको यत्रैते भवन्ति ॥ ३७ ॥ प्रत्येत्याग्निमुपतिष्ठते * । एतद्वा ऽएतदुयथायथं करोति यदग्नौ सामिचिते बर्हिर्वेद्येति तस्मा ऽएवैतन्निह्नुते-ऽहिꣳसाया ऽआग्नेय्याग्नेय ऽएवैतन्निह्नुते गायत्र्या † गायत्रोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवास्मा-ऽएतन्निह्नुतेऽनिरुक्तया सर्व्वं वा ऽअनिरुक्तꣳ सर्व्वेणैवास्मा-ऽएतन्निह्नुते यविष्ठवत्त्यैतद्वास्य प्रियं धाम यद्यविष्ठ-ऽइति यद्वै जात ऽइदꣳ सर्वमयुवत तस्माद्यविष्ठः ॥ ३८ ॥ 'त्वं [4]यँविष्ठ दाशुष' ऽइति । यजमानो वै दाश्वा'न्नॄꣳ [5]पाँही'ति मनुष्या वै नरः 'श्रुधी गिर' ऽइति श्रुणु

(१) शु० य० सं० अ० १३ क० ५१ । (२) शु० य० सं० अ० १३ क० ५१ । (३) शु० य० सं० अ० १३ क० ५१ ।

* का० श्रौ० सू० १७. ६. १ ।

† 'गायत्र्यो' इति 'ग' पाठः ।

(४) शु० य० सं० अ० १३ क० ५२ । (५) शु० य० सं० अ० १३ क० ५२ । (६) शु० य० सं० अ० १३ क० ५२ ।

न ऽइमाꣳ स्तुतिमित्येत'द्रक्षो तोकमुतत्मने'ति प्रजा वै तोकꣳ रक्ष प्रजां चात्मानं चेत्येतत् ॥ ३९ ॥ आरुह्याग्निं जघनेन स्वयमातृण्णां परीत्यापस्या ऽउपदधाति । आप ऽएता यदपस्या ऽअथ वा ऽएतेभ्यः पशुभ्य ऽआप ऽउत्क्रान्ता भवन्ति तद्यदपस्या ऽउपदधात्येष्वेवैतत्पशुष्वपो दधात्यनन्तर्हिताः पशुभ्य ऽउपदधात्यनन्तर्हितास्तत्पशुभ्योऽपो दधाति पञ्च—पञ्चोपदधाति पञ्च ह्येते पशवः सर्वत ऽउपदधाति सर्वत ऽएवैष्वेतदपो दधाति ॥ ४० ॥ तद्याः पञ्चदश पूर्वाः । ता ऽअपस्या वज्रो वा ऽआपो वज्रः पञ्चदशस्तस्मादेनापो यन्त्यपैव तत्र पाप्मानं घ्नन्ति वज्रो हैव तस्यार्द्धस्य पाप्मानमपहन्ति तस्माद्वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदिति ॥ ४१ ॥ अथ याः पञ्चोत्तराः । ताश्छन्दस्याः पशवो वै छन्दाꣳस्यन्नं पशवोऽन्नमु पशोर्म्माꣳसमथ वा ऽएतेभ्यः पशुभ्यो माꣳसान्युत्क्रान्तानि भवन्ति तद्यच्छन्दस्या ऽउपदधात्येष्वेवैतत्पशुषु माꣳसानि दधात्यनन्तर्हिताः पशुभ्य ऽउपदधात्यनन्तर्हितानि तत्पशुभ्यो माꣳसानि दधात्यन्तरा ऽअपस्या भवन्ति बाह्याश्छन्दस्या ऽअन्तरा ह्यापो बाह्यानि माꣳसानि ॥ ४२ ॥ तदाहुः । यदिमा ऽआप ऽएतानि माꣳसान्यथ क्व त्वक् क्व लोमेत्यन्नं वाव पशोस्त्वगन्नं लोम तद्यच्छन्दस्या ऽउपदधाति सैव पशोस्त्वक्तल्लोमाथो

(१) शु० य० सं० अ० १३ क० ५२ ।

यान्यमून्युखायामजलोमानि तानि लोमानि बाह्योखा भवत्यन्तराणि पशुशीर्षाणि बाह्यानि हि लोमान्यन्तर-ऽआत्मा यद्वीतरेण यद्वीतरेणेति ह स्माह शाण्डिल्यः सर्वानेव वयं कृत्स्नाःपशून्त्सꣳस्कुर्म्म ऽइति ॥ ४३ ॥ यद्वेवापस्या ऽउपदधाति * । प्रजापतेर्व्विस्रस्तादाप ऽआयँस्तास्वितास्वविशद्यद्विशत्तस्माद्विष्ःशतिस्ता ऽअस्याङ्गुलिभ्योऽक्ष्यस्रवन्नन्तो वा ऽअङ्गुलयोऽन्तत ऽएवास्मात्ता-ऽआप ऽआयन् ॥ ४४ ॥ स यः स प्रजापतिर्व्वर्य्यस्रः सत । अयमेव स योऽयमग्निश्चीयतेऽथ या ऽअस्मात्ता-ऽआप ऽआयन्नेतास्ता ऽअपस्यास्तद्यदेता ऽउपदधाति या-ऽएवास्मात्ता ऽआप ऽआयँस्ता ऽअस्मिन्नेतत्प्रतिदधाति तस्मादेता ऽअत्रोपदधाति ॥ ४५ ॥ 'अपां त्वेमन्त्सादया-मी'ति । वायुर्वा ऽअपामेम यदा ह्येवैष ऽइतश्चेतश्च वात्यथापो यन्ति वायौ ताꣳ सादयति ॥ ४६ ॥ 'अपां त्वोष्मन्त्सादयामी'ति । ओषधयो वा ऽअपामोष्म यत्र ह्याप ऽउन्दन्त्यस्तिष्ठन्ति तदोषधयो जायन्त ऽओषधिषु ताꣳ सादयति ॥ ४७ ॥ 'अपां त्वा भस्मन्त्सादयामी'ति । अभ्रं वा ऽअपां भस्माभ्रे ताꣳ सादयति ॥ ४८ ॥ 'अपां त्वा ज्योतिषि सादयामी'ति । विद्युद्वा ऽअपां ज्योति-र्विद्युति ताꣳ सादयति ॥ ४९ ॥ 'अपां त्वायने सादया-

* का० श्रौ० सू० १७. ६. २ ।

(१) शु० य० सं० अ० १३ क० ५३ । (२) शु० य० सं० अ० १३ क० ५३ । (३) शु० य० सं० अ० १३ क० ५३ । (४) शु० य० सं० अ० १३ क० ५३ । (५) शु० य० सं० अ० १३ क० ५३ ।

मी'ति। इयं वा ऽअपामयनमस्याꣳ ह्यापो यन्त्यस्यां ताꣳ सादयति तद्या ऽअस्यैतेभ्यो रूपेभ्य ऽआप ऽआयँस्ता ऽअस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥५०॥ 'अर्ण्णवे[1] त्वा सदने सादयामी'ति। प्राणो वा ऽअर्ण्णवः प्राणे ताꣳ सादयति ॥ ५१ ॥ 'समुद्रे[2] त्वा सदने सादयामी'ति। मनो वै[3] समुद्रो मनसो वै[4] समुद्राद्वाचाऽभ्यूदेवास्त्रयीं विद्यां निरखनँस्तदेष श्लोको ऽभ्युक्तो[5] ये समुद्रान्निरखनन्देवास्तीक्ष्णाभिरब्भिरभिः सुदेवो ऽअद्य तद्विद्याद्यत्र[6] निर्व्वपणं दधुरिति मनः समुद्रो वाक्तीक्ष्णाब्भिरस्त्रयी विद्या निर्व्वपणमेतदेष श्लोको ऽभ्युक्तो मनसि ताꣳ सादयति ॥ ५२ ॥ 'सरिरे[7] त्वा सदने सादयामी'ति। वाग्वै सरिरं वाचि ताꣳ सादयति ॥ ५३ ॥ 'अँपां त्वा क्षये सादयामी'ति। चक्षुर्वा ऽअपां क्षयस्तत्र हि सर्व्वदैवापः क्षियन्ति चक्षुषि ताꣳ सादयति ॥ ५४ ॥ 'अँपां त्वा सधिषि सादयामी'ति। श्रोत्रं वा ऽअपाꣳ सधिः श्रोत्रे ताꣳ सादयति तद्या ऽअस्यैतेभ्यो रूपेभ्य ऽआप ऽआयँस्ता ऽअस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥ ५५ ॥ 'अँपां[8] त्वा सदने सादयामी'ति। द्यौर्वा ऽअपाꣳ सदनं दिवि ह्यापः सन्ना दिवि ताꣳ

(१) शु० य० सं० अ० १३ क० ५३। (२) शु० य० सं० अ० १३ क० ५३। (३) शु० य० सं० अ० १३ क० ५३। (४) शु० य० सं० अ० १३ क० ५३। (५) शु० य० सं० अ० १३ क० ५३। (६) शु० य० सं० अ० १३ क० ५३।

सादयति ॥ ५६ ॥ 'अपां त्वा सधस्थे सादयामीति। अन्तरिक्षं वा ऽअपाꣳ सधस्थमन्तरिक्षे ताꣳ सादयति ॥ ५७ ॥ 'अपां त्वा योनौ सादयामी'ति। समुद्रो वा ऽअपां स्योनिः समुद्रे ताꣳ सादयति ॥ ५८ ॥ 'अपां त्वा पुरीषे सादयामी'ति। सिकता वा ऽअपां पुरीषꣳ सिकतासु ताꣳ सादयति ॥ ५९ ॥ 'अपां त्वा पाथसि सादयामी'ति। अन्नं वा ऽअपां पाथोऽन्ने ताꣳ सादयति तद्या ऽअस्यै तेभ्यो रूपेभ्य ऽआप ऽआयँस्ता ऽअस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्येवास्मिन्नेतद्रूपाणि दधाति ॥ ६० ॥ 'गायत्रेण त्वा च्छन्दसा सादयामि। त्रैष्टुभेन त्वा च्छन्दसा सादयामि जागतेन त्वा च्छन्दसा सादयाम्यानुष्टुभेन त्वा च्छन्दसा सादयामि पाङ्क्तेन त्वा च्छन्दसा सादयामी'ति तद्या ऽअस्यैतेभ्यश्छन्दोभ्य ऽआप ऽआयँस्ता ऽअस्मिन्नेतत्प्रतिदधात्यथो ऽएतान्येवास्मिन्नेतच्छन्दाꣳसि दधाति ॥ ६१ ॥ ता ऽएता ऽअङ्गुलयः। ताः सर्वत ऽउपदधाति सर्वतो हीमा ऽअङ्गुलयो तेषूपदधात्यन्तेषु हीमा ऽअङ्गुलयश्चतुर्द्धोपदधाति चतुर्द्धा हीमा ऽअङ्गुलयः पञ्च-पञ्चोपदधाति पञ्च-पञ्च हीमा ऽअङ्गुलयो नानोपदधाति नाना हीमा ऽअङ्गुलयः

(१) शु० य० सं० अ० १३ क० ५३। (२) शु० य० सं० अ० १३ क० ५३। (३) शु० य० सं० अ० १३ क० ५३। (४) शु० य० सं० अ० १३ क० ५३। (५) शु० य० सं० अ० १३ क० ५३।


सकृत्सादयति समानं तत्करोति तस्मात्समानसम्बन्धनाः ॥ ६२ ॥ (B)

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या १०० ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

† हस्तिघटं नाम सप्तमं काण्डं समाप्तम् ॥ ७ ॥



(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १. ५. १–४; कठ० सं० १६. १६–१८; कपि० स० २५. ८, ९; मै० सं० ११. ७. १७, १८; तै० सं० ४. २. ९, ३. १ ।

† अस्मिन्काण्डे कण्डिकासंख्या ॥ ३९८ ॥

अथ चितिनामाष्टकं काण्डम्

अस्मिन् काण्डे प्रतिपाद्या विषयाः– प्राणभृत्संज्ञकेष्टकोपधानम्, आश्विनीष्टकोपधानादि, स्वयमातृण्णाद्युपधानम्, विश्वज्योतिर्ऋतव्याद्युपधानम्, स्तोमभागाद्युपधानम्, स्तोमचित्यर्थवादः, असपत्नाद्युपधानम्, ऋतव्याद्यर्थवादादि, इष्टकाप्रमाणम्, पुरीषनिवापादि, सुवर्णशकलसहस्रेण प्रोक्षणादिकं चेति ।

[प्राणभृत्संज्ञकेष्टकोपधानम्]

ॐ ॥ प्राणभृत ऽउपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः प्रथमायां चिता ऽउपदधाति पूर्वार्द्धे ऽएषोऽग्नेर्य्यत्प्रथमा चितिः पुरस्तात्तत्प्राणान्दधाति तस्मादिमे पुरस्तात्प्राणाः ॥ १ ॥ ता दश-दशोपदधाति । दश वै प्राणा यदु वा ऽअपि बहुकृत्वो दश–दश दशैव तत्पञ्चकृत्वो दश–दशोपदधाति पञ्च वा ऽएताःपशूनुपदधाति दश–दश वा ऽएकैकस्मिन्पशौ प्राणास्तदेषु सर्वेषु प्राणान्दधात्यनन्तर्हिताः पशुभ्य ऽउपदधात्यनन्तर्हिताँस्तत्पशुभ्यः प्राणान्दधाति सर्वत ऽउपदधाति सर्वत ऽएवैष्वेतत्प्राणान्दधाति ॥ २ ॥ यद्वेव प्राणभृत ऽउपदधाति । प्रजापतेर्बिस्रस्ताःप्राणाऽउदक्रामन्देवता भूत्वा तानब्रवीदुप मेत प्रति मऽएतद्धत्त येन मे यूयमुदक्रमिष्टेति स वै तदुन्नः सृजस्व यत्ते वयं पऽइयन्त ऽउपवसामेति ते वा ऽउभये

सृजामहा ऽइति तथेति ते प्राणाश्च प्रजापतिश्चै-तदुन्नमसृजन्तैताः प्राणभृतः ॥ ३ ॥ स * पुरस्तादुप-दधाति । 'अयं पुरो भुव' ऽइत्यग्निर्वै पुरस्तद्यत्तमाह पुर-ऽइति प्राञ्चꣳ ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्भुव-ऽइत्याहाग्निर्वै भुवोऽग्नेर्हीदꣳ सर्वं भवति प्राणो हाग्नि-र्भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥ ४ ॥ 'तस्य प्राणो भौवायन' ऽइति । प्राणं तस्माद्रूपादग्नेर्निरमिमीत 'वसन्तः प्राणायन' ऽइति वसन्तमृतुं प्राणान्निरमिमीत 'गायत्री वासन्ती'ति गायत्रीं छन्दो वसन्तादृतोर्निर-मिमीत 'गायत्र्यै गायत्रमि'ति गायत्र्यै च्छन्दसो गायत्रः साम निरमिमीत 'गायत्रादुपाꣳशुरि'ति गायत्रात्साम्न-ऽउपाꣳशुं ग्रहं निरमिमीतो 'पाꣳशोस्त्रिवृदि'त्युपाꣳशो-र्ग्रहात्त्रिवृतꣳ स्तोमं निरमिमीत 'त्रिवृतो रथन्तरमि'ति त्रिवृत स्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥ ५ ॥ 'वसिष्ठ-ऽऋषिरि'ति । प्राणो वै वसिष्ठ ऽ षिर्य्यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद्वस्तृतमो वसति तेनो ऽएव वसिष्ठः 'प्रजापतिगृहीतया त्वये'ति प्रजापतिसृष्टया त्वयेत्येत-'त्प्राणं गृह्णामि प्रजाभ्य' ऽइति प्राणं पुरस्तात्प्रा-

* का० श्रौ० सू० १७. ६ ३ ।

(१) शु० य० सं० अ० १३ क० ५४ । (२) शु० य० सं० अ० १३ क० ५४ । (३) शु० य० सं० अ० १३ क० ५४ । (४) शु० य० सं० अ० १३ क० ५४ । (५) शु० य० सं० अ० १३ क० ५४ । (६) शु० य० सं० अ० १३ क० ५४ । (७) शु० य० सं० अ० १३ क० ५४ । (८) शु० य० सं० अ० १३ क० ५४ । (९) शु० य० सं० अ० १३ क० ५४ । (१०) शु० य० सं० अ० १३ क० ५४ । (११) शु० य० सं० अ० १३ क० ५४ ।

पादयत नानोपदधाति ये नानाकामाः प्राणे ताँस्तद्दधाति सकृत्सादयत्येकं तत्प्राणं करोत्यथ यन्नाना सादुयेत्प्राणः ह व्रिच्छिन्द्यात्सैषा त्रिवृदुष्टका यजुः सादनः सूददोहास्तत्रिवृत्त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥ ६ ॥ अथ दक्षिणतः । 'अयं दक्षिणा विश्श्वकर्म्मे'त्ययं वै वायुर्विश्श्वकर्म्मा षोऽयं पवत एष हीदः सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणैव भूयिष्ठं वाति मनो ह वायुर्भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ ७ ॥ * 'तस्य मनो वैश्श्वकर्म्मणमि'ति । मनस्तस्माद्रूपाद्वायोर्न्निरमिमीत 'ग्रीष्मो मानस' ऽइति ग्रीष्ममृतुं मनसो निरमिमीत 'त्रिष्टुब्ग्रैष्मी'ति त्रिष्टुभं छन्दो ग्रीष्मादृतोर्न्निरमिमीत 'त्रिष्टुभः स्वारमि'ति त्रिष्टुभश्छन्दसः स्वारः साम निरमिमीत 'स्वारादन्तर्य्याम' ऽइति स्वारात्साम्नोऽन्तर्य्यामं ग्रहं निरमिमीता'न्तर्य्यामाँत्पञ्चदश' ऽइत्यन्तर्य्यामाद् ग्रहात्पञ्चदशꣳ स्तोमं निरमिमीत 'पञ्चदशाद् बृहदि'ति पञ्चदशात्स्तोमाद् बृहत्पृष्ठं निरमिमीत ॥ ८ ॥ 'भरद्वाज ऽऋषिरि'ति । मनो वै भरद्वाज ऽऋषिरन्नं वाजो यो वै मनो बिभर्त्ति सोऽन्नं

(१) शु० य० सं० अ० १३ क० ५५।

* अत्र शतम् ४३०० ॥

(२) शु० य० सं० अ० १३ क० ५५ (३) शु० य० सं० अ० १३ क० ५५। (४) शु० य० सं० अ० १३ क० ५५। (५) शु० य० सं० अ० १३ क० ५५। (६) शु० य० सं० अ० १३ क० ५५। (७) शु० य० सं० अ० १३ क० ५५। (८) शु० य० सं० अ० १३ क० ५५। (९) शु० य० सं० अ० १३ क० ५५।

व्राजं भरति तस्मान्मनो भरद्वाज ऽऋषिः 'प्रजापति-गृहीतया त्वये'ति प्रजापतिसृष्टया त्वयेत्येत'न्मनो गृह्णामि प्रजाभ्य' ऽइति मनो दक्षिणतः प्रापादयत नानोपदधाति ये नानाकामा मनसि ताँस्तद्दधाति सकृत्सादयत्येकं तन्मनः करोत्यथ यन्नाना सादयेन्मनो ह विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥ ९ ॥ (A)

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

अथ † पश्चात् । 'अयं पश्चाद्विश्वव्यचा' ऽइत्यसौ वा ऽआदित्यो विश्वव्यचा यदा ह्येवैष ऽउदेत्यथेदः सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति चक्षुर्हादित्यो भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधाति ॥ १ ॥ 'तस्य चक्षुर्वैश्वव्यचसमि'ति । चक्षुस्तस्माद्रूपादादित्यान्निरमिमीत 'वर्षाश्चाक्षुष्य' ऽइति वर्षा ऽऋतुं चक्षुषो निरमिमीत 'जगती वार्षी'ति जगतीं छन्दो वर्षाभ्य ऽऋतोर्निरमिमीत 'जगत्या ऽऋक्समभि'ति जगत्यै च्छन्दस ऽऋक्समः साम निरमिमीत'र्क्सामाच्छुक्र' ऽइत्यृक्समात्साम्नः शुक्रं

(१) शु० य० सं० अ० १३ क० ५५। (२) शु० य० सं० अ० १३ क० ५५।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा– का० श्रौ० १०. १. १, कठ० सं० १६. १९; कपि० सं० २५. ९; मै० सं० ११. ७. १९; तै० सं० ४. ३. २।

* का० श्रौ० सू० १७. ६. ४।

(३) शु० य० सं० अ० १३ क० ५६। (४) शु० य० सं० अ० १३ क० ५६। (५) शु० य० सं० अ० १३. ५६। (६) शु० य० सं० अ० १३ क० ५६। (७) शु० य० सं० अ० १३ क० ५६। (८) शु० य० सं० अ० १३ क० ५६।

ग्रहं निरमिमीत 'शुक्रात्सप्तदश' ऽइति शुक्राद् ग्रहात्सप्त-
दशꣳ स्तोमं निरमिमीत 'सप्तदशाद्वैरूपमि'ति सप्तदशा-
त्स्तोमाद्वैरूपं पृष्ठं निरमिमीत ॥ २ ॥ 'जमदग्निर्ऋषि-
रि'ति । चक्षुर्वै जमदग्निर्ऋषिर्य्यदेनेन जगत्पश्यत्यथो
मनुते तस्माच्चक्षुर्जमदग्निर्ऋषिः 'प्रजापतिगृहीतया
त्वये'ति प्रजापतिसृष्टया त्वयेत्येत'च्चक्षुर्गृह्णामि प्रजाभ्य'
ऽइति चक्षुः पश्चात्प्रापादयत * नानोपदधाति ये
नानाकामाश्चक्षुषि तांस्तद्दधाति सकृत्सादयत्येकं
तच्चक्षुः करोत्यथ यन्नाना सादयेच्चक्षुर्हं विच्छिन्द्यात्सैषा
त्रिवृदिष्टका तस्योक्तो बन्धुः ॥ ३ ॥ अथोत्तरतः ।
'इदमुत्तरात्स्वरि'ति दिशो वा ऽउत्तरात्तद्यत्ता ऽआहोत्तरा-
दित्युत्तरा ह्यस्मात्सर्वस्माद्दिशोऽथ यत्स्वरित्याह स्वर्गो
हि लोको दिशः श्रोत्रꣳ ह दिशो भूत्वोत्तरतस्तस्थौ
तदेव तद्रूपमुपदधाति ॥ ४ ॥ 'तस्यँ श्रोत्रꣳ सौवमि'ति ।
श्रोत्रं तस्माद्रूपाद्दिग्भ्यो निरमिमीत 'शरच्छौत्री'ति शर-
दमृतुꣳ श्रोत्रान्निरमिमी'तानुष्टुप्शारदी'त्यनुष्टुभं छन्दः
शरद ऽऋतोर्निरमिमीता'नुष्टुभ ऽऐडमि'त्यनुष्टुभश्छन्दस-
ऽऐडः साम निरमिमी'तैडोऽग्मन्थी'त्यैडात्साम्म्नो मन्थिनं
ग्रहं निरमिमीत 'मन्थिन ऽएकविꣳश' ऽइति मन्थिनो

(१) शु० य० सं० अ० १३ क० ५६। (२) शु० य० सं० अ० १३ क० ५६।
(३) शु० य० सं० अ० १३ क० ५६। (४) शु० य० सं० अ० १३ क० ५६।
(५) शु० य० सं० अ० १३ क० ५६। * 'यन्त' इति 'ख' पुस्तके।
(६) शु० य० सं० अ० १३ क० ५७। (७) शु० य० सं० अ० १३ क० ५७।
(८) शु० य० सं० अ० १३ क० ५७। (९) शु० य० सं० अ० १३ क० ५७।
(१०) शु० य० सं० अ० १३ क० ५७। (११) शु० य० सं० अ० १३ क० ५७।
(१२) शु० य० सं० अ० १३ क० ५७।

ग्रहादेकविꣳशꣳ स्तोमं निरमिमी'तैकविꣳशाद्वैराजमि'त्येकविꣳशात्स्तोमाद्वैराजं पृष्ठं निरमिमीत ॥ ५ ॥ 'विश्वामित्र ऽऋषिरि'ति । श्रोत्रं वै विश्वामित्र ऽऋषिर्यदेनेन सर्वतः शृणोत्यथो यदस्मै सर्वतो मित्रं * भवति तस्माच्छ्रोत्रं विश्वामित्र ऽऋषिः 'प्रजापतिगृहीतया त्वये'ति प्रजापतिसृष्टया त्वयेत्येत'च्छ्रोत्रं गृह्णामि प्रजाभ्य' ऽइति श्रोत्रमुत्तरतः प्रापादयत नानोपदधाति ये नानाकामाः श्रोत्रे तांस्तद्दधाति सकृत्सादयत्येकं तच्छ्रोत्रं करोत्यथ यन्नाना सादयेच्छ्रोत्रꣳ ह विच्छिन्द्यात्सैषा त्रिवृदुष्टका तस्योक्तो बन्धुः ॥ ६ ॥ अथ मद्ध्ये । 'इयमुपरि मतिरि'ति चन्द्रमा वा ऽउपरि तद्यत्तमाहोपरीत्युपरि हि चन्द्रमा ऽअथ यन्मतिरित्याह वाग्वै मतिर्वाचा हीदꣳ सर्वं मनुते वाग्घ चन्द्रमा भूत्वोपरिष्टात्तस्थौ तदेव तद्रूपमुपदधाति ॥ ७ ॥ 'तस्यै वाङ्मात्र्ये'ति । वाचं तस्माद्रूपाच्चन्द्रमसो निरमिमीत 'हेमन्तो वाँच्य' ऽइति हेमन्तमृतुं वाचो निरमिमीत 'पङ्क्तिर्हैमन्ती'ति पङ्क्तिं छन्दो हेमन्तादृतोर्निरमिमीत 'पङ्क्त्यै निधनवदि'ति पङ्क्त्यै च्छन्दसो निधनवत्साम निरमिमीत 'निधनवत्तं ऽआग्रयण' ऽइति निधनवतः साम्न ऽआग्रयणं ग्रहं निरमिमी'ता-

(१) शु० य० सं० अ० १३ क० ५७। (२) शु० य० सं० अ० १३ क० ५७।
* 'ते भवति' इति 'ख' पाठः ।
(३) शु० य० सं० अ० १३ क० ५७। (४) शु० य० सं० अ० १३ क० ५७।
(५) शु० य० सं० अ० १३ क० ५७। (६) शु० य० सं० अ० १३ क० ५८।
(७) शु० य० सं० अ० १३ क० ५८। (८) शु० य० सं० अ० १३ क० ५८।
(९) शु० य० सं० अ० १३ क० ५८। (१०) शु० य० सं० अ० १३ क० ५८।

ग्रयणात्त्रिणवत्रयस्त्रिꣳशावि[1]त्याग्रयणाद् ग्रहात्त्रिणवत्रे[2]-यस्त्रिꣳशौ स्तोमौ निरमिमीत त्रिणवत्रय'स्त्रिꣳशाभ्याꣳ शौ[3]क्कररैवते' ऽइति त्रिणवत्रयस्त्रिꣳशाभ्याꣳ स्तोमाभ्याꣳ शाक्कररैवते पृष्ठे निरमिमीत ॥ ८ ॥ 'विश्व[4]कर्म्म ऽऋषि-रि'ति । वाग्वै विश्वकर्म्मर्षिर्वाचा हीदꣳ सर्वं कृतं तस्मा-द्वाग्विश्वकर्म्मर्षिः 'प्र[5]जाप्पतिगृहीतया त्वये'ति प्रजापति-सृष्टया त्वयेत्येत'द्वाचं गृह्णामि प्रजाभ्य' ऽइति वाच-मुपरिष्टात्प्रापादयत नानोपदधाति ये नानाकामा वाचि ताँस्तद्दधाति सकृत्सादयत्येकां तद्वाचं करोत्यथ यन्नाना सादयेद्वाचꣳ ह विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥ ९ ॥ एतद्वै तदन्नम् । यत्तत्प्राणाश्च प्रजापति-श्चास्रजन्तैतावान्वै सर्वो यज्ञो-यज्ञ ऽउ देवानामन्नम् ॥ १० ॥ ता दश दशोपदधाति । दशाक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत-ऽउपदधाति सर्वत ऽएवास्मिन्नेतत्कृत्स्नमन्नं दधाति ता हैता विराज ऽएताꣳप्राणान्बिभ्रति यत्प्राणान्बिभ्रति तस्मात्प्राणभृतः ॥ ११ ॥ (B)

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

---

(१) शु० य० सं० अ० १३ क० ५८। (२) शु० य० सं० अ० १३ क० ५८। (३) शु० य० सं० अ० १३ क० ५८। (४) शु० य० सं० अ० १३ क० ५८। (५) शु० य० सं० अ० १३ क० ५८।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १० १. १; कठ० सं० १६. १९; कपि० २५. ९; मै० सं० ११. ७. १९; तै० सं ४. ३. २।

[प्राणभृच्छब्दनिर्वचनम्, तत्स्तुतिश्च]

तदाहुः। किं प्राणाः किं प्राणभृत इति प्राणा एव प्राणा अङ्गानि प्राणभृत्यङ्गानि हि प्राणान्बिभ्रति प्राणास्त्वेव प्राणा अन्नं प्राणभृदन्नं हि प्राणाञ्बिभर्त्ति ॥ १ ॥ तदाहुः। कथमस्यैताः सर्वाः प्राजापत्या भवन्तीति यदेव सर्वास्वाह प्रजापतिगृहीतया त्वयेत्येवमु हास्यैताः सर्वाः प्राजापत्या भवन्ति ॥ २ ॥ तदाहुः। यद् * ग्राहाय गृहीताय स्तुवतेऽथ शꣳसत्यथ कस्मात्पुरस्ताद् ग्रहाणामृचश्च सामानि चोपदधातीति सꣳस्था वै कर्म्मणोऽन्वीक्षितव्यर्च्चा वै प्रतिपदा ग्रहो गृह्यत ऋचि साम गीयते तदस्यैतद्यत्पुरस्ताद् ग्रहाणामृचश्च सामानि चोपदधात्यथ यदुपरिष्टाद् ग्रहाणाꣳ स्तुतशस्त्रे भवतस्तद्वस्यैतद्यदुपरिष्टाद् ग्रहाणाꣳ स्तोमाँश्च पृष्ठानि चोपदधाति ॥ ३ ॥ तदाहुः। यदेतत्त्रयः सह क्रियते ग्रहस्तोत्रः शस्त्रमथाग्रं चैव स्तोत्रं चोपदधाति कथमस्यात्रापि शस्त्रमुपहितं भवतीति यद्वाव स्तोत्रं तच्छस्त्रं यासु ह्येव स्तुवते ता उ एवानुशꣳसत्येवमु हास्यात्रापि शस्त्रमुपहितं भवति ॥ ४ ॥ तदाहुः। यद्यथा पितुः पुत्रमेवं त्रीणि प्रथमान्याहाथ कस्मादृक्सामयोः सङ्क्रामतीति साम वा ऋचः पतिस्तद्यत्तत्रापि यथा पितुः पुत्रमेव ब्रूयाद्यथा पतिः सन्तं पुत्रं ब्रूयात्तादृक्तत्तस्मादृक्सामयोः सङ्क्रामति कस्मादु त्रिः सन्तनोतीति पितरं

* 'प्रहाय' इति 'ग' पुस्तके।

पुत्रं पौत्रं ताँस्तत्सन्तनोति तस्मादु तेभ्य ऽएक ऽएव ददाति ॥ ५ ॥ तद्याः पुरस्तादुपदधाति । ताः प्राणभृतोऽथ याः पश्च्चात्ताश्च्चक्षुर्भृतस्ता ऽअपानभृतोऽथ या दक्षिणतस्ता मनोभृतस्ता ऽउ व्यानभृतोऽथ याऽउत्तरतस्ताः श्श्रोत्रभृतस्ता ऽउदानभृतोऽथ या मध्ये ता वाग्भृतस्ता ऽउ समानभृतः ॥ ६ ॥ तदु ह चरकाद्ध्वर्य्यवः । अन्या ऽएवापानभृतो व्यानभृत ऽउदानभृतः समानभृतश्च्चक्षुर्भृतो मनोभृतः श्श्रोत्रभृतो वाग्भृत ऽइत्युपदधति न तथा कुर्य्यादत्यहैव रेचयन्त्यत्रो ऽएवैतानि सर्वाणि रूपाण्युपधीयन्ते ॥ ७ ॥ स वै पुरस्तादुपधाय । पश्च्चादुपदधाति प्राणो हापानो भूत्वाङ्गुल्यग्रेभ्य ऽइति सञ्चरत्यपान ऽउ ह प्राणो भूत्वाङ्गुल्यग्रेभ्य ऽइति सञ्चरति तद्यत्पुरस्तादुपधाय पश्च्चादुपदधात्येतावेवैतत्प्राणौ सन्तनोति सन्दधाति तस्मादेतौ प्राणौ सन्ततौ सहितौ ॥८॥ अथ दक्षिणत ऽउपधाय । उत्तरत ऽउपदधाति व्यानो होदानो भूत्वाङ्गुल्यग्रेभ्य ऽइति सञ्चरत्युदान ऽउ ह व्यानो भूत्वाङ्गुल्यग्रेभ्य ऽइति सञ्चरति तद्यद्दक्षिणत ऽउपधायोत्तरत ऽउपदधात्येतावेवैतत्प्राणौ सन्तनोति सन्दधाति तस्मादेतौ प्राणौ सन्ततौ सहितौ ॥ ९ ॥ अथ या मध्य ऽउपदधाति । स प्राणस्ता रेतःसिचोर्व्रेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत ऽएवास्मिन्नेतत्प्राणं दधाति सर्वत ऽउपदधाति सर्वत ऽएवास्मिन्नेतत्प्राणं दधात्यथो ऽएवऽ हैष गुदः प्राणः

समन्तं नाभिं पर्य्यक्नोऽनूचीश्च तिरश्चीश्चोपदधाति तस्मादिमेऽन्वञ्चश्च तिर्य्यञ्चश्चात्मन्प्राणाः सꣳस्पृष्टाऽउपदधाति प्राणानेवैतत्सन्तनोति सन्दधाति तस्मादिमे प्राणाः सन्ततताः सꣳहिताः ॥ १० ॥ (C)

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[प्राणभृदिष्टकानिधानस्थानादि]

ता हैके पुरुषमुपाप्य्योपदधति । एष वै प्राणस्तमेता बिभ्रति यत्प्राणं बिभ्रति तस्मात्प्राणभृत ऽइति न तथा कुर्य्यादेषोऽहैव प्राणो य ऽएष हिरण्मयः पुरुषस्तस्य त्वयमात्मा यावदिदमभ्यय्यमग्निर्विहितस्तद्यद्धास्यैता ऽअङ्गं नाभिप्राप्नुयुः प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यदु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनाः परिश्रित्स्वेवोपाप्य्योपदध्यादथ या मध्य ऽउपदधाति ताभिरस्यैष ऽआत्मा पूर्णस्ता ऽउ ऽएवैतस्मादनन्तर्हिताः ॥ १ ॥ तदाहुः । यदयं पुरो भुवोऽयं दक्षिणा विश्वकर्म्मायं पञ्चाद्विश्वव्यचा ऽइदमुत्तरात्स्वरियमुपरि मतिरिति सम्प्रति दिशोऽभ्यनूच्यन्तेऽथ कस्मादेना ऽअक्षणयादेशेषूपदधातीति प्राणा वै प्राणभृतस्ता यत्सम्प्रति दिशऽउपदध्यात्प्रागपः हैवायं प्राणः सञ्चरेदथ यदेना ऽएवमभ्यनूक्ताः सतीरक्षणयादेशेषूपदधाति तस्मादयं प्रागपं प्राणः सन्नक्षणया सर्वाण्यङ्गानि सर्वमात्मानमनुसञ्चरति ॥ २ ॥ स ऽएष पशुर्य्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १०. २ १ ।

संस्कृतस्तस्य याः पुरस्तादुपदधाति तौ बाहू ऽअथ याः पश्चात्ते सक्थ्यावथ या मध्य ऽउपदधाति स ऽआत्मा ता रेतःसिचोर्व्रेलयोपदधाति पृष्ट्यो वै रेतःसिचौ मध्यमु पृष्ट्यो मध्यतो ह्ययमात्मा सर्वत ऽउपदधाति सर्वतो ह्ययमात्मा ॥ ३ ॥ तदाहुः । यत्पूर्वेषु गणेष्वेकैकꣳ स्तोममेकैकं पृष्ठमुपदधात्यथ कस्मादत्र द्वौ स्तोमौ द्वे पृष्ठे ऽउपदधातीत्यात्मा वा ऽअस्यैष ऽआत्मानं तदङ्गानां ज्येष्ठं वरिष्ठं वीर्य्यवत्तमं करोति तस्मादयमात्माङ्गानां ज्येष्ठो वरिष्ठो वीर्य्यवत्तमः ॥ ४ ॥ तदाहुः । कथमस्यैषोऽग्निः सर्वः कृत्स्न ऽइष्टकायामिष्टकायाꣳ संस्कृतो भवतीति मज्जा यजुरस्थीष्टका माꣳसꣳ सादनं त्वक्सूददोहा लोम पुरीषस्य यजुरन्नं पुरीषमेवमु हास्यैषोऽग्निः सर्वः कृत्स्न ऽइष्टकायामिष्टकायाꣳ संस्कृतो भवति ॥ ५ ॥ स ऽएष सार्वायुषोऽग्निः । स यो हैतमेवꣳ सार्वायुषमग्निं वेद सर्वꣳ हैवायुरेति ॥ ६ ॥ अथातः समञ्जनप्रसारणस्यैव । सञ्चितꣳ हैके समञ्जनप्रसारणेनेत्यभिमृशन्ति पशुरेष यदग्निर्य्यदा वै पशुरङ्गानि संचाञ्चति प्र च सारयत्यथ स तैर्वीर्य्यं करोति ॥ ७ ॥ [1]संवत्सरोऽसि । परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि । उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्द्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ संवत्सरस्ते कल्पताम् । प्रेत्या ऽएत्यै संचाञ्च प्र च

(१) शु० य० सं० अ० २७ क० ४५ ।

सारय । सुपर्ण्णचिदसि तया देवतयाङ्गिरस्वद् ध्रुवः सीदे'ति ॥ ८ ॥ अपि ह स्माह शाट्यायनिः । स्फोटतोर्ह्यैकः पक्षयोरुपशुश्रावैतेनाभिमृष्टस्य तस्मादेनमेतेनाब्भ्येव मृशेदिति ॥ ९ ॥ अथ ह स्माह स्वर्जिन्नाग्नजितः । नग्नजिद्वा गान्धारः प्राणो वै समञ्चनप्प्रसारणं य्यस्मिन्वा ऽअङ्गे प्राणो भवति तत्संचाञ्चति प्र च सारयति सञ्चितमेवैनं बहिष्टादब्भ्यन्यात्तदस्मिन्प्राणः समञ्चनप्प्रसारणं दधाति तथा संचाञ्चति प्र च सारयतीति तदुहैव समञ्चनप्प्रसारणं य्यत्स तदुवाच राजन्यबन्धुरिव त्वेव तदुवाच यन्नु शतङ्कृत्वोऽथो सहस्रं * बहिष्टादब्भ्येन्युर्न्न वै तस्मिँस्ते प्राणं दध्युर्य्यो वा ऽआत्मन्प्राणः स ऽएव प्राणस्तद्यत्प्राणभृत ऽउपदधाति तदस्मिन्प्राणः समञ्चनप्प्रसारणं दधाति तथा संचाञ्चति प्र च सारयत्यथ लोकम्पृणे ऽउपदधात्यस्याꣳ स्वक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥ १० ॥ (D)

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

[द्वितीयायां चितावश्विनीष्टकोपधानम्]

द्वितीयां चितिमुपदधाति । एतद्वै देवाः प्रथमां चितिं चित्त्वा समारोहन्नयं वै लोकः प्रथमा चितिरिममेव

* 'बहिष्टादभ्यन्युः' इति 'ग' पुस्तके ।

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रा० १० २. ३,४ ।

तल्लोकः संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन् । चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऽऊर्द्धमिच्छतेति ते चेतयमाना ऽएतां द्वितीयां चितिमपश्यन्यदूर्द्धं पृथिव्या ऽअर्वाचीनमन्तरिक्षात्तेषामेष लोकोऽद्रुव ऽइवाप्रतिष्ठित ऽइव मनस्यासीत् ॥ २ ॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्माणौ भिषजौ स्थो युवन्न ऽइमां द्वितीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति युवमेव नोऽस्या ऽअग्निचित्याया ऽअद्ध्वर्यू भविष्यथ ऽइति तथेति तेभ्य ऽएतामश्विनौ द्वितीयां चितिमुपाधत्तां तस्मादाहुरश्विनावेव देवानामद्ध्वर्यू ऽइति ॥ ३ ॥ स ऽउपदधाति । 'ध्रुवक्षिति'र्द्ध्रुवयोनिर्द्ध्रुवासी'ति यद्वै स्थिरं ध्यत्प्रतिष्ठितं तद्ध्रुवमथ वा ऽएषामेष लोकोऽद्रुव इवाप्रतिष्ठित ऽइव मनस्यासीत्तमेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्तां 'ध्रुवं ध्योनिमासीद साधुये'ति स्थिरं ध्योनिमासीद साधुयेत्येत'द्दुर्ध्यस्य केतुं प्रथमं जुषाणे'त्ययं वा ऽअग्निरुर्ध्यस्तस्यैष प्रथमः केतुर्ध्यत्प्रथमा चितिस्तं जुषाणेत्येत'द्दश्विनाद्ध्वर्यू सादयतामिह त्वे'त्यश्विनौ ह्यद्ध्वर्यू ऽउपाधत्ताम् ॥ ४ ॥ 'कुलायिनी घृतवती पुरन्धिरि'ति । कुलायमिव वै द्वितीया चितिः 'स्योने सीद सदने पृथिव्या' ऽइति पृथिवी वै प्रथमा चितिस्तस्यै शिवे स्योने सीद सदन ऽइत्येत'द्भि

(१) शु० य० सं० अ० २७ क० ४५ । (२) शु० य० सं० अ० १४ क० १ । (३) शु० य० सं० अ० १४ क० १ । (४) शु० य० सं० अ० १४ क० १ । (५) शु० य० सं० अ० १४ क० २ । (६) शु० य० सं० अ० १४ क० २ ।

त्वा रुद्रा वसवो गृणन्त्विति त्वा देवता ऽअभिगृणन्त्वित्येतदिमा ब्रह्म पीपिहि सौभगाय इतीमा ब्रह्मावसौभगाय इत्येतद्दश्श्विनाद्ध्वर्य्यू सादयतामिह त्वेत्यश्श्विनौ ह्यद्ध्वर्य्यू ऽउपाधत्ताम् ॥ ५ ॥ 'स्वैर्दक्षैर्दक्षपितेह सीदेति । स्वेन वीर्य्येणेह सीदेत्ये'तद्देवानाꣳ सुम्ने बृहते रणाय इति देवानाꣳ सुम्नाय महते रणाय इत्येत'त्पितेवैधि सूनव ऽआ सुशेव इति यथा पिता पुत्राय स्योनः सुशेव ऽएवꣳ सुशेवैधीत्येत'त्स्वावेशाँ तन्वा संविशस्वेत्यात्मा वै तनूः स्वावेशेनात्मना संविशस्वेत्येत'द्दश्श्विनाद्ध्वर्य्यू सादयतामिह त्वेत्याश्श्विनौ ह्यद्ध्वर्य्यू ऽउपाधत्ताम् ॥ ६ ॥ 'पृथिव्याः पुरीषमसी'ति । पृथिवी वै प्रथमा चितिस्तस्या ऽएतत्पुरीषमिव यद् द्वितीया'प्सोनाꣳमे'ति रसो नामेत्येत'त्त्वा विश्श्वे ऽअभिगृणन्तु देवा' ऽइति त्वा सर्वेऽभिगृणन्तु देवा ऽइत्येत'त्स्तोमपृष्ठा घृतवतीह सीदेति यान्स्तोमानस्यां तप्स्यमानो भवति तैरेषा स्तोमपृष्ठा 'प्रजावदस्मे द्रविणायजस्वेति प्रजावदस्मे द्रविणमायजस्वेत्येत'द्दश्श्विनाद्ध्वर्य्यू सादयतामिह त्वेत्यश्श्विनौ ह्यद्ध्वर्य्यू ऽउपाधत्ताम् ॥ ७ ॥ ता ऽएता दिशः । ता रेतः-

(१) शु० य० सं० अ० १४ क० २। (२) शु० य० सं० अ० १४ क० २। (३) शु० य० सं० अ० १४ क० २। (४) शु० य० सं० अ० १४ क० ३। (५) शु० य० सं० अ० १४ क० ३। (६) शु० य० सं० अ० १४ क० ३। (७) शु० य० सं० अ० १४ क० ३। (८) शु० य० सं० अ० १४ क० ३। (९) शु० य० सं० अ० १४ क० ४। (१०) शु० य० सं० अ० १४ क० ४। (११) शु० य० सं० अ० १४ क० ४। (१२) शु० य० सं० अ० १४ क० ४। (१३) शु० य० सं० अ० १४ क० ४। (१४) शु० य० सं० अ० १४ क० ५।

सिचोर्व्वेलयोपदधातीमे वै रेतःसिचावनयोस्तद्दिशो दधाति तस्मादनयोर्द्दिशः सर्व्वत ऽउपदधाति सर्व्वतस्तद्दिशो दधाति तस्मात्सर्व्वतो दिशः सर्व्वतः समीचीः सर्व्वतस्तत्समीचीर्द्दिशो दधाति तस्मात्सर्व्वतः समीच्च्यो दिशस्ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हि दिशः ॥ ८ ॥ अथ पञ्चमीं दिश्यामुपदधाति । ऊर्द्ध्वा ह सा दिक्सा या सोर्द्ध्वा दिगसौ स ऽआदित्योऽमुमेवैतदादित्यमुपदधाति तामन्तरेण दक्षिणां दिश्यामुपदधात्यमुं तदादित्यमन्तरेण दक्षिणां दिशं दधाति तस्मादेषोऽन्तरेण दक्षिणां दिशमेति ॥ ९ ॥ 'अदित्यास्त्वा पृष्ठे सादयामी'ति । इयं वा ऽअदितिरस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापय'[1]त्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानामि'[2]त्यन्तरिक्षस्य ह्येष धर्त्ता विष्टम्भनो दिशामधिपतिर्भुवनाना'[3]मूर्म्मिर्द्रप्सो ऽअपामसी'[4]ति रसो वा ऽऊर्म्मि'[5]र्विश्वकर्म्मा त ऽऋषिरि'ति प्रजापतिर्वै विश्वकर्म्मा प्रजापतिस्त्वष्टासीत्येत'दश्विनाद्ध्वर्य्यू सादयतामिह त्वे'त्यश्विनौ ह्यद्ध्वर्य्यू ऽउपाधत्ताम् ॥ १० ॥ यद्वेवैता ऽआश्विनीरुपदधाति । प्रजापतिं विस्रस्तं देवता ऽआदाय व्युदक्रामँस्तस्य यदूर्द्ध्वं प्रतिष्ठाया ऽअवाचीनं मध्यात्तदस्याश्विनावादायोत्क्रम्यातिष्ठताम् ॥ ११ ॥ तावब्रवीत् । उप

(१) शु० य० सं० अ० १४ क० ४। (२) शु० य० सं०अ० १४ क० ५। (३) शु० य० सं० अ० १४ क० ५। (४) शु० य० सं० अ० १४ क० ५। (५) शु० य० सं० अ० १४ क० ५।

मेतं प्रति म ऽएतद्धत्तं येन मे युवमुद्क्रमिष्टमिति किं नौ ततो भविष्यतीति युवद्देवत्यमेव म ऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतदग्निचिनौ प्रत्यधत्ताम् ॥ १२ ॥ तद्या ऽएताः पञ्चाग्निचित्त्र्यः । एतदस्य तदात्मनस्तद्यदेता ऽअत्रोपदधाति यदेवास्यैता ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता ऽअत्रोपदधाति ॥ १३ ॥ 'ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासी'ति । यद्वै स्थिरं स्यत्प्रतिष्ठितं तद् ध्रुवमथ वा ऽअस्यैतदस्थिरमिवाध्रुवमिवात्मन ऽआसीत्तदेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्ताम् ॥ १४ ॥ 'कुलायिनी घृतवती पुरन्धिरि'ति । कुलायमिव वा ऽअस्यैतदात्मनः 'स्वैर्दक्षैर्दक्षपितेह सीदे'त्यदक्षयतामेवास्यैतदात्मनः 'पृथिव्याः पुरीषमसी'ति पुरीषसदःहितमिव वा ऽअस्यैतदात्मनो रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ पृष्टिसाचयमिव वा ऽअस्यैतदात्मनः सर्वत ऽउपदधाति सर्वतो ह्यस्यैतदग्निनावात्मनः प्रत्यधत्ताम् ॥ १५ ॥ अथर्तव्ये ऽउपदधाति * । ऋतव ऽएते यदृतव्ये ऽऋतूनेवैतदुपदधाति 'शुक्रश्च शुचिश्च ग्रैष्मावृतू' ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने ऽएतदुपदधाति द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥१६॥ तद्यदेते ऽअत्रोपदधाति । संवत्सर ऽएषोऽग्नि-

(१) शु० य० सं० अ० १४ क० ५। (२) शु० य० सं० अ० १४ क० ५। (३) शु० य० सं० अ० १४ क० ५। (४) शु० य० सं० अ० १४ क० ५।


* का० श्रौ० सू० १७. ८. १६।

(५) शु० य० सं० अ० १४ क० ६।

रिम ऽउ लोकाः संवत्सरस्तस्य यदूर्द्धं पृथिव्या ऽअर्वाचीनमन्तरिक्षात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ १७ ॥ यद्वैवैते ऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर ऽउ प्रजापतिस्तस्य यदूर्द्धं प्रतिष्ठाया ऽअवाचीनं मध्यात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ १८ ॥

[अर्धप्रपाठकः ॥५७॥]

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥ (A)



[द्वितीयस्यां चितौ वैश्वदेवीष्टकोपधानम्]

अथ वैश्वदेवीरुपदधाति । एषा वै सा द्वितीया चितिर्यामेव्यस्तदश्विना ऽउपाधत्तां तामुपधायेदः सर्वमभवतां य्यदिदं किञ्च ॥ १ ॥ ते देवा ऽअब्रुवन् । अश्विनौ वा ऽइदः सर्वमभूतामुप तज्जानीत यथा वयमिहाप्यसामेति तेऽब्रुवँश्चेतयद्ध्वमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथा वयमिहाप्यसामेति ते चेतयमाना ऽएता ऽइष्टका ऽअपश्यन्वैश्वदेवीः ॥ २ ॥ तेऽब्रुवन् । अश्विनौ वा ऽइदः सर्वमभूतामश्विभ्यामेवा-

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. २. १; कठ० १७. १, १०; कपि० २५. १०, ९; मै० सं० ११. ८. १, १२; तै० सं० ४. ३. ४, १ ।

श्विनोश्चितिमनूपदधामहा ऽइति तेऽश्विभ्यामेवाश्विनोश्चितिमनूपादधत तस्मादेतामाश्विनी चितिरित्याचक्षते तस्माद्यथैव पूर्वासामुदर्कं ऽएवमेतासामश्विभ्याꣳ ह्येवाश्विनोश्चितिमनूपादधत ॥३॥ यद्वेव वैश्वदेवीरुपदधाति। ये वै ते द्वितीये देवा ऽएतां द्वितीयां चितिमपश्यन्ये त ऽएतेन रसेनोपायँस्त ऽएते तानेवैतदुपदधाति ता ऽएताः सर्वाः प्रजास्ता रेतःसिचोर्व्वेलयोपदधातीमे वै रेतःसिचावनयोस्तत्प्रजा दधाति तस्मादनयोः प्रजाः सर्वत ऽउपदधाति सर्वतस्तत्प्रजा दधाति तस्मात्सर्वतः प्रजा दिश्या ऽअनूपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु प्रजाः ॥ ४ ॥ यद्वेव * वैश्वदेवीरुपदधाति। प्रजापतेर्व्विस्रस्तात्सर्वाः प्रजा मद्ध्यत ऽउदक्रामन्नेतस्या ऽअधि योनेस्ता ऽएनमेतस्मिन्नात्मनः प्रतिहिते प्रापद्यन्त ॥ ५ ॥ स यः स प्रजापतिर्व्व्यस्रंसत। अयमेव स योऽयमग्निश्चीयतेऽथ या ऽअस्मात्ताः प्रजा मद्ध्यत ऽउदक्रामन्नेतास्ता वैश्वदेव्य ऽइष्टकास्तद्यदेता ऽउपदधाति या ऽएवास्मात्ताः प्रजा मद्ध्यत ऽउदक्रामँस्ता ऽअस्मिन्नेतत्प्रपादयति रेतःसिचोर्व्वेलया पृष्ट्यो वै रेतःसिचौ मद्ध्यमु पृष्ट्यो मद्ध्यत ऽएवास्मिन्नेताः प्रजाः प्रपादयति सर्वत ऽउपदधाति सर्वत ऽएवास्मिन्नेताः प्रजाः प्रपादयति ॥ ६ ॥ यद्वेव वैश्वदेवीरुपदधाति। एतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रति-

* का० श्रौ० सू० १७. ८. १८।

हितेऽकामयत प्रजाः सृजेय प्रजायेयेति स ऽऋतुभिरद्भिः प्राणैः संवत्सरेणाश्विवभ्याꣳ सयुग्भूत्वैताः प्रजाः प्राजनयत्तथैवैतद्यजमान ऽएताभिर्देवताभिः सयुग्भूत्वैताः प्रजाः प्रजनयति तस्मादु सर्वास्वेव सजूः-सजूरित्यनुवर्त्तते ॥ ७ ॥ 'सजूर्ऋतुभिरि'ति । तदृतून्प्राजनयदृतुभिर्वै सयुग्भूत्वा प्राजनय'त्सजूर्विधाभिरि'त्यापो वै विधा ऽअद्भिर्हीदꣳ सर्वं विहितमद्भिर्वै सयुग्भूत्वा प्राजनय'त्सजूर्देवैरि'ति तद्देवान्प्राजनयद्यद्देवा ऽइत्याचक्षते 'सजूर्देवैर्वयोनाधैरि'ति प्राणा वै देवा वयोनाधाः प्राणैर्हीदꣳ सर्वं वयुनं नद्धमथो च्छन्दाꣳसि वै देवा वयोनाधाश्छन्दोभिर्हीदꣳ सर्वं वयुनं नद्धं प्राणैर्वै सयुग्भूत्वा प्राजनय'दग्नये त्वा वैश्वानरायेति संवत्सरो वा ऽअग्निर्वैश्वानरः संवत्सरेण वै सयुग्भूत्वा प्राजनय'दश्विवनाद्ध्वर्यू सादयतामिह त्वे'त्यश्विवभ्यां वै सयुग्भूत्वा प्राजनयत् ॥ ८ ॥ 'सजूर्वसुभिरिति' । दक्षिणतः तद्वसून्प्राजनय'त्सजूरुद्रैरि'ति पश्चात्तद्रुद्रान्प्राजनय'त्सजूरादित्यैरि'त्युत्तरतस्तदादित्यान्प्राजनय'त्सजूर्विश्वैर्देवैरि'त्युपरिष्टात्तद्विश्वान्देवान्प्राजनयत्ता वै समानप्रभृतयः समानोदर्का नाना मद्ध्यतस्ता यत्समानप्रभृतयः समा-

(१) शु० य० सं० अ० १४ क० ७। (२) शु० य० सं० अ० १४ क० ७।
(३) शु० य० सं० अ० १४ क० ७। (४) शु० य० सं० अ० १४ क० ७।
(५) शु० य० सं० अ० १४ क० ७। (६) शु० य० सं० अ० १४ क० ७।
(७) शु० य० सं० अ० १४ क० ७। (८) शु० य० सं० अ० १४ क० ७।
(९) शु० य० सं० अ० १४ क० ७। (१०) शु० य० सं० अ० १४ क० ७।

नोदर्कः समानीभिर्हि देवताभिः पुरस्ताच्चोपरिष्टाच्च सयुग्भूत्वा प्राजनयदुथ यन्नाना मद्ध्यतोऽन्या ऽअन्या हि प्रजा मद्ध्यतः प्राजनयत् ॥ ९ ॥ (B)

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[द्वितीयस्यां चितौ प्राणभृदपस्या-छन्दस्या-वयस्येष्टकोपधानम्]

अथ * प्राणभृत ऽउपदधाति । एतद्वै देवा ऽअब्रुवँश्चेतयद्ध्वमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमाना वायुमेव चितिमपश्यँस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १ ॥ प्राणभृत ऽउपदधाति । प्राणो वै वायुर्वायुमेवास्मिन्नेतद्दधाति रेतःसिचोर्वृलयेमे वै रेतःसिचावनयोस्तद्वायुं दधाति तस्मादनयोर्वायुः सर्वत ऽउपदधाति सर्वतस्तद्वायुं दधाति तस्मात्सर्वतो वायुः सर्वतः समीचीः सर्वतस्तत्सम्यञ्चं वायुं दधाति तस्मात्सर्वतः सम्यङ् भूत्वा सर्वाभ्यो दिग्भ्यो वाति दिश्या ऽअनूपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥ २ ॥ यद्वेव प्राणभृत ऽउपदधाति । आस्त्वेवैतत्प्रजासु प्राणान्दधाति ता ऽअनन्तार्हिता वैश्वदेवीभ्य ऽउपदधात्यनन्तार्हितास्तत्प्रजाभ्यः प्राणान्दधाति 'प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म्म ऽउर्व्या विभाहि श्रोत्रं मे श्लोक-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. २. २, कठ० १७. १; कपि० २५. १; मै० सं० ११. ८. १; तै० सं० ४. ३. ४।

* का० श्रौ० सू० १७. ८. २०।

(१) शु० य० सं० अ० १४ क० ८।

ये'त्येतानेवास्वेतत्क्लृप्तान्प्राणान्दधाति ॥ ३ ॥ अथापस्या-ऽउपदधाति । एतद्वै देवा ऽअब्रुवँश्चेतयद्ध्वमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमाना व्वृष्टिमेव चितिमपश्यँस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ ४ ॥ अपस्या † ऽउपदधाति । आपो वै व्वृष्टिर्व्वृष्टिमेवास्मिन्नेतद्दधाति रेतःसिचोर्व्वेलयेमे वै रेतःसिचावनयोस्तद्वृष्टिं दधाति तस्मादनयोर्वर्षति सर्व्वत ऽउपदधाति सर्व्वतस्तद्वृष्टिं दधाति तस्मात्सर्व्वतो वर्षति सर्व्वतः समीचीः सर्व्वतस्तत्समीचीं व्वृष्टिं दधाति तस्मात्सर्व्वतः सम्यङ् भूत्वा सर्व्वाभ्यो दिग्भ्यो वर्षति वायव्या ऽअनूपदधाति वायौ तद्वृष्टिं दधाति तस्माद्यां दिशं वायुरेति तां दिशं व्वृष्टिरन्वेति ॥ ५ ॥ यद्वेवापस्या-ऽउपदधाति । एष्वेवैतत्प्राणेष्वपो दधाति ता ऽअनन्तर्हिताः प्राणभृद्भ्य ऽउपदधात्यनन्तर्हितास्तत्प्राणेभ्योऽपो दधात्यथो ऽअन्नं वा ऽआपोऽनन्तर्हितं तत्प्राणेभ्योऽन्नं दधा'त्यपः पिन्व्वौषधीर्जिन्व्व द्विपादव चतुष्पात्पाहि दिवो व्वृष्टिमेरये'त्येता ऽएवैष्वेतत्क्लृप्ता ऽअपो दधाति ॥ ६ ॥ अथ छन्दुस्या ऽउपदधाति । एतद्वै देवा ऽअब्रुवँश्चेतयद्ध्वमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमानाः पशूनेव चितिमपश्यँस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ ७ ॥ ‡ छन्दुस्या ऽउपदधाति । पशवो

† का० श्रौ० सू० १७. ८. २१ ।

(१) शु० य० सं० अ० १४ क० ८ ।

‡ का० श्रौ० सू० १७. ८. २२ ।

वै छन्दाꣳसि पशूनेवास्मिन्नेतद्दधाति सर्वत ऽउपदधाति सर्वतस्तत्पशून्दधाति तस्मात्सर्वतः पशवोऽपस्या ऽअनूपदधात्यप्सु तत्पशून्प्रतिष्ठापयति तस्माद्यदा वर्षत्यथ पशवः प्रतितिष्ठन्ति ॥ ८ ॥ यद्वेव छन्दुस्या ऽउपदुधाति । प्रजापतेर्विस्रस्तात्पशव ऽउदक्रामँश्छन्दाꣳसि भूत्वा तान्गायत्री च्छन्दो भूत्वा वयसाप्नोत्तद्यद्गायत्र्याप्नोदेतद्धि छन्द ऽआशिष्टद्दः सा तद्भूत्वा प्रजापतिरेतान्पशून्वयसाप्नोत् ॥ ९ ॥ 'मूर्द्धा वय' ऽइति । प्रजापतिर्वै मूर्द्धा स वयोऽभवत्प्रजापतिश्छन्द ऽइति प्रजापतिरेव च्छन्दोऽभवत् ॥ १० ॥ 'क्षत्रं वय' ऽइति । प्रजापतिर्वै क्षत्रद्दः स वयोऽभव'न्मयं छन्द' ऽइति यद्वा ऽअनिरुक्तं तन्मयन्दमनिरुक्तो वै प्रजापतिः प्रजापतिरेव छन्दोऽभवत् ॥ ११ ॥ 'विष्टम्भो वय' ऽइति । प्रजापतिर्वै विष्टम्भः स वयोऽभव'दधिपतिश्छन्द' ऽइति प्रजापतिर्वा ऽअधिपतिः प्रजापतिरेव छन्दोऽभवत् ॥ १२ ॥ 'विश्वकर्म्मा वय' ऽइति । प्रजापतिर्वै विश्वकर्म्मा स वयोऽभव'त्परमेष्ठी च्छन्द' ऽइत्यापो वै प्रजापतिः परमेष्ठी ता हि परमे स्थाने तिष्ठन्ति प्रजापतिरेव परमेष्ठी च्छन्दोऽभवत् ॥ १३ ॥ तानि वा ऽएतानि । चत्वारि वयाꣳसि चत्वारि च्छन्दाꣳसि तदष्टावष्टाक्षरा

(१) शु० य० सं० अ० १४ क० ९ । (२) शु० य० सं० अ० १४ क० ९ । (३) शु० य० सं० अ० १४ क० ९ । (४) शु० य० सं० अ० १४ क० ९ । (५) शु० य० सं० अ० १४ क० ९ । (६) शु० य० सं० अ० १४ क० ९ । (७) शु० य० सं० अ० १४ क० ९ ।

गायत्र्येषा वै सा गायत्री या तद्भूत्वा प्रजापतिरेतान्पशून्व्वयसाप्नोत्तस्माज्जीर्णं पशुं व्वयसात ऽइत्याचक्षते तस्मादु सर्व्वास्वेव व्वयो-व्वय ऽइत्यनुवर्त्ततेऽथ येऽस्मात्ते पशव ऽउदुक्रामन्नेते ते पञ्चदशोत्तरे व्वज्रो वै पशवो व्वज्रः पञ्चदशस्तस्माद्यस्य पशवो भवन्त्यपैव स पाप्मानः ह ते व्वज्रो हैव तस्य पाप्मानमपहन्ति तस्माद्यां काञ्च दिशं पशुमानेति व्वज्रविहताꣳ हैव तामन्वेति ॥ १४ ॥ (C)

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

'वस्तो व्वय' ऽइति । वस्तं व्वयसाप्नोद्विवलं छन्द ऽइत्येकपदा वै विवलं छन्द ऽएकपदा ह भूत्वाजा ऽउच्चक्रमुः ॥ १ ॥ 'व्वृष्णिर्व्वय' ऽइति । व्वृष्णिं व्वयसाप्नो'द्विशालं छन्द' ऽइति द्विपदा वै विशालं छन्दो द्विपदा ह भूत्वा व्वय ऽउच्चक्रमुः ॥ २ ॥ 'पुरुषो व्वय' ऽइति । पुरुषं व्वयसाप्नो'त्तन्द्रं छन्द' ऽइति पङ्क्तिर्व्वै तन्द्रं छन्दः पङ्क्तिर्ह भूत्वा पुरुषा ऽउच्चक्रमुः ॥ ३ ॥ 'व्व्याघ्रो व्वय' ऽइति । व्व्याघ्रं व्वयसाप्नो'दनाधृष्टं छन्द' ऽइति विराड् वा ऽअनाधृष्टं छन्दोऽन्नं वै विराडन्नमना धृष्टं विराड्ढ भूत्वा व्व्याघ्रा ऽउच्चक्रमुः ॥ ४ ॥ 'सिꣳहो व्वय' ऽइति ।

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. २. ३; कठ० १७. १, २; कपि० २५, १०. २९, १; मै० सं० ११. ८. २; तै० सं० ४. ३. ४।

(१) शु० य० सं० अ० १४ क० ९। (२) शु० य० सं० अ० १४ क० ९। (३) शु० य० सं० अ० १४ क० ९। (४) शु० य० सं० अ० १४ क० ९। (५) शु० य० सं० अ० १४ क० ९। (६) शु० य० सं० अ० १४ क० ९। (७) शु० य० सं० अ० १४ क० ९। (८) शु० य० सं० अ० १४ क० ९।

सिꣳहं व्रयसाप्नो[1]'च्छदिश्छन्द' ऽइत्यतिच्छन्दा वै छदिश्छन्दः सा हि सर्वाणि च्छन्दाꣳसि छादयत्यतिच्छन्दा ह भूत्वा सिꣳहा ऽउच्चक्रमुरथातो निरुक्तानेव पशून्निरुक्तानि च्छन्दाꣳस्युपदधाति ॥ ५ ॥ 'षष्ठेवाड् वय'[2] ऽइति । षष्ठवाहं व्रयसाप्नोद्[3]'बृहतीच्छन्द' ऽइति बृहती ह भूत्वा षष्ठवाह ऽउच्चक्रमुः ॥ ६ ॥ 'उक्षाꣳ व्रय'[4] इति । उक्षाणं व्रयसाप्नो[5]'त्ककुप्छन्द' ऽइति ककुब्भ भूत्वोक्षाण ऽउच्चक्रमुः ॥ ७ ॥ 'ऋषभो व्रय'[6] ऽइति । ऋषभं व्रयसाप्नो[7]'त्सतोबृहती च्छन्द' ऽइति सतोबृहती ह भूत्वर्षभा ऽउच्चक्रमुः ॥ ८ ॥ 'अनड्वान्वय'[8] ऽइति । अनड्वाहं व्रयसाप्नो[9]'त्पङ्क्तिश्छन्द' ऽइति पङ्क्तिर्ह भूत्वानड्वाह ऽउच्चक्रमुः ॥ ९ ॥ 'धेनुर्व्रय'[10] ऽइति । धेनुं व्रयसाप्नो[11]'ज्जगती च्छन्द' ऽइति जगती ह भूत्वा धेनव ऽउच्चक्रमुः ॥ १० ॥ 'त्र्यविर्व्रय'[12] ऽइति । त्र्यविं व्रयसाप्नो[13]'त्त्रिष्टुप्छन्द' ऽइति त्रिष्टुब्भ भूत्वा त्र्यवय ऽउच्चक्रमुः ॥ ११ ॥ 'दित्यवाड् वय'[14] ऽइति । दित्यवाहं व्रयसाप्नो[15]'द्विराट् छन्द' ऽइति विराड्ढ भूत्वा दित्यवाह ऽउच्चक्रमुः ॥ १२ ॥

(१) शु० य० सं० अ० १४ क० ९। (२) शु० य० सं० अ० १४ क० ९। (३) शु० य० सं० अ० १४ क० ९। (४) शु० य० सं० अ० १४ क० ९। (५) शु० य० सं० अ० १४ क० ९। (६) शु० य० सं० अ० १४ क० ९। (७) शु० य० सं० अ० १४ क० ९। (८) शु० य० सं० अ० १४ क० १०। (९) शु० य० सं० अ० १४ क० १०। (१०) शु० य० सं० अ० १४ क० १०। (११) शु० य० सं० अ० १४ क० १०। (१२) शु० य० सं० अ० १४ क० १०। (१३) शु० य० सं० अ० १४ क० १०। (१४) शु० य० सं० अ० १४ क० १०। (१५) शु० य० सं० अ० १४ क० १०।

'पञ्चाविर्व्वय' ऽइति । पञ्चाविं व्वयसाप्नो'द्गायत्री च्छन्द'-ऽइति गायत्री ह भूत्वा पञ्चावय ऽउच्चक्रमुः ॥ १३ ॥ 'त्रिवत्सो व्वय' ऽइति । त्रिवत्सं व्वयसाप्नो'दुष्णिक्छन्द'-ऽइत्युष्णिग्घ भूत्वा त्रिवत्सा ऽउच्चक्रमुः ॥ १४ ॥ 'तुर्य्यवाड्ं व्वय' ऽइति । तुर्य्यवाहं व्वयसाप्नो'दनुष्टुप्छन्द'-ऽइत्यनुष्टुब्भ भूत्वा तुर्य्यवाह ऽउच्चक्रमुः ॥ १५ ॥ एते वै ते पशवः । याँस्तत्प्रजापतिर्व्वयसाप्नोत्स वै पशुं प्रथममाहाथ व्वयोऽथ छन्दो व्वयसा च ह्येनाँश्छन्दसा च परिगृत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनानयमेतद्व्वयसा चैव छन्दसा च परिगृत्यात्मन्धत्त ऽआत्मन्कुरुते ॥ १६ ॥ स ऽएष पशुर्य्वदग्निः । सोऽत्रैव सर्व्वः कृत्स्नः संस्कृतस्तस्य याः पुरस्तादुपदधाति शिरोऽस्य ता ऽअथ या दक्षिणतश्चोत्तरतश्च स ऽआत्माथ याः पश्चात्तत्पुच्छः ॥ १७ ॥ स वै पुरस्तादेवाग्र ऽउपदधाति । शिरो हि प्रथमं जायमानस्य जायतेऽथ दक्षिणत ऽउपधायोत्तरत-ऽउपदधाति सार्द्धमयमात्मा जायाता ऽइत्यथ पश्चात्पुच्छꣳ ह्यन्ततो जायमानस्य जायते ॥ १८ ॥ तद्यानि व्वर्षिष्ठानि च्छन्दाꣳसि । ये स्थविष्ठाः पशवस्तान्मध्य-ऽउपदधाति मध्यं तत्प्रति पशुं व्वरिष्ठं करोति तस्मान्मध्यं प्रति पशुर्व्वरिष्ठोऽथ ये व्वीर्य्यवत्तमाः पशवस्तान्दक्षिणत ऽउपदधाति दक्षिणं तदुर्द्धं पशोर्व्वीर्य्यवत्तरं करोति

(१) शु० य० सं० अ० १४ क० १०। (२) शु० य० सं० अ० १४ क० १०। (३) शु० य० सं० अ० १४ क० १०। (४) शु० य० सं० अ० १४ क० १०। (५) शु० य० सं० अ० १४ क० १०। (६) शु० य० सं० अ० १४ क० १०।

तस्माद्दक्षिणोऽर्द्धः पशोर्व्वीर्य्यवत्तरः ॥ १९ ॥ पूर्वार्द्धं च जघनार्द्धं चाणिष्ठौ करोति । यदुहामूश्चतस्र*स्तेनैता ऽअणिष्ठा ऽअथ यदिह हृसिष्टान्पशूनुपदधाति तेनो ऽएता ऽअणिष्ठाः पूर्वार्द्धं च तज्जघनार्द्धं च पशोरणिष्ठौ करोति तस्मात्पूर्वार्द्धश्च जघनार्द्धश्च पशोरणिष्ठौ तस्मात्पूर्वार्द्धेन च जघनार्द्धेन च पशुरुच्च तिष्ठति स्मश्च विशत्यथ लोकम्पृणे ऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि वन्धुः पुरीषं निवपति तस्योपरि वन्धुः ॥ २० ॥ (D)

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

[तृतीयायां चितौ स्वयमातृण्णा-दिश्येष्टकोपधानम्]

तृतीयां चितिमुपदधाति । एतद्वै देवा द्वितीयां चितिं चित्वा समारोहन्न्यदूर्द्धं पृथिव्या ऽअर्व्वाचीनमन्तरिक्षात्तदेव तत्संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन् । चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऽऊर्द्धमिच्छतेति ते चेतयमाना ऽअन्तरिक्षमेव बृहतीं तृतीयां चितिमपश्यँस्तेभ्य ऽएष लोको†ऽच्छन्दयत् ॥ २ ॥ त ऽइन्द्राग्नी ऽअब्रुवन् । युवं

* 'स्तेनैना' इति 'ग' पुस्तके ।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा– का० श० १०. १. १; कठ० सं० १६. १९; कपि० सं० २५. ९; मै० सं० ११. ७. १९; तै० सं० ४. ३. २ ।

† 'ऽच्छदयत्' इति 'क–ख' पुस्तकयोः ।

न ऽइमां तृतीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति युवमेव नः श्रेष्ठौ भविष्यथ ऽइति तथेति तेभ्य ऽएतामिन्द्राग्नी तृतीयां चितिमुपाधत्तां तस्मादाहुरिन्द्राग्नी ऽएव देवानाꣳ श्रेष्ठाविति ॥ ३ ॥ स वा ऽइन्द्राग्निभ्यामुपदधाति । विश्वकर्म्मणा सादयतीन्द्राग्नी च वै विश्वकर्म्मा चैतां तृतीयां चितिमपश्यँस्तस्मादिन्द्राग्निभ्यामुपदधाति विश्वकर्म्मणा सादयति ॥ ४ ॥ यद्वेवेन्द्राग्निभ्यामुपदधाति । विश्वकर्म्मणा सादयति प्रजापतिं विस्रस्तं देवता ऽआदाय व्यु्दक्रामँस्तस्येन्द्राग्नी च विश्वकर्म्मा च मद्धयमादायोत्क्रम्यातिष्ठन् ॥ ५ ॥ तानब्रवीत् । उप मेत प्रति म ऽएतद्धत्त येन मे यूयमुदुक्रमिष्टेति किं नस्ततो भविष्यतीति युष्मद्देवत्यमेव म ऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतदिन्द्राग्नी च विश्वकर्म्मा च प्रत्यदधुः ॥ ६ ॥ * तद्यैषा मद्धयमा स्वयमातृण्णा । एतदस्य तदात्मनस्तद्यदेतामत्रोपदधाति । यद्वास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥ ७ ॥ 'इन्द्राग्नी ऽअव्यथमानाम् । इष्टकां दृꣳहतं ध्रुवमि'ति यथैव यजुस्तथा बन्धुः 'पृष्ठेन द्यावापृथिवी ऽअन्तरिक्षं च विबाधस' ऽइति पृष्ठेन ह्येषा द्यावापृथिवी ऽअन्तरिक्षं च विबाधते ॥ ८ ॥ † 'विश्वकर्म्मा त्वा साद-

* अत्र शतम् ४४०० ॥

(१) शु० य० सं० अ० १४ क० ११ । (२) शु० य० सं० अ० १४ क० ११ ।

† का० श्रौ० सू० १७. ९. १ ।

३) शु० य० सं० अ० १४ क० १२ ।

यत्रि'ति । विश्वकर्म्मा ह्येतां तृतीयां चितिमश्श्य'दन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमि'त्यन्तरिक्षस्य ह्येतत्पृष्ठं व्यचस्वत्प्रथस्व'दन्तरिक्षं मच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीरि'त्यात्मानं मच्छात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥ ९ ॥ 'विश्वस्मै प्राणायापानाय । व्यानायोदानाये'ति प्राणो वै स्वयमातृण्णा सर्वस्मा ऽउ वा ऽएतस्मै प्राणः 'प्रतिष्ठायै चरित्रायै'तीमे वै लोकाः स्वयमातृण्णा ऽइम ऽउ लोकाः प्रतिष्ठा चरित्रं 'वायुष्ट्वाभिपात्वि'ति वायुष्ट्वाभिगोपायत्वित्येत'न्मह्यै स्वस्त्ये'ति महत्या स्वस्त्येत्येत'च्छर्द्दिषा शन्तमने'ति यच्छर्द्दिः शन्तमं तेनेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुरथ साम गायति तस्योपरि बन्धुः ॥ १० ॥ अथ दिश्श्या ऽउपदधाति । दिशो वै दिश्श्या दिश ऽएवैतदुपदधाति तद्याभिरदो वायुर्द्दिग्भिरनन्तर्हिताभिरुपैत्ता ऽएतास्ता ऽएवैतदुपदधाति ता ऽउ ऽएवामूः पुरस्ताद्ब्भस्तम्बं च लोगेष्टकाश्चोपदधात्यसौ वा ऽआदित्य ऽएता ऽअमुं तदादित्यं दिक्षवड्व्यूहति दिक्षु चिनोति ता यत्तत्रैव स्युर्बहिर्द्धा तत्स्युर्बहिर्द्धो वा ऽएतद्योनेरग्निकर्म्म यत्पुरा पुष्करपर्णात्ता यदिहाहृत्योपदधाति तदेना योनौ पुष्करपर्णे प्रतिष्ठापयति तथो हैता ऽअबहिर्द्धा भवन्ति ता ऽअनन्तर्हिताः स्वय-

(१) शु० य० सं० अ० १४ क० १२। (२) शु० य० सं० अ० १४ क० १२। (३) शु० य० सं० अ० १४ क० १२। (४) शु० य० सं० अ० १४ क० १२। (५) शु० य० सं० अ० १४ क० १२। (६) शु० य० सं० अ० १४ क० १२। (७) शु० य० सं० अ० १४ क० १२।

मातृण्णाया ऽउपदधात्यन्तरिक्षं वै मध्यमा स्वयमातृण्णा-
नन्तार्हितास्तदन्तरिक्षाद्दिशो दधात्युत्तरा ऽउत्तरास्तदन्त-
रिक्षाद्दिशो दधाति रेतःसिचोर्व्वेलयेमे वै रेतःसिचा-
वनयोस्तद्दिशो दधाति तस्मादनयोर्द्दिशः सर्व्वत ऽउपदधाति
सर्व्वतस्तद्दिशो दधाति तस्मात्सर्व्वतो दिशः सर्व्वतः समीचीः
सर्व्वतस्तत्समीचीर्द्दिशो दधाति तस्मात्सर्व्वतः समीच्यो
दिशः ॥ ११ ॥ यद्वेव * दिश्श्या ऽउपदधाति। छन्दाꣳसि
वै दिशो गायत्री वै प्राची दिक् त्रिष्टुब्दक्षिणा जगती
प्रतीच्यनुष्टुबुदीची पङ्क्तिरूर्द्धा पशवो वै छन्दाꣳस्य-
न्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्त-
रिक्षायतनाः पशवः ॥ १२ ॥ यद्वेव दिश्श्या ऽउपदधाति।
छन्दाꣳसि वै दिशः पशवो वै छन्दाꣳस्यन्नं पशवो
मध्यं मध्यमा चितिर्म्मध्यतस्तदन्नं दधाति ता ऽअनन्त-
र्हिताः स्वयमातृण्णाया ऽउपदधाति प्राणो वै स्वयमातृ-
ण्णानन्तर्हितं तत्प्राणादन्नं दधात्युत्तरा ऽउत्तरं तत्प्राणा-
दन्नं दधाति रेतःसिचोर्व्वेलया पृष्ट्यो वै रेतःसिचौ
मध्यमु पृष्ट्यो मध्यत ऽएवास्मिन्नेतदन्नं दधाति सर्व्वत-
ऽउपदधाति सर्व्वत ऽएवास्मिन्नेतदन्नं दधाति ॥ १३ ॥
'राड्यसि प्राची दिक्। विराडसि दक्षिणा दिक्सम्राडसि
प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती
दिगि'ति नामान्यासामेतानि नामग्राहमेवैना ऽएतदुप-

* का० श्रौ० सू० १७. १. २। क०
(१) शु० य० सं० अ० १४ क० ११।

दधाति ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति ता नाना हि दिशः ॥ १४ ॥ (A)

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥
कण्डिकासंख्या ॥ ११५ ॥

[तृतीयायां चितौ विश्वज्योतिर्ऋतव्येष्टकोपधानम्]

अथ * विश्वज्योतिषमुपदधाति । वायुर्वै मध्यमा विश्वज्योतिर्वायुर्ह्येवान्तरिक्षलोके विश्वं ज्योतिर्वायुमेवैतदुपदधाति तामनन्तर्हितां दिश्याभ्य ऽउपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥१॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजननमेवैतदुपदधाति तामनन्तर्हितां दिश्याभ्य ऽउपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु प्रजाः ॥ २ ॥ 'विश्वकर्म्मा त्वा सादयत्वि'ति । विश्वकर्म्मा ह्येतां तृतीयां चितिमपश्यद'न्तरिक्षस्य पृष्ठे ज्योतिष्मतीमि'त्यन्तरिक्षस्य ह्ययं पृष्ठे ज्योतिष्माञ्वायुः ॥ ३ ॥ 'विश्वस्मै प्राणायापानाय । व्यानायेति प्राणो वै विश्वज्योतिः सर्वस्मा ऽउ वाऽएतस्मै प्राणो 'विश्वं ज्योतिर्यच्छेति सर्वं ज्योतिर्य-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १० ३. १; कठ० सं० १७. ३; कपि० २६. २; मै० सं० ११. ८. ३; तै० सं ४ ३. ८ ।

* का० श्रौ० सू० १७. १. २ ।

(१) शु० य० सं० अ० १४ क० १४ । (२) शु० य० सं० अ० १४ क० १४ । (३) शु० य० सं० अ० १४ क० १४ । (४) शु० य० सं० अ० १४ क० १४ ।

च्छेत्येत'द्द्वायुष्टेऽधिपतिरि'ति वायुमेवास्या ऽअधिपतिं करोति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥४॥ * अथर्त्तव्या ऽउपदधाति । ऋतव ऽएते यदृतव्या-ऽऋतूनेवैतदुपदधाति 'नभश्चं नभस्यश्च वार्षिकावृतू' ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने ऽएतदुपदधाति द्वे-ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोत्यवकासूपदधात्यवकाभिः प्रच्छादयत्यापो वा ऽअ-वका ऽअपस्तदेतस्मिन्नृतौ दधाति तस्मादेतस्मिन्नृतौ भूयिष्ठं वर्षति ॥ ५ ॥ † अथोत्तरे । 'इषश्चोर्जश्च शारदावृतू' ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने-ऽएतदुपदधाति द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोत्यवकासूपदधात्यापो वा-ऽअवका ऽअपस्तदेतस्यर्त्तोः पुरस्ताद्दधाति तस्मादेतस्यर्त्तोः पुरस्ताद्वर्षति नोपरिष्टात्प्रच्छादयति तस्मान्न तथेवो-परिष्टाद्वर्षति ॥ ६ ॥ तद्यदेता ऽअत्रोपदधाति । संव-त्सर ऽएषोऽग्निरिम ऽउ लोकाः संवत्सरस्तस्यान्तरिक्ष-मेव मध्यमा चितिरन्तरिक्षमस्य वर्षाशरदावृतू तद्यदेता-ऽअत्रोपदधाति यदेवास्यैता ऽआत्मनस्तदस्मिन्नेतत्प्रति-दधाति तस्मादेता ऽअत्रोपदधाति ॥ ७ ॥ यद्वेवैता-ऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर ऽउ

* का० श्रौ० सू० १७. १. ५ ।
(१) शु० य० सं० अ० १४ क० १५ ।
† का० श्रौ० सू० १७. १. ७ ।
(२) शु० य० सं० अ० १४ क० १६ ।

प्रजापतिस्तस्य मध्यमेव मध्यमा चितिर्म्मध्यमस्य वर्षा-शरदावृतू तद्यदेता ऽअत्रोपदधाति यदेवास्यैता ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता ऽअत्रोपदधाति ॥ ८ ॥ ता वा ऽएताः । चतस्र ऽऋतव्या मध्यमायां चिता ऽउपदधाति द्वे-द्वे ऽइतरासु चितिषु चतुष्पादा वै पशवोऽन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥ ९ ॥ यद्वेव चतस्रः । चतुष्पादा वै पशवोऽन्नं पशवो मध्यं मध्यमा चितिर्म्मध्यतस्तदुन्नं दधाति ॥ १० ॥ यद्वेव चतस्रः । चतुरक्षरं वा ऽअन्तरिक्षं द्व्यक्षरा ऽइतराश्चितयस्तद्यावदन्तरिक्षं तावत्तत्कृत्वोपदधाति ॥ ११ ॥ यद्वेव चतस्रः । पशुरेष यदग्निर्म्मध्यं तत्प्रति पशुं वरिष्ठं करोति तस्मान्मध्यं प्रतिपशुर्वरिष्ठः ॥ १२ ॥ ता वा ऽएताः । चतस्र-ऽऋतव्यास्तासां विश्वज्योतिः पञ्चमी पञ्च दिश्या-स्तद्दश-दशाक्षरा विराडन्नं विराण्मध्यं मध्यमा चिति-र्म्मध्यतस्तदुन्नं दधाति ता ऽअनन्तर्हिताः स्वयमातृण्णाया-ऽउपदधाति प्राणो वै स्वयमातृण्णानन्तर्हितं तत्प्राणादुन्नं दधात्युत्तरा ऽउत्तरं तत्प्राणादुन्नं दधाति ॥ १३ ॥ अथ प्राणभृत ऽउपदधाति । प्राणा वै प्राणभृतः प्राणा-नेवैतदुपदधाति ता दश भवन्ति दश वै प्राणाः पूर्वार्द्ध-ऽउपदधाति पुरस्ताद्धीमे प्राणा 'ऽआयुर्म्मे पाहि ज्यो-तिर्म्मे यच्छे'ति प्राणो वै ज्योतिः प्राणं मे यच्छेत्येवैतदाह

(१) शु० य० सं० अ० १४ क० १७।

ता ऽअनन्तर्हिता ऽऋतव्याभ्य ऽउपदधाति प्राणो वै वायुर्ऋतुषु तद्वायुं प्रतिष्ठापयति ॥ १४ ॥ (B)

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥



[तृतीयायां चितौ छन्दस्येष्टकोपधानम्]

अथ * छन्दस्या ऽउपदधाति । पशवो वै छन्दाꣳस्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे †तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥ १ ॥ यद्वेव छन्दस्या ऽउपदधाति । पशवो वै छन्दाꣳस्यन्नं पशवो मध्यं मध्यमा चितिर्म्मध्यतस्तदन्नं दधाति ॥ २ ॥ ता द्वादश-द्वादशोपदधाति । द्वादशाक्षरा वै जगती पशवो वै जगत्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥ ३ ॥ यद्वेव द्वादश-द्वादश । द्वादशाक्षरा वै जगती पशवो वै जगत्यन्नं पशवो मध्यं मध्यमा चितिर्म्मध्यतस्तदन्नं दधाति ता ऽअनन्तर्हिताः प्राणभृद्भय ऽउपदधात्यनन्तर्हितं तत्प्राणेभ्योऽन्नं दधात्युत्तरा ऽउत्तरं तत्प्राणेभ्योऽन्नं दधाति ॥ ४ ॥ 'मा च्छन्द' ऽइति । अयं वै लोको मायः हि लोको मित ऽइव 'प्रमा च्छन्द' ऽइत्यन्तरिक्षलोको वै प्रमान्तरिक्षलोको ह्यस्मा-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ३. ३; कठ० १७. १०; कपि० २६. ९; मै० सं० ११. ८. १२, १२, तै० सं० ४. ४. ११ ।

* का० श्रौ० सू० १७. ९. ९ ।

† 'तत्पशुं' इति 'ग' पुस्तके ।

(१) शु० य० सं० अ० १४ क० १८ । (२) शु० य० सं० अ० १४ क० १८ ।

लोकात्प्रमित ऽइव 'प्रतिमा[1] च्छन्द' ऽइत्यसौ वै लोकः प्रतिमैष ह्यन्तरिक्षलोके प्रतिमित ऽइ'वा[2]स्त्रीवयश्छन्द'-ऽइत्यन्नमस्त्रीवयस्तद्यदेषु लोकेष्वन्नं तदस्त्रीवयोऽथो यदेभ्यो लोकेभ्योऽन्नꣳ स्रवति तदस्त्रीवयोऽथातो निरुक्तान्येव छन्दाꣳस्युपदधाति ॥ ५ ॥ 'पङ्क्तिश्छ[3]न्दः । उष्णिक्छन्दो बृहती च्छन्दोऽनुष्टुप्छन्दो विराट् छन्दो गायत्री च्छन्दस्त्रिष्टुप्छन्दो जगती च्छन्द' ऽइत्येतानि निरुक्तानि विराडष्टमानि च्छन्दाꣳस्युपदधाति 'पृथिवी च्छन्दो[4]न्तरिक्षं छन्द' ऽइति यान्येतद्देवत्यानि च्छन्दाꣳसि तान्येवैतदुपदधा'त्यग्निर्देवता वातो देवते'त्ये'ता वै देवता-श्छन्दाꣳसि तान्येवैतदुपदधाति ॥ ६ ॥ स वै निरुक्तानि चानिरुक्तानि चोपदधाति । स यत्सर्वाणि निरुक्तान्युपा-धास्यदुन्तवद्धान्नमभविष्यदुक्षेष्यत ह्याथ यत्सर्वाण्यनिरु-क्तानि परोऽक्षꣳ ह्यान्नमभविष्यन्न हैनदुद्रक्ष्यंश्चन निरु-क्तानि चानिरुक्तानि चोपदधाति तस्मान्निरुक्तमन्नमद्यमानं न क्षीयते ॥ ७ ॥ तानि वा ऽएतानि । त्रीणि द्वादशा-न्युपदधाति तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा बृहत्येषा वै सा बृहती यां तद्देवा ऽअन्तरिक्षं बृहतीं तृतीयां चितिम-पश्यꣳस्तस्या ऽएतस्यै देवा ऽउत्तमाः ॥ ७ ॥ यद्वैवैता-ऽइष्टका ऽउपदधाति । प्रजापतेर्विस्रस्तात्सर्वाणि भूतानि सर्वा दिशोऽनु व्युदक्रामन् ॥ ९ ॥ स यः स प्रजापति-

(१) शु० य० सं० अ० १४ क० १८ । (२) शु० य० सं० अ० १४ क० १८ । (३) शु० य० सं० अ० १४ क० १८ । (४) शु० य० सं० अ० १४ क० १८ । (५) शु० य० सं० अ० १४ क० १८ ।

व्व्यर्यन्त्रः सत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्मात्तानि भूतानि व्व्युदक्रामन्नेतास्ता ऽइष्टकास्तद्यदेता ऽउपदधाति यान्येवास्मात्तानि भूतानि व्व्युदक्रामँस्तान्यस्मिन्नेतत्प्रतिदधाति ॥ १० ॥ तद्या दश प्रथमा ऽउपदधाति । स चन्द्रमास्ता दश भवन्ति दशाक्षरा विराड्विराड्वा चन्द्रमा ऽअथ या ऽउत्तराः षट्त्रिꣳशदर्द्धमासाश्च ते मासाश्चचतुर्विꣳशतिरर्द्धमासा द्वादश मासाश्चन्द्रमा वै संवत्सरः सर्वाणि भूतानि ॥ ११ ॥ तं यत्र देवाः समस्कुर्वन् । तदस्मिन्नेतानि सर्वाणि भूतानि मद्ध्यतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति ता ऽअनन्तर्हिता ऽऋतव्याभ्य ऽउपदधात्यृतुषु तत्सर्वाणि भूतानि प्रतिष्ठापयति ॥१२॥(C)

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[तृतीयस्यां चितौ बालखिल्योपधानम्]

अथ * बालखिल्या ऽउपदधाति । प्राणा वै बालखिल्याः प्राणानेवैतदुपदधाति ता यद्बालखिल्या नाम यद्वा ऽउर्व्वरयोरसम्भिन्नं भवति खिल ऽइति वै तदाचक्षते बालमात्रादु हेमे प्राणा ऽअसम्भिन्नास्ते यद्बालमात्रादुसम्भिन्नास्तस्माद्बालखिल्याः ॥ १ ॥ स वै सप्त पुरस्ता-

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ३. ३, कठ० सं० १७. ३; कपि० सं० २९, २; मै० स० ११. ८. ३, तै० सं० ४. ३. ६ ।

* का० श्रौ० सू० १७. ९. ११, १४ ।

दुपदुधाति । सप्त पश्चात्तद्याः सप्त पुरस्तादुपदुधाति य-ऽएवेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ॥ २ ॥ अथ याः सप्त पश्चात् । एषा मेवैतत्प्राणानामेतान्प्राणान्प्रति प्रतीङ्करोति तस्माद्यदेभिरन्नमत्ति तदेतैरत्येति ॥ ३ ॥ यद्वेव सप्त पुरस्तादुपदुधाति । सप्त वा ऽइमे पुरस्तात्प्राणाश्चत्वारि दोर्बाहवाणि शिरो ग्रीवा यदूर्द्ध्वं नाभेस्तत्सप्तममङ्गेऽङ्गे हि प्राण ऽएते वै सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ॥ ४ ॥ अथ याः सप्त पश्चात् । सप्त वा ऽइमे पश्चात्प्राणाश्चत्वार्यूर्ध्वष्ठीवानि द्वे प्रतिष्ठे यदुवाङ्नाभेस्तत्सप्तममङ्गेऽङ्गे हि प्राण ऽएते वै सप्तपश्चात्प्राणास्तानस्मिन्नेतद्दधाति ॥ ५ ॥ 'मूर्द्धासि राट् । ध्रुवासि धरुणा धर्त्र्यसि धरणी । यन्त्री राड्यन्त्र्यसि यमनी ध्रुवासि धरित्री'त्येतानेवास्मिन्नेतद् ध्रुवान्प्राणान्यच्छति ॥ ६ ॥ यद्वेव बालखिल्या ऽउपदुधाति । एतद्वै देवा बालखिल्याभिरेवेमाँल्लोकान्त्समयुरित्श्चोर्द्धानमुतश्चाब्रुवन्-स्तथैवैतद्यजमानो बालखिल्याभिरेवेमाँल्लोकान्त्संयातीत-श्चोर्द्धानमुतश्चाब्रुवन्ः ॥ ७ ॥ मूर्द्धासि राडिति(१)मं लोकमरोहन् । ध्रुवासि धरुणेत्यन्तरिक्षलोकं धर्त्र्यसि धरणीत्यमुं लोक'मायुषे त्वा(२) वर्च्चसे त्वा कृष्यै त्वा क्षेमाय त्वे'ति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्त-ऽएतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनामुष्मिँल्लोके प्रत्यतिष्ठँस्तथैवैतद्यजमान ऽएतैश्चतुर्भिश्चतुष्पादैः

(१) शु० य० सं० अ० १४ क० २१, २२ । (२) शु० य० सं० अ० १४ क० २१ ।


पशुभिरेतेनान्नेनामुष्मिँल्लोके प्रतितिष्ठति ॥ ८ ॥ स स पराङ्विव रोहः। इयमु वै प्रतिष्ठा ते देवा ऽइमां प्रतिष्ठामभिप्रत्यायँस्तथैवैतद्यजमान ऽइमां प्रतिष्ठामभिप्रत्यैति ॥ ९ ॥ यन्त्री राडित्यमुं लोकमरोहन्। यन्त्र्यसि यमनीत्यन्तरिक्षलोकं ध्रुवासि धरित्रीतीमं लोक'मिषे त्वोर्ज्जे त्वा रय्यै त्वा पोषायत्त्वे'ति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्त ऽएतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनास्मिँल्लोके प्रत्यतिष्ठँस्तथैवैतद्यजमान ऽएतैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनास्मिँल्लोके प्रतितिष्ठति ॥ १० ॥ अथातः संस्कृतिरेव। या ऽअमूरेकादशेष्टका ऽउपदधाति योऽसौ प्रथमोऽनुवाकस्तदन्तरिक्षः स ऽआत्मा तद्यत्ता ऽएकादश भवन्त्येकादशाक्षरा वै त्रिष्टुप् त्रैष्टुभमन्तरिक्षमथ या ऽउत्तराः षष्टिः स वायुः स प्रजापतिः सोऽग्निः स यजमानः ॥ ११ ॥ तद्याः पुरस्तादुपदधाति। शिरोऽस्य तास्ता दश भवन्ति दश वै प्राणाः प्राणा ऽउ वै शिरः पूर्वार्द्ध ऽउपदधाति पुरस्ताद्धीदꣳ शिरः ॥ १२ ॥ अथ या दक्षिणतः। यदूर्द्ध मद्धयादवाचीनꣳ शीर्ष्णस्तदस्य ता ऽअथ याः पश्चाद्यदूर्द्ध प्रतिष्ठाया ऽअवाचीनं मद्धयात्तदस्य ताः प्रतिष्ठैवोत्तरतः ॥ १३ ॥ तद्याः सप्त पुरस्ताद्वालखिल्या ऽउपदधाति। य ऽएवेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ता ऽअनन्तर्हिता ऽएताभ्यो दशभ्य ऽउपदधात्यनन्तर्हिताँस्तच्छीर्ष्णः

(१) शु० य० सं० अ० १४ क० २२।

प्प्राणान्दधाति ॥ १४ ॥ अथ याः सप्त पश्च्चात् । यऽएवेमे सप्त पश्च्चात्प्राणास्तानस्मिन्नेतद्दधाति ता ऽअन्तर्हिता ऽएताभ्यो द्वादशभ्य ऽउपदधात्यनन्तर्हिताँस्तदात्मनः प्प्राणान्दधाति स ऽएष वायुः प्प्रजापतिरस्मिँस्त्रेष्टुभेऽन्तरिक्षे समन्तं पर्य्यक्नस्तद्यत्तृतीयां चितिमुपदधाति वायुं चैव तदन्तरिक्षं च संस्कृत्योऽपधत्तेऽथ लोकम्पृणे ऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥ १५ ॥ (D)

तृतीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥



[चतुर्थ्यां चितौ स्तोमेष्टकोपधानम्]

चतुर्थीं चितिमुपदधाति । एतद्वै देवास्तृतीयां चितिं चित्वा समारोहन्नन्तरिक्षं वै तृतीया चितिरन्तरिक्षमेव तत्संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन् । चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऽऊर्द्धमिच्छतेति ते चेतयमाना ऽएतां चतुर्थीं चितिमपश्यन्यदूर्द्धमन्तरिक्षादर्वाचीनं दिवस्तेषामेष लोकोऽद्भुव ऽइवाप्रतिष्ठित ऽइव मनस्यासीत् ॥ २ ॥ ते ब्रह्माब्रुवन् । त्वामिहोपदधामहाऽइति किं मे ततो भविष्यतीति त्वमेव नः श्रेष्ठं

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १० ३. ४; कठ० सं० १७. ३ । कपि० सं० २९. २; मै० सं० ११. ८ ३; तै० सं० ४. ३. ६ ।

भविष्यसीति तथेति तेऽत्र ब्रह्मोपादधत तस्माद्ब्राह्मणा ब्रह्मैव देवानाꣳ श्रेष्ठमिति तदेतया वै चतुर्थ्या चित्येमे द्यावापृथिवी व्यिष्टब्धे ब्रह्म वै चतुर्थी चितिस्तस्माद्ब्राह्मणा द्यावापृथिवी व्यिष्टब्धे ऽइति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा ऽउ वै ब्रह्म ब्रह्मैवैतदुपदधाति ॥ ३ ॥ यद्वेव स्तोमानुपदधाति । एतद्वै देवाः प्रजापतिमब्रुवँस्त्वामिहोपदधामहा ऽइति तथेति स वै नाब्रवीत्किं मे ततो भविष्यतीति यदु ह किञ्च प्रजापतिर्देवेष्वीषे किमस्म्माकं ततो भविष्यतीत्येवोचुस्तस्म्मादु हैतद्यत्पिता पुत्रेष्विच्छते किमस्म्माकं ततो भविष्यतीत्येवाहुरथ यत्पुत्राः पितरि तथेत्येवाहैवꣳ हि तदुग्रे प्रजापतिश्च देवाश्च समवदन्त स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा ऽउ वै प्रजापतिः प्रजापतिमेवैतदुपदधाति ॥ ४ ॥ यद्वेव स्तोमानुपदधाति । ये वै ते प्राणा ऽऋषय ऽएतां चतुर्थीं चितिमपश्यꣳस्ते त ऽएतेन रसेनोपायँस्त ऽएते तानेवैतदुपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा ऽउ वा ऋषय ऽऋषीनेवैतदुपदधाति ॥ ५ ॥ यद्वेव स्तोमानुपदधाति । प्रजापतिं व्यिस्रस्तं देवता ऽआदाय व्युदक्रामँस्तस्य यदूर्द्धं मद्धयादवाचीनꣳ शीर्ष्णस्तदस्य वायुरादायोत्क्रम्म्यातिष्ठद्देवताश्च भूत्वा संवत्सररूपाणि च ॥ ६ ॥ तमब्रवीत् । उप मेहि प्रति म ऽएतद्धेहि येन मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति त्वद्देवत्यमेव म ऽएतदात्मनो भविष्यतीति तथेति तद-

स्मिन्नेतद्वायुः प्रत्यदधात् ॥ ७ ॥ तद्या ऽएता ऽअष्टादश प्रथमाः । एतदस्य तदात्मनस्तद्यदेता ऽअत्रोपदधाति यदेवास्यैता ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता ऽअत्रोपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा ऽउ वै वायुर्वायुमेवैतदुपदधाति ॥ ८ ॥ * स पुरस्तादुपदधाति । 'आशुस्त्रिवृदि'ति य ऽएव त्रिवृत्स्तोमस्तं तदुपदधाति तद्यत्तमाहाशुरित्येष हि स्तोमानामाशिष्ठोऽथो वायुर्वा ऽआशुस्त्रिवृत्स ऽएषु त्रिषु लोकेषु वर्त्तते तद्यत्तमाहाशुरित्येष हि सर्वेषां भूतानामाशिष्ठो वायुर्हि भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥ ९ ॥ 'भान्तः पञ्चदश' ऽइति । य ऽएव पञ्चदश स्तोमस्तं तदुपदधाति तद्यत्तमाह भान्त ऽइति वज्रो वै भान्तो वज्रः पञ्चदशोऽथो चन्द्रमा वै भान्तः पञ्चदशः स पञ्चदशाहान्यापूर्य्यते पञ्चदशापक्षीयते तद्यत्तमाह भान्त ऽइति भाति हि चन्द्रमाश्चन्द्रमा ह भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ १० ॥ 'व्योमा सप्तदश' ऽइति । य ऽएव सप्तदश स्तोमस्तं तदुपदधाति तद्यत्तमाह व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदशोऽथो संवत्सरो वाव व्योमा सप्तदशस्तस्य द्वादश मासाः पञ्चर्त्तवस्तद्यत्तमाह व्योमेति व्योमा हि संव-

* का० श्रौ० सू० १७. १० ६–१० ।

(१) शु० य० सं० अ० १४ क० २३ । (२) शु० य० सं० अ० १४ क० २३ । (३) शु० य० सं० अ० १४ क० २३ ।

† 'स च पुर' इति 'ग-ज' पुस्तकयोः ।

त्सरः संवत्सरो ह भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ ११ ॥ 'धरुण ऽएकविꣳश' ऽइति । य ऽएवैकविꣳश स्तोमस्तं तदुपदधाति तद्यत्तमाह धरुण ऽइति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविꣳशोऽथो ऽअसौ वाऽ आदित्यो धरुण ऽएकविꣳशस्तस्य द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावेवादित्यो धरुण ऽएकविꣳशस्तद्यत्तमाह धरुण ऽइति यदा ह्येवैषोऽस्तमेत्यथेदꣳ सर्वं म्रियत ऽआदित्यो ह भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधात्यथ संवत्सररूपाण्युपदधाति ॥१२॥ [अर्धप्रपाठकः ५३॥] 'प्रतूर्त्तिरष्टादश' ऽइति । य ऽएवाष्टादश स्तोमस्तं तदुपधात्यथो संवत्सरो वाव प्रतूर्त्तिरष्टादशस्तस्य द्वादश मासाः पञ्चर्त्तवः संवत्सर ऽएव प्रतूर्त्तिरष्टादशस्तद्यत्तमाह प्रतूर्त्तिरिति संवत्सरो हि सर्वाणि भूतानि प्रतिरति तदेव तद्रूपमुपदधाति ॥ १३ ॥ 'तपो नवदश' ऽइति । य ऽएव नवदश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव तपो नवदशस्तस्य द्वादश मासाः षडृतवः संवत्सर ऽएव तपो नवदशस्तद्यत्तमाह तप ऽइति संवत्सरो हि सर्वाणि भूतानि तपति तदेव तद्रूपमुपदधाति ॥ १४ ॥ 'अभीवर्त्तः सविꣳश' ऽइति । य ऽएव सविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाऽअभीवर्त्तः सविꣳशस्तस्य द्वादशमासाः सप्तर्त्तवः संवत्सर ऽएवाभीवर्त्तः सविꣳशस्तद्यत्तमाहाभीवर्त्त ऽइति संवत्सरो हि सर्वाणि भूतान्यभिवर्त्तते तदेव तद्रूपमुपदधाति ॥ १५ ॥

(१) शु० य० सं० अ० १४ क० २३। (२) शु० य० सं० अ० १४ क० २३। (३) शु० य० सं० अ० १४ क० २३। (४) शु० य० सं० अ० १४ क० २३।

'व्रर्च्चो द्वाविंश' ऽइति। य ऽएव द्वाविंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव व्रर्च्चो द्वाविंशस्तस्य द्वादश मासाः सप्तर्त्तवो द्वे ऽअहोरात्रे संवत्सर ऽएव व्रर्च्चो द्वाविंशस्तद्यत्तमाह व्रर्च्च ऽइति संवत्सरो हि सर्वेषां भूतानां व्रर्च्चस्वितमस्तदेव तद्रूपमुपदधाति ॥ १६ ॥ 'सम्भरणस्त्रयोविंश ऽइति य ऽएव त्रयोविंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव सम्भरणस्त्रयोविंशस्तस्य त्रयोदश मासाः सप्तर्त्तवो द्वे ऽअहोरात्रे संवत्सर ऽएव सम्भरणस्त्रयोविंशस्तद्यत्तमाह सम्भरण ऽइति संवत्सरो हि सर्वाणि भूतानि सम्भृतस्तदेव तद्रूपमुपदधाति ॥१७॥ 'योनिश्चतुर्विंश ऽइति। य ऽएव चतुर्विंश स्तोमस्तं तदुपधात्यथो संवत्सरो वाव योनिश्चतुर्विंशस्तस्य चतुर्विंशतिरर्द्धमासास्तद्यत्तमाह योनिरिति संवत्सरो हि सर्वेषां भूतानां योनिस्तदेव तद्रूपमुपदधाति ॥ १८ ॥ 'गर्भाः पञ्चविंश' ऽइति। य ऽएव पञ्चविंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव गर्भाः पञ्चविंशस्तस्य चतुर्विंशतिरर्द्धमासाः संवत्सर ऽएव गर्भाः पञ्चविंशस्तद्यत्तमाह गर्भा ऽइति संवत्सरो ह त्रयोदशो मासो गर्भो भूत्वर्त्तून्प्रविशति तदेव तद्रूपमुपदधाति ॥ १९ ॥ 'ओजस्त्रिणव' ऽइति। य ऽएव त्रिणव स्तोमस्तं तदुपदधाति तद्यत्तमाहौज ऽइति व्रज्रो वा ऽओजो व्रज्र-

(१) शु० य० सं० अ० १४ क० २३। (२) शु० य० सं० अ० १४ क० २३। (३) शु० य० सं० अ० १४ क० २३। (४) शु० य० सं० अ० १४ क० २३। (५) शु० य० सं० अ० १४ क० २३।

स्त्रिणवोऽथो संवत्सरो वा ऽओजस्त्रिणवस्तस्य चतुर्विंऽशतिरर्द्धमासा द्वे ऽअहोरात्रे संवत्सर ऽएवौजस्त्रिणवस्तद्यत्तमाहौज ऽइति संवत्सरो हि सर्वेषां भूतानामोजस्वितमस्तदेव तदद्रूपमुपदधाति ॥ २० ॥ 'क्रतुरेकत्रिंऽश' ऽइति । यऽएवैकत्रिंऽश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव क्रतुरेकत्रिंऽशस्तस्य चतुर्विंऽशतिरर्द्धमासाः षड्ऋतवः संवत्सर ऽएव क्रतुरेकत्रिंऽशस्तद्यत्तमाह क्रतुरिति संवत्सरो हि सर्वाणि भूतानि करोति तदेव तदद्रूपमुपदधाति ॥ २१ ॥ 'प्रतिष्ठा त्रयस्त्रिंऽश' ऽइति । य ऽएव त्रयस्त्रिंऽश स्तोमस्तं तदुपदधाति तद्यत्तमाह प्रतिष्ठेति प्रतिष्ठा हि त्रयस्त्रिंऽशोऽथो संवत्सरो वाव प्रतिष्ठा त्रयस्त्रिंऽशस्तस्य चतुर्विंऽशतिरर्द्धमासाः षड्ऋतवो द्वे ऽअहोरात्रे संवत्सर ऽएव प्रतिष्ठा त्रयस्त्रिंऽशस्तद्यत्तमाह प्रतिष्ठेति संवत्सरो हि सर्वेषां भूतानां प्रतिष्ठा तदेव तदद्रूपमुपदधाति ॥ २२ ॥ 'ब्रध्नस्य विष्टपं चतुस्त्रिंऽश' ऽइति । य * ऽएव चतुस्त्रिंऽश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव ब्रध्नस्य विष्टपं चतुस्त्रिंऽशस्तस्य चतुर्विंऽशतिरर्द्धमासाः सप्तर्त्तवो द्वे ऽअहोरात्रे संवत्सर ऽएव ब्रध्नस्य विष्टपं चतुस्त्रिंऽशस्तद्यत्तमाह ब्रध्नस्य विष्टपमिति स्वाराज्यं वै ब्रध्नस्य विष्टपꣳ स्वाराज्यं चतुस्त्रिंऽशस्तदेव तदद्रूपमुपदधाति ॥२३॥ 'नाकः षट्त्रिंऽश' ऽइति । य ऽएव षट्त्रिंऽश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव नाकः षट्त्रिंऽशस्तस्य चतु-

(१) शु० य० म० अ० १४ क० २३ । (२) शु० य० स० अ० १४ क० २३ ।
* 'ऽएते' इति 'ग' पुस्तके ।
(३) शु० य० सं० अ० १४ क० २३ । (४) शु० य० सं० अ० १४ क० २३ ।

र्विंशतिरर्द्धमासा द्वादश मासास्तद्यत्तमाह नाक ऽइति न हि तत्र गताय कस्मै च नाकं भवत्यथो संवत्सरो वाव नाकः संवत्सरः स्वर्गो लोकस्तदेव तद्रूपमुपदधाति ॥२४॥ 'विवर्त्तोऽष्टाचत्वारिंशः' ऽइति । य ऽएवाष्टाचत्वारिंशस्तोमस्तं तदुपदधात्यथो संवत्सरो वाव विवर्त्तोऽष्टाचत्वारिंशस्तस्य षड्विंशतिरर्द्धमासास्त्रयोदश मासाः सप्तर्त्तवो द्वे ऽअहोरात्रे तद्यत्तमाह विवर्त्त ऽइति संवत्सराद्धि सर्वाणि भूतानि विवर्त्तन्ते तदेव तद्रूपमुपदधाति ॥ २५ ॥ 'धर्त्र[1] चतुष्टोम' ऽइति । य ऽएव चतुष्टोम स्तोमस्तं तदुपदधाति तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्र प्रतिष्ठा चतुष्टोमोऽथो वायुर्वाव धर्त्र चतुष्टोमः स ऽआभिश्चतसृभिर्दिग्भिः स्तुते तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्र वायुरु सर्वेषां भूतानां प्रतिष्ठा तदेव तद्रूपमुपदधाति स वै वायुमेव प्रथममुपदधाति वायुमुत्तमं वायुनैव तदेतानि सर्वाणि भूतान्युभयतः परिगृह्णाति ॥ २६ ॥ ता वा ऽएताः । अष्टादशेष्टका ऽउपदधाति । तौ द्वौ त्रिवृतौ प्राणो वै त्रिवृद्वायुरु प्राणो वायुरेषा चितिः ॥ २७ ॥ यद्वेवाष्टादश । अष्टादशो वै संवत्सरो द्वादश मासाः पञ्चऽर्त्तवः संवत्सर ऽएव प्रजापतिरष्टादशः प्रजापतिरग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥ २८ ॥ (A)

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(१) शु० य० स० अ० १४ क० २३ । (२) शु० य० स० अ० १४ क० २३ ।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ४. १; कठ० सं० १७. ४; कपि० सं २९. ३; मै० सं० ११. ८. ४; तै० सं० ४. ३. ।

[चतुर्थ्यां चितौ स्फ्यतेष्टकोपधानम्]

अथ स्फ्य ऽउपदधाति। एतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रतिहिते सर्वाणि भूतानि गर्भ्यमभवत्ताभ्यस्य गर्भ ऽएव सन्ति पाप्मा मृत्युरगृह्णात् ॥ १ ॥ स देवानब्रवीत्। युष्माभिः सहेमानि सर्वाणि भूतानि पाप्मनो मृत्योः स्फ्णवानीति किं नस्ततो भविष्यतीति व्वृणीद्धमित्यब्रवीत्तं भागो नोऽस्वित्येकेऽब्रुवन्नाधिपत्यं नोऽस्वित्येके स भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्योरस्फ्णोद्यदुस्फ्णोत्तस्मात्स्फ्यस्तथैवैतद्यजमानो भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्यो स्फ्णोति तस्मादु सर्वास्वेव स्फ्यस्थ स्फ्यमित्यनुवर्त्तते ॥ २ ॥ 'अग्नेर्भागोऽसि *। दीक्षाया ऽआधिपत्यमि'ति वाग्वै दीक्षाग्नये भागं कृत्वा वाच ऽआधिपत्यमकरोद् 'ब्रह्म स्फ्यं त्रिवृत्स्तोम' ऽइति ब्रह्म प्रजानां त्रिवृता स्तोमेन पाप्मना मृत्योरस्फ्णोत् ॥ ३ ॥ 'इन्द्रस्य भागोऽसि। विष्णोराधिपत्यमि'तीन्द्राय भागं कृत्वा विष्णव ऽआधिपत्यमकरो'त्क्षत्रथ स्फ्यं पञ्चदश स्तोम' ऽइति क्षत्रं प्रजानां पञ्चदशेन स्तोमेन पाप्मनो मृत्योरस्फ्णोत् ॥ ४ ॥ 'नृचक्षसां भागोऽसि। धातुराधिपत्यमि'ति देवा वै नृचक्षसो देवेभ्यो भागं

---

* का० श्रौ० सू० १७. १०. ११-१५।

(१) शु० य० सं० अ० १४ क० २४। (२) शु० य० सं० अ० १४ क० २४। (३) शु० य० सं० अ० १४ क० २४। (४) शु० य० सं० अ० १४ क० २४। (५) शु० य० सं० अ० १४ क० २४।

कृत्वा धात्र ऽआधिपत्यमकरो'[1]जनित्रꣳ स्पृतꣳ सप्तदश स्तोम' ऽइति विड् वै जनित्रं विशं प्रजानाꣳ सप्तदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥५॥ 'मित्रस्य[2] भागोऽसि। वरुणस्याधिपत्यमि'ति प्राणो वै मित्रोऽपानो वरुणः प्राणाय भागं कृत्वापानायाधिपत्यमकरो'द्विवो व्वृष्टि[3]र्व्वात स्पृत ऽएकविꣳश स्तोम' ऽइति व्वृष्टिं च वातं च प्रजानामेकविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥ ६ ॥ † 'वसूनां[4] भागोऽसि। रुद्राणामाधिपत्यमि'ति वसुभ्यो भागं कृत्वा रुद्रेभ्य ऽआधिपत्यमकरो'च्चतुष्पा[5]त्स्पृतं चतुर्विꣳश स्तोम' ऽइति चतुष्पात्प्रजानां चतुर्विꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥ ७ ॥ 'आदित्या[6]नां भागोऽसि। मरुतामाधिपत्यमि'त्यादित्येभ्यो भागं कृत्वा मरुद्भय ऽआधिपत्यमकरो'द्गर्भा स्पृताः पञ्चविꣳश स्तोम' ऽइति गर्भान्प्रजानां पञ्चविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥ ८ ॥ 'अदित्यै[7] भागोऽसि। पूष्ण ऽआधिपत्यमि'तीयं वा ऽअदितिरस्यै भागं कृत्वा पूष्ण ऽआधिपत्यमकरो'दोज स्पृतं त्रिणव स्तोम' ऽइत्योजः प्रजानां त्रिणवेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥ ९ ॥ 'देवस्य[8] सवितुर्भागोऽसि। बृहस्पतेराधिपत्यमि'ति देवाय

(१) शु० य० सं० अ० १४ क० २४। (२) शु० य० सं० अ० १४ क० २४। (३) शु० य० सं० अ० १४ क० २५। (४) शु० य० सं० अ० १४ क० २५। (५) शु० य० सं० अ० १४ क० २५। (६) शु० य० सं० अ० १४ क० २५। (७) शु० य० सं० अ० १४ क० २५। (८) शु० य० सं० अ० १४ क० २५। (९) शु० य० सं० अ० १४ क० २५। (१०) शु० य० सं० अ० १४ क० २६।

सवित्रे भागं कृत्वा बृहस्पतय ऽआधिपत्यमकरो'त्स-
मीचीर्दिश स्पृताश्चतुष्टोम स्तोम' ऽइति सर्वा दिशः
प्रजानां चतुष्टोमेन स्तोमेन पाप्मनो मृत्योरस्पृणोत्॥१०॥
'यवानां भागोऽसि। अयवानामाधिपत्यमि'ति पूर्वपक्षा वै
यवा ऽअपरपक्षा ऽअयवास्ते हीदꣳ सर्वं म्युवते चायुवते च
पूर्वपक्षेभ्यो भागं कृत्वापरपक्षेभ्य ऽआधिपत्यमकरो'त्प्रजा
स्पृताश्चतुश्चत्वारिꣳश स्तोम' ऽइति सर्वाः प्रजाश्चतु-
श्चत्वारिꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥ ११ ॥
'ऋभूणां भागोऽसि। विश्वेषां देवानामाधिपत्यमि'-
त्यृभुभ्यो भागं कृत्वा विश्वेभ्यो देवेभ्य ऽआधि-
पत्यमकरो'द्भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोम' ऽइति सर्वाणि
भूतानि त्रयस्त्रिꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणो
त्तथैवैतद्यजमानः सर्वाणि भूतानि त्रयस्त्रिꣳशेन स्तोमेन
पाप्मनो मृत्यो स्पृणोति ॥ १२ ॥ ता वा ऽएताः। दशे-
ष्टका ऽउपदधाति दशाक्षरा विराड्विराडग्निर्दश दिशो
दिशोऽग्निर्दश प्राणाः प्राणा ऽअग्निर्य्यावानग्निर्य्यावत्यस्य
मात्रा तावतैव तदेतानि सर्वाणि भूतानि पाप्मनो मृत्यो
स्पृणोति ॥ १३ ॥ अथर्त्तव्ये ऽउपदधाति *। ऋतव-
ऽएते यदृतव्ये ऽऋतूनेवैतदुपदधाति 'सꣳहश्च सहस्यश्च
हैमन्तिकावृतू ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने-

(१) शु० य० सं० अ० १३ क० २६। (२) शु० य० सं० अ० १४ क० २६।
(३) शु० य० सं० अ० १४ क० २६। (४) शु० य० सं० अ० १४ क० २६।
(५) शु० य० सं० अ० १४ क० २७। (६) शु० य० सं० अ० १४ क० २७।
* का० श्रौ० सू० १७. १०. १६।

ऽएतदुपदधाति द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥ १४ ॥ तद्यदेते ऽअत्रोपदधाति । संवत्सर ऽएषोऽग्निरिम ऽउ लोकाः संवत्सरस्तस्य यदूर्द्ध्वमन्तरिक्षादर्वाचीनं दिवस्तदस्यैषा चतुर्थी चितिस्तद्वस्य हेमन्त ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ १५ ॥ यद्वैवैते ऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर ऽउ प्रजापतिस्तस्य यदूर्द्ध्वं मध्यादर्वाचीनः शीर्ष्णस्तदस्यैषा चतुर्थी चितिस्तद्वस्य हेमन्तऽऋतुस्तद्यदेते ऽअत्रोपदधाति यदेवास्यैते ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ १६ ॥ (B)

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[चतुर्थ्यां चितौ सृष्टीष्टकोपधानम्]

अथ † सृष्टीरुपदधाति । एतद्वै प्रजापतिः सर्वाणि भूतानि पाप्मनो मृत्योर्मुक्ता कामयत प्रजाः सृजेय प्रजायेयेति ॥ १ ॥ स प्राणानब्रवीत् । युष्माभिः सहेमाः प्रजाः प्रजनयानीति ते वै केन स्तोष्यामह ऽइति मया चैव युष्माभिश्चेति तथेति ते प्राणैश्चैव प्रजापतिना चास्तुवत यदु ह किञ्च देवाः कुर्वते स्तोमेनैव तत्कुर्वते

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ४. २; कट० १७. ४; कपि० २९. ३; मै० सं० ११. ८. ५; तै० सं ४. ३. ९ ।

† का० श्रौ० सू० १७. १०. १७ ।

यज्ञो वै स्तोमो यज्ञेनैव तत्कुर्वते तस्माद्दु सर्वास्वेवास्तुवतास्तुवतेत्यनुवर्त्तते ॥ २ ॥ 'एकयास्तुवतेति'। वाग्वाऽएका वाचैव तदस्तुवत 'प्रजा ऽअधीयन्ते'ति प्रजाऽअत्राधीयन्त 'प्रजापतिराधिपतिरासीदि'ति प्रजापतिरत्राधिपतिरासीत् ॥ ३ ॥ 'तिसृभिरस्तुवतेति'। त्रयो वै प्राणाः प्राण ऽउदानो व्यानस्तैरेव तदस्तुवत 'ब्रह्मास्रृज्यते'ति ब्रह्मात्रास्रृज्यत 'ब्रह्मणस्पतिराधिपतिरासीदि'ति ब्रह्मणस्पतिरत्राधिपतिरासीत् ॥ ४ ॥ 'पञ्चभिरस्तुवते'ति। य ऽएवेमे मनः पञ्चमाः प्राणास्तैरेव तदस्तुवत 'भूतान्यस्रृज्यन्ते'ति भूतान्यत्रास्रृज्यन्त 'भूतानां पतिराधिपतिरासीदि'ति भूतानां पतिरत्राधिपतिरासीत् ॥ ५ ॥ 'सप्तभिरस्तुवते'ति। य ऽएवेमे सप्त शीर्षन्प्राणास्तैरेव तदस्तुवत 'सप्त ऽऋषयोऽस्रृज्यन्ते'ति सप्तर्षयोऽत्रास्रृज्यन्त 'धातराधिपतिरासीदि'ति धातात्राधिपतिरासीत् ॥ ६ ॥ 'नवभिरस्तुवते'ति। नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तैरेव तदस्तुवत 'पितरोऽसृज्यन्ते'ति पितरोऽत्रासृज्यन्तादितिराधिपत्न्यासीदि'त्यदितिरत्राधिपत्न्यासीत् ॥७॥ *

(१) शु० य० सं० अ० १४ क० २८। (२) शु० य० सं० अ० १४ क० २८। (३) शु० य० सं० अ० १४ क० २८। (४) शु० य० सं० अ० १४ क० २८। (५) शु० य० स० अ० १४ क० २८। (६) शु० य० सं० अ० १४ क० २८। (७) शु० य० सं० अ० १४ क० २८। (८) शु० य० सं० अ० १४ क० २८। (९) शु० य० सं० अ० १४ क० २८। (१०) शु० य० सं० अ० १४ क० २८। (११) शु० य० सं० अ० १४ क० २८। (१२) शु० य० सं० अ० १४ क० २९। (१३) शु० य० सं० अ० १४ क० २९। (१४) शु० य० सं० अ० १४ क० २९। (१५) शु० य० सं० अ० १४ क० २९।

* अत्र शतम् ४५०० ॥

'एकादशभिरस्तुवते'ति । दश प्राणा ऽआत्मैकादशस्तेनैव तदस्तुवत ऽऋतवोऽसृज्यन्ते'त्यृतवोऽत्रासृज्य'न्तार्त्तवा ऽअधिपतय ऽआसन्नि'त्यार्त्तवा ऽअत्राधिपतय ऽआसन् ॥ ८ ॥ 'त्रयोदशभिरस्तुवते'ति । दश प्राणा द्वे प्रतिष्ठे ऽआत्मा त्रयोदशस्तेनैव तदस्तुवत 'मासा ऽअसृज्यन्ते'ति मासा ऽअत्रासृज्यन्त 'संवत्सरोऽधिपतिरासीदि'ति संवत्सरोऽत्राधिपतिरासीत् ॥ ९ ॥ 'पञ्चदशभिरस्तुवते'ति । दश हस्त्या ऽअङ्गुलयश्चत्वारि दोर्बाहवाणि यदूर्द्ध्वं नाभेस्तत्पञ्चदशं तेनैव तदस्तुवत 'क्षत्रमसृज्यते'ति क्षत्रमत्रासृज्य'तेन्द्रोऽधिपतिरासीदि'तीन्द्रोऽत्राधिपतिरासीत् ॥ १० ॥ 'सप्तदशभिरस्तुवते'ति । दश पाद्या ऽअङ्गुलयश्चत्वार्यूर्ष्ठीवानि द्वे प्रतिष्ठे यदुवाङ्नाभेस्तत्सप्तदशं तेनैव ततस्तुवत 'ग्राम्या: पशवोऽसृज्यन्ते'ति ग्राम्याः पशवोऽत्रासृज्यन्त 'बृहस्पतिरधिपतिरासीदि'ति बृहस्पतिरत्राधिपतिरासीत् ॥ ११ ॥ 'नवदशभिरस्तुवते'ति । दश हस्त्या ऽअङ्गुलयो नव प्राणास्तैरेव तदस्तुवत 'शूद्रार्य्यावसृज्येतामि'ति शूद्रार्य्यावत्रासृज्येता'महोरात्रे ऽअधिपत्नी ऽआस्ता-

(१) शु० य० सं० अ० १४ क० २९। (२) शु० य० सं० अ० १४ क० २९। (३) शु० य० सं० अ० १४ क० २९। (४) शु० य० सं० अ० १४ क० २९। (५) शु० य० सं० अ० १४ क० २९। (६) शु० य० सं० अ० १४ क० २९। (७) शु० य० सं० अ० १४ क० २९। (८) शु० य० सं० अ० १४ क० २९। (९) शु० य० सं० अ० १४ क० २९। (१०) शु० य० सं० अ० १४ क० २९। (११) शु० य० सं० अ० १४ क० २९। (१२) शु० य० सं० अ० १४ क० २९। (१३) शु० य० सं० अ० १४ क० ३०। (१४) शु० य० सं० अ० १४ क० ३०। (१५) शु० य० सं० अ० १४ क० ३०।

मि॑'त्यहोरात्रे ऽअत्राधिपत्नी ऽआस्ताम् ॥ १२ ॥ 'एकविꣳ॑ शत्यास्तुवते'ति । दश॒ हस्त्या ऽअङ्गुलयो दश॒ पाद्या॒ ऽआत्मैकविꣳ॑शस्तेनैव त॒दस्तु॑'वतैकशफाः॑ पशवोऽसृज्यन्ते'त्येकशफाः॑ पशवोऽत्रासृज्यन्त 'वरु॒णोऽधि॑पतिरासीदि॒'ति वरु॒णोऽत्राधिपतिरासीत् ॥ १३ ॥ 'त्रयोविꣳ॑शत्यास्तुवते'ति । दश॒ हस्त्या ऽअङ्गुलयो दश॒ पाद्या॒ द्वे प्रतिष्ठे॒ ऽआत्मा त्रयोविꣳ॑शस्तेनैव त॒दस्तुवत 'क्षुद्राः॑ पशवोऽसृज्यन्ते'ति क्षुद्राः॑ पशवोऽत्रासृज्यन्त 'पू॒षाधि॑पतिरासीदि॒'ति पूषात्राधिपतिरासीत् ॥ १४ ॥ 'पञ्चविꣳ॑शत्यास्तुवते'ति । दश॒ हस्त्या ऽअङ्गुलयो दश॒ पाद्याश्चत्वार्यङ्गान्यात्मा पञ्चविꣳ॑शस्तेनैव त॒'दस्तुवतारण्याः॑ पशवोऽसृज्यन्ते'त्यारण्याः॑ पशवोऽत्रासृज्यन्त 'वायु॒रधि॑पतिरासीदि॒'ति वायुरत्राधिपतिरासीत् ॥ १५ ॥ 'सप्त॒विꣳ॑शत्यास्तुवते'ति । दश॒ हस्त्या ऽअङ्गुलयो दश॒ पाद्याश्चत्वार्यङ्गानि द्वे प्रतिष्ठे ऽआत्मा सप्तविꣳ॑शस्तेनैव त॒दस्तुवत 'द्यावा॑पृथि॒वी व्यैतामि॒'ति द्यावापृथिवी ऽअत्र व्यैतां व॒सवो रुद्रा ऽआदित्या ऽअनुव्यायन्नि॒'ति व॒सवो रुद्रा ऽआदित्या ऽअ॒'त्रानु॒व्यायँस्त ऽएवाधिपतय ऽआसन्नि॒'ति त ऽउ-

(१) शु० य० सं० अ० १४ क० ३०। (२) शु० य० सं० अ० १४ क० ३०। (३) शु० य० सं० अ० १४ क० ३०। (४) शु० य० सं० अ० १४ क० ३०। (५) शु० य० सं० अ० १४ क० ३०। (६) शु० य० सं० अ० १४ क० ३०। (७) शु० य० सं० अ० १४ क० ३०। (८) शु० य० सं० अ० १४ क० ३०। (९) शु० य० सं० अ० १४ क० ३०। (१०) शु० य० सं० अ० १४ क० ३०। (११) शु० य० सं० अ० १४ क० ३०। (१२) शु० य० सं० अ० १४ क० ३०। (१३) शु० य० सं० अ० १४ क० ३०।

ऽएवात्राधिपतय ऽआसन् ॥ १६ ॥ 'नवविꣳशत्यास्तुवते'ति । दश हस्त्या ऽअङ्गुलयो दश प्राद्या नव प्राणास्तैरेव तदस्तुवत 'वनस्पतयोऽसृज्यन्ते'ति वनस्पतयोऽत्रासृज्यन्त 'सोमोऽधिपतिरासीदि'ति सोमोऽत्राधिपतिरासीत् ॥ १७ ॥ 'एकत्रिꣳशतास्तुवते'ति । दश हस्त्या ऽअङ्गुलयो दश प्राद्या दश प्राणा ऽआत्मैकत्रिꣳशस्तेनैव तदस्तुवत 'प्रजा ऽअसृज्यन्ते'ति प्रजा ऽअत्रासृज्यन्त 'यवाश्चायवाश्चाधिपतय ऽआसन्नि'ति पूर्वपक्षापरपक्षाऽएवात्राधिपतय ऽआसन् ॥ १८ ॥ 'त्रयस्त्रिꣳशतास्तुवते'ति । दश हस्त्या ऽअङ्गुलयो दश प्राद्या दश प्राणा द्वे प्रतिष्ठे ऽआत्मा त्रयस्त्रिꣳशस्तेनैव तदस्तुवत 'भूतान्यशाम्यन्निति' सर्वाणि भूतान्यत्राशाम्य'न्प्रजापतिः परमेष्ठ्यधिपतिरासीदि'ति प्रजापतिः परमेष्ठ्यत्राधिपतिरासीत् ॥ १९ ॥ ता वा ऽएताः । सप्तदशेष्टका ऽउपदधाति सप्तदशो वै संवत्सरः प्रजापतिः स प्रजनयिता तदेतेन वै सप्तदशेन संवत्सरेण प्रजापतिना प्रजनयित्रैताः प्रजाः प्राजनयद्यत्प्राजनयदसृजत तद्यदसृजत तस्मात्सृष्टयस्ताः सृष्ट्वात्मन्प्रापादयत तथैवैतद्यजमान ऽएतेन सप्तदशेन संवत्सरेण प्रजापतिना प्रजन-

---

(१) शु० य० सं० अ० १४ क० ३१ । (२) शु० य० सं० अ० १४ क० ३१ । (३) शु० य० सं० अ० १४ क० ३१ । (४) शु० य० सं० अ० १३ क० ३१ । (५) शु० य० सं० अ० १४ क० ३१ । (६) शु० य० सं० अ० १४ क० ३१ । (७) शु० य० सं० अ० १४ क० ३१ । (८) शु० य० स० अ० १४ क० ३१ । (९) शु० य० सं० अ० १४ क० ३१ ।

यित्रैताः प्रजाः प्रजनयति ताः सृष्ट्वात्मञ्प्रपादयते रेतः-सिचोर्वेलया पृष्ट्यो वै रेतःसिचौ मध्यमु पृष्ट्यो मध्यत-ऽएवास्मिन्नेताः प्रजाः प्रपादयति सर्वत ऽउपदधाति सर्वत ऽएवास्मिन्नेताः प्रजाः प्रपादयति ॥ २० ॥ (C)

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥

कण्डिकासंख्या ॥ १०५ ॥

—❀—

[स्तोमचित्यर्थवादः]

अथातोऽन्त्यावृतम् । त्रिवृद्वर्तीं पुरस्तादुपदधात्येक-विꣳशवतीं पञ्चात्पञ्चदशवतीं दक्षिणतः सप्तदशवती-मुत्तरतः ॥ १ ॥ एतद्वै प्रजापतिम् । त्रिवृद्वर्त्यामुपहितायां पञ्चदशवत्यां मृत्युरसीददिमामत ऽउपधास्यते तमत्र ग्रहीष्यामीति तं प्रापश्यत्तं प्रख्याय परिक्रम्यैकविꣳशवती मुपाधत्तैकविꣳशवतीं मृत्युरागच्छत्पञ्चदशवतीमुपाधत्त पञ्चदशवतीं मृत्युरागच्छत्सप्तदशवतीमुपाधत्त सोऽत्रैव मृत्युं न्यकरोदुत्रामोहयत्तथैवैतद्यजमानोऽत्रैव सर्वान्पा-प्मनो निकरोत्यत्र मोहयति ॥ २ ॥ अथोत्तराः । त्रिवृ-द्वर्त्यामेव त्रिवृद्वतीमनूपदधात्येकविꣳशवत्यामेकविꣳशवतीं पञ्चदशवत्याꣳ सप्तदशवतीꣳ सप्तदशवत्यां पञ्चदशवतीं

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रौ० १०. ४. १; कठ० सं० १७. ५; कपि० सं० २६. ४; मै० सं० ११. ८. ६; तै० सं० ४. १. १० ।

ता यदेवं व्यतिहारमुपदधाति तस्मादक्ष्णया स्तोमीया-ऽअथो यदेते स्तोमा ऽअतोऽन्यथानुपूर्वं तस्माद्वेवाक्ष्ण-यास्तोमीया ऽअथो ऽएवं देवा ऽउपादधतेतरथासुरास्ततो देवा ऽअभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रा-तृव्यो भवति य ऽएवं वेद ॥ ३ ॥ स ऽएष पशुर्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्य त्रिवृद्वत्यावेव शिरस्ते यत्त्रिवृद्वत्यौ भवतस्त्रिवृद्धि शिरो द्वे भवतो द्विकपालः हि शिरः पूर्वार्द्ध ऽउपदधाति पुरस्ताद्धीदः शिरः ॥ ४ ॥ प्रतिष्ठैकविंशवत्यौ । ते यदेकविंशवत्यौ भवतः प्रतिष्ठा ह्येकविंशो द्वे भवतो द्वन्द्वः हि प्रतिष्ठा पश्चा-दुपदधाति पश्चाद्धीयं प्रतिष्ठा ॥ ५ ॥ बाहू पञ्चदशवत्यौ । ते यत्पञ्चदशवत्यौ भवतः पञ्चदशौ हि बाहू द्वे भवतो द्वौ हीमौ बाहू पाङ्क्तवत ऽउपदधाति पाङ्क्तवतो हीमौ बाहू ॥ ६ ॥ अन्नः सप्तदशवत्यौ । ते यत्सप्तदशवत्यौ भवतः सप्तदशꣳ ह्यन्नं द्वे भवतो द्व्यक्षरꣳ ह्यन्नं ते ऽअनन्तर्हिते पञ्चदशवतीभ्यामुपदधात्यनन्तर्हितं तद्बाहुभ्यामन्नं दधाति बाह्ये पञ्चदशवत्यौ भवतोऽन्तरे सप्तदशवत्यौ बाहुभ्यां तदुभयतोऽन्नं परिगृह्णाति ॥ ७ ॥ अथ या मध्य-ऽउपदधाति । स ऽआत्मा ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यतो ह्ययमात्मा सर्वत ऽउपदधाति सर्वतो ह्ययमात्माथ यदतोऽन्यदतिरिक्तं तद्यद्वै देवानामतिरिक्तं छन्दाꣳसि तानि तद्यानि तानि च्छन्दाꣳसि पशवस्ते तद्ये ते पशवः पुण्यास्ता

लक्ष्म्यस्तद्यास्ताः पुण्या लक्ष्म्योऽसौ स ऽआदित्यः स-ऽआसामेष दक्षिणतः ॥ ८ ॥ ता हैकेऽनन्तर्हिताः । त्रिवृद्वती-ब्भ्यामुपदधति जिह्वा हनू ऽइति ब्रुवन्तो याश्चतुर्दश ते हनू याः षट् सा जिह्वेति न तथा कुर्य्यादिति ते रेचयन्ति यथा पूर्वयोर्हन्वोरपरे हनू ऽअनूपदध्याद्यथा पूर्वस्यां जिह्वा-यामपरां जिह्वामनूपदध्यात्तादृक्तद्यत्राहैव शिरस्तदेव हनू तज्जिह्वा ॥ ९ ॥ अस्मिन्नु हैकेऽवान्तरदेश ऽउपदधाति । असौ वा ऽआदित्य ऽएता ऽअमुं तदादित्यमेतस्यां दिशि दध्म ऽइति न तथा कुर्य्यादन्यानि वाव तानि कर्म्माणि यैरेतमत्र दधाति ॥ १० ॥ दक्षिणत ऽउ हैक ऽउपदधाति । तदेताः पुण्या लक्ष्मीर्दक्षिणतो दध्मह ऽइति तस्माद्यस्य दक्षिणतो लक्ष्म भवति तं पुण्यलक्ष्मीक ऽइत्याचक्षत ऽउत्तरतस्त्रिया ऽउत्तरत ऽआयतना हि स्त्री तत्तत्कृतमेव पुरस्तात्त्वेवैना ऽउपदध्याद्यत्राहैव शिरस्तदेव हनू तज्जिह्वाऽथैताः पुण्या लक्ष्मीर्म्मुखतो धत्ते तस्माद्यस्य मुखे लक्ष्म भवति तं पुण्यलक्ष्मीक ऽइत्याचक्षते ॥ ११ ॥ सैषा ब्रह्मचितिः । यद् ब्रह्मोपादधत तस्माद् ब्रह्मचितिः सा प्रजापतिचितिर्य्यत्प्रजापतिमुपादधत तस्मात्प्रजा-पतिचितिः सर्षिचितिर्य्यदृषीनुपादधत तस्मादृषिचितिः सा वायुचितिर्य्यद्वायुमुपादधत तस्माद्वायुचितिः सा स्तोमचितिर्य्यत्स्तोमानुपादधत तस्मात्स्तोमचितिः सा प्राणचितिर्य्यत्प्राणानुपादधत तस्मात्प्राणचितिरतो यतम-देव कतमच्च विद्यात्तेन हैवास्यैषार्षेयवती बन्धुमती चितिर्भ-

वत्यथ लोकम्पृणे ऽउपदधात्यस्याꣳ स्त्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥ १२ ॥(D)

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

[पञ्चम्यां चितावसपलेष्टकोपधानम्]

पञ्चमीं चितिमुपदधाति। एतद्वै देवाश्चतुर्थीं चितिं चित्वा समारोहन्यदूर्द्धमन्तरिक्षादर्वाचीनं दिवस्तदेव तत्संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन्। चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवन्नित ऽऊर्द्धमिच्छतेति ते चेतयमाना दिवमेव विराजं पञ्चमीं चितिमपश्यꣳस्तेभ्य-ऽएष लोको*ऽच्छदयत् ॥ २ ॥ तेऽकामयन्त। असपत्नमिमं लोकमनुपवाधं कुर्वीमहीति तेऽब्रुवन्नुप तज्जानीत यथेमं लोकमसपत्नमनुपवाधं करवामहा ऽइति तेऽब्रुवꣳश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेमं लोकमसपत्नमनुपबाधं करवामहा ऽइति ॥ ३ ॥ ते चेतयमानाः। एता ऽइष्टका ऽअपश्यन्नसपत्नास्ता ऽउपादधत ताभिरेतं लोकमसपत्नमनुपबाधमकुर्वत तद्यदेताभिरेतं लोकमसपत्नमनुपबाधमकुर्वत तस्मादेता ऽअसपत्नास्तथैवैतद्यजमानो यदेता ऽउपदधात्येतमेवैतल्लोकमसपत्नमनुपबाधं कुरुते सर्वत ऽउपदधाति सर्वत ऽएवैतदेतं लोकमसपत्न-

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ४. ४।

* 'ऽच्छन्दयत्' इति 'ग-ज' पुस्तकयोः।

मनुपबाधं कुरुते परार्द्ध ऽउपदधाति सर्वमेवैतदेतं लोकमसपत्नमनुपबाधं कुरुते ॥ ४ ॥ अथ विराज ऽउपदधाति । एषा वै सा विराड्यां तद्देवा विराजं पञ्चमीं चितिमपश्यँस्ता दृश–दशोपदधाति दृशाक्षरा विराड्विराडेषा चितिः सर्वत ऽउपदधाति यो वा ऽएकस्यां दिशि विराजति न वै स विराजति यो वाव सर्वासु दिक्षु विराजति स ऽएव विराजति ॥ ५ ॥ यद्वै वैता * ऽअसपत्ना ऽउपदधाति । एतद्वै प्रजापतिमेतस्मिन्नात्मनः प्रतिहिते सर्वतः पाप्मोपायतत स ऽएता ऽइष्टका ऽअपश्यदसपत्नास्ता ऽउपाधत्त ताभिस्तं पाप्मानमपाहत पाप्मा वै सपत्नस्तद्यदेताभिः पाप्मानः सपत्नमपाहत तस्मादेता ऽअसपत्नाः ॥ ६ ॥ तद्वा ऽएतत्क्रियते । यद्देवा ऽअकुर्वन्निदं न्विमः स पाप्मा नोपयतते यत्त्वेतत्करोति यद्देवा ऽअकुर्वंस्तत्करवाणीत्यथो य ऽएव पाप्मा यः सपत्नस्तमेताभिरपहते तद्यदेताभिः पाप्मानः सपत्नमपहते तस्मादेता ऽअसपत्नाः सर्वत ऽउपदधाति सर्वत ऽएवैतत्पाप्मानः सपत्नमपहते परार्द्ध ऽउपदधाति सर्वस्मादेवैतदात्मनः पाप्मानः सपत्नमपहते ॥ ७ ॥ स पुरस्तादुपदधाति । 'अग्ने जाताञ्प्रणुदा नः सपत्नानि'[1]ति यथैव यजुस्तथा बन्धुरथ पश्चा'त्सेहसा जातान्प्रणुदा नः सपत्नानि'[2]ति यथैव यजुस्तथा बन्धुः ॥ ८ ॥ सा या

* का० श्रौ० सू० १७. ११. १–३ ।

(१) शु० य० सं० अ० १५ क० १ । (२) शु० य० सं० अ० १५ क० २ ।

पुरस्तादग्निः सा। या पश्चादग्निः साग्निनैव तत्पुरस्तात्पाप्मानमपाहताग्निना पश्चात्तथैवैतद्यजमानोऽग्निनैव पुरस्तात्पाप्मानमपहतेऽग्निना पश्चात् ॥ ९ ॥ अथ दक्षिणतः। 'षोडशी स्तोम ओजो द्रविणमि'त्येकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभमन्तरिक्षं चतस्रो दिश एष एव वज्रः पञ्चदशस्तस्यासावेवादित्यः षोडशी वज्रस्य भर्त्ता स एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपाहत तथैवैतद्यजमान एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपहते ॥ १० ॥ अथोत्तरतः। 'चतुश्चत्वारिंशः स्तोमो वर्चो द्रविणमि'ति चतुश्चत्वारिंशदक्षरा वै त्रिष्टुप्त्रैष्टुभो वज्रः स एतेन चतुश्चत्वारिंशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपाहत तथैवैतद्यजमान एतेन चतुश्चत्वारिंशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपहते ॥ ११ ॥ अथ मध्ये। 'अग्नेः पुरीषमसी'ति ब्रह्म वै चतुर्थी चितिरग्निरु वै ब्रह्म तस्या एतत्पुरीषमिव यत्पश्च'म्यप्सो नामे'ति तस्योक्तो बन्धुः ॥ १२ ॥ तां प्राचीं तिरश्चीमुपदधाति। एतद्वै तया प्रजापतिः पाप्मानो मूलमवृश्चत्तथैवैनयायमेतत्पाप्मनो मूलं व्वृश्चति दक्षिणतो दक्षिणत एवाग्नो हि वज्रोऽन्तरेण दक्षिणां दिशमियामुष्यामाय ह तमवकाशं करोति ॥ १३ ॥ सा या पुरस्तात्प्राणः सा। या पश्चादपानः

(१) शु० य० सं० अ० १५ क० ३। (२) शु० य० सं० अ० १५ क० ३। (३) शु० य० सं० अ० १५ क० ३। (४) शु० य० सं० अ० १५ क० ३।

सा प्राणेनैव तत्पुरस्तात्पाप्मानमपाहतापानेन पश्चात्तथैवैतद्यजमानः प्राणेनैव पुरस्तात्पाप्मानमपहतेऽपानेन पश्चात् ॥ १४ ॥ अथ ये ऽअभितः । तौ बाहू स योऽस्याभितः पाप्मासीद् बाहुभ्यां तमपाहत तथैवैतद्यजमानो योऽस्याभितः पाप्मा भवति बाहुभ्यामेव तमपहते ॥ १५ ॥ अन्नं पुरीषवती । स योऽस्योपरिष्टात्पाप्मासीदन्नेन तमपाहत तथैवैतद्यजमानो योऽस्योपरिष्टात्पाप्मा भवत्यन्नेनैव तमपहते ॥ १६ ॥ स यद्ध वाऽएवंवित्प्राणिति । योऽस्य पुरस्तात्पाप्मा भवति तं तेनापहतेऽथ यदपानिति तेन तं ऋषः पश्चादथ यद्बाहुभ्यां कर्म्म कुरुते तेन तं ऋषोऽभितोऽथ यदन्नमत्ति तेन तं ऋषऽउपरिष्टात्सर्वदा ह वा ऽएवंवित्पाप्मानमपहतेऽपि स्वपँस्तस्मादेवं विदुषः पापं न कीर्त्तयेन्नेदस्य पाप्मासानीति ॥ १७ ॥ (A)

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

अथ छन्दुस्या ऽउपदधाति । एतद्वै प्रजापतिः पाप्मनो मृत्योर्म्मुक्त्वान्नमैच्छत्तस्मादु हैतदुपतापी बुसीयान्भूत्वान्नमिच्छति तस्मिन्नाशः सन्तेऽन्नमिच्छति जीविष्यतीति तस्मै देवा ऽएतदुन्नं प्रायच्छन्नेताइछन्दुस्याः पशवो वै छन्दाꣳस्यन्नं पशवस्ता-

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा– का० श० १०. ५. १; कठ० सं० १७. ६; कपिष्ठ० २६. ५, म० सं० ११. ८. ७; तै० सं० ४. ३. १२ ।

ऽयस्म्मा ऽअच्छदयँस्तानि यदस्म्मा ऽअच्छदयँस्तस्म्माच्छन्दाꣳसि ॥ १ ॥ ता दश * दशोपदधाति । दशाक्षरा विराड् विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत ऽउपदधाति सर्वत ऽएवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥ २ ॥ 'एवश्छन्द' ऽइति । अयं वै लोक ऽएवश्छन्दो 'वरिवश्छन्द' ऽइत्यन्तरिक्षं वै वरिवश्छन्दः 'शम्भूश्छन्द' ऽइति द्यौर्वै शम्भूश्छन्दः 'परिभूश्छन्द' ऽइति दिशो वै परिभूश्छन्द 'ऽआच्छच्छन्द' ऽइत्यन्नं वा ऽआच्छच्छन्दो 'मनश्छन्द' ऽइति प्रजापतिर्वै मनश्छन्दो 'व्यचश्छन्द' ऽइत्यसौ वा ऽआदित्यो व्यचश्छन्दः ॥ ३ ॥ 'सिन्धुश्छन्द' ऽइति । प्राणो वै सिन्धुश्छन्दः 'समुद्रश्छन्द' ऽइति मनो वै समुद्रश्छन्दः 'सरिरं छन्द' ऽइति वाग्वै सरिरं छन्दः 'ककुप्छन्द' ऽइति प्राणो वै ककुप्छन्द- 'स्त्रिककुप्छन्द' ऽइत्युदानो वै त्रिककुप्छन्दः 'काव्यं छन्द' ऽइति त्रयी वै विद्या काव्यं छन्दोऽङ्कुपं छन्द- ऽइत्यापो वा ऽअङ्कुपं छन्दो'ऽक्षरपङ्क्तिश्छन्द' ऽइत्यसौ वै लोकोऽक्षरपङ्क्तिश्छन्दः 'पदपङ्क्तिश्छन्द' ऽइत्ययं वै लोकः

* का० श्रौ० सू० १७. ११. ५ ।

(१) शु० य० सं० अ० १५ क० ४। (२) शु० य० सं० अ० १५ क० ४। (३) शु० य० सं० अ० १५ क० ४। (४) शु० य० सं० अ० १५ क० ४। (५) शु० य० सं० अ० १५ क० ४। (६) शु० य० सं० अ० १५ क० ४। (७) शु० य० सं० अ० १५ क० ४। (८) शु० य० सं० अ० १५ क० ४। (९) शु० य० सं० अ० १५ क० ४। (१०) शु० य० सं० अ० १५ क० ४। (११) शु० य० सं० अ० १५ क० ४। (१२) शु० य० सं० अ० १५ क० ४। (१३) शु० य० सं० अ० १५ क० ४। (१४) शु० य० सं० अ० १५ क० ४। (१५) शु० य० सं० अ० १५ क० ४।

पदुपङ्क्तिश्छन्दो 'विष्टारपङ्क्तिश्छन्दः' ऽइति दिशो वै विष्टारपङ्क्तिश्छन्दः 'क्षुरो बभ्रजश्छन्द' ऽइत्यसौ वा ऽआदित्यः क्षुरो बभ्रजश्छन्द 'ऽआच्छच्छन्दः प्रच्छच्छन्द'ऽइत्यन्नं वा ऽआच्छच्छन्दोऽन्नं प्रच्छच्छन्दः ॥ ४ ॥ 'सँऽयच्छन्द' ऽइति । रात्रिर्वै सँऽयच्छन्दो 'वियच्छन्द'ऽइत्यहर्वै वियच्छन्दो 'बृहच्छन्द' ऽइत्यसौ वै लोको बृहच्छन्दो 'रथन्तरं छन्द' ऽइत्ययं वै लोको रथन्तरं छन्दो 'निकायश्छन्द' ऽइति वायुर्वै निकायश्छन्दो 'विवधश्छन्द'ऽइत्यन्तरिक्षं वै विवधश्छन्दो 'गिरश्छन्द' ऽइत्यन्नं वै गिरश्छन्दो 'बभ्रजश्छन्द' इत्यग्निर्वै बभ्रजश्छन्दः 'सप्तंस्तुप्छन्दोऽनुष्टुप्छन्द' ऽइति वागेव सप्तंस्तुप्छन्दो वागनुष्टुप्छन्द 'ऽएवश्छन्दो वरिवश्छन्द' ऽइति तस्योक्तो बन्धुः ॥ ५ ॥ 'वयश्छन्द' ऽइति । अन्नं वै वयश्छन्दो 'वयस्कृच्छन्द' ऽइत्यग्निर्वै वयस्कृच्छन्दो 'विष्पर्द्धाश्छन्द' ऽइत्यसौ वै लोको विष्पर्द्धाश्छन्दो 'विशालं छन्द' ऽइत्ययं वै लोको विशालं छन्द'श्छदिश्छन्द' ऽइत्यन्तरिक्षं वै छदिश्छन्दो

---

(१) शु० य० सं० अ० १५ क० ४। (२) शु० य० सं० अ० १५ क० ४। (३) शु० य० सं० अ० १५ क० ५। (४) शु० य० सं० अ० १५ क० ५। (५) शु० य० सं० अ० १५ क० ५। (६) शु० य० सं० अ० १५ क० ५। (७) शु० य० सं० अ० १५ क० ५। (८) शु० य० सं० अ० १५ क० ५। (९) शु० य० सं० अ० १५ क० ५। (१०) शु० य० सं० अ० १५ क० ५। (११) शु० य० सं० अ० १५ क० ५। (१२) शु० य० सं० अ० १५ क० ५। (१३) शु० य० सं० अ० १५ क० ५। (१४) शु० य० सं० अ० १५ क० ५। (१५) शु० य० सं० अ० १५ क० ५। (१६) शु० य० सं० अ० १५ क० ५। (१७) शु० य० सं० अ० १५ क० ५। (१८) शु० य० सं० अ० १५ क० ५।

'दूरोहणं छन्द' ऽइत्यसौ वा ऽआदित्यो दूरोहणं छन्दस्तन्द्रं छन्द' ऽइति पङ्क्तिर्वै तन्द्रं छन्दो'ऽङ्काङ्कं छन्द' ऽइत्यापो वा ऽअङ्काङ्कं छन्दः ॥ ६ ॥ तद्याः पुरस्तादुपदधाति । प्राणस्तासां प्रथमा व्यानो द्वितीयोदानस्तृतीयोदानश्चतुर्थी व्यानः पञ्चमी प्राणः षष्ठी प्राणः सप्तमी व्यानोऽष्टम्युदानो नवमी यजमान ऽएवात्र दशमी स ऽएष यजमान ऽएतस्यां विराज्यूर्ध्वूढः प्रतिष्ठितः प्राणमुख्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे प्राणा ऽअर्वाञ्चश्च पराञ्चश्च ॥ ७ ॥ अथ या दक्षिणतः । अग्निस्तासां प्रथमा वायुर्द्वितीयादित्यस्तृतीयादित्यश्चतुर्थी वायुः पञ्चम्यग्निः षष्ठ्यग्निः सप्तमी वायुरष्टम्यादित्यो नवमी यजमान ऽएवात्र दशमी स ऽएष यजमान ऽएतस्यां विराज्यूर्ध्वूढः प्रतिष्ठितो देवतामुख्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेते देवा ऽअर्वाञ्चश्च पराञ्चश्च ॥ ८ ॥ अथ याः पश्चात् । अयं लोकस्तासां प्रथमान्तरिक्षं द्वितीया द्यौस्तृतीया द्यौश्चतुर्थ्यन्तरिक्षं पञ्चम्ययं लोकः षष्ठ्ययं लोकः सप्तम्यन्तरिक्षमष्टमी द्यौर्नवमी यजमान ऽएवात्र दशमी स ऽएष यजमान ऽएतस्यां विराज्यूर्ध्वूढः प्रतिष्ठितो लोकमुख्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे लोका ऽअर्वाञ्चश्च पराञ्चश्च ॥ ९ ॥ अथ या ऽउत्तरतः ।

---

(१) शु० य० सं० अ० १५ क० ५। (२) शु० य० सं० अ० १५ क० ५। (३) शु० य० सं० अ० १५ क० ५ ।

ग्रीष्मस्तासां प्रथमा वर्षा द्वितीया हेमन्तस्तृतीया हेमन्तश्चतुर्थी वर्षाः पञ्चमी ग्रीष्मः षष्ठी ग्रीष्मः सप्तमी वर्षा ऽअष्टमी हेमन्तो नवमी यजमान ऽएवात्र दशमी स ऽएष यजमान ऽएतस्यां विराज्ज्यूर्ध्वूढः प्रतिष्ठित ऽऋतुमुष्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेत ऽऋतवोऽर्वाञ्चश्च पराञ्चश्च ॥ १० ॥ अथ पुनरेव । याः पुरस्तादुपदधाति प्राणास्ते ता दश भवन्ति दश वै प्राणाः पूर्वार्द्ध ऽउपदधाति पुरस्ताद्धीमे प्राणाः ॥ ११ ॥ अथ या दक्षिणतः । एतास्ता देवता ऽअग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चान्नं चापश्च ॥ १२ ॥ अथ याः पश्चात् । दिशस्ताश्चतस्रो दिशश्चतस्रोऽवान्तरदिश ऽऊर्द्धा चेयं च ॥ १३ ॥ अथ या ऽउत्तरतः । मासास्ते वासन्तिकौ द्वौ ग्रैष्मौ द्वौ वार्षिकौ द्वौ शारदौ द्वौ हैमन्तिकौ द्वौ ॥ १४ ॥ अथ पुनरेव । या प्रथमा दशदयः स लोको या द्वितीयान्तरिक्षं तद्या तृतीया द्यौः सेममेव लोकं प्रथमया दशतारोहन्नन्तरिक्षं द्वितीयया दिवं तृतीयया तथैवैतद्यजमान ऽइममेव लोकं प्रथमया दशता रोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया ॥ १५ ॥ स स पराङिव रोहः । इयमु वै प्रतिष्ठा ते देवा ऽइमां प्रतिष्ठामभिप्रत्यायँस्तथैवैतद्यजमान ऽइमां प्रतिष्ठामभिप्रत्यैत्यथ योत्तमा

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ५. २; कठ० सं० १७. ६; कपि० २६. ५; मै० सं० ११. ८. ७. तै० सं० ४. १. १२ ।

दशदयः स लोकस्तस्माद्यथैव प्रथमायै दशतः प्रभृतिरेवमुत्तमायै समानꣳ ह्येतद्यदेते दशतावयमेव लोकः ॥ १६ ॥ ता वा ऽएताः । चत्वारिꣳशद्दिष्टकाश्चत्वारिꣳशद्यजूꣳषि तदशीतिरन्नमशीतिस्तद्यद्येतदाह तदस्माऽअन्नमशीतिं कृत्वा प्रयच्छति तेनैनं प्रीणाति ॥ १७ ॥ (B)

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[पञ्चम्यां चितौ स्तोमभागेष्टकोपधानम्]

अथ स्तोमभागा ऽउपदधाति । एतद्वै प्रजापतेरेतदन्नमिन्द्रोऽभ्यध्यायत्तसोऽस्माद्दुदचिक्रमिषत्तमब्रवीत्कथोत्क्रामसि कथा मा जहासीति स वै मेऽस्यान्नस्य रसं प्रयच्छेति तेन वै मा सह प्रपद्यस्वेति तथेति तस्माऽएतस्यान्नस्य रसं प्रायच्छत्तेनैनꣳ सह प्रापद्यत ॥ १ ॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ यत्तदन्नमेतास्ताश्छन्दस्या ऽअथ यः सोऽन्नस्य रसऽएतास्ता * स्तोमभागा अथ यः स ऽइन्द्रोऽसौ सऽआदित्यः स ऽएष ऽएव स्तोमो यद्धि किञ्च स्तुवतऽएतमेव तेन स्तुवन्ति तस्माऽएतस्मै स्तोमायैतं भागं प्रायच्छत्तद्यदेतस्मै स्तोमायैतं भागं प्रायच्छत्तस्मात्स्तोमभागाः ॥ २ ॥ 'रश्मिर्नो सत्याय सत्यं जिन्वे'ति । एष वै रश्मिररन्नꣳ रश्मिरेतं च तद्रसं च सन्धायात्म-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १०. ५. २ ।

* का० श्रौ० सू० १७. ११. ९ ।

(१) शु० य० सं० अ० १५ क० ६ ।

ऽप्रपादयते 'प्प्रेतिनाऽ धर्म्मणा धर्म्मं जिन्वे'त्येष वै प्प्रेतिरन्नं प्प्रेतिरेतं च तद्दसं च सन्धायात्मन्प्रपादयते'ऽश्विर्त्यो दिवा दिवं जिन्वे'त्येष वा ऽअश्वितिरन्नमश्वितिरेतं च तद्दसं च सन्धायात्मन्प्रपादयते तद्यदेतदाह तच्च तद्दसं च सन्धायात्मन्प्रपादयतेऽमुनादो जिन्वादोऽस्यमुष्मै 'त्वाधिपतिनोर्ज्जोर्ज्जं जिन्वे'ति त्रेधाविहितास्त्रेधाविहितꣳ ह्यन्नम् ॥ ३ ॥ यद्वेव स्तोमभागा ऽउपदधाति । एतद्वै देवा विराजं चितिं चित्त्वा समारोहँस्तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्ते चेतयमाना नाकमेव स्वर्गं लोकमपश्यँस्तमुपादधत स यः स नाकः स्वर्गो लोक ऽएतास्ता स्तोमभागास्तद्यदेता ऽउपदधाति नाकमेवैतत्स्वर्गं लोकमुपधत्ते ॥ ४ ॥ तद्यास्तिस्रः प्रथमाः । अयꣳ स लोको या द्वितीया ऽअन्तरिक्षं तद्यास्तृतीया द्यौः सा याश्चतुर्त्थ्यः प्राची सा दिग्याः पञ्चम्यो दक्षिणा सा याः षष्ठ्यः प्रतीची सा याः सप्तम्य ऽउदीची सा ॥ ५ ॥ ता वाऽएताः । एकविꣳशतिरिष्टका ऽइमे च लोका दिशश्चेमे च वै लोका दिशश्च प्रतिष्ठेमे च लोका दिशश्चैकविꣳशस्तस्मादाहुः प्रतिष्ठैकविꣳश ऽइति ॥ ६ ॥ अथ याऽअष्टाविष्टका ऽअतियन्ति । साष्टाक्षरा गायत्री ब्रह्म गायत्री तद्यत्तद् ब्रह्मैतत्तद्यदेतन्मण्डलं तपति तदेतस्मिन्नेकविꣳशे प्रतिष्ठायां प्रतिष्ठितं तपति तस्मान्नावप-

(१) शु० य० सं० अ० १५ क० ६ । (२) शु० य० सं० अ० १५ क० ६ । (३) शु० य० सं० अ० १५ क० ७ ।

यते ॥ ७ ॥ तद्धैके * । वेषश्श्रीः 'क्षत्राय क्षत्रं जिन्वे'ति त्रिःशत्तमीमुपदधति त्रिःशदक्षरा विराड्विराडेषा क्षितिरिति न तथा कुर्य्यादिति ते रेचयन्त्येकविंशसम्पदमथो गायत्रीसम्पदमथो ऽइन्द्र लोको हैष यैषाऽन्यूना विराडिन्द्राय ह त ऽइन्द्रलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्तीन्द्रमिन्द्रलोकान्नुदन्ते यजमानो वै स्वे यज्ञ ऽइन्द्रो यजमानाय ह ते यजमानलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्ति यजमानं व्यजमानलोकान्नुदन्ते यं वाऽएतमग्निमाहुरन्त्येष ऽएव यजमान ऽआयतनेनैष ऽउऽएवात्र त्रिःशत्तमी ॥ ८ [अर्धप्रपाठकः ५४॥] (C)

पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

ता ऽअषाढायै वेलयोपदधाति । वाग्वा ऽअषाढा रस ऽएष वाचि तद्रसं दधाति तस्मात्सर्वेषामङ्गानां वाचैवान्नस्य रसं विजानाति ॥ १ ॥ यद्वेवाषाढायै । इयं वा ऽअषाढासावादित्य स्तोमभागा ऽअमुं तदादित्यमस्यां प्रतिष्ठायां प्रतिष्ठापयति ॥ २ ॥ यद्वेवाषाढायै । इयं वाऽअषाढा हृदयꣳ स्तोमभागा ऽअस्यां तद्धृदयं मनो दधाति तस्मादस्याꣳ हृदयेन मनसा चेतयते सर्वतऽउपदधाति सर्वतस्तद्धृदयं मनो दधाति तस्मादस्याꣳ सर्वतो हृदयेन मनसा चेतयतेऽथो पुण्या

* का० श्रौ० सू० १७. ११. ११ ।

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा - का० श० १०. ५. ३, कठ० १७. ७; कपिष्ठ० २६, ६; मै० सं० ११. ८, ८; तै० सं० ४. ४. १ ।

हैता लक्ष्म्यस्ता ऽएतत्सर्व्वतो धत्ते तस्मात्यस्य सर्व्वतो लक्ष्म भवति तं पुण्यलक्ष्मीक ऽइत्याचक्षते ॥ ३ ॥ अथैनाः पुरीषेण प्रच्छादयति । अन्नं वै पुरीषः रस ऽएष तमेतत्तिरः करोति तस्मात्तिर ऽइवान्नस्य रसः ॥ ४ ॥ यद्वेव पुरीषेण । अन्नं वै पुरीषः रस ऽएषोऽन्नं च तद्दसं च सन्तनोति सन्दधाति ॥ ५ ॥ यद्वेव पुरीषेण । हृदयं वै स्तोमभागाः पुरीतत्पुरीषः हृदयं तत्पुरीतता प्रच्छादयति ॥६॥ यद्वेव पुरीषेण । संवत्सर ऽएषोऽग्निस्तमेतच्चितिपुरीषैव्व्यर्व्यावर्त्तयति तद्याश्च्चतस्रः प्रथमाश्चितयस्ते चत्वार ऽऋतवोऽथ स्तोमभागा ऽउपधाय पुरीषं निवपति सा पञ्चमी चितिः स पञ्चम ऽऋतुः ॥७॥ तदाहुः । यल्लोकम्पृणान्ता ऽअन्न्याश्च्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति कात्र लोकम्पृणेत्यसौ वा ऽआदित्यो लोकम्पृणैष ऽउ ऽएषा चितिः सैषा स्वयं लोकम्पृणा चितिरथ यदुत ऽऊर्द्धमा पुरीषात्सा षष्ठी चितिः स षष्ठ ऽऋतुः ॥ ८ ॥ अथ पुरीषं निवपति । तत्र विकर्णीं च स्वयमातृण्णां चोपदधाति हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति सा सप्तमी चितिः स सप्तम ऽऋतुः ॥ ९ ॥ ता ऽउ वै षडेव । यद्धि विकर्णी च स्वयमातृण्णा च षष्ठ्या ऽएव तच्चितेः ॥ १० ॥ ता ऽउ वै पञ्चैव । यजुषान्न्यासु पुरीषं निवपति तूष्णीमत्र तेनैषा न चितिरथो लोकम्पृणान्ता ऽअन्न्याश्च्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति तेनो ऽएवैषा न चितिः ॥ ११ ॥ ता-

ऽउ वै तिस्र ऽएव । अयमेव लोकः प्रथमा चितिर्द्यौरुत्तमाथ या ऽएतास्तिस्रस्तदन्तरिक्षं तद्वा ऽइदमेकमिवैवान्तरिक्षं ता ऽएवं तिस्र ऽएवं पञ्चैवः षडेवः सप्त ॥ १२ ॥ (D)

पञ्चमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

[नाकसत्पञ्चचृडेष्टकोपधानम्]

नाकसद ऽउपदधाति । देवा वै नाकसदोऽत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र नाकः स्वर्गो लोकस्तस्मिन्देवा ऽअसीदँस्तद्यदेतस्मिन्नाके स्वर्गे लोके देवा ऽअसीदँस्तस्माद्देवा नाकसदस्तथैवैतद्यजमानो यदेता ऽउपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥ १ ॥ यद्वेव नाकसद * ऽउपदधाति । एतद्वै देवा ऽएतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तेऽब्रुवन्नुप तज्जानीत यथास्मिन्नाके स्वर्गे लोके सीदामेति तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथास्मिन्नाके स्वर्गे लोके सीदामेति ॥ २ ॥ ते चेतयमानाः । एता ऽइष्टका ऽअपश्यन्नाकसदस्ता ऽउपादधत ताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदँस्तद्यदेताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदँस्तस्मादेता नाकसद-

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रा० १०. ५. ४ ।

* का० श्रौ० सू० १७. १२. १ ।

स्तथैवैतद्यजमानो यदेता ऽउपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥ ३ ॥ दिक्षूपदधाति । दिशो वै स नाकः स्वर्गो लोकः स्वर्ग ऽएवैना ऽएतल्लोके सादयत्यृतव्यानां वेलया संवत्सरो वा ऽऋतव्याः संवत्सरः स्वर्गो लोकः स्वर्ग ऽएवैना ऽएतल्लोके सादयत्यन्तस्तोमभागमेष वै स नाकः स्वर्गो लोकस्तस्मिन्नेवैना ऽएतत्प्रतिष्ठापयति ॥ ४ ॥ स पुरस्तादुपदधाति । 'राज्ञ्यसि प्राची दिग्'ति राज्ञी ह नामैषा प्राची 'दिग्वसवस्ते देवा ऽअधिपतय' ऽइति वसवो हैतस्यै दिशो देवा 'ऽअधिपतयोऽग्निर्हेतीनां प्रतिधर्त्ते'त्यग्निर्हैवात्र हेतीनां प्रतिधर्त्ता 'त्रिवृत्त्वा स्तोमः पृथिव्याश्श्रयत्वि'ति त्रिवृता हैषा स्तोमेन पृथिव्याश्श्रि'ताज्यमुक्थमव्यथायै स्तभ्नात्वि'त्याज्येन हैषोक्थेनाव्यथायै पृथिव्याश्स्तब्धा 'रथन्तरꣳ साम प्रतिष्ठित्या ऽअन्तरिक्ष' ऽइति रथन्तरेण हैषा साम्ना प्रतिष्ठितान्तरिक्ष 'ऽऋषयस्त्वा प्रथमजा देवेष्वि'ति प्राणा वा ऽऋषयः प्रथमजास्तद्धि ब्रह्म प्रथमजं 'दिवो मात्रया वरिम्णा प्रथन्त्वि'ति यावती द्यौस्तावतीं वरिम्णा प्रथन्त्वित्ये'तद्विधर्त्ता चायमधिपतिश्चे'ति वाक्च तौ मनश्च

(१) शु० य० सं० अ० १५ क० १० । (२) शु० य० सं० अ० १५ क० १० । (३) शु० य० सं० अ० १५ क० १० । (४) शु० य० सं० अ० १५ क० १० । (५) शु० य० सं० अ० १५ क० १० । (६) शु० य० सं० अ० १५ क० १० । (७) शु० य० सं० अ० १५ क० १० । (८) शु० य० सं० अ० १५ क० १० । (९) शु० य० सं० अ० १५ क० १० ।

तौ हीदꣳ सर्वं विधारयत'स्ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्ति्व'ति यथैव यजुस्तथा बन्धुः ॥ ५ ॥ अथ दक्षिणतः । 'विराडसि दक्षिणा दिगि'ति विराड्ढ नामैषा दक्षिणा दि'ग्गुद्दास्ते देवा ऽअधिपतय' ऽइति रुद्रा हैतस्यै दिशो देवा 'ऽअधिपतय ऽइन्द्रो हेतीनां प्रतिधर्त्ते'तीन्द्रो हैवात्र हेतीनां प्रतिधर्त्ता 'पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्ति्व'ति पञ्चदशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता प्र ऽउगमुक्थमव्यथायै स्तभ्नात्ति्व'ति प्र ऽउगेण हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा 'बृहत्साम प्रतिष्ठित्या ऽअन्तरिक्ष' ऽइति बृहता हैषा साम्ना प्रतिष्ठिताऽन्तरिक्ष ऽऋषयस्त्वा प्रथमजा देवेष्ति्व'ति तस्योक्तो बन्धुः ॥ ६ ॥ अथ पश्चात् । 'सम्राडसि प्रतीची दिगि'ति सम्राड्ढ नामैषा प्रतीची दि'गादित्यास्ते देवा ऽअधिपतय' ऽइत्यादित्या हैतस्यै दिशो 'देवा ऽअधिपतयो वरुणो हेतीनां प्रतिधर्त्ते'ति वरुणो हैवात्र हेतीनां प्रतिधर्त्ता 'सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतित्ति्व'ति सप्तदशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता 'मरुत्वती-

(१) शु० य० सं० अ० १५ क० १० । (२) शु० य० सं० अ० १५ क० ११ । (३) शु० य० सं० अ० १५ क० ११ । (४) शु० य० सं० अ० १५ क० ११ । (५) शु० य० सं० अ० १५ क० ११ । (६) शु० य० सं० अ० १५ क० ११ । (७) शु० य० सं० अ० १५ क० ११ । (८) शु० य० सं० अ० १५ क० ११ । (९) शु० य० सं० अ० १५ क० १२ । (१०) शु० य० सं० अ० १५ क० १२ । (११) शु० य० सं० अ० १५ क० १२ । (१२) शु० य० सं० अ० १५ क० १२ । (१३) शु० य० सं० अ० १५ क० १२ ।

यमुक्थमव्यथायै स्तभ्नात्वि'ति मरुत्वतीयेन हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तभ्धा 'वैरूपꣳ साम प्रतिष्ठित्या ऽअन्तरिक्ष' ऽइति वैरूपेण हैषा साम्म्ना प्रतिष्ठि'तान्तरिक्ष ऽऋषयस्त्वा प्रथमजा देवष्वि'ति तस्योक्तो बन्धुः ॥ ७ ॥ अथोत्तरतः । 'स्वराडस्युदीची दिगि'ति स्वराड्ढ नामैषोदीची दिङ् 'मरुतस्ते देवा ऽअधिपतय' ऽइति मरुतो हैतस्यै दिशो देवा ऽअधिपतयः 'सोमो हेतीनां प्रतिधत्ते'ति सोमो हैवात्र हेतीनां प्रतिध'त्तैकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्वि'त्येकविꣳशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता 'निष्केवल्यमुक्थमव्यथायै स्तभ्नात्वि'ति निष्केवल्येन हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तभ्धा 'वैराजꣳ साम प्रतिष्ठित्या ऽअन्तरिक्ष' ऽइति वैराजेन हैषा साम्म्ना प्रतिष्ठि'तान्तरिक्ष ऽऋषयस्त्वा प्रथमजा देवेष्वि'ति तस्योक्तो बन्धुः ॥ ८ ॥ अथ मध्ये । 'अधिपत्न्यसि बृहती दिगि'त्यधिपत्नी ह नामैषा बृहती 'दिग्विश्वे ते देवा ऽअधिपतय' ऽइति विश्वे हैतस्यै दिशो देवा ऽअधिपतयो 'बृहस्पतिर्हेतीनां प्रतिधत्ते'ति बृहस्पति-

(१) शु० य० सं० अ० १५ क० १२। (२) शु० य० सं० अ० १५ क० १२। (३) शु० य० सं० अ० १५ क० १३। (४) शु० य० सं० अ० १५ क० १३। (५) शु० य० सं० अ० १५ क० १३। (६) शु० य० सं० अ० १५ क० १३। (७) शु० य० सं० अ० १५ क० १३। (८) शु० य० सं० अ० १५ क० १३। (९) शु० य० सं० अ० १५ क० १३। (१०) शु० य० सं० अ० १५ क० १४। (११) शु० य० सं० अ० १५ क० १४। (१२) शु० य० सं० अ० १५ क० १४।

हैवात्र हेतीनां प्रतिधर्त्ता 'त्रिण॑वत्त्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतामि'ति त्रिणवत्त्रयस्त्रिꣳशाभ्याꣳ हैषा स्तोमाभ्यां पृथिव्याꣳ श्रिता 'वै॑श्वदेवाग्निमारुते-ऽउक्थे ऽअव्यथायै स्तभ्नीतामि'ति वैश्वदेवाग्निमारुताभ्याꣳ हैषोक्थाभ्यामव्यथायै पृथिव्याꣳ स्तभ्धा 'शाङ्क्व॑ररैवते सामनी प्रतिष्ठित्या ऽअन्तरिक्ष' ऽइति शाङ्क्व॑ररैवताभ्याꣳ हैषा सामभ्यां प्रतिष्ठितान्तरिक्ष-'ऽऋ॑षयस्त्वा प्रथमजा देवेष्वि'ति तस्योक्तो बन्धुः ॥ ९ ॥ एतावान्वै सर्वो यज्ञः । यज्ञ ऽउ देवानामात्मा यज्ञमेव तद्देवा ऽआत्मानं कृत्वैतस्मिन्नाके स्वर्गे लोकेऽसीदँस्तथै-वैतद्यजमानो यज्ञमेवात्मानं कृत्वैतस्मिन्नाके स्वर्गे लोके सीदति ॥ १० ॥ अथ * पञ्चचूडा ऽउपदधाति । यज्ञो वै नाकसदो यज्ञ ऽउ ऽएव पञ्चचूडास्तद्य ऽइमे चत्वार-ऽऋत्विजो गृहपतिपञ्चमास्ते नाकसदो होत्राः पञ्चचूडा-ऽअतिरिक्तं वै तद्यद्धोत्रा यदु वा ऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥ ११ ॥ यद्वेव नाकसत्पञ्चचूडा ऽउपदधाति । आत्मा वै नाकसदो मिथुनं पञ्चचूडा ऽअर्द्धमु हैतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै ॥ १२ ॥ यद्वेव नाकसत्पञ्चचूडा ऽउपदधाति । आत्मा वै नाकसदः प्रजा पञ्चचूडा ऽअतिरिक्तं वै तदात्मनो यत्प्रजा यदु

(१) शु० य० सं० अ० १५ क० १४। (२) शु० य० सं० अ० १५ क० १४। (३) शु० य० सं० अ० १५ क० १४। (४) शु० य० सं० अ० १५ क० १४।
* का० श्रौ० सू० १०. १२. २१।

वा ऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥ १३ ॥ यद्वेव नाकसत्पञ्चचूडा ऽउपदधाति । दिशो वै नाकसदो दिश ऽउ ऽएव पञ्चचूडास्तद्या ऽअमुष्मादादित्यादर्वाच्च्यः पञ्च दिशस्ता नाकसदो याः पराच्च्यस्ताः पञ्चचूडा ऽअतिरिक्ता वै ता दिशो या ऽअमुष्मादादित्यात्पराच्च्यो यदु वा ऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥ १४ ॥ यद्वेव पञ्चचूडा ऽउपदधाति । एतद्वै देवा ऽअबिभयुर्य्यद्वै न ऽइमाँल्लोकानुपरिष्टाद्दक्षाथ्ँसि नाष्ट्रा न हन्युरिति त ऽएतानेषां लोकानामुपरिष्टाद्गोप्तॄनकुर्वत य ऽएते हेतयश्च प्रहेतयश्च तथैवैतद्यजमान ऽएतानेषां लोकानामुपरिष्टाद्गोप्तॄन्कुरुते य ऽएते हेतयश्च प्रहेतयश्च ॥ १५ ॥ स पुरस्तादुपदधाति । 'अयं पुरो हरिकेश' ऽइत्यग्निर्वै पुरस्तद्यत्तमाह पुर ऽइति प्राञ्चꣳ ह्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्धरिकेश ऽइत्याह हरिरिव ह्यग्निः 'सूर्य्यरश्मिरि'ति सूर्य्यस्येव ह्यग्ने रश्मय'स्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्या'विति वासन्तिकौ तावृतू 'पुञ्जिकस्थला च क्रतुस्थला चाप्सरसावि'ति दिक् चोपदिशा चेति ह स्माह माहित्थिः सेना च तु ते समितिश्च 'दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरि'ति यद्वै सेनायां च

(१) शु० य० सं० अ० १५ क० १५ । (२) शु० य० सं० अ० १५ क० १५ । (३) शु० य० सं० अ० १५ क० १५ । (४) शु० य० स० अ० १५ क० १५ । (५) शु० य० सं० अ० १५ क० १७ ।

समितौ चर्त्तीयन्ते ते 'दंष्ट्रक्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरि'ति यदुन्योऽन्यं घ्नन्ति स पौरुषेयो वधः प्रहेति'स्तेभ्यो नमो ऽअस्तु'ति तेभ्य ऽएव नमस्करोति 'ते नो मृडयन्तु'ति त ऽएवास्मै मृडयन्ति 'ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म' ऽइति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधामीति ह ब्रूयाद्यं द्विष्यात्ततोऽह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयं निर्द्दिष्टो ह्येव स यमेवं विद्वेष्टि ॥ १६ ॥ अथ दक्षिणतः । 'अयं दक्षिणा विश्वकर्म्मेत्ययं वै वायुर्विश्वकर्म्मा योऽयं पवत ऽएष हीदꣳ सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणैव भूयिष्ठं वाति 'तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू 'मेनका च सहजन्या चाप्सरसाविति द्विचोपदिशा चेति ह स्माह माहित्थिरिमे तु ते द्यावापृथिवी 'यातुधाना हेती रक्षाꣳसि प्रहेतिरि'ति यातुधाना हैवात्र हेती रक्षाꣳसि प्रहेति'स्तेभ्यो नमो ऽअस्तु'ति तस्योक्तो बन्धुः ॥ १७ ॥ अथ पश्चात् । 'अयं पश्चाद्विश्वव्यचा' ऽइत्यसौ वा ऽआदित्यो विश्वव्यचा यदा ह्येवैष ऽउदेत्यथेदꣳ सर्वं व्यचो भवति तद्य-

(१) शु० य० सं० अ० १५ क० १५। (२) शु० य० सं० अ० १५ क० १५। (३) शु० य० सं० अ० १५ क० १५। (४) शु० य० सं० अ० १५ क० १५। (५) शु० य० सं० अ० १५ क० १६। (६) शु० य० सं० अ० १५ क० १६। (७) शु० य० सं० अ० १५ क० १६। (८) शु० य० सं० अ० १५ क० १६। (९) शु० य० सं० अ० १५ क० १७। (१०) शु० य० सं० अ० १५ क० १८।

त्तमाह पश्चाद्विति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति 'तस्य[1] रथप्रोतश्चासमरथश्च सेनानीग्रामण्याविं'ति ब्राह्मर्षिकौ तावृतू 'प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसा[2]वि'ति दिक्चोपदिशा चेति ह स्माह माहित्थिरहोरात्रे तु ते ते हि प्र च म्लोचतोऽनु च म्लोचतो 'व्याघ्रा[3] हेतिः सर्पाः प्रहेतिरि'ति व्याघ्रा हैवात्र हेतिः सर्पाः प्रहेति'स्तेभ्यो[4] नमो ऽअस्त्वि'ति तस्योक्तो बन्धुः ॥ १८ ॥ अथोत्तरतः । 'अर्यमुत्तरात्सँस्यद्वसुरि'ति यज्ञो वा ऽउत्तरात्तद्यत्तमाहोत्तरादित्युत्तरत ऽउपचारो हि यज्ञोऽथ यत्सँस्यद्वसुरित्याह यज्ञः हि सँस्यन्तीतीदं वस्विति 'तस्य[5] तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्याविं'ति शारदा तावृतू 'विश्वश्वाची च घृताची चाप्सरसाविं'ति दिक्चोपदिशा चेति ह स्माह माहित्थिर्वेदिश्च तु ते स्रुक्च वेदिरेव विश्वश्वाची स्रुग्घृता'र्च्यापो हेतिर्व्रातः प्रहेतिरि'त्यापो हैवात्र हेतिर्व्रातः प्रहेतिरतो ह्येवोष्णो वात्यतः शीत'स्तेभ्यो[6] नमो ऽअस्त्वि'ति तस्योक्तो बन्धुः ॥ १९ ॥ अथ मध्ये । 'अर्यमुपर्यर्वाग्वसुरि'ति पर्जन्यो वा ऽउपरि तद्यत्तमाहोपरीत्युपरि हि पर्जन्योऽथ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः प्रदीयते

(१) शु० य० सं० अ० १५ क० १७। (२) शु० य० सं० अ० १५ क० १७। (३) शु० य० सं० अ० १५ क० १६। (४) शु० य० सं० अ० १५ क० १७। (५) शु० य० सं० अ० १५ क० १८। (६) शु० य० सं० अ० १५ क० १८। (७) शु० य० सं० अ० १५ क० १८। (८) शु० य० सं० अ० १५ क० १८। (९) शु० य० सं० अ० १५ क० १८। (१०) शु० य० सं० अ० १५ क० १९।

'तस्यै सेनजिच्च सुषेणश्च्च सेनानीग्रामण्यावि'ति हैमन्तिकौ तावृतू 'ऽउर्व्वशी च[2] पूर्व्वचित्तिश्च्चाप्सरसावि'ति दिक्चोपदिशा चेति ह स्माह माहित्थिराहुतिश्च्च तु ते दक्षिणा 'चावस्फूर्ज्जन्हेतिर्व्विद्युत्प्रहेतिरि'त्यवस्फूर्ज्जन्हैवात्र हेतिर्व्विद्युत्प्रहेति'स्तेभ्यो नमो ऽअस्त्विति' तस्योक्तो बन्धुः ॥ २० ॥ एते वै ते हेतयश्च प्रहेतयश्च । याँस्तद्देवा ऽएषां लोकानामुपरिष्टाद्धोतॄनकुर्व्वताथ यास्ताः प्रजाऽएते ते सेनानीग्रामण्योऽथ यत्तन्मिथुनमेतास्ताऽअप्सरसः सर्व ऽएव तद्देवाः कृत्स्ना भूत्वा सह प्रजया सह मिथुनेनैतस्मिन्नाके स्वर्गे लोकेऽसीदँस्तथैवैतद्यजमानः सर्व ऽएव कृत्स्नो भूत्वा सह प्रजया सह मिथुनेनैतस्मिन्नाके स्वर्गे लोके सीदति ॥ २१ ॥ * ता वा ऽएताः । दशेष्टका ऽउपदधाति दशाक्षरा विराड्विराडेषा चितिस्ता ऽउ वै पञ्चैव द्वे-द्वे ह्युपदधाति ता हैता ऽअग्नेराशिषस्ता ऽउत्तमायां चिता ऽउपदधात्यन्तऽएषोऽग्नेर्य्यदुत्तमा चितिरन्ततस्तदग्नेराशिषो निराह पञ्च भवन्ति पञ्च हि यज्ञ ऽआशिषोऽथैने ऽअन्तरा पुरीषं निवपत्यग्नी हैतौ यदेते ऽइष्टके नेदिमावग्नी सदःशोचातऽइत्यथो ऽअन्नं वै पुरीषमन्नेनैवाभ्यामेतत्संज्ञां करोति ॥ २२ ॥ अथातोऽन्ववृतम् । पुरस्तादुपधाय दक्षिणतः पश्चादुत्तरतो मध्य ऽउपदधात्यथोत्तराः पुरस्तादेवाग्र-

(१) शु० य० सं० अ० १५ क० १९। (२) शु० य० सं० अ० १५ क० १९। (३) शु० य० सं० अ० १५ क० १९। (४) शु० य० सं० अ० १५ क० १९।

* अत्र शतम् ४६०० ॥

ऽउपधाय दक्षिणत ऽउत्तरतो मध्ये पश्चादुपदधात्यवस्ता-त्प्रपदनो ह स्वर्गो लोक ऽएतद्वै देवा ऽइमाँल्लोकान्त्सर्व्वतः समपिधायावस्तात्स्वर्गं लोकं प्रापद्यन्त तथैवैतद्यजमान-ऽइमाँल्लोकान्त्सर्व्वतः समपिधायावस्तात्स्वर्गं लोकं प्रपद्यते ॥ २३ ॥ (A)

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—※—

[छन्दस्येष्टकोपधानम्]

छन्दस्या ऽउपदधाति । अत्रैष सर्व्वोऽग्निः संस्कृतः स ऽएषोऽत्र श्रियमैच्छन्नो हैषोऽतः पुरा तस्मा-ऽअलमास यच्छ्रियमधारयिष्यत्तस्मादिदमप्येतर्ह्यार्हुर्न वा-ऽएषोऽलꣳ श्रियै धारणाय राज्याय वा ग्रामणीत्व्याय वेति तस्मै देवा ऽएताꣳ श्रियं प्रायच्छन्नेताश्छन्दस्याः पशवो वै छन्दाꣳस्यन्नं पशवोऽन्नमु श्रीः ॥ १ ॥ त्रिचा-श्युपदधाति । त्रिवृद्वै पशुः पिता माता पुत्रोऽथो गर्भ-ऽउल्वं जरायवथो त्रिवृद्वा ऽअन्नं कृषिर्व्वृष्टिर्बीजमेकै-वातिच्छन्दा भवत्येका ह्येव सा सर्व्वाणि च्छन्दाꣳस्यति सा या सा श्रीर्म्महत्तदुक्थं तद्यत्तन्महदुक्थमेतास्ता-श्छन्दस्याः ॥ २ ॥ तस्य शिरो गायत्र्यः । आत्मा त्रिष्टुभोऽनूकं जगत्यः पक्षौ पङ्क्तयोऽथैतासां ककुभां चत्वारि-चत्वार्यक्षराण्यादायातिच्छन्दस्युपदधाति सा सा-

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा- का० श० ११. १. १; कठ० सं० १७. ८, ९; कपिष्ठ० २६. ७, ८; मै० सं० ११. ८. ९, १०; तै० सं० ४. ४. २, ३।

तिच्छन्दा ऽएव भवति गायत्र्यय ऽइतराः सम्पद्यन्ते सैव गायत्र्यशीतिर्ऋषा बृहत्यः सा बार्हती या ऽउष्णिहः सौष्णिह्यथ यद्वशो यदर्द्धर्चो यदैन्द्राग्नं व्यदावपनं तदुतिच्छन्दा ऽअथ यन्नदो यत्सुददोहा यत्पदनुपङ्क्ता यत्किंचात्रानुष्टुप्कर्म्मीणं तदनुष्टुभः ॥ ३ ॥ प्रतिष्ठा द्विपदाः । एतावद्वै महदुक्थं महदुक्थꣳ श्श्रीः सर्वामेवास्मा ऽएतां देवाः श्श्रियं प्रायच्छँस्तथैवास्मा ऽअयमेताꣳ सर्वाꣳ श्श्रियं प्रयच्छति ॥ ४ ॥ यद्वेव छन्दस्या ऽउपदधाति । एतद्वै देवा ऽएतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तस्मिन्नविशँस्तेषां विशतां प्रजापतिरुत्तमोऽविशत्स यः स प्प्रजापतिरेतास्ताश्छन्दस्याः ॥ ५ ॥ तस्य शिरो गायत्र्यः । ता यद्गायत्र्यो भवन्ति गायत्रः हि शिरस्तिस्रो भवन्ति त्रिवृद्धि शिरः पूर्वार्द्ध ऽउपदधाति पुरस्ताद्धीदः शिरः ॥ ६ ॥ उरस्त्रिष्टुभः । ता रेतःसिचोर्व्वेलयोपदधाति पृष्ट्यो वै रेतःसिचा ऽउरो वै प्प्रति पृष्ट्यः ॥ ७ ॥ श्रोणी जगत्यः । स यावति पुरस्तात्स्वयमातृण्णायै त्रिष्टुभ ऽउपदधाति तावति पश्चाज्जगतीर्ऋषो वा ऽअयं मद्ध्ये प्राणस्तदेषा स्वयमातृण्णा यावत्यु वा ऽएतस्मात्प्राणात्पुरस्तादुरस्तावति पश्चाच्छ्रोणी ॥ ८ ॥ सक्थ्यावनुष्टुभः । ता ऽअनन्तर्हिता जगतीभ्य ऽउपदधात्यनन्तर्हिते तच्छ्रोणिभ्याꣳ सक्थ्यौ दधाति ॥ ९ ॥ पर्शवो बृहत्यः । कीकसाः ककुभः सोऽन्तरेण त्रिष्टुभश्च ककुभश्च बृहतीरुपदधाति तस्मादिमा ऽउभयत्र पर्शवो

वद्धाः कीकसासु च जघ्रुषु च ॥ १० ॥ ग्रीवा ऽउष्णिहः । ता ऽअनन्तर्हिता गायत्रीभ्य ऽउपदधात्यनन्तर्हितास्तच्छीर्ष्णो ग्रीवा दधाति ॥ ११ ॥ पक्षौ पङ्क्तयः । ता यत्पङ्क्तयो भवन्ति पाङ्क्तौ हि पक्षौ पाश्ऽर्वत ऽउपदधाति पाश्ऽर्वतो हीमौ पक्षौ यद्वर्षीयश्छन्दस्तद्दक्षिणत ऽउपदधाति दक्षिणं तदूर्द्धं पशोर्वीर्य्यवत्तरं करोति तस्माद्दक्षिणोऽर्द्धः पशोर्वीर्य्यवत्तरः ॥ १२ ॥ उदुरमतिच्छन्दाः । पशवो वै छन्दाꣳस्यन्नं पशव ऽउदुरं वा ऽअन्नमत्युदुरः हि वा ऽअन्नमत्ति तस्माद्यदोदुरमन्नं प्राप्नोत्यथ तज्जघ्नं ग्यातयामरूपं भवति तद्यदेषा पशूꣳश्छन्दाꣳस्यत्ति तस्मादुत्तिच्छन्दा ऽअत्तिच्छन्दा ह वै तामतिच्छन्दा ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवाः ॥ १३ ॥ योनिः पुरीषवती । ते सꣳस्पृष्टे ऽउपदधाति सꣳस्पृष्टे ह्युदुरं च योनिश्च पुरीषसꣳहिते भवतो माꣳसं वै पुरीषं माꣳसेन वा ऽउदुरं च योनिश्च सꣳहिते पूर्वातिच्छन्दा भवत्यपरा पुरीषवत्युत्तरꣳ ह्युदुरमधरा योनिः ॥ १४ ॥ ते प्राच्या ऽउपदधाति । प्राङ् ह्येषोऽग्निश्चीयतेऽथो प्राग्वै प्राच ऽउदुरं प्राची योनिर्वहि स्तोमभागः हृदयं वै स्तोमभागा हृदयमु वा ऽउत्तममथोदुरमथ योनिः ॥ १५ ॥ ते दक्षिणतः स्वयमातृण्णाया ऽउपदधाति । अथ प्रथमायां चिता ऽउत्तरतः स्वयमातृण्णाया ऽउदुरं च योनिं चोपदधाति यो वा ऽअयं मध्ये प्राणस्तदेषा स्वयमातृण्णेतस्य तत्प्राणस्योभयत ऽउदुरं च योनिं च दधाति तस्मा-

देतस्य प्राणस्योभयत ऽउदुरं च योनिश्च ॥ १६ ॥ प्रतिष्ठा द्विपदाः । ता यद् द्विपदा भवन्ति द्वन्द्वः हि प्रतिष्ठा तिस्रो भवन्ति त्रिवृद्धि प्रतिष्ठा पञ्चादुपदधाति पञ्चाद्धीयं प्रतिष्ठा ॥ १७ ॥ सोऽस्यैष सुकृत ऽआत्मा । तद्यस्य हैतमेवः सुकृतमात्मानं कुर्वन्त्येतः ह स सुकृतमात्मानमभिसम्भवत्यथ यस्य हैतमतोऽन्यथा कुर्वन्ति दुष्कृतः ह तस्यात्मानं कुर्वन्ति स ह स दुष्कृतमेवात्मानमभिसम्भवति ॥ १८ ॥ तदेते सामनिधनेऽअभ्युक्ते । अर्को देवानां परमे व्योमन्नर्कस्य देवाः परमे व्योमन्नित्येतद्वै देवानां विशां प्रजापतिरुत्तमोऽविशत्तस्मादाहार्को देवानां परमे व्योमन्नित्यथ यदाहार्कस्य देवाः परमे व्योमन्नित्ययं वा ऽअग्निरर्कस्तस्यैतदुत्तमायां चितौ सर्वे देवा विष्टास्तस्मादाहार्कस्य देवाः परमे व्योमन्निति ॥ १९ ॥ (B)

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
कण्डिकासंख्या १०८ ॥

[गार्हपत्येष्टकोपधानम्]

गार्हपत्यमुपदधाति । एतद्वै देवाः प्राप्य राद्धेवामन्यन्त तेऽब्रुवन्केनेदमरास्मेति गार्हपत्येनैवेत्यब्रुवन्गार्हपत्यं वै चित्वा समारुह्य प्रथमां चितिमपश्यथाम

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. १. २ ।

प्रथमायै द्वितीयां द्वितीयायै तृतीयां तृतीयायै चतुर्थीं चतुर्थ्यै पञ्चमीं पञ्चम्या ऽइदमिति ॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथेयमस्म्मास्वेव राद्धिरसदिति तेऽब्रुवँश्चेतयद्ध्वमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेयमस्म्मास्वेव राद्धिरसदिति ॥ २ ॥ ते चेतयमानाः । एतदपश्यन्निहेममाहृत्योपदधामहा ऽइति तमिहाहृत्योपादधत तस्मिन्न्व्यवदन्त वसवः पुरस्तादद्दुहा दक्षिणत ऽआदित्याः पश्चान्मरुत ऽउत्तरतो विश्वे देवा ऽउपरिष्टादिहोपदधामेहोपदधामेति ॥ ३ ॥ तेऽब्रुवन् । मद्ध्य ऽएवोपदधामहै स नो मद्ध्य ऽउपहितः सर्वेषां भविष्यतीति तं मद्ध्य ऽउपादधत तदेनाꣳ राद्धिमात्मन्नदधत मद्ध्यतो मद्ध्यत ऽएवैतदेनाꣳ राद्धिमात्मन्नदधत तथैवैतद्यजमानो यद्गार्हपत्यमुपदधात्येनामेवैतद्राद्धिमात्मन्धत्ते मद्ध्यतो मद्ध्यत ऽएवैतदेनाꣳ राद्धिमात्मन्धत्ते ॥ ४ ॥ यद्वेव गार्हपत्यमुपदधाति । अन्नं वै गार्हपत्योऽत्तायमग्निश्चितोऽत्र ऽएवैतदन्नमपिदधाति मद्ध्यतो मद्ध्यत ऽएवास्मिन्नेतदन्नं दधाति ॥ ५ ॥ यद्वेव गार्हपत्यमुपदधाति । वेदिर्वै देवलोकोऽथ वा ऽएष बहिर्वेदि चितो भवति तं य्यदिहाहृत्योपदधाति तदेनं वेदौ देवलोके प्रतिष्ठापयति ॥ ६ ॥ यद्वेव गार्हपत्यमुपदधाति । योनिर्वै पुष्करपर्णमथ वा ऽएष बहिर्य्योनि चितो भवति बहिर्द्धा वाऽ ऽएनद्योनेरग्निकर्म्म यत्पुरा पुष्करपर्णात्तँ य्यदिहाहृत्योपदधाति तदेनं य्योनौ पुष्करपर्णे प्रतिष्ठापयति

तथो हैषोऽबहिर्द्धा भवत्यष्टाविष्टका ऽउपदधाति तस्योक्तो बन्धुस्तं वा ऽएतैरेव यजुर्भिरेतयावृता चिनोति यो ह्येवासौ स ऽएवायं तमेवैतदाहृत्येहोपदधाति ॥ ७ ॥ अथ पुनश्चितिमुपदधाति । एतद्वै देवा गार्हपत्यं चित्वा तस्मिन् राद्धिं नापश्यन्योनिर्वै गार्हपत्या चितिरेषो वै योने राद्धिर्य्यदेतः प्रजातिस्तस्यामेतस्यां योनौ रेतः प्रजातिं नापश्यन् ॥ ८ ॥ तेऽब्रुवन् । उप नज्ञानीत यथास्यां योनौ रेतः प्रजातिं दधामेति तेऽब्रुवँश्चेतयद्धमिति चिनिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथास्यां योनौ रेतः प्रजातिं दधामेति ॥ ९ ॥ ते चेतयमानाः । एतां पुनश्चितिमपश्यँस्तामुपादधत तदेतस्यां योनौ रेतः प्रजातिमदधुर्म्मळ्यतो मळ्यत ऽएवैतदेतस्यां योनौ रेतः प्रजातिमदधुस्तथैवैतद्यजमानो यत्पुनश्चितिमुपदधात्येतस्यामेवैतद्योनौ रेतः प्रजातिं दधाति मळ्यतो मळ्यत ऽएवैतदेतस्यां योनौ रेतः प्रजातिं दधाति ॥ १० ॥ ताꣳ हैके जघनार्द्ध ऽउपदधति । जघनार्द्धाद्वै रेतः सिच्यते पुच्छसन्धौ पुच्छार्द्धे रेतः सिच्यत ऽइति न तथा कुर्य्याद्बहिर्द्धा ह ते योने रेतः प्रजातिं दधति ये तथा कुर्वन्ति मळ्य ऽएवोपदळ्यात्तत्सम्प्रति योनौ रेतः प्रजातिं दधाति ॥ ११ ॥ अष्टाविष्टका ऽउपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतदेतो भूतꣳ सिञ्चति पञ्चकृत्वः सादयति पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्या-

वानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतद्धेतोर्भूतꣳ सिञ्चत्यष्टाविष्टकाः पञ्चकृत्वः सादयति तत्त्रयोदश त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्य्यावत्त्यस्य मात्रा तावत्तद्भवति ॥ १२ ॥ यद्वेव * पुनश्चितिमुपदधाति । एतद्वा ऽएतदुयथायथं करोति यदाहवनीयाद् गार्हपत्यमुत्तरं चिनोति तद्यत्पुनश्चितिमुपदधाति य ऽएवायमग्निश्चितस्तमेवैतदाहृत्यास्योपरिष्टात्पुनश्चिनोति तद्यच्चितꣳ सन्तं पुनश्चिनोति तस्मात्पुनश्चितिः ॥ १३ ॥ तद्धैके । जघनार्द्धं गार्हपत्यमुपदधति पूर्वार्द्धं पुनश्चितिमाहवनीयञ्च वा ऽएतौ गार्हपत्यञ्चैवं वा ऽएतावग्नी ऽइति न तथा कुर्य्यादयं वै लोको गार्हपत्यो द्यौराहवनीय ऽउत्तरो वा ऽअसावस्तं नस्मादेनामुत्तरामेवोपदध्यात् ॥ १४ ॥ यद्वेव गार्हपत्यं च पुनश्चितिं चोपदधाति । वेदिश्च हैते ऽअग्नेरुत्तरवेदिश्चाथ येऽअमू पूर्वे निवपत्यद्धरस्य ते ऽअथ हैते ऽअग्नेस्तद्यदेते ऽउपधायाग्निं निदधाति वेदौ चैवैनमेतदुत्तरवेदौ च प्रतिष्ठापयति ॥ १५ ॥ यद्वेव पुनश्चितिमुपदधाति । पुनर्य्यज्ञो हैष ऽउत्तरा हैषा देवयज्या पुनर्य्यज्ञमेवैतदुपधत्त ऽउत्तरामेव देवयज्यामुप हैनं पुनर्य्यज्ञो नमति ॥ १६ ॥ यद्वेव पुनश्चितिमुपदधाति । यं वै तं प्राणाऽऋषयोऽग्नेऽग्निꣳ समस्कुर्वन्त्स ऽएष तमेवैतत्पुनश्चिनोति तद्यच्चितꣳ सन्तं पुनश्चिनोति तस्माद्वेव

* का० श्रौ० सू० १७. १२. १८ ।

पुनश्चिच्चतिः ॥ १७ ॥ 'येन ऽऋषयस्तपसा सत्रमाय-न्नि'ति । अमूनेतद्वषीना'हेन्धाना ऽअग्निꣳ स्वराभरन्त' ऽइतीन्धाना ऽअग्निꣳ स्वर्गं लोकमाहरन्त ऽइत्येत'त्तस्मि-न्नहं निदधे नाके ऽअग्निमि'ति स्वर्गो वै लोको नाको 'यमाहुर्म्मनव स्तीर्ण्णवर्हिषमि'ति ये विद्वाꣳसस्ते मनव स्तीर्ण्णवर्हिषमिति सर्व्वदा हैव स स्तीर्ण्णवर्हिः ॥ १८ ॥ 'तं पत्नीभिरनुगच्छेम देवाः । पुत्रैर्भ्रातृभिरुत वा हिर-ण्ण्यैरि'त्येतेनैनः सर्व्वेणानुगच्छेमेत्येत'न्नाकं गृभ्णानाः सुकृतस्य लोक ऽइति स्वर्गो वै लोको नाकः स्वर्गं लोकं गृह्णानाः सुकृतस्य लोक ऽइत्येत'न्नृतीये पृष्ठे-ऽअधि रोचने दिव' ऽइत्येतद्ध तृतीयं पृष्ठस्य रोचनं दिवो यत्रैष ऽएतत्तपति ॥ १९ ॥ 'आ वाचो मध्यमरुह-द्भुरण्युरि'ति । एतद्ध वाचो मध्यं य्यत्रैष ऽएतच्ची-यते भुरण्युरिति भत्तेत्येत'दयमग्निः सत्पतिश्चेकितान'-ऽइत्ययमग्निः सनां पतिश्चेतयमान ऽइत्येत'त्पृष्ठे पृथिव्या निहितो दुविद्युतद्वि'ति पृष्ठे पृथिव्या निहितो दीप्यमान ऽइत्येत'दधस्पदं कृणुतां य्ये पृतन्यव' ऽइत्यधस्पदं कुरुताꣳ सर्व्वान्पाप्मन ऽइत्येतत् ॥ २० ॥ 'अयमग्निर्वीरतमो वयोधा' ऽइति । अयमग्निर्वीर्य्यवत्तमो

(१) शु० य० सं० अ० १५ क० ४९। (२) शु० य० सं० अ० १५ क० ४९। (३) शु० य० सं० अ० १५ क० ४९। (४) शु० य० सं० अ० १५ क० ४९। (५) शु० य० सं० अ० १५ क० ५०। (६) शु० य० सं० अ० १५ क० ५०। (७) शु० य० सं० अ० १५ क० ५०। (८) शु० य० सं० अ० १५ क० ५१। (९) शु० य० सं० अ० १५ क० ५१। (१०) शु० य० सं० अ० १५ क० ५१। (११) शु० य० सं० अ० १५ क० ५१। (१२) शु० य० सं० अ० १५ क० ५२।

वयोधा ऽइत्येत'त्सहस्रियो द्योतताम्प्रयुच्छन्नि'ति सहस्रियो दीप्यताम्प्रमत्त ऽइत्येत'द्दिवंभ्राजंमानः सरिरस्य मध्य' ऽइतीमे वै लोकाः सरिरं दीप्यमान ऽएषु लोकेष्वित्येत'दुप प्रयाहि दिव्यानि धामे'त्युप प्रयाहि स्वर्गं लोकमित्येतत् ॥ २१ ॥ 'सम्प्रेच्यवद्भमुप सम्प्रयाते'ति । अमूनेतदृषीनाह समेनं प्रेच्यवद्भमुप चैनः सम्प्रयाते'त्यग्ने पथो देवयानान्कृणुद्भमि'ति यथैव यजुस्तथा बन्धुः 'पुनः कृण्वाना पितरा युवाने'ति वाक्च वै मनश्च्च पितरा युवाना वाक्च मनश्च्चैनावग्नी 'ऽअन्वेवाताꣳसीत्त्वयि तन्तुमेतमि'ति योऽसावृषिभिस्तन्तुस्ततस्तमेतदाह ॥ २२ ॥ 'उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमि'ति । इममेतदग्निमाहोच्चैनं बुध्यस्व प्रति चैनं जागृह्ये'तीष्टापूर्त्ते सृजेथामयं चे'ति यथैव यजुस्तथा बन्धु'रस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्नि'ति द्यौर्वा ऽउत्तरः सधस्थं 'विश्वे देवा यजमानश्च्च सीदते'ति तद्विश्वैर्देवैः सह यजमानः सादयति ॥ २३ ॥ 'येन वहसि सहस्रम् । येनाग्ने सर्ववेदसमि'त्येनद्धास्य प्रतिज्ञाततमं धाम येन सहस्रं वहति येन सर्ववेदसं 'तेनेमं यज्ञं नो नय स्वर्देवेषु

(१) शु० य० सं० अ० १५ क० ५२ । (२) शु० य० सं० अ० १५ क० ५२ । (३) शु० य० सं० अ० १५ क० ५२ । (४) शु० य० सं० अ० १५ क० ५३ । (५) शु० य० सं० अ० १५ क० ५३ । (६) शु० य० सं० अ० १५ क० ५३ । (७) शु० य० सं० अ० १५ क० ५३ । (८) शु० य० सं० अ० १५ क० ५४ । (९) शु० य० सं० अ० १५ क० ५४ । (१०) शु० य० सं० अ० १५ क० ५४ । (११) शु० य० सं० अ० १५ क० ५४ । (१२) शु० य० सं० अ० १५ क० ५५ । (१३) शु० य० सं० अ० १५ क० ५५ ।

गन्तव' ऽइति तेन न ऽइमं रुषद्गं नय स्वर्गं लोकं देवेषु गन्तव ऽइत्येतदयं ते योनिर्ऋत्वियं ऽइति तस्योक्तो बन्धुरष्टाविष्टका ऽउपदधाति तस्यो ऽएवोक्तः ॥ २४ ॥ (C)

षष्ठाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥

[ऋतव्या-स्वयमातृण्णा-विकर्ण्यर्थवादः]

ऋतव्या ऽउपदधाति । ऋतव ऽएते यदृतव्या ऽऋतूनेवैतदुपदधाति तदेतत्सर्वं रुयदृतव्याः संवत्सरो वा ऽऋतव्याः संवत्सर ऽइदः सर्वमिदमेवैतत्सर्वमुपदधात्यथो प्रजननमेतत्संवत्सरो वा ऽऋतव्याः संवत्सरः प्रजननं प्रजननमेवैतदुपदधाति ॥ १ ॥ यद्वेवर्त्तव्या ऽउपदधाति । क्षत्रं वा ऽऋतव्या विश ऽइमा ऽइष्टकाः क्षत्रं तद्विश्यत्तारं दधाति ताः सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्षत्रमत्तारं दधाति ॥ २ ॥ यद्वेवर्त्तव्या ऽउपदधाति । संवत्सर ऽएषोऽग्निः सऽऋतव्याभिः सऽहितः संवत्सरमेवैतदृतुभिः सन्ननोति सन्दधाति ता वै नाना प्रभृतयः समानादर्का ऽऋतवो वा ऽअसृज्यन्त ते सृष्ट्वा नानैवासन् ॥ ३ ॥ तेऽब्रुवन् । न वा ऽइत्थः सन्तः शक्ष्यामः प्रजनयितुः रूपैः समायामेति न ऽएकैकमृतुः रूपैः समायँस्तस्मादेकैकस्मिन्नृतौ सर्वेषामृतूनाꣳ रूपं ता यन्नाना प्रभृतयो नाना

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. २. ३ ।

ह्यस्तृज्यन्ताथ यत्समानोदर्कां रूपैर्हि समायन् ॥ ४ ॥ स ऽउपदधाति । 'तपश्च तपस्यश्च शैशिरावृतू' ऽइति नामनी ऽएनयोरेते नामभ्यामेवैने ऽएतदुपदधात्यसौ वा ऽआदित्यस्तपस्तस्मादेतावृतू ऽअनन्तर्हितौ तद्यदेतस्मादेतावृतू ऽअनन्तर्हितौ तस्मादेतौ तपश्च तपस्यश्च ॥ ५ ॥ 'अग्नेरन्तः श्लेषोऽसी'ति । संवत्सर ऽएषोऽग्निः स ऽऋतव्याभिः सहितः संवत्सरमेवैतदृतुभिः सन्तनोति सन्दधाति 'कल्पेतां द्यावापृथिवी कल्पन्तामाप ऽओषधय' ऽइतीदमेवैतत्सर्वमृतुभिः कल्पयति 'कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रता' ऽइत्यग्नयो ह्येते पृथग्यदेना ऽइष्टकास्ते यथानयोर्ऋत्वोर्ज्यैष्ठ्याय कल्पेरन्नेवमेतदाह 'ये ऽअग्नयः समनसोऽन्तरा द्यावापृथिवी ऽइमे' ऽइति यथैव यजुस्तथा बन्धुः 'शैशिरावृतू ऽअभिकल्पमाना ऽइन्द्रमिव देवा ऽअभिसंविशन्त्वि'ति यथेन्द्रं देवा ऽअभिसंविष्टा ऽएवमिमावृतू ज्यैष्ठ्यायाभिसंविशन्त्वित्येतद् द्वे ऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥ ६ ॥ तद्यदेने ऽअत्रोपदधाति । संवत्सर ऽएषोऽग्निरिम ऽउ लोकाः संवत्सरस्तस्य द्यौरेव पञ्चमी चितिर्द्यौरस्य शिशिर ऽऋतुस्तद्यदेने ऽअत्रोपदधाति यदेवास्यैने ऽआत्मनस्त-

(१) शु० य० सं० अ० १० क० ५०। (२) शु० य० सं० अ० १५ क० ५०। (३) शु० य० सं० अ० १५ क० ५०। (४) शु० य० सं० अ० १५ क० ५०। (५) शु० य० सं० अ० १५ क० ५०। (६) शु० य० सं० अ० १५ क० ५०।

दस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ ७ ॥ यद्वेवैते ऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर-ऽउ प्रजापतिस्तस्य शिर ऽएव पञ्चमी चितिः शिरोऽस्य शिशिर ऽऋतुस्तद्यदेते ऽअत्रोपदधाति यद्वेवास्यैते-ऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेते ऽअत्रोपदधाति ॥ ८ ॥ स पुरस्तात्स्वयमातृण्णायै च विश्वज्योतिषश्चर्त्तव्ये ऽउपदधाति । यौर्वा ऽउत्तमा स्वयमातृण्णादित्य ऽउत्तमा विश्वज्योतिरर्वाचीनं तद्विश्वज्योतिश्चादित्याच्चर्त्तुन्दधाति तस्मादर्वाचीनमेवात ऽऋतवोऽथो प्रजननमेतदर्वाचीनं तद्विश्वज्योतिश्चादित्याच्च प्रजननं दधाति तस्मादर्वाचीनमेवातः प्रजायते स्थितहविर्वातः पराक्प्रजननं ह्यावन्तो ह्येव सन्ताग्ने देवास्तावन्तो देवाः ॥ ९ ॥ अथ प्रथमायै स्वयमातृण्णायै । प्रथमायै च विश्वज्योतिषऽउपरिष्टादृतव्ये ऽउपदधातीयं वै प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योति*रितस्तदूर्द्धामृतून्दधाति तस्मादित ऽऊर्द्धा ऽऋतवोऽथो प्रजननमेतदितस्तदूर्द्धं प्रजननं दधाति तस्मादित ऽऊर्द्धमेव प्रजायते ॥ १० ॥ ता न व्यूहेत् । नेदृतून्व्यूहानीति यो वै म्रियत-ऽऋतवो ह तस्मै व्युह्यन्ते तस्माद्यत्रैव प्रथमे ऽउपदधाति तत्सर्वा ऽउपदद्ध्यात् ॥ ११ ॥ अथो ऽइमे वै लोका ऽऋतव्याः । इमाँस्तल्लोकानूर्द्धाँश्चितिभिश्चिनोत्यथो क्षत्रं वा ऽऋतव्याः क्षत्रं तदूर्द्धं चितिभिश्चिनो-

* 'रितस्तदूर्द्धा' इति 'क-घ'। 'स्तदूर्द्धा' इति 'ग ङ' पुस्तकयोः।

त्यथो संवत्सरो वा ऽऋतव्याः संवत्सरं तदूर्द्धं चितिभिश्चिनोति ता नान्यया यजुष्मत्येष्टकयोपरिष्टादभ्युपदधात्येतत्क्षत्रं विशाभ्युपदधातीति ॥ १२ ॥ ता हैता ऽएव सँख्यान्यः । एतद्वै देवा ऽऋतव्याभिरेवेमाँल्लोकान्त्समयुरितश्चोर्द्धानमुतश्चार्वाचस्तथैवैतद्यजमान ऽऋतव्याभिरेवेमाँल्लोकान्त्सँख्यातीतश्चोर्द्धानमुतश्चार्वाचः ॥१३॥ तदु ह चरकाद्वर्ष्यवः । अन्या ऽएव सँख्यानीरित्युपदधति न तथा कुर्य्यादित्यहैव रेचयन्त्येता ऽउ ऽएव सँख्यान्यः ॥ १४ ॥ अथ विश्वज्योतिषमुपदधाति । आदित्यो वा ऽउत्तमा विश्वज्योतिरादित्यो ह्येवामुष्मिँल्लोके विश्वज्योतिरादित्यमेवैतदुपदधाति ॥ १५ ॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वज्योतिः प्रजननमेवैतदुपदधाति ॥ १६ ॥ स पुरस्तात्स्वयमातृण्णायै * विश्वज्योतिषमुपदधाति । द्यौर्वा ऽउत्तमा स्वयमातृण्णादित्य ऽउत्तमा विश्वज्योतिर्द्यौरर्वाचीनं तद्दिव ऽआदित्यं दधाति तस्माद्देवोऽर्वाचीनमेवातस्तपत्यथो प्रजननमेतदर्वाचीनं तद्दिवः प्रजननं दधाति तस्मादर्वाचीनमेवातः प्रजायते ॥ १७ ॥ अथ प्रथमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधातीयं वै प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योतिरितस्तदूर्द्धमग्निं दधाति तस्मादित ऽऊर्द्धोऽग्निर्दीप्यतेऽथो प्रजननमेतदितस्तदूर्द्धं प्रजननं

* का० श्रौ० सू० १७. १२. २३ ।

दधाति तस्मादित ऽऊर्द्ध्वमेव प्रजायते ॥ १८ ॥ अथ मध्यमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधात्यन्तरिक्षं वै मध्यमा स्वयमातृण्णा वायुर्मध्यमा विश्वज्योतिरन्तरिक्षे तद्वायुं दधाति तस्मादयमन्तरिक्षे वायुः ॥ १९ ॥ ताभ्येतानि ज्योतींष्यपि । तद्यदेता ऽएवमुपदधात्येताभ्येवैतज्ज्योतींष्यपि सम्भ्यञ्चि दधाति तस्मादित ऽऊर्द्ध्वोऽग्निर्दीप्यतेऽर्वाङसावादित्यस्तपत्यन्तरिक्षेऽयं निर्यङ् वायुः पवते ॥ २० ॥ 'परमेष्ठी त्वा सादयत्वि'ति । परमेष्ठी ह्येनां पञ्चमीं चितिमपश्यं'द्दिवस्पृष्ठे ज्योतिष्मतीमि'ति दिवो ह्यसौ पृष्ठे ज्योतिष्मानादित्यः ॥ २१ ॥ 'विश्वव्यस्मै प्राणायापानाय । व्यानाये'ति प्राणो वै विश्वज्योतिः सर्वस्मा ऽउ वाऽएतस्मै प्राणो 'विश्वज्योतिर्यच्छे'ति सर्वं ज्योतिर्यच्छत्येन'त्सूर्य्यस्तेऽधिपतिरि'ति सूर्य्यमेवास्या ऽअधिपतिं करोति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥ २२ ॥ ता हैता ऽएव सँख्याः । एतद्वै देवा विश्वज्योतिर्भिरेवेमाँल्लोकान्त्समयुरितश्चोर्द्धानमुतश्चार्वाचस्तथैवैतद्यजमानो विश्वज्योतिर्भिरेवेमाँल्लोकान्त्सँख्यातीतश्चोर्द्धानमुतश्चार्वाचः ॥ २३ ॥ तदु ह चरकाद्वर्य्यवः ।

(१) शु० य० सं० अ० १५ क० ५८ । (२) शु० य० सं० अ० १५ क० ५८ । (३) शु० य० सं० अ० १५ क० ५८ । (४) शु० य० सं० अ० १५ क० ५८ । (५) शु० य० सं० अ० १५ क० ५८ ।

अन्न्या ऽएव सँस्यानीरित्युपदधति न तथा कुर्य्यादत्यहैव रेचयन्त्येता ऽउ ऽएव सँस्यान्न्यः ॥ २४ ॥ (A)

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[लोकम्पृणेष्टकोपधानम्, इष्टकाप्रमाणं च]

अथ लोकम्पृणामुपदधाति । असौ वा ऽआदित्यो लोकम्पृणैष हीमाँल्लोकान्पूरयत्यमुमेवैतदादित्यमुपदधाति ताꣳ सर्वासु चितिषूपदधातीमे वै लोका ऽएताश्चितयोऽमुं तदादित्यमेषु लोकेषु दधाति तस्मादेष सर्वेभ्य ऽएवैभ्यो लोकेभ्यस्तपति ॥ १ ॥ यद्वेव * लोकम्पृणामुपदधाति । क्षत्रं वै लोकम्पृणा विश ऽइमा ऽइतरा ऽइष्टकाः क्षत्रं तद्विशि क्षत्रमत्तारं दधाति ताꣳ सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्षत्रमत्तारं दधाति ॥ २ ॥ सँपैकेव भवति । एकमस्थं तत्क्षत्रमेकस्थाꣳ श्रियं करोत्यथ या द्वितीया मिथुनं तदर्द्धमु हैतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नताया ऽएकेन यजुषा वह्वीरिष्टका ऽउपदधाति क्षत्रं तद्वीर्य्येणात्यादधाति क्षत्रं विशो वीर्य्यवत्तरं करोत्यथेतराः पृथङ् नाना यजुर्भिरुपदधाति विशं तत्क्षत्रादवीर्य्यतरं करोति पृथग्वादिनी नाना चेतसम् ॥ ३ ॥ स वा ऽअस्याꣳ स्वत्वयां प्रथमे ऽउपदधाति ।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा- का० श्रौ० १२. २. १; श० ब्रा० १७. १. १; कपिष्ठ० २६. ९; मै० सं० ११. ८ १२; तै० सं० ४. ४. ११ ।

* का० श्रौ० सू० १७. १२. १४ ।

अमुं तदादित्यमेतस्यां दिशि दधात्यथेतस्तस्माद्तोऽनुपर्य्यैत्यथेतस्तस्माद्तोऽनुपर्य्यैत्यथेतस्तस्माद्तोऽनुपर्य्यैत्यथातस्तस्माद्तोऽनुपर्य्यैति ॥ ४ ॥ स यत्रैव प्रथमेऽउपदधाति । तदुत्तमेऽअनूपदध्यात्सकृद्धैवासावादित्यऽइमाँल्लोकान्पर्य्यैत्यनातिप्रच्यवेतातिहृत्य पूर्वेऽउत्तमेऽअनूपदधात्यमुं तदादित्यमिमाँल्लोकानतिप्रच्यावयति तस्मादसावादित्यऽइमाँल्लोकानसꣳस्थितो दक्षिणावृत्पुनःपुनरनुपर्य्यैति ॥ ५ ॥ 'लोकं पृण च्छिद्रं पृणे'ति । लोकं च पूरय च्छिद्रं च पूरयेत्येत'दुथो सीद ध्रुवा त्वमित्यथो सीद स्थिरा त्वं प्रतिष्ठिते'त्येतदिन्द्राग्नी त्वा बृहस्पतिरस्मिन्न्योनावसीपदन्निन्द्राग्नी च त्वा बृहस्पतिश्चास्मिन्न्योनौ प्रत्यतिष्ठिपन्नित्येतदनुष्टुभा वाग्वा ऽअनुष्टुब्वाग्विन्द्र * ऽइन्द्रो लोकम्पृणा न सादयत्यसन्नो ह्येष सुदोहमाधिवदति प्राणो वै सुदोहाः प्राणेनैवैनमेतत्सन्ननोति सन्दधाति ॥ ६ ॥ तदाहुः । कथमेषा लोकम्पृणायातयाम्नी भवतीत्यसौ वा ऽआदित्यो लोकम्पृणायातयामा वा ऽएषोऽथो वाग्वै लोकम्पृणायातयाम्न्यु वै वाक् ॥ ७ ॥ [अर्धप्रपाठकः ५५॥] स वै यजुष्मतीरुपधाय । लोकम्पृणया प्रच्छादयत्यन्नं वै यजुष्मत्य ऽइष्टका ऽआत्मा लोकम्पृणान्नं तदात्मना परिदधाति तस्मादुन्नमात्मना परिहितमात्मैव भवति ॥ ८ ॥ स

(१) शु० य० सं० अ० १५ क० ५९ । (२) शु० य० सं० अ० १५ क० ५९ । (३) शु० य० सं० अ० १५ क० ५९ ।

* 'स्वाग्निन्द्र' इति 'ग-ञ' पुस्तकयोः ।

वा ऽआत्मन्नेव । यजुष्मतीरुपदधाति न पक्षपुच्छेष्वात्मँस्तद्वन्नं दधाति यदु वा ऽआत्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुच्छान्यथ यत्पक्षपुच्छेषु नैव तदात्मानमवति न पक्षपुच्छानि ॥ ९ ॥ उभयीर्यजुष्मतीश्च लोकम्पृणाश्चात्मन्नुपदधाति । तस्मादयमात्मा द्विगुणो बहुलतर ऽइव लोकम्पृणा ऽएव पक्षपुच्छेषु तस्मात्पक्षपुच्छानि तनीयाꣳसीवानूचीश्च तिरश्चीश्चात्मन्नुपदधात्यस्थीनि वा ऽइष्टकास्तस्मादिमान्यस्थ्वञ्चि च तिर्य्यञ्चि चात्मन्नस्थीनि पराचीरेव पक्षपुच्छेषु न हि किञ्चन पक्षपुच्छेषु तिर्य्यगस्थ्यस्ति तद्धतदेव चितस्य चाचितस्य च विज्ञानमेवमेव चित ऽइतरथा चितः ॥ १० ॥ स वै स्वयमातृण्णां लोकम्पृणया प्रच्छादयति । प्राणो वै स्वयमातृण्णादित्यो लोकम्पृणा प्राणं तदादित्येन समिन्धे तस्मादयमुष्णः प्राणस्तया सर्वमात्मानं प्रच्छादयति सर्वं तदात्मानमादित्येन समिन्धे तस्मादयः सर्व ऽएवात्मोष्णस्तद्धतदेव जीविष्यन्नञ्च मरिष्यन्नञ्च विज्ञानमुष्ण ऽएव जीविष्यञ्छीतो मरिष्यन् ॥ ११ ॥ स यस्याꣳ स्रक्त्यां प्रथमे ऽउपदधाति । ततो दशभिर्दशभिः सञ्छादयन्नेत्या स्वयमातृण्णायै स तेनैव दक्षिणावृज्जघनेन स्वयमातृण्णाꣳ सञ्छादयन्नेत्यानुक्रयाया ऽअथ पुनरेत्य तमवधिः सञ्छादयति ॥ १२ ॥ आत्मानमग्ने सञ्छादयति । आत्मा वै वाग्ने सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्राथो-

ऽएवं वा ऽअसावादित्य ऽइमाँल्लोकान्दक्षिणावृदनुपर्येति ॥ १३ ॥ स ऽएष प्राण ऽएव यल्लोकम्पृणा । तया सर्वमात्मानं प्रच्छादयति सर्वस्मिँस्तदात्मन्प्राणं दधाति तद्यद्धास्यैषाऽङ्गं नाभिप्राप्नुयात्प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यदु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनꣳ सर्वमेवतया प्रच्छादयेत् ॥ १४ ॥ स वा ऽआत्मन ऽएवाधि पक्षपुच्छानि चिनोति । आत्मनो ह्येवाङ्ग्यङ्गानि प्ररोहन्त्यथ * यत्परस्तादर्वाचीमुपदध्याद्यथान्यत ऽआहृत्याङ्गं प्रतिदध्यात्तादृक्तत् ॥ १५ ॥ न भिन्नां न कृष्णामुपदध्यात् । आर्च्छति वा ऽएषा या भिद्यत ऽआर्त्तम्वेतद्रूपं यत्कृष्णं नेदार्त्तमात्मानमभिसंस्कृत्वा ऽइति नाभिन्नां परास्येन्नेदनार्त्तमात्मनो वहिर्द्धा कृवाणीति धिष्णेभ्यꣳ प्रतिसंख्याय या विराजमतिरिच्येरन्नोत्तरामुद्धेयुस्तद्वै खलु ना ऽआर्च्छन्ति ना भित्वोत्कर ऽउत्किरेदुत्करो वा ऽअतिरिक्तस्य प्रतिष्ठा तद्यत्रानिरिक्तस्य प्रतिष्ठा तदेवैना ऽएतत्प्रतिष्ठापयति ॥ १६ ॥ अथान ऽइष्टकामात्राणामेव । पादमात्रीꣳ प्रथमायाश्चोत्तमायाश्च चित्योमुपदध्यात्प्रतिष्ठा वै पादो यो वै पादꣳ स ह्रस्व ऊर्ध्वस्थमात्र्यो वर्षिष्ठाꣳ स्युर्न ह्यूर्ध्वस्थात्किञ्चन वर्षीयोऽस्त्यस्ति ह्यालिखितवत्यस्तिस्रश्चितयꣳ स्युस्त्रिवृतो हीमे लोका ऽअपरिमितालिखिते द्वे रसो हैते चिती ऽअपरिमित ऽउ वै रसꣳ

* 'यत्पुरस्ता' इति 'ग-ञ' पुस्तकयोः ।

सर्वास्त्वेव ब्रूयालिखितवत्यः स्युः सर्वे ह्येवेमे लोकास्त्रिवृतः ॥ १७ ॥ अथात ऽइष्टकानामेवावपनस्य । यां काञ्च यजुष्मतीमिष्टकां विद्यात्तां मध्यमायां चिता ऽउपदद्ध्यादन्तरिक्षं वै मध्यमा चितिरन्तरिक्षमु वै सर्वेषां भूतानामावपनमथो ऽअन्नं वै यजुष्मत्य ऽइष्टका ऽउदुरं मध्यमा चितिरुदुरे तदन्नं दधाति ॥ १८ ॥ तदाहुः । नोपदद्ध्यान्नेदतिरेचयानीति स वा ऽउपैव दद्ध्यात्कामेभ्यो वा ऽएता ऽइष्टका ऽउपधीयन्ते न वै कामानामतिरिक्तमस्ति स वै नैवोपदद्ध्यादेतावद्वा ऽएतद्देवाऽअकुर्वन् ॥ १९ ॥ (B)

सप्तमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[इष्टकासु पुरीषनिवापः, स्वयमातृण्णा-विकर्ण्युपधानं च]

अथ पुरीषं निवपति । माꣳसं वै पुरीषं माꣳसेनैवैनमेतत्प्रच्छादयतीष्टका ऽउपाधायास्थीष्टका ऽअस्थि तन्नमाꣳसैः सञ्छादयति ॥ १ ॥ स वै स्वयमातृण्णायामावपति । प्राणो वै स्वयमातृण्णान्नं पुरीषं प्राणे तदन्नं दधाति तेन सर्वमात्मानं प्रच्छादयति तस्माद्यत्प्राणेऽन्नं धीयते * तत्सर्वमात्मानमवति सर्वमात्मानमनुव्येति ॥ २ ॥ न स्वयमातृण्णायामावपेदित्यु हैक ऽआहुः । प्राणः स्वयमातृण्णा नेत्प्राणानपिदधानीति स वा ऽएव वपेदन्नेन वै प्राणा विष्टब्धा यो वा ऽअन्नं नात्ति सं वै तस्य प्राणा

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श्रौ० ११. २. २।

* 'तत्सर्वम्' इति 'क-घ'। 'सर्वम्' इति 'ग-ङ' पुस्तकयोः।

रोहन्ति तद्यस्य ह तथा कुर्वन्ति यथा शुष्का सूर्म्मी सुषिरैवद्दः ह सोऽमुष्मिँल्लोके सम्भवति तस्मात्स्वयमातृण्णायामैव वपेत् ॥ ३ ॥ स्वयमातृण्णायामोप्य । अनूक्यया सञ्छादयन्नेत्या परिश्रिश्रद्धयः स तेनैव दक्षिणावृज्जघनेन स्वयमातृण्णाꣳ सञ्छादयन्नैत्या पुनरनूक्यायै ॥ ४ ॥ आत्मानमग्ने सञ्छादयति । आत्मा ह्येवाग्ने सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्रा ॥ ५ ॥ स ऽएष प्राण ऽएव यत्पुरीषम् । तेन सर्वमात्मानं प्रच्छादयति सर्वस्मिँस्तदात्मन्प्राणं दधाति तद्यद्धास्यैतदङ्गं नाभिप्राप्नुयात्प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यदु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनद्दः सर्वमेवैतेन प्रच्छादयेत् ॥ ६ ॥ [1]'इन्द्रं विश्वा ऽअवीवृधन्नि'ति । इन्द्रद्दः हि सर्वाणि भूतानि वर्द्धयन्ति [2]'समुद्व्यचसं गिर' ऽइति महिमानमस्यैतदाह 'रथीतमꣳ रथीनामि'ति रथितमो ह्येष रथिनां [3]'वाजानाꣳ सत्पतिं पतिमि'त्यन्नं वै वाजा ऽअन्नानाꣳ सत्पतिं पतिमित्येतदैन्द्र्यानुष्टुभा निवपत्यैन्द्रद्दः हि पुरीषं तदेतदर्द्धमग्नेर्यत्पुरीषमर्द्धमैष्टकम् ॥ ७ ॥ तदाहुः । यत्सर्वैश्छन्दोभिः सर्वाभिर्देवताभिरिष्टका ऽउपदधाति यथैतदेकयैकदेवत्यया निवपति कथमेतदर्द्धमारतीन्द्रो वै सर्वान्देवा-

(१) शु० य० सं० अ० १५ क० ११। (२) शु० य० सं० अ० १५ क० ६१। (३) शु० य० सं० अ० १५ क० ११। (४) शु० य० सं० अ० १५ क० ६१।

ष्प्रतिप्रतिस्तद्यदैन्द्र्या निर्वपति तेनैतदर्द्धमग्नेरथ यदनुष्टुभा वाग्वा ऽअनुष्टुब्वायु सर्वाणि च्छन्दाꣳसि तेनो ऽएवार्द्धम् ॥ ८ ॥ अथ * विकर्णीं च स्वयमातृण्णां चोपदधाति । वायुर्वै विकर्णी द्यौरुत्तमा स्वयमातृण्णा वायुं च तद् दिवं चोपदधात्युत्तमे ऽउपदधात्युत्तमे हि वायुश्च द्यौश्च सꣳस्पृष्टे सꣳस्पृष्टे हि वायुश्च द्यौश्च पूर्वा विकर्णीमुपदधात्यर्वाचीनं तद्दिवो वायुं दधाति तस्मादेषोऽर्वाचीन†मेवातः पवते ॥ ९ ॥ यद्वेव विकर्णीमुपदधाति । यत्र वा ऽअद्रोऽश्वं चितिमवग्राप्यन्ति तदसावादित्य ऽइमाँल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्रं वायुः स स यः स वायुरेषा सा विकर्णी तद्यदेतामुपदधात्यसावेव तदादित्य ऽइमाँल्लोकान्त्सूत्रे समावयते ॥ १० ॥ यद्वेव विकर्णीं च स्वयमातृण्णां चोपदधाति । आयुर्वै विकर्णी प्राणः स्वयमातृण्णायुश्च तत्प्राणं चोपदधात्युत्तमे ऽउपदधात्युत्तमे ह्यायुश्च प्राणश्च सꣳस्पृष्टे सꣳस्पृष्टे ह्यायुश्च प्राणश्च पूर्वामुत्तरां विकर्णीमुपदधात्यायुषा तत्प्राणमुभयतः परिगृह्णाति ॥ ११ ॥ 'प्रोथदुश्वो न यवसे । अविष्यन्न्यदा महः संव्रणाद्व्यस्थात् । आदस्य वातो ऽअनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ती'ति यदा वा ऽएतस्य वातोऽनुवाति शोचिरथैतस्य

* "प्रच्छाद्य पुरीषेण विकर्णीस्वयमातृण्णे शर्करे संस्पृष्टे छिद्रे 'प्रोथदश्व' इत्युत्तरां विकर्णीमायोष्टेति स्वयमातृण्णाम्" (का० श्रौ० सू० १७. १२. २५) ।

† 'मेवातः' इति 'क-घ' । मेव वातः' इति 'ग-ज' पुस्तकयोः ।

(१) ऋ० य० सं० अ० १५ क० ६२ ।

व्व्रजनं कृष्णं भवति त्रिष्टुभोपदधाति त्रैष्टुभो हि वायुराग्ने-
य्याग्निकर्म्म ह्यनिरुक्तयानिरुक्तो हि वायुरथ षड्वात ऽइत्याह
वातो हि वायुः ॥ १२ ॥ * अथ स्वयमातृण्णामुपदधाति।
'आयोष्ट्वा सदने सादयामी'त्येष वा ऽआयुस्तस्यैतत्सदन-
'मवेत' ऽइत्येष हीदꣳ सर्व्वमवति छायायामित्येतस्य हीदꣳ
सर्व्वं 'छायायाश्च समुद्रस्य हृदय' ऽइति समुद्रस्य ह्येतद्धृ-
दयꣳ 'रश्मीवतीं भास्वतीमि'ति रश्मिवती हि द्यौर्भा-
स्व'त्या या द्यां भास्या पृथिवीमोर्वन्तरिक्षमि'त्येवꣳ ह्येष-
ऽइमाँल्लोकानाभाति ॥ १३ ॥ 'परमेष्ठी त्वा सादयत्वि'ति।
परमेष्ठी ह्येतां पञ्चमीं चितिमपश्यत् ॥ १४ ॥ यद्वेव परमे-
ष्ठिनोपदधाति । प्रजापतिं विस्रस्तं देवता ऽआदाय
व्यदक्रामँस्तस्य परमेष्ठी शिर ऽआदायोत्क्रम्याऽतिष्ठत्
॥ १५ ॥ तमब्रवीत् । उप मेहि प्रति म ऽएतद्धेहि येन
मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति त्वदेवत्यमेव
म ऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतत्परमेष्ठी
प्रत्यदधात् ॥ १६ ॥ तद्यैषोत्तमा स्वयमातृण्णा । एतदस्य
तदात्मनस्तद्यदेतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मि-
न्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥ १७ ॥ 'दिवं-

---

* अत्र शतम् ४७०० ॥

(१) शु० य० सं० अ० १५ क० ६३। (२) शु० य० सं० अ० १५ क० ६३। (३) शु० य० सं० अ० १५ क० ६३। (४) शु० य० सं० अ० १५ क० ६३। (५) शु० य० सं० अ० १५ क० ६३। (६) शु० य० सं० अ० १५ क० ६४। (७) शु० य० सं० अ० १५ क० ६४।

स्पृष्ठे व्व्यचस्वतीम्प्रथस्वतीमि'ति । दिवो ह्येतत्स्पृष्ठं व्व्यचस्वत्प्रथस्वद्दिवँ 'ऽस्यच्छ[1] दिवं दृꣳह दिवं मा हिꣳसीरि[2]त्यात्मानं ऽस्यच्छात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥१८॥ ब्विंश[3]स्वस्मै प्राणायापानाय । व्यानायोदानाये'ति प्राणो वै स्वयमातृण्णा सर्वस्मा ऽउ वा ऽएतस्मै प्राणः 'प्रतिष्ठा[4]यै चरित्र्याये'तीमे वै लोकाः स्वयमातृण्णा ऽइम ऽउ लोकाः प्रतिष्ठा चरित्रꣳ 'सूर्यस्त्वा[5]भिपात्वि'ति सूर्यस्त्वाभिगोपायत्वित्येत'ꣳहसो[6] स्वस्त्ये'ति महत्या स्वस्त्येत्येत'च्छर्दि[7]षा शन्तमेने'ति यच्छर्दिः शन्तमं तेनेत्येतत् ॥१९॥ नानोपदधाति । नाना हि वायुश्च द्यौश्च सकृत्साद्यति समानं तत्करोति समानꣳ ह्यायुश्च प्राणश्च ते वाऽउभे ऽएव शर्क्करे भवत ऽउभे स्वयमातृण्णे समानꣳ ह्येवायुश्च प्राणश्चाथैने सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैने ऽएतत्सन्तनोति सन्दधाति ॥ २० ॥ 'ताँ ऽअस्य सूददोहस' ऽइति । आपो वै सूदोऽन्नं दोहः 'सोमꣳ श्रीणन्ति पृश्नय' ऽइत्यन्नं वै पृश्नि 'जन्मन्[8]देवानामि'ति संवत्सरो वै देवानां जन्म 'ब्विꣳ[9]' ऽइति यज्ञो वै ब्विशो यज्ञे हि सर्वाणि भूतानि ब्विष्टानि 'त्रिष्वा[10] रोचने

(१) शु० य० सं० अ० १५ क० ६४। (२) शु० य० सं० अ० १५ क० ६४। (३) शु० य० सं० अ० १५ क० ६४। (४) शु० य सं० अ० १५ क० ६४। (५) शु० य० सं० अ० १५ क० ६४। (६) शु० य० सं० अ० १५ क० ६४। (७) शु० य० सं० अ० १५ क० ६४। (८) शु० य० सं० अ० १५ क० ६४। (९) शु० य० सं० अ० १५ क० ६४। (१०) शु० य० सं० अ० १५ क० ६४। (११) शु० य० सं० अ० १५ क० ६४।

दिव' ऽइति सवनानि वै त्रीणि रोचनानि सवनान्येतदाहानुष्टुभा वाग्वा ऽअनुष्टुब्वागु सर्व्वे प्राणा वाचा चैवैनेऽएतत्प्राणेन च सन्तनोति सन्दधाति सा वा ऽएषैका सती सूददोहाः सर्व्वा ऽइष्टका ऽअनुसञ्चरति प्राणो वै सूददोहास्तस्मादयमेक ऽएव प्राणः सन्त्सर्व्वाण्यङ्गानि सर्व्वमात्मानमनुसञ्चरति ॥ २१ ॥ (C)

सप्तमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[पञ्चम्याश्रितः सुवर्णशकलसहस्रेण प्रोक्षणम्, पुरीषेणाच्छादनं च]

अथ स्वयमातृण्णासु सामानि गायति । इमे वै लोकाः स्वयमातृण्णास्ता ऽएताः शर्क्करास्ता देवा ऽउपधायैतादृशीरेवापश्यन्यथैताः शुष्काः शर्क्कराः ॥ १ ॥ तेऽब्रुवन् । उप तज्जानीत यथेषु लोकेषु रसमुपजीवनं दधामेति तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेषु लोकेषु रसमुपजीवनं दधामेति ॥ २ ॥ ते चेतयमानाः । एतानि सामान्यपश्यँस्तान्यगायँस्तैरेषु लोकेषु रसमुपजीवनमदधुस्तथैवैतद्यजमानो यदेतानि सामानि गायत्येष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥ ३ ॥ स्वयमातृण्णासु गायति । इमे वै लोकाः स्वयमातृण्णाऽएष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥ ४ ॥ स वै

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. १२. ३; कठ० १७. १०; कपिष्ठ० २६. ९; मै० सं० ११. ८. १, १४; तै० सं० ४. ४. ५।

'भूर्भुवः स्वरि'ति । एतासु व्याहृतिषु गायति भूरिति वा ऽअयं लोको भुव ऽइत्यन्तरिक्षलोकः स्वरित्यसौ लोक ऽएष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥ ५ ॥ तानि वै नाना प्रस्तावानि । समाननिधनानि तानि यन्नाना प्रस्तावानि नाना ह्यपश्यन्नथ यत्समाननिधनाञ्येका ह्येव यज्ञस्य प्रतिष्ट्रैकं निधनꣳ स्वर्ग्ग ऽएव लोस्तस्म्मात्स्वर्ज्योतिर्न्निधनानि ॥ ६ ॥ अथैनः हिरण्यशकलैः प्रोक्षति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा ऽएतदमृतः रूपमुत्तममदधुस्तथैवास्मिन्नयमेतदमृतः * रूपमुत्तमं दधाति ॥ ७ ॥ यद्वैवैनः हिरण्यशकलैः † प्रोक्षति । एतद्वाऽअस्मिन्नदोऽमूं पुरस्ताद्दम्म्यां तनूं मद्ध्यतो दधाति रुक्मं च पुरुषं चाथैनमेतत्सर्वमेवोपरिष्टाद्दम्म्यया तन्वा प्रच्छादयति ॥ ८ ॥ द्वाभ्यां—द्वाभ्याꣳ शताभ्याम् । द्विपाद्यजमानो यजमानोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवास्मिन्नेतदमृतः रूपमुत्तमं दधाति पञ्चकृत्वः पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवास्मिन्नेतदमृतः रूपमुत्तमं दधाति सहस्रेण सर्व्वं वै सहस्रः सर्वेणैवास्मिन्नेतदमृतः रूपमुत्तमं दधाति ॥ ९ ॥ पश्चाद्ग्ने प्राङ् तिष्ठन् । अथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्ङथ जघनेन परीत्य

* 'रूपमुपतमम्' इति 'क' पुस्तके ।

† "पुरुषाभिहोमवत्तिष्ठन्नग्निं प्रोक्षति हिरण्यशकलसहस्रेण शते द्वे-द्वे प्रकिरति सहस्रस्येति प्रतिमन्त्रं सहस्रस्येति प्रतिमन्त्रम्" (का० श्रौ० सू० १७. १२. २६) ।

दक्षिणत ऽउदङ् तिष्ठँस्तद्दक्षिणावृत्तद्धि देवब्राथानुपरीत्य पश्चात्प्राङ् तिष्ठँस्तथो हास्यैतत्प्रागेव कर्म्म कृतं भवति ॥ १० ॥ 'सहस्रस्य प्रमासि । सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वे'ति सर्वं वै सहस्रꣳ सर्वमसि सर्वस्मै त्वेत्येतत् ॥ ११ ॥ अथातश्चित्तिपुरीषाणामेव मीमाꣳसा । अयमेव लोकः प्रथमा चितिः पशवः पुरीषं श्यत्प्रथमां चितिं पुरीषेण प्रच्छादयतीमं तल्लोकं पशुभिः प्रच्छादयति ॥ १२ ॥ अन्तरिक्षमेव द्वितीया चितिः । वयाꣳसि पुरीषं श्यद् द्वितीयां चितिं पुरीषेण प्रच्छादयत्यन्तरिक्षं तद्वयोभिः प्रच्छादयति ॥ १३ ॥ द्यौरेव तृतीया चितिः । नक्षत्राणि पुरीषं श्यत्तृतीयां चितिं पुरीषेण प्रच्छादयति दिवं तन्नक्षत्रैः प्रच्छादयति ॥ १४ ॥ यज्ञ ऽएव चतुर्थी चितिः । दक्षिणाः पुरीषं श्यच्चतुर्थीं चितिं पुरीषेण प्रच्छादयति यज्ञं तद्दक्षिणाभिः प्रच्छादयति ॥ १५ ॥ यजमान ऽएव पञ्चमी चितिः । प्रजा पुरीषं श्यत्पञ्चमीं चितिं पुरीषेण प्रच्छादयति यजमानं तत्प्रजया प्रच्छादयति ॥ १६ ॥ स्वर्ग ऽएव लोकः षष्ठी चितिः । देवाः पुरीषं श्यत्षष्ठीं चितिं पुरीषेण प्रच्छादयति स्वर्गं तल्लोकं देवैः प्रच्छादयति ॥ १७ ॥ अमृतमेव सप्तमी चितिः । तामुत्तमामुपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं तस्मादेवा-

(१) शु० य० सं० अ० १४ क० १७ ।

ऽअनन्तर्हितास्तस्माद्धु तेऽमृता ऽइत्यधिदेवतम् ॥ १८ ॥ अथाध्यात्मम् । यैवेयं प्रतिष्ठा यच्चायमवाङ् प्राणस्तत्प्रथमा चितिर्म्माꣳसं पुरीषं य्यत्प्रथमां चितिं पुरीषेण प्रच्छादयत्येतदस्य तदात्मनो माꣳसैः सञ्छादयतीष्टका ऽउपधायास्थीष्टका ऽअस्थि तन्न्माꣳसैः सञ्छादयति नाधस्तात्सञ्छादयति तस्मादिमे प्राणा ऽअधस्तादुसञ्छन्ना ऽउपरिष्टात्तु प्रच्छादयत्येतदस्य तदात्मन ऽउपरिष्टान्न्माꣳसैः सञ्छादयति तस्मादस्यैतदात्मन ऽउपरिष्टान्न्माꣳसैः सञ्छन्नं नावकाशते ॥ १९ ॥ यदूर्द्धं प्रतिष्ठाया ऽअवाचीनं मध्यात् । तद् द्वितीया चितिर्म्माꣳसं पुरीषं य्यद् द्वितीयां चितिं पुरीषेण प्रच्छादयत्येतदस्य तदात्मनो माꣳसैः सञ्छादयतीष्टका ऽउपधायास्थीष्टका ऽअस्थि तन्न्माꣳसैः सञ्छादयति पुरीष ऽउपदधाति पुरीषेण प्रच्छादयत्येतदस्य तदात्मन ऽउभयतो माꣳसैः सञ्छादयति तस्मादस्यैतदात्मन ऽउभयतो माꣳसैः सञ्छन्नं नावकाशते ॥ २० ॥ मध्यमेव तृतीया चितिः । यदूर्द्धं मध्यादवाचीनं ग्रीवाभ्यस्तच्चतुर्थी चितिर्ग्रीवा ऽएव पञ्चमी चितिः शिर ऽएव षष्ठी चितिः प्राणा ऽएव सप्तमी चितिस्तामुत्तमामुपदधाति प्राणाँस्तदस्य सर्व्वस्योत्तमान्दधाति तस्मादस्य सर्व्वस्य प्राणा ऽउत्तमाः पुरीष ऽउपदधाति माꣳसं वै पुरीषं * माꣳसे तत्प्राणा-

* 'माट्-सेन' इति 'ग-ज' पुस्तकयोः ।

न्प्रतिष्ठापयति नोपरिष्टात्प्रच्छादयति तस्मादिमे प्राणा ऽउपरिष्टादुसञ्छन्नाः ॥ २१ ॥ (D)

सप्तमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥ ४ ॥ कण्डिकासंख्या १०९ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

* चितिनामाष्टमं काण्डं समाप्तम् ॥ ८ ॥



(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. २. ४।

* अस्मिन्काण्डे कण्डिकासंख्या ४३७।

अथ साञ्चितिनाम नवमं काण्डम्

अस्मिन् काण्डे प्रतिपाद्या विषयाः— शतरुद्रियहोमविधानम्, चित्यपरिषेकः, वसोर्धाराहोमः, वाजप्रसवीयहोमः राष्ट्रभृद्धोमादि, धिष्ण्यचयनम्, पुनश्चितिः, चित्युपस्थानं चेति ।

[शतरुद्रियहोमः]

ॐ ॥ अथातः शतरुद्रियं * जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र रुद्रो देवता तस्मिन्देवा ऽएतदमृतः रूपमुत्तममदधुः स ऽएषोऽत्र दीप्यमानोऽतिष्ठदुन्नमिच्छमानस्तस्माद्देवा ऽअबिभयुर्यद्वै नोऽयं न हिꣳस्यादिति ॥ १ ॥ तेऽब्रुवन् । अन्नमस्मै सम्भराम तेनैनः शमयामेति तस्मा ऽएतदुन्नः समभरञ्छान्तदेवत्यं तेनैनमशमयँस्तद्यदेतं देवमेतेनाशमयँस्तस्माच्छान्तदेवत्यः शान्तदेवत्यः ह वै तच्छतरुद्रियमित्याचक्षते परोक्षं परोक्षकामा हि देवास्तथैवास्मिन्नयमेतदमृतः रूपमुत्तमं दधाति स ऽएषोऽत्र दीप्यमानस्तिष्ठत्यन्नमिच्छमानस्तस्मा ऽएतदुन्नः सम्भरति शान्तदेवत्यं तेनैनः शमयति ॥ २ ॥ जर्त्तिलैर्जुहोति । जायत ऽएष ऽएतद्य-

---

* शतरुद्रियहोम उत्तरपक्षस्याऽपरस्याꣳ स्वत्वां परिश्रित्स्वर्कपर्णेनाऽर्ककाष्टेन शातयन् सन्ततं जर्तिलमिश्रान् गवेधुकासक्तूनजाक्षीरमेके तिष्ठन्नुदक् 'नमस्त' इत्यध्यायेन (का० श्रौ० सू० १८. १. १)।

क्षीयते स ऽएष सर्वस्मा ऽअन्नाय जायत ऽउभयम्वेतदन्नं ग्यज्जर्त्तिला यच्च ग्राम्यं यच्चारण्यं ग्यदुह तिलास्तेन ग्राम्यं ग्यदुकृष्टे पच्च्यन्ते तेनारण्यमुभयेनैवैनमेतदन्नेन प्रीणाति ग्राम्येण चारण्येन च ॥३॥ अर्कपर्णेन जुहोति। अन्नमर्को ऽन्नेनैवैनमेतत्प्रीणाति ॥ ४ ॥ परिश्रित्सु जुहोति । अग्नय ऽएते यत्परिश्रितस्तथो हास्यैता ऽअग्निमत्येवाहुतयो हुता भवन्ति ॥ ५ ॥ यद्वैवैतच्छतरुद्रियं जुहोति । प्रजापतेर्व्विस्रस्ताद्देवता ऽउदक्रामँस्तमेक ऽएव देवो नाजहान्मन्युरेव सोऽस्मिन्नन्तार्व्वितोऽतिष्ठत्सोऽरोदीत्तस्य यान्यश्रूणि प्रास्कन्दँस्तान्यस्मिन्मन्यौ प्रत्यतिष्ठन्त्स ऽएव शतशीर्षा रुद्रः समभवत्सहस्राक्षः शतेषुधिरथ या ऽअन्या विप्रुषोऽपतँस्ता ऽअसङ्ख्याता सहस्राणीमाँल्लोकाननुप्राविशँस्तद्यदुदितात्समभवँस्तस्माद्रुद्राः सोऽयः शतशीर्षा रुद्रः सहस्राक्षः शतेषुधिराधिज्यधन्वा प्रतिहितायी भीषयमाणोऽतिष्ठदन्नमिच्छमानस्तस्माद्देवा ऽअबिभयुः ॥ ६ ॥ ते प्रजापतिमब्रुवन् । अस्माद्वै बिभीमो यद्वै नोऽयं न हिꣳस्यादिति सोऽब्रवीदन्नमस्मै सम्भरत तेनैनः शमयतेति तस्मा ऽएतदन्नः समभरञ्छतरुद्रियं तेनैनमशमयँस्तद्यदेतः शतशीर्षाणः रुद्रमेतेनाशमयँस्तस्माच्छतशीर्षरुद्रशमनीयः शतशीर्षरुद्रशमनीयः ह वै तच्छतरुद्रियमित्याचक्षते परोक्षं परोक्षकामा हि देवास्तथैवास्मा ऽअयमेतदन्नः सम्भरति शतरुद्रियं तेनैनः

शमयति ॥ ७ ॥ गवेधुकासक्तुभिर्जुहोति । यत्र वै सा देवता व्यित्रस्ताशयत्ततो गवेधुकाः समभवन्त्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ८ ॥ अर्कपर्णेन जुहोति । एतस्य वै देवस्याशयादर्कः समभवत्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ९ ॥ परिश्रित्तु जुहोति । लोमानि वै परिश्रितो न वै लोमसु विषं न किञ्चन हिनस्त्युत्तरार्द्धेऽग्नेरुदङ् तिष्ठञ्जुहोत्येतस्याथ्सं ह दिदृक्षेतस्य देवस्य गृहाः स्वायामेवैनमेतद्दिशि तत्प्रीणाति स्वायां दिदृक्षयवयजते ॥ १० ॥ स वै जानुदघ्ने प्रथमथ्सं स्वाहाकरोति । अध ऽइव वै तद्यज्जानुदघ्नमध ऽइव तद्यदयं लोकस्तद्य ऽइमं लोकꣳ रुद्राः प्राविशँस्ताँस्तत्प्रीणाति ॥ ११ ॥ अथ नाभिदघ्ने । मद्ध्यमिव वै तद्यन्नाभिदघ्नं मद्ध्यमिवान्तरिक्षलोकस्तद्येऽन्तरिक्षलोकꣳ रुद्राः प्राविशँस्ताँस्तत्प्रीणाति ॥ १२ ॥ अथ * मुखदघ्ने । उपरीव वै तद्यन्मुखदघ्नमुपरीव तद्यदसौ लोकस्तद्येऽमुं लोकꣳ रुद्राः प्राविशँस्ताँस्तत्प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारोऽन्नेनैवैनानेतत्प्रीणाति ॥ १३ ॥ 'नमस्ते रुद्र मन्यव' ऽइति । य ऽएवास्मिन्त्सोऽन्तर्म्मन्युर्व्यितोऽतिष्ठत्तस्माऽएतन्नमस्करो'त्युतो त ऽइषवे नमो बाहुभ्यामुत ते नम' ऽइतीष्ट्वा च हि बाहुभ्यां च भीषयमाणोऽतिष्ठत् ॥ १४ ॥ स ऽएष क्षत्रं देवः । यः स शतशीर्षा समभवद्विश-

* 'मुखदघ्न । ऽउ' इति 'ग-ज' पु० । 'मुखदघ्ने । उ' इति 'क-घ' पुस्तकयोः ।

(१) शु० य० सं० अ० १६ क० १ । (२) शु० य० सं० अ० १६ क० १

ऽइम ऽइतरे ये विप्रुड्भ्यः समभवँस्तस्मा ऽएतस्मै क्षत्रायैता विश ऽएतं पुरस्तादुद्धारमुदहरन्न्य ऽएष प्रथमोऽनुवाकस्तेनैनमप्रीणँस्तथैवास्मा ऽअयमेतं पुरस्तादुद्धारमुद्धरति तेनैनं प्रीणाति तस्मादेष ऽएकदेवत्यो भवति रौद्र ऽएतर्ँ ह्येतेन प्रीणाति ॥ १५ ॥ चतुर्दशैतानि यजूर्ँषि भवन्ति त्रयोदश मासाः संवत्सरः प्रजापतिश्चतुर्दशः प्रजापतिरग्निर्ष्वावानग्निर्ष्वावत्यस्य मात्रा तावतैवैनमेतदुन्नेन प्रीणाति नमो नम ऽइति यज्ञो वै नमो यज्ञेनैवैनमेतन्नमस्कारेण नमस्यति तस्मादु ह नायज्ञियं ब्रूयान्नमस्त ऽइति यथा हैनं ब्रूयाद्यज्ञस्त ऽइति तादृक्तत् ॥ १६ ॥ अथ द्वन्द्विभ्यो जुहोति । नमोऽमुष्मै चामुष्मै चेति तद्यथा वै ब्रूयादसौ त्वं च न ऽएष च मा हिꣳसिष्टमित्येवमेतदाह नतराꣳ हि विदित ऽआमन्त्रितो हिनस्ति ॥ १७ ॥ 'नमो हिरण्यबाहवे[1] । सेनान्ये दिशां च पतये नम' ऽइत्येष ऽएव हिरण्यबाहुः सेनानीरेष दिशां पतिस्तद्यत्किञ्चात्रैकदेवत्यमेतमेव तेन प्रीणाति क्षत्रमेव तद्विश्यपि भागं करोति तस्माद्यद्विशस्तस्मिन्क्षत्रियोऽपि भागोऽथ या ऽअसङ्ख्याता सहस्राणीमाँल्लोकाननुप्राविशन्नेतास्ता देवता याभ्य ऽएतज्जुहोति ॥१८॥ अथ जातेभ्यो जुहोति । एतानि ह जातान्येते रुद्रा ऽअनुप्रविविशुर्ष्यत्र-यत्रैते तदेवैनानेतत्प्रीणात्यथो ऽएवैꣳ हैतानि रुद्राणां जातानि देवानां वै विधामनु मनुष्यास्त-

(१) शु० य० सं० अ० १६ क० १७।

स्मादु हेमानि मनुष्याणां जातानि यथाजातमेवैनानेतत्प्रीणाति ॥१९॥ तेषां वा ऽउभयतो नमस्कारा * ऽअन्ये । अन्यतरतो नमस्कारा ऽअन्ये ते ह ते घोरतरा ऽअशान्ततरा यु ऽउभयतो नमस्कारा ऽउभयत ऽएवैनानेतद्यज्ञेन नमस्कारेण शमयति ॥ २० ॥ स वा ऽअशीत्यां च स्वाहाकरोति । प्रथमे चानुवाकेऽथाशीत्यामथाशीत्यां च यानि चोर्द्धानि यजूꣳष्यावतानेभ्योऽन्नमशीतयोऽन्नेनैवैनानेतत्प्रीणाति ॥ २१ ॥ अथैतानि यजूꣳषि जपति । 'नमो वः किरिकेभ्य' ऽइत्येतद्धास्य प्रतिज्ञाततमं धाम यथा प्रियो वा पुत्रो हृदयं वा तस्माद्यत्रैतस्माद्देवाच्छङ्केत तदेताभिर्व्याहृतिभिर्जुहुयादुप हैवैतस्य देवस्य प्रियं धाम गच्छति तथो हैनमेष देवो न हिनस्ति ॥ २२ ॥ 'नमो वः किरिकेभ्य' ऽइति । एते हीदꣳ सर्वं कुर्वन्ति 'देवानाꣳ हृदयेभ्य' ऽइत्यग्निर्वायुरादित्य ऽएतानि ह तानि देवानाꣳ हृदयानि 'नमो विचिन्वत्केभ्य' ऽइत्येते हीदꣳ सर्वं विचिन्वन्ति 'नमो विक्षिणत्केभ्य' ऽइत्येते वै तं विक्षिणन्ति यं विचिक्षीषन्ति 'नमः ऽआनिर्हतेभ्य' ऽइत्येते ह्येभ्यो लोकेभ्योऽनिर्हताः ॥ २३ ॥ अथोत्तराणि जपति । 'द्रापे ऽअन्धसस्पत' ऽइत्येष वै द्रापिरेष वै तं द्रापयति यं द्रापयिषत्यन्धसस्पत ऽइति सोमस्य पत-

* 'ऽअन्ये । ऽन्य' इति 'ग-ज' पु० । 'ऽअन्ये । अन्य' इति 'क-घ' पुस्तकयोः ।

(१) शु० य० सं० अ० १६ क० ४६ । (२) शु० य० सं० अ० १६ क० ४६ । (३) शु० य० सं० अ० १६ क० ४६ । (४) शु० य० सं० अ० १६ क० ४६ । (५) शु० य० सं० अ० १६ क० ४६ । (६) शु० य० सं० अ० १६ क० ४७ ।

ऽइत्येत'द्धरिद्र नीललोहिते'ति नामानि चास्यैतानि रूपाणि च नामग्राहमेवैनमेतत्प्रीणा'त्यासां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किंञ्चनाममदि'ति यथैव यजुस्तथा बन्धुः ॥ २४ ॥ स ऽएष क्षत्रं देवः । तस्मा ऽएतस्मै क्षत्रायैता विशोऽमुं पुरस्तादुद्धारमुदहरन्योऽसौ प्रथमोऽनुवाकोऽथास्मा ऽएतमुपरिष्टादुद्धारमुदहरँस्तेनैनमप्रीणँस्तथैवास्मा ऽअयमेतमुपरिष्टादुद्धारमुद्धरति तेनैनं प्रीणाति तस्मादुप्येष ऽएकदेवत्यो भवति रौद्र ऽएवैतछ ह्येवैतेन प्रीणाति ॥२५॥ सप्तैतानि यजूछंषि भवन्ति । सप्तचितिकोऽग्निः सप्तर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतदुन्नेन प्रीणाति तान्न्युभयान्येकविᳬशतिः सम्पद्यन्ते द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविᳬश ऽएतामभिसम्पदम् ॥ २६ ॥ अथावतानाञ्जुहोति । एतद्वा ऽएनान्देवा ऽएतेनान्नेन प्रीत्वाथैषामेतैरवतानैर्द्धनूछंष्यवातन्वँस्तथैवैनानयमेतदेतेनान्नेन प्रीत्वाथैषामेतैरवतानैर्द्धनूछंष्यवतनोति न ह्यवततेन धनुषा कञ्चन हिनस्ति ॥ २७ ॥ तद्वै सहस्रयोजन ऽइति । एतद्ध परमं दूरं यत्सहस्रयोजनं तद्यदेव परमं दूरं तदेवैषामेतद्धनूछंष्यवतनोति ॥ २८ ॥ यद्वेवाह सहस्रयोजन ऽइति । अयमग्निः सहस्रयोजनं न ह्येतस्मादिति नेत्यन्यत्परमस्ति तद्यदग्नौ जुहोति तदेवैषाछं सहस्रयोजने धनूछंष्यवतनोति ॥ २९ ॥ 'असंड्ख्याता

(१) शु० य० सं० अ० १६ क० ४७। (२) शु० य० सं० अ० १६ क० ४७। (३) शु० य० सं० अ० १६ क० ५४,५५।

सहस्राणि । अस्मिन्महत्यर्णव' ऽइति यत्र-यत्र ते तदेवैषामेतद्धनूष्ठ्यवतनोति ॥ ३० ॥ दुश्चैतानवतान्ना-ञ्जुहोति । दुशाक्षरा विराड्विराडग्निर्दश दिशो-दिशोऽग्निर्दश प्राणाः प्राणा ऽअग्निर्ष्णावानग्निर्ष्णावत्यस्य मात्रा तावतैवैषा-मेतद्धनूष्ठ्यवतनोति ॥ ३१ ॥ अथ * प्रत्यवरोहाञ्जुहोति । एतद्वा ऽएतदिमाँल्लोकानित ऽऊर्द्धो रोहति स स पराङिव रोह ऽइयमु वै प्रतिष्ठा ते देवा ऽइमां प्रतिष्ठामभिप्रत्या-यँस्तथैवैतद्यजमान ऽइमां प्रतिष्ठामभिप्रत्येति ॥ ३२ ॥ यद्वेव प्रत्यवरोहति । एतद्वा ऽएनानेतत्प्रीणन्नन्वेवैति तत ऽएवैतदात्मानमपोद्धरते जीवात्वै तथो हानेनात्मना सर्वमायुरेति ॥ ३३ ॥ यद्वेव प्रत्यवरोहति । एतद्वा ऽएत-देतान्रुद्रानित ऽऊर्द्धान्प्रीणाति तान्पुनरमुतोऽर्वाचः ॥ ३४ ॥ 'नमोऽस्तु रुद्रेभ्यो ये दिवी'ति । तद्येऽमुष्मिँल्लोके रुद्रास्तेभ्य ऽएतन्नमस्करोति 'येषां वर्षमिषव' ऽइति वर्षतः ह तेषामिषवो वर्षेण ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥ ३५ ॥ 'नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्ष' ऽइति । तद्येऽन्तरिक्षलोके रुद्रास्तेभ्य ऽएतन्नमस्करोति 'येषां वाँत ऽइषव' ऽइति वातो ह तेषामिषवो वातेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥ ३६ ॥ 'नमोऽस्तु रुद्रेभ्यो

* प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम् (का० श्रौ० सू० १८ . १. ५ ।

(१) शु० य० सं० अ० १६ क० ६४ । (२) शु० य० सं० अ० १६ क० ६४ । (३) शु० य० सं० अ० १६ क० ६५ । (४) शु० य० सं० अ० १६ क० ६५ । (५) शु० य० सं० अ० १६ क० ६६ ।

ये पृथिव्यामि'ति । तद्येऽस्मिँल्लोके रुद्रास्तेभ्य एतन्न-मस्करोति 'येषामन्नमिषव' इत्यन्नꣳ ह तेषामिषवोऽन्नेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥ ३७ ॥ 'तेभ्यो दश प्राचीः । दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा' इति * दश-दशेति दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति ॥ ३८ ॥ यद्वेवाह दश-दशेति । दश वा अञ्जलेरङ्गुलयो दिशि-दिश्येवैभ्य एतदञ्जलिं करोति तस्मादु हैतद्भीतोऽञ्जलिं करोति 'तेभ्यो नमो अस्तिव'ति तेभ्य एव नमस्करोति 'ते नो मृडयन्तिव'ति त एवास्मै मृडयन्ति 'ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधम' इति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधामीति ह ब्रूयाद्यं द्विष्यात्ततोऽह तस्मिन्न पुनरस्त्यपि तन्नाद्येत स्वयं निर्द्दिष्टो ह्येव स यमेवं विद्वेष्टि ॥ ३९ ॥ त्रिष्कृत्वः प्रत्यवरोहति । त्रिवृदग्निर्य्यावान-ग्निर्य्यावत्त्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारोऽन्नेनैवैनानेतत्प्रीणाति त्रिरित ऊर्द्ध्वो रोहति तत्षट् तस्योक्तो बन्धुः ॥ ४० ॥ यद्वेव त्रिष्कृत्वः प्रत्यवरोहति । त्रिर्हि कृत्व ऊर्द्ध्वो रोहति

* 'दश दशेति' पाठोऽयं 'ग-ज' पुस्तकयोर्नास्ति ।

(१) शु० य० सं० अ० १६ क० ६६ । (२) शु० य० सं० अ० १६ क० ६६ । (३) शु० य० सं० अ० १६ क० ६६ । (४) शु० य० सं० अ० १६ क० ६६ । (५) शु० य० सं० अ० १६ क० ६६ ।

तद्यावत्कृत्व ऽऊर्द्ध्वो रोहति तावत्कृत्वः प्रत्यवरोहति ॥४१॥ अथ तदर्क्कपर्णं * चात्वाले प्रास्यति। एतद्वा ऽएनेनैतद्दौहं कर्म्म करोति तदेतदुशान्तं तदेतत्तिरः करोति नेदिदमशान्तं कश्चिदभितिष्ठात्तं नेद्धिनसदिति तस्माच्चात्वाले षड्वेव चात्वालेऽग्निरेष यच्चात्वालस्तथो हैनदेषोऽग्निः सन्दहत्यथातः सम्पदेव ॥ ४२ ॥ तदाहुः। कथमस्यैतच्छतरुद्रियः संवत्सरमग्निमाप्नोति कथः संवत्सरेणाग्निना सम्पद्यत ऽइति षष्टिश्च ह वै त्रीणि च शतान्येतच्छतरुद्रियमथ त्रिःशदुथ पञ्चत्रिःशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि त्रिःशत्त्रिःशन्मासस्य रात्रयस्तन्मासस्य रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिःशत्स त्रयोदशो मासः स ऽआत्मा त्रिःशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर ऽएव पञ्चत्रिःशमेतावान्वै संवत्सर ऽएवमु हास्यैतच्छतरुद्रियः संवत्सरमग्निमाप्नोत्येवः संवत्सरेणाग्निना सम्पद्यत ऽएतावत्य ऽउ वै † शाण्डिलेऽग्नौ मध्यतो यजुष्मत्य ऽइष्टका ऽउपधीयन्तेऽग्नयो हैते पथग्ग्यदेता ऽइष्टका ऽएवमु हास्यैतेऽग्नयः पृथक् शतरुद्रियेणाभिहुता भवन्ति ॥ ४३ ॥ तदाहुः। कथमस्यैतच्छतरुद्रियं महदुकथमाप्नोति

* "उत्तरवेदिनिचयार्थं यत्र भूप्रदेशे मृदं खनति स प्रदेशश्चात्वाल उच्यते" (का० श्रौ० सू० १८ १. ६)।

† शाण्डिलेऽग्नौ = शाण्डिलदृष्टेऽग्नौ मध्यवेद्यां षष्ट्युत्तरशतत्रयसङ्ख्या यजुष्मत्य इष्टका उपधीयन्त इत्यर्थः।

कथं महतोवक्थेन सम्पद्यत ऽइति याज्ञ्यमूनि पञ्चविद्दः-शतिर्ष्वजूंष्यभितोऽशीतीः स पञ्चविद्दःश ऽआत्मा यत्र वाऽ आत्मा तदेव शिरस्तत्पक्षपुच्छान्यथ या ऽअशीतयः सैवाशीतीनामासिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यदू-र्द्ध्वमशीतिभ्यो यदेवादो महत ऽउक्थस्योर्द्ध्वमशीतिभ्य-ऽएतदस्य तदेवमु हास्यैतच्छतरुद्रियं महदुक्थमाप्नोत्येवं महतोवक्थेन सम्पद्यते ॥ ४४ ॥ (A)

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[चित्याग्नेः परिषेकादि-विधिः]

अथैनमतः * परिषिञ्चति । एतद्वा ऽएनं देवाः शतरुद्रियेण शमयित्वाथैनमेतद्भूय ऽएवाशमयँस्तथैवैन†मय-मेतच्छतरुद्रियेण शमयित्वाथैनमेतद्भूय ऽएव शमयति ॥ १ ॥ अद्भिः परिषिञ्चति । शान्तिर्वा ऽआपः शमयत्येवैनमेतत्सर्व्वतः परिषिञ्चति सर्व्वत ऽएवैनमेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतच्छमयति ॥ २ ॥ यद्वेवैनं परिषिञ्चति । इमे वै लोका ऽएषोऽग्निरिमाँस्तल्लोकानद्भिः परितनोति समुद्रेण

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. ३. १; कठ० १७. ११, १२, १६ कपिष्ठ० २७. १, २, ६; मै० सं० १. ९. २, ३, ९; तै० सं० ४. ५. १, २, ९ ।

* अग्नीत् दक्षिणपक्षस्याऽपरसन्धिसमीपवर्तिन्यात्मभागेऽद्रि निधाय, तत आरभ्य 'अस्म-न्नूर्जम्' इति मन्त्रेणाऽग्निं प्रदक्षिणं सपक्षपुच्छं जलधारया परितः सिञ्चतीति (का० श्रौ० सू० १८. २. १) ।

† 'मेवमेत' इति 'ग-ज' पुस्तकयोः ।

हैनाँस्तत्परितनोति सर्व्वतस्तस्म्मादिमाँल्लोकान्त्सर्व्वतः समुद्रः पर्य्येति दक्षिणावृत्तस्म्मादिमाँल्लोकान्दक्षिणावृत्तसमुद्रः पर्य्येति ॥ ३ ॥ अग्नीत्परिषिञ्चति । अग्निरेष यदाग्नीध्रो नो वा ऽआत्मात्मानः हिनस्त्यहिꣳसाया ऽअश्मनोऽद्ध्यश्मनो ह्यापः प्रभवन्ति निकक्षान्निकक्षाद्ध्यापः प्रभवन्ति दक्षिणान्निकक्षाद्दक्षिणाद्धि निकक्षादापः प्रभवन्ति ॥ ४ ॥ 'अश्मन्नूर्ज्जं पर्व्वते शिश्रियाणामि'ति । अश्मनि वा ऽएषोर्व्वपर्व्वतेषु श्रिता यदापो ऽद्भ्य ऽओषधीभ्यो वनस्पतिभ्यो ऽअधि सम्भृतं पय' ऽइत्येतस्म्माद्धचेतत्सर्व्वस्म्मादधि सम्भृतं पय'स्तान्न ऽइषमूर्ज्जं धत्त मरुतः सꣳरराणा' ऽइति मरुतो वै वर्षस्येशते 'ऽअमँस्ते क्षुदि'ति निदधाति * तदश्मनि क्षुधं दधाति तस्म्मादश्मानाद्योऽथो स्थिरो वा ऽअश्मा स्थिरा क्षुत्स्थिर ऽएव तत्स्थिरं दधाति 'मयि तं ऽऊर्ग्गि'त्यपादत्ते तदात्मन्नूर्ज्जं धत्ते तथा द्वितीयं तथा तृतीयम् ॥ ५ ॥ निधायोदहरणं त्रिर्व्विपल्ययते । एतद्वा ऽएनमेतल्लघूयतीव यदेनꣳ समन्तं पर्य्येति तस्म्मा ऽएवैतन्निह्नुतेऽहिꣳसायै ॥ ६ ॥ यद्वेव विपल्ययते । एतद्वा ऽएनमेतदन्ववैति तत ऽएवैतदात्मानमपोद्धरते जीवात्वै तथो हानेनात्मना सर्व्वमायुरेति ॥ ७ ॥ † त्रिर्व्विपल्ययते ।

(१) शु० य० सं० अ० १७ क० १। (२) शु० य० सं० अ० १७ क० १। (३) शु० य० सं० अ० १७ क० १। (४) शु० य० सं० अ० १७ क० १।

* का० श्रौ० सू० १८. २. २।

(५) शु० य० सं० अ० १७ क० १।

† का० श्रौ० सू० १८. २. ३।

त्रिर्हि कृत्वः पर्य्येति तद्यावत्कृत्वः पर्य्येति तावत्कृत्वो व्विपल्ययते ॥ ८ ॥ अथ तमश्मानमुदहरणेऽवधाय । एतां दिशः हरन्त्येषा वै नैर्ऋती दिङ् नैर्ऋत्यामेव तद्दिशि शुचं दधाति ॥ ९ ॥ एतद्वा ऽएनं देवाः । शतरुद्रियेण चाङ्गिरश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपाग्घँस्तथै-वैनमयमेतच्छतरुद्रियेण चाङ्गिरश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपहन्ति ॥१०॥ वाह्येनाग्निः हरति । इमे वै लोका-ऽएषोऽग्निरेभ्यस्तल्लोकेभ्यो वहिर्द्धा शुचं दधाति वहिर्व्वेदीयं वै वेदिरस्यै तद् वहिर्द्धा शुचं दधाति ॥११॥ [अर्धप्रपाठकः ५५॥] स * वेदेर्दक्षिणायाश्च श्रोणी । प्राङ् तिष्ठन्दक्षिणा निरस्यति 'यं द्विष्मस्तं ते शुगृच्छत्वि'ति यमेव द्वेष्टि तमस्य शुगृ-च्छत्यमुं ते शुगृच्छत्विति ह ब्रूयाद्यं द्विष्यात्ततो ह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयं निर्द्दिष्टो ह्येव स यमेवं व्विद्वेष्टि यदि न भिद्येत भेत्तवै ब्रूयाद्यदा ह्येव † स भिद्यतेऽथ तः शुगृच्छति यं द्वेष्टि तप्रतीक्षमायन्त्यप्रतीक्षमेव तच्छुचं पाप्मानं जहति ॥ १२ ॥ प्रत्येत्येष्टका धेनुः कुरुते । एतद्वा ऽएनं देवाः शतरुद्रियेण चाङ्गिरश्च शमयित्वा शुचमस्य पाप्मानमपहृत्य प्रत्येत्येष्टका धेनुरकुर्वत तथैवैनमयमेतच्छतरुद्रियेण चाङ्गिरश्च शमयित्वा शुचमस्य पाप्मानमपहृत्य प्रत्येत्येष्टका धेनुः कुरुते ॥१३॥ आसीनः

* कुम्भेऽग्निं कृत्वा दक्षिणस्यां वेदिश्रोणौ प्राङ् तिष्ठन् दक्षिणाऽस्यति 'यं द्विष्म' इति (का० श्रौ० सू० १८. २. ४)।

(१) शु० य० सं० अ० १७ क० १ ।

† 'प्रमिथते' इति 'क' पुस्तके ।

कुर्वीतेत्यु हैक ऽआहुः । आसीनो वै धेनुं दोग्धीति तिष्ठँस्त्वेव कुर्वीतेमे वै लोका ऽएषोऽग्निस्तिष्ठन्तीव वा ऽइमे लोका ऽअथो तिष्ठन्त्वै बीर्य्यवत्तरः ॥१४॥ उदङ् प्राङ् * तिष्ठन् । पुरस्ताद्वा ऽएषा प्रतीची यजमानं धेनुरुपतिष्ठते दक्षिणतो वै प्रतीचीं धेनुं तिष्ठन्तीमुपसीदन्ति ॥ १५ ॥ स यत्राब्भ्याप्नोति । तदभिमृश्यैतयजुर्जपती[1]'मा मे ऽअग्न ऽइष्टका धेनवः सन्त्वि'त्यग्निर्हैतासां धेनुकरणस्येष्टे तस्मादेतावतीनां देवतानामग्निमेवामन्त्रयत '[2]ऽएका च दश चा'न्तश्च परार्द्धश्चेत्येष हावराद्धर्यो भूमा यदेका च दश चाथ हैष पराद्धर्यो भूमा यदन्तश्च परार्द्धश्चावरार्द्धतश्चैवैना ऽएतत्परार्द्धतश्च परिगृह्य देवा धेनूरकुर्वत तथैवैना ऽअयमेतदवरार्द्धतश्चैव परार्द्धतश्च परिगृह्य धेनूः कुरुते तस्मादुपि नाद्रियेत बह्वीः कर्त्तुममुत्र वा ऽएष ऽएता ब्रह्मणा यजुषा बह्वीः कुरुतेऽथ यत्सन्तनोति कामानेव तत्सन्तनोति ॥ १६ ॥ यद्वेवेष्टका धेनूः कुरुते । वाग्वा ऽअयमग्निर्वाचा हि चितः स यदाहैका च दश चान्तश्च परार्द्धश्चेति वाग्वा ऽएका वाग्दश वागन्तो वाक्परार्द्धो वाचमेव तद्देवा धेनुमकुर्वत तथैवैतद्यजमानो वाचमेव धेनुं कुरुतेऽथ यत्सन्तनोति वाचमेव तत्सन्तनो[3]'त्येता 'मे ऽअग्न ऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोक ऽइत्येतद्वा ऽएना ऽअस्मिँल्लोके धेनूः कुरुतेऽथैना ऽएतदमुष्मिँल्लोके धेनूः कुरुते तथो

* का० श्रौ० सू० १८. २. ९ ।

(१) शु० य० सं० अ० १७ क० २। (२) शु० य० सं० अ० १७ क० २।
(३) शु० य० सं० अ० १७ क० २।

हैनमेता ऽउभयोर्ल्लोकयोर्भुञ्जन्त्यस्मिँश्चामुष्मिँश्च ॥ १७ ॥ 'ऋतव स्थे'ति । ऋतवो ह्येता 'ऽऋतावृध' ऽइति सत्यवृध ऽइत्येत[1]दृतुष्टा[2] स्थ ऽऋतावृध' ऽइत्यहोरात्राणि वा ऽइष्टका ऽऋतुषु वा ऽअहोरात्राणि तिष्ठन्ति 'घृतश्चुतो मधुश्चुत' ऽइति तदेना घृतश्चुतश्च मधुश्चुतश्च कुरुते ॥ १८ ॥ 'विराजो नामे'ति । एतद्वै देवा ऽएता इष्टका नामभिरुपाह्वयन्त यथा—यथैना ऽएतदाचक्षते ता ऽएनानभ्युपावर्त्तन्ताथ लोकम्पृणा ऽएव पराच्यस्तस्थुरहितनाम्न्यो निर्मिमिहत्यस्ता विराजो नामाकुर्वत ता ऽएनानभ्युपावर्त्तन्त तस्माद्दश—दशेष्टका ऽउपधाय लोकम्पृणयाभिमन्त्रयते तदेना विराजः कुरुते दशाक्षरा हि विराट् 'कामदुघा ऽअक्षीयमाणा' ऽइति तदेनाः कामदुघा ऽअक्षीयमाणाः कुरुते ॥ १९ ॥ अथैनं विकर्षति । मण्डूकेनावकया वेतसशाखयैतद्वा ऽएनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय ऽएवाशमयँस्तथैवैनमयमेतच्छतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय ऽएव शमयति सर्वतो विकर्षति सर्वत ऽएवैनमेतच्छमयति ॥ २० ॥ यद्वैवैनं विकर्षति । एतद्वै यत्रैतं प्राणा ऽऋषयोग्नेऽग्निः समस्कुर्वंस्तमद्भिरवोक्षँस्ता ऽआपः समस्कन्दँस्ते मण्डूका-

(१) शु० य० सं० अ० १७ क० ३। (२) शु० य० सं० अ० १७ क० ३। (३) शु० य० सं० अ० १७ क० ३। (४) शु० य० सं० अ० १७ क० ३। (५) शु० य० सं० अ० १७ क० ३। (६) शु० य० सं० अ० १७ क० ३।

ऽअभवन् ॥ २१ ॥ ताः प्रजापतिमब्रुवन् । यद्वै नः कमभूदवाक्तदगादिति सोऽब्रवीदेष व ऽएतस्य वनस्पतिर्वेत्स्यति वेत्तु संवेत्तु सोऽह वै तं वेतस ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवा ऽअथ यदब्रुवन्नवाङ् नः कमगादिति ता ऽअवाक्का ऽअभवन्नवाक्का ह वै ता ऽअवका ऽइत्याचक्षते परोक्षं परोक्षकामा हि देवास्ता हैतास्त्रय ऽआपो यन्मण्डूकोऽवका वेतसशाखैताभिरेवैनमेतत्त्रयीभिरद्भिः शमयति ॥ २२ ॥ यद्वेवैनं विकर्षति । जायत ऽएष ऽएतद्यच्चीयते स ऽएष सर्वस्मा ऽअन्नाय जायते सर्वम्वेतदन्नं यन्मण्डूकोऽवका वेतसशाखा पशवश्च ह्येता ऽआपश्च वनस्पतयश्च सर्वेणैवैनमेतदन्नेन प्रीणाति ॥२३॥ * मण्डूकेन पशूनाम् । तस्मान्मण्डूकः पशूनामनुपजीवनीयतमो यातयामा हि सोऽवकाभिरपां तस्मादवका ऽअपामनुपजीवनीयतमा यातयाम्न्या हि ता वेतसेन वनस्पतीनां तस्माद्वेतसो वनस्पतीनामनुपजीवनीयतमो यातयामा हि सः ॥ २४ ॥ तानि वहःशे प्रवल्ह्य । दक्षिणार्द्धेनाग्नेरन्तरेण परिश्रितः प्रागग्ने विकर्षति 'समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावको ऽअस्मभ्यः शिवो भवे'ति समुद्रियाभिस्त्वाद्भिः शमयाम ऽइत्येतत् ॥ २५ ॥ अथ जघनार्द्धेनोदक् । 'हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावको ऽअस्मभ्यः शिवो भवे'ति यद्वै शीतस्य

* "मण्डूकावकावेतसशाखा वेणौ वदध्वाऽवकर्षति मन्त्रकृष्टवरसमुद्रस्य त्वेति प्रत्यृचम्" का० श्रौ० सू० १८. २. १० ।

(१) शु० य० सं० अ० १७ क० ४ । (२) शु० य० सं० अ० १७ क० ५ ।

प्रशीतं तद्धिमस्य जरायु शीतस्य त्वा प्रशीतेन शमयाम-ऽइत्येतत् ॥ २६ ॥ अथोत्तरार्द्धेन प्राक् । 'उप ज्मन्नुप-वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो यज्ञं पावकवर्णः शिवङ्कृधी'ति यथैव यजुस्तथा बन्धुः ॥ २७ ॥ * अथ पूर्वार्द्धेन दक्षिणा । 'अपामिदन्ययनः समुद्रस्य निवेशनम् । अन्याँस्ते-ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यः शिवो भवे'ति यथैव यजुस्तथा बन्धुरित्यग्ने विकर्षत्यथेति । अथेत्यथेति तद्दक्षिणावृत्तद्धि देवत्रा ॥ २८ ॥ आत्मानमग्ने विकर्षति । आत्मा ह्येवाग्ने सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्रा ॥ २९ ॥ अभ्यात्मं † पक्षपुच्छानि विकर्षति । अभ्यात्ममेव तच्छान्तिं धत्ते परस्तादर्वाक्परस्तादेव तदर्वाचीꣳ शान्तिं धत्ते 'ऽग्ने पावक रोचिषे'ति दक्षिणं पक्षः 'स नः पावक दीदिव' ऽइति पुच्छं 'पावकया यश्चित्चतयन्त्या कृपे'त्युत्तरं पावकं पावक-मिति यद्वै शिवः शान्तं तत्पावकः शमयत्येवैनमेतत् ॥३०॥ सप्तभिर्विकर्षति । सप्तचितिकोऽग्निः सप्तर्त्तवः संवत्सरः संवत्सरोऽग्निरुर्व्यावानग्निरुर्व्यावत्यस्य मात्रा तावतैवैनमेतद्विक-र्षति तं वः शमुस्करे न्यस्य ॥३१॥ अथैनः सामभिः परि-

(१) शु० य० सं० अ० १७ क० १।

* अत्र शतम् ४८०० ॥

(२) शु० य० सं० अ० १७ क० ७।

† का० श्रौ० सू० १८. २. ११।

(३) शु० य० सं० अ० १७ क० ८। (४) शु० य० सं० अ० १७ क० ९।

(५) शु० य० सं० अ० १७ क० १०।

गायति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा ऽएतदमृतः रूपमुत्तममदधुस्तथैवास्मिन्नयमेतदमृतः रूपमुत्तमं दधाति सामानि भवन्ति प्राणा वै सामान्यमृतमु वै प्राणाऽअमृतमेवास्मिन्नेतद्रूपमुत्तमं दधाति सर्वतः परिगायति सर्वत ऽएवास्मिन्नेतदमृतः रूपमुत्तमं दधाति ॥३२॥ यद्वै वैनः सामभिः परिगायति । एतद्वै देवा ऽअकामयन्तानस्थिकमिममृतमात्मानं कुर्वीमहीति तेऽब्रुवन्नुप तज्जानीत यथेममात्मानमनस्थिकममृतं करवामहा ऽइति तेऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेममात्मानमनस्थिकममृतं करवामहा ऽइति ॥ ३३ ॥ ते चेतयमानाः । एतानि सामान्यपश्यँस्तैरेनं पर्य्यगायँस्तैरेतमात्मानमनस्थिकममृतमकुर्वत तथैवैतद्यजमानो यदेनः सामभिः परिगायत्येतमेवैतदात्मानमनस्थिकममृतं कुरुते सर्वतः परिगायति सर्वत ऽएवैतदेतमात्मानमनस्थिकममृतं कुरुते तिष्टन्गायति तिष्ठन्तीव वा ऽइमे लोका ऽअथो तिष्ठन्वै वीर्य्यवत्तरो हिङ्कृत्य गायति तत्र हि सर्वं कृत्स्नः साम भवति ॥ ३४ ॥ * गायत्रं पुरस्तादायति । अग्निर्वै गायत्रमग्निमेवास्यैतच्छिरः करोत्यथो शिर ऽएवास्यैतदनस्थिकममृतं करोति ॥ ३५ ॥ रथन्तरं † दक्षिणे पक्षे । इयं वै रथन्तरमियमु वा ऽएषां लोकानाꣳ रसतमोऽस्याꣳ हीमे सर्वे रसा रसन्तमः ह वै

* का० श्रौ० सू० १८. ३. १ ।
† का० श्रौ० सू० १८. ३. २ ।

तद्व्यन्तरमित्याचक्षते परोक्षं परोक्षकामा हि देवा-ऽइमामेवास्यैतद्दक्षिणं पक्षं करोत्यथो दक्षिणमेवास्यैतत्पक्षमनस्थिथकममृतं करोति ॥ ३६ ॥ बृहदुत्तरे पक्षे । द्यौर्वै बृहद् द्यौर्हि वर्हिष्ठा दिवमेवास्यैतदुत्तरं पक्षं करोत्यथो ऽउत्तरमेवास्यैतत्पक्षमनस्थिथकममृतं करोति ॥ ३७ ॥ वामदेव्यमात्मन् । प्राणो वै वामदेव्यं वायुरु प्राणः सर्वेषामु हैष देवानामात्मा यद्वायुर्वायुमेवास्यैतदात्मानं करोत्यथो ऽआत्मानमेवास्यैतदनस्थिथकममृतं करोति ॥ ३८ ॥ यज्ञायज्ञियं * पुच्छे । चन्द्रमा वै यज्ञायज्ञियं यो हि कश्च यज्ञः सन्तिष्ठत ऽएतमेव तस्याहुतीनाꣳ रसोऽप्येति तद्यदेतं यज्ञो—यज्ञोऽप्येति तस्माच्चन्द्रमा यज्ञायज्ञियं चन्द्रमसमेवास्यैतत्पुच्छं करोत्यथो पुच्छमेवास्यैतदनस्थिथकममृतं करोति ॥ ३९ ॥ अथ प्रजापतेर्हृदयं गायति । असौ वा ऽआदित्यो हृदयꣳ श्लक्ष्ण ऽएष श्लक्ष्णः हृदयं परिमण्डल ऽएष परिमण्डलः हृदयमात्मन्गायत्यात्मन्हि हृदयं निकक्षे निकक्षे हि हृदयं दक्षिणे निकक्षेऽतो हि हृदयं नेदीय-ऽआदित्यमेवास्यैतद्धृदयं करोत्यथो हृदयमेवास्यैतदनस्थिथकममृतं करोति ॥ ४० ॥ प्रजासु च प्रजापतौ च गायति । तद्यत्प्रजासु गायति तत्प्रजासु हृदयं दधात्यथ यत्प्रजापतौ गायति तदग्नौ हृदयं दधाति ॥ ४१ ॥ यद्वेव प्रजासु च प्रजापतौ च गायति । अयं वा ऽअग्निः

* 'पुच्छम्' इति 'ग-ज' पुस्तकयोः ।

प्रजाश्च प्रजापतिश्च तद्यदग्नौ गायति तदेव प्रजासु च प्रजापतौ च हृदयं दधाति ॥ ४२ ॥ ता हैता ऽअमृतेष्टकाः । ता ऽउत्तमा ऽउपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं नाऽन्योऽद्धऽर्ध्वोग्गायेदिष्टका वा ऽएता विचितो ह स्याद्यदन्योऽद्धऽर्ध्वोग्गायेत् ॥ ४३ ॥ (B)

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

[चित्यारोहणम्, तत्र होमादि-विधिः, प्रवर्ग्योत्सादनं च]

* उपवसथीयेऽहन्प्रातरुदित ऽआदित्ये । वाचं विसृजते वाचं विसृज्य पञ्चगृहीतमाज्यं गृह्णीते तत्र पञ्च हिरण्यशकलान्प्रास्यत्यथैतत्त्रयः समासिक्तं भवति दधि मधु घृतं पात्र्यां वा स्थाल्यां वोरुबिल्यां तदुपरिष्टाद्बर्भमुष्टिं निदधाति ॥ १ ॥ † अथाग्निमारोहति । 'नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्चिषे' इत्यत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र तस्मा ऽअलं रय्यद्धिꣳस्याद्यं जिहिꣳसिषेयमु वा ऽएष हिनस्ति हरसा वैनꣳ शोचिषा वार्चिषा वा हिनस्ति तथो हैनमेष ऽएतैर्न्न हिन'स्त्यन्न्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यꣳ शिवो भवे'ति

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्र० ११. ३. ३; कठ० १०. १७, कपिष्ठ० २८. १, मै० सं० ११. १०. १; तै० सं० ४. ६, १।

* का० श्रौ० सू० १८. ३. ३।

† का० श्रौ० सू० १८. ३. ४।

(१) शु० य० सं० अ० १८ क० ११। (२) शु० य० सं० अ० १८ क० ११।

यथैव यजुस्तथा बन्धुः ॥ २ ॥ आरुह्याग्निꣳ स्वयमातृण्णां व्यायारयति । आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥ ३ ॥ स्वयमातृण्णां व्यायारयति । प्राणः स्वयमातृण्णा प्राणे तदन्नं दधाति ॥ ४ ॥ यद्वेव स्वयमातृण्णां * व्यायारयति । उत्तरवेदिर्हैषाग्नेरथ याममूं पूर्वां व्यायारयत्यद्धरस्य साथ हैषाग्नेस्तामेतद् व्यायारयति ॥ ५ ॥ पश्यँस्तत्र हिरण्यं व्यायारयति । प्रत्यक्षं वै तद्यत्पश्यति प्रत्यक्षः सोत्तरवेदिः प्रास्ता ऽएवेह भवन्ति परोक्षं वै तद्यत्प्रास्ताः परोक्षमियमुत्तरवेदिः ॥ ६ ॥ स्वाहाकारेण तां व्यायारयति । प्रत्यक्षं वै तद्यत्स्वाहाकारः प्रत्यक्षः सोत्तरवेदिर्वेट्कारेणेमां परोक्षं वै तद्यद्वेट्कारः परोक्षमियमुत्तरवेदिराज्येनाज्येन ह्युत्तरवेदिं व्यायारयन्ति पञ्चगृहीतेन पञ्चगृहीतेन ह्युत्तरवेदिं व्यायारयन्ति व्यतिहारं व्यतिहारꣳ ह्युत्तरवेदिं व्यायारयन्ति ॥ ७ ॥ 'नृषदे वेडि'ति । प्राणो वै नृषन्मनुष्या नरस्तद्योऽयं मनुष्येषु प्राणोऽग्निस्तमेतत्प्रीणा[1]त्यप्सुषदे वेडि'ति योऽप्स्वग्निस्तमेतत्प्रीणाति '[2]बर्हिषदे वेडि'ति य ऽओषधिष्वग्निस्तमेतत्प्रीणाति '[3]वनसदे वेडि'ति यो वनस्पतिष्वग्निस्तमेतत्प्रीणाति 'स्वर्विदे [4]वेडि'त्ययमग्निः स्वर्विदिममेवैतदग्निं प्रीणाति ॥ ८ ॥ यद्वेवाह । नृषदे वेडप्सुषदे वेडित्यस्यै

* का० श्रौ० सू० १८. ३. ५ ।

(१) शु० य० सं० अ० १७ क० १२ । (२) शु० य० सं० अ० १७ क० १२ । (३) शु० य० सं० अ० १७ क० २ । (४) शु० य० सं० अ० १७ क० १२ । (५) शु० य० सं० अ० १७ क० १२ ।

वैताऽन्यग्नेर्नामानि तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथो ऽएतानेवैतदग्नीनस्मिन्नग्नौ नामग्राहं दधाति ॥ ९ ॥ पञ्चैता ऽआहुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्ग्र्यावान-ग्निर्ग्र्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ १० ॥ अथैनः * समुक्षति । दध्ना मधुना घृतेन जायत ऽएष-ऽएतद्यच्चीयते स ऽएष सर्वस्मा ऽअन्नाय जायते सर्वम्वेतदन्नं यद्दधि मधु घृतः सर्वेणैवैनमेतदन्नेन प्रीणाति सर्वतः समुक्षति सर्वत ऽएवैनमेतत्सर्वेणान्नेन प्रीणाति ॥ ११ ॥ यद्वैवैनः समुक्षति । अत्रैष सर्वोऽ-ग्निः संस्कृतस्तस्मिन्देवा ऽएतद्रूपमुत्तममदधुस्तथैवा-स्मिन्नयमेतद्रूपमुत्तमं दधात्यन्नं वै रूपमेतदु परममन्नं यद्दधि मधु घृतं तद्यदेव परमः रूपं तदस्मिन्नेतदुत्तमं दधाति सर्वतः समुक्षत्यपि बाह्येन परिश्रितः सर्वत-ऽएवास्मिन्नेतद्रूपमुत्तमं दधाति दर्भैस्ते हि शुद्धा मेद्ध्या ऽअग्रैरग्रः हि देवानाम् ॥ १२ ॥ यद्वैवैनः समु-क्षति । एतद्वै यत्रैतं प्राणा ऽऋषयोऽग्रेऽग्निः समस्कु-र्वंस्तदस्मिन्नदोऽमुं पुरस्ताद्भागमकुर्वतादः सजूरब्दीय-मथास्मिन्नेतः सञ्चित ऽउपरिष्टाद्भागमकुर्वत तद्यत्समु-क्षति य ऽएवास्मिँस्ते प्राणा ऽऋषयः सञ्चित ऽउपरि-ष्टाद्भागमकुर्वत तानेवैतत्प्रीणाति दध्ना मधुना घृतेन

* का० श्रौ० सू० १८. ३. ६ ।

तस्योक्तो बन्धुः ॥ १३ ॥ 'ये देवा देवानाम् । यज्ञिया यज्ञियानामि'ति देवा ह्येते देवानां यज्ञिया ऽउ यज्ञियानाꣳ 'संवत्सरीणमुप भागमासत' ऽइति संवत्सरीणꣳ ह्येत ऽएतं भागमुपासते 'ऽहुतादो हविषो यज्ञे ऽअस्मिन्नि'त्यहुतादो हि प्राणाः 'स्वयं पिबन्तु मधुनो घृतस्ये'ति स्वयमस्य पिबन्तु मधुनश्च घृतस्य चेत्येतत् ॥ १४ ॥ 'ये देवा देवेषु । अधि देवत्वमायन्नि'ति देवा ह्येते देवेष्वधि देवत्वमाय 'न्ये ब्रह्मणः पुर ऽएतारो ऽअस्ये'त्ययमग्निर्ब्रह्म तस्यैते पुर ऽएतारो 'येभ्यो नऽऋते पवते धाम किञ्चने'ति न हि प्राणेभ्य ऽऋते पवते धाम किञ्चन 'न ते दिवो न पृथिव्या ऽअधि स्नुष्वि'ति नैव ते दिवि न पृथिव्यां स्यदेव प्राणभृत्तस्मिँस्त ऽइत्येतत् ॥ १५ ॥ द्वाभ्याꣳ समुक्षति । द्विपाद्यजमानो यजमानोऽग्निर्ऋषावानग्निर्ऋषावत्यस्य मात्रा तावतैवैनमेतत्समुक्षति ॥ १६ ॥ अथ * प्रत्यवरोहति । 'प्राणदा ऽअपानदा' ऽइति सर्वे हैते प्राणा योऽयमग्निश्चितः स यदेतामत्रात्मनः परिदां न वदेतात्र हैवास्यैष प्राणान्वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो हास्यैष प्राणान्न वृङ्क्ते 'प्राणदा ऽअपानदा

(१) शु० य० सं० अ० १७ क० १३। (२) शु० य० सं० अ० १७ क० १३। (३) शु० य० सं० अ० १७ क० १३। (४) शु० य० सं० अ० १७ क० १३। (५) शु० य० सं० अ० १७ क० १४। (६) शु० य० सं० अ० १७ क० १४। (७) शु० य० सं० अ० १७ क० १४। (८) शु० य० सं० अ० १७ क० १४।

* का० श्रौ० सू० १८. ३. ७।

(९) शु० य० सं० अ० १७ क० १५। (१०) शु० य० सं० अ० १७ क० १५।

व्यानदा वर्चोदा वरिवोदा' ऽइत्येतद्वा मेऽसीत्येवैतदा· 'हान्न्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यः शिवो भवे'ति यथैव यजुस्तथा बन्धुः ॥ १७ ॥ प्रत्येत्य प्रव· ग्र्योपसद्भ्यां प्रचरति । प्रवग्र्योपसद्भ्यां प्रचर्य्याथास्मै व्रतं वार्द्धव्रतं वा प्रयच्छत्यथ प्रवग्र्योपसद्भ्यामथ प्रव· ग्र्यमुत्सादयत्याप्त्वा तं कामं ग्यस्मै कामायैनं प्रवृणक्ति ॥ १८ ॥ तं वै परिष्यन्द ऽउत्सादयेत् । तप्तो वा ऽएष शुशुचानो भवति तं ग्यदस्यामुत्सादयेदिमामस्य शुगृ· च्छेद्यदुप्सूत्सादयेदुपोऽस्य शुगृच्छेदुथ यत्परिष्यन्दु· ऽउत्सादयति तथो ह नैवापो हिनस्ति नेमां ग्यदुहाप्सु न प्रास्यति तेनापो न हिनस्त्यथ यत्समन्तमापः परियन्ति शान्तिर्वा ऽआपस्तेनो ऽइमां न हिनस्ति तस्मात्परिष्यन्द· ऽउत्सादयेत् ॥ १९ ॥ अग्नौ त्वेवोत्सादयेत् । इमे वै लोका ऽएषोग्निरापः परिश्रितस्तं ग्यदग्ना ऽउत्सादयति तदेवैनं परिष्यन्द ऽउत्सादयति ॥ २० ॥ यद्वेवाग्ना ऽउत्सा· दयति इमे वै लोका ऽएषोऽग्निरग्निर्वायुरादित्यस्तदेते प्रवग्र्याः स यदन्यत्राग्नेरुत्सादयेदेताँस्तद्देवान्बर्हिर्द्धैभ्यो लोकेभ्यो दह्यादथ यदग्ना ऽउत्सादयत्येतानेवैतद्देवानेषु लोकेषु दधाति ॥ २१ ॥ यद्वेवाग्ना ऽउत्सादयति । शिर· ऽएतद्यज्ञस्य यत्प्रवग्र्यं ऽआत्मायमग्निश्चितः स यद· न्यत्राग्नेरुत्सादयेद्बर्हिर्द्धास्माच्छिरो दह्यादथ यदग्ना· ऽउत्सादयत्यात्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति

(१) शु० य० सं० अ० १७ क० १५।

॥ २२ ॥ स्वयमातृण्णया सꣳस्पृष्टं प्रथमं प्रवर्ग्यमुत्सादयति । प्राणः स्वयमातृण्णा शिरः प्रवर्ग्य ऽआत्मायमग्निश्चित्तः शिरश्च तदात्मानं च प्राणेन सन्तनोति सन्दधात्युत्साद्य प्रवर्ग्यं स्यथा तस्योत्सादनम् ॥२३॥ (A)

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥
कण्डिकासंख्या ॥ ११० ॥

[प्रवर्ग्योत्सादनविधिः]

प्रत्येत्याग्निं प्रहरिष्यन् । आहुतीश्च जुहोति समिधश्चादधात्येतद्वा ऽएनं देवा ऽएष्यन्तं पुरस्तादुन्नेनाप्रीणन्नाहुतिभिश्च समिद्भिश्च तथैवैनमयमेतदेष्यन्तं पुरस्तादुन्नेन प्रीणात्याहुतिभिश्च समिद्भिश्च स वै पञ्चगृहीतं गृह्णीते तस्योक्तो बन्धुः ॥ १ ॥ अथ षोडशगृहीतं गृह्णीते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसम्मितेनैवैनमेतदुन्नेन प्रीणाति यदु वा ऽआत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद् भूयो हिनस्ति तद्यत्कनीयो न तदवति समान्याꣳ स्रुचि गृह्णीते समानो हि स यमेतत्प्रीणाति वैश्वकर्म्मणाभ्यां जुहोति विश्वकर्म्मायमग्निस्तमेवैतत्प्रीणाति तिस्र ऽआहुतीर्जुहोति त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदुन्नेन प्रीणाति ॥ २ ॥ अथ


(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. ४. १; कठ० १७. १७; कपिष्ठ० २८. १; मै० सं० ११. १०. १; तै० सं० ४. ६. १ ।

समिध ऽआदधाति । यथा तर्प्पयित्वा परिवेविष्यात्तादृक्तदौदुम्बर्यो भवन्त्यूर्ग्वै रस ऽउदुम्बर ऽऊर्जैवैनमेतद्रसेन प्रीणात्यार्द्रा भवन्त्येतद्वै वनस्पतीनामनार्त्तं जीवं स्यदार्द्रं तद्यदेव वनस्पतीनामनार्त्तं जीवं तेनैनमेतत्प्रीणाति घृते न्युत्ता भवन्त्याग्नेयं वै घृतꣳ स्वेनैवैनमेतद् भागेन स्वेन रसेन प्रीणाति सर्वाꣳ रात्रिं वसन्ति तत्र हि ता रसेन सम्पद्यन्ते तिस्रः समिध ऽआदधाति त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥३॥ यद्वैवैता ऽआहुतीर्जुहोति । एतद्वा ऽएनं देवा ऽएष्यन्तं पुरस्तादन्नेन समस्कुर्वन्नेताभिराहुतिभिस्तथैवैनमयमेतदेष्यन्तं पुरस्तादन्नेन संस्करोत्येताभिराहुतिभिः ॥ ४ ॥ स वै पञ्चगृहीतं गृह्णीते। पञ्चधाविहितो वा ऽअयꣳ शीर्षन्प्राणो मनो वाक् प्राणश्चक्षुः श्रोत्रमेतमेवास्मिन्नेतत्पञ्चधाविहितꣳ शीर्षन्प्राणं दधात्यग्निस्तिग्मेन शोचिषे[1]ति तिग्मवत्या शिर ऽएवास्यैतया सꣳशश्यति तिग्मतायै ॥ ५ ॥ अथ षोडशगृहीतं गृह्णीते । अष्टौ प्राणा ऽअष्टावङ्गान्येतामभि सम्पदः समान्याꣳ स्रुचि गृह्णीते समाने ह्येवात्मन्नङ्गानि च प्राणाश्च भवन्ति नाना जुहोत्यङ्गेभ्यश्च तत्प्राणेभ्यश्च विधृतिं करोति वैश्वकर्म्मणाभ्यां जुहोति विश्वकर्म्मायमग्निस्तमेवैतत्संस्करोति तिस्र ऽआहुतीर्जुहोति त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन संस्करोति सप्तदशभिर्ऋग्भिः सप्तदशः प्रजापतिः प्रजापति-

(१) शु० य० सं० अ० १५ क० १६।

रग्निर्ग्र्यावानग्निर्ग्र्यावत्यस्य मात्रा तावतैवैनमेतत्संस्करोत्येकविꣳशतिगृहीतेन द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य एकविꣳश ऽएतामभिसम्पदम् ॥ ६ ॥ यद्वेवैताः समिध ऽआदधाति । एतद्वा ऽएनं देवाः सर्व्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेनाप्रीणन्नेताभिः समिद्भिस्तथैवैनमयमेतत्सर्व्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेन प्रीणात्येताभिः समिद्भिरौदुम्बर्य्यो भवन्त्यार्द्रा घृते न्युत्ताः सर्व्वाꣳ रात्रिं वसन्ति तस्योक्तो बन्धु'रुदेनमुत्तरां नयेन्द्रेमं प्रतरान्नय, यस्य कुर्म्मो गृहे हविरि'ति * यथैव यजुस्तथा बन्धुस्तिस्रः समिध ऽआदधाति त्रिवृदग्निर्ग्र्यावानग्निर्ग्र्यावत्यस्य मात्रा तावतैवैनमेतदुन्नेन प्रीणाति तिस्र ऽआहुतीर्जुहोति तत्षट् तस्योक्तो बन्धुः ॥ ७ ॥ (B)

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥



[अप्रतिरथजपादि]

अथातः सम्प्रेष्यति । उद्यच्छेध्ममुपयच्छोपयमनीरग्नये प्रहियमाणायानुब्रूह्यग्नीदेकस्फ्यायानूदेहि ब्रह्मन्नप्रतिरथं जपेति ॥ १ ॥ एतद्वै देवानुपप्रैष्यतः । एतं स्यज्ञं तथ्ꣳस्यमानान्दक्षिणतोऽसुरा रक्षाꣳसि नाष्ट्रा ऽअजिघाꣳसन्न यक्ष्यद्धे न यज्ञं तथ्ꣳस्यद्ध ऽइति ॥ २ ॥ ते देवा ऽइन्द्रमब्रुवन् । त्वं वै नः श्रेष्ठो बलिष्ठो वीर्य्यव-

(१) शु० य० सं० अ० १५ क० ५०–५२ ।

* 'यथा यजुः' इति 'ग-ज' पुस्तकयोः ।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ११. ४. १ ।

त्तमोऽसि त्वमिमानि रक्षाꣳसि प्रतियतस्वेति तस्य वै मे ब्रह्म द्वितीयमस्तिवति तथेति तस्मै वै बृहस्पतिं द्वितीयमकुर्वन्ब्रह्म वै बृहस्पतिस्त ऽइन्द्रेण चैव बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्र ऽएतं य्यज्ञमतन्वत ॥ ३ ॥ तद्वा ऽएतत्क्रियते। यद्देवा ऽअकुर्वन्निदन्नु तानि रक्षाꣳसि देवैरेवापहतानि यत्त्वेतत्करोति यद्देवा ऽअकुर्वंस्तत्करवाणीत्यथो ऽइन्द्रेण चैवैतद् बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्र ऽएतं य्यज्ञं तनुते ॥ ४ ॥ स यः स ऽइन्द्रः। एष सोऽप्रतिरथोऽथ * यः स बृहस्पतिरेष स ब्रह्मा तद्यद् ब्रह्माप्रतिरथं जपतीन्द्रेण चैवैतद् बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा ऽअपहत्याभयेऽनाष्ट्र ऽएतं य्यज्ञं तनुते तस्माद् ब्रह्माप्रतिरथं जपति ॥ ५ ॥ 'आशुः शिशानो व्वृषभो न भीम' † ऽइति। ऐन्द्र्योऽभिरूपा द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा ऽअपहन्ति त्रिष्टुब्भिर्व्वज्रो वै त्रिष्टुब्व्वज्रेणैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा ऽअपहन्ति ता द्वाविꣳशतिर्ग्गायत्र्यः सम्पद्यन्ते तदाग्नेय्यो भवन्त्यग्निकर्म्म हि ॥ ६ ॥ ‡ अथैनमुद्यच्छति। 'उदु

* का० श्रौ० सू० १८. ३. १७।
(१) शु० य० सं० अ० १७ क० ३१।
† 'क' पुस्तके 'इत्यैन्द्र्यो' इति पाठो लभ्यते।
‡ का० श्रौ० सू० सं० अ० १८. ३. १८।

त्वा विश्वे देवा ऽअग्ने भरन्तु चित्तिभिरि'ति तस्योक्तो बन्धुः ॥ ७ ॥ अथाभिप्रयन्ति । 'पञ्च[1] दिशो दैवीर्यज्ञमवन्तु देवीरि'ति देवाश्चासुराश्चोभये प्राजापत्या दिक्ष्वस्पर्द्धन्त ते देवा ऽअसुराणां दिशोऽवृञ्जत तथैवैतद्यजमानो द्विषतो ब्भ्रातृव्यस्य दिशो वृङ्क्ते दैवीरिति तदेना दैवीः कुरुते यज्ञमवन्तु देवीरिति यज्ञमिममवन्तु देवीरित्येत'दप[2]मतिं दुर्म्मतिं बाधमाना' ऽइत्यशनाया वा ऽअमतिरशनायामपबाधमाना ऽइत्येत'द्रायस्[3]पोषे यज्ञपतिमाभजन्ती'रिति रय्यां च पोषे च यज्ञपतिमाभजन्तीरित्येत'द्रायस्पोषे ऽअधि यज्ञो ऽअस्त्थादि'ति रय्यां च पोषे चाधि यज्ञोऽस्त्थादित्येतत् ॥ ८ ॥ 'समिद्धे ऽअग्[4]नावधि मामहान' ऽइति । यजमानो वै मामहान् 'ऽउक्थ[5]पत्र' ऽइत्युक्थानि ह्येतस्य पत्रा'णीङ्[6]ख' ऽइति यज्ञिय ऽइत्ये'तद्भीत' इति धारित ऽइत्येत'त्तप्तं घर्म्म[7] परिगृह्यायजन्ते'ति तप्तꣳ ह्येतं घर्म्मं परिगृह्यायजन्तो'र्ज्जा यज्ञ[8]मयजन्त देवा' ऽइत्यूर्ज्जा ह्येतं यज्ञमयजन्त देवाः ॥ ९ ॥ 'दैव्[9]याय धर्त्रे जोष्ट्र' ऽइति । दैवो ह्येष धर्त्ता जोषयितृतमो 'देव[10]श्रीः श्रीमनाः शतपया' ऽइति

(१) शु० य० सं० अ० १६ क० ५३। (२) शु० य० सं० अ० १६ क० ५४। (३) शु० य० सं० अ० १७ क० ५४। (४) शु० य० सं० अ० १७ क० ५४। (५) शु० य० सं० अ० १७ क० ५५। (६) शु० य० सं० अ० १७ क० ५५। (७) शु० य० सं० अ० १७ क० ५५। (८) शु० य० सं० अ० १७ क० ५५। (९) शु० य० सं० अ० १७ क० ५५। (१०) शु० य० सं० अ० १७ क० ५५। (११) शु० य० सं० अ० १७ क० ५६। (१२) शु० य० सं० अ० १७ क० ५६। (१३) शु० य० सं० अ० १६ क० ५६।

देवश्श्रीर्ह्येष श्रीमनाः शतपयाः 'परिगृह्य देवा यज्ञमा-
यन्नि'ति परिगृह्य ह्येतं देवा यज्ञमाय'न्देवा देवेभ्यो-
ऽअद्धर्य्यन्तो ऽअस्थुरि'त्यद्धरो वै यज्ञो देवा देवेभ्यो
यज्ञियन्तोऽस्थुरित्येतत् ॥ १० ॥ 'वीतहः हविः शमितहः
शमिता यजद्ध्या' ऽइति । इष्टश्च स्विष्टमित्येत'त्तुरीयो
यज्ञो यत्र हव्यमेती'त्यद्धर्य्युः पुरस्ताद्यजूꣳषि जपति
होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं जपत्येष-
ऽएव तुरीयो यज्ञ'स्ततो वाका ऽआशिषो नो जुषन्ताम्ि'ति
ततो नो वाकाश्चाशिषश्च जुषन्तामित्येतत् ॥ ११ ॥
'सूर्य्यरश्मिर्हरिकेशः पुरस्तात् । सविता ज्योतिरुदयाँ२-
ऽअजस्रम्ि'त्यसौ वा ऽआदित्य ऽएषोऽग्निः स ऽएष
सूर्य्यरश्मिर्हरिकेशः पुरस्तात्सवि्तैतज्ज्योतिरुद्यच्छत्यजस्रं-
'तस्यँ पूषा प्रसवे याति विद्वानि'ति पशवो वै पूषा त-
ऽएतस्य प्रसवे प्रेरते 'सम्पश्यन्न्विश्श्वा भुवनानि गोपा'
ऽइत्येष वा ऽइदꣳ सर्व्वꣳ सम्पश्यत्येष ऽउ ऽएवास्य
सर्व्वस्य भुवनस्य गोप्ता ॥ १२ ॥ तद्या ऽअमुष्मादादि-
त्यादर्व्वाच्च्यः पञ्चदिशः । ता ऽएतद्देवा ऽअसुराणाम-
वृञ्जताथो ता ऽएवैतत्समारोहँस्ता ऽउ ऽएवैतद्यजमानो
द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता ऽएवैतत्समारो-
हत्यथो ऽएतद्वा ऽएताभिर्देवा ऽआतः सम्प्राप्नुवँस्त-

---

(१) शु० य० सं० अ० १७ क० ५६। (२) शु० य० सं० अ० १७ क० ५६।
(३) शु० य० सं० अ० १७ क० ५६। (४) शु० य० सं० अ० १७ क० ५७।
(५) शु० य० सं० अ० १७ क० ५७। (६) शु० य० सं० अ० १७ क० ५८।
(७) शु० य० सं० अ० १७ क० ५८। (८) शु० य० सं० अ० १७ क० ५८।

थैवाभिरयमेतद्वातः सम्प्राप्नोति ॥ १३ ॥ अथाश्मानं * पृश्निमुपदधाति । असौ वा ऽआदित्योऽश्मा पृश्निरमुमेवैतदादित्यमुपदधाति पृश्निर्भवति रश्मिभिर्हि मण्डलं पृश्नि तमन्तरेणाहवनीयं च गार्हपत्यं चोपदधात्ययं वै लोको गार्हपत्यो द्यौराहवनीय ऽएतं तदिमौ लोकावन्तरेण दधाति तस्मादेष ऽइमौ लोकावन्तरेण तपति ॥ १४ ॥ आग्नीध्रवेलायाम् । अन्तरिक्षं वा ऽआग्नीध्रमेतं तदन्तरिक्षे दधाति तस्मादेषोऽन्तरिक्षायतनो व्यद्धे-व्यद्धे ह्येष ऽइतः ॥ १५ ॥ स ऽएष प्राणः । प्राणमेवैतदात्मन्धत्ते तदेतदायुरायुरेवैतदात्मन्धत्ते तदेतदन्नमायुर्ह्येतदन्नमु वा ऽआयुरश्मा भवति स्थिरो वा ऽअश्मा स्थिरं तदायुः कुरुते पृश्निर्भवति पृश्नीव ह्यन्नꣳ ॥ १६ ॥ स ऽउपदधाति । 'विमान ऽएष दिवो मध्य ऽआस्त' ऽइति विमानो ह्येष दिवो मध्य ऽआस्त 'ऽआपप्रिवान्रोदसी-ऽअन्तरिक्षमि'त्युद्यन्वा ऽएष ऽइमाँल्लोकानापूरयति 'स विश्वाचीरभिचष्टे घृताचीरि'ति स्रुचश्चैतद्वेदीश्चा'हान्तरा पूर्वमपरं च केतुमि'त्यन्तरेमं च लोकममुं चेत्येतदथो यच्चेदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति ॥ १७ ॥ 'उक्षा समुद्रो ऽअरुणः सुपर्ण' ऽइति । उक्षा ह्येष समुद्रोऽरुणः सुपर्णः 'पूर्वस्य योनिं पितुराविवेशे'ति पूर्वस्य

* का० श्रौ० सू० १८. ३. २० ।

(१) शु० य० सं० अ० १७ क० ५९ । (२) शु० य० सं० अ० १७ क० ५९ । (३) शु० य० सं० अ० १७ क० ५९ । (४) शु० य० सं० अ० १७ क० ५९ । (५) शु० य० सं० अ० १७ क० ६० । (६) शु० य० सं० अ० १७ क० ६० ।

ह्येष ऽएतं स्योनिं पितुराविशति 'मध्ये[1] दिवो निहितः पृश्निरश्मे'ति मध्ये ह्येष दिवो निहितः पृश्निरश्मा 'विचक्रमे[2] रजसस्पात्यन्ता'विति विक्रममाणो वा ऽएष ऽएषां लोकानामन्तान्न्याति ॥ १८ ॥ द्वाभ्यामुपदधाति *। द्विपाद्यजमानो यजमानोऽग्निर्ऋर्षावानग्निर्ऋर्षावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिष्टुब्भ्यां त्रैष्टुभो ह्येष न सादयत्यसन्नो ह्येष न सूददोहसाधिवदति प्राणो वै सूददोहाः प्राण ऽएष किं प्राणे प्राणं दद्ध्यामिति तं निधाय यथा न नश्येत् ॥ १९ ॥ † अथोपातियन्ति। 'इन्द्रं विश्[3]वा ऽअवीवृधन्नि'ति तस्योक्तो 'बन्धु'र्देवबन्धुर्[4]यज्ञ ऽआ च वक्षत्सुम्मनहूर्[5]यज्ञ ऽआ च वक्षदि'ति देवहूश्चैव यज्ञः सुम्मनहूश्च 'यक्षदग्निर्देवो देवाँ[2] ऽआ च वक्षदि'ति यक्षच्चैवाग्निर्देवो देवानां च वहत्वित्येतत् ॥ २१ ॥ 'व्राजं[6]स्यमा प्रसवः। उद्ग्राभेणोदग्रभीत्। अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ[2] ऽअकरि'ति यथैव यजुस्तथा बन्धुः ॥ २१ ॥ 'उद्ग्राभं च निग्राभं च ब्रह्म देवा ऽअवीवृधन्। अधा सपत्नानिन्द्राग्नी मे विषूची नान्व्यस्यताम्[5]'ति यथैव यजुस्तथा बन्धुः ॥ २२ ॥ तद्या ऽअमुष्मादादित्यादूर्द्धाश्चतस्रो दिशः। ता ऽएतद्देवा

(१) शु० य० सं० अ० १७ क० ६०। (२) शु० य० सं० अ० १७ क० ६०।
* का० श्रौ० सू० १८. ३. २२।
† 'अथोपायन्ति' इति 'ग-ज' पुस्तकयोर्दृश्यते।
(३) शु० य० सं० अ० १७ क० ६१। (४) शु० य० सं० अ० १७ क० ६२।
(५) शु० य० सं० अ० १७ क० ६२। (६) शु० य० सं० अ० १७ क० ६३।
(७) शु० य० सं० अ० १७ क० ६४।

ऽअसुराणामवृञ्जताथो ता ऽएवैतत्समारोहँस्ता ऽउ ऽएवैतद्यजमानो द्विषतो ब्भ्रातृव्यस्य वृङ्क्तेऽथो ता ऽएवैतत्समारोहत्यथो ऽएतद्वा ऽएताभिर्देवा ऽआतः सम्प्राप्नुवँस्तथैवाभिरयमेतद्वातः सम्प्राप्नोति ॥ २३ ॥ अथाग्निमारोहन्ति * । 'क्रमद्ध्वमग्निना नाकमि'ति स्वर्गो वै लोको नाकः क्रमद्ध्वमनेनाग्निनैतꣳ स्वर्गं लोकमित्येत-'दुरुव्यः हस्तेषु बिभ्रत' ऽइत्युरुव्यꣳ ह्येत ऽएतः हस्तेषु बिभ्रति 'दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराद्धमि'ति दिवस्पृष्ठꣳ स्वर्गं लोकं गत्वा मिश्रा देवेभिराद्धमित्येतत् ॥ २४ ॥ 'प्राचीमनु प्रदिशं प्रेहि विद्वानि'ति । प्राची वै दिगग्नेः स्वामनु प्रदिशं प्रेहि विद्वानित्येत'दग्नेरग्ने पुरो ऽअग्निर्भवेहे'त्यस्य त्वमग्नेरग्ने पुरोऽग्निर्भवेहेत्येत-'द्विश्वा ऽआशा दीद्यानो विभाही'ति सर्वा ऽआशा दीप्यमानो विभाहीत्येत'दूर्जं नो धेहि द्विपदे चतुष्पद' ऽइत्याशिषमाशास्ते ॥ २५ ॥ 'पृथिव्या ऽअहम् । उदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहमि'ति गार्हपत्याद्ध्याग्नीद्ध्रीयमागच्छन्त्याग्नीद्ध्रीयादाहवनीयं 'दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहमि'ति दिवो नाकस्य पृष्ठात्स्वर्गं लोकमगामहमित्येतत् ॥ २६ ॥ 'स्वर्यन्तो नापेक्षन्ते । आ द्याꣳ

* का० श्रौ० सू० १८ ४ १ ।

(१) शु० य० सं० अ० १७ क० ६५ । (२) शु० य० सं० अ० १७ क० ६५ । (३) शु० य० सं० अ० १७ क० ६५ । (४) शु० य० सं० अ० १७ क० ६६ । (५) शु० य० सं० अ० १७ क० ६६ । (६) शु० य० सं० अ० १७ क० ६६ । (७) शु० य० सं० अ० १७ क० ६७ । (८) शु० य० सं० अ० १७ क० ६७ । (९) शु० य० सं० अ० १७ क० ६८ । (१०) शु० य० सं० अ० १७ क० ६८ ।

रोहन्ति रोदसी' ऽइति न हैव तेऽपेक्षन्ते ये स्वर्गं लोकं यन्ति 'यज्ञं यच्छे विश्श्वतोधारꣳ सुविद्वाꣳसो वितेनिर' ऽइत्येष ऽएव यज्ञो विश्श्वतोधार ऽएत ऽउ ऽएव सुविद्वाꣳसो य ऽएतं वितन्वते ॥ २७ ॥ 'अग्ने प्रेहि प्रथमो देवयतामि'ति। इममेतदग्निमाह त्वमेषां प्रेहि प्रथमो देवयतामिति 'चक्षुर्देवानामुत मर्त्यानामि'त्युभयेषाꣳ हैतद्देवमनुष्याणां चक्षु'रियक्षमाणा भृगुभिः सजोषा' इति यजमाना भृगुभिः सजोषा ऽइत्येत'त्स्वर्यन्तु यजमानाः स्वस्ती'ति स्वर्गं लोकं यन्तु यजमानाः स्वस्तीत्येतत् ॥२८॥ तद्या ऽअमुष्मिँल्लोके पञ्च दिशः। ता ऽएतद्देवा ऽअसुराणामवृञ्जताथो ता ऽएवैतत्समारोहँस्ता ऽउ ऽएवैतद्यजमानो द्विषतो ऽभ्रातृव्यस्य वृङ्क्तेऽथो ता ऽएवैतत्समारोहत्यथो ऽएतद्वा ऽएताभिर्देवा ऽआतः सम्प्राप्नुवँस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥ २९ ॥ अथैनमभिजुहोति। एतद्वा ऽएनं देवा ऽईयिवाꣳसमुपरिष्टादुन्नेनाप्रीणन्नेतयाहुत्या तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादुन्नेन प्रीणात्येतयाहुत्या कृष्णायै शुक्लवत्सायै पयसा रात्रिर्वै कृष्णा शुक्लवत्सा तस्या ऽआसावादित्यो वत्सः स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणात्युपरि धार्य्यमाण ऽउपरि हि स यमेतत्प्रीणाति दोहनेन दोहनेन हि पयः प्रदीयते ॥ ३० ॥ यद्वैवैनमभिजुहोति।

---

(१) शु० य० सं० अ० १७ क० ६९। (२) शु० य० सं० अ० १७ क० ६९। (३) शु० य० सं० अ० १७ क० ६९। (४) शु० य० सं० अ० १७ क० ६९ (५) शु० य० सं० अ० १७ क० ६९।

शिर ऽएतद्यज्ञस्य यदग्निः प्राणः पयः शीर्षस्तत्प्राणं दधाति यथा * स्वयमातृण्णामभिप्रक्षरेदेवमभिजुहुया-त्प्राणः स्वयमातृण्णा रस ऽएष शिरश्च तत्प्राणं च रसेन सन्तनोति सन्दधाति 'नक्तोषासा समनसा विरूपे' ऽइति तस्योक्तो बन्धुः ॥ ३१ ॥ 'अग्ने सहस्राक्षे'ति । हिरण्मयशकलैर्वा ऽएष सहस्राक्षः 'शतमूर्द्धन्नि'ति यददुः शतशीर्षा रुद्रोऽसृज्यत 'शतं ते प्राणाः सहस्रं व्यानाः' ऽइति शतहैव तस्य प्राणाः सहस्रं व्यानाः यः शतशीर्षा 'स्वः साहस्रस्य राय ऽईशिष' ऽइति स्वः सर्वस्यै रय्या ऽईशिष ऽइत्येत'त्तस्मै ते विधेम वाजाय स्वाहे'त्येष वै वाजस्तमेतत्प्रीणाति ॥ ३२ ॥ द्वाभ्यामभिजुहोति । द्विपाद्यजमानो यजमानोऽग्निर्ग्यावान-ग्निर्ग्यावत्यस्य मात्रा तावतैवैनमेतदभिजुहोति ॥ ३३ ॥ अथैनं † निदधाति । 'सुपर्णोऽसि गरुत्मानि'त्येतद्वा ऽएनमदो विकृत्या सुपर्णं गरुत्मन्तं विकरोति तः सुपर्णं गरुत्मन्तं चिनोति तः सुपर्णं गरुत्मन्तं कृत्वान्ततो निदधाति 'पृष्ठे पृथिव्याः सीद । भासान्तरिक्षमापृण ज्योतिषा दिव-मुत्तभान तेजसा दिश ऽउद्दृंहे'त्येवैष ह्येष ऽएतत्सर्वं

* का० श्रौ० सू० १८. ४ २ ।

(१) शु० य० सं० अ० १७ क० ७० । (२) शु० य० सं० अ० १७ क० ७१ । (३) शु० य० सं० अ० १७ क० ७१ । (४) शु० य० सं० अ० १७ क० ७१ । (५) शु० य० सं० अ० १७ क० ७१ । (६) शु० य० सं० अ० १७ क० ७१ ।

† का० श्रौ० सू० १८. ४. ४ ।

(७) शु० य० सं० अ० १७ क० ७२ । (८) शु० य० सं० अ० १७ क० ७२ ।

करोति ॥ ३४ ॥ 'आजुह्वानः सुप्रतीकः पुरस्तादि'ति । आजुह्वानो नः सुप्रतीकः पुरस्तादित्येत'दग्ने स्वं योनिमासीद साधुये'त्येष वा ऽअस्य स्वो योनिस्तꣳ साद्वासीदेत्येत'दस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्नि'ति द्यौर्वा ऽउत्तरꣳ सधस्थं 'विश्वे देवा यजमानश्च सीदते'ति तद्विश्वैर्देवैः सह यजमानः सादयति द्वाभ्यां निदधाति तस्योक्तो बन्धुर्वषट्कारेण तस्योपरि बन्धुः ॥ ३५ ॥ अथास्मिन्त्समिध ऽआदधाति । एतद्वा ऽएनं देवा ऽईयिवाꣳसमुपरिष्टादुन्नेनाप्रीणन्त्समिद्भिश्चाहुतिभिश्च तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादुन्नेन प्रीणाति समिद्भिश्चाहुतिभिश्च ॥ ३६ ॥ स वै * शमीमयीं प्रथमामादधाति । एतद्वा ऽएष ऽएतस्यामाहुत्याꣳ हुतायां प्रादीप्यतोदज्वलत्तस्माद्देवा ऽअबिभयुर्यद्वै नोऽयं न हिꣳस्यादिति त ऽएताꣳ शमीमपश्यँस्तयैनमशमयँस्त यदेनꣳ शम्म्याशमयँस्तस्माच्छमी तथैवैनमयमेतच्छम्म्या शमयति शान्त्या ऽएव न जग्ध्यै ॥ ३७ ॥ 'ताꣳ सवितुर्वरेण्यस्य । चित्रामाहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो ऽअदुहत्प्रपीनाꣳ सहस्रधारां पयसा महीं गामि'ति कण्वो हैनां ददर्श सा हास्मै सहस्रधारा सर्वान्कामान्दुदुहे तथैवैतद्यजमानाय सहस्रधारा सर्वान्न्कामान्दुहे ॥ ३८ ॥ अथ

(१) शु० य० सं० अ० १७ क० ७२ । (२) शु० य० सं० अ० १७ क० ७३ । (३) शु० य० सं० अ० १७ क० ७३ । (४) शु० य० सं० अ० १७ क० ७३ ।

* का० श्रौ० सू० १८. ४. ६ ।

† 'यदेत' इति 'ग' पुस्तके ।

(५) शु० य० सं० अ० १७ क० ७४ ।

वैकङ्कतीमादधाति । तस्या ऽउक्तो बन्धु'र्विधेम ते परमे जन्मन्नग्न' ऽइति द्यौर्वा ऽअस्य परमं जन्म 'विधेम स्तोमै-रवरे सधस्थ' ऽइत्यन्तरिक्षं वा ऽअवरꣳ सधस्थं 'य्यस्मा-द्योनेरुदारिथा यजे तमि'त्येष वा ऽअस्य स्वो योनिस्तं य्यज ऽइत्येत'त्प्र त्वे हवीꣳषि जुहुरे समिद्ध' ऽइति यदा वा ऽएष समिद्ध्यतेऽथैतस्मिन्नहवीꣳषि प्रजुह्वति ॥ ३९ ॥ अथौदुम्बरीमादधाति । ऊग्गवै रस ऽउदुम्बर ऽऊर्जैवैनमेत-द्रसेन प्रीणाति कृष्णकवती भवति पशवो वै कृष्णकाः पशुभिरेवैनमेतदन्नेन प्रीणाति यदि कृष्णकवतीं न विन्दे-द्दधिद्प्सुमुपहत्यादद्ध्यात्तद्यद्दधिद्प्सु ऽउपतिष्ठते तदेव पशुरूपं 'प्रेद्धो ऽअग्ने दीदिहि पुरो न' ऽइति विराजा दधा-त्यन्नं विराडन्नेनैवैनमेतत्प्रीणाति तिस्रः समिध ऽआदधाति त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्री-णाति ॥४०॥ [अर्धप्रपाठकः४७॥] अथाहुतीर्जुहोति * । यथा परिविष्यानुपायय्येत्तादृक्तत्स्तुवेण पूर्वे स्रुचोत्तरा'मग्ने तम-द्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋद्ध्यामा त ऽओहैरि'ति यस्ते हृदिस्पृक्स्तोमस्तं त ऽऋद्ध्यासमि-त्येतत्पङ्क्त्या जुहोति पञ्चपदा पङ्क्तिः पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ ४१ ॥ अथ वैश्वकर्म्मणीं

(१) शु० य० सं० अ० १७ क० ७५। (२) शु० य० सं० अ० १७ क० ७५। (३) शु० य० सं० अ० १७ क० ७५। (४) शु० य० सं० अ० १७ क० ७६। * का० श्रौ० सू० १८. ४. ८।
(५) शु० य० सं० अ० १७ क० ७६। (६) शु० य० सं० अ० १७ क० ७७।

जुहोति। विश्वकर्म्मायमग्निस्तमेवैतत्प्रीणाति 'चित्तिं जुहोमि मनसा घृतेने'ति चित्तमेषां जुहोमि मनसा च घृतेन चेत्येत-'यथा देवा ऽइहागमन्नि'ति यथा देवा ऽइहागच्छानित्येत'द्वीतिहोत्रा ऽऋतावृध' ऽइति सत्यवृध ऽइत्येत'त्पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्म्मण' ऽइति योऽस्य सर्वस्य भूतस्य पतिस्तस्मै जुहोमि विश्वकर्म्मण-ऽइत्येत'द्विश्वाहादाभ्यः हविरि'ति सर्वदैवाक्षितः हविरित्येतत् ॥ ४२ ॥ अथ पूर्णाहुतिं जुहोति। सर्वमेतद्यत्पूर्णः सर्वेणैवैनमेतत्प्रीणाति ॥ ४३ ॥ 'सप्त ते-ऽअग्ने समिध' ऽइति। प्राणा वै समिधः प्राणा ह्येतः समिन्धते 'सप्त जिह्वा' ऽइति यानमून्सप्त पुरुषानेकं पुरुषमकुर्वंस्तेषामेतदाह 'सप्त ऽऋषय' ऽइति सप्त हि त-ऽऋषय ऽआस'न्त्सप्त धाम प्रियाणी'ति छन्दाꣳस्येतदाह छन्दाꣳसि वा ऽअस्य सप्त धाम प्रियाणि 'सप्त होत्राः सप्तधा त्वा यजन्ती'ति सप्त ह्येतः होत्राः सप्तधा यजन्ति 'सप्त योनीरि'ति चितीरेतदा'हापूर्णस्वे'त्या प्रजायस्वेत्येतद् 'घृतेने'ति रेतो वै घृतः रेत ऽएवैतदेषु लोकेषु दधाति 'स्वाहे'ति यज्ञो वै स्वाहाकारो यज्ञियमे-

(१) शु० य० सं० अ० १७ क० ७८। (२) शु० य० सं० अ० १७ क० ७८। (३) शु० य० सं० अ० १७ क० ७८। (४) शु० य० सं० अ० १७ क० ७८। (५) शु० य० सं० अ० १७ क० ७८।

† "पूर्णाहुतिं जुहोति सप्त इति" का० श्रौ० सू० १८. ४. ९।

(६) शु० य० सं० अ० १७ क० ७९। (७) शु० य० सं० अ० १७ क० ७९। (८) शु० य० सं० अ० १७ क० ७९। (९) शु० य० सं० अ० १७ क० ७९। (१०) शु० य० सं० अ० १७ क० ७९। (११) शु० य० सं० अ० १७ क० ७९। (१२) शु० य० सं० अ० १७ क० ७९। (१३) शु० य० सं० अ० १७ क० ७९। (१४) शु० य० सं० अ० १७ क० ७९।

वैतदिदुह सकृत्सर्वं करोति ॥ ४४ ॥ सप्त सप्तेति । सप्तचितिकोऽग्निः सप्तर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतत्प्रीणाति तिस्र ऽआहुतीर्जुहोति त्रिवृदग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति तिस्रः समिध ऽआदधाति तत्पदं तस्योक्तो बन्धुः ॥ ४५ ॥ तिष्ठन्त्समिध ऽआदधाति । अस्थीनि वै समिधस्तिष्ठन्तीव वा ऽअस्थीन्यासीन ऽआहुतीर्जुहोति माꣳसानि वा ऽआहुतय ऽआसत ऽइव वै माꣳसान्यन्तराः समिधो भवन्ति बाह्या ऽआहुतयोऽन्तराणि ह्यस्थीनि बाह्यानि माꣳसानि ॥ ४६ ॥ अथातः सम्पदेव । पद् पुरस्ताज्जुहोति पदुपरिष्टात्षड्भिराप्नमनः पृष्ठनेर्य्यन्ति द्वाभ्यामप्नमानं पृष्निमुपदधाति चतुर्भिराग्नेर्य्यन्ति पञ्चभिरग्निमारोहन्ति तदेकां न त्रिꣳशदाहुतिरेव त्रिꣳशत्तमी द्वाभ्यामग्निं निदधाति तद् द्वात्रिꣳशद् द्वात्रिꣳशदक्षरानुष्टुप्प्सैषानुष्टुप् ॥ ४७ ॥ तया ऽअमूस्तिस्रोऽनुष्टुभः । गार्हपत्ये सम्पादयन्ति तासामेतामत्रैकामाहरन्ति तद्यदेतामत्राहुरन्यत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र तस्मै नालमासीद्यदुन्नमात्स्यत् ॥ ४८ ॥ सोऽग्निमब्रवीत् । त्वयान्नमदानीति तथेति तस्माद्यदेवैतमत्राहुरन्यथैषोऽलमन्नायालमाहुतिभ्यो भवति ॥ ४९ ॥ अथो ऽआहुः । प्रजापतिरेवैतं प्रियं पुत्रमुरस्याधत्त ऽइति स यो हैतदेवं वेदा हैवं प्रियं पुत्रमुरसि धत्ते ॥ ५० ॥ षड्वैवैतमत्राहुरन्ति । षाण्वै तान्त्सप्त

पुरुषानेकं पुरुषमकुर्वन्नयमेव स योऽयमग्निश्चीयतेऽथ यामेषां तामूर्द्धाꣳ श्रिश्रयꣳ रसꣳ समुदौहन्नेष स यमेतमत्राग्निमाहुरन्ति तद्यदेतमत्राहुरन्ति यैवैतेषाꣳ सप्तानां पुरुषाणाꣳ श्रीर्यो रसस्तमेतदूर्द्धꣳ समुदूहन्ति तदस्यैतच्छिर ऽआत्मा यमग्निश्चित ऽआत्मामेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥ ५१ ॥ (C)

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

[वैश्वानरमारुतयोर्होमविध्यादि]

अथातो * वैश्वानरं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र वैश्वानरो देवता तस्मा ऽएतद्धविर्जुहोति तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः ॥ १ ॥ यद्वेवैतं वैश्वानरं जुहोति । वैश्वानरं वा ऽएतमग्निं जनयिष्यन्भवति तमदुः पुरस्ताद्दीक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यत्तत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादयमिह वैश्वानरो जायत ऽउपाꣳशु तत्र भवति रेतो वै तत्र यज-

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ११. ४. २; कठ० सं० १८. ३. ५, १८. ४; कपिष्ठ० २८. ३. ५; २८. ४; मै० सं० ११. १०. ४, ६; तै० सं० ४. ६. ३, ५।

* का० श्रौ० सू० १६. ४. १६–१९।

ऽउपाꣳशु वै रेतः सिच्यते निरुक्त ऽइह निरुक्तः हि रेतो जातं भवति ॥ २ ॥ * स यः स वैश्वानरः । इमे स लोका ऽइयमेव पृथिवी विश्वमग्निर्नरोऽन्तरिक्षमेव विश्वं वायुर्नरो द्यौरेव विश्वमादित्यो नरः ॥ ३ ॥ ते ये त ऽइमे लोकाः । इदं तच्छिर ऽइदुमेव पृथिव्योषधयः श्मश्रूणि तदेतद्विश्वं वागेवाग्निः स नरः सोपरिष्टादस्य भवत्युपरिष्टाद्ध्यस्या ऽअग्निः ॥ ४ ॥ इदुमेवान्तरिक्षम् । तस्मादेतदलोमकमलोमकमिव ह्यन्तरिक्षं तदेतद्विश्वं प्राण ऽएव वायुः स नरः स मध्येनास्य भवति मध्येन ह्यन्तरिक्षस्य वायुः ॥ ५ ॥ शिर ऽएव द्यौः । नक्षत्राणि केशास्तदेतद्विश्वं चक्षुरेवादित्यः स नरस्तदवस्ताच्छीर्ष्णो भवत्यवस्ताद्धि दिव ऽआदित्यस्तदस्यैतच्छिरो वैश्वानर ऽआत्मायमग्निश्चित ऽआत्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥ ६ ॥ अथ मारुताꣳहोति । प्राणा वै मारुताः प्राणानेवास्मिन्नेतद्दधाति वैश्वानरꣳ हुत्वा शिरो वै वैश्वानरः शीर्षंस्तत्प्राणान्दधाति ॥ ७ ॥ एक ऽएष भवति । एकमिव हि शिरः सप्तेतरे सप्तकपाला यदु वा ऽअपि बहुकृत्वः सप्त—सप्त सप्तैव तच्छीर्षण्येव तत्सप्त प्राणान्दधाति ॥ ८ ॥ निरुक्त ऽएष भवति । निरुक्तमिव हि शिरोऽनिरुक्ता ऽइतरेऽनिरुक्ता ऽइव हि प्राणास्तिष्ठन्नेतं जुहोति तिष्ठतीव हि शिर ऽआसीन ऽइतरानासत ऽइव हि प्राणाः ॥ ९ ॥ तद्यौ

* शतम् ४९०० ॥

प्रथमौ मारुतौ जुहोति । इमौ तौ प्राणौ तौ मध्ये वैश्वानरस्य जुहोति मध्ये हीमौ शीर्ष्णः प्राणौ ॥ १० ॥ अथ यौ द्वितीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव हीमौ प्राणौ ॥ ११ ॥ अथ यौ तृतीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव हीमौ प्राणौ वागेवारण्येऽनूच्यः सोऽरण्येऽनूच्यो भवति बहु हि वाचा घोरं निगच्छति ॥ १२ ॥ यद्वै वैश्वानरमारुताभ्यु-होति । क्षत्रं वै वैश्वानरो विण्मारुताः क्षत्रं च तद्विशं च करोति वैश्वानरं पूर्वं जुहोति क्षत्रं तत्कृत्वा विशं करोति ॥ १३ ॥ एक ऽएष भवति । एकस्थं तत्क्षत्र-मेकस्थाꣳ श्रियं करोति बहव ऽइतरे विशि तद्भूमानं दधाति ॥ १४ ॥ निरुक्त ऽएष भवति । निरुक्तमिव हि क्षत्रमनिरुक्ता ऽइतरेऽनिरुक्तेव हि विट् तिष्टन्नेतं जुहोति तिष्टतीव हि क्षत्रमासीन ऽइतरानास्त ऽइव हि विट् ॥ १५ ॥ तं वा ऽएतम् । पुरोऽनुवाक्यवन्तं याज्यवन्तं वषट्कृते स्रुचा जुहोति हस्तेनैवेतरानासीनः स्वाहाकारेण क्षत्रायैव तद्विशं कृतानुकारमनुवर्त्मानं करोति ॥ १६ ॥ तदाहुः । कथमस्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो वष-ट्कृते स्रुचा हुता भवन्तीत्येतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरोऽनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येदमेव * कपुत्सलमयं दण्डः स्वाहाकारो

* 'कपुच्छलमयम्' इति 'ग-ज' पुस्तकयोः ।

वषट्कार ऽएवमु हास्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्ति ॥ १७ ॥ तद्यं प्रथमं दक्षिणतो मारुतं जुहोति । याः सप्त प्राच्यः स्रवन्ति ताः स स सप्तकपालो भवति सप्त हि ता याः प्राच्यः स्रवन्ति ॥ १८ ॥ अथ यं प्रथममुत्तरतो जुहोति । ऋतवः स स सप्तकपालो भवति सप्त ह्यृतवः ॥ १९ ॥ अथ यं द्वितीयं दक्षिणतो जुहोति । पशवः स स सप्तकपालो भवति सप्त हि ग्राम्याः पशवस्तमन्तर्हितं पूर्वस्माज्जुहोत्यप्सु तत्पशून्प्रतिष्ठापयति ॥ २० ॥ अथ यं द्वितीयमुत्तरतो जुहोति । सप्त ऽऋषयः स स सप्तकपालो भवति सप्त हि सप्तर्षयस्तमनन्तर्हितं पूर्वस्माज्जुहोत्यृतुषु तदृषीन्प्रतिष्ठापयति ॥ २१ ॥ अथ यं तृतीयं दक्षिणतो जुहोति । प्राणाः स स सप्तकपालो भवति सप्त हि शीर्षन्प्राणास्तमनन्तर्हितं पूर्वस्माज्जुहोत्यनन्तर्हितास्तच्छीर्ष्णः प्राणान्दधाति ॥ २२ ॥ अथ यं तृतीयमुत्तरतो जुहोति । छन्दाꣳसि स स सप्तकपालो भवति सप्त हि चतुरुत्तराणि च्छन्दाꣳसि तमनन्तर्हितं पूर्वस्माज्जुहोत्यनन्तर्हितानि तदृषिभ्यश्छन्दाꣳसि दधाति ॥ २३ ॥ अथ याः सप्त प्रतीच्यः स्रवन्ति । सोऽरण्येऽनूच्यः स सप्तकपालो भवति सप्त हि ता याः प्रतीच्यः स्रवन्ति सोऽस्यैषोऽवाङ् प्राण ऽएतस्य प्रजापतेः सोऽरण्येऽनूच्यो भवति तिर *ऽइव वै तद्यदुरण्यं तिर ऽइव तद्यदुवाङ् प्राणस्तस्मा-

* 'ऽइव तद्य' इति 'ग' पुस्तके ।

द्य ऽएतासां नदीनां पिबन्ति रिप्रतरा शपनतरा ऽआहनस्य-वादितरा भवन्ति तद्यद्येतदाहेदं मारुता ऽइति तदस्मा-ऽअन्नं कृत्वापिदधाति तेनैनं प्रीणाति ॥ २४ ॥ स यः स वैश्वानरः । असौ स ऽआदित्योऽथ ये ते मारुता रश्म-यस्ते ते सप्त सप्तकपाला भवन्ति सप्त-सप्त हि मारुता गणाः ॥ २५ ॥ स * जुहोति । 'शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्चे'ति नामान्येषामेतानि मण्ड-लमेवैतत्संस्कृत्याथास्मिन्नेतान् रश्मीन्नामग्राहं प्रतिद-धाति ॥ २६ ॥ (A)

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[वसोर्धाराहोमः]

अथातो † वसोर्द्धारां जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र वसुस्तस्मै देवा ऽएतां धारां प्रायृ-ह्णँस्तयैनमप्रीणँस्तद्येतस्मै वसव ऽएतां धारां प्रायृह्णँस्त-स्मादेनां वसोर्द्धारेत्याचक्षते तथैवास्मा ऽअयमेतां धारां प्रयृह्णाति तयैनं प्रीणाति ॥ १ ॥ यद्वैवैतां वसोर्द्धारां

* का० श्रौ० सू० १८. ४. २२ ।

(१) शु० य० सं० अ० १७ क० ८० ।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा —का० श्र० ११. ५ १, कसं० १८. ६; कपिष्ठ० २८. ८, मै० सं० ४१. ११ १; तै० सं० ४. ६, ५ ।

† यजमान आज्यं संस्कृत्याथैपरिमाणया महत्यौदुम्बर्या स्रुचा महता स्रुवेण पञ्चवार गृहीतमाज्यमरण्येऽनूच्ये पुरोडाशेऽधिकरणे तदुरि सन्ततमावर्त्तिच्छिन्नधार यथा भवति तथा वसो-र्धाराख्यामाहुतिं जुहोति । घृतेऽग्निप्राप्ते सति 'वाजश्च' (१८. १–२९) इत्यादिहोममन्त्रा-रम्भः कार्योऽष्टाभिरनुवाकैर्वाजश्चेत्यादि-वेदस्याहान्नैरेकोनत्रिंशत्कण्डिकात्मकैः (म. भा.) ।

जुहोति । अभिषेक ऽएवास्यैष ऽएतद्वा ऽएनं देवाः सर्वं कृत्स्नः संस्कृत्याथैनमेतैः कामैरब्भ्यषिञ्चन्नेतया वसोर्धारया तथैवैनमयमेतत्सर्वं कृत्स्नः संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतया वसोर्धारयाज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा तस्योक्तो बन्धुः ॥ २ ॥ वैश्वानरः हुत्वा । शिरो वै वैश्वानरः शीर्ष्णो वा ऽअन्नमद्यतेऽथो शीर्षतो वा ऽअभिषिच्यमानोऽभिषिच्यते मारुतान्हुत्वा प्राणा वै मारुताः प्राणैरु वा ऽअन्नमद्यतेऽथो प्राणेषु वा ऽअभिषिच्यमानोऽभिषिच्यते ॥ ३ ॥ तद्वा ऽअरण्येऽनूच्ये । वाग्वा ऽअरण्येऽनूच्यो वाचो वा ऽअन्नमद्यतेऽथो वाचा वा ऽअभिषिच्यमानोऽभिषिच्यते तदेतत्सर्वं वसु सर्वे ह्येते कामाः सैषा वसुमयी धारा यथा क्षीरस्य वा सर्पिषो वैवमारम्भायैवेयमाज्याहुतिर्हूयते तद्यदेषा वसुमयी धारा तस्मादेनां वसोर्धारेत्याचक्षते ॥ ४ ॥ स ऽआह । * इदं च म ऽइदं च म ऽइत्यनेन च त्वा प्रीणाम्यनेन चानेन च त्वाभिषिञ्चाम्यनेन चेत्येतदथो ऽइदं च मे दोहीदं च म ऽइति सा यदैवैषा धाराग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्येत ॥ ५ ॥ एतद्वा ऽएनं देवाः । एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेताङ्कामानयाचन्त तेभ्य ऽइष्टः प्रीतोऽभिषिक्त ऽएताङ्कामान्प्रायच्छत्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतान्कामान्याचते तस्मा ऽइष्टः प्रीतोऽभिषिक्त-

* 'इदं च म इद च म' इत्यनेन 'वाजश्च मे प्रसवश्च म' इत्यादि-मन्त्राणा निर्देश इत्यर्थः ।

ऽएतान्कामान्प्रयच्छति द्वौ-द्वौ कामौ सँऽयुनक्त्ययव्यवच्छेदाय यथा * व्योकसौ सँऽयुञ्ज्यादेवं ऽयज्ञेन कल्पन्तामिति ॥ ६ ॥ एतद्वै देवा ऽअब्रुवन्। केनेमान्कामान्प्रतिग्रहीष्याम ऽइत्यात्मनैवेत्यब्रुवन्यज्ञो वै देवानामात्मा यज्ञ ऽउ ऽएव यजमानस्य स यदाह यज्ञेन कल्पन्तामित्यात्मना मे कल्पन्तामित्येवैतदाह ॥७॥ [काण्डस्यार्धम् २०१ ॥] द्वादशसु कल्पयति। द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणात्यथो तावतैवैनमेतदन्नेनाभिषिञ्चति चतुर्दशसु कल्पयत्यष्टासु कल्पयति दशसु कल्पयति त्रयोदशसु कल्पयति ॥ ८ ॥ अथार्द्धेन्द्राणि जुहोति। सर्वमेतद्यदर्द्धेन्द्राणि सर्वेणैवैनमेतत्प्रीणात्यथो सर्वेणैवैनमेतदभिषिञ्चति ॥ ९ ॥ अथ ग्रहाञ्जुहोति। यज्ञो वै ग्रहा यज्ञेनैवैनमेतदन्नेन प्रीणात्यथो यज्ञेनैवैनमेतदन्नेनाभिषिञ्चति ॥ १० ॥ (B)

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥



माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥
कण्डिकासंख्या ॥ ९४ ॥

[वसोर्धाराहोमस्यार्थवादः]

अथैताभ्यज्ञक्रतूञ्जुहोति। 'अग्निश्च मे घर्म्मश्च म' ऽइत्येतैरेवैनमेतद्यज्ञक्रतुभिः प्रीणात्यथो ऽएतैरेवैन-

* व्योकसौ विभिन्नदेशस्थावाचार्यावित्यर्थः।

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ११. ५. २।

(१) शु० य० सं० अ० १८ क० २२।

मेतज्ज्यक्रतुभिरभिषिञ्चति ॥ १ ॥ अथायुज *स्तोमाञ्जुहोति । एतद्वै देवाः सर्वान्न्कामान्नाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमायँस्तथैवैतद्यजमानः सर्वान्न्कामान्नाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमेति ॥ २ ॥ तद्वै त्रयस्त्रिःशादिति । अन्तो वै त्रयस्त्रिःशोऽयुजाथं स्तोमानामन्तत ऽएव तद्देवाः स्वर्गं लोकमायँस्तथैवैतद्यजमानोऽन्तत ऽएव स्वर्गं लोकमेति ॥ ३ ॥ अथ † युग्मतो जुहोति । एतद्वै छन्दाथंस्यब्रुवन्न्यातयामा वा ऽअयुज स्तोमा युग्मभिर्व्वयथं स्तोमैः स्वर्गं लोकमयामेति तानि युग्मभि स्तोमैः स्वर्गं लोकमायँस्तथैवैतद्यजमानो युग्मभि स्तोमैः स्वर्गं लोकमेति ॥ ४ ॥ तद्वा ऽअष्टाचत्त्वारिःशादिति । अन्तो वा ऽअष्टाचत्त्वारिःशो युग्मताथं स्तोमानामन्तत ऽएव तच्छन्दाथंसि स्वर्गं लोकमायँस्तथैवैतद्यजमानोऽन्तत ऽएव स्वर्गं लोकमेति ॥ ५ ॥ स ऽआह । 'एकाँ च मे तिस्रश्च मे, चतस्रश्च मेऽष्टौ च म' ऽइति यथा वृक्षः रोहन्नुत्तरामुत्तराथं शाखाथं समालम्भः रोहेत्तादृक्तद्यद्वेव स्तोमाञ्जुहोत्यन्नं वै स्तोमा ऽअन्नेनैवैनमेतदभिषिञ्चति ॥ ६ ॥ अथ ‡ व्याथंसि जुहोति । पशवो वै व्याथंसि

* एकामादाय द्वितीया विहाय तृतीयामादाय चतुर्थं विहाय परित्यक्तसमसंख्याकेनान्तविषमसंख्याकेन 'एका च म' इत्यादि मन्त्रेणायुग्मस्तोमाञ्जुहुयात् । अयुग्मस्तोमहोमैः सर्वकामावाप्तिरिति भावः ।

† 'चतस्रश्च मे' इत्यनया कण्डिकया युग्मस्तोमाञ्जुहोति । तद्यथा—प्रथमं चतस्र इत्येतां संख्यामादाय चतुरुत्तरत्वेन स्थितान् युग्मान् स्तोमान् अष्टाचत्वारिंशत्पर्यन्ताञ्जुहुयात् । युग्मस्तोमहोमैः स्वर्गप्राप्तिरित्यर्थः ।

(१) शु० य० सं० अ० १८ क० २४, २५ ।

‡ "व्यविश्च, पशवाद् च' आभ्यां कण्डिकाभ्या विहितो होमो वयोहोम इत्युच्यते" ।

पशुभिरेवैनमेतदन्नेन प्रीणात्यथो पशुभिरेवैनमेतदन्नेनाभिषिञ्चति ॥ ७ ॥ अथ * नामग्राहं जुहोति । एतद्वै देवाः सर्वान्न्कामानाप्त्वाथैतमेव प्रत्यक्षमप्रीणँस्तथैवैतद्यजमानः सर्वान्न्कामानाप्त्वाथैतमेव प्रत्यक्षं प्रीणाति 'वाजायं स्वाहा प्रसवाय स्वाहे'ति नामान्न्यस्यैतानि नामग्राहमेवैनमेतत्प्रीणाति ॥ ८ ॥ त्रयोदशैतानि नामानि भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशान्नेश्चितिपुरीषाणि यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतत्प्रीणाति यद्वेव नामग्राहं जुहोति नामग्राहमेवैनमेतदभिषिञ्चति ॥९॥ अथाह । 'इयं ते राण्मित्राय यन्तासि यमन ऽऊर्ज्जे त्वा व्वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेंत्यन्नं वा ऽऊर्ग्गन्नं व्वृष्टिरन्नेनैवैनमेतत्प्रीणाति ॥ १० ॥ यद्वेवाह । 'इयं ते राण्मित्राय यन्तासि यमन ऽऊर्ज्जे त्वा व्वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य त्वं ष्यन्तासि यमन ऽऊर्ज्जे च नोऽसि व्वृष्ट्यै च नोऽसि प्रजानां च न ऽआधिपत्यायासीत्युपव्रुवत ऽएवैनमेतदेतस्मै नः सर्वस्मा ऽअस्येतस्मै त्वा सर्वस्मा ऽअभ्यषिचामहीति तस्मादु हेदं मानुषः राजानमभिषिक्तमुपव्रुवते ॥ ११ ॥ अथ † कल्पाञ्जुहोति । प्राणा वै कल्पाः प्राणानेवास्मिन्नेतद्दधा'त्यायुर्य्यज्ञेनं कल्पतां प्राणो यज्ञेन

* "वाजाय स्वाहा" इत्यनेन विहितो होमो नामग्राह इत्युच्यते"।

† 'आयुर्यज्ञेन' इति मन्त्रे कल्पतामिति लिङ्गात् मन्त्रोऽयं कल्पहोमे विनियुज्यते।

(१) शु० य० सं० अ० १८. क० २८। (२) शु० य० सं० अ० १८ क० २८। (३) शु० य० सं० अ० १८ क० २९।

कल्पतामि'त्येतानेवास्मिन्नेतत् कल्प्तान्प्राणान्दधाति ॥१२॥ द्वादश कल्पाञ्जुहोति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवास्मिन्नेतत् कल्प्तान्प्राणान्दधाति यद्वेव कल्पाञ्जुहोति प्राणा वै कल्पा ऽअमृतमु वै प्राणा ऽअमृतेनैवैनमेतदभिषिञ्चति ॥ १३ ॥ अथाह । 'स्तोमश्च यजुश्च ऽऋक्च साम च बृहच्च रथन्तरञ्चे'ति त्रयी हैषा विद्यान्नं वै त्रयी विद्यान्नेनैवैनमेतत्प्रीणात्यथो ऽअन्नेनैवैनमेतदभिषिञ्चति 'स्वर्देवा ऽअगन्मामृता ऽअभूमे'ति स्वर्हि गच्छत्यमृतो हि भवति 'प्रजापतेः प्रजा ऽअभूमे'ति प्रजापतेर्हि प्रजा भवति 'वेट् स्वाहे'ति वषट्कारो हैष परोक्षं य्यद्वेट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते तदेनमेताभ्यामुभाभ्यां प्रीणाति वषट्कारेण च स्वाहाकारेण चाथो ऽएताभ्यामेवैनमेतदुभाभ्यामभिषिञ्चत्यत्र ताꣳ स्रुचमनुप्रास्यति यदन्नाज्यलिप्तं तन्नेद्धविर्द्धाग्नेरसदिति ॥ १४ ॥ तस्यै वा ऽएतस्यै वसोर्द्धारायै । द्यौरेवात्माभ्रमूधो विद्युत्स्तनो धारैव धारा दिवोऽधि गामागच्छति ॥ १५ ॥ तस्यै गौरेवात्मा । ऊध ऽएवोध स्तन स्तनो धारैव धारा गोरधि यजमानम् ॥ १६ ॥ तस्यै यजमान ऽएवात्मा । बाहुरूधः स्रुक्स्तनो धारैव धारा यजमानादुधि देवान्देवेभ्योऽधि गां गोरधि यजमानं तदेतदनन्तमक्षय्यं देवाना-

(१) शु० य० सं० अ० १८ क० २९ । (२) शु० य० सं० अ० १८ क० २९ । (३) शु० य० सं० अ० १८ क० २९ । (४) शु० य० सं० अ० १८ क० २९ ।

मन्नं परिप्लवते स यो हैतदेवं वेदैवꣳ हैवास्यैतदनन्तमक्षय्यमन्नं भवत्यथातः सम्पदेव ॥ १७ ॥ तदाहुः । कथमस्यैषा वसोर्द्धारा संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यत ऽइति षष्टिश्च ह वै त्रीणि च शतान्येषा वसोर्द्धाराथ षडथ पञ्चत्रिꣳशतो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि षट् षड् वा ऽऋतवस्तदृतूनाꣳ रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिꣳशत्स त्रयोदशो मासः स ऽआत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर ऽएव पञ्चत्रिꣳशमेतावान्वै संवत्सर ऽएवमु हास्यैषा वसोर्द्धारा संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यत ऽएतावत्य ऽउ वै शाण्डिलेऽग्नौ मद्ध्यतो यजुष्मत्य ऽइष्टका ऽउपधीयन्तेऽग्नयो हैते पृथग्यदेता ऽइष्टका ऽएवमु हास्यैतेऽग्नयः पृथग्वसोर्द्धारयाभिहुता भवन्ति ॥ १८ ॥ तदाहुः । कथमस्यैषा वसोर्द्धारा महदुक्थमाप्नोति कथं महतोक्थेन सम्पद्यत ऽइत्येतस्या ऽएव वसोर्द्धारायै यानि नव प्रथमानि यजूꣳषि तत् त्रिवृच्छिरोऽथ यान्यष्टाचत्वारिꣳशत्तौ चतुर्विꣳशौ पक्षावथ यानि पञ्चविꣳशतिः स पञ्चविꣳश ऽआत्माथ यान्येकविꣳशतिस्तदेकविꣳशं पुच्छमथ यानि त्रयस्त्रिꣳशत्स वशोऽथ या ऽअशीतयः सैवाशीतीनामासिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यदूर्द्ध्वमशीतिभ्यो यदेवादो महत ऽउक्थस्योर्द्ध्वमशीतिभ्य ऽएतदस्य तदेवमु हास्यैषा

व॒सोर्द्धा॒रा म॒हदु॒क्थमाप्नो॒त्येवं॒ म॒हतो॒क्थेन॒ स॒म्प॒द्यते ॥ १९ ॥ (C)

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[वाजप्रसवीयहोमः, पार्थहोमः, यजमानाभिषेकश्च]

अथातो * वाजप्रसवी॒यं जु॒होति । अन्नं॑ वै वा॒जोऽन्न॒प्रसवी॒यः॒ हास्यैतदन्न॒मेवास्मा॑ ऽए॒ने॒न प्र॒सौ॒ति ॥ १ ॥ एतद्वा ऽएनं॑ देवाः । एतेनान्नेन प्री॒त्वैतैः॒ कामै॒रभि॒षि॒च्च्यै॒तया व॒सोर्द्धा॒र॒या॒थैन॒मेत॒द्भू॒य ऽए॒वाप्रीणँस्तथै॒वैन॒म॒य॒मे॒त॒देते॒नान्नेन प्री॒त्वैतैः॒ कामै॒रभि॒षि॒च्च्यै॒तया व॒सोर्द्धा॒र॒या॒थैन॒मेत॒द्भू॒यऽए॒व प्रीणाति ॥ २ ॥ य॒द्वै॒वै॒तद्वाजप्प्रसवी॒यं जु॒होति । अभिषेक॒ ऽए॒वास्यै॒ष॒ ऽए॒तद्वा ऽए॒नं॑ देवा ऽए॒तेनान्नेन प्री॒त्वैतैः॒ कामै॒रभि॒षि॒च्च्यै॒तया व॒सोर्द्धा॒र॒या॒थैन॒मेत॒द्भू॒यऽए॒वाऽभ्यषिञ्चँस्तथै॒वैन॒मे॒य॒म॒त॒देते॒नान्नेन प्री॒त्वैतैः॒ कामै॒रभि॒षि॒च्च्यै॒तया व॒सोर्द्धा॒र॒या॒थैन॒मेत॒द्भू॒य ऽए॒वाभि॒षि॒ञ्च॒ति ॥ ३ ॥ सर्वौ॑षधं भवति । स॒र्व॒मेत॒दन्नं॑ य॒त्सर्वौ॑षधः॒ स॒र्वे॒णै॒वैन॒मेत॒दन्ने॑न प्रीणाति॒ अथो॒ स॒र्वे॒णै॒वैन॒मेत॒दन्ने॑नाभि॒षि॒ञ्च॒ति ते॒षा॒मे॒कम॒न्न॒मु॒द्ध॒रे॒त्तस्य॒ नाश्नी॒या॒द्या॒व॒ज्जी॒व॒मौदु॑म्बरेण च॒मसे॒नौदु॑म्बरेण स्रु॒वेण॒ त॒योरु॒क्तो ब॒न्धुश्च॒तुः॒स्रुक्ती भवत-

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. ५. २; कठ० १८. ११, १२; कपिष्ठ० २८. ११, २९. १; मै० सं० ११. १२. ६; तै० सं० ४. ७. ६, १–११ ।

* 'वाजस्यनु' इत्यारभ्य 'पय. पृथिव्याम्' (शु० य० सं० अ० १८. क० ३०-३६) इत्यन्तैर्मन्त्रैः प्रतिमन्त्रमभिहितो होमो वाजप्रसवीय इत्युच्यते ।

इच्चतस्रो वै दिशः सर्वाभ्य ऽएवैनमेतद्दिग्भ्योऽन्नेन प्रीणात्यथो सर्वाभ्य ऽएवैनमेतद्दिग्भ्योऽन्नेनाभिषिञ्चति ॥ ४ ॥ यद्वेवैतद्वाजप्रसवीयं जुहोति । एता ह देवताः सुता ऽएतेन सवेन येनैतत्सोष्यमाणो भवति ता ऽएवैतत्प्रीणाति ता ऽअस्मा ऽइष्टाः प्रीता ऽएतः सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै [न तद्यदग्नौ जुहोति तदग्निमभिषिञ्चत्यथ यदेताभ्यो देवताभ्यो जुहोति तदु तान्देवान्प्रीणाति य ऽएतस्य सवस्येशते ॥ ५ ॥ अथ वा ऽएतत्पात्रार्थान्यपि * जुहोति । एतद्वै देवा ऽअकामयन्तात्रैव सर्वैः सवैः सूयेमहीति तेऽत्रैव सर्वैः सवैरसूयन्त तथैवैतद्यजमानोऽत्रैव सर्वैः सवैः सूयते ॥ ६ ॥ तद्यानि पात्रार्थानि । तानि राजसूयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्राजसूयेन सूयतेऽथ यानि चतुर्दशोत्तराणि ततो यानि सप्त पूर्वाणि तानि वाजपेयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्वाजपेयेन सूयतेऽथ यानि सप्तोत्तराणि तान्यग्नेस्तद्यत्तानि जुहोति तदग्निसवेन † स्तूयते ॥ ७ ॥ स वै राजसूयस्य पूर्वाणि जुहोति । अथ वाजपेयस्य राजा वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेन राज्यमु वा ऽअग्नेऽथ साम्राज्यं तस्माद्वाजपेयेनेष्ट्वा न राजसूयेन यजेत प्रत्यवरोहः स यथा सम्राट् सन्राजा स्यात्तादृक्तत् ॥ ८ ॥ अग्नेरुत्तमानि जुहोति । सर्वे हैते स वा यदग्निसवः सर्वः

* का० श्रौ० सू० १८. ५. १५ ।
† 'सूयते' इति 'ग' पुस्तके ।

हैतदग्निसवेन सुतो भवति राजा च सम्राट् च तस्मादग्नेरुत्तमानि जुहोति ॥ ९ ॥ अथैनं कृष्णाजिनेऽभिषिञ्चति। यज्ञो वै कृष्णाजिनं स्यज्ञ एवैनमेतदभिषिञ्चति लोमतश्छन्दाꣳसि वै लोमानि च्छन्दः स्वेवैनमेतदभिषिञ्चत्युत्तरतस्तस्योपरि बन्धुः प्राचीनग्रीवे तद्धि देवत्रा ॥ १० ॥ तद्ध हैके दक्षिणतोऽग्नेरभिषिञ्चन्ति। दक्षिणतो वा अन्नस्योपचारस्तदेनमन्नस्यार्द्धादभिषिञ्चाम इति न तथा कुर्य्यादेषा वै दिक्पितॄणां क्षिप्रे हैतां दिशं प्रैति यं तथाभिषिञ्चन्ति ॥ ११ ॥ आहवनीय उ हैकेऽभिषिञ्चन्ति। स्वर्गो वै लोक आहवनीयस्तदेनꣳ स्वर्गे लोकेऽभिषिञ्चाम इति न तथा कुर्य्याद्देवो वा अस्यैष आत्मा मानुषोऽयमनेन हास्य ते मर्त्येनात्मनैतं दैवमात्मानमनुप्रसजन्ति यं तथाभिषिञ्चन्ति ॥ १२ ॥ उत्तरत एवैनमभिषिञ्चेत्। एषा होभयेषां देवमनुष्याणां दिग्यदुदीची प्राची स्वायामेवैनमेतद्दिशि यायत्तं प्रतिष्ठितमभिषिञ्चति न वै स्व आयतने प्रतिष्ठितो रिष्यति ॥ १३ ॥ आसीनं भूतमभिषिञ्चेत्। आस्त इव वै भूतस्तिष्ठन्तं बुभूषन्तं तिष्ठतीव वै बुभूषन्वस्ताजिने पुष्टिकाममभिषिञ्चेत्कृष्णाजिने ब्रह्मवर्चसकाममुभयोरुभयकामं तदुत्तरतः पुच्छस्योत्तरलोम प्राचीनग्रीवमुपस्तृणाति ॥ १४ ॥ आस्पृष्टं * परिश्रितः। तद्यत्कृष्णाजिनमास्पृष्टं परिश्रितो भवति तथो हास्यैष दैव आत्मा कृष्णाजिनेऽभिषिक्तो

* का० श्रौ० सू० १८. ५. ६।

भवत्यथ यदेनमन्वारब्धमाग्निं तिष्ठन्तमभिषिञ्चति तथो हैतस्माद्दैवादभिषेकान्न व्यवच्छिद्यते ॥ १४ ॥ अग्नौ † हुत्वाथैनमभिषिञ्चति । दैवो वा ऽअस्यैष ऽआत्मा मानुषोऽयं देवा ऽउ वा ऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथैनं तस्यैव परिशिष्टेनाभिषिञ्चत्यत्र तꣳ स्रुवमनुप्रास्यति ॥ १६ ॥ अथैनं दक्षिणं बाहुमनुपर्यावृत्याभिषिञ्चति । 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामी'ति वाग्वै सरस्वती तस्या ऽइदꣳ सर्वं यन्त्रꣳ सवितृप्रसूत ऽएवैनमेतदनेन सर्वेण सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चत्यत्र तं चमसमनुप्रास्यति यदत्र विलिसं तन्नेद्वहिर्द्धाग्नेरसदिति ॥ १७ ॥ तं वै मध्ये पार्थानामभिषिञ्चति । संवत्सरो वै पार्थानि संवत्सरस्यैवैनमेतन्मध्यत ऽआदधाति षट् पुरस्ताज्जुहोति षडुपरिष्टात्षड्वा ऽऋतव ऽऋतुभिरेवैनमेतत्सुषुवाणमुभयतः परिगृह्णाति बृहस्पतिः पूर्वेषामुत्तमो भवतीन्द्र ऽउत्तरेषां प्रथमो ब्रह्म वै बृहस्पतिः क्षत्रमिन्द्रो ब्रह्मणा चैवैनमेतत्क्षत्रेण च सुषुवाणमुभयतः परिगृह्णाति ॥ १८ ॥ (D)

तृतीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

† का० श्रौ० सू० १८. ५. ९ ।

(१) शु० य० सं० अ० १८ क० ३७ ।

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ११. ५ ३ कठ० सं० १८. १३; कपिष्ठ० २९. २; मै० सं० १२. १. १; तै० सं० ४. ७. १२ ।

[राष्ट्रभृद्धोमः]

अथातो राष्ट्रभृतो जुहोति । राजानो वै राष्ट्रभृतस्ते हि राष्ट्राणि बिभ्रत्येता ह देवताः सुता ऽएतेन सवेन येनैतत्सोष्यमाणो भवति ता ऽएवैतत्प्रीणाति ता ऽअस्मा-ऽइष्टाः प्रीता ऽएतद्वः सवमनुमन्यन्ते ताभिरनुमतः * स्तूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यद्राजानो राष्ट्राणि बिभ्रति राजान-ऽउ ऽएते देवास्तस्मादेता राष्ट्रभृतः ॥ १ ॥ यद्वैवैता † राष्ट्रभृतो जुहोति । प्रजापतेर्बिस्रस्ताग्निमथुनाग्युदक्राम-न्गन्धर्वाप्सरसो भूत्वा तानि रथो भूत्वा पर्य्यगच्छत्तानि परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्ययमेतत्परिगत्या-त्मन्धत्त ऽआत्मन्न्कुरुते ॥ २ ॥ स यः स प्रजापतिर्व्यर्य्यसृजत सत । अयमेव स योऽयमग्निश्चीयतेऽथ याग्यस्मात्तानि मिथुनान्न्युदक्रामन्नेतास्ता देवता याभ्य ऽएतज्जुहोति ॥ ३ ॥ गन्धर्वाप्सरोभ्यो जुहोति । गन्धर्वाप्सरसो हि भूत्वोदक्रामन्नथो गन्धेन च वै रूपेण च गन्धर्वाप्सरस-श्चरन्ति तस्माद्यः कश्च मिथुनमुपप्रैति गन्धं चैव स रूपं च कामयते ॥ ४ ॥ मिथुनानि जुहोति । मिथुनाद्धा-ऽअधि प्रजातिर्य्यो वै प्रजायते स राष्ट्रं भवत्यराष्ट्रं वै स भवति यो न प्रजायते तद्यन्मिथुनानि राष्ट्रं बिभ्रति मिथुना ऽउ ऽएते देवास्तस्मादेता राष्ट्रभृत ऽआज्येन द्वादशगृहीतेन ता ऽउ द्वादशैवाहुतयो भवन्ति तस्योक्तो

* 'सूयते' इति 'ग-ज' पुस्तकयोः ।

† का० श्रौ० सू० १८. ५. १६ ।

बन्धुः ॥ ५ ॥ पुष्टसे पूर्वस्मै जुहोति । अथ स्त्रीभ्यः पुमाꣳसं तद्वीर्य्येणात्यादधात्येकस्मा ऽइव पुष्टसे जुहोति बह्वीभ्य ऽइव स्त्रीभ्यस्तस्माद्प्येकस्य पुष्टसो बह्व्यो जाया भवन्त्युभाभ्यां वषट्कारेण च स्वाहाकारेण च पुष्टसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः पुमाꣳसमेव तद्वीर्य्येणात्यादधाति ॥ ६ ॥ 'ऋताषाडृतधामे'ति । * सत्यसात्स त्यधामेत्येत'दग्निर्ग्गन्धर्वस्तस्यौषधयोऽप्सरस' ऽइत्यग्निर्ह गन्धर्व ऽओषधिभिरप्सरोभिर्म्मिथुनेन सहोच्चक्राम 'मुदो नामे'त्योषधयो वै मुद ऽओषधिभिर्हीदः सर्वं मोदते 'स न ऽईदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहे'ति तस्योक्तो बन्धुः ॥ ७ ॥ 'सꣳहित' ऽइति । असौ वा ऽआदित्यः सꣳहित ऽएष ह्यहोरात्रे सन्दधाति 'विश्वेवसा मे'त्येष ह्येव सर्वꣳ साम 'सूर्य्यो गन्धर्वस्तस्य मरीचयोऽप्सर' स ऽइति सूर्य्यो ह गन्धर्वो मरीचिभिरप्सरोभिर्म्मिथुनेन सहोच्चक्रा'मायुवो नामे'त्यायुवाना ऽइव हि मरीचयः प्लवन्ते 'स न ऽइदं ब्रह्म क्षत्रं पात्वि'ति तस्योक्तो बन्धुः ॥ ८ ॥ 'सुषुम्ण' ऽइति । सुयज्ञिय ऽइत्येत'त्सूर्य्यरश्मि रि'ति सूर्य्यस्येव हि चन्द्रमसो रश्मय'श्चन्द्रमा गन्धर्वस्तस्य

(१) शु० य० सं० अ० १८ क० १८ ।

* 'सत्यसाद्' इति 'ग' पुस्तके ।

(२) शु० य० सं० अ० १८ क० १८ । (३) शु० य० सं० अ० १८ क० ३८ । (४) शु० य० सं० अ० १८ क० ३८ । (५) शु० य० सं० अ० १८ क० ३९ । (६) शु० य० सं० अ० १८ क० ३९ । (७) शु० य० सं० अ० १८ क० ३९ । (८) शु० य० सं० अ० १८ क० ३९ । (९) शु० य० सं० अ० १८ क० ३९ । (१०) शु० य० सं० अ० १८ क० ४० । (११) शु० य० सं० अ० १८ क० ४० । (१२) शु० य० सं० अ० १८ क० ४० ।

नक्षत्राण्यप्सरस' ऽइति चन्द्रमा ह गन्धर्वो नक्षत्रैरप्सरोभिर्म्मिथुनेन सहोच्चक्राम 'भेकुरयो[1] नामे'ति भाकुरयो ह नामैते भाꣳ हि नक्षत्राणि कुर्वन्ति 'स[2] न ऽइदं ब्रह्म क्षत्रं पात्वि'ति तस्योक्तो बन्धुः ॥ ९ ॥ 'इषिर[3]' ऽइति । क्षिप्र-ऽइत्येत'द्विश्वव्यचा' ऽइत्येष हीदꣳ सर्वं व्यचः करोति 'वातो गन्धर्वस्तस्यापो ऽअप्सरस' ऽइति वातो ह गन्धर्वोऽद्भिरप्सरोभिर्म्मिथुनेन सहोच्चक्रा'मोर्ज्जो[6] नामे'त्यापो वा ऽऊर्ज्जोऽद्भ्यो ह्यूर्ग्जायते 'स न ऽइदं ब्रह्म क्षत्रं पात्वि'ति तस्योक्तो बन्धुः ॥ १० ॥ 'भुज्युः[8] सुपर्ण' ऽइति । यज्ञो वै भुज्युर्य्यज्ञो हि सर्वाणि भूतानि भुनक्ति 'यज्ञो गन्धर्वस्तस्य दक्षिणा ऽअप्सरस' ऽइति यज्ञो ह गन्धर्वो दक्षिणाभिरप्सरोभिर्म्मिथुनेन सहोच्चक्राम 'स्तावा[10] नामे'ति दक्षिणा वै स्तावा दक्षिणाभिर्हि यज्ञ स्तूयतेऽथो यो वै कश्च दक्षिणां ददाति स्तूयत ऽएव स 'स[11] न ऽइदं ब्रह्म क्षत्रं पात्वि'ति तस्योक्तो बन्धुः ॥११॥ [अर्धप्रपाठकः ४८॥] 'प्रजापतिर्विश्वकर्म्मे[12]'ति । प्रजापतिर्वै विश्वकर्म्मा स ह्येदꣳ सर्वमकरो'न्मनो गन्धर्वस्[13]तस्य ऽऋक्सामान्यप्सरस' ऽइति मनो ह गन्धर्व ऽऋक्सामैरप्सरोभिर्म्मिथुनेन सहोच्चक्रा-

(१) शु० य० सं० अ० १८ क० ४०। (२) शु० य० सं० अ० १८ क० ४०। (३) शु० य० सं० अ० १८ क० ४१। (४) शु० य० सं० अ० १८ क० ४१। (५) शु० य० सं० अ० १८ क० ४१। (६) शु० य० सं० अ० १८ क० ४१। (७) शु० य० सं० अ० १८ क० ४१। (८) शु० य० सं० अ० १८ क० ४२। (९) शु० य० सं० अ० १८ क० ४२। (१०) शु० य० सं० अ० १८ क० ४२। (११) शु० य० सं० अ० १८ क० ४२। (१२) शु० य० सं० अ० १८ क० ४३। (१३) शु० य० सं० अ० १८ क० ४३।

'मेष्टयो नामे'त्यृक्सामानि वा ऽएष्टय ऽऋक्सामैर्ह्याशासत ऽइति नोऽस्तिवित्थं नोऽस्तिवति 'स न ऽइदं ब्रह्म क्षत्रं पात्वि'ति तस्योक्तो बन्धुः ॥ १२ ॥ अथ रथशीर्षे जुहोति। एष वै स सव ऽएतद्वै तत्सूयते यमस्मै तमेता देवताः सवमनुमन्न्यन्ते याभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्न्यन्ते स राजा भवति न स यस्मै नाज्येन पञ्चगृहीतेन ता ऽउ * पञ्चैवाहुतयो हुता भवन्ति तस्योक्तो बन्धुः ॥१३॥ शीर्षतः। शीर्षतो वा ऽअभिषिच्च्यमानोऽभिषिच्च्यत ऽउपरि धार्ष्यमाण ऽउपरि हि स यमेतदभिषिञ्चति समानेन मन्त्रेण समानो हि स यमेतदभिषिञ्चति सर्व्वतः परिहारः सर्व्वत ऽएवैनमेतदभिषिञ्चति ॥ १४ ॥ यद्वेव रथशीर्षे † जुहोति । असौ वा ऽआदित्य ऽएष रथ ऽएतद्वै तद्रूपं कृत्वा प्रजापतिरेतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्नयमेतत्परिगत्यात्मन्धत्त ऽआत्मन्कुरुत ऽउपरि धार्ष्यमाण ऽउपरि हि स य ऽएतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत समानेन मन्त्रेण समानो हि स य ऽएतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत सर्व्वतः परिहारः सर्व्वतो हि स य ऽएतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत ॥ १५ ॥ 'सं नो भुवनस्य पते प्रजापत' ऽइति। भुवनस्य ह्येष पतिः प्रजापतिर्य्यस्य त 'ऽउपरि गृहा यस्य

(१) शु० य० सं० अ० १८ क० ४३। (२) शु० य० स० अ० १७ क० ४१।
* 'क' पुस्तके 'पञ्चैवाहुतयो भवन्ति' इत्येव लभ्यते।
† का० श्रौ० सू० १८. ५ १७।
(३) शु० य० सं० अ० १८ क० ४४। (४) शु० य० सं० अ० १८ क० ४४।

वेहे'त्युपरि च ह्येतस्य गृहा ऽइह चा'स्मै ब्रह्मणेऽस्मै क्षत्राये'त्ययं वा ऽअग्निर्ब्रह्म च क्षत्रं च 'महि शर्म्म यच्छ स्वाहे'ति महच्छर्म्म यच्छ स्वाहेत्येतत् ॥ १६ ॥ (A)

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[वातहोमादि]

अथ † वातहोमाञ्जुहोति । इमे वै लोका ऽएषोऽग्निर्वायुर्वातहोमा ऽएषु नल्लोकेषु वायुं दधाति तस्मादयमेषु लोकेषु वायुः ॥ १ ॥ बाह्येनाग्निमाहरति । आत्मा वा ऽअस्य स वायुर्य ऽएषु लोकेष्वथ य ऽइमाँल्लोकान्परेण वायुस्तमस्मिन्नेतद्दधाति ॥ २ ॥ बहिर्वेदेरियं वै वेदिः । आत्मा वा ऽअस्य स वायुर्योऽस्यामथ य ऽइमां परेण वायुस्तमस्मिन्नेतद्दधाति ॥ ३ ॥ अञ्जलिना । न ह्येतस्येतीवाभिपत्तिरस्ति स्वाहाकारेण जुहोति ह्यधोऽधो धुरमसौ वा ऽआदित्य ऽएष रथोऽर्वाचीनं तदादित्याद्वायुं दधाति तस्मादेषोऽर्वाचीनमेवातः पवते ॥ ४ ॥ 'समुद्रोऽसि नभस्वानि'ति । असौ वै लोकः समुद्रो नभस्वा'नार्द्रदानुरि'त्येष ह्यार्द्रं ददाति तद्योऽमुष्मिँल्लोके वायुस्तमस्मिन्नेतद्दधाति 'शम्भूर्म्मयोभूरभि मा वाहि स्वाहे'ति

(१) शु० य० सं० अ० १८ क० ४४ । (२) शु० य० सं० अ० १८ क० ४४ ।

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. ६ १; कठ० १८. ४; कपिष्ठ० २९. ३, मै० सं० ११. १२. २; तै० सं० ३. ४, ७ ।

† का० श्रौ० सू० १८. ६. १ ।

(३) शु० य० सं० अ० १८ क० ४५ । (४) शु० य० सं० अ० १८ क० ४५ । (५) शु० य० सं० अ० १८ क० ४५ ।

शिवः स्योनोऽभि मा वाहीत्येतत् ॥ ५ ॥ 'मारुतोऽसि मरुतां गण' ऽइति । अन्तरिक्षलोको वै मारुतो मरुतां गणस्तद्योऽन्तरिक्षलोके वायुस्तमस्मिन्नेतद्दधाति 'शम्भू-र्म्मयोभूरभि मा वाहि स्वाहे'ति शिवः स्योनोऽभि मा वाहीत्येतत् ॥ ६ ॥ 'अवस्यूरसि दुवस्वानिति । अयं वै लोकोऽवस्यूर्दुवस्वाँस्तद्योऽस्मिँल्लोके वायुस्तमस्मिन्नेतद्दधाति 'शम्भूर्म्मयोभूरभि मा वाहि स्वाहे'ति शिवः स्योनोऽभि मा वाहीत्येतत् ॥ ७ ॥ त्रिभिर्जुहोति । त्रय ऽइमे लोका-ऽअथो त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैव तदेषु लोकेषु वायुं दधाति ॥ ८ ॥ यद्वेव वातहोमाञ्जुहोति । एतमेवैतद्रथं युनक्त्येतद्वै देवा ऽएतꣳ रथꣳ सर्वेभ्यः कामेभ्योऽयुञ्जत युक्तेन समश्नवामहा ऽइति तेन युक्तेन सर्वान्कामान्त्समाश्नुवत तथैवैतद्यजमान ऽएतꣳ रथꣳ सर्वेभ्यः कामेभ्यो युङ्क्ते युक्तेन समश्नवा ऽइति तेन युक्तेन सर्वान्कामान्त्समश्नुते ॥ ९ ॥ वातहोमैर्युनक्ति । प्राणा वै वातहोमाः प्राणैरेवैनमेतद्युनक्ति त्रिभिर्युनक्ति त्रयो वै प्राणाः प्राण ऽउदानो व्यानस्तैरेवैनमेतद्युन-क्त्यधोऽधो धुरमधोऽधो हि धुरं युग्यं युञ्जन्ति हस्ताभ्याꣳ हस्ताभ्याꣳ हि युग्यं युञ्जन्ति विपरिक्रामं विपरिक्रामꣳ हि युग्यं युञ्जन्ति ॥ १० ॥ स दक्षि-णायुग्यमेवाग्रे युनक्ति । अथ सव्यायुग्यमथ दक्षिणाप्प्रष्टिमेवं देवन्नेतरथा मानुषे तं नाभियुञ्ज्या-

(१) शु० य० सं० अ० १८ क० ४५ । (२) शु० य० सं० अ० १८ क० ४५ । (३) शु० य० सं० अ० १८ क० ४५ । (४) शु० य० सं० अ० १८ क० ४५ ।

न्नेद्युक्तमभियुनजानीति वाहनं तु दद्याद्युक्तेन भुनजाऽइति तमुपर्ष्येव हरन्त्याद्धर्ष्योरावसथादुपरि ह्येष तमद्धर्ष्यवे ददाति स हि तेन करोति तं तु दक्षिणानां कालेऽनुदिशेत् ॥ ११ ॥ अथ रुङ्मतीर्जुहोति *। अत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र रुचमैच्छत्तस्मिन्देवा ऽएताभी रुङ्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १२ ॥ यद्वेव रुङ्मतीर्जुहोति । प्रजापतेर्बिभ्यस्ताद्गुदक्रामत्तं ग्यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताभी रुङ्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १३ ॥ 'यास्ते ऽअग्ने सूर्ये रुचः । या वो देवाः सूर्ये रुचो, रुचं नो धेहि ब्राह्मणेष्वि'ति रुचः रुचमित्यमृतत्वं वै रुगमृतत्वमेवास्मिन्नेतद्दधाति तिस्र ऽआहुतीर्जुहोति त्रिवृदग्निर्ग्यावानग्निर्ग्यावरयस्य मात्रा तावतैवास्मिन्नेतद्रुचं दधाति ॥ १४ ॥ अथ वारुणीं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स ऽएषोऽत्र वरुणो देवता तस्मा ऽएतद्वर्विर्जुहोति तदेनः हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते वारुण्यर्चा स्वेनैवैनमेतदात्मना स्वया देवतया प्रीणाति ॥ १५ ॥ यद्वेव वारुणीं जुहोति । प्रजापतेर्बिभ्यस्ता†द्वीर्यमुदक्रामत्तं ग्यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया वीर्यमदधुस्तथैवास्मिन्नयमेतद्दधाति वारुण्यर्चा क्षत्रं वै वरुणो वीर्यं वै क्षत्रं वीर्येणैवास्मिन्नेतद्वीर्यं दधाति ॥१६॥ 'तत्त्वा

* अत्र शतम् ५१०० ॥

(१) शु० य० सं० अ० १८ क० ४६-४८ । (२) शु० य० सं० अ० १८ क० ४९ ।

† "व्वीर्यमु" इति 'क' पुस्तके ।

षामि ब्रह्मणा वृन्दमान' ऽइति। तस्मा याचे ब्रह्मणा वृन्दमान-ऽइत्येत'त्तदु[1]शास्ते यजमानो हविर्भिरि'ति तदयमाशास्ते यजमानो हविर्भिरित्येत'दुहे[2]ऽमानो वरुणेहु बोधी'त्य-क्रुध्यन्नो[3] वरुणेहु बोधीत्येत'दुरुशं[4]ऽस मा न ऽआयुः प्रमोषीरि'त्यात्मनः परिदां वदते ॥ १७ ॥ अथार्काश्वमे-धयोः सन्ततीर्जुहोति। अयं वा ऽअग्निरर्को[5]ऽसावादित्योऽ-श्वमेधस्तौ सृष्टौ नानैवास्तां तौ देवा ऽएताभिराहु तिभिः समतन्वन्त्समदधुस्तथैवैनावयमेतदेताभिराहुतिभिः सन्तनोति सन्दधाति ॥ १८ ॥ 'स्वर्ण[6] घर्म्मः स्वाहे'ति। असौ वा ऽआदित्यो घर्म्मोऽमुं तदादित्यमस्मिन्नग्नौ प्रति-ष्ठापयति ॥ १९ ॥ 'स्वर्णार्कः स्वाहे'ति। अयमग्निरर्क ऽइमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति ॥ २० ॥ 'स्वर्ण शुक्रः[7] स्वाहे'ति। असौ वा ऽआदित्यः शुक्रस्तं पुनरमुत्र दधाति ॥ २१ ॥ 'स्वर्ण ज्योतिः[8] स्वाहे'ति। अयमग्नि-र्ज्योतिस्तं पुनरिह दधाति ॥२२॥ 'स्वर्ण सूर्य्यः स्वाहे'ति। असौ वा ऽआदित्यः सूर्य्योऽमुं तदादित्यमस्य सर्वस्योत्तमं दधाति तस्मादेषोऽस्य सर्वस्योत्तमः ॥ २३ ॥ पञ्चैता-ऽआहुतीर्जुहोति। पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैनावेतत्स-न्तनोति सन्दधाति ॥ २४ ॥ यद्वेवाहु। 'स्वर्ण घर्म्मः स्वाहा

(१) शु० य० सं० अ० १८ क० ४९। (२) शु० य० सं० अ० १८ क० ४९।
(३) शु० य० सं० अ० १८ क० ४९। (४) शु० य० सं० अ० १८ क० ५०।
(५) शु० य० सं० अ० १८ क० ५०। (६) शु० य० सं० अ० १८ क० ५०।
(७) शु० य० सं० अ० १८ क० ५०। (८) शु० य० सं० अ० १८ क० ५०।

स्वर्णार्क्कः स्वाहे'त्यस्यैवैतान्यग्नेर्नामानि तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथो ऽएतानेवैतदग्नीनस्मिन्नग्नौ नामग्राहं दधाति ॥ २५ ॥ पञ्चैता ऽआहुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ २६ ॥ अथाऽत ऽआहुतीनामेवावपनस्य । यां काञ्च ब्राह्मणवतीमाहुतिं विद्यात्तामेतस्मिन्नन्काले जुहुयात्कामेभ्यो वा ऽएतः रथं युङ्क्ते तद्यां काञ्चाब्राह्मणवतीमाहुतिं जुहोत्यासां ताꣳ सतीर्जुहोति ॥ २७ ॥ तदाहुः । न जुहुयान्नेदतिरेचयानीति स वै जुहुयादेव कामेभ्यो वा ऽएता ऽआहुतयो हूयन्ते न वै कामानामतिरिक्तमस्ति ॥ २८ ॥ (B)

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[धिष्ण्यनिवापः]

अथ प्रत्येत्य * धिष्ण्यानां काले धिष्ण्यान्निवपति । अग्नय ऽएते यद्धिष्ण्या ऽअग्नीनेवैतच्चिनोति ता ऽएता विशः क्षत्रमयमग्निश्चितः क्षत्रं च तद्विशं च करोत्यमुं पूर्वं चिनोत्यथेमान् क्षत्रं तत्कृत्वा विशं करोति ॥ १ ॥ एक ऽएष भवति । एकस्थं तत्क्षत्रमेकस्थाꣳ श्रिश्रयं

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० ११. ६. २; कठ० १८. १४, १५, १८; कपिष्ठ० २९. ३, ४; मै० सं० ११. १२. ३; तै० सं० ४. ७. १२, १३।

* का० श्रौ० सू० १८. ६. ७।

करोति बहुव ऽइतरे विशि तद्भूमानं दधाति ॥ २ ॥ पञ्चचितिक ऽएष भवति। एकचितिका ऽइतरे क्षत्रं तद्वीर्य्येणात्यादधाति क्षत्रं विशो वीर्य्यवत्तरं करोत्यूर्द्धमेतं चिनोति क्षत्रं तदूर्द्धं चितिभिश्चिनोति तिरश्च ऽइतरान्क्षत्राय तद्विशमधस्तादुप*निखादिनीं करोति ॥ ३ ॥ ऽउभाभ्यां ष्वजुष्मत्या च लोकम्पृणया चैतं चिनोति। लोकम्पृणयैवेमाञ्क्षत्रमेव तद्वीर्य्येणात्यादधाति क्षत्रं विशो वीर्य्यवत्तरं करोति विशं क्षत्रादवीर्य्यतराम् ॥ ४ ॥ स यदिमाँल्लोकम्पृणयैव चिनोति क्षत्रं। वै लोकम्पृणा क्षत्रं तद्विश्यत्तारं दधात्युभयाँश्चिनोत्यद्धरस्य चाग्नेश्चाद्धरस्य पूर्वानथाग्नेस्तस्योक्तो बन्धुर्य्य—यमेवाद्धरधिष्ण्यं निवपति तं—तं चिनोत्याग्नीध्रीयं प्रथमं चिनोति तद्ध हि प्रथमं निवपति दक्षिणत ऽउदङ्ङासीनस्तस्योक्तो बन्धुः ॥ ५ ॥ तस्मिन्नष्टाविष्टका ऽउपदधाति। अष्टाक्षरा गायत्री गायत्रोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावन्तमेवैनमेतच्चिनोति तासामग्निः पृश्निर्नवमो नव वै प्राणाः सप्त शीर्षन्नवास्यौ द्वौ तानेवास्मिन्नेतद्दधाति यश्चितेऽग्निर्न्निधीयते स दशमो दश वै प्राणा मध्यमाग्नीध्रं मध्यतस्तत्प्राणान्दधाति मध्ये ह वा ऽएतत्प्राणाः सन्त ऽइति चेति चात्मानमनुव्यचरन्ति ॥ ६ ॥ एकविंशतिः होत्रीय ऽउपदधाति। एकविंशतिर्वैव परिश्रितस्तस्योक्तो बन्धुरेकादश ब्राह्मणाच्छंसस्य ऽएकादशाक्षरा वै

* 'निषादिनीं' इति 'ग' पुस्तके।

त्रिष्टुप्त्रैष्टुभ ऽइन्द्र ऽऐन्द्रो ब्राह्मणाच्छ॒ꣳसस्यष्टावष्टावि॒तरेषु त॒स्योक्तो ब॒न्धुः ॥७॥ ष॒ण्णमार्ज्जा॒लीये। षड्वा ऽऋ॒तव॒ ऽऋ॒तवः पि॒त॒रस्त॒ꣳ हैत॒मृ॒त॒वः पि॒त॒रो दक्षिणतः प॒र्य्यू॒हिरे स॒ ऽए॒षामे॒ष॒ दक्षिणतः स वा ऽइ॒तीम॒मुप॒दु॒धा॒तीती-मानि॒त्यमुं ब्रि॒शं त॒त्क्ष॒त्र॒मभिसम्मुखां करोति ॥ ८ ॥ अ॒थै॒नाꣳप॒रिश्रि॒द्भिः प॒रिश्र॑यति। आपो वै परिश्रितोऽ-द्भिरे॒वैनाँस्त॒त्प॒रितनोति स वै प॒र्य्ये॒व नि॒दधाति क्षत्र॒ꣳ हैता ऽअपां या॒ः खाते॒न यन्त्य॒थ हैता ब्रि॒शो या॒नीमा॒नि वृथोदकानि स य॒दमुं॑ खाते॒न परिश्रयति क्षत्रे त॒त्क्षत्रं दधाति क्षत्रं क्षत्रेण प॒रिश्र॑यत्य॒थ य॒दि॒मान्प॒र्य्ये॒व॒ नि॒दु॒धाति विशि तद्विशं दधाति विशा ब्रि॒शं प॒रिश्र॑यति ते॒षां वै या॒वत्य॒ ऽए॒व य॒जु॒ष्म॒त्य॒स्ता॒वत्य॒ः परिश्रितो या॒वत्यो ह्ये॒वामु॒ष्य य॒जु॒ष्म॒त्य॒स्ता॒वत्य॒ः प॒रिश्र॑तः क्षत्रा॒यैव तद्विशं कृतानुकरामनुव॒र्त्मानं करोति ॥ ९ ॥ अ॒थै॒षु पु॒रीषं नि॒वप॒ति। त॒स्योक्तो ब॒न्धुस्तू॒ष्णीम॒निरु॑क्ता हि विड॒था-ग्नीषोमी॒यस्य पशु॒पुरो॑डाशम॒नुदि॑शाम॒वेष्टी॒र्नि॒र्व॒पति दि॒श॒ ऽए॒षोऽग्निस्ता॒भ्य ऽए॒तानि ह॒वी॒ꣳषि नि॒र्व॒पति त॒देना ह॒वि॒षा दे॒व॒तां करोति य॒स्यै वै॒ दे॒व॒तायै ह॒वि॒र्गृ॒ह्य॒ते सा दे॒व॒ता न सा य॒स्यै॒ न॒ गृ॒ह्य॒ते प॒ञ्च भवन्ति पञ्च हि दि॒शः ॥ १० ॥ त॒दा॒हुः। द॒श॒ह॒वि॒षमे॒वैता॒मि॒ष्टिं नि॒र्व॒पे॒त्सा स॒र्व॒स्तोमा स॒र्व॒पृ॒ष्ठा स॒र्वा॒णि॒ च्छ॒न्दाꣳ॒सि स॒र्वा दि॒शः स॒र्व ऽऋ॒तव॒ः स॒र्व॒म्वे॒त॒दय॒मग्नि॒स्त॒देन॒ः ह॒वि॒षा दे॒व॒तां करोति य॒स्यै वै॒ दे॒व॒तायै ह॒वि॒र्गृ॒ह्य॒ते सा दे॒व॒ता न सा

यस्यै न गृह्यते दृश भवन्ति दृशाक्षरा विराड्विराडग्निर्दृश दिशो-दिशोऽग्निर्दृश प्राणाः प्राणा ऽअग्निर्ऋषावानग्निर्ऋषावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ ११ ॥ तत् त्वै देवस्वामेव । एतानि हवीꣳषि निर्वपेदेता ह देवताः सुता ऽएतेन सवेन येनैतत्सोष्यमाणो भवति ता ऽएवैतत्प्रीणाति ता ऽअस्मा ऽइष्टाः प्रीता ऽएतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यदेता देवताः सुता ऽएतेन सवेन यद्वैनमेता देवता ऽएतस्मै सवाय सुवते तस्मादेता देवस्वः ॥ १२ ॥ ता वै द्विनाम्न्यो भवन्ति । द्विनामा वै सवेन सुतो भवति यस्मै वै सवाय सूयते येन वा सवेन सूयते तदस्य द्वितीयं नाम ॥ १३ ॥ अष्टौ भवन्ति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्ऋषावानग्निर्ऋषावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ १४ ॥ तदाहुः । नैतानि हवीꣳषि निर्वपेन्नेदतिरेचयानीति तानि वै निर्वपेदेव कामेभ्यो वा ऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामतिरिक्तमस्ति यद्वै किञ्च पशुपुरोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयत ऽउभयानि निर्वपत्यद्धरस्य चाग्नेश्चाद्धरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳशवेतानीष्टिर्ह्यनुब्रूहि प्रेष्येति पशुपुरोडाशस्याहानुब्रूहि यजेत्येतेषामिष्टिर्हि समानः स्विष्टकृत्समानीडेष्टा दे-

(१) शु० य० सं० अ० ९ क० ३९-४०।

वृता भवन्त्यसमवहितꣳ स्विष्टकृते ॥ १५ ॥ अथैनं पूर्वाभिषेकेणाभिमृशति । 'सविता त्वा सवानाꣳ सुवतामेष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजे'ति ब्राह्मणानेवापोद्धरत्यनाद्यान्करोति ॥ १६ ॥ (C)

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
काण्डिकासंख्या ॥ ९७ ॥

[अग्नियोजनं कर्म, अग्निविमोचनञ्च]

अथ प्रातः * प्रातरनुवाकमुपाकरिष्यन् । अग्निं युनक्ति युक्तेन समश्नवा ऽइति तेन युक्तेन सर्वान्कामान्समश्नुते तं वै पुरस्तात्सर्वस्य कर्मणो युनक्ति तद्यत्किञ्चात ऽऊर्द्धं क्रियते युक्ते तत्सर्वꣳ समाधीयते ॥ १ ॥ परिधिषु युनक्ति । अग्नय ऽएते यत्परिधयोऽग्निभिरेव तदग्निं युनक्ति ॥ २ ॥ स मध्यमं परिधिमुपस्पृश्य । एतद्यजुर्जप'त्यग्निं युनज्मि शवसा घृतेने'ति बलं वै शवोऽग्निं युनज्मि बलेन च घृतेन चेत्येत'द्दिव्यꣳ सुपर्णं वयसा बृहन्तमि'ति दिव्यो वा ऽएष सुपर्णो वयसो बृहन्धूमेन 'तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा ऽअधि नाकमुत्तममि'ति स्वर्गो वै लोको

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा-- का० श० ११. ६. ३ ।
* का० श्रौ० सू० १८. ६. १६ ।
(१) शु० य० सं० अ० १८ क० ५१ । (२) शु० य० सं० अ० १८ क ५१ । (३) शु० य० सं० अ० १८ क० ५१ ।

नाकस्तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वर्गं लोकꣳ रोहन्तोऽधिनाकमुत्तममित्येतत् ॥ ३ ॥ अथ दक्षिणे । 'इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्र ऽऋषयो जग्मुः प्रथमजाः पुराणा' ऽइत्यमूनेतदृषीनाह ॥ ४ ॥ अथोत्तरे । 'इन्दुर्दक्षः श्येनऽऋतावा हिरण्यपक्षः शकुनो भुरण्युरि'त्यमृतं वै हिरण्यममृतपक्षः शकुनो भर्त्रेत्येत'न्महान्तसधस्थे ध्रुव ऽआ निषत्तो नमस्तेऽअस्तु मा मा हिꣳसी'रित्यात्मनः परिदां वदते ॥ ५ ॥ तद्यन्मध्यमं युजुः । स ऽआत्माथ ये ऽअभितस्तौ पक्षौ तस्मात्ते पक्षवती भवतः पक्षौ हि तौ ॥ ६ ॥ त्रिभिर्युनक्ति । त्रिवृदग्निर्युवानग्निर्युवत्यस्य मात्रा तावतैवैनमेतद्युनक्ति ॥ ७ ॥ अथ राजानमभिषुत्याग्नौ जुहोति । एष वै स सव ऽएतद्वै तत्सूयते यमस्मै तमेता देवताः सवमनुमन्यन्ते याभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यदग्नौ जुहोति तदग्निमभिषिञ्चति सोऽस्यैष दैवऽआत्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तोऽथ भक्षयति तदात्मानमभिषिञ्चति सोऽस्यायमात्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तः ॥ ८ ॥ अग्नौ हुत्वाथ भक्षयति। दैवो वा ऽअस्यैष ऽआत्मा मानुषोऽयं देवा ऽउ वा

(१) शु० य० सं० अ० १८ क० ५२। (२) शु० य० सं० अ० १८ क० ५३। (३) शु० य० सं० अ० १८ क० ५३।

ऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथ भक्षयति ॥ ९ ॥ अथैनं विमुञ्चति । आप्त्वा तं कामं श्युस्मै कामायैनं श्युङ्क्ते यज्ञायज्ञियꣳ स्तोत्रमुपाकरिष्यन्त्स्वर्गो वै लोको यज्ञायज्ञियमेतस्य वै गत्या ऽएनं श्युङ्क्ते तदाप्त्वा तं कामं श्युस्मै कामायैनं श्युङ्क्ते ॥१०॥ तं वै पुरस्तात्स्तोत्रस्य विमुञ्चति । स यदुपरिष्टात्स्तोत्रस्य विमुञ्चेत्पराङ् हैतꣳ स्वर्गं लोकमतिप्रणइयेदथ यत्पुरस्तात्स्तोत्रस्य विमुञ्चति तत्सम्प्रति स्वर्गं लोकमाप्त्वा विमुञ्चति ॥ ११ ॥ परिधिषु विमुञ्चति । परिधिषु ह्येनं श्युनक्ति यत्र वाव योग्यं श्युञ्जन्ति तदेव तद्विमुञ्चन्ति ॥१२॥ स सन्ध्योरुपस्पृइश्य । *एते यजुषी जपति तथा द्वे यजुषी त्रीन्परिधीननुविभवतो 'दिवो[1] मूर्द्धासि पृथिव्या नाभिरि'ति दक्षिणे 'विश्श्वस्य[2] मूर्द्धन्नधि तिष्ठसि श्रित' ऽइत्युत्तरे मूर्द्धवतीभ्यां मूर्द्धा ह्यस्यैषोऽप्सुमतीभ्यामग्नेरेतद्वैश्वानरस्य स्तोत्रं यज्ञायज्ञियꣳ शान्तिर्वा ऽआपस्तस्मादप्सुमतीभ्याम् ॥ १३ ॥ द्वाभ्यां विमुञ्चति । द्विपाद्यजमानो यजमानोऽग्निर्ग्यावानग्निर्ग्यावत्त्यस्य मात्रा तावतैवैनमेतद्विमुञ्चति त्रिभिर्ग्युनक्ति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चर्त्तवः संवत्सरः संवत्सरोऽग्निर्ग्यावानग्निर्ग्यावत्त्यस्य मात्रा तावत्तद्भवति ॥ १४ ॥ तꣳ हैके । प्रायणीय ऽएवातिरात्रे युञ्जन्त्युदयनीये विमुञ्चन्ति सꣳस्थारूपं वा ऽएतद्यद्विमोचनं किं पुरा

* 'एने यजुषी' इति 'ग-ज' पुस्तकयोः ।

(१) शु० य० सं० अ० १८ क० ५४ । (२) शु० य० सं० अ० १८ क० ५५ ।

सथंस्थायै सथंस्थारूपं कुर्व्वामेति न तथा कुर्व्वादुहरहर्व्वा-ऽएष यज्ञस्तायतेऽहरहः सन्तिष्ठतेऽहरहरेनथं स्वर्ग्गस्य लोकस्य गत्यै युङ्क्तेऽहरहरेनेन स्वर्ग्गं लोकं गच्छति तस्मादुहरहरेव युञ्ज्यादुहरहर्व्विमुञ्चेत् ॥ १५ ॥ अथो यथा प्रायणीयेऽतिरात्रे । सामिधेनीरनूच्य ब्रूयादुदयनीय-ऽएवातोऽनुवक्तास्मीति तादृक्तत्तस्मादुहरहरेव युञ्ज्यादुहर-हर्व्विमुञ्चेत् ॥ १६ ॥ तद्धैतच्छाण्डिल्यः । कङ्कतीयेभ्योऽ-हरहः कर्म्म प्रदिश्य प्रवव्राजाहरहरेव वो युनजानि-हरहर्व्विमुञ्चानिति तस्मादुहरहरेव युञ्ज्यादुहरहर्व्वि-मुञ्चेत् ॥ १७ ॥ (D)

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

[पयोव्रतादिमीमांसा]

अथातः पयोव्रतायै । पयोव्रतो दीक्षितः स्याद्दे-वेभ्यो ह वा ऽअमृतमपचक्राम ॥ १ ॥ ते होचुः । श्रमेण तपसेदमन्विच्छामेति तच्छ्रमेण तपसान्वैच्छँस्ते दीक्षित्वा पयोव्रता ऽअभवन्नेतद्वै तपो यो दीक्षित्वा पयोव्रतोऽसत्तस्य घोषमाशुश्रुवुः ॥ २ ॥ ते होचुः । नेदीयो वै भवति भूयस्तप ऽउपायामेति ते व्रीन्स्त-नानुपेयुस्तत्परादृशुः ॥ ३ ॥ ते होचुः । नेदीयो

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रा० ११. ६. ४; कठ० १८. १४, १५, १८; कपिष्ठ० २९. १. ४; मै० सं० ११. १२. ३; तै० सं० ४. ७. १२, १३ ।

वै भवति भूयस्तप ऽउपायामेति ते द्वौ स्तना ऽउपेयुस्तन्नेदीयसः परादृशुः ॥ ४ ॥ ते होचुः । नेदीयो वै भवति भूयस्तप ऽउपायामेति त ऽएकः स्तनमुपेयुस्तदुधिजगाम न त्वभिपत्तुः शेकुः ॥ ५ ॥ ते होचुः । अधि वा ऽअगन्न त्वभिपत्तुः शक्नुमः सर्वं तप ऽउपायामेति त ऽउपवसथेऽनाशकमुपेयुरेतद्वै सर्वं तपो यदुनाशकस्तस्मादुपवसथे नाश्नीयात् ॥ ६ ॥ तत्प्रातरभिपद्य । अभिषुत्याग्नावजुहवुस्तदग्नावमृतमदधुः सर्वेषामु हैष देवानामात्मा यदग्निस्तद्यदग्नावमृतमदधुस्तदात्मन्नमृतमदधत ततो देवा ऽअमृता ऽअभवन् ॥ ७ ॥ तद्यत्तदमृतः सोमः सः । तदद्यापि यजमानः श्रमेण तपसान्विच्छति स दीक्षित्वा पयोव्रतो भवत्येतद्वै तपो यो दीक्षित्वा पयोव्रतोऽसत्तस्य घोषमाशृणोतीत्यहे क्रय ऽइति ॥ ८ ॥ स त्रीन्स्तनानुपैति । तत्परापश्यति स द्वौ स्तना ऽउपैति तन्नेदीयसः परापश्यति स ऽएकः स्तनमुपैति तदुधिगच्छति न त्वभिपत्तुः शक्नोति स ऽउपवसथेऽनाशकमुपैत्येतद्वै सर्वं तपो यदुनाशकस्तस्मादुपवसथे नाश्नीयात् ॥ ९ ॥ तत्प्रातरभिपद्य । अभिषुत्याग्नौ जुहोति तदग्नावमृतं दधात्यथ भक्षयति तदात्मन्नमृतं धत्ते सोऽमृतो भवत्येतद्वै मनुष्यस्यामृतत्वं यत्सर्वमायुरेति तथो हानेनात्मना सर्वमायुरेति ॥ १० ॥ अग्नौ हुत्वाथ भक्षयति । दैवो वा ऽअस्यैष ऽआत्मा मानुषोऽयं देवा ऽउ वा ऽअग्रेऽथ मनुष्यास्तस्मादग्नौ हुत्वाथ भक्षयति

॥ ११ ॥ अथातः समिष्टयजुषामेव मीमाꣳसा । देवाश्चासुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्वाचमेव सत्यानृते सत्यं चैवानृतं च त ऽउभय ऽएव सत्यमवदन्नुभयेऽनृतं ते ह सदृशं वदन्तः सदृशा ऽएवासुः ॥ १२ ॥ ते देवा ऽउत्सृ*ज्यानृतꣳ । सत्यमन्वालेभिरेऽसुरा ऽउ होत्सृज्य सत्यमनृतमन्वालेभिरे ॥ १३ ॥ तद्वेदुः सत्यमीक्षाञ्चक्रे । यदसुरेष्वास देवा वा ऽउत्सृज्यानृतः सत्यमन्वालप्सत हन्त तदुयानीति तद्देवानाजगाम ॥ १४ ॥ अनृतमु हेक्षाञ्चक्रे । यद्देवेष्वासासुरा वा ऽउत्सृज्य सत्यमनृतमन्वालप्सत हन्त तदुयानीति तदुसुरानाजगाम ॥ १५ ॥ ते देवाः । सर्वꣳ सत्यमवदन्त्सर्वमसुरा ऽअनृतं ते देवा ऽआसक्ति सत्यं वदन्त ऽएषावीरतरा ऽइवासुरनाढ्यतरा ऽइव तस्मादु हैतय ऽआसक्ति सत्यं वदत्यैषावीरतर ऽइवैव भवत्यनाढ्यतर ऽइव स हु स्वेवान्ततो भवति देवा ह्येवान्ततो भवन् ॥ १६ ॥ अथ हासुराः । आसक्त्यनृतं वदन्त ऽऊष ऽइव पिपिसुराढ्या ऽइवासुस्तस्मादु हैतय ऽआसक्त्यनृतं वदत्यूष ऽइवैव पिस्यत्याढ्य ऽइव भवति परा हु स्वेवान्ततो भवति परा ह्यसुरा ऽअभवन् ॥ १७ ॥ तयत्तत्सत्यम् । त्रयी सा विद्या ते देवा ऽअब्रुवन्यज्ञं कृत्वेदुः सत्यं तनवामहा ऽइति ॥ १८ ॥ ते दीक्षणीयान्निरवपन् । तदु हासुरा ऽअनुबुबुधिरे यज्ञं वै कृत्वा तदेवाः सत्यं

* 'ज्यानृतम्' इति 'ग' पुस्तके लभ्यते ।

तन्वते प्रेत तदाहरिष्यामो यदस्माकं तत्रेति तस्य समिष्टयजुरहुतमासाथाजग्मुस्तस्मात्तस्य यज्ञस्य समिष्टयजुर्न्न जुह्वति ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यत्कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनः प्रेयुः ॥ १९ ॥ तेषु प्रेतेषु । प्रायणीयं निरवपँस्तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्य * शंय्योरुक्तमासाथाजग्मुस्तस्मात्स यज्ञः शंय्वन्तस्ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २० ॥ तेषु प्रेतेषु । राजानं क्रीत्वा पर्य्युह्याथास्मा ऽआतित्थ्यः हविर्निरवपँस्तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्येडोपहूतासाथाजग्मुस्तस्मात्स यज्ञ ऽइडान्तस्ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २१ ॥ तेषु प्रेतेषु । उपसदोऽतन्वत ते तिस्र ऽएव सामिधेनीरनूच्य देवता ऽएवायजन्न प्रयाजान्नानुयाजानुभयतो यज्ञस्योदसादयन्भूयिष्ठः हि तत्रात्त्वरन्त तस्मादुपसत्सु तिस्र ऽएव सामिधेनीरनूच्य देवता ऽएव यजति न प्रयाजान्नानुयाजानुभयतो यज्ञस्योत्सादयति ॥ २२ ॥ त ऽउपवसथेऽग्नीषोमीयं पशुमालेभिरे । तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्य समिष्टयजूꣳष्यहुतान्यासुरथाजग्मुस्तस्मात्तस्य पशोः समिष्टयजूꣳषि न जुह्वति ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽ-

* 'शम्य्योरुक्तम्' इति 'ग-ज' पुस्तकयोर्दृश्यते ।

न्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २३ ॥ तेषु प्रेतेषु । प्रातःप्रातः सवनमतन्वत तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्यैतावत्कृतमास यावत्प्रातःसवनमथाजग्मुस्ते देवा-ऽअसुरान्प्रति दृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २४ ॥ तेषु प्रेतेषु । माध्यन्दिनः सवनमतन्वत तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्यैतावत्कृतमास यावन्माध्यन्दिनमथाजग्मुस्ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २५ ॥ तेषु प्रेतेषु । सवनीयेन पशुनाचरँस्तदु ह्यासुरा ऽअन्वेव बुबुधिरे तस्यैतावत्कृतमास यावदेतस्य पशोः क्रियतेऽथाजग्मुस्ते देवा ऽअसुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्त्तुं दद्धिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥ २६ ॥ तेषु प्रेतेषु । तृतीयसवनमतन्वत तत्समस्था*पयन्यत्समस्थापयँस्तत्सर्वदः सत्यमाप्नुवँस्ततोऽसुरा ऽअपपुप्लुविरे ततो देवा ऽअभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य ऽएवं वेद ॥ २७ ॥ ते देवा-ऽअब्रुवन् । ये न ऽइमे यज्ञाः सामि सꣳस्थिता यानिमान्विजहतोऽगामोप तज्जानीत यथेमान्त्सꣳस्थापयामेति ते ऽब्रुवँश्चेतयद्धमिति चितिमिच्छतेति वाव तदब्रुवँस्तदिच्छत यथेमान्यज्ञान्त्सꣳस्थापयामेति ॥ २८ ॥ ते चेतयमानाः । एतानि समिष्टयजूꣳष्यपश्यँस्तान्यजुहवुस्तैरेता-

* 'पयन्यूत्तसमस्था' पाठोऽयं 'क' पुस्तके नास्ति ।

न्यज्ञान्त्सम्मस्थापयन्य्यत्त्समम्स्थापयँस्तत्स्म्मात्त्सꣳस्थितयजू-
ꣳष्य्यथ यत्त्समयजँस्तत्स्म्मात्त्समिष्टयजूꣳषि ॥ २९ ॥ ते
वा ऽएते नव यज्ञाः । नवैतानि समिष्टयजूꣳषि तद्य-
देतानि जुह्वोत्त्येतानेवैतद्यज्ञान्त्सꣳस्थापयत्त्युभयानि जुहो-
त्त्यद्धरस्य चाग्नेश्चाद्धरस्य पूर्वाण्ण्यथाग्नेस्तस्योक्तो
बन्धुः ॥ ३० ॥ द्वे * ऽअग्नेर्जुहोति । द्विपाद्यजमानो
यजमानोऽग्निर्य्यावानग्निर्य्यावत्त्यस्य मात्रा तावतैवैतद्यज्ञः
सꣳस्थापय'तीष्टो यज्ञो भृगुभिरिष्टो ऽअग्निराहुतः पिपर्त्तु
न' ऽइति ॥३१॥ तान्न्युभयान्न्येकादश सम्पद्यन्ते । एकाद-
शाक्षरा त्रिष्टुब्वीर्य्यं त्रिष्टुब्वीर्य्यमेवैतद्यज्ञमभिसम्पादयति
॥ ३२ ॥ यद्वैवैकादश । एकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभ-
ऽइन्द्र ऽइन्द्रो यज्ञस्यात्मेन्द्रो देवता तद्य ऽएव यज्ञस्यात्मा या
देवता तस्मिन्नेवैतद्यज्ञमन्ततः प्रतिष्ठापयति ॥ ३३ ॥
[अर्धप्रपाठकः ५० ॥] समिष्टयजूꣳषि हुत्वावभृथं यन्ति ।
अवभृथादुदेत्योदयनीयेन चरित्वानूबन्ध्यस्य पशुपुरोडाश-
मनु देविकानाꣳ हवीꣳषि निर्वपति ॥ ३४ ॥ एतद्वै
प्रजापतिः । प्राप्य राद्धेवामन्यत स दिक्षु प्रतिष्ठायेदꣳ
सर्वं दुधद्विदुधदुतिष्ठद्यद्दधद्विदुधदुतिष्ठत्तस्म्माद्धाता तथै-
वैतद्यजमानो दिक्षु प्रतिष्ठायेदꣳ सर्वं दुधद्विदुधत्तिष्ठति
॥ ३५ ॥ यद्वैवैतानि हवीꣳषि निर्वपति । दिश ऽएषोऽ-
ग्निस्ता ऽउ ऽएवामूः पुरस्ताद्दर्भस्तम्बं च लोगेष्टका-

* का० श्रौ० सू० १६. ६. १९ ।
(१) शु० य० सं० अ० १८ क० ५६, ५७ ।

इच्छोपदधाति ताः प्राणभृतः प्रथमायां चितौ सर्वेव द्वितीया सर्वा तृतीया सर्वा चतुर्त्थ्यथ पञ्चम्यै चितेरसपत्ना नाकसदः पञ्चचूडास्ता ऽऊर्द्धा ऽउत्क्रामन्त्य ऽआयँस्ताभ्यः प्रजापतिरबिभेत्सर्वं वा ऽइदमिमाः परा च्च्योऽत्येष्यन्तीति ता धाता भूत्वा पर्य्यगच्छत्तासु प्रत्यतिष्ठत् ॥ ३६ ॥ स यः स धातासौ स ऽआदित्यः । अथ यत्तद्दिशां परमं क्रान्तमेतत्तद्यस्मिन्नेष ऽएतत्प्रतिष्ठितस्तपति ॥ ३७ ॥ स यः स धातायमेव स धात्रः । द्वादशकपालः पुरोडाशो द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्द्धाताथ यत्तद्दिशां परमं क्रान्तमेतानि तानि पूर्वाणि हवीꣳष्यनुमत्यै चरू राकायै चरुः सिनीवाल्यै चरुः कुहूव्यै चरुस्तद्यदेतानि निर्वपति यदेव तद्दिशां परमं क्रान्तं तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तदः सर्वं जुहोत्येतस्यैव कृत्स्नतायै ॥ ३८ ॥ ता वा ऽएता देव्यः । दिशो ह्येताश्छन्दाꣳसि वै दिशश्छन्दाꣳसि देव्योऽथैष कः प्रजापतिस्तद्यद्देव्यश्च कश्च तस्मादैविकाः पञ्च भवन्ति पञ्च हि दिशः ॥ ३९ ॥ तदाहुः । नैतानि हवीꣳषि निर्वपेन्नेदतिरेचयानीति तानि वै निर्वपेदेव कामेभ्यो वा ऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामरिक्तमस्ति यद्वै किञ्च पशुपुरोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयत ऽउभयानि निर्वपत्यद्धुरस्य चाग्नेश्चाद्धुरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳ-

इश्वेतानीष्टिर्ह्वनुब्रूहि प्रेष्येति पशुपुरोडाशस्याह्वानुब्रूहि यजेत्येतेषामिष्टिर्हि समानः स्विष्टकृत्समानीडा ॥ ४० ॥ तस्य वा ऽएतस्य पशोः । जुह्वति समिष्टयजूꣳष्यन्भ्यवयन्ति हृदयशूलेनावभृथः सꣳस्था ह्येष पशुर्हृदयशूलेन चरित्वा ॥ ४१ ॥ प्रत्येत्य वैश्वकर्म्मणानि जुहोति । विश्वानि कर्म्माण्ययमग्निस्तान्यस्यान्न सर्वाणि कर्म्माणि कृतानि भवन्ति तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथो विश्वकर्म्मायमग्निस्तमेवैतत्प्रीणाति ॥४२॥ यद्वै व * वैश्वकर्म्मणानि जुहोति । प्रायणं च ह्यग्नेरुदयनं च सावित्राणि प्रायणं वैश्वकर्म्मणान्युदयनꣳ स यत्सावित्राण्येव जुहुयान्न वैश्वकर्म्मणानि यथा प्रायणमेव कुर्य्यान्नोदयनं तादृक्तदथ यद्वैश्वकर्म्मणान्येव जुहुयान्न सावित्राणि यथोदयनमेव कुर्य्यान्न प्रायणं तादृक्तदुभयानि जुहोति प्रायणं च तदुदयनं च करोति ॥ ४३ ॥ अष्टावमूनि भवन्ति । एवमिमानि तद्यथा प्रायणं तथोदयनं करोति स्वाहाकारोऽमीषां नवमो भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोत्याहुतिरमीषां दशमी भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोति सन्ततां तत्राहुतिं जुहोति रेतो वै तत्र यज्ञो रेतसोऽविच्छेदाय स्रुवेणेह स्वाहाकारं निरुक्तꣳ हि रेतो जातं भवति ॥ ४४ ॥ 'षदाकूतात् । समसुस्रोद्भृदो वा

* का० श्रौ० सू० १८. ६. २२ ।
(१) शु० य० सं० अ० १८ क० ५८ ।

मनसो वा सम्भृतं चक्षुषो वेत्येतस्माद्ध्येतत्सर्वस्माद्दग्ने कर्म्म समभव'त्तदनु प्रेतं सुकृतामु लोकं य्यत्र ऽऋषयो जग्मुः प्रथमजाः पुराणा' ऽइत्यमूनेतदृषीनाह ॥ ४५ ॥ 'एतद्वः सधस्थम्[2]। परि ते ददामी'ति स्वर्गो वै लोकः सधस्थस्तदेनꣳ स्वर्ग्गाय लोकाय परिददाति 'यमा[3]वहाच्छेवधिं जातवेदाः। अन्वागन्ता यज्ञपतिर्वो ऽअत्र तꣳ स्म जानीत परमे व्योमन्नि'ति यथैव यजुस्तथा बन्धुः ॥ ४६ ॥ 'एतं जानाथ[4]। परमे व्योमन्देवाः सधस्था विदु रूपमस्य। यदा गच्छात्पथिभिर्देवयानैरिष्टापूर्त्ते कृणवाथाविरस्मा' ऽइति यथैव यजुस्तथा बन्धु'रुद्बुध्यस्वाग्ने, येन वहसी'ति तयोरुक्तो बन्धुः ॥४७॥ 'प्रस्तरेण परिधिना[5]। स्रुचा वेद्या च बर्हिषा। ऋचेमं य्यज्ञं नो नय स्वर्देवेषु गन्तव' ऽइत्येतैर्नो यज्ञस्य रूपैः स्वर्ग्गं लोकं गमयेत्येतत् ॥ ४८ ॥ 'यद्दत्तं य्यत्परादानम्। यत्पूर्त्तं य्याश्च दक्षिणाः। तदग्निर्वैश्वकर्म्मणः स्वर्देवेषु नो दधदि'ति यच्चैव सम्प्रति दद्मो यच्चासम्प्रति तन्नोऽयमग्निर्वैश्वकर्म्मणः स्वर्ग्गे लोके दधात्वित्येतत् ॥ ४९ ॥ 'यत्र धारा ऽअनपेताः। मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्म्मणः स्वर्देवेषु नो दधदि'ति यथैव यजुस्तथा बन्धुः ॥ ५० ॥ अष्टौ वैश्वकर्म्मणानि जुहोति। अष्टाक्षरा गायत्री गायत्रोऽग्निर्य्यावानग्निर्य्यावत्यस्य

(१) शु० य० सं० अ० १८ क० ५८। (२) शु० य० सं० अ० १८ क० ५९। (३) शु० य० सं० अ० १८ क० ५९। (४) शु० य० सं० अ० १८ क० ६१, ६०। (५) शु० य० सं० अ० १८ क० ६२। (६) शु० य० सं० अ० १८ क० ६३। (७) शु० य० सं० अ० १८ क० ६४। (८) शु० य० सं० अ० १८ क० ६५।

मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥ ५१ ॥ वैश्वकर्म्मणानि हुत्वा नाम करोति । यदा वै सर्वः कृत्स्नो जातो भवत्यथ नाम कुर्वन्त्यत्र वा ऽएष सर्वः कृत्स्नो जातो भवति ॥ ५२ ॥ नाम कृत्वाथैनमुपतिष्ठते । सर्वेण वा ऽएष ऽएतमात्मना चिनोति स यदेतामत्रात्मनः परिदां न वदेतात्र हैवास्यैष ऽआत्मानं वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो हास्यैष ऽआत्मानं न वृङ्क्ते 'ये ऽअग्नयः पाञ्चजन्या ऽअस्यां पृथिव्यामधि। तेषामसि त्वमुत्तमः प्र नो जीवातवे सुवे'ति ये के चाग्नयः पञ्चचितिका ऽअस्यां पृथिव्यामधि तेषामसि त्वः सत्तमः प्रो ऽअस्मान् जीवनाय सुवेत्येतदनुष्टुभा वाग्वा ऽअनुष्टुब्वायु सर्वाणि च्छन्दाꣳसि सर्वैरेवास्मा ऽएतच्छन्दोभिर्न्निहुत ऽउपस्थायाग्निः समारोह्य निर्म्मत्थ्योदवसानीयया यजते ॥ ५३ ॥ * अथ मैत्रावरुण्या पयस्यया यजते । देवत्रा वा ऽएष भवति य ऽएतत्कर्म्म करोति दैवम्वेतन्मिथुनं यन्मित्रावरुणौ स यदेतयानिष्ट्वा मानुष्यां चरेत्प्रत्यवरोहः स यथा दैवः सन्मानुषः स्यात्तादृक्तदथ यदेतया मैत्रावरुण्या पयस्यया यजते दैवमेवैतन्मिथुनमुपैत्येतयेष्ट्वा कामं स्यथा प्रतिरूपं चरेत् ॥ ५४ ॥ यद्वै वैतया मैत्रावरुण्या पयस्यया यजते । प्रजापतेर्व्विस्रस्ताद्रेतः परापतत्तं स्यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया मैत्रा-

(१) शु० य० सं० अ० १८ क० ६७ ।

* अत्र शतम् ५१०० ॥

वरुण्या पयस्यया रेतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति ॥५५॥ स यः स प्रजापतिर्व्यस्त्रंसत । अयमेव स योऽयमग्निश्चीयतेऽथ यदस्मात्तद्रेतः परापतदेषा सा पयस्या मैत्रावरुणी भवति प्राणोदानौ वै मित्रावरुणौ प्राणोदानाऽउ वै रेतः सिक्तं विकुरुतः पयस्या भवति पयो हि रेतो यज्ञो भवति यज्ञो ह्येव यज्ञस्य रेत ऽउपाꣳशु भवत्युपाꣳशु हि रेतः सिच्यतेऽन्ततो भवत्यन्ततो हि रेतो धीयते ॥५६॥ तस्यै वाजिनेन चरन्ति । तस्मिन्दक्षिणां दधाति तूपरौ मिथुनौ दद्यादित्य*ब्भ्याज्ञायैनेव मन्य ऽइति ह स्माह माहित्थिः सूवत्यु हैषाग्निचित ऽआहुतिः सोमाहुतिर्व्या-मनिष्टके जुहोति ॥ ५७ ॥ स स्वयमातृण्णा ऽएवोपदधीत । इमे वै लोकाः स्वयमातृण्णा ऽइम ऽउ लोका ऽएषोऽग्निश्चितः ॥ ५८ ॥ ऋतव्या ऽएवोपदधीत । संवत्सरो वा ऽऋतव्याः संवत्सर ऽएषोऽग्निश्चितः ॥ ५९ ॥ विश्वज्योतिष ऽएवोपदधीत । एता वै देवता विश्वज्योतिष ऽएता ऽउ देवता ऽएषोऽग्निश्चितः ॥ ६० ॥ पुनश्चितिमेवोपदधीत । पुनर्व्यज्ञो हैष ऽउत्तरा हैषा देवयज्या पुनर्व्यज्ञमेवैतदुपधत्त ऽउत्तरामेव देवयज्यामुप हैनं पुनर्व्यज्ञो नमतीति न तथा कुर्व्याद्यो वाव चितेऽग्निर्न्निधीयते तामेवेष्टकामेष सर्वोऽग्निरभिसम्पद्यते तद्यदग्नौ जुहोति तदेवास्य यथा सर्वस्मिन्छाण्डिल्येऽग्नौ सञ्चिते पक्षपुच्छवत्याहुतयो हुताः स्युरेवमस्यैता-

* 'क' पुस्तके 'भ्याग्न्यायैनेव' इत्येव लभ्यते ।

ऽआहुतयो हुता भवन्ति ॥ ६१ ॥ सर्वाणि वा ऽएष भूतानि । सर्वान्देवाङ्गर्भी भवति योऽग्निं बिभर्त्ति स योऽसंवत्सरभृतं चिनुत ऽएतानि ह स सर्वाणि भूतानि गर्भं भूतं निर्हते यो ह्येव मानुषं गर्भं निर्हन्ति तन्वेव परिचक्षतेऽथ किं ह्य ऽएतं देवो ह्येष नासंवत्सरभृतस्यार्त्विजा भवितव्यमिति ह स्माह वात्स्यो नेदस्य देवरेतसस्य निर्हण्यमानस्य मेयसानीति ॥ ६२ ॥ षण्मास्यमन्तमं चिन्वीतेत्याहुः । षण्मास्या वा ऽअन्तमा गर्भा जाता जीवन्तीति स यद्यसंवत्सरभृते महदुक्थः शः सेदृगशीतीः शः सेदृसर्वं वै तद्यदसंवत्सरभृतोऽसर्वं तद्यदृगशीतयो विकृष्टं त्वेनः स भूयो विकर्षेद्यदि चैव संवत्सरभृतः स्याद्यदि चासंवत्सरभृतः सर्वमेव महदुक्थः शः सेत् ॥ ६३ ॥ अथ ह शाण्डिल्यायनः प्राच्च्यां जगाम । तः ह दैयाम्पातिरुवाच शाण्डिल्यायन कथमग्निश्चेतव्यो ग्लायामोऽह संवत्सरभृतायाग्निमु चिकीषामह ऽइति ॥ ६४ ॥ स होवाच । * कामन्वा ऽएनः स चिन्वीत येन पुरा संवत्सरं भूतः स्यात्तꣳ ह्येव तं भूतः सन्तश्चिनुत ऽइति ॥ ६५ ॥ कामम्वैवैनः स चिन्वीत । यः संवत्सरमभिषविष्यन्त्स्यादेष वा ऽएनं प्रत्यक्षमन्नेन बिभर्त्येताभिराहुतिभिः ॥ ६६ ॥ कामम्वैवैनः स चिन्वीत । यः संवत्सरमग्निहोत्रं जुहुयाद्बिभर्त्ति वा ऽएनमेष योऽग्निहोत्रं जुहोति ॥ ६७ ॥

* 'कामं न्वा' इति 'ग—ज' पुस्तकयोः ।

कामस्वैवैनꣳ स चिन्वीत । यꣳ संवत्सरं जातꣳ स्यात्प्राणो वा ऽअग्निस्तमेतद्भिमर्त्यथ ह वै रेतः सिक्तं प्राणोऽन्ववरोहति तद्विन्दते तद्यज्जातं-जातं विन्दते तस्माज्जातवेदास्तस्मादुप्येवंवित्कामꣳ सद्योभूतं चिन्वीत यदु ह वा ऽएवंवित्पिबति वा पाययति वा तदेवास्य यथा सर्वस्मिञ्छाण्डिल्येऽग्नौ सञ्चिते पक्षपुच्छवत्याहुतयो हुताः स्युरेवमस्यैता ऽआहुतयो हुता भवन्ति ॥ ६८ ॥ (A)

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[चित्युपस्थानम्]

इन्द्र ऽएतत्सप्तर्च्छमपश्यत् । न्यूनस्याप्त्या ऽअतिरिक्तस्यानतिरिक्तये व्यृद्धस्य समृद्ध्या ऽअथ ह वा ऽईश्वरोऽग्निं चित्वा किञ्चिद्दौरितमापत्तोर्वि वा ह्वलितोर्व्यृद्धा यदा ह वा ऽएतच्छ्यापर्णः सायकायनः शुश्रावाथ हैतत्कर्म्मोपदधर्ष ॥ १ ॥ सैषा त्रयस्य समृद्धिः । अग्नेः समृद्धिर्योऽग्निं चिनुते तस्य समृद्धिर्योऽग्निं चिनोति तस्य समृद्धिः ॥ २ ॥ * तद्यदेतेनोपतिष्ठते । यदेवास्यात्र विद्वान्वाविद्वान्वाति वा रेचयति न वाऽभ्यापयति तदेवास्यैतेन

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० ११. ७ १; कठ० १८. १४, १५. १८; कपिष्ठ० २९. ३, ४; मै० सं० ११. १२. ३; तै० सं० ७. १२, १३।

* का० श्रौ० सू० १७. ७. १,२ ।

सर्वमायुं भवति यदस्य किञ्चानायुं य ऽउ तस्यामनुष्टुब्भ्यृचि कामोऽत्रैव तमाप्नोत्यथो ऽएतस्मादेवैतत्कर्म्मणो रक्षाꣳसि नाष्ट्रा ऽअपहन्ति नो हैनमनुव्याहारिण स्तृण्वते तस्मादुप्येवंवित्कामं परस्मा ऽअग्निं चिनुयादीश्वरो ह श्रेयान्भवितोः ॥ ३ ॥ 'वार्त्रघ्नीभ्यां शवसे । सहदानुं पुरुहूत क्षियन्तमि'ति वार्त्रघ्नीभ्यां प्रथमाभ्यामुपतिष्ठत ऽएतद्वै देवा व्वृत्रं पाप्मानः हत्वापहतपाप्मान ऽएतत्कर्म्माकुर्वत तथैवैतद्यजमानो व्वृत्रं पाप्मानः हत्वापहतपाप्मैतत्कर्म्म कुरुते ॥ ४ ॥ 'वि न ऽइन्द्र मृधो जहि । मृगो न भीमः कुचरो गिरिष्ठा' ऽइति वैमृधीभ्यां द्वितीयाभ्यामेतद्वै देवा मृधः पाप्मानः हत्वापहतपाप्मान ऽएतत्कर्म्माकुर्वत तथैवैतद्यजमानो मृधः पाप्मानः हत्वापहतपाप्मैतत्कर्म्म कुरुते ॥ ५ ॥ 'वैश्वानरो न ऽऊतये । पृष्ठो दिवि पृष्ठोऽअग्निः पृथिव्यामि'ति वैश्वानरीभ्यां तृतीयाभ्यामेतद्वै देवा वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मान ऽएतत्कर्म्माकुर्वत तथैवैतद्यजमानो वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मैतत्कर्म्म कुरुते ॥ ६ ॥ 'अश्याम तं काममग्ने तवोती'ति । एकया कामवत्यैतद्वै देवाः षड्भिचेन पाप्मानमपहत्यैकया कामवत्यैकधान्ततः सर्वान्कामाना-

(१) शु० य० सं० अ० १८ क० ६८, ६९। (२) शु० य० सं० अ० १८ क० ७०। (३) शु० य० सं० अ० १८ क० ७२, ७३। (४) शु० य० सं० अ० १८ क० ७४।

त्मन्नकुर्वत तथैवैतद्यजमानः षड्ढोचेन पाप्मानमपहत्यै-
कया कामवत्यैकधान्ततः सर्वान्न्कामानात्मन्न्कुरुते ॥ ७ ॥
सप्तर्क्षं भवति । सप्तचितिकोऽग्निः सप्तर्त्तवः सप्त
दिशः सप्त देवलोकाः सप्त स्तोमाः सप्त पृष्ठानि
सप्त क्छन्दाꣳसि सप्त ग्राम्याः पशवः सप्तारण्याः
सप्त शीर्षन्न्प्राणा यत्किञ्च सप्तविधमधिदेवतमद्ध्यात्मं
तदेनेन सर्वमाप्नोति ता ऽअनुष्टुभमभिसम्पद्यन्ते वाग्वा-
ऽअनुष्टुब्वाचैवास्य तदाप्नोति यदस्य किञ्चानाप्तम् ॥ ८ ॥
अष्टर्क्षेनोपतिष्ठेतेत्यु हैक ऽआहुः । वयं ते ऽअद्य ररिमा
हि काममिति द्वितीयया कामवत्या सप्तपूर्वास्तदष्टा-
ष्टाक्षरा गायत्री गायत्रोऽग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा
तावतैवास्य तदाप्नोति यदस्य किञ्चानाप्तमथो ऽएवः
समं देवते भजेते ऽइति न तथा कुर्य्यादेता वाव सप्ता-
ष्टावनुष्टुभो भवन्ति स योऽष्टर्क्षे कामोऽत्रैव तमाप्नोति
॥ ९ ॥ ऐन्द्राग्नीभिरुपतिष्ठते । ऐन्द्राग्नोऽग्निर्य्यावानग्नि-
र्य्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किञ्चा-
नाप्तमिन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्य्यावानग्नि-
र्य्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किञ्चा-
नाप्तम् ॥१०॥ तद्धैके । कर्म्मणः कर्म्मण ऽएवैतां प्रतिपदं
कुर्वतेऽपहतपाप्मान ऽएतत्कर्म्म करवामहा ऽइति पुरीषवतीं
चितिं कृत्वोपतिष्ठेतेत्यु हैक ऽआहुस्तत्र हि सा सर्वा
कृत्स्ना भवतीति स यथा कामयेत तथा कुर्य्यादिति नु
चयनस्याथातोऽचयनस्य ॥ ११ ॥ त्रयो ह वै समुद्राः ।

अग्निर्ऋजुषां महाव्रतः सामन्नां महदुक्थमृचाꣳ स य ऽएतानि परस्मै करोत्येतान्ह स समुद्राञ्छोषयते ताञ्छुष्यतोऽन्वस्य छन्दाꣳसि शुष्यन्ति छन्दाꣳस्यनुलोको लोकमन्वात्मात्मानमनु प्रजा पशवः स ह श्वः-श्व ऽएव पापीयान्भवति य ऽएतानि परस्मै करोति ॥ १२ ॥ अथ य ऽएतान्यकृत्वा । परस्मा ऽअपि सर्वैरन्यैर्ऋ-ज्ञक्रतुभिर्ऋाजयेदेतेभ्यो ह्येवास्य समुद्रेभ्यश्छन्दाꣳसि पुनरापप्यायन्ते छन्दाꣳस्यनु लोको लोकमन्वात्मात्मान-मनु प्रजा पशवः स ह श्वः—श्व ऽएव श्रेयान्भवति य ऽएतानि परस्मै न करोत्यथैष ह वा ऽअस्य दैवोऽ-मृत ऽआत्मा स य ऽएतानि परस्मै करोत्येतः ह स दैवमात्मानं परस्मै प्रयच्छत्यथ शुष्क ऽएव स्थाणुः परिशिष्यते ॥ १३ ॥ तद्धैके । कृत्वा कुर्वते वा प्रति वा कारयन्त ऽएषा प्रायश्चित्तिरिति न तथा कुर्याद्यथा शुष्कꣳ स्थाणुमुदकेनाभिषिञ्चेत्तादृक्तत्पूयेद्वा वै स विं वा म्रियेन्नैतस्य प्रायश्चित्तिरस्तीत्येव विद्यात् ॥ १४ ॥ अथ ह स्माह शाण्डिल्यः । तुरो ह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकाय तः ह देवाः पप्रच्छुर्मुने यदलोक्या-मग्निचित्यामाहुरथ कस्मादचैषीरिति ॥ १५ ॥ स होवाच । किं नु लोक्यं किमलोक्यमात्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजो यत्र वा ऽआत्मा तदङ्गानि यत्रो ऽअङ्गानि तदात्मा यदि वा ऽऋत्विजोऽलोका भवन्त्यलोक ऽउ तर्हि यजमान ऽउ भूये हि समानलोका


भवन्ति दक्षिणासु त्वेव न संवदितव्यः संवादेनैव त्विजो ऽलोका ऽइति ॥ १६ ॥ (B)

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या ॥१०७॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

† सञ्चितिनाम नवमं काण्डं समाप्तम् ॥ ९ ॥



(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा--का० श० ११. ७. २; मै० सं० ११. १३. ११ ।

† अस्मिन् काण्डे कण्डिकासंख्या ॥ ४०२ ॥

अथाऽग्निरहस्यं *नाम दशमं काण्डम्

अस्मिन्काण्डे प्रतिपाद्या विषयाः— चितिसम्पत्तयः, चयनस्य सर्वयज्ञात्मना स्तुतिः, चित्यस्य पक्षपुच्छविचारः, सप्तविधाद्येकशतविधाग्नेर्वेदिमानादि, चयनकालादेर्विचारः, चित्याग्नेश्छन्दोभिः सहावयवसम्पत्तिः, संवत्सरादिमुहूर्तपर्यन्तं चयनसम्पत्तिः, यजुष्मतीलोकम्पृणानां सङ्ख्या, उपनिषद्रूपेणाग्न्युपासना, मनःसृष्टिविषयकविचारादि, अग्नेः सर्वतोमुखत्वम्, सम्प्रदायप्रवर्तकर्षिवंशकथनं, चेति ।

[चित्याग्नेः सम्वत्सररूपत्वम्, तस्य प्राजापत्यात्मना स्तुतिः, स्तोत्रशस्त्रस्तुतिश्च]

ॐ ॥ अग्निरेष पुरस्ताच्चीयते । संवत्सर ऽउपरिष्टान्महदुक्थः शस्यते प्रजापतेर्वित्रस्तस्याग्रः रसोऽगच्छत् ॥ १ ॥ स यः स प्रजापतिर्व्यस्रः सत । संवत्सरः सोऽथ यान्यस्य तानि पर्वाणि व्यस्रः सन्ताहोरात्राणि तानि ॥ २ ॥ स यः स संवत्सरः प्रजापतिर्व्यस्रः सत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्य तान्यहोरात्राणि पर्वाणि व्यस्रः सन्तेष्टका ऽएव तास्तद्यदेता-

---

* षष्ठादि-काण्डचतुष्टयेन प्रतिपादितकर्मणो भावनोपयोगितया अनुष्ठानाङ्गोपयुक्तकर्मप्रतिपादकतया च सर्वशेषत्वादस्य काण्डस्याऽग्निरहस्यमिति संज्ञा । रहसि भवं रहस्यम्, अग्निविषयं रहस्यज्ञानमित्यर्थः । तत्र अग्निशब्देन आहवनीयाधिकरणं सप्तपुरुषाद्येकशतपुरुषपरिमितं चितं क्षेत्रमभिधीयते 'इष्टकाभिरग्निं चिनोतीति श्रुतेः' तथाऽग्निमारोहति अग्निं प्रोक्षतीति च आरोहणप्रोक्षणे स्थलस्यैवोच्येते, तस्य चित्याग्नेरुपरि निधीयमान आहवनीयोऽग्निस्तत्कर्म च अग्निशब्देनोच्यते । तद्विषयं पूर्वमनुक्तमग्निमानादिकं तद्रहस्यं च ध्यानभागोऽस्मिन् काण्डे वक्ष्यत इति अग्निरहस्यमिति नामधेयं युक्तम् । (सा० भा०)

ऽउपदुधाति यान्येवास्य तान्यहोरात्राणि पर्वाणि व्यृद्धः-सन्त तान्यस्मिन्नेतत्प्रतिदधाति तदेतदुत्रैव यजुश्चित-मन्नाद्यम् ॥ ३ ॥ अथ योऽस्य सोऽग्रः रसोऽगच्छत्। महत्तदुक्थं तमस्य तः रसमृक्सामाभ्यामनु यन्ति तद्यत्तत्र यजुः पुरस्तादुत्यभिनेतैव तदेति यथादो मेऽमुत्रैकं तदाहरिष्यामीत्येवं तद्यजुः पुरस्तादेति तः संवत्सर ऽआप्नु-वन्ति ॥ ४ ॥ तमङ्गुर्ष्युग्ग्रहेण गृह्णाति। यद् गृह्णाति तस्माद् ग्रहस्तस्मिन्नुद्गाता महाव्रतेन रसन्दधाति सर्वाणि हैतानि सामानि यन्महाव्रतं तदस्मिन्त्सर्वैः सामभी रसन्दधाति तस्मिन्न्होता महतोक्थेन रसन्दधाति सर्वा हैता ऽऋचो यन्महदुक्थं तदस्मिन्त्सर्वाभिर्ऋग्भी रसन्दधाति ॥ ५ ॥ ते यदा स्तुवते यदानुशंसति। अथास्मिन्नेतं वषट्कृते जुहोति तदेनमेष रसोऽप्येति न वै महाव्रतमिदः स्तुतः शेत ऽइति पश्यन्ति नो महदिदमुक्थमित्यग्निमेव पश्यन्त्यात्मा ह्यग्निस्तदेनमेते ऽउभे रसो भूत्वापीत ऽऋक्च साम च तदुभे ऽऋक्सामे यजुरपीतः ॥ ६ ॥ स ऽएष मिथुनोऽग्निः। प्रथमा च चितिर्द्वितीया च तृतीया च चतुर्थी चाथ पञ्चम्यै चितेर्य इच्चितेऽग्निर्न्निधीयते तन्मिथुनं मिथुन ऽउ ऽएवायमात्मा ॥ ७ ॥ अङ्गुष्ठा-ऽइति पुमाꣳसः। अङ्गुलय ऽइति स्त्रियः कर्ण्णाविति पुमाꣳसौ भ्रुवाविति स्त्रिया ऽओष्ठाविति पुमाꣳसौ नासिके ऽइति स्त्रियौ दन्ता ऽइति पुमाꣳसो जिह्वेति स्त्री सर्व ऽएव मिथुनः सोऽनेन मिथुनेनात्मनैतं मिथुन-

मग्निमप्प्येति ॥ ८ ॥ एषाऽग्नापीतिः । अप्प्यु ह्वै वम्मिथुन-ऽइत्थुः हु स्वेवापि मिथुनो वागेवेयँ स्योऽयमग्निश्चितो वाचा हि चीयतेऽथ यश्चितेऽग्निर्न्निधीयते स प्राणः प्राणो वै वाचो व्वृषा प्राणो मिथुनं वाग्ग्वेवायमात्माथ य ऽआत्मन्प्राणस्तन्न्मिथुनः सोऽनेन मिथुनेनात्मनैत-म्मिथुनमग्निमप्प्येति ॥ ९ ॥ एषो ऽअग्नापीतिः । न ह वा ऽअस्यापुत्रतायै का चन शङ्का भवति य ऽएवमेतौ मिथुनावात्मानञ्चाग्निञ्च वेदान्नः हु स्वेवायमात्मा-दक्षिणान्नँ वनुते यो न ऽआत्मेति ह्यप्प्यृषिणाऽभ्युक्तम् ॥ १० ॥ तदिदमन्नञ्जग्धन्द्वेधा भवति । यदस्यामृतमूर्द्ध तन्नाभेरूर्द्धैः प्राणैरुच्चरति तद्द्वायुमप्प्येत्यथ यन्मर्त्य-म्पराक् तन्नाभिमत्येति तद्द्वयम्भूत्वेमामप्प्येति मूत्रञ्च पुरीषञ्च तद्यदिमामप्प्येति योऽयमग्निश्चितस्तन्तदुप्प्ये-त्यथ यद्द्वायुमप्प्येति यश्चितेऽग्निर्न्निधीयते तन्तदुप्प्येत्येषो ऽएवाग्नापीतिः ॥ ११ ॥ (A)

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[चितिसम्पत्तयः]

प्प्रजापतिरिमाँल्लोकानैप्प्सत् । स ऽएतँ व्वयोविध-मात्मानमपश्यदग्निन्तँ व्व्यधत्त तेनेमाँल्लोकमाप्नोत्स द्द्वितीयं व्वयोविधमात्मानमपश्यन्महाव्रतन्तद्व्यधत्त ते-

(A) एतद्ब्राह्मणस्था विप्रया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. १. १ ।

नान्तरिक्षमाप्नोत्स तृतीयं व्रयोविधमात्मानमपश्यन्महदुक्थं तद्व्यधत्त तेन दिवमाप्नोत् ॥ १ ॥ अयं वाव लोक ऽएषोऽग्निश्चितः । अन्तरिक्षम्महाव्रतं द्यौर्म्महदुक्थं तस्मादेतानि सर्वाणि सहोपेयादग्निम्महाव्रतम्महदुक्थः सह हीमे लोका ऽअसृज्यन्त तद्यदग्निः प्रथमश्चीयतेऽयꣳ ह्येषाँल्लोकानाम्प्रथमोऽसृज्यतेत्यधिदेवतम् ॥ २ ॥ अथाध्यात्मम् । मन ऽएवाग्निः प्राणो महाव्रतं वाङ्महदुक्थन्तस्मादेतानि सर्वाणि सहोपेयात्सह हि मनः प्राणो वाक्तद्यदग्निः प्रथमश्चीयते मनो हि प्रथमम्प्राणानाम् ॥ ३ ॥ आत्मैवाग्निः । प्राणो महाव्रतं वाङ्महदुक्थन्तस्मादेतानि सर्वाणि सहोपेयात्सह ह्यात्मा प्राणो वाक्तद्यदग्निः प्रथमश्चीयत ऽआत्मा हि प्रथमः सम्भवतः सम्भवति ॥ ४ ॥ शिर ऽएवाग्निः । प्राणो महाव्रतमात्मा महदुक्थन्तस्मादेतानि सर्वाणि सहोपेयात्सह हि शिरः प्राण ऽआत्मा तद्यदग्निः प्रथमश्चीयते शिरो हि प्रथमञ्जायमानस्य जायते तस्माद्यत्रैतानि सर्वाणि सह क्रियन्ते महदेवोक्थमातमां ख्यायत ऽआत्मा हि महदुक्थम् ॥ ५ ॥ तदाहुः । यदेतानि सर्वाणि सह दुरुपापानि कैतेषामुपाप्तिरिति ज्योतिष्टोम ऽएवाग्निष्टोमे ज्योतिष्टोमेनैवाग्निष्टोमेन यजेत ॥ ६ ॥ तस्य वा ऽएतस्य ज्योतिष्टोमस्याग्निष्टोमस्य । त्रिवृद्बहिष्पवमानं तद् व्रतस्य शिरः पञ्चदशसप्तदशा ऽउत्तरौ पवमानौ तौ पक्षौ पञ्चदशः होतु-

राज्यꣳ सप्तदशं पृष्ठमेकविꣳशꣳ स्यज्ञायज्ञियं तत्पुच्छम् ॥ ७ ॥ तयोर्वा ऽएतयोः । पञ्चदशसप्तदशयोर्द्वात्रिꣳशत्स्तोत्रियास्ततो याः पञ्चविꣳशतिः स पञ्चविꣳश ऽआत्माथ याः सप्तातियन्ति ताः परिमादः पशवो हैताः पशवः परिमाद ऽएतावद्वै महाव्रतन्तदेतदुत्रैव महाव्रतमाप्नोति ॥ ८ ॥ अथ होता सप्त छन्दाꣳसि शꣳसति । चतुरुत्तराण्येकर्चानि विराडष्टमानि तेषां तिस्रश्चाशीतयोऽक्षराणि पञ्च चत्वारिꣳशच्च ततो या ऽअशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यानि पञ्चचत्वारिꣳशत्ततो यानि पञ्चविꣳशतिः स पञ्चविꣳश ऽआत्मा यत्र वा ऽआत्मा तदेव शिरस्तत्पक्षपुच्छाभ्यथ यानि विꣳशतिस्तदावपनमेतावद्वै महदुक्थन्तदेतदुत्रैव महदुक्थमाप्नोति तानि वा ऽएतानि सर्वाणि ज्योतिष्टोम ऽएवाग्निष्टोम ऽआप्यन्ते तस्मादु ज्योतिष्टोमेनैवाग्निष्टोमेन यजेत ॥ ९ ॥ (B)

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[प्रजापतेर्मर्त्यामृतादि-कृत्स्नशरीरसम्पादकत्वेन स्तुतिः]

प्रजापतिः प्रजा ऽअसृजत । स ऽऊर्द्ध्वेभ्य ऽएव प्राणेभ्यो देवानसृजत येऽवाञ्चः प्राणास्तेभ्यो मर्त्याः प्रजा ऽअथोर्द्ध्वमेव मृत्युम्प्रजाभ्योऽत्तारमसृजत ॥ १ ॥

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० ब्रा० १२. १२ ।

तस्य ह प्रजापतेः । अर्द्धमेव मर्त्यमासीदर्द्धममृतन्तद्यदस्य मर्त्यमासीत्तेन मृत्योरबिभेत्स बिभ्यदिमाम्प्राविशद् द्वयम्भूत्वा मृच्चापश्च ॥ २ ॥ स मृत्युर्देवानब्रवीत् । क्व नु सोऽभूद्यो नोऽस्मृष्टेति त्वद्बिभ्यदिमाम्प्राविक्षदिति सोऽब्रवीत्तँ वा ऽअन्विच्छाम तः सम्भराम न वा ऽअहं तः हिꣳसिष्यामीति तन्देवा ऽअस्याऽअधि समभरन्यदस्याप्स्वासीत्ता ऽअपः समभरन्नथ यदस्यान्ताम्मृदं तदुभयः सम्भृत्य मृदश्चापश्चेष्टकामकुर्वꣳस्तस्मादेतदुभयमिष्टका भवति मृच्चापश्च ॥ ३ ॥ तदेता वा ऽअस्य ताः । पञ्च मर्त्यास्तन्व ऽआसँल्लोम त्वङ्मा ऽसमस्थि मज्जाथैता ऽअमृता मनो वाक्प्राणश्चक्षुः श्रोत्रम् ॥ ४ ॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ या ऽअस्य ताः पञ्च मर्त्यास्तन्व ऽआसन्नेतास्ताः पुरीषचितयोऽथ या ऽअमृता ऽएतास्ता ऽइष्टकाचितयः ॥ ५ ॥ ते देवा ऽअब्रुवन् । अमृतमिमं करवामेति तस्यैताभ्याममृताभ्यान्तनूभ्यामेताम्मर्त्यान्तनूम्परिगृह्यामृतामकुर्वन्निष्टकाचिति भ्याम्पुरीषचितिन्तथा द्वितीयान्तथा तृतीयान्तथा चतुर्थीम् ॥ ६ ॥ अथ पञ्चमीञ्चितिमुपधाय । पुरीषन्निवपति तत्र विकर्णीश्च स्वयमातृण्णाश्चोपदधाति हिरण्मयशकलैः प्रोक्षत्यग्निमभ्यादधाति सा सप्तमी चितिस्तदमृतमेवमस्यैताभ्यामृताभ्यान्तनूभ्यामेताम्मर्त्यान्तनूम्परिगृह्यामृतामकुर्वन्निष्टकाचितिभ्याम्पुरीषचितिं ततो वै प्रजापतिरमृतोऽभवत्तथैवैतद्यजमान ऽएतममृतमात्मानङ्कृत्वा सोऽमृतो भवति ॥ ७ ॥

ते वै देवास्तन्नाविदुः । मध्येनः सर्वं वाकुर्वन्न वा सर्वं ऋष्यति वारेचयन्न वाभ्यापयँस्त ऽएतामृचमपश्यन्[1]धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वेदेवा यज्ञम्प्रावन्तु नः शुभ' ऽइति ॥ ८ ॥ तस्या ऽअस्त्येवाग्नेयम् । अस्त्यैन्द्रमस्ति वैश्वदेवन्तद्यदस्या ऽआग्नेयं ऋष्यदेवैतस्याग्नेराग्नेयन्तदस्य तेन समस्कुर्वन्नृष्यदैन्द्रं तदैन्द्रेण यद्वैश्वदेवन्तद्वैश्वदेवेन तमन्नैव सर्वङ्कृत्स्नः समस्कुर्वन् ॥ ९ ॥ * तद्यदेतयोपतिष्ठते । यदेवास्यात्र विद्वान्न्वाविद्वान्न्वाति वा रेचयति न वाभ्यापयति तदेवास्यैतया सर्वमाप्नोति यदस्य किञ्चानाप्तमनुष्टुब्धामच्छद्भवति वाग्वा ऽअनुष्टुब्वाग्धामच्छद्वाचैवास्य तदाप्नोति यदस्य किञ्चानाप्तम्पुरीषवतीञ्चितिङ्कृत्वोपतिष्ठेतेत्यु हैक ऽआहुस्तत्र हि सा सर्वा कृत्स्ना भवतीति ॥ १० ॥ तदु वा ऽआहुः । यविष्ठवत्यैवोपतिष्ठेतैतद्वास्य प्रियन्धाम यद्यविष्ठ ऽइति तद्यदस्य प्रियन्धाम तेनास्य तदाप्नोति यदस्य किञ्चानाप्तमाग्नेऋषाग्निकर्म्म हि गायत्र्या गायत्रोऽग्निर्ऋषावानग्निर्ऋषावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किञ्चानाप्तमनिरुक्तया सर्वं वा ऽअनिरुक्तः सर्वेणैवास्य तदाप्नोति यदस्य किञ्चानाप्तं 'त्वं ऋषविष्ठ दाशुष' ऽइति तस्योक्तो बन्धुः

(१) शु० य० सं० अ० १८ क० ७६।

* "एत्य च त्वं यविष्ठेति चित्योपस्थानम्" (का० श्रौ० सू० १७. ६. १)।

(२) शु० य० सं० अ० १८ क० ७७।

पुरीषवतीञ्चितिङ्कृत्वोपतिष्ठेत तत्र हि सा सर्वा कृत्स्ना भवति ॥ ११ ॥ (C)

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[प्रजापतेर्मरणधर्मकस्थूलशरीरगतमज्जादिरूपत्वेन हिरण्यरूपत्वेन देवानामन्नरूपत्वेन च स्तुतिः, पक्षिभक्षणवर्जनं व्रतञ्च]

उभयꣳ हैतदग्रे प्रजापतिरास । मर्त्यश्चैवामृतश्च तस्य प्राणा ऽएवामृता ऽआसुः शरीरम्मर्त्यः स ऽएतेन कर्म्मणैतयावृतैकधाजरममृतमात्मानमकुरुत तथैवैतद्यजमान ऽउभयमेव भवति मर्त्यञ्चैवामृतञ्च तस्य प्राणा ऽएवामृता भवन्ति शरीरम्मर्त्यः स ऽएतेन कर्म्मणैतया वृतैकधाजरममृतमात्मानङ्कुरुते ॥ १ ॥ स प्रथमाञ्चितिञ्चिनोति । सा हास्यैषा प्राण ऽएव तद्वै तदमृतममृतꣳ हि प्राणः सैषामृतचितिरथ पुरीषन्निवपति तद्धास्यैतन्मज्जैव तद्वै तन्मर्त्यम्मर्त्यो हि मज्जा तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ २ ॥ द्वितीयाञ्चितिञ्चिनोति । सा हास्यैषापान ऽएव तद्वै तदमृतममृतꣳ ह्यपानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतम्भवत्यथ पुरीषन्निवपति तद्धास्यैतदुस्थ्येव तद्वै तन्मर्त्यम्मर्त्यꣳ ह्यस्थि तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ ३ ॥ तृतीयाञ्चितिञ्चिनोति । सा हास्यैषा व्यान ऽएव तद्वै

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. १. १; मै० सं० ११. १३. ११, तै० सं० १. ५. ११,१; ऋ० सं० ६८. २ ।

तदमृतममृतः हि व्यानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतम्भवत्यथ पुरीषन्निवपति तद्धास्यैतत्स्नावैव तद्वै तन्मर्त्यम्मर्त्यः हि स्नाव तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ ४ ॥ चतुर्थीश्चितिश्चिनोति । सा हास्यैषोदान ऽएव तद्वै तदमृतममृतꣳ ह्युदानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतम्भवत्यथ पुरीषन्निवपति तद्धास्यैतन्माꣳसमेव तद्वै तन्मर्त्यम्मर्त्यः हि माꣳसं तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ ५ ॥ पञ्चमीश्चितिञ्चिनोति । सा हास्यैषा समान ऽएव तद्वै तदमृतममृतः हि समानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतम्भवत्यथ पुरीषन्निवपति तद्धास्यैतन्मेद ऽएव तद्वै तन्मर्त्यम्मर्त्यः हि मेदस्तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ ६ ॥ षष्ठीञ्चितिञ्चिनोति । सा हास्यैषा वागेव तद्वै तदमृतममृतः हि वाक्सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतम्भवत्यथ पुरीषन्निवपति तद्धास्यैतदुस्रगेव स्वगेव तद्वै तन्मर्त्यम्मर्त्यꣳ ह्यस्रङ्मर्त्या स्वक्तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतम्भवति ॥ ७ ॥ ता वा ऽएताः । षडिष्टकाचितयः षट् पुरीषचितयस्तद् द्वादश द्वादश मासाः सँवत्सरः सँवत्सरोऽग्निर्ऋर्षावानग्निर्ऋर्षावत्यस्य मात्रा तावतैव तत्प्रजापतिरेक-

धाजरममृतमात्मानमकुरुत तथैवैतद्यजमान ऽएकधाजरममृतमात्मानङ्कुरुते ॥ ८ ॥ अथ विकर्णीश्च स्वयमातृण्णाञ्चोपधाय । हिरण्मयशकलैः प्रोक्षत्यग्निमभ्यादधाति रूपमेव तत्प्रजापतिर्हिरण्मयमन्तत ऽआत्मनोऽकुरुत तद्यदन्ततस्तस्मादिदमन्त्यमात्मनो रूपन्तस्मादाहुर्हिरण्मयः प्रजापतिरिति तथैवैतद्यजमानो रूपमेव हिरण्मयमन्तत ऽआत्मनः कुरुते तद्यदन्ततस्तस्मादिदमन्त्यमात्मनो रूपं तस्माद्ये चैतद्विदुर्ये च न हिरण्मयोऽग्निश्चिदमुष्मिँल्लोके सम्भवतीत्येवाहुः ॥ ९ ॥ तद्धैतच्छाण्डिल्यश्च साप्तरथवाहणिश्च । आचार्य्यान्तेवासिनौ व्ययूदाते रूपमेवास्यैतदिति ह स्माह शाण्डिल्यो लोमानीति साप्तरथवाहणिः ॥ १० ॥ स होवाच शाण्डिल्यः । रूपं वाव लोमवद्रूपमलोमकः रूपमेवास्यैतदिति तद्वै तत्तथा यथा तच्छाण्डिल्य ऽउवाच सञ्चितेऽग्निः प्रणीयते प्रणीतादूर्द्धः समिध ऽआहुतय ऽइति हूयन्ते ॥ ११ ॥ प्राणेन वै देवा ऽअन्नमदन्ति । अग्निरु देवानाम्प्राणस्तस्मात्प्राग्देवेभ्यो जुह्वति प्राणेन हि देवा ऽअन्नमदन्त्यपानेन मनुष्या ऽअन्नमदन्ति तस्मात्प्रत्यङ्ङ्मनुष्येष्वन्नन्धीयतेऽपानेन हि मनुष्या ऽअन्नमदन्ति ॥ १२ ॥ तदाहुः । न वयसोऽग्निञ्चिदश्नीयाद्वयो वा ऽएष रूपम्भवति योऽग्निञ्चिनुत ऽईश्वर ऽआर्त्तिमार्त्तोस्तस्मान्न वयसोऽग्निञ्चिदश्नीयादिति तद्वै काममेवैवंविदश्नीयादग्नेर्वा ऽएष रूपम्भवति योऽग्निञ्चिनुते सर्वं वा ऽइदमग्नेरन्नः सर्वं म

ऽइदमन्नमित्येवैवँविद्विद्यादिति ॥ १३ ॥ तदाहुः । किन्तदग्नौ क्रियते येन यजमानः पुनर्म्मृत्युमपजयतीत्यग्निर्व्वा ऽएष देवता भवति योऽग्निश्चिनुतेऽमृतमु वा ऽअग्निः श्रीर्देवाः श्रियङ्गच्छति यशो देवा यशो ह भवति य ऽएवँवेद ॥ १४ ॥ (D)

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[अग्निचयनस्य अग्न्याधेयादिसर्वयज्ञात्मकत्वम्]

सर्वे हैते यज्ञा योऽयमग्निश्चितः । स यत्पशुमालभते तदग्न्याधेयमथ यदुखाꣳ सम्भरति ताभ्यग्न्याधेयहवीꣳष्यथ यद्दीक्षते तदग्निहोत्रमथ यद्दीक्षितः समिधावादधाति ते ऽअग्निहोत्राहुती ॥ १ ॥ ते वै सायम्प्रातरादधाति । सायम्प्रातर्ह्यग्निहोत्राहुती जुह्वति समानेन मन्त्रेण समानेन हि मन्त्रेणाग्निहोत्राहुती जुह्वत्यथ यद्दर्व्वीवाहनश्च भस्म्मनश्चाभ्यवहरणन्तौ दर्शपूर्णमासावथ यद्गार्हपत्यश्चिनोति तानि चातुर्म्मास्यान्यथ यदूर्द्ध्वङ्गार्हपत्यादा सर्व्वौषधात्ता ऽइष्टयोऽथ यदूर्द्ध्वः सर्व्वौषधात्प्राचीनश्चिति-भ्यस्ते पशुबन्धा य ऽएवैतेषु यज्ञेषु विष्णुक्रमास्ते विष्णुक्रमा यज्ञप्यन्तद्वात्सप्रम् ॥ २ ॥ सौम्योऽद्धरः प्रथमा चितिः । यत्प्राचीनः सर्वेभ्यो राजसूयो द्वितीया वाजपेयस्तृतीयाश्वमेधश्चतुर्थ्यग्निसवः पञ्चमी यैश्चितः

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. १. ४।

सामभिः परिगायति तन्महाव्रतमथ यत्तत्रोद्गातुः पुरस्ताज्ज्योत्यन्तच्छतरुद्रियं वसोर्द्धारा महदुक्थमथ यदूर्द्ध्वः सामभ्यः प्राचीनं वसोर्द्धारायै यदेव तत्र होतुः पुरस्ताज्ज्योत्यन्तत्तदथ यदूर्द्ध्वं वसोर्द्धारायै ते गृहमेधा ऽएतावन्तो वै सर्वे यज्ञास्तानग्निनाप्नोति ॥ ३ ॥ अथातो यज्ञवीर्य्याणामेव। सायम्प्रातर्ह वा ऽअमुष्मिँल्लोकेऽग्निहोत्रहुदश्नाति तावती ह तस्मिन्नयज्ञ ऽऊर्ग्गर्द्धमासेऽर्द्धमासे दर्शपूर्णमासयाजी चतुर्षु-चतुर्षु मासेषु चातुर्म्मास्ययाजी षट्सु षट्सु पशुबन्धयाजी सँवत्सरे सँवत्सरे सोमयाजी शते-शते सँवत्सरेष्वग्निचित्कामम श्नाति कामन्न तद्धैतद्यावच्छतः सँवत्सरास्तावदमृतमनन्तमपर्य्यन्तः स यो हैतदेवं वेदैवः हैवास्यैतदमृतमनन्तमपर्य्यन्तम्भवति तस्य यदुपीषीकयेवोपहन्यात्तदेवास्यामृतमनन्तमपर्य्यन्तम्भवति ॥ ४ ॥ (E)

प्रथमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

[चित्याग्नेः पक्षिरूपत्वम्, तत्पक्षपुच्छयोः प्रमाणं च]

प्रजापतिः स्वर्गँल्लोकमजिगाꣳसत्। सर्वे वै पशवः प्रजापतिः पुरुषोऽश्वो गौरविजः स ऽएतै रूपैर्न्नाशक्नोत्स ऽएतं त्रयोविधमात्मानमपश्यदग्निनन्तं व्यधत्त

(E) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा--का० श० १२. १. ५।

सोऽनुपसमुह्यानुपाधायोदपिपतिषत्सु नाशक्नोत्सु ऽउपसमुह्योपाधायोदपतत्तस्माद्दुप्प्येतर्हि ब्रयाꣳसि यदैव पक्षा ऽउपसमूहन्ते यदा पत्राणि विसृजन्तेऽथोत्पतितुꣳ शक्नुवन्ति ॥ १ ॥ तँवा ऽअङ्गुलिभिर्म्मिमीते। पुरुषो वै यज्ञस्तेनेदꣳ सर्वम्मितन्तस्यैषावमा मात्रा यदङ्गुलयस्तद्यास्यावमा मात्रा तामस्य तदाप्नोति तयैनन्तन्मिमीते ॥ २ ॥ चतुर्विꣳशत्याङ्गुलिभिर्म्मिमीते। चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रोऽग्निरूर्ग्वानग्निरूर्ग्वत्यस्य मात्रा तावतैवैनन्तन्मिमीते ॥ ३ ॥ स चतुरङ्गुलमेवोभयतोऽन्तरत ऽउपसमूहति। चतुरङ्गुलमुभयतो वाह्यतो व्यूदूहति तद्यावदेवोपसमूहति तावद्व्यूदूहति तन्नाहैवातिरेचयति नो कनीयः करोति तथा पुच्छस्य तथोत्तरस्य पक्षस्य ॥ ४ ॥ अथ निर्ण्णामौ पक्षयोः करोति। निर्ण्णामौ हि ब्रयसः पक्षयोर्भवतो वितृतीये वितृतीये हि ब्रयसः पक्षयोर्न्निर्ण्णामौ भवतोऽन्तरे वितृतीयेऽन्तरे हि वितृतीये ब्रयसः पक्षयोर्न्निर्ण्णामौ भवतः स चतुरङ्गुलमेव पुरस्तादुदूहति चतुरङ्गुलम्पश्चादुपसमूहति तद्यावदेवोदूहति तावदुपसमूहति तन्नाहैवातिरेचयति नो कनीयः करोति ॥ ५ ॥ स तस्मिन्निर्ण्णामे। एकामिष्टकामुपदधाति तद्येयं ब्रयसः पततो निर्ण्णामादेका नाद्युपशेते तान्तत्करोत्यथो ऽइदम् ॥ ६ ॥ अथ वक्रौ पक्षौ करोति। वक्रौ हि ब्रयसः पक्षौ भवतः स चतुरङ्गुलमेव पश्चादुदूहति चतुरङ्गुलम्पुरस्तादुपसमूहति तद्यावदेवोदूहति तावदुपसमूहति तन्नाहैवातिरेचयति

नो कनीयः करोति ॥ ७ ॥ अथ रूपमुत्तमङ्करोति । अत्रैष सर्वोऽग्निः सँस्कृतस्तस्मिन्देवा ऽएतद्रूपमुत्तममदधुस्तथैवास्मिन्नयमेतद्रूपमुत्तमन्दधाति स सहस्रमृज्वालिखिता ऽइष्टकाः करोति सहस्रमित्यालिखिताः सहस्रमित्यलिखिताः ॥ ८ ॥ अथ पञ्चमीश्चितिमुपधाय । त्रेधाग्निं विमिमीते स मध्यमे वितृतीये सहस्रमृज्वालिखिता ऽइष्टका ऽउपदधाति तद्यानीमानि वयसः प्रत्यञ्चि शीर्ष्ण ऽआपुच्छादृजूनि लोमानि तानि तत्करोति ॥९॥ अथ सहस्रमित्यालिखिता दक्षिणत ऽउपदधाति । तद्यानीमानि वयसो दक्षिणतो वक्राणि लोमानि तानि तत्करोति ॥ १० ॥ अथ सहस्रमित्यालिखिता ऽउत्तरत ऽउपदधाति । तद्यानीमानि वयस ऽउत्तरतो वक्राणि लोमानि तानि तत्करोति सहस्रेण सर्वं वै सहस्रः सर्वेणैवास्मिन्नेतद्रूपमुत्तमन्दधाति त्रिभिः सहस्रैस्त्रिवृदग्निर्य्यावानग्निर्य्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्रूपमुत्तमन्दधाति ॥ ११ ॥ (A)

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

चित्याग्नेः सप्तपुरुषप्रमाणत्वम्, पक्षपुच्छयोश्चारत्नि-वितस्तिप्रमाणत्वम्]

यान्वै तान्त्सप्त पुरुषान् । एकम्पुरुषमकुर्वन्त्स प्रजापतिरभवत्स प्रजा ऽअसृजत स प्रजाः सृष्ट्वोर्द्ध ऽउदक्रामत्स ऽएतँल्लोकमगच्छद्यत्रैष ऽएतत्तपति नो ह तर्ह्यन्य ऽएतस्मादुत्र यज्ञिय ऽआस तन्देवा यज्ञेनैव

(A) एतद्ब्राह्मणस्थाविषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रा० १२. २. १ ।

ष्टुमद्भ्रियन्त ॥ १ ॥ तस्मादेतदृषिणाऽभ्यनूक्तम् । 'यज्ञेन[1] यज्ञमयजन्त देवा, ऽइति यज्ञेन हि तँऽयज्ञमयजन्त 'देवास्तानि[2] धर्म्माणि प्रथमान्यासन्नि'ति ते हि धर्म्माः प्रथमेऽक्रियन्त 'ते[3] ह नाकम्महिमानः सचन्ते'ति स्वर्गो वै लोको नाको देवा महिमानस्ते देवाः स्वर्गँल्लोकꣳ सचन्त ये तँऽयज्ञमयजन्नित्येतत् ॥ २ ॥ 'यत्र[4] पूर्वे साध्याः सन्ति देवा' ऽइति । प्राणा वै साध्या देवास्त ऽएतमग्र ऽएवमसाधयन्नेतदेव बुभूषन्तस्त ऽउ ऽएवाप्ये-तर्हि साधयन्ति पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूनेति पश्चाहैवेदमन्यद्यज्ञियमास यत्किञ्चामृतम् ॥ ३ ॥ ॥ ३ ॥ सुपर्णो ऽअङ्ग सवितुर्गरुत्मान् । पूर्वो जातः स ऽउ ऽअस्यानु धर्म्मेति प्रजापतिर्वै सुपर्णो गरुत्मानेष सवितैतस्य प्रजापतिरनु धर्म्ममित्येतत् ॥ ४ ॥ स वै सप्तपुरुषो भवति । सप्तपुरुषो ह्ययम्पुरुषो यच्चत्वार ऽआत्मा त्रयः पक्षपुच्छानि चत्वारो हि तस्य पुरुषस्यात्मा त्रयः पक्षपुच्छानि ॥ ५ ॥ तँवा ऽउद्द्वाहुना पुरुषेण मिमीते । पुरुषो वै यज्ञस्तेनेदꣳ सर्वम्मितन्तस्यैषा परमा मात्रा यदुद्द्वाहुस्तद्यास्य परमा मात्रा तामस्य तदाप्नोति तयैनन्तस्मिन्मिमीते तत्रोप यत्प्रपदेनाऽभ्युच्छ्रितो भवति तत्परिश्रिद्भिराप्नोति तस्मादु बाह्येनैव लेखाम्परिश्रि-त्त्रयः खनेत् ॥ ६ ॥ अथ पक्षयोररत्नी ऽउपादधाति ।

(१) शु० य० सं० अ० ३१ क० १६ । (२) शु० य० सं० अ० ३१ क० १६ । (३) शु० य० सं० अ० ३१ क० १६ । (४) शु० य० सं० अ० ३१ क० १६ ।

पक्षयोस्तद्द्वीर्ष्यन्दधाति बाहू वै पक्षौ बाहुभ्यामु वा ऽअन्नमद्यतेऽन्नायैव तमवकाशङ्करोति तद्यत्पक्षयोररत्नी ऽउपादुधात्यरत्निमात्राण्यन्नमद्यते ॥ ७ ॥ अथ पुच्छे व्रितस्तिमुपादधाति । प्रतिष्ठ्यायान्तद्द्वीर्ष्यन्दधाति प्रतिष्ठा वै पुच्छꣳ हस्तो व्रितस्तिर्हस्तेन वा ऽअन्नमद्यतेऽन्नायैव तमवकाशङ्करोति तद्यत्पुच्छे व्रितस्तिमुपादुधात्यन्न ऽएवैनन्तत्प्रतिष्ठापयति तद्यत्तत्र कनीय ऽउपादुधात्यन्ने ह्येवैनन्तत्प्रतिष्ठापयत्यथो ऽएतावद्वा ऽइदम्मितम्भवत्येतावदिदन्तद्यदेवम्मिमीत ऽएतस्यैवाप्त्यै ॥ ८ ॥ (B)

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[प्राकृतस्य सप्तविधाग्नेर्वैकृतस्यैकशतविधाग्नेश्च वेदिमानम्]

या वा ऽइयँव्वेदिः सप्तविधस्य । एषा व्वेदेर्म्मात्रा स देवयजनमद्ध्यवसाय पूर्व्वया द्वारा पत्नीशालम्प्रपद्य गार्हपत्यायोद्धत्यावोक्षति गार्हपत्यस्योद्धतात्सप्त प्राचः प्रक्रमान्प्रक्रामति ततः प्राञ्चं व्यामं व्रिमिमीते तस्य मद्ध्य ऽआहवनीयायोद्धत्यावोक्षति पूर्व्वार्द्धाद्व्यामस्य त्रीन्प्राचः प्रक्रमान्प्रक्रामति स व्वेद्यन्तः ॥ १ ॥ * ते वा ऽएते । व्यामैकादशाः प्रक्रमा ऽअन्तरा व्वेद्यन्तश्च गार्हपत्यश्चैकादशाक्षरा त्रिष्टुब्व्रज्रस्त्रिष्टुब्व्वीर्ष्यन्त्रिष्टुब्व्रज्रो-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. २, २; ऋ० सं० २. ३. २३ ॥


* अन्नाद्यतम् ५२०० ।

णैवैतद्वीर्य्येण यजमानः पुरस्ताद्यज्ञमुखाद्रक्षाꣳसि नाष्ट्रा ऽअपहन्ति ॥ २ ॥ सैषा वेदेर्योनिः । एतस्यै वै योनेर्देवा वेदिम्प्राजनयन्नथ य ऽएष व्यामः सा गार्हपत्यस्य योनिरेतस्यै वै योनेर्देवा गार्हपत्यम्प्राजनयन्न्गार्हपत्यादाहवनीयम् ॥ ३ ॥ स वेद्यन्तात् । षट्त्रिꣳशत्प्रक्रमाम्प्राचीं वेदिं विमिमीते त्रिꣳशतम्पश्चात्तिरश्ची श्चतुर्विꣳशतिम्पुरस्तात्तन्नवतिः सैषा नवतिष्प्रक्रमा वेदिस्तस्याꣳ सप्तविधमग्निं विदधाति ॥ ४ ॥ तदाहुः । कथमेष सप्तविध ऽएतया वेद्या सम्पद्यत ऽइति दश वा ऽइमे पुरुषे प्राणाश्चत्वार्यङ्गान्यात्मा पञ्चदश ऽएवन्द्वितीय ऽएवन्तृतीये षट्सु पुरुषेषु नवतिरथैकः पुरुषोऽत्येति पाङ्क्तो वै पुरुषो लोम त्वङ्मꣳसमस्थि मज्जा पाङ्क्तो ऽइयं वेदिश्चतस्रो दिश ऽआत्मा पञ्चम्येवमेष सप्तविध ऽएतया वेद्या सम्पद्यते ॥ ५ ॥ तद्वैके । उत्तरा विधा विधास्यन्त ऽएताँश्च प्रक्रमानेतञ्च व्यायमनुवर्द्धयन्ति योनिमनुवर्द्धयाम ऽइति न तथा कुर्य्यान्न वै जातङ्गर्भं स्योनिरनुवर्द्धते यावद्वाव योनावन्तर्गर्भो भवति तावदेव योनिर्वर्द्धत ऽएतावत्त्यु वा ऽअत्र गर्भस्य व्वृद्धिः ॥ ६ ॥ ते ये ह तथा कुर्व्वन्ति । एतꣳ ह ते पितरम्प्रजापतिꣳ सम्पदश्च्यावयन्ति त ऽइष्ट्वा पापीयाꣳसो भवन्ति पितरꣳ हि प्रजापतिꣳ सम्पदश्च्यावयन्ति सा यावत्त्येषा सप्तविधस्य वेदिस्तावतीश्चतुर्दश कृत्व ऽएकशतविधस्य वेदिं विमिमीते ॥ ७ ॥ अथ षट्त्रिꣳशत्प्रक्रमाꣳ रज्जुम्मिमीते ।

ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्प्राच ऽउपदुधाति निःसृजति चतुरः ॥ ८ ॥ अथ त्रिःशत्प्रक्रमाम्मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पश्चादुपदुधाति निःसृजति चतुरः ॥ ९ ॥ अथ चतुर्विंः शतिप्रक्रमाम्मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पुरस्तादुपदुधाति निः सृजति चतुर ऽइति नु वेदिविमानम् ॥ १० ॥ अथाग्नेर्विधाः । अष्टाविꣳशतिः प्राञ्चः पुरुषा ऽअष्टाविꣳशतिस्तिर्य्यञ्चः स ऽआत्मा चतुर्दश पुरुषा दक्षिणः पक्षश्चतुर्दशोत्तरश्चतुर्दश पुच्छश्चतुर्दशारत्नीन्दक्षिणे पक्ष ऽउपदुधाति चतुर्दशोत्तरे चतुर्दश वितस्तीः पुच्छ ऽइति न्वष्टानवतेः पुरुषाणाम्मात्रा साधिमानानाम् ॥ ११ ॥ अथ त्रिपुरुषाꣳ रज्जुम्मिमीते । ताꣳ सप्तधा समस्यति तस्यै चतुरो भागानात्मन्नुपदुधाति त्रीन्पक्षपुच्छेषु ॥ १२ ॥ अथारत्निमात्रीम्मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्दक्षिणे पक्ष ऽउपदुधाति त्रीनेवोत्तरे निःसृजति चतुरः ॥ १३ ॥ अथ वितस्तिमात्रीम्मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पुच्छ ऽउपदुधाति निःसृजति चतुर ऽएवमेष ऽएकशतविध ऽएतया वेद्या सम्पद्यते ॥ १४ ॥ तदाहुः । यत्त्रयोदश पुरुषा ऽअतियन्ति कथमेते सम्पदो न च्यवन्त ऽइति या वा ऽएतस्य सप्तमस्य पुरुषस्य सम्पत्सैवैतेषाꣳ सर्वेषाꣳ सम्पत् ॥ १५ ॥ अथो ऽआहुः । प्रजापतिरेवात्मानं विधाय तस्य यत्र–यत्र न्यूनमासीत्तदेतैः समा-

पूरयत तेनो ऽएवापि सम्पन्न ऽइति ॥ १६ ॥ तद्धैके । एकविधम्प्रथमं विदधत्यथैकोत्तरमापरिमितविधान्न तथा कुर्य्यात् ॥ १७ ॥ सप्तविधो वा ऽअग्ग्रे प्रजापतिरसृज्यत । स ऽआत्मानं विदुधान ऽऐत्स ऽएकशतविधेऽतिष्ठत स योऽर्वाचीनः सप्तविधाद्विधत्त ऽएतः ह स पितरम्प्रजापतिं विच्छिनत्ति स ऽइष्ट्वा पापीयान्भवति यथा श्रेयाꣳसः हिꣳसित्वाथ य ऽएकशतविधमतिविधत्तेऽस्मात्स सर्वस्माद्बहिर्द्धा निष्पद्यते सर्वमु हीदम्प्रजापतिस्तस्मादु सप्तविधमेव प्रथमं विदधीताथैकोत्तरमैकशतविधादेकशतविधन्तु नातिविदधीत नाहैतम्पितरम्प्रजापतिं विच्छिनत्ति नो ऽअस्मात्सर्वस्माद्बहिर्द्धा निष्पद्यते ॥ १८ ॥ (C)

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥



[एकशतविधस्याग्नेरादित्यात्मना स्तुतिः, तस्य प्राकृताग्निसङ्ख्यया सम्पत्तिप्रकारादिश्च]

सँवत्सरो वै प्रजापतिः । अग्निरु सर्वे कामाः सोऽयः सँवत्सरः प्रजापतिरकामयताग्निः सर्वान्कामानात्मानमभिसञ्चिन्वीयेति स ऽएकशतधात्मानं व्यधत्त स ऽएकशतधात्मानं विधायाग्निः सर्वान्कामानात्मानमभिसमचिनुत स सर्वे कामा ऽअभवत्तस्मान्न कश्चन बहिर्द्धा कामोऽभवत्तस्मादाहुः सँवत्सरः सर्वे कामा ऽइति न ह सँवत्सरात्कश्चन बहिर्द्धा कामोऽस्ति ॥ १ ॥

(C) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा – का० श० १२, २ ३ ।

तथैवैतद्यजमानः । एकशतधात्मानं विधायाग्निः सर्वान्कामानात्मानमभिसञ्चिनुते स सर्वे कामा भवति तस्मान्न कश्चन बहिर्द्धा कामो भवति ॥ २ ॥ स यः स सँवत्सरोऽसौ स ऽआदित्यः । स ऽएष ऽएकशतविधस्तस्य रश्मयः शतं विधा ऽएष ऽएवैकशततमो य ऽएष तपत्यस्मिन्त्सर्वस्मिन्प्रतिष्ठितस्तथैवैतद्यजमान ऽएकशतधात्मानं विधायास्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥ ३ ॥ अथ वा ऽएकशतविधः । सप्तविधमभिसम्पद्यत ऽएकशतधा वा ऽअसावादित्यो विहितः सप्तसु देवलोकेषु प्रतिष्ठितः सप्त वै देवलोकाश्चतस्रो दिशस्त्रय ऽइमे लोका ऽएते वै सप्त देवलोकास्तेष्वेष प्रतिष्ठितस्तथैवैतद्यजमान ऽएकशतधात्मानं विधाय सप्तसु देवलोकेषु प्रतितिष्ठति ॥ ४ ॥ यद्वैवैकशतविधः । सप्तविधमभिसम्पद्यत ऽएकशतधा वा ऽअसावादित्यो विहितः सप्तस्वृतुषु सप्तसु स्तोमेषु सप्तसु पृष्ठेषु सप्तसु छन्दःसु सप्तसु प्राणेषु सप्तसु दिक्षु प्रतिष्ठितस्तथैवैतद्यजमान ऽएकशतधात्मानं विधायैतस्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥ ५ ॥ यद्वैवैकशतविधः । सप्तविधमभिसम्पद्यत ऽएकशतधा वा ऽअसावादित्यो विहितः सप्ताक्षरे ब्रह्मन्प्रतिष्ठितः सप्ताक्षरं वै ब्रह्माग्निरेकमक्षरं ऋजुरिति द्वे सामेति द्वे ऽअथ यदुतोऽन्यद्ब्रह्मैव तद्व्यक्षरं वै ब्रह्म तदेतत्सर्वः सप्ताक्षरम्ब्रह्म तस्मिन्नेष प्रतिष्ठितस्तथैवैतद्यजमान ऽएकशतधात्मानं विधाय सप्ताक्षरे

ब्रह्मन्प्रतितिष्ठति ॥ ६ ॥ तस्माद्व सप्तभिः सप्तभिः परिश्रयन्ति । तस्माद्वेकशतविधः सप्तविधमभिसम्पद्यतेऽथ वै सप्तविध ऽएकशतविधमभिसम्पद्यते ॥ ७ ॥ सप्तविधो वा ऽअग्ने प्रजापतिरसृज्यत । स ऽएतमेकशतधात्मानं विहितमपश्यत्प्राणभृत्सु पञ्चाशदिष्टकाः पञ्चाशद्यजूंषि तच्छतः सादनञ्च सूददोहाश्चैकशततमे तत्समानः सादयित्वा हि सूददोहसाधिवदति स ऽएतेनैकशतविधेनात्मनेमाञ्श्रितिमजयदिमां व्यष्टिं व्याश्नुत तथैवैतद्यजमान ऽएतेनैकशतविधेनात्मनेमाञ्श्रितिञ्जयतीमां व्यष्टिं व्यश्नुत ऽएवमु सप्तविध ऽएकशतविधमभिसम्पद्यते स य ऽएवैकशतविधः स सप्तविधो यः सप्तविधः स ऽएकशतविध ऽइति नु विधानाम् ॥ ८ ॥ (D)

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥१॥
कण्डिकासंख्या ॥ ९४ ॥

[चित्याग्नेः कालविध्यादि]

अथातश्चयनस्यैव । अन्तरोपसदौ चिनोत्येतद्वै देवा ऽअबिभयुर्यद्वै न ऽइमामिह रक्षाꣳसि नाष्ट्रा न हन्युरिति त ऽएताः पुरोऽपश्यन्नुपसद ऽइमानेव लोकानिमे वै लोकाः पुरस्ताः प्रापद्यन्त ताः प्रपद्याभयेऽनाष्ट्रऽएतमात्मानः समस्कुर्वत तथैवैतद्यजमान ऽएताः पुरः प्रपद्या-

(D) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श्रौ० १२. २. ४ ।

भयेऽनाष्ट्रꣳ एतमात्मानꣳ संस्कुरुते ॥ १ ॥ यद्द्वेवान्तरोपसदौ चिनोति । एतद्द्वै देवा अबिभयुर्यद्द्वै न इमꣳमिह रक्षाꣳसि नाष्ट्रा न हन्न्युरिति त एतान्व्रज्ञानपश्यन्नुपसदो व्रज्ञा वा उपसदस्तान्प्रापद्यन्त तान्प्रपद्याभयेऽनाष्ट्रꣳ एतमात्मानꣳ समस्कुर्वत तथैवैतद्यजमान एतान्व्रज्ञान्प्रपद्याभयेऽनाष्ट्रꣳ एतमात्मानꣳ संस्कुरुते ॥ २ ॥ एतदु ह यज्ञे तपः । यदुपसदस्तपो वा उपसदस्तद्यत्तपसि चीयते तस्मात्तापश्चितस्तद्वै यावदेवोपसद्भिश्चरन्ति तावत्प्रवर्ग्येण सँवत्सरमेवोपसद्भिश्चरन्ति सँवत्सरम्प्रवर्ग्येण ॥ ३ ॥ अहोरात्राणि वा उपसदः । आदित्यः प्रवर्ग्यो ऽमुन्तदादित्यमहोरात्रेषु प्रतिष्ठापयति तस्मादेषोऽहोरात्रेषु प्रतिष्ठितः ॥ ४ ॥ अथ यदि चतुर्विꣳशतिः । चतुर्विꣳशतिर्वा अर्द्धमासा अर्द्धमासा उपसद आदित्यः प्रवर्ग्यो ऽमुन्तदादित्यमर्द्धमासेषु प्रतिष्ठापयति तस्मादेषोऽर्द्धमासेषु प्रतिष्ठितः ॥ ५ ॥ अथ यदि द्वादश । द्वादश वै मासा मासा उपसद आदित्यः प्रवर्ग्यो ऽमुन्तदादित्यम्मासेषु प्रतिष्ठापयति तस्मादेष मासेषु प्रतिष्ठितः ॥ ६ ॥ अथ यदि षट् । षड्वा ऋतव ऋतव उपसद आदित्यः प्रवर्ग्यो ऽमुन्तदादित्यमृतुषु प्रतिष्ठापयति तस्मादेष ऋतुषु प्रतिष्ठितः ॥ ७ ॥ अथ यदि तिस्रः । त्रयो वा इमे लोका इमे लोका उपसद आदित्यः प्रवर्ग्यो ऽमुन्तदादित्यमेषु लोकेषु प्रतिष्ठापयति तस्मादेष एषु लोकेषु

प्रतिष्ठितः ॥ ८ ॥ अथातश्चितिपुरीषाणामेव मीमाꣳसा । मासम्प्रथमा चितिर्मासम्पुरीषमेतावान्वासन्तिक ऽऋतौ कामस्तद्यावान्वासन्तिक ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥ ९ ॥ मासन्द्वितीया । मासम्पुरीषमेतावान्ग्रैष्म ऽऋतौ कामस्तद्यावान्ग्रैष्म ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥ १० ॥ मासन्तृतीया । मासम्पुरीषमेतावान्वार्षिक ऽऋतौ कामस्तद्यावान्वार्षिक ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥ ११ ॥ मासञ्चतुर्थी । मासम्पुरीषमेतावाञ्छारद ऽऋतौ कामस्तद्यावाञ्छारद ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥१२॥ अथ पञ्चम्यै चितेः । असपत्ना विराजश्च प्रथमाहमुपदधाति स्तोमभागा ऽएकैकामन्वहन्ताः सकृत्सादुयति सकृत्सूददोहसाधिवदति तूष्णीम्मासꣳ स्तोमभागापुरीषमभिहरन्त्येतावान्हैमन्तिक ऽऋतौ कामस्तद्यावान्हैमन्तिक ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥ १३ ॥ मासꣳ षष्ठी । मासम्पुरीषमेतावाञ्छैशिर ऽऋतौ कामस्तद्यावाञ्छैशिर ऽऋतौ कामस्तन्तत्सर्वमात्मानमभिसञ्चिनुत ऽएतावान्वै द्वादशसु मासेषु कामः षट्स्वृतुषु तद्यावान्द्वद्वादशसु मासेषु कामः षट्स्वृतुषु तन्तत्सर्वमात्मानमभिसञ्चिनुते ॥ १४ ॥ अथ त्रीण्यहान्युपातियन्ति । यदहः शतरुद्रियꣳहोति यदहरुपवसथो यदहः प्रसुतस्तद्यत्तेष्वहःसूपसदा चरन्ति तानि तस्य मासस्याहोरात्राण्यथ यत्प्रवर्ग्येण तदु तस्मिन्नृतावादित्यम्प्रतिष्ठापयत्येतावान्वै

त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तद्यावाँस्त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तन्तत्सर्व्वमात्मानमभिसञ्चिनुते ॥ १५ ॥ स सँवत्सरम्प्रसुतः स्यात् । सर्व्वं वै सँवत्सरः सर्व्वमेकशतविधः सर्व्वेणैव तत्सर्व्वमाप्नोति यदि सँवत्सरन्न शक्नुयाद्विश्वजिता सर्व्वपृष्ठेनातिरात्रेण यजेत तस्मिन्त्सर्व्ववेदसन्द्यात्सर्व्वं वै विश्वजित्सर्व्वपृष्ठोऽतिरात्रः सर्व्वः सर्व्ववेदसः सर्व्वमेकशतविधः सर्व्वेणैव तत्सर्व्वमाप्नोति ॥ १६ ॥ (ङ)

द्वितीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[प्रजापतेः प्रकारान्तरेणैकशतसंख्याकत्वादिविधानम्]

सँवत्सरो वै प्रजापतिरेकशतविधः । तस्याहोरात्राण्यर्द्धमासा मासा ऽऋतवः षष्टिर्म्मासस्याहोरात्राणि मासि वै सँवत्सरस्याहोरात्राण्याप्यन्ते चतुर्विंशतिरर्द्धमासास्त्रयोदश मासास्त्रय ऽऋतवस्ताः शतं विधाः सँवत्सर ऽएवैकशततमी विधा ॥ १ ॥ स ऽऋतुभिरेव सप्तविधः । षड्ढतवः सँवत्सर ऽएव सप्तमी विधा तस्यैतस्य सँवत्सरस्यैतत्तेजो य ऽएष तपति तस्य रश्मयः शतं विधा मण्डलमेवैकशततमी विधा ॥ २ ॥ स दिग्भिरेव सप्तविधः । ये प्राच्च्यान्दिशि रश्मयः सैका विधा ये दक्षिणायाꣳ सैका ये प्रतीच्च्याꣳ सैका य ऽउदीच्च्याꣳ सैका य ऽऊर्द्ध्वायाꣳ

(ङ) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. २. ४ ।

सैका येऽवाच्च्याꣳ सैका मण्डलमेव सप्तमी विधा ॥ ३ ॥ तस्यैतस्य परस्तात्कामप्रो लोकः । अमृतं वै कामप्रममृतमेवास्य तत्परस्तात्तद्यत्तदमृतमेतत्तद्यदेतदर्च्चिर्दीप्यते ॥ ४ ॥ तदेतदृचाभ्युक्तम् । 'विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः । सवितारन्नृचक्षसमि'ति तदेतत्सर्वमायुर्दीर्घमनन्तꣳ हि तद्यदिदमाहुर्दीर्घन्त ऽआयुरस्तु सर्वमायुरिहीत्येष ते लोक ऽएतत्ते ऽस्तिवति हैवैतत् ॥ ६ ॥ पश्यन्ती वाग्वदति । तदेतदेकशतविधेन वैवाप्तव्यः शतायुतया वा य ऽएवैकशतविधं विधत्ते यो वा शतं वर्षाणि जीवति स हैवैतदमृतमाप्नोति तस्माद्येचैतद्विदुर्ये च न लोक्या शतायुतेत्येवाहुस्तस्मादु ह न पुरायुषः स्वकामी प्रेयादलोक्यः हैत ऽउ वाव लोका यदहोरात्राण्यर्द्धमासा मासा ऽऋतवः संवत्सरः ॥ ७ ॥ तद्येऽर्वाग्विदꣳशेषु वर्षेषु प्रयन्ति । अहोरात्रेषु ते लोकेषु सज्ज्यन्तेऽथ ये परोविदꣳशेष्ववर्वाक्चत्वारिꣳशेष्वर्द्धमासेषु तेऽथ ये परश्चत्वारिꣳशेष्ववर्वाक्षष्टेषु मासेषु तेऽथ ये परः षष्टेष्ववर्वागशीतेष्वृतुषु तेऽथ ये परोऽशीतेष्ववर्वाक्शतेषु सँवत्सरे तेऽथ य ऽएव शतं वर्षाणि यो वा

(१) शु० य० सं० अ० ३० क० ४।

भूयाꣳसि जीवति स हैवैतदमृतमाप्नोति ॥ ८ ॥ बहुभिर्ह वै यज्ञैः । एकमहरेका रात्रिर्म्मिता स यु ऽएवैकशतविधं विधत्ते यो वा शतं वर्षाणि जीवति स हैवैनदद्धातमामाप्नोत्येष वा ऽएकशतविधं विधत्ते य ऽएनꣳ सँवत्सरं बिभर्त्ति तस्मादेनꣳ सँवत्सरभृतमेव चिन्वीतेत्यधिदेवतम् ॥ ९ ॥ अथाधियज्ञम् । यानमूनेकशतमुद्धाहून्पुरुषान्म्मिमीते स विधैकशतविधः स चितिभिरेव सप्तविधः षड्डृतव्यवत्यश्चितयोऽग्निरेव सप्तमी विधा ॥ १० ॥ स ऽउ वा ऽइष्टकैकशतविधः । याः पञ्चाशत्प्रथमा ऽइष्टका याश्चोत्तमास्ताः शतं विधा ऽअथ या ऽएतदुन्तरेणेष्टका ऽउपधीयन्ते सैवैकशततमी विधा ॥ ११ ॥ स ऽउ ऽएव यजुस्तेजाः । यजुरेकशतविधो यानि पञ्चाशत्प्रथमानि यजूꣳषि यानि चोत्तमानि ताः शतं विधा ऽअथ याश्चैतदुन्तरेण यजूꣳषि क्रियन्ते सैवैकशततमी विधैवमु सप्तविध ऽएकशतविधो भवति स यः शतायुतायाङ्कामो स ऽएकशतविधे सप्तविधेन हैव तमेवंविदाप्नोति ॥ १२ ॥ एवं वाव सर्वे यज्ञाः । एकशतविधा ऽअग्निहोत्राद्दग्भिर्यजुर्भिः पदैरक्षरैः कर्म्मभिः सामभिः स यः शतायुतायाङ्कामो स ऽएकशतविधे यः सप्तविधे यज्ञेन-यज्ञेन हैव तमेवंविदाप्नोतीत्यु ऽएवाधियज्ञम् ॥ १३ ॥ अथाध्यात्मम् । पञ्चेमाश्चतुर्विधा ऽअङ्गुलयो द्वे कल्कुषी दोरꣳसफलकश्चाक्षश्च तत्पञ्चविꣳशतिरेवमिमानीतराण्यङ्गानि ताः शतं विधा ऽआत्मैवैकशततमी

विधोक्तः सप्तविधतायै ॥ १४ ॥ स ऽउ ऽएव प्राणतेजाः । प्राणैकशतविधोऽन्वङ्गमङ्गेऽङ्गे हि प्राणः स यः शतायुतायाङ्कामो स ऽएकशतविधे यः सप्तविधे यः सर्वेषु यज्ञेषु विद्यया हैव तमेवंविदाप्नोति सर्वैर्हि यज्ञैरात्मानः सम्पन्नं विदे ॥१५॥ त्रीणि वा ऽइमानि पञ्चविधानि । सँवत्सरोऽग्निः पुरुषस्तेषाम्पञ्चविधा ऽअन्नम्पानꣳ श्रीर्ज्योतिरमृतं स्यदेव सँवत्सरेऽन्नन्तदन्नं स्या ऽआपस्तत्पानः रात्रिरेव श्रीः श्रियाꣳ हैतद्वाऽस्याꣳ सर्वाणि भूतानि सँवसन्त्यहर्ज्योतिरादित्योऽमृतमित्यधिदेवतम् ॥ १६ ॥ अथाधियज्ञम् । यदेवान्नमुपधीयते तदन्नं स्या ऽआपस्तत्पानम्परिश्रित ऽएव श्रीस्तद्धि रात्रीणाꣳ रूपं स्यजुष्मत्यो ज्योतिस्तद्ध्यह्नाꣳ रूपमग्निरमृतन्तद्ध्यादित्यस्य रूपमित्यु ऽएवाधियज्ञम् ॥ १७ ॥ अथाध्यात्मम् । यदेव पुरुषेऽन्नन्तदन्नं स्या ऽआपस्तत्पानमस्थीन्येव श्रीस्तद्धि परिश्रिताꣳ रूपम्मज्जानो ज्योतिस्तद्धि यजुष्मतीनाꣳ रूपम्प्राणोऽमृतन्तद्ध्यग्नेः रूपम्प्राणोऽग्निः प्राणोऽमृतमित्यु वा ऽआहुः ॥ १८ ॥ अन्नाद्वा ऽअशनाया निवर्त्तते । पानात्पिपासा श्रियै पाप्मा ज्योतिषस्तमोऽमृतान्मृत्योर्न्नि ह वा ऽअस्मादेतानि सर्वाणि वर्त्तन्तेऽप पुनर्म्मृत्युञ्जयति सर्वमायुरेति य ऽएवं वेद तदेतदमृतमित्येवामुत्रोपासीतायुरितीह प्राण ऽइति हैक ऽउपासते प्राणोऽग्निः प्राणोऽमृतमिति वदन्तो न तथा विद्यादुद्भुवं वै तद्यत्प्राण'स्तन्ते विष्याम्म्यायुषो न मद्ध्यादि'ति-

(१) शु० य० सं० अ० १२ क० ६५।

ह्यपि यजुषाऽभ्युक्तन्तस्मादेनदमृतमित्येवामुत्रोपासीतायु-
रितीह तथो ह स सर्वमायुरेति ॥ १९ ॥ (F)

द्वितीयाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥
इति द्वितीयोऽध्यायः ॥ २ ॥

[गायत्र्यादि-सप्तच्छन्दसां वीर्यरूपत्वेन स्तुतिः]

प्राणो गायत्री । चक्षुरुष्णिगग्वागनुष्टुम्मनो बृह-
तीऽश्श्रोत्रम्पङ्क्तिर्य्स ऽएवायम्प्रजननः प्राण ऽएष
त्रिष्टुबथ योऽयमवाङ् प्राण ऽएष जगती तानि वा
ऽएतानि सप्त च्छन्दाꣳसि चतुरुत्तराण्यग्नौ क्रियन्ते
॥ १ ॥ प्राणो गायत्रीति । तद्य ऽएव प्राणस्य महिमा
यद्द्वीर्य्यन्तदेतत्सहस्रम्प्राणस्यैवैतद्द्वीर्य्यꣳयद्ध्यस्य चिन्वतः
प्राण ऽउत्क्रामेत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य
रूपेण सहस्रमेष गायत्रीः सञ्चितो भवति ॥ २ ॥
चक्षुरुष्णिगिति । तद्य ऽएव चक्षुषो महिमा यद्द्वीर्य्य-
न्तदेतत्सहस्रञ्चक्षुष ऽएवैतद्द्वीर्य्यꣳयद्ध्यस्य चिन्वतश्चक्षु-
रुत्क्रामेत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्र-
मेष ऽउष्णिहः सञ्चितो भवति ॥ ३ ॥ वागनुष्टुबिति ।
तद्य ऽएव वाचो महिमा यद्द्वीर्य्यन्तदेतत्सहस्रं वाच
ऽएवैतद्द्वीर्य्यꣳयद्ध्यस्य चिन्वतो वागुत्क्रामेत्तत ऽएवैषो-
ऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्रमेषोऽनुष्टुभः सञ्चितो

(F) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपकल्प्यन्ते यथा—का० श० १२. २. ५ ।

भवति ॥४॥ मनो बृहतीति । तद्य ऽएव मनसो महिमा यद्बृहतीर्यन्तदेतत्सहस्रम्मनस ऽएवैतद्बृहतीर्यँय्यद्ध्यस्य चिन्वतो मन ऽउत्क्रामेत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्रमेष बृहतीः सञ्चितो भवति ॥५॥ श्रोत्रम्पङ्क्तिरिति । तद्य ऽएव श्श्रोत्रस्य महिमा यद्बृहतीर्यन्तदेतत्सहस्रꣳ श्रोत्रस्यैवैतद्बृहतीर्य्यँय्यद्ध्यस्य चिन्वतः श्रोत्रमुत्क्रामेत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्रमेष पङ्क्तीः सञ्चितो भवति ॥ ६ ॥ षऽएवायम्प्रजननः प्राणः । एष त्रिष्टुविति तद्य ऽएवैतस्य प्राणस्य महिमा यद्बृहतीर्यन्तदेतत्सहस्रमेतस्यैवैतत्प्राणस्य बृहतीर्य्यँय्यद्ध्यस्य चिन्वत ऽएष प्राण ऽआलुब्ध्येत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्रमेष त्रिष्टुभः सञ्चितो भवति ॥ ७ ॥ अथ योऽयमवाङ् प्राणः । एष जगतीति तद्य ऽएवैतस्य प्राणस्य महिमा यद्बृहतीर्यन्तदेतत्सहस्रमेतस्यैवैतत्प्राणस्य बृहतीर्य्यँय्यद्ध्यस्य चिन्वत ऽएष प्राण ऽआलुब्ध्येत्तत ऽएवैषोऽग्निर्न्न चीयेतैतेनैवास्य रूपेण सहस्रमेष जगतीः सञ्चितो भवति ॥ ८ ॥ तानि वा ऽएतानि । सप्त च्छन्दाꣳसि चतुरुत्तराण्यन्योऽन्यस्मिन्प्रतिष्ठितानि सप्तेमे पुरुषे प्राणा ऽअन्योऽन्यस्मिन्प्रतिष्ठितास्तद्यावन्तमेवँवित्छन्दसाङ्कृणमन्वाह च्छन्दसश्छन्दसो हैवास्य सोऽनूक्तो भवति स्तुतो वा शस्तो वोपहितो वा ॥ ९ ॥ (E)

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(E) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२ ३ १।

[वेदवादिप्रश्नोत्तराभ्यां शिरोग्रीवादीनां छन्दोमयत्वनिरूपणम्]

तदाहुः । किञ्छन्दः का देवताग्नेः शिर ऽइति गायत्री च्छन्दोऽग्निर्देवता शिरः ॥ १ ॥ किञ्छन्दः । का देवता ग्रीवा ऽइत्युष्णिक्छन्दः सविता देवता ग्रीवाः ॥ २ ॥ किञ्छन्दः । का देवतानूकमिति बृहती च्छन्दो बृहस्पतिर्देवतानूकम् * ॥ ३ ॥ किञ्छन्दः । का देवता पक्षाविति बृहद्रथन्तरे च्छन्दो द्यावापृथिवी देवते पक्षौ ॥४॥ किञ्छन्दः का देवता मध्यमिति त्रिष्टुप्छन्द ऽइन्द्रो देवता मध्यम् ॥ ५ ॥ किञ्छन्दः । का देवता श्रोणी ऽइति जगती च्छन्द ऽआदित्यो देवता श्रोणी ॥ ६ ॥ किञ्छन्दः । का देवता यस्माादिदम्प्राणाद्द्रुतः सिच्यत ऽइत्यतिच्छन्दाश्च्छन्दः प्रजापतिर्देवता ॥ ७ ॥ किञ्छन्दः । का देवता योऽयमवाङ् प्राण ऽइति यज्ञायज्ञियच्छन्दो वैश्वानरो देवता ॥ ८ ॥ किञ्छन्दः । का देवतोरूऽइत्यनुष्टुप्छन्दो विश्वे देवा देवतोरू ॥ ९ ॥ किञ्छन्दः । का देवताष्ठीवन्ताविति पङ्क्तिश्छन्दो मरुतो देवताष्ठीवन्तौ (A) ॥ १० ॥ किञ्छन्दः । का देवता प्रतिष्ठेऽइति द्विपदा च्छन्दो विष्णुर्देवता प्रतिष्ठे ॥ ११ ॥ किञ्छन्दः । का देवता प्राणा ऽइति विच्छन्दाश्छन्दो वायुर्देवता प्राणाः ॥ १२ ॥ किञ्छन्दः । का देवतोनातिरिक्तानीति न्न्यूनाक्षरा च्छन्द ऽआपो देवतोनातिरिक्तानि सैषात्म-

* अनूकशब्दस्य पक्षयोर्मध्यदेहस्य सन्धिः ।
पुच्छमध्ययोश्च सन्धिरित्यर्थः ॥
(A) ष्ठीवन्तौ जानुप्रदेशावित्यर्थ. । सा० भा० ॥

विद्यैवैतन्मयो हैवैता देवता ऽएतमात्मानमभिसम्भवति न हाऽन्यान्या लोकयताया ऽआशीरस्ति ॥ १३ ॥ (B)

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[धीरमहाशालनाम्नोर्महर्ष्योः प्रश्नप्रतिवचनाभ्यामग्नेः सर्वदेवतासमष्टिरूपप्राणवाग्वात्मकत्वप्रतिपादनम्]

धीरो ह शातपर्णेयः । महाशालञ्जाबालमुपोत्ससाद तꣳ होवाच किम्मा विद्वानुपोदसद ऽइत्यग्निं वेदेति * कमग्निं वेत्थेति वाचमिति यस्तमग्निं वेद किꣳ स भवतीति वाग्मी भवतीति होवाच नैनं वाग्जहातीति ॥ १ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद ऽइत्यग्निं वेदेति कमग्निं वेत्थेति चक्षुरिति यस्तमग्निं वेद किꣳ स भवतीति चक्षुष्मान्भवतीति होवाच नैनञ्चक्षुर्जहातीति ॥ २ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद ऽइत्यग्निं वेदेति कमग्निं वेत्थेति मन ऽइति यस्तमग्निं वेद किꣳ स भवतीति मनस्वी भवतीति होवाच नैनम्मनो जहातीति ॥ ३ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद ऽइत्यग्निं वेदेति कमग्निं वेत्थेति श्श्रोत्रमिति यस्तमग्निं वेद किꣳ स भवतीति श्श्रोत्रवान्भवतीति होवाच नैनꣳ श्श्रोत्रञ्जहातीति ॥४॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. ३. २ ।

* सर्वत्र प्रश्नप्रतिवचनसमाप्तियोतका इतिशब्दाः ।

ऽइत्यग्निं वेदेति कमग्निं वेत्थेति य ऽएतत्सर्वमग्निस्तं वेदेति तस्मिन्नहोक्तऽउपावरुरोहाधीहि भोस्तमग्निमिति ॥ ५ ॥ स होवाच । प्राणो वाव सोऽग्निर्यर्हि वै पुरुषः स्वपिति प्राणन्तर्हि वाग्प्येति प्प्राणञ्चक्षुः प्राणम्मनः प्राणꣳ श्रोत्रं यदा प्रबुद्ध्यते प्राणादेवाधि पुनर्जायन्त ऽइत्यद्ध्यात्मम् ॥ ६ ॥ अथाधिदेवतम् । या वै सा वाग्ग्निरेव स यत्तच्चक्षुरसौ स ऽआदित्यो यत्तन्मन ऽएष स चन्द्रमा यत्तच्छ्रोत्रन्दिश ऽएव तदथ यः स प्राणोऽयमेव स वायुर्योऽयम्पवते ॥ ७ ॥ यदा वा ऽअग्निरनुगच्छति । वायुन्तर्ह्यनूद्वाति तस्मादेनमुदवासीदित्याहुर्वायुꣳ ह्यनूद्वाति यदादित्योऽस्तमेति वायुन्तर्हि प्रविशति वायुश्चन्द्रमा वायौ दिशः प्रतिष्ठिता वायोरेवाधि पुनर्जायन्ते स यदैवं विदस्माल्लोकात्प्रैति वाचैवाग्निमप्येति चक्षुषादित्यम्मनसा चन्द्रꣳश्रोत्रेण दिशः प्राणेन वायुः स ऽएतन्मय ऽएव भूत्वैतासान्देवतानां रूपाण्यभिसम्भवति स ऽएतासान्देवतानां रूपाण्यभिसम्भूय यत्र क्व च वसति यत्र क्व च रमते तदेवैतत्कुरुते तदेवैतदभिसम्पद्यते ॥ ८ ॥ (M)

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[अनेकैः प्रश्नप्रतिवचनैः पुरुषस्यार्करूपत्वेन स्तुतिः]

श्वेतकेतुर्हारुणेयः । यक्ष्यमाण ऽआस तꣳ ह पितोवाच कानृत्विजोऽवृथा ऽइति स होवाचायन्नेव मे ब्रूहीश्वा-

(१) "अग्निर्वाग्भूत्वा मुखं प्राविशद्" इति श्रुतेः । ऐ० उ० २ । ४ ।

(M) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२, ३, १ ।

वसव्यो होतेति तꣳ ह पप्रच्छ वेत्थ ब्राह्मण वैश्वावसव्य ॥ १ ॥ चत्वारि महान्ती३ ऽइति । वेद भो३ ऽइति होवाच वेत्थ चत्वारि महताम्महान्ती३ ऽइति वेद भो३ ऽइति होवाच वेत्थ चत्वारि व्रतानी३ ऽइति वेद भो३ ऽइति होवाच वेत्थ चत्वारि व्रतानां व्रतानी३ ऽइति वेद भो३ ऽइति होवाच वेत्थ चत्वारि क्क्यानी३ ऽइति वेद भो३ ऽइति होवाच वेत्थ चत्वारि क्क्यानाङ्क्क्यानी३ इति वेद भो३ इति होवाच वेत्थ चतुरोऽर्का३निति वेद भो३ ऽइति होवाच वेत्थ चतुरोऽर्काणामर्का३निति वेद भो३ ऽइति होवाच ॥ २ ॥ वेत्थार्कमिति । अथ वै नो भवान्वक्ष्यतीति वेत्थार्कपर्णं ऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कपुष्पे ऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्ककोश्इयावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कसमुद्गावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कधाना ऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्काष्ट्रीलामित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कमूलमित्यथ वै नो भवान्वक्ष्यतीति ॥ ३ ॥ स ह वै यत्तदुवाच । वेत्थ चत्वारि महान्ति वेत्थ चत्वारि महताम्महान्तीत्यग्निर्म्महाँस्तस्य महतो महदोषधयश्च वनस्पतयश्च तद्धस्यान्नं वायुर्म्महाँस्तस्य महतो महदापस्तद्धास्यान्नमादित्यो महाँस्तस्य महतो महच्चन्द्रमास्तद्धास्यान्नम्पुरुषो महाँस्तस्य महतो महत्पशवस्तद्धास्यान्नमेताान्येव चत्वारि महान्त्येतानि चत्वारि

(१) कः प्रजापतिः, तस्मै हितानि क्क्यानि ।

महतामम्महान्त्येव चत्वारि व्रतान्न्येतानि चत्वारि व्रतानां व्रतान्न्येतान्न्येव चत्वारि क्क्यान्न्येतानि चत्वारि क्क्यानां क्क्यान्न्येतऽएव चत्वारोऽर्क्का ऽएते चत्वारोऽर्क्काणामर्क्कः ॥ ४ ॥ अथ ह वै यत्तदुवाच वेत्थार्क्कमिति पुरुषः हैव तदुवाच । वेत्थार्क्कपर्ण्णं ऽइति कर्ण्णौ हैव तदुवाच वेत्थार्क्कपुष्पे इत्यऽक्षिणी हैव तदुवाच वेत्त्यार्क्कोऽश्यावितिं नासिके हैव तदुवाच वेत्थार्क्कसमुद्गावित्योष्ठौ हैव तदुवाच वेत्थार्क्कधाना ऽइति दन्तान्हैव तदुवाच वेत्थार्क्कष्टीलामिति जिह्वाꣳ हैव तदुवाच वेत्थार्क्कमूलमित्यन्नः हैव तदुवाच स ऽएषोऽग्निरर्क्को यत्पुरुषः स यो हैतमेवमग्निमर्क्कम्पुरुषमुपास्तेऽयमहमग्निरर्क्कोऽस्मीति विद्यया हैवास्यैषऽआत्मन्नग्निरर्क्कश्चितो भवति ॥ ५ ॥ (A)

तृतीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[यजुषो विधायकब्राह्मणयोर्निर्वचनम्]

(तत्राधिदैवाध्यात्मभेदेनार्थप्रतिपादनम्, उपनिषदः स्तुतिः, तत्स्वरूपनिर्वचनादि, उपांश्वनुष्ठानप्रतिपादनं च)

अयं वाव यजुर्ष्योऽयम्पवते । एष हि यन्नेवेदः सर्व्वञ्जनयत्येनं रुयन्तमिदमनु प्रजायते तस्माद्वद्वायुरेव यजुः ॥ १ ॥ अयमेवाकाशो जूः । यदिदमन्तरिक्षमेतꣳ ह्याकाशमनु जवते तदेतद्यजुर्वायुश्चान्तरिक्षञ्च यच्च जूश्च तस्माद्यजुरेष ऽएव यदेष ह्येति तदेतद्यजुर्ऋक्सामयोः

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. ४. ४ ।

प्रतिष्ठितमृक्क्सामे वहतस्तस्मात्समानेरेवाद्धर्युर्ग्रहैः कर्म्म करोत्यन्न्यान्न्यन्न्यानि स्तुतशस्त्राणि भवन्ति यथा पूर्वाभ्याꣳ स्यत्वापराभ्यान्धावयेत्तादृक्तत् ॥ २ ॥ अग्निरेव पुरः । अग्निꣳ हि पुरस्कृत्येमाः प्रजा ऽउपासत ऽआदित्य ऽएव चरणं स्यदा ह्येवैष ऽउदेत्यथेदꣳ सर्वञ्चरति तदेतद्यजुः सपुरश्चरणमधिदेवतम् ॥ ३ ॥ अथाध्यात्मम् । प्राण ऽएव यजुः प्राणो हि यन्नेवेदꣳ सर्वञ्जनयति प्राणं स्यन्तमिदमनु प्रजायते तस्मात्प्राण ऽएव यजुः ॥ ४ ॥ अयमेवाकाशो जूः । योऽयमन्तरात्मन्नाकाश ऽएतꣳ ह्याकाशमनु जवते तदेतद्यजुः प्राणश्चाकाशश्च यच्च जूश्च तस्माद्यजुः प्राण ऽएव यत्प्राणो ह्येति ॥ ५ ॥* अन्नमेव यजुः । अन्नेन हि जायतेऽन्नेन जवते तदेतद्यजुरन्ने प्रतिष्ठितमन्नँ वहति तस्मात्समान ऽएव प्राणेऽन्यदन्न्यदन्नन्धीयते ॥ ६ ॥ मन ऽएव पुरः । मनो हि प्रथमम्प्राणानाञ्चक्षुरेव चरणञ्चक्षुषा ह्ययमात्मा चरति तदेतद्यजुः सपुरश्चरणमधिदेवतञ्चाध्यात्मञ्च प्रतिष्ठितꣳ स यो हैतदेवं स्यजुः सपुरश्चरणमधिदेवतञ्चाध्यात्मञ्च प्रतिष्ठितं वेद ॥ ७ ॥ अरिष्टो हैवानार्त्तः । स्वस्ति यज्ञस्योदृचमश्नुतेऽथो[२] स्वानाꣳ श्रेष्ठः पुर ऽएता भवत्यन्नादोऽधिपतिर्य ऽएवं वेद ॥ ८ ॥ य ऽउ हैवँविदꣳ स्वेषु प्रतिप्रति-

(१) 'ज' पुस्तके 'स्यत्वा' इत्यत्र 'स्यन्त्वा' इति पाठो दृश्यते । स तु न समीचीनः, 'स्यन्दू' प्रस्रवणे इत्यस्मात् , क्त्वा प्रत्यये, उदित्वादिडभावपक्षे 'क्त्वि स्कन्दिस्यन्दोः' (पा० ६।४।३१) इति नकारलोपात् ।

* अत्र शतम् ५३०० ।

(२) 'ज' पुस्तके 'ऽथो' नास्ति ।

र्ब्बुभूषति न हैवालम्भाऽर्ष्येभ्यो भवत्यथ य ऽएवैतमनुभवति यो वै तमनु भाऽर्ष्यान्बुभूर्षति स हैवालम्भाऽर्ष्येभ्यो भवति ॥ ९ ॥ तदेतज्ज्येष्ठम्ब्रह्म । न ह्येतस्माऽकिञ्चन ज्यायोऽस्ति ज्येष्ठो ह वै श्रेष्ठः स्वानाम्भवति य ऽएवं वेद ॥ १० ॥ तदेतद्ब्रह्मापूर्व्वमपरवत् । स यो हैतदेवम्ब्रह्मापूर्व्वमपरवद्वेद न हास्मात्कश्चन श्रेयान्त्समानेषु भवति श्रेयाꣳसः श्रेयाꣳसो हैवास्मादपरपुरुषा जायन्ते तस्माद्योऽस्माज्ज्यायान्त्स्याद्दिशोऽस्मात्पूर्व्वा ऽइत्युपासीत तथो हैनन्न हिनस्ति ॥ ११ ॥ तस्य वा ऽएतस्य यजुषः । रस ऽएवोपनिषत्तस्माद्यावन्मात्रेण यजुषाद्ध्वर्य्युर्ग्रहङ्गृह्णाति स ऽउभे स्तुतशस्त्रे ऽअनुविभवत्युभे स्तुतशस्त्रे ऽअनुव्व्यश्नुते तस्माद्यावन्मात्रऽइवान्नस्य रसः सर्व्वमन्नमवति सर्व्वमन्नमनुव्व्येति ॥ १२ ॥ तृप्तिरेवास्य गतिः । तस्माद्यदान्नस्य तृप्यत्यथ स गत ऽइव मन्यत ऽआनन्द ऽएवास्य विज्ञानमात्मानन्दात्मानो हैव सर्व्वे देवाः सा हैषैव देवानामद्धाविद्या स ह स न मनुष्यो य ऽएवंविद्देवानाꣳ हैव स एकः ॥ १३ ॥ एतद्ध स्म वै तद्विद्वान्प्रियव्रतो रौहिणायन ऽआह । वायुं वान्तमानन्दुस्त ऽआत्मेतो वा वाहीतो वेति स ह स्म तथैव वाति तस्माद्यान्देवेष्वाशिषमिच्छेदेतेनैवोपतिष्ठेतानन्दो व ऽआत्मासौ मे कामः स मे समृद्ध्यतामिति सꣳ हैवास्मै स काम ऽऋद्ध्यते यत्कामो भवत्येताꣳ ह वै तृप्तिमेताङ्गतिमेतमानन्दुमेतमात्मानमभिसम्भवति य ऽएवं वेद

॥ १४ ॥ तदेतद्यजुरुपाꣳश्वनिरुक्तम् । प्राणो वै यजुरुपाꣳश्वायतनो वै प्राणस्तद्य ऽएनन्निर्ब्रुवन्तम्ब्रूयाद्-निरुक्तान्देवतान्निरवोचत्प्राण ऽएनꣳ हास्यतीति तथा हैव स्यात् ॥ १५ ॥ तस्य ह यो निरुक्तमाविर्भावं वेद । आविर्भवति कीर्त्या यशसोपाꣳशु यजुषाद्धर्युर्ग्रहङ्गृह्णाति गृहीतꣳ सन्न ऽआविर्भवत्युपाꣳशु यजुषाग्निꣳश्चिनोति चितꣳ सꣳश्चित ऽआविर्भवत्युपाꣳशु यजुषा हविर्निर्वपति श्रृतन्निष्टुतमाविर्भवत्येवं ह्यक्रिꣳश्चोपाꣳशु करोति कृत-न्निष्टुतमाविर्भवति तस्य ह य ऽएतमेवन्निरुक्तमाविर्भावं वेदाविर्भवति कीर्त्या यशसा ब्रह्मवर्च्चसेन क्षिप्रऽउ हैवा-विदङ्गच्छति स ह यजुरेव भवति यजुषैनमाचक्षते ॥१६॥(B)

तृतीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

[प्रजापतेर्भोक्तृत्वमाहवनीयरूपत्वम्, रुक्मपुरुषयोरिन्द्राग्न्या-त्मना स्तुत्यादिकञ्च]

प्रजापतिं व्रिस्रस्तम् । यत्र देवाः समस्कुर्वꣳस्तमुखायां ह्योनौ रेतो भूतमसिञ्चन्योनिर्वा ऽउखा तस्मा ऽएत-त्सँवत्सरेऽन्नꣳ समस्कुर्वन्योऽयमग्निश्चितस्तदात्मना पुरुष-दधुस्तदात्मना परिहितमात्मैवाभवत्तस्मादुन्नमात्मना परि-हितमात्मैव भवति ॥ १ ॥ तथैवैतद्यजमानः । आत्मा-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. ३. ५ ।

नमुखायां स्योनौ रेतो भूतꣳ सिञ्चति योनिर्वा ऽउखा तस्मा ऽएतत्सँवत्सरेऽन्नꣳ संस्करोति योऽयमग्निश्चित स्तदात्मना परिदधाति तदात्मना परिहितमात्मैव भवति तस्मादुन्नमात्मना परिहितमात्मैव भवति ॥ २ ॥ तन्नि दधाति । वौषडिति वौगिति वा ऽएष षडितीदꣳ षट्चिति कमन्नङ्कृत्वास्मा ऽअपिदधात्यात्मसम्मितं स्यदु वा ऽआत्मसम्मितमन्नन्तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥ ३ ॥ स ऽएष ऽएवार्कः । यमेतमत्राग्निमाहुरन्ति तस्यैतदन्नङ्क्यं स्योऽयमग्निश्चित स्तदुक्थ्यं स्यजुष्ट्ट ऽएष ऽएव महाँस्तस्यैतदुन्नं व्रतन्तन्नमहाव्रतꣳ सामत ऽएष ऽउ ऽएवोक्तस्यैतदुन्नन्थन्तदुक्थमृक्तस्तदेतदुकꣳ स त्रेधा क्ख्यायते ॥ ४ ॥ अथेन्द्राग्नी वा ऽअसृज्ज्येताम् । ब्रह्म च क्षत्रञ्चाग्निरेव ब्रह्मेन्द्रः क्षत्रन्तौ सृष्टौ नानैवास्तान्तावब्रूतान्न वा ऽइत्थꣳ सन्तौ शक्ष्यावः प्रजाः प्रजनयितुमेकꣳ रूपमुभावसावेति तावेकꣳ रूपमुभावभवताम् ॥ ५ ॥ तौ यौ तावेन्द्राग्नी । एतौ तौ रुक्त्मश्च पुरुषश्च रुक्त्म ऽएवेन्द्रः पुरुषोऽग्निस्तौ हिरण्मयौ भवतो ज्ज्योतिर्वै हिरण्यज्ज्योतिरिन्द्राग्नी ऽअमृतꣳ हिरण्यममृतमिन्द्राग्नी ॥ ६ ॥ तावेतावेन्द्राग्नी ऽएव चिन्वन्ति । यद्धि किञ्चैष्टुकमग्निरेव तत्तस्मात्तदग्निना पचन्ति यद्धि किञ्चाग्निना पचन्त्यग्निरेव तदुथ यत्पुरीषꣳ स ऽइन्द्रस्तस्मात्तदग्निना न पचन्ति नेदग्निरेवासन्नेन्द्र ऽइति तस्मादेतावेन्द्राग्नी ऽएव चितौ ॥ ७ ॥

अथ यश्चितेऽग्निर्न्निधीयते । तदेकꣳ रूपमुभौ भवतस्तस्मात्तावेतेनैव रूपेणेमाꣳ प्रजाꣳ प्रजनयतꣳ सैषैकैवेष्टकाग्निरेव तामेष सर्वोऽग्निरभिसम्पद्यते सैवेष्टकासम्पत्तदेतदेकमेवाक्षरं वौगिति तदेष सर्वोऽग्निरभिसम्पद्यते सैवाक्षरसम्पत् ॥ ८ ॥ तद्धैतत्पश्यन्नृषिरब्भ्यनूवाद । भूतम्भविष्यत्प्रस्तौमि महद्ब्रह्मैकमक्षरम्बहु ब्रह्मैकमक्षरमित्येतद्धयेवाक्षरꣳ सर्वे देवाꣳ सर्वाणि भूतान्यभिसम्पद्यन्ते तदेतद्ब्रह्म च क्षत्रञ्चाग्निरेव ब्रह्मेन्द्रꣳ क्षत्रमिन्द्राग्नी वै विश्वे देवा विडु विश्वे देवास्तदेतद्ब्रह्म क्षत्रं विट् ॥ ९ ॥ एतद्ध स्म वै तद्विद्वाञ्छ्यापर्णꣳ सायकायन ऽआह । यद्वै मऽइदङ्कर्म्म समाप्स्यत ममैव प्रजा सल्ल्वानाꣳ राजानोऽभविष्यन्मम ब्राह्मणा मम वैश्या यत्तु मऽएतावत्कर्म्मणꣳ समापि तेन मऽउभयथा सल्ल्वान्प्रजातिरेक्ष्यतऽइति स ऽएष ऽएव श्रीरेष यश ऽएषोऽन्नादुꣳ ॥ १० ॥ एतद्ध वै तच्छाण्डिल्यꣳ । वामकक्षायणाय प्रोच्योवाच श्रीमान्यशस्यन्नादो भविष्यसीति श्रीमान्ह वै यशस्यन्नादो भवति य ऽएवं वेद ॥ ११ ॥ स ऽएषोऽग्निꣳ प्रजापतिरेव । ते देवा ऽएतमग्निम्प्रजापतिꣳ सँस्कृत्याथास्मा ऽएतत्सँवत्सरेऽन्नꣳसमस्कुर्वन्य ऽएष महाव्रतीयो ग्रहꣳ B ॥ १२ ॥ तमद्भिर्ऋग्भिर्ग्रहेण गृह्णाति । यद्गृह्णाति तस्माद् ग्रहस्त-

B कात्यायनमहर्षिणापि महाव्रतैकनियतग्रहणं सूत्रितम्, 'महाव्रतमग्निष्टोम.' 'प्राजापत्य उपालम्भ्यः' 'गृहं गृह्णाति "विन ऽइन्द्र" वाचस्पतिं विश्वकर्मन्निति" वा', का० श्रौ० सू० अ० १३ । कं० २ सू० २१, २२, २३ ।

स्मिन्नुद्गाता महाव्रतेन रसन्दधाति सर्वाणि हैतानि सामानि यन्महाव्रतन्तदस्मिन्त्सर्वैः सामभी रसन्दधाति तस्मिन्न्होता महतोक्थेन रसन्दधाति सर्वा हैता ऽऋचो यन्महदुक्थन्तदस्मिन्त्सर्वाभिर्ऋग्भी रसन्दधाति ॥ १३ ॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं व्रषट्कृते जुहोति वौगिति वा ऽएष षड्वितीदꣳ षड्विधमन्नङ्कृत्वास्मा ऽअपिदधात्यात्मसम्मितं ग्यदु वा ऽआत्मसम्मितमन्नन्तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति ॥ १४ ॥ स ऽएष ऽएवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नङ्क्यमेष महाव्रतीयो ग्रहस्तदुक्थ्यं ग्यजुष्ट ऽएष ऽएव महाँस्तस्यैतदन्नं व्रतन्तन्महाव्रतꣳ सामत ऽएष ऽउ ऽएवोक्तस्यैतदन्नं* थन्तदुक्थमृक्तस्तदेतदेकꣳ स त्रेधा क्ल्यायते ॥ १५ ॥ स ऽएष सँवत्सरः प्रजापतिरग्निः । तस्यार्द्धमेव सावित्राण्यर्द्धं वैश्वकर्म्मणाद्यष्टावेवास्य कलाः सावित्राण्यष्टौ वैश्वकर्म्मणान्यथ यदेतदुन्तरेण कर्म्म क्रियते स ऽएव सप्तदशः प्रजापतिर्ग्यो वै कला मनुष्याणामक्षरन्तद्देवानाम् ॥ १६ ॥ तद्द्वे लोमेति द्वे ऽअक्षरे । त्वगिति द्वे ऽअसृगिति द्वे मेद ऽइति द्वे माꣳसमिति द्वे स्नावेति द्वे ऽअस्थीति द्वे मज्जेति द्वे ताः षोडश कला ऽअथ य ऽएतदुन्तरेण प्राणः सञ्चरति स ऽएव सप्तदशः प्रजापतिः ॥ १७ ॥ तस्मा ऽएतस्मै प्राणाय । एताः षोडश कला ऽअन्नमभिह-

* 'ग-ज' पुस्तकयोः 'एवोक्तदन्नं' इति पाठः समुपलभ्यते ।

रन्ति ता यदानभिहर्त्तुन्धियन्तेऽथैता ऽएव जग्ध्वोत्क्रामति तस्मादु हैतदुशिशिषतस्तृप्रमिव भवति प्राणैरद्यमानस्य तस्मादु हैतदुपतापी कृश ऽइव भवति प्राणैर्हि जग्धो भवति ॥ १८ ॥ तस्मा ऽएतस्मै सप्तदशाय प्रजापतये । एतत्सप्तदशमन्नꣳ समस्कुर्वन्न्य ऽएष सौम्योऽद्धरोऽथ या ऽअस्य ताः षोडश कला ऽएते ते षोडशऽर्त्विजस्तस्मान्न सप्तदशमृत्विजङ्कुर्वीत नेदतिरेचयानीत्यथ य ऽएवाञ्च रसो या ऽआहुतयो हूयन्ते तदेव सप्तदशमन्नम् ॥ १९ ॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं व्रषट्कृते जुहोति द्यौगिति वा ऽएष षड्डितीदꣳ षड्विधमन्नङ्कृत्वास्मा ऽआपिदधात्यात्मसम्मितं स्यदु वा ऽआत्मसम्मितमन्नन्तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तत्कनीयो न तदवति ॥ २० ॥ स ऽएष ऽएवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नङ्क्यमेष सौम्योऽद्धरस्तदुक्थ्यं स्यजुष्टु ऽएष ऽएव महाँस्तस्यैतदन्नं व्रतन्तन्महाव्रतꣳ सामत ऽएष ऽउ ऽएवोक्तस्यैतदन्नन्थन्तदुक्थमृक्तस्तदेतदेकꣳ स त्रेधा रख्यायते स ऽएतेनान्नेन सहोर्द्ध ऽउदक्रामत्स यः स ऽउदक्रामदसौ स ऽआदित्योऽथ येन तेनान्नेन सहोदक्रामदेष स चन्द्रमाः ॥ २१ ॥ स ऽएष ऽएवार्को य ऽएष तपति । तस्यैतदन्नङ्क्यमेष चन्द्रमास्तदुक्थ्यं स्यजुष्टु ऽएष ऽएव महाँस्तस्यैतदन्नं व्रतन्तन्महाव्रतꣳ सामत ऽएष

(१) "षोडशर्त्विजो ब्रह्मोद्गातृ-होत्रध्वर्यु-ब्राह्मणाच्छंसि-प्रस्तोतृ-मैत्रावरुण-प्रतिप्रस्थातृ-पोतृ-प्रतिहर्त्रच्छावाक-नेष्टृग्नीत्-सुब्रह्मण्य-प्रावस्तदुन्नेतॄन् वृणीते" का० श्रौ० सू० ७. १. ७ ।

ऽउ ऽएवोक्क॒त॒स्यैत॒दन्न॑न्थन्त॒दुक्क॑थमृक्क॒स्त॒देत॒देकः॑ स॒ त्रेधा॒ ख्यायत ऽइ॒त्यधिदेवतम् ॥ २२ ॥ अ॒थाध्या॒त्मम्। प्राणो॒ वा ऽअर्क्क॒स्तस्या॒न्नमे॒व क्क॑यन्त॒दुक्क॑र्यं स्व॒जुष्ट॒ः प्राण॒ ऽए॒व महाँ॒स्तस्या॒न्नमे॒व व्र॒तन्त॒न्महाव्र॒त॒ः सामत॒ः प्राण॒ ऽउ ऽएवोक्क॒तस्या॒न्नमेव थन्त॒दुक्क॑थमृक्क॒स्त॒देत॒देकः॑ स॒ त्रेधा॒ ख्यायते स॒ ऽए॒ष ऽए॒वैषोऽधिदेव॒तम॑य॒मध्या॑त्मम् ॥ २३ ॥ (B)

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥

कण्डिकासंख्या ॥ १०९ ॥

सँव॑त्सरो॒ वै प्र॒जाप॑तिरग्नि॒ः। स॒ोमो॒ रा॒जा चन्द्र॒मा॒ः स॒ ह॒ स्वय॒मे॒वात्मा॑नम्प्रो॒चे य॒ज्ञ॒वच॑से राजस्तम्बायन॒ाय॒ या॒वन्ति॑ वाव॒ मे॒ ज्यो॒तीꣳषि॒ ता॒वत्यो॒ म॒ऽइ॒ष्टका॒ इ॒ति॑ ॥ १ ॥ त॒स्य॒ वा॒ ऽए॒त॒स्य॒ सँव॑त्सर॒स्य॒ प्र॒जाप॑ते॒ः। स॒प्त॒ च॒ श॒ता॒नि॒ वि॒ꣳ॒श॒ति॒श्च॒ाहो॒रा॒त्रा॒णि॒ ज्यो॒तीꣳषि॒ ता ऽइ॒ष्टका॒ः॑ षष्टि॒श्च॒ त्री॒णि॒ च॒ श॒ता॒नि॒ परि॑श्रि॒त॒ः॑ षष्टि॒श्च॒ त्री॒णि॒ च॒ श॒ता॒नि॒ स॒जुष्म॑त्य॒ः॑ सोऽय॒ꣳ॒ सँव॑त्सर॒ः॑ प्र॒जा॑पति॒ः॑ स॒र्वा॒णि॒ भू॒ता॒नि॒ स॒सृ॒जे॒ य॒च्च॒ प्रा॒णि॒ य॒च्चा॒प्रा॒णमु॒॑ भ॒या॒न्देव॒मनु॑ष्यान्त्स॒ स॒र्वा॒णि॒ भू॒ता॒नि॒ सृ॒ष्ट्वा॒ रि॒रि॒चा॒न॒ ऽइ॒व॒ मे॒ने॒ स॒ मृ॒त्यो॒र्बि॑भया॒ञ्च॒का॒र॒ ॥ २ ॥ स॒ ई॒क्षा॒ञ्च॒क्रे॒। कथ॒-

(B) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. ४. १।

न्वहमिमानि सर्वाणि भूतानि पुनरात्मन्नावपेय पुनरात्मन्दधीय कथन्वहमेवैषाꣳ सर्वेषाम्भूतानाम्पुनरात्मा स्यामिति ॥ ३ ॥ स द्वेधात्मानं व्यौहत् । षष्टिꣳच्च त्रीणि च शतान्यन्यतरस्येष्टका ऽअभवन्नेवमन्यतरस्य स न व्याप्नोत् ॥ ४ ॥ त्रीनात्मनोऽकुरुत । तिस्रस्तिस्रोऽशीतय ऽएकैकस्येष्टका ऽअभवन्त्स नैव व्याप्नोत् ॥ ५ ॥ चतुर ऽआत्मनोऽकुरुत । अशीतिꣳशतेष्टकान्त्स नैव व्याप्नोत् ॥ ६ ॥ पञ्चात्मनोऽकुरुत । चतुश्चत्वारिꣳशꣳशतमेकैकस्येष्टका ऽअभवन्त्स नैव व्याप्नोत् ॥ ७ ॥ षडात्मनोऽकुरुत । विꣳशतिꣳशतेष्टकान्त्स नैव व्याप्नोन्न सप्तधा व्यभवत् ॥ ८ ॥ अष्टावात्मनोऽकुरुत । नवतीष्टकान्त्स नैव व्याप्नोत् ॥ ९ ॥ नवात्मनोऽकुरुत । अशीतीष्टकान्त्स नैव व्याप्नोत् ॥ १० ॥ दशात्मनोऽकुरुत । द्वासप्ततीष्टकान्त्स नैव व्याप्नोन्नैकादशधा व्यभवत् ॥ ११ ॥ द्वादशात्मनोऽकुरुत । षष्टीष्टकान्त्स नैव व्याप्नोन्न त्रयोदशधा व्यभवन्न चतुर्दशधा ॥ १२ ॥ पञ्चदशात्मनोऽकुरुत । अष्टाचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोत् ॥ १३ ॥ षोडशात्मनोऽकुरुत । पञ्चचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्न सप्तदशधा व्यभवत् ॥ १४ ॥ अष्टादशात्मनोऽकुरुत । चत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैकान्न विꣳशतिधा व्यभवत् ॥ १५ ॥ विꣳशतिमात्मनोऽकुरुत । षट्त्रिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैक-

विꣳशतिधा व्यभवन्न द्वाविꣳशतिधा न त्रयोविꣳशतिधा ॥ १६ ॥ चतुर्विꣳशतिमात्मनोऽकुरुत । त्रिꣳशदिष्टकान्त्सोऽत्रातिष्ठत पञ्चदशे व्यूहे तद्यत्पञ्चदशे व्यूहेऽतिष्ठत तस्मात्पञ्चदशापूर्य्यमाणस्य रूपाणि पञ्चदशापक्षीयमाणस्य ॥ १७ ॥ अथ यच्चतुर्विꣳशतिमात्मनोऽकुरुत । तस्माच्चतुर्विꣳशत्यर्द्धमासः सँवत्सरः स ऽएतैश्चतुर्विꣳशत्या त्रिꣳशदिष्टकैरात्मभिर्न्न व्यभवत्स पञ्चदशाहन्नो रूपाण्यपश्यदात्मनस्तन्नो मुहूर्त्ताँल्लोकम्पृणाः पञ्चदशैव रात्रेस्तद्यन्मुहु ह्रायन्ते तस्मान्मुहूर्त्ता ऽअथ यत्क्षुद्राः सन्त ऽइमाँल्लोकानापूरयन्ति तस्माल्लोकम्पृणाः ॥ १८ ॥ एष वा ऽइदꣳ सर्व्वम्पचति । अहोरात्रैरर्द्धमासैर्म्मासैर्ऋतुभिः सँवत्सरेण तदमुना पक्वमयम्पचति पक्वस्य पक्तेति ह स्माह भारद्वाजोऽग्निममुना हि पक्वमयम्पचतीति ॥ १९ ॥ तानि सँवत्सरे । दश च सहस्राण्यष्टौ च शतानि समपद्यन्त सोऽत्रातिष्ठत दशसु च सहस्रेष्वष्टासु च शतेषु ॥ २० ॥ अथ सर्व्वाणि भूतानि पर्य्यैक्षत् । स त्रय्यामेव विद्यायाꣳ सर्व्वाणि भूतान्यपश्यदृचा हि सर्व्वेषाञ्छन्दसामात्मा सर्व्वेषाꣳ स्तोमानाꣳ सर्व्वेषाम्प्राणानाꣳ सर्व्वेषान्देवानामेतद्वा ऽअस्त्येतदक्षयमृतं यदक्षयमृतन्तदक्षयस्त्येतदु तद्यन्मर्त्यम् ॥ २१ ॥ स ऽऐक्षत प्रजापतिः । त्रय्यां वाव विद्यायाꣳ सर्व्वाणि भूतानि हन्त त्रयीमेव विद्यामात्मानमभिसंस्करवा ऽइति ॥ २२ ॥ स ऽऋचो व्यौहत् । द्वादश बृहतीसहस्राण्येतावत्यो हऽर्चो

यो॑ऽ प्रजा॒पतिसृष्टास्ता॒स्त्रिꣳ॑शत्तमे॒ व्यू॒हे प॒ङ्क्ति॒ष्व॒तिष्ठ॒न्त ता यत्त्रिꣳ॑शत्तमे॒ व्यू॒हेऽति॒ष्ठ॒न्त॒ तस्मा॒त्त्रिꣳ॑शन्मा॒सस्य॑ रा॒त्र॒यो॒ऽथ॒ यत्प॒ङ्क्ति॒षु॒ तस्मा॑त्पाङ्क्तः* प्रजा॒पतिस्ता ऽअ॑ष्टा॒-शतꣳ॑ श॒ता॒नि॒ प॒ङ्क्त॒यो॒ऽभ॒व॒न् ॥ २३ ॥ अ॒थे॒तरौ॒ वे॒दौ व्यौ॑हत्। द्वा॒द॒शैव॒ बृ॒ह॒ती॒स॒ह॒स्रा॒ण्य॒ष्टौ य॒जु॒षा॒श्च॒त्वा॒रि सा॒म्नामे॒तावद्वै॒ तयो॑र्वे॒दयो॑र्यत्प्रजा॒पतिसृ॑ष्टन्तौ त्रिꣳ॑शत्तमे॒ व्यू॒हे प॒ङ्क्ति॒ष्व॒तिष्ठ॒ता॒न्तौ॒ यत्त्रिꣳ॑शत्तमे॒ व्यू॒हेऽति॒ष्ठ॒ता॒न्त॒-स्मा॒त्त्रिꣳ॑शन्मा॒सस्य॑ रा॒त्र॒यो॒ऽथ॒ यत्प॒ङ्क्ति॒षु॒ तस्मा॑त्पाङ्क्तः प्रजा॒पतिस्ता ऽअ॑ष्टा॒शत॑मेव॒ श॒ता॒नि॒ प॒ङ्क्त॒यो॒ऽभ॒व॒न् ॥ २४ ॥ ते सर्वे॑ त्रयो॑ वे॒दाः। दश॑ च स॒ह॒स्रा॒ण्य॒ष्टौ च॑ श॒ता॒न्य॒शी॒ती॒ना॒मभ॑वन्त्स॒ मु॒हू॒र्त्ते॒न-मु॒हू॒र्त्ते॒नै॒वाशी॑तिमाप्नो॒-न्मु॒हू॒र्त्ते॒न-मु॒हू॒र्त्ते॒नाशी॑तिः स॒मप॑द्यत ॥ २५ ॥ स॒ ऽए॒षु॒ त्रि॒षु॒ लो॒के॒षू॒खा॒याम्। यो॒नौ रे॒तो भू॒त॒मा॒त्मा॒न॒मसि॑ञ्च॒च्छन्दो॑मयꣳ॑ स्तोमम॒य॒म्प्राण॑मय॒न्दे॒व॒ता॒म॒य॒न्त॒स्यार्द्ध॑मासे॒ प्रथ॑म॒ ऽआत्मा॒ स॒म॒स्क्रि॒य॒त॒ दु॒वी॒य॒सि॒ प॒रो दु॒वी॒य॒सि॒ प॒रः॒ सँव॑त्सर॒ ऽए॒व सर्व॑ः॒ कृ॒त्स्न॒ः॒ स॒म॒स्क्रि॒य॒त॒ ॥ २६ ॥ तद्य॒त्परि॑श्रि॒त॒मु॒पा॒ध॒त्त। तद्त्रा॒त्रि॒मु॒पा॒ध॒त्त॒ तदु॒नु॒ प॒ञ्च॒द॒श॒ मु॒हू॒र्त्ता॒न्मु॒हू॒र्त्ता॒न॒नु॒ प॒ञ्च॒द॒शा॒शी॒ती॒र॒थ॒ यद्य॒-जु॒ष्म॒ती॒मु॒पा॒ध॒त्त॒ तदु॒हरु॒पा॒ध॒त्त॒ तदु॒नु॒ प॒ञ्च॒द॒श॒ मु॒हू॒र्त्ता॒-न्मु॒हू॒र्त्ता॒न॒नु॒ प॒ञ्च॒द॒शा॒शी॒ती॒रे॒व॒मे॒ता॒न्त्र॒यीं वि॒द्यामा॑त्मन्नाव॒-पता॑त्मन्नकुरुत॒ सो॒ऽत्रैव सर्वे॑षाम्भू॒ता॒ना॒मा॒त्मा॒ भ॒व॒च्छन्दो॑मय स्तोमम॒यः॒ प्राण॑मयो॒ देव॑ता॒म॒यः॒ स॒ ऽए॒त॒न्म॒य॒ ऽए॒व

* पाङ्क्तत्वं नाम पञ्चसंख्यावत्त्वम्, पञ्चपदा पङ्क्तिरिति सख्यासाम्यात्' प्रजापतेर्लोमत्वङ्मा-मास्थिमज्जात्मानः पञ्चचितय इति षष्ठे प्रतिपादितम्। (१) 'ग' 'ज' पुस्तकयोः 'नाशी०'

भूत्वोर्द्ध ऽउदक्क्रामत्स यः स ऽउदक्क्रामदेष स चन्द्रमाः ॥ २७ ॥ तस्यैषा प्रतिष्ठा । य ऽएष तपत्येतस्मादेवाक्ष्यचीयतैतस्मिन्नक्ष्यचीयतात्मन ऽएवैनन्तन्निरमिमीतात्मनः प्राजनयत् ॥ २८ ॥ स यदग्निश्चेष्ष्यमाणो दीक्षते । यथैव तत्प्रजापतिरेषु त्रिषु लोकेषूखायां रयोनौ रेतो भूतमात्मानमसिञ्चदेवमेवैष ऽएतदात्मानमुखायां रयोनौ रेतो भूतः सिञ्चति च्छन्दोमयꣳ स्तोममयम्प्राणमयन्देवतामयन्तस्यार्द्धमासे प्रथम ऽआत्मा संस्क्रियते द्वीपसि परो द्वीयसि परः सँवत्सर ऽएव सर्वः कृत्स्नः संस्क्रियते ॥ २९ ॥ तद्यत्परिश्रितमुपधत्ते । तद्वात्रिमुपधत्ते तदनु पञ्चदश मुहूर्त्तान्मूहूर्त्ताननु पञ्चदशाशीतीरथ यद्यजुष्मतीमुपधत्ते तदुहरुपधत्ते तदनु पञ्चदश मुहूर्त्तान्मुहूर्त्ताननु पञ्चदशाशीतीरेवमेतान्त्रयीं विद्यामात्मन्नावपत ऽआत्मन्कुरुते सोऽत्रैव सर्वेषाम्भूतानामात्मा भवति च्छन्दोमय स्तोममयः प्राणमयो देवतामयः स ऽएतन्मय ऽएव भूत्वोर्द्ध ऽउत्क्रामति ॥ ३० ॥ तस्यैषा प्रतिष्ठा । य ऽएष तपत्येतस्मादेवाधिचीयत ऽएतस्मिन्नधिचीयत ऽआत्मन ऽएवैनन्तन्निर्म्मिमीत ऽआत्मनः प्रजनयति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति च्छन्दोमयꣳ स्तोममयम्प्राणमयन्देवतामयः स ऽएतन्मय ऽएव भूत्वोर्द्ध ऽउत्क्रामति य ऽएवं विद्वानेतत्कर्म्म कुरुते यो वैतदेवं वेद ॥३१॥(E)

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

(E) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा—का० श० १२. ४. १ ।

[संवत्सररूपप्रजापतेर्मृत्यवन्तरूपत्वम्, तद्रूपोपासनस्य फलम्, अग्निचयनस्यामृतलक्षणं फलं, परिश्रित्यनुष्मती-लोकम्पृणेष्टकानां संख्या च]

एष वै मृत्युर्य्यत्सँवत्सरः। एष हि मर्त्यानामहोरात्राभ्यामायुः क्षिणोत्यथ म्रियन्ते तस्मादेष ऽएव मृत्युः स यो हैतम्मृत्युꣳ सँवत्सरं वेद न हास्यैष पुरा जरसोऽहोरात्राभ्यामायुः क्षिणोति सर्वꣳ हैवायुरेति ॥ १ ॥ एष ऽउ ऽएवान्तकः। एष हि मर्त्यानामहोरात्राभ्यामायुषोऽन्तङ्गच्छत्यथ म्रियन्ते तस्मादेष ऽएवान्तकः स यो हैतमन्तकम्मृत्युꣳ सँवत्सरं वेद न हास्यैष पुरा जरसोऽहोरात्राभ्यामायुषोऽन्तङ्गच्छति सर्वꣳ हैवायुरेति ॥ २ ॥ ते देवाः। एतस्मादुन्तकान्मृत्योः सँवत्सरात्प्रजापतेर्ब्बिभयाञ्चक्रुर्य्यद्वै नोऽयमहोरात्राभ्यामायुषोन्तन्न गच्छेदिति ॥ ३ ॥ त ऽएतान्यज्ञक्रꣳतूꣳस्तेनिरे। अग्निहोत्रन्दर्शपूर्ण्णमासौ चातुर्म्मास्यानि पशुबन्धꣳ सौम्यमद्धरन्त ऽएतैर्य्यज्ञक्रतुभिर्य्यजमानानामृतत्वमानशिरे ४ ते ह्याप्त्यग्निञ्चिक्रियरे। ते ऽपरिमिता ऽएव परिश्रित ऽउपदधुरपरिमिता यजुष्मतीरपरिमिता लोकम्पृणा यथेदमप्येतर्ह्येक ऽउपदधतीति देवा ऽअकुर्वन्निति ते ह नैवामृतत्वमानशिरे ॥ ५ ॥ तेऽर्च्चन्तः श्राम्यन्तश्चेरुः। अमृतत्वमवरुरुत्समानास्तान्ह प्रजापतिरुवाच न वै मे सर्वाणि रूपाण्युपधत्तेति वैव रेचयथ न वाऽभ्यापयथ तस्मान्नामृता भवथेति ॥ ६ ॥ ते होचुः। तेऽभ्यो वै

(१) अवरोद्धुकामाः। (२) 'ग' 'ज' पुस्तकयोः 'धत्था' इति पाठः समुपलभ्यते।

नस्त्वमेव तद् ब्रूहि यथा ते सर्वाणि रूपाण्युपदधामेति ॥७॥ स होवाच । षष्टिश्च त्रीणि च शतानि परिश्रित ऽउपधत्त षष्टिश्च त्रीणि च शतानि यजुष्मतीरधि षट्त्रिंशतमथ लोकम्पृणा दश च सहस्राण्यष्टौ च शतान्युपधत्ताथ मे सर्वाणि रूपाण्युपधास्यथाथामृता भविष्यथेति ते ह तथा देवा ऽउपदधुस्ततो देवा ऽअमृता ऽआसुः ॥ ८ ॥ स मृत्युर्देवानब्रवीत् । इत्थमेव सर्वे मनुष्या ऽअमृता भविष्यन्त्यथ को मह्यम्भागो भविष्यतीति ते होचुर्नातोऽपरः कश्चन सह शरीरेणामृतोऽसद्यदैवस्त्वमेतम्भागः हरासा ऽअथ व्यावृत्य शरीरेणामृतोऽसद्योऽमृतोऽसद्विद्यया वा कर्म्मणा वेति यद्वै तदब्रुवन्निव्यया वा कर्म्मणा वेत्येषा हैव सा विद्या यदग्निरेतदु हैव तत्कर्म्म यदग्निः ॥ ९ ॥ ते य ऽएवमेतद्विदुः । ये वैतत्कर्म्म कुर्वते मृत्वा पुनः सम्भवन्ति ते सम्भवन्त ऽएवामृतत्वमभिसम्भवन्त्यथ य ऽएवन्न विदुर्ये वैतत्कर्म्म न कुर्वते मृत्वा पुनः सम्भवन्ति त ऽएतस्यैवान्नम्पुनः पुनर्भवन्ति ॥ १० ॥ स यदग्निञ्चिनुते । एतमेव तदुन्तकम्मृत्युः सँवत्सरम्प्रजापतिमग्निमाप्नोति यन्देवा ऽआप्नुवन्नेतमुपधत्ते यथैवैनमदो देवा ऽउपादधत ॥ ११ ॥ परिश्रिद्भिरेवास्य रात्रीराप्नोति । यजुष्मतीभिरहान्यर्द्धमासान्मासानृतूँल्लोकम्पृणाभिर्मुहूर्त्तान् ॥ १२ ॥ तद्याः परिश्रितः । रात्रिलोकास्ता रात्रीणामेव साप्तिः क्रियते रात्रीणाम्प्रतिमा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै

त्रीणि च शतानि सँवत्सरस्य रात्रयस्तासामेकविꣳशतिर्ग्राहपत्ये परिश्रयति द्वाभ्यान्नाशीतिर्न्धिष्ण्येषु द्वे ऽएकषष्टे शते ऽआहवनीये ॥ १३ ॥ अथ यजुष्मत्यः दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णꣳ रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतः सिचौ विश्वज्योतिर्ऋतव्ये ऽअषाढा कूर्म्म ऽउलूखलमुसले ऽउखा पञ्च पशुशीर्षाणि पञ्चदशापस्याः पञ्च छन्दस्याः पञ्चाशत्प्राणभृतस्ता द्वाभ्यान्न शतम्प्रथमा चितिः ॥ १४ ॥ [अर्धप्रपाठः ४५] अथ द्वितीया । पञ्चाश्विन्यो द्वे ऽऋतव्ये पञ्च वैश्वदेव्यः पञ्च प्राणभृतः पञ्चापस्या ऽएकया न त्रिꣳशतिर्व्वयस्यास्ता ऽएकचत्वारिꣳशद्द्वितीया चितिः ॥ १५ ॥ अथ तृतीया । स्वयमातृण्णा पञ्च दिश्या विश्वज्योतिश्चतस्र ऽऋतव्या दश प्राणभृतः षट्त्रिꣳशच्छन्दस्याश्चतुर्दश बालखिल्ल्यास्ता ऽएकसप्ततिस्तृतीया चितिः ॥ १६ ॥ अथ चतुर्थी । अष्टादश प्रथमा ऽअथ द्वादशाऽथ सप्तदश ताः सप्तचत्वारिꣳशच्चतुर्थी चितिः ॥ १७ ॥ अथ पञ्चमी । पञ्चासपत्नाश्चत्वारिꣳशद्विराज ऽएकया न त्रिꣳशत्स्तोमभागाः पञ्च नाकसदः पञ्च पञ्चचूडा ऽएकत्रिꣳशच्छन्दस्या ऽअष्टौ गार्हपत्या चितिरष्टौ पुनश्चितिर्ऋतव्ये विश्वज्योतिर्विमर्ण्णी च स्वयमातृण्णा चाश्मा पृश्निरर्ष्यश्चिचतेऽग्निर्न्निधीयते ता ऽअष्टात्रिꣳशꣳ शतम्पञ्चमी चितिः ॥ १८ ॥ ताः सर्वाः पञ्चभिर्न्न चत्वारि शतानि । ततो याः षष्टिश्च त्रीणि च शतान्यहल्लोकास्ता

ऽअहन्नामेव साप्तिः क्रियतेऽहन्नाम्प्रतिमा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि सँवत्सरस्याहान्यथ याः षट्त्रिंशत्पुरीषन्तासाꣳ षट्त्रिंशी ततो याश्चतुर्विंशतिरर्द्धमासलोकास्ता ऽअर्द्धमासानामेव साप्तिः क्रियतेऽर्द्धमासानाम्प्रतिमाथ या द्वादश मासलोकास्ता मासानामेव साप्तिः क्रियते मासानाम्प्रतिमा ता ऽउ द्वे-द्वे सहर्त्तुलोका ऽऋतूनामशून्यतायै ॥ १९ ॥ अथ या लोकम्पृणाः। मुहूर्त्तलोकास्ता मुहूर्तानामेव साप्तिः क्रियते मुहूर्त्तानाम्प्रतिमा ता दश च सहस्राण्यष्टौ च शतानि भवन्त्येतावन्तो हि सँवत्सरस्य मुहूर्त्तास्तासामेकविंशतिङ्गार्हपत्य ऽउपदधाति द्वाभ्यान्नाशीतिन्धिष्ण्येष्वाहवनीय ऽइतरा ऽएतावन्ति वै सँवत्सरस्य रूपाणि तान्यस्यात्राप्तान्युपहितानि भवन्ति ॥ २० ॥ तद्धैके। आहवनीय ऽएवैताꣳ सम्पदमापिपयिषन्त्यन्ये वा ऽएतेऽग्नयश्चिताः किमन्यत्रोपहिता ऽइह सम्पश्येमेति न तथा कुर्य्याद्दश वा ऽएतानग्नीञ्चिनुतेऽष्टौधिष्ण्यानाहवनीयश्च गार्हपत्यश्च तस्मादाहुर्विराडग्निरिति दशाक्षरा हि विराट् तानु सर्वानेकमिवैवाचक्षतेऽग्निरित्येतस्य ह्येवैतानि सर्वाणि रूपाणि यथा सँवत्सरस्याहोरात्राण्यर्द्धमासा मासा ऽऋतव ऽएवमस्यैतानि सर्वाणि रूपाणि ॥ २१ ॥ ते ये ह तथा कुर्वन्ति एतानि हास्य ते रूपाणि बहिर्द्धा कुर्वन्त्यथो पापवस्यसङ्कुर्वन्ति क्षत्राय विꣳशम्प्रतिप्रतिनीम्प्रत्युद्यामिनीमाग्नी-

द्धीये वा ऽअश्मानम्पृष्ठिन्नमुपदधात्यथ तः सम्पश्यति किमुतः सम्पश्यन्नितरा न सम्पश्येद्येनैव निर्ऋतिम्पाप्मानमपहते स ऽएकादशः ॥ २२ ॥ तदाहुः । कथमु ता ऽअत्र न सम्पश्यतीति न ह्येना ऽअभिजुहोत्याहुत्या वा ऽइष्टका सर्वा कृत्स्ना भवतीति ॥ २३ ॥ तदाहुः । कथमस्यैता ऽअनतिरिक्ता ऽउपहिता भवन्तीति वीर्य्यं वा ऽअस्यैता ऽअनतिरिक्तं वै पुरुषं वीर्य्यः स ह वा ऽएतः सर्वङ्कृत्स्नम्प्रजापतिः संस्करोति य ऽएवं विद्वानेतत्कर्म्म कुरुते यो वैतदेवं वेद ॥ २४ ॥ (A)

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥



[संवत्सररूपाग्नेः, तदवयवानाञ्च सहस्ररूपत्वेनोपासनम् , तत्फलञ्च]

प्रजापतिं वै प्रजाः सृजमानम् । पाप्मा मृत्युरभिपरिजघान स तपोऽतप्यत सहस्रः सँवत्सरान्पाप्मानं विजिहासन् ॥१॥ तस्य तपस्तेपानस्य । एभ्यो लोमगर्त्तेभ्य ऽऊर्द्धानि ज्योतीꣳष्यायँस्तद्यानि तानि ज्योतीꣳष्येतानि तानि नक्षत्राणि यावन्त्येतानि नक्षत्राणि तावन्तो लोमगर्त्ता यावन्तो लोमगर्त्तास्तावन्तः सहस्रसँवत्सरस्य मुहूर्त्ताः ॥ २ ॥ स सहस्रतमे सँवत्सरे । सर्वोऽत्यपवत स यः सोऽत्यपवतायमेव स वायुर्य्योऽयम्पवतेऽथ यन्तम्पाप्मानमत्यपवतेदन्तच्छरीरङ्क ऽउ तस्मै मनुष्यो यः सहस्रसँवत्सरमवरुन्धीत विद्यया ह वा ऽएवंवित्सहस्रसँवत्सर-

(A) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. ४ ३ ।

मवरुन्द्धे ॥ ३ ॥ सर्वा ऽएवैता ऽइष्टकाः साहस्रीरुपासीत। रात्रिसहस्रेण रात्रिसहस्रेणैकैकाम्परिश्रितः सम्पन्नामुपासीताहःसहस्रेणाहःसहस्रेणैकैकामहर्भाजमर्द्धमाससहस्रेणार्द्धमाससहस्रेणैकैकामर्द्धमासभाजम्मासंसहस्रेण मासंसहस्रेणैकैकाम्मासभाजमृतुसहस्रेण ऽर्तुसहस्रेणैकैकामृतुभाजम्मुहूर्त्तसहस्रेण मुहूर्त्तसहस्रेणैकैकाम्मुहूर्त्तभाजः सँवत्सरसहस्रेण सँवत्सरन्ते य ऽएतमेवमग्निः सँवत्सरेण सम्पन्नं विदुः सहस्रतमीꣳ हास्य ते कलां विदुरथ य ऽएनमेवन्न विदुर्न्न हास्य ते सहस्रतमीञ्चन कलां विदुरथ य ऽएवैवं वेद यो वैतत्कर्म्म कुरुते स हैवैतः सर्वङ्कृत्स्नम्प्राजापत्यमग्निमाप्नोति यम्प्रजापतिराप्नोत्तस्मादेवंवित्तप ऽएव तप्यते यदु ह वा ऽएवंवित्तपस्तप्यत ऽआमैथुनात्सर्वः हास्य तत्स्वर्गंल्लोकमभिसम्भवति ॥ ४ ॥ तदेतदृचाभ्युक्तम् । 'न मृषाऽश्रान्तं यदवन्ति देवा' ऽइति न हैवैवं विदुषः किञ्चन मृषाऽश्रान्तम्भवति तथो हास्यैतत्सर्वन्देवा ऽअवन्ति ॥ ५ ॥ (B)

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४

[व्यष्टिरूपाग्निविषयोपासना]

अथादेशा ऽउपनिषदाम्। वायुरग्निरिति ह शाकायनिन ऽउपासत ऽआदित्योऽग्निरित्यु हैक ऽआहुरथ ह स्माह श्रौमत्यो वा हालिङ्गवो वा वायुरेवाग्निस्तस्माद्य-

(१) ऋ० सं० अ० १. अ० ४ व० १२।

(B) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श्रौ० १२. ४. ४।

दैवाद्वर्ष्युरुत्तमङ्कर्म्म करोत्यथैतमेवाप्येतीति ॥ १ ॥ शाट्यायनिरु ह स्माह । सँवत्सर ऽएवाग्निस्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षा ऽउत्तरः शरदृतुर्म्मद्ध्यमात्मा हेमन्तशिशिरावृतू पुच्छम्प्रतिष्ठा वागग्निः प्राणो वायुश्चक्षुरादित्यो मनश्चन्द्रमाः श्रोत्रन्दिश ऽआपो मिथुनन्तपः प्रतिष्ठा मासाः पर्व्वाण्यर्द्धमासा नाड्ड्योऽहोरात्राणि रजतसुवर्ण्णानि पत्राणि स ऽएवन्देवानप्येतीति सँवत्सरोऽग्निरित्यु हैव विद्यादेतन्मयो भवतीति त्वेव विद्यात् ॥ २ ॥ चेलक ऽउ ह स्माह शाण्डिल्यायनः । इम ऽएव लोकास्तिसूः स्वयमातृण्णवत्यश्चितयो यजमानश्चतुर्थी सर्व्वे कामाः पञ्चमीमाँश्च लोकान्त्संस्कुर्व्व ऽआत्मानञ्च सर्व्वाँश्च कामानित्येव विद्यादिति ॥ ३ ॥ (C)

चतुर्थाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

[त्रयीमयादित्येऽग्न्युपासना]

तस्य वा ऽएतस्याग्नेः । वागेवोपनिषद्वाचा हि चीयत ऽऋचा यजुषा साम्नेति नु दैव्व्याऽथ यज्ञमानुष्व्या वाचाहेतीदङ्करुतेतीदङ्करुतेति तदु ह तया चीयते ॥ १ ॥ सा वा ऽएषा वाक्त्रेधाविहिता । ऋचो यजूꣳषि सामानि तेनाग्नित्रेधाविहित ऽएतेन हि त्रयेण चीयतेऽप्यहैव-

(C) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श० १२. ४. ५ ।

न्त्रेधाविहित ऽइत्थ॒ह॒ ह॒ त्वेवापि त्रेधाविहितो यदस्मिँ॑म॒स्त्रेधाविहिता ऽइष्टका ऽउपधीय॒न्ते पुन्नाम्न्य स्त्रीनाम्न्यो नपुं॒सकनाम्न्यस्त्रेधाविहिताह्यु ऽएवेमानि पुरुषस्याङ्गानि पुन्नामानि स्त्रीनामानि नपुं॒सकनामानि ॥ २ ॥ * सो॒ ऽयमात्मा त्रेधाविहित एव । सोऽनेन त्रेधाविहितेनात्मनैतन्त्रेधाविहितन्दैवममृतमाप्नोति ता ऽउ सर्वा ऽइष्टका ऽइत्येवाचक्षते नेष्टक ऽइति नेष्टकमिति वाचो रूपेण ब्राग्ध्येवैतत्सर्वं स्यत्स्त्री पुमान्नपुं॒सकं वाचा ह्येवैतत्सर्वमाप्तन्तस्मादेना 'ऽऔङ्गिरस्वद्ध्रुवा सीदे॒'त्येव सर्वाः साद॒यति नाङ्गिरस्वद्ध्रुवः सीदे॒ति नाङ्गिरस्वद्ध्रुवः सीदे॒ति वाच॑मेवैता॑मँ संस्कुरुते ॥ ३ ॥ सा या सा वागसौ स ऽआदित्यः । स ऽएष मृत्युस्तद्यत्किञ्चार्वाचीनमादित्यात्सर्वन्तन्मृत्युनाप्तः स यो हैनमतोऽर्वाचीनञ्चिनुते मृत्युना हैनः स ऽआप्तञ्चिनुते मृत्यवे ह स ऽआत्मानमपिदधात्यथ य ऽएनमत ऽऊर्द्धञ्चिनुते स पुनर्म्मृत्युमपजयति विद्यया ह वा ऽअस्यैषोऽत ऽऊर्द्धश्चितो भवति ॥ ४ ॥ सा वा ऽएषा वाक्त्रेधाविहिता । ऋचो यजूँषि सामानि मण्डलमेव ऽऋचोऽर्च्चिः सामानि पुरुषो यजूँष्यथैतदमृतं यदेतदर्च्चिर्द्दीप्यत ऽइदन्तत्पुष्करपर्णन्तद्यत्पुष्करपर्णमुपधायाग्निञ्चिनोत्येतस्मिन्नेवैतदमृत ऽऋङ्

* अत्र शतम् ५४०० ।

(१) शु० य० स० अ० १२ क० ५३ ।

मयं ऋचुर्म्मयः साममयमात्मानः संस्कुरुते सोऽमृतो भवति ॥ ५ ॥ (D)

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[सूर्यमण्डलार्चिःपुरुषत्रयस्याधिदैवाधियज्ञाध्यात्मपरत्वेनार्थप्रतिपादनम्]

यदेतन्मण्डलन्तपति । तन्महदुक्थन्ता ऽऋचः स ऽऋचाँल्लोकोऽथ यदेतदर्च्चिर्दीप्यते तन्महाव्रतन्तानि सामानि स साम्नाँल्लोकोऽथ य ऽएष ऽएतस्मिन्मण्डले पुरुषः सोऽग्निस्तानि यजूꣳषि स यजुषाँल्लोकः ॥ १ ॥ सैषा ब्रह्मैव विद्या तपति । तद्धैतदप्यविद्वाꣳस ऽआहुस्त्रयी वा ऽएषा विद्या तपतीति ब्राह्मैव तत्पश्यन्ती वदति ॥ २ ॥ स ऽएष ऽएव मृत्युः । य ऽएष ऽएतस्मिन्मण्डले पुरुषोऽथैतदमृतं यदेतदर्च्चिर्दीप्यते तस्मान्मृत्युर्न्न म्रियतेऽमृते ह्यन्तस्तस्माद् न दृश्यतेऽमृते ह्यन्तः ॥ ३ ॥ तदेष श्लोको * भवति । अन्तरम्मृत्योरमृतमित्यवरꣳ ह्येतन्मृत्योरमृतम्मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुष ऽएतन्मण्डलम्प्रतिष्ठितन्तपति मृत्युर्विवस्वन्तं वस्त ऽइत्यसौ वा ऽआदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्व्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डल ऽएतस्य पुरुषस्यात्मैतदेष श्लोको भवति ॥ ४ ॥ तयोर्व्वा ऽएतयोः । उभयोरेतस्य चार्च्चिष ऽएतस्य च

(D) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श० १२. ५. १ ।

* श्लोकः—मन्त्र. पादबद्धत्वसाम्यात् ।
"अर्द्धो वा एष आत्मनो यत्पत्नी"ति तैत्तिरीयश्रुतेः ॥

पुरुषस्यैतद्यन्मण्डलम्प्रतिष्ठा तस्मान्महदुक्थम्परस्मै न शꣳसेन्नेदताम्प्रतिष्ठाच्छिनदा ऽइत्येताꣳ ह स प्प्रतिष्ठाच्छिन्ते यो महदुक्थम्परस्मै शꣳसति तस्मादुक्थशसम्भूयिष्ठम्परिचक्षते प्रतिष्ठाच्छिन्नो हि भवतीत्यधिदेवतम् ॥ ५ ॥ अथाधियज्ञम् । यदेतन्मण्डलन्तपत्ययः स रुक्मोऽथ यदेतदर्च्चिर्दीप्यत ऽइदन्तत्पुष्करपर्णमापो ह्येताः आपः पुष्करपर्णमथ य ऽएष ऽएतस्मिन्मण्डले पुरुषोऽयमेव स योऽयꣳ हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयꣳ सँस्कृत्येहोपधत्ते तद्यज्ञस्यैवानु सꣳस्थामूर्द्धमुत्क्रामति तदेतमप्येति य ऽएष तपति तस्मादग्निन्नाद्रियेत परिहन्तुममुत्र ह्येष तदा भवतीत्यु ऽएवाधियज्ञम् ॥ ६ ॥ अथाध्यात्मम् । यदेतन्मण्डलन्तपति यच्चैष रुक्मऽइदन्तच्छुक्लमक्षन्नथ यदेतदर्च्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदन्तत्कृष्णमक्षन्नथ य ऽएष ऽएतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयन्दक्षिणेऽक्षन्पुरुषः ॥ ७ ॥ स ऽएष ऽएव लोकम्पृणा । तामेष सर्वोऽग्निरभिसम्पद्यते तस्यैतन्मिथुनꣳ रयोऽयः सव्येऽक्षन्पुरुषोऽर्द्धमु हैतदात्मनो यन्मिथुनꣳ रयदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्वः हि मिथुनम्प्रजननन्तस्माद्द्वे-द्वे लोकम्पृणे ऽउपधीयेते तस्मादु द्वाभ्यान्द्वाभ्याꣳश्रितिम्प्रणयन्ति ॥ ८ ॥ स ऽएष ऽएवेन्द्रः । योऽयन्दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यान्देवा ऽएतां विधृतिमकुर्वन्नासिकान्तस्माज्जायाया

ऽअन्ते नाश्नीयाद्वीर्य्यवान्हास्माज्जायते वीर्य्यवन्तमु ह सा जनयति यस्या ऽअन्ते नाश्नाति ॥ ९ ॥ तदेतदेवव्रतः राजन्यबन्धवो मनुष्याणामनुतमाङ्गोपायन्ति तस्मादु तेषु वीर्य्यवान्जायतेऽमृतवाका वयसाꣳ साक्षिप्प्रश्न्येनञ्ञनयति ॥ १० ॥ तौ हृदयस्याकाशम्प्रत्यवेत्य । मिथुनीभवतस्तौ यदा मिथुनस्यान्तङ्गच्छतोऽथ हैतत्पुरुषः स्वपिति तद्यथा हैवेदम्मानुषस्य मिथुनस्यान्तङ्गत्वासंविदुऽइव भवत्येवः हैवैतदसंविदु ऽइव भवति दैवꣳ ह्येतन्मिथुनम्परमो ह्येष ऽआनन्दः ॥ ११ ॥ तस्मादेवंविद्वित्स्वप्न्यात् । लोक्क्यः हैते ऽएव तद्देवते मिथुनेन प्रियेण धाम्ना समर्द्धयति तस्मादु ह स्वपन्तन्धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हिनसानीति तस्मादु हैतत्सुषुप्तः श्लेष्मणमिव मुखम्भवत्येते ऽएव तद्देवते रेतः सिञ्चतस्तस्माद्रेतस ऽइदः सर्वꣳ सम्भवति यदिदङ्किञ्च ॥ १२ ॥ स ऽएष ऽएव मृत्युः । य ऽएष ऽएतस्मिन्मण्डले पुरुषो यश्चायन्दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहतौ तौ हैतदाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्म्रियते तस्मादु हैतत्प्रेतमाहुराच्छेद्यस्येति ॥ १३ ॥ एष ऽउ ऽएव प्राणः । एष हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणाः स्वा ऽअपियन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तꣳ स्वप्न ऽइत्याचक्षते परोऽक्षम्परोऽक्षकामा हि देवाः ॥ १४ ॥ स ऽएतैः सुप्तः । न कस्य चन वेद न मनसा सङ्कल्प-

यति* न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳ ह्येते तदापीता भवन्ति स ऽएष ऽएकः सन्प्रजासु बहुधा व्व्याविष्टस्तस्मादेका सती लोकम्पृणा सर्वमग्निनमनु-विभवत्यथ षदेक ऽएव तस्मादेका ॥ १५ ॥ तदाहुः। एको मृत्युर्ब्बहुवा ३ इत्येकश्च बहुवश्चेति ह ब्रूयाद्यदुहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्व्याविष्टस्तेनो बहुवः ॥ १६ ॥ तदाहुः। अन्तिके मृत्युर्दूरा ऽइत्यन्तिके च दूरे चेति ह ब्रूयाद्यदुहायमिहाद्ध्यात्मन्तेनान्तिकेऽथ यदसावमुत्र तेनो दूरे ॥ १७ ॥ तदेष श्लोको भवति। अन्ने भात्यपश्रितो रसानाꣳ संक्षरेऽमृत ऽइति यदेतन्मण्डलन्तपति तदन्नमथ य ऽएष ऽएतस्मिन्मण्डले पुरुषः सोऽत्ता स ऽएतस्मिन्नन्नेऽपश्रितो भातीत्यधिदेवतम् ॥ १८ ॥ अथाद्ध्यात्मम्। इदमेव शरीरमन्नमथ योऽयन्दक्षिणेऽक्षन्पुरुषः सोऽत्ता स ऽएतस्मिन्नन्नेऽपश्रितो भाति ॥ १९ ॥ तमेतमग्निरित्यद्ध्वर्यव ऽउपासते। यजुरित्येष हीदꣳ सर्वं युनक्ति सामेति च्छन्दोगा ऽएतस्मिन्हीदꣳ सर्वꣳ समानमुक्थमिति बह्वृचा† ऽएष हीदꣳ सर्वमुत्थापयति यातुरिति यातुविद ऽएतेन हीदꣳ सर्वं युषतं विषमिति सर्प्पाः सर्प्प ऽइति सर्प्पविद ऽऊर्ग्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति पितरो देवजन ऽइति देवजनविदो रूपमिति गन्धर्व्वा

* सङ्कल्पोऽध्यवसाय. ।

† बाह्व ऋचो येषां ते बह्वृचा ऋग्वेदिनः ।

गन्ध ऽइत्यप्सरसस्तं स्यथा यथोपासते तदेव भवति तद्धैनान्भूत्वावति तस्मादेतमेवंवित्सर्वैरेवैतैरुपासीत सर्वः हैतद्भवति सर्वः हैनमेतद्भूत्वावति ॥ २० ॥ स ऽएष त्रीष्टकोऽग्निः । ऋगेका यजुरेका सामैका तद्याङ्काश्चात्रऽर्चोपदधाति रुक्मऽएव तस्या ऽआयतनमथ षां स्यजुषा पुरुष ऽएव तस्या ऽआयतनमथ षाष्ठं साम्ना पुष्करपर्णमेव तस्या ऽआयतनमेवन्त्रीष्टकः ॥ २१ ॥ ते वा ऽएते । उभे ऽएष च रुक्मऽएतच्च पुष्करपर्णमेतम्पुरुषमपीत ऽउभे ह्यृक्सामे यजुरपीत ऽएवम्वेकेष्टकः ॥ २२ ॥ स ऽएष ऽएव मृत्युः । य ऽएष ऽएतस्मिन्नम्मण्डले पुरुषो यश्चायन्दक्षिणेऽक्षन्पुरुषः स ऽएष ऽएवंविद ऽआत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥ २३ ॥ (A)

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
कण्डिकासंख्या ॥ ९१ ॥

[सकलपुरुषवर्त्तिमनोवाक्प्राणचक्षुःश्रोत्रकर्माग्निवृत्तिसम्पाद्यचित्याग्निविषयोपासनाकथनम्]

नेव वा ऽइदमग्रेऽसदासीन्नेव सदासीत् । आसीदिव वा ऽइदमग्रे नेवासीत्तद्ध तद्दमन ऽएवास ॥ १ ॥ तस्मा-

(A) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श० १२. ५. २ ।

देतदृषिणाऽभ्यनूक्तम् । नासदासीन्नो सदासीत्तदानीमिति नैव हि सन्मनो नेवासत् ॥ २ ॥ तदिदम्मनः सृष्टमाविरबुभूषत् । निरुक्ततरम्मूर्त्ततरन्तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्च्छत्तत्षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितस्ते मनसैवाधीयन्त मनसाचीयन्त मनसैषु ग्रहा ऽअगृह्यन्त मनसास्तुवत मनसा शꣳसन्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत तद्यत्किञ्चेमानि भूतानि मनसा सङ्कल्पयन्ति तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै मनसो विभूतिरेतावती विसृष्टिरेतावन्मनः षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक ऽएव तावान्न्यावानसौ पूर्वः ॥ ३ ॥ तन्मनो वाचमसृजत । सेयं वाक्सृष्टाविरबुभूषन्निरुक्ततरा मूर्त्ततरा सात्मानमन्वैच्छत्सा तपोऽतप्यत सा प्रामूर्च्छत्सा षट्त्रिंशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्वाङ्मयान्वाक्चितस्ते वाचैवाधीयन्त वाचाचीयन्त वाचैषु ग्रहा ऽअगृह्यन्त वाचास्तुवत वाचाशꣳसन्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म वाचैव तेषु तद्वाङ्मयेषु वाक्चित्सु वाङ्मयमक्रियत तद्यत्किञ्चेमानि भूतानि वाचा वदन्ति तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै वाचो विभूतिरेतावती

विसृष्टिरेतावती वाक्षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्न्यावानसौ पूर्वः ॥ ४ ॥ सा वाक्प्राणमसृजत । सोऽयम्प्राणः सृष्ट्व आविरबुभूषन्निरुक्ततरो मूर्त्ततरꣳ स आत्मानमन्वैच्छत्स तपोऽतप्यत स प्रामूर्च्छत्स षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्प्राणमयान्प्राणचितस्ते प्राणेनैवाधीयन्त प्राणेनाचीयन्त प्राणेनैषु ग्रहा अगृह्यन्त प्राणेनास्तुवत प्राणेनाशꣳसन्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म प्राणेनैव तेषु तत्प्राणमयेषु प्राणचित्सु प्राणमयमक्रियत तद्यत्किञ्चेमानि भूतानि प्राणेन प्राणन्ति तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै प्राणस्य विभूतिरेतावती विसृष्टिरेतावान्प्राणः षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्न्यावानसौ पूर्वः ॥ ५ ॥ स प्राणश्चक्षुरसृजत । तदिदꣳ चक्षुः सृष्ट्वमाविरबुभूषन्निरुक्ततरम्मूर्त्ततरन्तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्च्छत्तत्षट्त्रिꣳशतꣳसहस्राण्यपश्यदात्मनोऽग्नीनर्कांश्चक्षुर्म्मयाँश्चक्षुश्चितस्ते चक्षुषैवाधीयन्त चक्षुषाचीयन्त चक्षुषैषु ग्रहा अगृह्यन्त चक्षुषास्तुवत चक्षुषाशꣳसन्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म चक्षुषैव तेषु तच्चक्षुर्म्मयेषु चक्षुश्चित्सु चक्षुर्म्मयमक्रियत तद्यत्किञ्चेमानि भूतानि चक्षुषा पश्यन्ति तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येता-

वती वै चक्षुषो विभूतिरेतावती विसृष्टिरेतावच्चक्षुः षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्न्यावानसौ पूर्वः ॥ ६ ॥ तच्चक्षुः श्रोत्रमसृजत । तदिदꣳ श्रोत्रः सृष्टमाविरबुभूषन्निरुक्ततरम्मूर्त्ततरन्तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्च्छत्तत्षट्त्रिंशतः सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्छ्रोत्रमयाञ्छ्रोत्रचितस्ते श्रोत्रेणैवाधीयन्त श्रोत्रेणाचीयन्त श्रोत्रेणेषु ग्रहा ऽअगृह्यन्त श्रोत्रेणास्तुवत श्रोत्रेणाशः सन्न्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म श्रोत्रेणैव तेषु तच्छ्रोत्रमयेषु श्रोत्रचित्सु श्रोत्रमयमक्रियत तद्यत्किञ्चेमानि भूतानि श्रोत्रेण शृण्वन्ति तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शः सन्त्येतावती वै श्रोत्रस्य विभूतिरेतावती विसृष्टिरेतावच्छ्रोत्रः षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्न्यावानसौ पूर्वः ॥ ७ ॥ तच्छ्रोत्राङ्कर्म्मासृजत । तत्प्राणानभिसममूर्च्छदिमः सन्देघमन्नसन्देहमकृत्स्नं वै कर्म्मऽत्तं प्राणेभ्योऽकृत्स्ना ऽउ वै प्राणा ऽऋते कर्म्मणः ॥ ८ ॥ तदिदङ्कर्म्म सृष्टमाविरबुभूषत् । निरुक्ततरम्मूर्त्ततरन्तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्च्छत्तत्षट्त्रिंशतः सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्कर्म्ममयान्कर्म्मचितस्ते कर्म्मणैवाधीयन्त कर्मणाचीयन्त कर्म्मणेषु ग्रहा ऽअगृह्यन्त कर्म्मणास्तुवत कर्म्मणाशः सन्न्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्म कर्म्मणैव तेषु

तत्कर्म्ममयेषु कर्म्मचित्सु कर्म्ममयमक्रियत तद्यत्किञ्चेमानि भूतानि कर्म्म कुर्वते तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु शꣳसन्त्येतावती वै कर्म्मणो विभूतिरेतावती विसृष्टिरेतावत्कर्म्म षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक ऽएव तावान्न्यावानसौ पूर्वः ॥ ९ ॥ तत्कर्म्माग्निमसृजत । आविस्तरां वा ऽअग्निः कर्म्मणः कर्म्मणा ह्येनञ्जनयन्ति कर्म्मणेन्धते ॥ १० ॥ सोऽयमग्निः सृष्ट्व ऽआविरबुभूषत् । निरुक्ततरो मूर्त्ततरः स ऽआत्मानमन्वैच्छत्स तपोऽतप्यत स प्रामूर्च्छत्स षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कानग्निमयानग्निचितस्तेऽग्नैवाधीयन्ताग्निनाचीयन्ताग्निनैषु ग्रहा ऽअगृह्यन्ताग्निनास्तुवताग्निनाशꣳसन्यत्किञ्च यज्ञे कर्म्म क्रियते यत्किञ्च यज्ञियङ्कर्म्माग्निनैव तेषु तदग्निमयेष्वग्निचित्स्वग्निमयमक्रियत तद्यत्किञ्चेमानि भूतान्यग्निमिन्धते तेषामेव सा कृतिस्तानेवादधति ताँश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तवते तेषु शꣳसन्त्येतावती वा ऽअग्नेर्विभूतिरेतावती विसृष्टिरेतावानग्निः षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक ऽएव तावान्न्यावानसौ पूर्वः ॥ ११ ॥ ते हैते विद्याचित ऽएव । तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते विद्यया हैवैत ऽएवंविदश्चिता भवन्ति ॥ १२ ॥ (A)

पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

(A) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श० १२. ५. ३ ।

[भूम्यादिलोकत्रयादित्यनक्षत्रछन्दःसंवत्सरात्माचित्याग्नि-विषयोपासनाप्रतिपादनम्]

अयं वाव लोक ऽएषोऽग्निश्चितः । तस्याप ऽएव परिश्रितो मनुष्या यजुष्मत्य ऽइष्टकाः पशवः सूददोहा ऽओषधयश्च वनस्पतयश्च पुरीषमाहुतयः समिधोऽग्निर्लोकम्पृणा तद्वा ऽएतत्सर्वमग्निमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ १ ॥ अन्तरिक्षꣳ हु त्वेवैषोग्निश्चितः । तस्य द्यावापृथिव्योरेव सन्धिः परिश्रितः परेण हान्तरिक्षन्द्यावापृथिवी सन्धत्तस्ताः परिश्रितो वयाꣳसि यजुष्मत्य ऽइष्टका वर्षꣳ सूददोहा मरीचयः पुरीषमाहुतयः समिधो वायुर्लोकम्पृणा तद्वा ऽएतत्सर्वं वायुमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ २ ॥ द्यौर्हु त्वेवैषोऽग्निश्चितः । तस्याप ऽएव परिश्रितो यथा ह वा ऽइदङ्कोशः समुब्जित ऽएवमिमे लोका ऽअप्स्वन्तस्तद्या ऽइमाँल्लोकाꣳपरेणापस्ताः परिश्रितो देवा यजुष्मत्य ऽइष्टका यदेवैतस्मिँल्लोकेऽन्नन्तत्सूददोहा नक्षत्राणि पुरीषमाहुतयः समिध ऽआदित्यो लोकम्पृणा तद्वा ऽएतत्सर्वमादित्यमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ ३ ॥ आदित्यो हु त्वेवैषोऽग्निश्चितः । तस्य दिश ऽएव परिश्रितस्ताः

षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यन्दिशः समन्तम्परियन्ति रश्मयो यजुष्मत्य ऽइष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मयस्तद्यत्परिश्रित्सु यजुष्मतीः प्रत्यर्प्पयति रश्मीँस्तद्दिक्षु प्रत्यर्प्पयत्यथ यदन्तरा दिशश्च रश्मीँश्च तत्सूददोहा ऽअथ यद्दिक्षु च रश्मिषु चान्नन्तत्पुरीषन्ता ऽआहुतयस्ताः समिधोऽथ यद्दिश ऽइति च रश्मय ऽइति चाख्यायते तल्लोकम्पृणा तद्दृढा ऽएतत्सर्वन्दिश ऽइति चैव रश्मय ऽइति चाख्यायते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ ४ ॥ नक्षत्राणि ह स्वैवैषोऽग्निश्चितः । तानि वा ऽएतानि सप्तविंशतिर्नक्षत्राणि सप्तविंशतिः सप्तविंशतिर्होपनक्षत्राण्येकैकन्नक्षत्रमनूपतिष्ठन्ते तानि सप्त च शतानि विंशतिश्चाधि षट्त्रिंशत्तो यानि सप्त च शतानि विंशतिश्चेष्टका ऽएव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्न्यधि षट्त्रिंशत्स त्रयोदशो मासः स ऽआत्मा त्रिंशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर ऽएव षट्त्रिंशद्यौ तद्यत्ते द्वे भवतो द्व्यक्षरः हि शिरोऽथ यदन्तरा नक्षत्रे तत्सूददोहा ऽअथ यन्नक्षत्रेष्वन्नन्तत्पुरीषन्ता ऽआहुतयस्ताः समिधोऽथ यन्नक्षत्राणीत्याख्यायते तल्लोकम्पृणा तद्दृढा

ऽएतत्सर्वन्नक्षत्राणीत्येवाख्यायते तत्सर्वोऽग्निर्लोकम्पृणा-
मभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूत-
मेतत्सर्वमभिसम्पद्यते ॥ ५ ॥ ता वा ऽएताः । एकविꣳ-
शतिर्ब्बृहत्त्य ऽएकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो
लोकस्तदेष स्वर्गꣳलोकमभिसम्पद्यत ऽएकविꣳशश्च स्तोमं
बृहतीश्च च्छन्दः ॥ ६ ॥ छन्दाꣳसि ह त्वेवैषोऽग्निश्चित्यः
तानि वा ऽएतानि सप्त च्छन्दाꣳसि चतुरुत्तराणि
त्रिचानि तेषाꣳ सप्त च शतानि विꣳशतिश्चा-
क्षराण्यधि षट्त्रिꣳशत्ततो यानि सप्त च शतानि
विꣳतिश्चेष्टका ऽएव ताः षष्टिश्च त्रीणि च
शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्म-
त्योऽथ यान्यधि षट्त्रिꣳशत्स त्रयोदशो मासः स
ऽआत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर ऽएव
षट्त्रिꣳशश्यौ तद्यत्ते द्वे भवतो द्व्यक्षरꣳ हि शिरः ॥ ७ ॥
तस्यै वा ऽएतस्यै षट्त्रिꣳशदक्षरायै बृहत्यै यानि दश
प्रथमान्यक्षराणि सा दशाक्षरैकपदाऽथ यानि विꣳशतिः
सा विꣳशत्यक्षरा द्विपदाऽथ यानि त्रिꣳशत्सा त्रिꣳशदक्षरा
विराडथ यानि त्रयस्त्रिꣳशत्सा त्रयस्त्रिꣳशदक्षराथ यानि
चतुस्त्रिꣳशत्सा चतुस्त्रिꣳशदक्षरा स्वराडथ यत्सर्वैश्छन्दो-
भिरयमग्निश्चित्यस्तदुतिच्छन्दास्ता ऽउ सर्वा ऽइष्टका
ऽएवेष्टकेति त्रीण्यक्षराणि त्रिपदा गायत्री तेनैष गायत्रो-
ऽग्निर्म्मृदुाप ऽइति त्रीण्यक्षराणि त्रिपदा गायत्री तेनो
ऽएवैष गायत्रोऽथ यदन्तरा च्छन्दसी तत्सूददोहा ऽअथ

यच्छन्दः स्वन्नन्तःपुरीषन्ता ऽआहुतयस्ताः समिधोऽथ यच्छन्दाꣳसीत्याख्यायते तल्लोकम्पृणा तद्वा ऽएतत्सर्वं-च्छन्दाꣳसीत्येवाख्यायते तत्सर्वोऽग्निर्ल्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ ८ ॥ ता वा ऽएताः । एकविꣳशतिर्ब्बृहत्य ऽएकविꣳशो वै स्वर्ग्गो लोको बृहती स्वर्ग्गो लोकस्तदेष स्वर्ग्गꣳल्लोकमभिसम्पद्यत ऽएकविꣳशश्च स्तोमम्बृहतीश्च च्छन्दः ॥ ९ ॥ सँवत्सरो ह त्वेवैषोऽग्निश्चितः । तस्य रात्रय ऽएव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि सँवत्सरस्य रात्रयोऽहानि यजुष्मत्य ऽइष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि सँवत्सरस्याहान्न्यथ या ऽअमूः षट्त्रिꣳशदिष्टका ऽअतियन्ति यः स त्रयोदशो मास ऽआत्मार्द्धमासाश्च ते मासाश्च चतुर्विꣳशतिरर्द्धमासा द्वादश मासा ऽअथ यदन्तराहोरात्रे तत्सूददोहा ऽअथ यदहोरात्रेष्वन्नन्तःपुरीषन्ता ऽआहुतयस्ताः समिधोऽथ यदहोरात्राणीत्याख्यायते तल्लोकम्पृणा तद्वा ऽएतत्सर्वमहोरात्राणीत्येवाख्यायते तत्सर्वोऽग्निर्ल्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ १० ॥ ता वा ऽएताः । एकविꣳशतिर्ब्बृहत्य ऽएकविꣳशो वै स्वर्ग्गो लोको बृहती स्वर्ग्गो लोकस्तदेष स्वर्ग्गꣳल्लोकमभिसम्पद्यत ऽएकविꣳशश्च स्तोमम्बृहतीश्च च्छन्दः ॥ ११ ॥ आत्मा ह

त्वेवैषोऽग्निश्चितः । तस्यास्थीन्येव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि मज्जानो यजुष्मत्य ऽइष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्य मज्जानोऽथ या ऽअमूः षट्त्रिंःशदिष्टका ऽअतियन्ति यः स त्रयोदशो मास ऽआत्मा प्राणः स तस्य त्रिंःशदात्मन्त्रिधाः प्रतिष्ठायान्द्वे प्राणेषु द्वे शीर्षन्द्वे तद्यत्ते द्वे भवतो द्विकपालः हि शिरोऽथ येनेमानि पर्वाणि सन्ततानि तत्सूददोहा ऽअथैतत्त्रयं श्येनायमात्मा प्रच्छन्नो लोमत्वङ्मांसमिति तत्पुरीषं श्यत्तिपबति ता ऽआहुतयो यदश्नाति ताः समिधोऽथ यदात्मेत्याख्यायते तल्लोकम्पृणा तदृद्धा ऽएतत्सर्वमात्मेत्येवाख्यायते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोकम्पृणामेनम्भूतमेतत्सर्वमभिसम्पद्यते ॥ १२ ॥ ता वा ऽएताः । एकविंःशतिर्ब्बृहत्य ऽएकविंःशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गमेँल्लोकमभिसम्पद्यत ऽएकविंःशश्च स्तोम-श्चबृहतीश्च च्छन्दः ॥ १३ ॥ सर्वाणि ह त्वेव भूतानि । सर्वे देवा ऽएषोऽग्निश्चित ऽआपो वै सर्वे देवाः सर्वाणि भूतानि ता हैता ऽआप ऽएवैषोऽग्निश्चितस्तस्य नाव्या ऽएव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शताभ्यादित्यन्नाव्याः समन्तम्परियन्ति नाव्या ऽउ ऽएव यजुष्मत्य ऽइष्टकास्ताः

षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शताह्यादित्यन्नाव्या ऽअभिक्षरन्त्यथ यदन्तरा नाव्ये तत्सूददोहा ऽअथ या ऽअमूः षट्त्रिंशदिष्टका ऽअतियन्ति यः स त्रयोदशो मास ऽआत्मायमेव स योऽयꣳ हिरण्मयः पुरुषः ॥ १४ ॥ तस्यैते प्रतिष्ठे । रुक्मश्च पुष्करपर्णञ्चापश्चादित्यमण्डलञ्च स्रुचौ बाहू ताविन्द्राग्नी द्वे स्वयमातृण्णे ऽइयञ्चान्तरिक्षञ्च तिस्रो विश्वज्योतिष ऽएता देवता ऽअग्निर्वायुरादित्य ऽएता ह्येव देवता विश्वज्योतिर्द्वादशऽर्त्तव्याः स सँवत्सरः स ऽआत्मा पञ्च नाकसदः पञ्च पञ्चचूडाः स यज्ञस्ते देवा ऽअथ यद्विकर्णी च स्वयमातृण्णा चाश्मा पृश्निर्यश्चितेऽग्निर्न्निधीयते सा पञ्चत्रिंशी लोकम्पृणायै युजुः षट्त्रिंशी सोऽस्यैष सर्वस्यान्तमेवात्मा स ऽएष सर्वासामपाम्मध्ये स ऽएष सर्वैः कामैः सम्पन्न ऽआपो वै सर्वे कामाः स ऽएषोऽकामः सर्वकामो न ह्येतङ्कस्य चन कामः ॥ १५ ॥ तदेष श्लोको भवति । विद्यया तदारोहन्ति यत्र कामाः परागताः ॥ न तत्र दक्षिणा यन्ति नाविद्वाꣳसस्तपस्विन ऽइति न हैव तँल्लोकन्दक्षिणाभिर्न्न तपसानेवंविदश्नुत ऽएवंविदाꣳ हैव स लोकः ॥ १६ ॥ अभ्रम्पुरीषम् । चन्द्रमा ऽआहुतयो नक्षत्राणि समिधो यच्चन्द्रमा नक्षत्रे वसत्याहुतिस्तत्समिधि वसत्येतदु वा ऽआहुतेरन्नमेषा प्रतिष्ठा तस्मादाहुतिर्न्न क्षीयत ऽएतस्या ऽअन्नमेषा प्रतिष्ठाथ यद्देवा ऽइत्याख्यायते

तल्लोकम्पृणा तद्दृढा ऽएतत्सर्व्वन्देवा ऽइत्येवाख्यायते ॥ १७ ॥ तदेतदृचाऽभ्युक्तम् । विश्वे देवा ऽअनु तत्ते यजुर्ग्गुरिति सर्व्वाणि ह्यत्र भूतानि सर्व्वे देवा यजुरेव भवन्ति तत्सर्व्वो-ऽग्निर्लोकम्पृणामभिसम्पद्यते स यो हैतदेवं वेद लोक-म्पृणामेनम्भूतमेतत्सर्व्वमभिसम्पद्यते ॥१८॥ ता वा ऽएताः। एकविꣳशतिर्ब्बृहत्य ऽएकविꣳशो वै स्वर्ग्गो लोको बृहती स्वर्ग्गो लोकस्तदेष स्वर्ग्गꣳलोकमभिसम्पद्यत ऽएकविꣳशश्च स्तोमम्बृहतीश्च च्छन्दः ॥ १९ ॥ (E)

पञ्चमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[चित्याग्नेः सर्वदिगभिमुखत्वम्, पृथक् शिरसो निरूहणाभावश्च]

कुश्रिश्रर्हं वाजश्रवसोऽग्निश्चिक्ये । तꣳ होवाच सुश्रवाः कौष्यो गौतम यदग्निमचैषीः प्राञ्चमेनमचैषीः प्रत्यञ्चमेनमचैषीर्न्यञ्चमेनमचैषीरुत्तानमेनमचैषीः ॥ १ ॥ यद्यहैनम्प्राञ्चमचैषीः । यथा पराच ऽआसीनाय पृष्टुतो-ऽन्नाद्यमुपाहरेत्तादृक्तन्न ते हविः प्रतिग्रहीष्यति ॥ २ ॥ यद्यु वा ऽएनम्प्रत्यञ्चमचैषीः कस्मादस्य तर्हि पद्भ्यो-रपुच्छमकार्षीः ॥ ३ ॥ यद्यु वा ऽएनन्न्यञ्चमचैषीः । यथा नीचः शयानस्य पृष्ट्वेऽन्नाद्यम्प्रतिष्ठापयेत्तादृक्तन्नैव ते हविः प्रतिग्रहीष्यति ॥ ४ ॥ यद्यु वा ऽएनमुत्तानम-चैषीः । न वा ऽउत्तानं वयः स्वर्ग्गꣳलोकमभिवहति न त्वा

(E) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा - का० श्रौ० १२. ५. ४ ।

स्वर्गꣳल्लोकमभिवक्षत्स्यस्वर्ग्य ऽउ ते भविष्यतीति ॥ ५ ॥ स होवाच प्राञ्चमेनमचैषम्प्रत्यञ्चमेनमचैषन्न्यञ्चमेनमचैषमुत्तानमेनमचैषꣳ सर्वा ऽअनुदिश ऽएनमचैषमिति ॥ ६ ॥ स यत्प्राञ्चम्पुरुषमुपदधाति । प्राच्यौ स्रुचौ तत्प्राङ् चीयतेऽथ यत्प्रत्यञ्चङ्कूर्म्ममुपदधाति प्रत्यञ्चि पशुशीर्षाणि तत्प्रत्यङ् चीयतेऽथ यन्न्यञ्चङ्कूर्म्ममुपदधाति न्न्यञ्चि पशुशीर्षाणि नीचीरिष्टकास्तन्न्यङ् चीयतेऽथ यदुत्तानम्पुरुषमुपदधात्युत्ताने स्रुचा ऽउत्तानमुलूखलमुत्तानामुखान्तदुत्तानञ्चीयतेऽथ यत्सर्वा ऽअनुदिशः परिसर्प्पमिष्टका ऽउपदधाति तत्सर्वतश्चीयते ॥ ७ ॥ [अर्धप्रपाठकः ३८] अथ ह कोषा धावयन्तः । निरूढशिरसमग्निमुपाधावयाञ्चक्रुस्तेषाꣳ हैक ऽउवाच श्रीर्वै शिरः श्रियमस्य निरौहीत्सर्वज्ज्यानिज्ज्यास्यत ऽइति स ह तथैवास ॥ ८ ॥ अथ हैक ऽउवाच । प्राणा वै शिरः प्राणानस्य निरौहीरिक्षप्रेऽमुꣳल्लोकमेष्यतीति स ऽउ ह तथैवास ॥ ९ ॥ ऊर्द्धो वा ऽएष ऽएतच्चीयते । यद्दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णꣳ रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतःसिचौ विश्वज्योतिर्हृतव्ये ऽअषाढा कूर्म्मोऽथ हास्यैतदेव प्रत्यक्षतमाꣳ शिरो यश्चित्तेऽग्निर्न्निधीयते तस्मान्न निरूहेत् ॥ १० ॥ (F)

पञ्चमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

(F) एतद्ब्राह्मणस्था विषया अन्यत्रापि समुपलभ्यन्ते यथा—का० श० १२. ५. ५ ।

[वैश्वानरविद्या]

अथ हैतेऽरुणे । औपवेशौ समाजग्मुः सत्ययज्ञः पौलुषिर्मर्म्महाशालो जाबालो बुडिल ऽआश्वतराश्विरिन्द्रद्युम्नो भाल्लवेयो जनः शार्क्कराक्ष्यस्ते ह वैश्वानरे समासत तेषाꣳ ह वैश्वानरे न समियाय ॥ १ ॥ ते होचुः । अश्वपतिर्वा ऽअयङ्कैकेयः सम्प्रति वैश्वानरं वेद तङ्गच्छामेति ते ह्याश्वपतिङ्कैकेयमाजग्मुस्तेभ्यो ह पृथगावसथान्पृथगुपचितीः पृथक्कसाहस्रान्त्सोमान्प्रोवाच ते ह प्रातरसंविदाना ऽएव समित्पाणयः प्रतिचक्रमिर ऽउप त्वायामेति ॥ २ ॥ स होवाच । यन्नु भगवन्तो ऽनूचाना ऽअनूचानपुत्राः किमिदमिति ते होचुर्वैश्वानरꣳ ह भगवान्त्सम्प्रति वेद तन्नो ब्रूहीति स होवाच सम्प्रति खलु न्वा ऽअहं वैश्वानरं वेदाभ्याधत्त समिध ऽउपेता स्थेति ॥ ३ ॥ स होवाचारुणमौपवेशिम् । गौतम कन्त्वं वैश्वानरं वेत्थेति पृथिवीमेव राजन्निति होवाचोमिति होवाचैष वै प्रतिष्ठा वैश्वानर ऽएतꣳ हि वै त्वम्प्रतिष्ठां वैश्वानरं वेत्थ तस्मात्त्वम्प्रतिष्ठितः प्रजया पशुभिरसि यो वा ऽएतम्प्रतिष्ठां वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति पादौ त्वा ऽएतौ वैश्वानरस्य पादौ तेऽम्लास्यतां ऋषदि ह नागमिष्यꣳ ऽइति पादौ तेऽविदितावभविष्यतां ऋषदि ह नागमिष्यꣳ ऽइति वा ॥ ४ ॥ अथ होवाच सत्ययज्ञम्पौलुषिम् । प्राचीनयोग्य कन्त्वं वैश्वानरं वेत्थेत्यप ऽएव राजन्निति होवाचोमिति होवाचैष वै

रयिर्वैश्वानर ऽएतद्ः हि वै त्वद्ः रयिं वैश्वानरं वेत्थ तस्मात्वद्ः रयिमान्पुष्टिमानसि यो वा ऽएतद्ः रयिं वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति वस्तिस्त्वा ऽएष वैश्वानरस्य वस्तिस्त्वाहास्यद्यदि ह नागमिष्य ऽइति वस्तिस्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥ ५ ॥ अथ होवाच महाशालञ्जाबालम् । औपमन्यव कन्त्वं वैश्वानरं वेत्थेत्याकाशमेव राजन्निति होवाचोमिति होवाचैष वै बहुलो वैश्वानर ऽएतद्ः हि वै त्वम्बहुलं वैश्वानरं वेत्थ तस्मात्वम्बहुः प्रजया पशुभिरसि यो वा ऽएतम्बहुलं वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेत्यात्मा त्वा ऽएष वैश्वानरस्यात्मा त्वाहास्यद्यदि ह नागमिष्य ऽइत्यात्मा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य ऽइति वा ॥ ६ ॥ अथ होवाच बुडिलमाश्वतराश्विम् । वैयाघ्रपद्य कन्त्वं वैश्वानरं वेत्थेति वायुमेव राजन्निति होवाचोमिति होवाचैष वै पृथग्वर्त्मा वैश्वानर ऽएतद्ः हि वै त्वम्पृथग्वर्त्मानं वैश्वानरं वेत्थ तस्मात्वाम्पृथग्रथश्रेणयोऽनुयान्ति यो वा ऽएतम्पृथग्वर्त्मानं वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति प्राणस्त्वा ऽएष वैश्वानरस्य प्राणस्त्वाहास्यद्यदि ह नागमिष्य ऽइति प्राणस्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य ऽइति वा ॥ ७ ॥ अथ होवाचेन्द्रद्युम्नम्भाल्लवेयम् । वैयाघ्रपद्य कन्त्वं वैश्वानरं वेत्थेत्यादित्यमेव राजन्निति होवाचोमिति होवाचैष वै सुततेजा वैश्वानर ऽएतद्ः हि वै त्वद्ः सुत-

तेजसं वैश्वानरं वेत्थ तस्मात्तवैष सुतोऽद्यमानः पच्च्यमानोऽक्षीयमाणो गृहेषु तिष्ठति यो वा ऽएतꣳ सुततेजसं वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति चक्षुस्त्वा ऽएतद्वैश्वानरस्य चक्षुस्त्वाहास्यद्यदि ह नागमिष्य इति चक्षुस्तेऽविदितमभविष्यद्यदि ह नागमिष्य इति वा ॥८॥ अथ होवाच जनकः शार्क्कराक्ष्यम्। सायवस कन्त्वं वैश्वानरं वेत्थेति दिवमेव राजन्निति होवाचोमिति होवाचैष वा ऽअतिष्ठा वैश्वानर ऽएतꣳ हि वै त्वमतिष्ठां वैश्वानरं वेत्थ तस्मात्वꣳ समानानतितिष्ठसि यो वा ऽएतमतिष्ठां वैश्वानरं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति मूर्द्धा त्वा ऽएष वैश्वानरस्य मूर्द्धा त्वाहास्यद्यदि ह नागमिष्य इति मूर्द्धा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥ ९ ॥ ताꣳहोवाच। एते वै यूयम्पृथग्वैश्वानराञ्चिद्वाꣳसः पृथगन्नमधस्त प्रादेशमात्रमिव ह वै देवाः सुविदिता ऽअभिसम्पन्नास्तथा तु व ऽएनाञ्चक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति ॥ १० ॥ स होवाच। मूर्द्धानमुपदिशन्नेष वा ऽअतिष्ठा वैश्वानर ऽइति चक्षुषी ऽउपदिशन्नुवाचैष वै सुततेजा वैश्वानर ऽइति नासिके ऽउपदिशन्नुवाचैष वै पृथग्वर्त्मा वैश्वानर ऽइति मुख्यमाकाशमुपदिशन्नुवाचैष वै बहुलो वैश्वानर ऽइति मुख्या ऽअप ऽउपदिशन्नुवाचैष वै रयिर्वैश्वानर ऽइति श्लुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर ऽइति स ऽएषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वा-

नरम्पुरुषविधम्पुरुषेऽन्तः प्रतिष्ठितं वेदाप पुनर्म्मृत्युञ्जयति सर्वमायुरेति न हास्य ब्रुवाणञ्चन वैश्वानरो हिनस्ति ॥११॥(A)

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[पुरुषस्याग्निविधार्कविधोक्थविधन्वनिरूपणम्]

द्वयं वा ऽइदमत्ता चैवाद्यश्च । तद्यदोभयः समागच्छत्यत्तैवाख्यायते नाद्यम् ॥ १ ॥ स वै यः सोऽत्ताग्निरेव सः । तस्मिन्नन्यत्किञ्चाभ्यादधत्याहितय ऽएवास्य ता ऽआहितयो ह वै ता ऽआहुतय ऽइत्याचक्षते परोऽक्षम्परोऽक्षकामा हि देवाः ॥ २ ॥ आदित्यो वा ऽअत्ता । तस्य चन्द्रमा ऽएवाहितयश्चन्द्रमसꣳ ह्यादित्य ऽआदधतीत्यधिदेवतम् ॥ ३ ॥ अथाध्यात्मम् । प्राणो वा ऽअत्ता तस्यान्नमेवाहितयोऽन्नः हि प्राण ऽआदधतीति ह्यग्नेः ॥ ४ ॥ अथार्कस्य । अग्निर्वा ऽअर्कस्तस्याहुतय ऽएव कमाहुतयो ह्यग्नये कम् ॥ ५ ॥ आदित्यो वा ऽअर्कः । तस्य चन्द्रमा ऽएव कञ्चन्द्रमा ह्यादित्याय कमित्यधिदेवतम् ॥ ६ ॥ अथाध्यात्मम् । प्राणो वा ऽअर्कस्तस्यान्नमेव कमन्नः हि प्राणाय कमिति न्वेवार्कस्य ॥ ७ ॥ अथोक्थस्य । अग्निर्वा ऽउक्थस्याहुतय ऽएव थमाहुतिभिर्ह्यग्निरुत्तिष्ठति ॥ ८ ॥ आदित्यो वा ऽउक् । तस्य चन्द्रमा ऽएव थश्चन्द्रमसा ह्यादित्य ऽउत्तिष्ठतीत्य-

(A) अदोब्राह्मणस्था विषया अन्यत्रापि दृश्यन्ते यथा—का० श० १२. ६. १ ।

धिदेवतम् ॥ ९ ॥ अथाध्यात्मम् । प्राणो वा ऽउक्थस्यान्नमेव यमन्नेन हि प्राण ऽउत्तिष्ठतीति न्वेवोक्थस्य स ऽएषोऽग्निविधोऽर्कविध ऽउक्थविधो यत्पुरुषः स यो हैतमेवमग्निविधमर्कविधमुक्थविधम्पुरुषमुपास्ते विदुषो हैवास्यैवम्भ्रातृव्यो म्लायति ॥ १० ॥ प्राणेन वा ऽअग्निर्दीप्यते । अग्निना वायुर्वायुनादित्य ऽआदित्येन चन्द्रमाश्चन्द्रमसा नक्षत्राणि नक्षत्रैर्विद्युदेतावती वै दीप्तिरस्मिँश्च लोकेऽमुष्मिँश्च सर्वाऽ हैतान्दीप्तिन्दीप्यते स्मिँश्च लोकेऽमुष्मिँश्च य ऽएवं वेद ॥ ११ ॥ (B)

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[शाण्डिल्यविद्याप्रतिपादनम्]

सत्यम्ब्रह्मेत्युपासीत । अथ खलु क्रतुमयोऽयम्पुरुषः स यावत्क्रतुरयमस्म्माल्लोकात्प्रैत्येवङ्क्रतुर्हामुँल्लोकम्प्रेत्याभिसम्भवति ॥ १ ॥ स ऽआत्मानमुपासीत । मनोमयम्प्राणशरीरम्भारूपमाकाशात्मानङ्कामरूपिणम्मनोजवसङ्कल्पः सत्यसङ्कल्पः सत्यधृतिः सर्वगन्धः सर्वरसः सर्वा ऽअनु दिशः प्रभूतः सर्वमिदमभ्याप्तमवाक्कमनादरं यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन्पुरुषो हिरण्मयो यथा ज्योतिरधूममेवञ्ज्यायान्दिवो ज्यायानाकाशाज्ज्यायानस्यै पृथिव्यै ज्यायान्सर्वेभ्यो भूतेभ्यः स प्राणस्यात्मैष म ऽआत्मैतमित ऽआत्मानम्प्रे-

(B) अदोब्राह्मणस्था विषया अन्यत्रापि दृश्यन्ते यथा—१२ ६. २।

त्याभिसम्भविष्यामीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य ऽएवमेतदिति ॥ २ ॥ (E)

षष्ठाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[अश्वस्योपासनम्]

उषा वा ऽअश्वस्य मेध्यस्य शिरः । सूर्य्यश्चक्षुर्व्रातः प्राणो व्यात्तमग्निर्वैश्वानरः सँवत्सर ऽआत्माश्वस्य मेध्यस्य द्यौष्पृष्ठमन्तरिक्षमुदरम्पृथिवी पाजस्यन्दिशः पाश्र्वे ऽअवान्तरदिशः पर्शव ऽऋतवोऽङ्गानि मासाश्चार्द्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माꣳसान्यूवध्यः सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ऽओषधयश्च वनस्पतयश्च लोमाऽन्युद्यन्पूर्वार्द्धो निम्लोचञ्जघनार्द्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा ऽअश्वस्य पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनम्पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा ऽअश्वस्य महिमानावभितः सम्बभूवतुर्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान्त्समुद्र ऽएवास्य बन्धुः समुद्रो योनिः ॥ १ ॥

षष्ठाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

(E) एतद्ब्राह्मणस्था विषया अन्यत्राऽप्युपलभ्यन्ते यथा— का० श० १२. ६. ३ ।

[अर्काश्वमेधोपासना, विद्यासंप्रदायप्रवर्तकमुनिवंशकथनञ्च]

नैवेह किञ्चनाग्र आसीत् । मृत्युनैवेदमावृतमासीदशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवाक्क्यस्यार्कत्वङ्कः ह वा अस्मै भवति य एवमेतदुक्क्यस्यार्कत्वं वेद ॥ १ ॥ आपो वा अर्कः । तद्यदपाꣳ शर आसीत्तत्समहन्न्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्त्तताग्निः ॥ २ ॥ स त्रेधात्मानं व्यकुरुत । आदित्यन्तृतीयं वायुन्तृतीयः स एष प्राणस्त्रेधाविहितस्तस्य प्राची दिक्शिरोऽसौ चासौ चेर्म्मावथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौष्पृष्टमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥ सोऽकामयत । द्वितीयो म आत्मा जायेतेति स मनसा वाचम्मिथुनः समभवदशनायाम्मृत्युस्तद्रेत आसीत्स सँवत्सरोऽभवन्न ह पुरा ततः सँवत्सर आस तमेतावन्तङ्कालमबिभर्य्यावान्त्सँवत्सरस्तमेतावतः कालस्य परस्तादसृजत तञ्जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥ ४ ॥ स ऐक्षत । यदि वा इमममिमथ्ँस्ये कनीयोऽन्नङ्करिष्य इति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदङ्किञ्च ऋचो यजूꣳषि सामानि च्छन्दाꣳसि यज्ञान्प्रजाम्पशून्त्स यद्यदेवासृजत तत्तदत्तुमद्रियत सर्वं वा

ऽअत्तीति तदुदितेरदितित्वꣳ सर्वस्यात्ता भवति सर्वमस्यान्नम्भवति य ऽएवमेतदुदितेरदितित्वं वेद ॥५॥ सोऽकामयत। भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यन्तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमद्रियत तस्य शरीर ऽएव मन ऽआसीत् ॥ ६ ॥ सोऽकामयत। मेध्यम्म ऽइदꣳ स्यादात्मन्वन्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा ऽअश्वमेधं वेद य ऽएनमेवं वेद ॥ ७ ॥ तमनवरुद्ध्येवामन्यत। तꣳ सँवत्सरस्य परस्तादात्मन ऽआलभत पशून्देवताभ्यः प्रत्यौहत्तस्मात्सर्वदेवत्यम्प्रोक्षितम्प्राजापत्यमालभन्त ऽएष वा ऽअश्वमेधो य ऽएष तपति तस्य सँवत्सर ऽआत्मायमग्निरर्कस्तस्येमे लोका ऽआत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्म्मृत्युञ्जयति नैनम्मृत्युराप्नोति मृत्युरस्यात्मा भवति सर्वमायुरेत्येतासान्देवतानामेको भवति य ऽएवं वेद ॥ ८ ॥*

अथ वꣳशः। समानमा साञ्जीवीपुत्रात्साञ्जीवीपुत्रो माण्डूकायनेर्म्माण्डूकायनिर्म्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्म्माहित्थिर्वामकक्षायणाद्वामकक्षायणो व्रात्याद्व्रात्यः शाण्डिल्याच्छाण्डिल्यः कुशश्रेः कुशिश्रर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः

* अत्र क्षतम् ५५०० ।


कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ ९ ॥

षष्ठाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या ॥७५॥

इति षष्ठोऽध्यायः ॥ ६ ॥

† अग्निरहस्य नाम दशमं काण्ड समाप्तम् ॥ १० ॥



† अस्मिन्काण्डे कण्डिकासंख्या २६९ ।

अथाष्टाध्यायीनामैकादशकाण्डम्

अस्मिन्काण्डे प्रतिपादनीया विषयाः—अग्न्याधानकालः, दर्शपूर्णमास-दाक्षायणयज्ञयोरनुष्ठानावधिः, दाक्षायणयज्ञः, पथिकृदिष्टिः, अभ्युदय-दृष्टेष्टिः, दर्शपूर्णमासार्थवादः, प्रयाजानुयाजानुमन्त्रणम्, इडा-स्विष्टकृत्—सूक्तवाक—शंयुवाक-पत्नीसंयाज—वेद्यालम्भ—समिष्ट-यजुः—प्रधानयागादिविषयोऽर्थवादः, अग्निहोत्रार्थवादः, ब्रह्मचाग्निकर्तव्यम्, मित्रविन्देष्टिः, हविषः समृद्धिः, चातु-र्मास्यार्थवादः, पञ्च महायज्ञाः, स्वाध्यायप्रशंसा, प्रायश्चित्तम्, अंश्वदाभ्यग्रहौ, आध्यात्मिकविद्या, पशुबन्धप्रशंसा, हविर्यज्ञविधमवविध-योर्लक्षणम्, षड्होतारहोमः

[यज्ञादीनां संवत्सराद्यात्मना निरूपणम्]

॥ ॐ ॥ सँवत्सरो * वै यज्ञः प्रजापतिः † । तस्यै-तद्द्वारं यदमावास्या ‡ चन्द्रमा ऽएव द्वारपिधानः ॥ १ ॥

---

* संवत्सरात्मकस्तत्साध्यत्वात्। संवत्सरस्यापि 'द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयो. समासेन तावत्संवत्सरः प्रजापति.' इति सप्तदशावयवत्वसाम्यात् प्रजापतेस्तस्य च तादात्म्यं यथा—'आदित्यो यूपः' इत्यत्र तेजःसारूप्याद् यूपस्यादित्यात्मना स्तुतिरेवमत्रापि संख्यासारूप्यात् स्तुतिरेव मन्तव्या।

† आ श्रावयेत्यादि सप्तदशाक्षरसाध्यत्वाद्यज्ञस्य प्रजापतित्वम्। तथा च तैत्तिरीयसंहितायाम्—"आ श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिः" (तै० सं० का० १ प्र० ६ अनु० ११)

‡ अमेत्ययं शब्दः सहशब्दार्थे वर्तते, प्रतिपदादितिथिषु मध्ये यस्यां तिथौ अमा सूर्येण सह चन्द्रो वसति सामावास्या। अमापूर्वाद्वसेः 'ऋहलोर्ण्यत्' इति ण्यत्।

यद्वा—वसुशब्दाभिधेय इन्द्रः साकाङ्क्ष्यपानार्थं देवैः सह यस्यां तिथौ वसतीत्यमावास्या। तथा च तैत्तिरीयसंहिताम्—

"अमा वै नोऽद्य वसु वसतीन्द्रो हि देवानां वसु तदमावास्याया अमावास्यत्वम्"

स योऽमावास्यायामग्नी ऽआधत्ते । यथा विवृतायान्द्वारि द्वारा पुरम्प्रपद्येत स तत ऽएव स्वर्गल्लोकमियादेवन्तद्योऽमावास्यायामाधत्ते ॥ २ ॥ अथ यो नक्षत्र ऽआधत्ते । यथापिहितायान्द्वार्ष्टद्वारा पुरम्प्रपित्सेत्स जिह्मः पुरः स्यादेवन्तद्यो नक्षत्र ऽआधत्ते तस्मान्न नक्षत्र ऽआदधीत ॥३॥ यदुहरेवैषः । न पुरस्तान्न पश्चादृदृश्येत तदुहरुपवसेत्तर्हि ह्येष ऽइमँल्लोकमागच्छति तस्मिन्निह वसति ॥ ४ ॥ सर्वे देवा वसन्ति । सर्वाणि भूतानि सर्वा देवताः सर्व ऽऋतवः सर्वे स्तोमाः सर्वाणि पृष्ट्टानि सर्वाणि च्छन्दाꣳसि ॥ ५ ॥ सर्वेषु ह वा ऽअस्य देवेषु । सर्वेषु भूतेषु सर्वासु देवतासु सर्वेष्वृतुषु सर्वेषु स्तोमेषु सर्वेषु पृष्ट्टेषु सर्वेषु च्छन्दःस्वग्नी ऽआहितौ भवतो योऽमावास्यायामाधत्ते तस्मादमावास्यायामेवाग्नी ऽआदधीत ॥ ६ ॥ याऽसौ वैशाख्यस्यामावास्या तस्यामादधीत सा रोहिण्या सम्पद्यत ऽआत्मा वै प्रजा पशवो रोहिण्यात्मन्येवैतत्प्रजायाम्पशुषु प्रतितिष्ट्ठत्यमावास्या वा ऽअग्न्याधेयरूपन्तस्मादमावास्यायामेवाग्नी ऽआदधीत पौर्णमास्यामध्वारभेतामावास्यायान्दीक्षेत ॥ ७ ॥

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(१) सुष्ठु अर्ज्यते शोभनेनार्जनेन गम्यत इति वा स्वर्गः—सर्वजनाभिलषणीयं दुःखासम्भिन्नं कर्मफलमित्यर्थः । तथा चाहुः—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥ (तन्त्रवा०)

(२) लोक्यत इति लोकः ।

(३) विशाखानक्षत्रयुक्ता पौर्णमासी यस्मिन्मासि स वैशाखः ।

[दर्शपूर्णमासाहुतिसंख्याविशेषकथनम्]

घ्नन्ति वा ऽएतद्यज्ञम् । यदेनन्तन्वते यन्वेव राजानमभिषुण्वन्ति तत्तङ्घ्नन्ति यत्पशुः संज्ञपयन्ति विशासति तत्तङ्घ्नन्त्युलूखलमुसलाभ्यान्दृषदुपलाभ्याꣳ हविर्यज्ञङ्घ्नन्ति ॥ १ ॥ तद्धः हस्त्वा यज्ञम् । अग्नावेव योनौ रेतो भूतः सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायते तद्दश ता ऽआहुतीः सम्पादयेद्याभ्यो वषट्क्रियते ॥ २ ॥ अयं वै यज्ञो योऽयम्पवते । सोऽयमेक ऽइवैव पवते सोऽयम्पुरुषेऽन्तः प्रविष्टो दशधाविहितः स ऽएवङ्कल्पैः प्राणैरग्नेर्योनेरधिजायते सैषा दुशाक्षरा विराट् सैषा सम्पत्स्स यज्ञः ॥ ३ ॥ अथो ऽअपि नव स्युः । तन्न्यूनां विराजङ्करोति प्रजननाय न्न्यूनाद्वा ऽइमाः प्रजाः प्रजायन्ते सैषा सम्पत्स्स यज्ञः ॥ ४ ॥ अथो ऽअप्येकातिरिक्ता स्यात् । सा प्रजापतिमभ्यतिरिच्यते सैषा सम्पत्स्स यज्ञः ॥ ५ ॥ अथो ऽअपि द्वे ऽअतिरिक्ते स्याताम् । द्वन्द्वं वै मिथुनम्प्रजननम्मिथुनमेवैतत्प्रजननङ्क्रियते सैषा सम्पत्स्स यज्ञः ॥ ६ ॥ अथो ऽअपि तिस्रोऽतिरिक्ताः स्युः । द्वन्द्वमह मिथुनम्प्रजननमथ यज्ञायते तत्तृतीयः सैषा सम्पत्स्स यज्ञः ॥ ७ ॥ अथो ऽअपि चतस्रोऽतिरिक्ताः स्युः । तद्यथैकैवꣳ चतस्रस्रयो वा ऽइमे लोकास्तदिमानेव लोकाँस्तिसृभिराप्नोति प्रजापतिर्वा ऽअतीमाँल्लोकाँश्चतुर्थस्तत्प्रजापतिमेव चतुर्त्थ्याप्नोति सैषा सम्पत्स्स यज्ञः ॥ ८ ॥ स यद्वाभ्यामूनन्तदूनम् । सोऽयज्ञो

यत्पञ्चभिरतिरिक्तन्तदतिरिक्तः सोऽयज्ञः सैषैव दशत्यधि सम्पदेषा त्रिःशत्यामेषा सहस्रात् ॥ ९ ॥ आजिं वा ऽएते धावन्ति । ये दर्शपूर्णमासाभ्यां स्वजन्ते स वै पञ्चदश वर्षाणि यजेत तेषाम्पञ्चदशानां वर्षाणान्त्रीणि च शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च सँवत्सरस्य राज्रयस्तद्रात्रीराप्नोति ॥ १० ॥ अथापराणि पञ्चदशैव वर्षाणि यजेत । तेषाम्पञ्चदशानां वर्षाणान्त्रीणि चैव शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च सँवत्सरस्याहानि तदुहान्न्याप्नोति तद्वेव सँवत्सरमाप्नोति ॥ ११ ॥ मर्त्या ह वा ऽअग्रे देवा ऽआसुः । स यदैव ते सँवत्सरमापुरथामृता ऽआसुः सर्वं वै सँवत्सरः सर्वं वा ऽअक्षय्यमेतेनो हास्याक्षय्यः सुकृतम्भवत्यक्षय्यो लोकः ॥ १२ ॥ स ऽआजिसृतामेकः । य ऽएवं विद्वाँस्त्रिःशतं वर्षाणि यजते तस्मादु त्रिःशतमेव वर्षाणि यजेत यद्यु दाक्षायणयज्ञी स्यादथो ऽअपि पञ्चदशैव वर्षाणि यजेतात्र ह्येव सा सम्पत्सम्पद्यते द्वे हि पौर्णमास्यौ यजते द्वे ऽअमावास्ये ऽअग्रो ऽएव खलु सा सम्पद्भवति ॥ १३ ॥

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[पौर्णमासयागे दर्शयागे च हविषो विधानम्]

पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति तेन यथेष्टैवं स्वजत ऽआमावास्येनेष्ट्वादित्यै चरुमनुनिर्वपति

तेन यथेष्ट्यैवं व्यजते ॥ १ ॥ स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवताथैतदग्नीषोमीयम्पौर्णमासꣳ हविर्भवति तत्र नेन्द्राय त्वेति किञ्चन क्रियत ऽएतेनो हास्यैतत्सेन्द्रꣳ हविर्भवत्येतेन सेन्द्रो यज्ञोऽथ यद्विमृधे त्वेति सर्वा ऽउ हि मृधो नाष्ट्राꣳ पौर्णमासेन हन्ति ॥ २ ॥ अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं व्यच्चन्द्रमाꣳ स यत्रैष ऽएताꣳ रात्रिन्न पुरस्तान्न पश्चाद्ददृशे तेनैतदुनद्धेव हविर्भवति तेनाप्प्रतिष्ठितमियं वै पृथिव्यदितिꣳ सेयमद्धा सेयम्प्रतिष्ठितैतेनो हास्यैतदुद्धेव हविर्भवत्येतेन प्प्रतिष्ठितमेतन्नु तद्यस्मादनुनिर्वपत्यथ यस्मान्नानुनिर्वपेत् ॥ ३ ॥ स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति सेन्द्रो मे यज्ञोऽसदिति सत्वो वै यज्ञ ऽइन्द्रस्यैव स यत्सत्वो यज्ञ ऽइन्द्रस्यैवैतेनो हास्यैतत्सेन्द्रꣳ हविर्भवत्येतेन सेन्द्रो यज्ञꣳ ॥ ४ ॥ अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्यामावास्यं वा ऽअनुनिर्वाप्प्यम्पौर्णमासेन वा ऽइन्द्रो व्वृत्रमहँस्तस्मा ऽएतद्वृत्रञ्जघ्नुषे देवा ऽएतद्धविरनुनिरवपन्यदामावास्यङ्किमनुनिर्वाप्प्येऽनुनिर्वपेदिति तस्मान्नानुनिर्वपेत् ॥ ५ ॥ स यत्पौर्णमासेनेष्ट्वा । अथाऽन्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनुनिर्वपति द्विषन्तꣳ ह स ब्भ्रातृव्यम्प्रत्युच्छ्रयतेऽथ यꣳ पौर्णमासेनैव पौर्णमासीं व्यजत ऽआमावास्येनामावास्यामसपत्ना हैवास्यानुपबाधा

श्रीर्भवति ॥ ६ ॥ पौर्णमासेन वै देवाः । पौर्णमासीं यजमाना ऽआमावास्येनामावास्यां क्षिप्र ऽएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त स यो हैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजत ऽआमावास्येनामावास्यां क्षिप्र ऽएव पाप्मानमपहते क्षिप्रे प्रजायते स यद्यनुनिर्वपेद्व्याद्दक्षिणान्नादक्षिणः हविः स्यादिति ह्याहुर्दर्शपूर्णमासयोर्ह्येवैषा दक्षिणा यदन्वाहार्यं * ऽइति न्वनुनिर्वाप्यस्याथाभ्युदितस्य ॥ ७ ॥

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[दर्शयागे पुरस्ताच्चन्द्रदर्शनप्रायश्चित्तेष्टिः]

तद्धैके दृष्ट्वोपवसन्ति । इश्वो नोदेतेत्यभ्रस्य वा हेतोरनिर्ज्ञाय वाथोतोपवसन्त्यथैनमुताभ्युदेति स यद्यगृहीतः हविरभ्युदियात्प्रज्ञातमेव तदेषैव व्रतचर्या यत्पूर्वेद्युर्दुग्धन्दुधि हविरातञ्चनन्तत्कुर्वन्ति प्रति प्रमुञ्चन्ति वत्सांस्तान्पुनरपाकुर्वन्ति ॥ १ ॥ तानपराह्णे पर्णशाखयापाकरोति । तद्यथैवादः प्रज्ञातमामावास्यः हविरेवमेव तद्यद्यु व्रतचर्यां वा नोदाशः सेत गृहीतं वा हविरभ्युदियादितरथो तर्हि कुर्य्यादेतानेव तण्डुलान्त्सुफलीकृतान्कृत्वा स येऽणीयाꣳसस्तानग्नये † दात्रेऽष्टाकपालम्पुरोडाशꣳ

* अन्वाहरति—यज्ञसम्बन्धिदोषजातं परिहरति—अनेनेति अन्वाहार्यो नाम ऋत्विग्भोजनीय ओदनः सा० भा० ।

† 'निरुप्ते व्रताशक्तौ वा अथ तण्डुलान्विभज्य मध्यमानग्नये दात्रे, स्थविष्ठानिन्द्राय प्रदात्रे, दधनि चरुमणिष्ठान्विष्णवे शिपिविष्टाय श्रपते चरुम्" (का० श्रौ० सू० २५. ४. ३८)

श्रपयति ॥ २ ॥ अथ यत्पूर्वेद्युः । दुग्धन्दुधि तद्विन्द्राय प्रदात्रेऽथ तदानीन्दुग्धे विष्णवे शिपिविष्टायैताँस्तण्डुलाञ्छृते चरुꣳ श्रपयति चरुरुह्येव स यत्र क्व च तण्डुलानावपन्ति ॥ ३ ॥ तद्यदेवम्भवति । एष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतदुपैत्सीत्तमपारात्सीत्तमस्मा ऽअग्निर्द्धाता ददातीन्द्रः प्रदाता प्रयच्छति तस्मा इन्द्राग्नी यज्ञन्दत्तस्तेनेन्द्राग्निभ्यान्दत्तेन यज्ञेन यजतेऽथ यद्विष्णवे शिपिविष्टायेति यज्ञो वै विष्णुरथ यच्छिपिविष्टायेति यमुपैत्सीत्तमपारात्सीत्तच्छिपितमिव यज्ञस्य भवति तस्माच्छिपिविष्टायेति तत्रो यच्छक्नुयात्तद्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुरथ यदैव नोदियादथोपवसेत् ॥ ४ ॥

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[पश्चाच्चन्द्रदर्शने नैमित्तिकेष्टिः]

अद्यामावास्येति मन्यमान ऽउपवसति । अथैष पश्चाद्दृश्ये सहैष दिव्यः श्वा स यजमानस्य पशूनभ्यवेक्षते तदपशव्यꣳ स्यादुप्रायश्चित्तिकृत ऽएतस्मादु हैतद्रीषावचन्द्रमसादिति ॥ १ ॥ छायामुपसर्प्पन्ति । एतेनो हैतदुपतपदाचक्षते श्श्वल्लुचितमित्येतमु हैवैतदाचक्षते ॥ २ ॥ शशश्चान्द्रमस ऽइति । चन्द्रमा वै सोमो देवानामन्नन्तस्पौर्णमास्यामभिषुण्वन्ति सोऽपरपक्षेऽप ऽओषधीः प्रविशति पशवो वा ऽअप ऽओषधीरदन्ति

तदेनमेताꣳ रात्रिम्पशुभ्यः सन्नयति ॥ ३ ॥ सोऽयामावास्येति । मन्यमान ऽउपवसत्यथैष पश्चाद्दृशे तद्यजमानो यज्ञपथादेति तदाहुः कथङ्कुर्य्यादित्त्वा यज्ञपथाद्यजेताइ न यजेताइ ऽइति यजेत हैव न ह्यन्यदपक्रमणम्भवति इश्वः श्व ऽएवैष ज्यायानुदेति स ऽआमावास्यविधेनैवेष्ट्वाथेष्टिमनुनिर्वपति तदुहैवैव इश्वो वा * ॥ ४ ॥ तस्यै त्रीणि हवीꣳषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालम्पुरोडाशमिन्द्राय व्वृत्रघ्न ऽएकादशकपालमग्नये वैश्वानराय द्वादशकपालम्पुरोडाशम् ॥ ५ ॥ स यदग्नये पथिकृते निर्वपति । अग्निर्वै पथः कर्त्ता स यस्मादेवादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ॥६॥ अथ यदिन्द्राय व्वृत्रघ्ने । पाप्मा वै व्वृत्रो यो भूतेर्व्वारयित्त्वा तिष्ठति कल्याणात्कर्म्मणः साधोस्तमेतदिन्द्रेणैव व्वृत्रघ्ना पाप्मानं व्वृत्रꣳ हन्ति तस्मादिन्द्राय व्वृत्रघ्ने ॥ ७ ॥ अथ यदग्नये वैश्वानराय । द्वादशकपालम्पुरोडाशन्निर्वपति यत्र वा ऽइन्द्रो व्वृत्रमहँस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्व्वम्पाप्मानꣳ समदहत्तथो ऽएवैष ऽएतदिन्द्रेणैव व्वृत्रघ्ना पाप्मानं व्वृत्रꣳ हत्वा तमग्निना वैश्वानरेण सन्दहति तदस्य सर्व्वम्पाप्मानꣳ सन्दहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते ॥ ८ ॥ तस्यै सप्तदश सामिधेन्यो भवन्ति ।

* "पश्चादभ्युदृष्ट आमावास्येनेष्ट्वा तदहरेव श्वो वाग्नये पथिकृत इन्द्राय वृत्रघ्न एकादशकपालो वैश्वानरश्च" का० श्रौ० सू० २५. ४. ४८ ।

उपाꣳशु देवता यजति याः कामयते ता याज्यानुवाक्ययाः करोत्येवमाज्यभागावेवः संस्याज्ये ॥ ९ ॥ तिस्रधन्वन्दुक्षिणान्ददाति । धन्वना वै श्वानम्बाधन्ते तदेतमेवैतद्बाधते यत्तिस्रधन्वन्दुक्षिणान्दुदाति ॥ १० ॥ दण्डन्दुक्षिणान्ददाति । दण्डेन वै श्वानम्बाधन्ते तदेतमेवैतद्बाधते यद्दण्डन्दुक्षिणान्दुदात्येषा न्वादिष्टा दुक्षिणा दद्यात्वेवास्यामुष्यन्यया ऽइतरा दुक्षिणास्तासां स्यात्सम्पद्येत सा हैषा पशव्येष्टिस्तयाप्यनभ्युद्दृष्टो यजेतैव ॥ ११ ॥

प्रथमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[आख्यायिकया सृष्टिप्रतिपादनम्]

आपो ह वा ऽइदमग्रे सलिलमेवास । ता ऽअकामयन्त कथन्नु प्रजायेमहीति ता ऽअश्राम्यँस्तास्तपोऽतप्यन्त तासु तपस्तप्यमानासु हिरण्मयमाण्डः सम्बभूवाजातो ह तर्हि सँवत्सर ऽआस तदिदः हिरण्मयमाण्डं स्यावत्सँवत्सरस्य वेला तावत्पर्यप्लवत ॥ १ ॥ ततः सँवत्सरे पुरुषः समभवत् । स प्रजापतिस्तस्मादु सँवत्सर ऽएव स्त्री वा गौर्वा वडवा वा विजायते सँवत्सरे हि प्रजापतिरजायत स ऽइदः हिरण्मयमाण्डं व्यरुजन्नाह तर्हि का चन प्रतिष्ठास तदेनमिदमेव हिरण्मयमाण्डं स्यावत्सँवत्सरस्य वेलासीत्तावद्बिभ्रत्पर्यप्लवत ॥ २ ॥ स सँवत्सरे व्याजिहीर्षत् । स भूरिति व्याहरत्सेयम्पृथिव्यभवद्भुव ऽइति तदिदमन्त-

रिक्षमभवत्स्वरिति सासौ द्यौरभवत्तस्मादु सँवत्सर ऽएव कुमारो व्व्यजिहीर्षति सँवत्सरे हि प्रजापतिव्व्यार्हरत् ॥३॥ स वा ऽएकाक्षरद्व्यक्षराण्येव । प्रथमं वदन्प्रजापतिरवदत्तस्मादेकाक्षरद्व्यक्षराण्येव प्रथमं वदन्कुमारो वदति ॥ ४ ॥ तानि वा ऽएतानि । पञ्चाक्षराणि तान्पञ्चऽर्त्तून कुरुत त ऽइमे पञ्चऽर्त्तवः स ऽएवमिमाँल्लोकान्जातान्त्सँवत्सरे प्रजापतिरभ्युदतिष्ठत्तस्मादु सँवत्सर ऽएव कुमार ऽउत्तिष्ठासति सँवत्सरे हि प्रजापतिरुदतिष्ठत् ॥ ५ ॥ स सहस्रायुर्ज्जज्ञे । स यथा नद्यै पारम्परापश्श्येदेवꣳ स्वस्यायुषः पारम्पराचक्रव्यौ ॥ ६ ॥ सोऽर्च्चञ्छाम्यँश्चचार प्रजाकामः । स ऽआत्मन्न्येव प्रजातिमधत्त स ऽआस्येनैव देवानसृजत ते देवा दिवमभिपद्यासृज्यन्त तद्देवानान्देवत्वं श्यद्दिवमभिपद्यासृज्यन्त तस्मै ससृजानाय दिवे वास तद्देव देवानान्देवत्वं श्यदस्मै ससृजानाय दिवे वास ॥ ७ ॥ अथ योऽयमवाङ् प्राणः । तेनासुरान सृजत त ऽइमामेव पृथिवीमभिपद्यासृज्यन्त तस्मै ससृजानाय तम ऽइवास ॥ ८ ॥ सोऽवेत् । पाप्मानं वाऽअसृक्षि यस्मै मे ससृजानाय तम ऽइवाभूदिति ताँस्तत ऽएव पाप्मनाविद्ध्यत्ते तत ऽएव पराभवँस्तस्मादाहुर्न्नैतदस्ति यदेवासुरं श्यदिदमन्वाख्याने स्वदुद्यत ऽइति हास्ते स्वस्ततो ह्येव तान्प्रजापतिः पाप्मनाविद्ध्यत्ते तत ऽएव पराभवन्निति ॥ ९ ॥ तस्मादेतदृषिणाऽभ्यनूक्तम् । न त्वं श्युयुत्से कतमच्चनाहर्न्न तेऽमित्रो मघवन्कश्चनास्ति

मायेत्सा ते यानि युद्धान्न्याहुर्न्नाद्य शत्रुन्न नु पुरा युयुत्स ऽइति ॥ १० ॥ स यदस्मै देवान्त्ससृजानाय । द्विवेवास तद्धरकुरुताथ यदस्म्मा ऽअसुरान्त्ससृजानाय तम ऽइवास ताꣳ रात्रिमकुरुत ते ऽअहोरात्रे ॥ ११ ॥ स ऽऐक्षत प्रजापतिः । सर्वं वा ऽअत्सारिषं य्य ऽइमा देवता ऽअसृक्षीति स सर्वत्सरोऽभवत्सर्वत्सरो ह वै नामैतद्यत्सँवत्सर ऽइति स यो हैवमेतत्सँवत्सरस्य सर्वत्सरत्वं वेद यो हैनम्पाप्म्मा मायया त्सरति न हैनꣳ सोऽभिभवत्यथ यमभिचरत्यभि हैवैनम्भवति य ऽएवमेतत्सँवत्सरस्य सर्वत्सरत्वं वेद ॥ १२ ॥ स ऽऐक्षत प्रजापतिः । इमं वा ऽआत्मनः प्रतिमामस्रक्षि यत्सँवत्सरमिति तस्म्मादाहुः प्रजापतिः सँवत्सर ऽइत्यात्मनो ह्येतम्प्रतिमामसृजत यद्वेव चतुरक्षरः सँवत्सरश्चतुरक्षरः प्रजापतिस्तेनो हैवास्यैष प्रतिमा ॥ १३ ॥ ता वा ऽएताः प्रजापतेरधि देवता ऽअसृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यः ॥ १४ ॥ ताः सहस्रायुषो जज्ञिरे । ता यथा नद्यै पारम्परापऽइयेदेवꣳ स्वस्यायुषः पारम्पराचक्ष्युः ॥ १५ ॥ ता ऽअर्च्चन्त्यः श्राम्म्यन्तश्चेरुः । तत ऽएतम्परमेष्ठी प्राजापत्यो यज्ञमपश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्वाकामयताहमेवेदꣳ सर्वꣳ स्यामिति स ऽआपोऽभवदापो वा ऽइदꣳ सर्वन्ता यत्परमे स्थाने तिष्ठन्ति यो ह्येहाभिखनेदप ऽएवाभिविन्देत्परमाद्वा ऽएतत्स्थानाद्वर्षति यद्दिवस्तस्म्मात्परमेष्ठी नाम ॥ १६ ॥ स परमेष्ठी प्रजापति-

म्पितरमब्ब्रवीत् । कामप्रं वा ऽअहं य्यज्ञमदर्शन्तेन त्वा याजयानीति तथेति तमयाजयत्स ऽइष्ट्वाकामयताहमेवेदः सर्वꣳ स्यामिति स प्राणोऽभवत्प्राणो वा ऽइदः सर्वमयं वै प्राणो योऽयम्पवते स प्रजापतिस्तस्य दृष्टिर्य्यदेव वेदेत्थाद्धातीति यद्वै किञ्च प्राणि स प्रजापतिः स यो हैवमेताम्प्रजापतेर्दृष्टिं वेदाविरिव हैव भवति ॥ १७ ॥

स प्रजापतिरिन्द्रम्पुत्रमब्ब्रवीत् । अनेन त्वा कामप्रेण यज्ञेन याजयानि येन मामिदम्परमेष्ठ्ययीयजदिति तथेति तमयाजयत्स ऽइष्ट्वाकामयताहमेवेदः सर्वꣳ स्यामिति स वागभवद्वाग्वा ऽइदः सर्वन्तस्मादाहुरिन्द्रो वागिति ॥ १८ ॥ [अर्धप्रपाठकः] स ऽइन्द्रोऽग्नीषोमौ ब्भ्रातरावब्ब्रवीत् । अनेन वाङ्कामप्रेण यज्ञेन याजयानि येन मामिदम्पिता प्रजापतिरयीयजदिति तथेति तावयाजयत्तावि्ष्ट्वाकामयेतामावमेवेदः सर्वꣳ स्यावेति तयोरन्नादु ऽएवान्यतरोऽभवदन्नमन्यतरोऽन्नादु ऽएवाग्निरभवदन्नः सोमोन्नादश्च वा ऽइदः सर्वमन्नञ्च ॥ १९ ॥ ता वा ऽएताः । पञ्च देवता ऽएतेन कामप्रेण यज्ञेनायजन्त ता यत्कामा ऽअयजन्त स ऽआभ्यः कामः समार्द्ध्यत यत्कामो ह वा ऽएतेन यज्ञेन यजते सोऽस्मै कामः समृद्ध्यते ॥ २० ॥ त ऽइष्ट्वा प्राचीन्दिशमपश्यन् । ताम्प्राचीमेवाकुर्वत सेयम्प्राच्येव दिक्तस्मादिमाः प्रजाः प्राच्यः सर्प्पन्ति प्राचीꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तामूर्ज्जमकुर्वतेमाङ्कल्वूर्ज्जम्पश्येमेति सासौ द्यौरभवत

॥ २१ ॥ अथ दक्षिणान्दिशमपश्यन् । तान्दक्षिणामेवाकुर्वत सेयन्दक्षिणैव दिक्तस्मादु दक्षिणत ऽएव दक्षिणा ऽउपतिष्ठन्ते दक्षिणतोऽभ्यवाजन्ति दक्षिणाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तँल्लोकमकुर्वतेमङ्खलु लोकम्पश्येमेति तदिदमन्तरिक्षमभवदेष वै लोकः सा यथा हैवेयम्प्रतिष्ठाविरस्मिँल्लोके पृथिव्येवमु हैवैषा प्रतिष्ठाविरमुष्मिँल्लोक ऽइदमन्तरिक्षꣳ स यदिह सन्नमुँल्लोकन्न पश्यति तस्मादाहुः परोऽक्षमसौ लोक ऽइति ॥ २२ ॥ अथ प्रतीचीन्दिशमपश्यन् । तामाशामकुर्वत तस्माद्यत्प्राङ् सृत्त्वा विन्दुत ऽएतामेव तेन दिशमेत्याशाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति ताꣳ श्रियमकुर्वतेमाङ्खलु श्रिश्रयम्पश्येमेति सेयम्पृथिव्यभवच्छ्रीर्वा ऽइयन्तस्माद्योऽस्यै भूयिष्ठं विन्दते स ऽएव श्रेष्ठो भवति ॥ २३ ॥ अथोदीचीन्दिशमपश्यन् । तामपोऽकुर्वतोपैनामितः कुर्वीमहीति तन्धर्म्ममकुर्वत धर्म्मो वा ऽआपस्तस्माद्यदेमँल्लोकमाप ऽआगच्छन्ति सर्वमेवेदं स्यथा धर्म्मम्भवत्यथ यदा वृष्टिर्भवति बलीयानेव तर्ह्यबलीयस ऽआदत्ते धर्म्मो ह्यापः ॥ २४ ॥ ता वा ऽएताः । एकादश देवताः पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृत्तूयोऽनुयाजाः ॥ २५ ॥ ता ऽएकादशाहुतयः । एताभिर्वा ऽआहुतिभिर्द्यौर्वा ऽइमाँल्लोकान्नजयन्नेता दिशस्तथो ऽएवैष ऽएताभिराहुतिभिरिमाँल्लोकाञ्जयत्येता दिशः ॥ २६ ॥ चतस्रोऽवान्तरदिशः । त ऽएव चत्वारः पत्नीसंयाजा ऽअवान्तरदिशो वै

देवाश्चतुर्भिः पत्नीसंयाजैरजयन्नवान्तरदिश ऽउ ऽएवैष एतैर्जयति ॥ २७ ॥ अथेडा । अन्नाद्यमेवैतया देवा ऽअजयँस्तथो ऽएवैष ऽएतयान्नाद्यमेव जयत्येषा नु देवत्रा दर्शपूर्णमासयोः सम्पत् ॥ २८ ॥ अथाध्यात्मम् । पञ्चेमे पुरुषे प्राणा ऽऋते चक्षुर्भ्यान्त ऽएव पञ्च प्रयाजा चक्षुषी ऽआज्यभागौ ॥ २९ ॥ अयमेवावाङ् प्राणः स्विष्टकृत् । स यत्तमभ्यर्द्ध ऽइवेतराभ्य ऽआहुतिभ्यो जुहोति तस्मादेतस्मात्प्राणात्सर्वे प्राणा बीभत्सन्तेऽथ यत्स्विष्टकृते सर्वेषाꣳ हविषाꣳ समवद्यति तस्माद्यत्किञ्चेमान्प्राणानापद्यत ऽएतमेव तत्सर्वः समवैति ॥३०॥ त्रीणि शिश्नानि । त ऽएव त्रयोऽनुयाजाः स योऽयं वर्षिष्ठोऽनुयाजस्तदिदं वर्षिष्ठमिव शिश्नन्तं वा ऽअनवानन्यजेदित्याहुस्तथो हास्यैतदृद्ध्रम्भवतीति ॥ ३१ ॥ स वै सकृदुवान्न्यात् । एकꣳ ह्येतस्य पर्व्वाथ यदपर्व्वकꣳ स्यात्प्रतृण्णं वैव तिष्ठेल्लम्वेत वा तस्मादेतदुच्च तिष्ठति पद्यते च तस्मात्सकृदुवान्न्यात् ॥ ३२ ॥ द्वौ बाहू द्वा ऽऊरू । त ऽएव चत्वारः पत्नीसंयाजाः प्रतिष्ठायमेव प्राण ऽइडा यत्तान्नाग्नौ जुहोति यत्सा प्रदग्धेव तस्मादयमनवतृण्णः प्राणः ॥ ३३ ॥ अस्त्येव याज्यानुवाक्क्याः । माꣳसꣳ हविस्तन्मितञ्छन्दो यद्याज्यानुवाक्क्यास्तस्मादु समावन्त्येवास्थीनि मेद्यतश्च कृश्यतश्च भवन्त्यथ यद्भूय ऽइव च हविर्गृह्णाति कनीय ऽइव च तस्मादु माꣳसान्येव मेद्यतो मेद्यन्ति माꣳसानि कृश्यतः कृश्यन्ति तेनैतेन

यज्ञेन याङ्कामयते देवतान्तां ऋयजति यस्यै हविर्भवति ॥ ३४ ॥ ता वा ऽएताः । अनपोद्धार्ष्या ऽआहुतयो भवन्ति स यद्धैतासामपोद्धरेद्यथैकमङ्गꣳ शृणीयात्प्राणं वा निर्हण्यादेवन्तदन्याभ्येव हवीꣳष्युप चाह्वियन्तेऽप च ह्वियन्ते ॥ ३५ ॥ ता वा ऽएताः । षोडशाहुतयो भवन्ति षोडशकलो वै पुरुषः पुरुषो यज्ञस्तस्मात्षोडशाहुतयो भवन्ति ॥ ३६ ॥

प्रथमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

[व्रतोपायनमीमांसा]

तद्वा ऽअद्रो व्रतोपायन ऽउद्यते । यदि नाश्नाति पितृदेवत्यो भवति यद्यु ऽअश्नाति देवानत्त्यश्नातीति तदारण्यमश्नीयादिति तत्र स्थापयन्ति ॥ १ ॥ स यदि ग्राम्या ऽओषधीरश्नाति । पुरोडाशस्य मेधमश्नाति यद्यारण्या ऽओषधीरश्नाति बर्हिषो मेधमश्नाति यदि वानस्पत्यमश्नातीद्धमस्य मेधमश्नाति यदि पयः पिबति सानाय्यस्य चाज्यस्य च मेधमश्नाति यद्यपः पिबति प्रणीतानाम्मेधमश्नाति यदि नाश्नाति पितृदेवत्यो भवति ॥ २ ॥ तदाहुः । किमयनमिति स्वयꣳ हैवैते रात्री ऽअग्निहोत्रञ्जुहुयात्स यद्धुत्वा प्राश्नाति तेनापितृदेवत्यो भवत्याहुतिर्वा ऽएषा स यदेवैतामात्मन्नाहुतिञ्जुहोति तेनो ऽएतेषाम्मेधानान्नाश्नाति ॥ ३ ॥ एते ह वै रात्री । सर्वा रात्रयः समवयन्ति या ऽआपूर्यमाणपक्षस्य रात्रयस्ताः सर्वाः पौर्णमासीꣳ समवयन्ति या ऽअपक्षीयमाणपक्षस्य

रात्रयस्ताः सर्वा ऽअमावास्याꣳ समवयन्ति स यो हैवं विद्वान्त्स्वयमुपवसथे जुहोति सर्वदा हैवास्य स्वयꣳहुतम्भवति ॥ ४ ॥

प्रथमाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

[आख्यायिकया यज्ञोत्पत्तिकथनम्]

देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमानेनैव कस्मिन्नु वयञ्जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवुस्तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः ॥ १ ॥ अथ देवाः । अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानम्प्रददौ यज्ञो हैषा मास यज्ञो हि देवानामन्नम् ॥ २ ॥ स देवेभ्य ऽआत्मानम्प्रदाय । अथैतमात्मानः प्रतिमामसृजत यद्यज्ञन्तस्मादाहुः प्रजापतिर्यज्ञ ऽइत्यात्मनो ह्येतम्प्रतिमामसृजत ॥ ३ ॥ स ऽएतेन यज्ञेन । देवेभ्य ऽआत्मानन्निरक्रीणीत स यद्वृतमुपैति यथैव तत्प्रजापतिर्देवेभ्य ऽआत्मानम्प्रायच्छदेवमेवैष ऽएतद्देवेभ्य ऽआत्मानम्प्रयच्छति तस्मादु संयत ऽएवैताꣳ रात्रिञ्चिचरिषेद्यथा हविषा चरेदेवꣳ हविर्ह्येष देवानाम्भवति ॥ ४ ॥ अथ यद्यज्ञन्तनुते । यज्ञेनैवैतद्देवेभ्य ऽआत्मानन्निष्क्रीणीते यथैव तत्प्रजापतिर्न्निरक्रीणीतैवमथ यद्धविर्न्निर्वपति हविषैवैतद्यज्ञन्निष्क्रीणाति हविरनुवाक्यय-

• व्रीहिपिष्टैर्यवपिष्टैर्वा निर्मित. पक्वः पिण्डविशेष. पुरोडाश. ।

यानुवाक्यामवदानेनावदानं याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्या तस्याहुतिरेवानिष्क्रीता भवति ॥ ५ ॥ स यथाग्रप्रशीर्णो वृक्षः । एवमस्यैष यज्ञो भवत्याहुतिमेवाग्नाहुर्ऋषेण निष्क्रीणाति तद्यदेतद्धीनं स्यज्ञस्याग्नाहुरति तस्मादन्वाहाहार्यो नामैवमु हास्यैष सर्व ऽएव यज्ञो निष्क्रीतो भवत्येष ह वै यजमानस्यामुष्मिँल्लोक ऽआत्मा भवति यद्यज्ञ स ह सर्वतनूरेव यजमानोऽमुष्मिँल्लोके सम्भवति य ऽएवं विद्वान्निष्क्रीत्या यजते ॥ ६ ॥

प्रथमाध्याये अष्टमं ब्राह्मणम् ॥ ८ ॥

इति प्रथमोऽध्यायः ॥१॥

[पुरुषजन्मत्रयप्रतिपादनम्, सामिधेनीप्रशंसाच]

त्रिर्ह वै पुरुषो जायते । एतन्वेव मातुश्चाधि पितुश्चाग्ने जायतेऽथ यं स्यज्ञ ऽउपनमति स यद्यजते तद्द्वितीयञ्जायतेऽथ यत्र म्म्रियते यत्रैनमग्नावभ्यादधति स यत्ततः सम्भवति तत्तृतीयञ्जायते तस्मात्त्रिः पुरुषो जायत ऽइत्याहुः ॥ १ ॥ ता वा ऽएताः । एकादश सामिधेनीरन्वाह दश वा ऽइमे पुरुषे प्राणा ऽआत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता ऽएतावान्वै पुरुषस्तदेनङ्कृत्स्नञ्जनयत्यथ यदूर्ध्वाः सामिधेनीभ्यः सा प्रतिष्ठा तदेनञ्जनयित्वा प्रतिष्ठापयति ॥ २ ॥ नव प्रसवस्य

(१) सम्यगिध्यते ज्वाल्यतेऽग्निर्याभिर्ऋग्भिस्ता सामिधेन्य 'प्र वो वाजा अभिद्यव, (तै० ब्रा० ३।५।२।१) इत्याद्या एकादश ।

व्याहृतयः । नवेमे पुरुषे प्राणास्तदेनन्द्वितीयञ्जनयत्याश्श्रावणम्प्रत्याश्श्रावणः सा प्रतिष्ठाथ षदेवादः सृष्टौ जह्नोद्यते तदेनन्तृतीयञ्जनयति पत्नीसंयाजा ऽएव तत्र प्रतिष्ठा ॥ ३ ॥ त्रिर्हि वै पुरुषो जायते । एवमेवैनमेतद्यज्ञात्त्रिर्जनयति तासामेकादशानान्त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥ ४ ॥ ताः पञ्चदश सामिधेन्यः । द्वावाधारौ पञ्च प्रयाजा ऽइडा त्रयोऽनुयाजाः सूक्तवाकश्च शम्म्योर्वाकश्च तास्त्रयोदशाहुतयोऽथ षदेवादुः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥ ५ ॥ ताः पञ्चदशाहुतयः । तासाम्पञ्चदशानामाहुतीनामेता ऽअनुवाक्या ऽएताः पञ्चदश सामिधेन्य ऽएतासामनुवाक्यानामेता याज्या य ऽएवात्र मन्त्रो यो निगदस्तद्याज्यारूपमेतेनो हास्यैता ऽआहुतयोऽनुवाक्यवत्यो भवन्त्येताभिः सामिधेनीभिरेताभिराहुतिभिरेता ऽअनुवाक्या याज्यवत्यश्चाहुतिमत्यश्च भवन्ति ॥ ६ ॥

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

---

(१) वक्षः कर्बिदेशमारभ्य देशान्तरपर्यन्तं समन्त्रकमाज्यधारया आहरणमाधारः ।

(२) प्रकर्षेण इज्यन्ते देवता एभिस्ते प्रयाजाः. "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहा यजति" (तै० सं० २।६।१) इति प्रयाजाः ।

(३) इज्यते अनयेति व्युत्पत्त्या 'ये यजामहे' इति पूर्विका वषट्कारान्ता हविःप्रदानार्था ऋक् याज्याशब्देनोच्यते ।

(४) पुरः यागात्पूर्वं देवतामनुकलयितुं या ऋक् अनूच्यते सा पुरोऽनुवाक्या अनुवाक्या इति चोच्यते ।

(५) 'वत्य०' इति 'ज' पुस्तके ।

[याज्यानुवाक्ययोश्छन्दोविशेषन्वविधानपूर्वकं स्तवनम्]

गायत्रीमनुवाक्क्यामन्वाह । त्रिपदा वै गायत्री त्रय ऽइमे लोका ऽइमानेवैतल्लोकान्देवाः प्रत्यष्ठापयन् ॥ १ ॥ अथ त्रिष्टुभा यजति । चतुष्पदा वै त्रिष्टुप्चतुष्पादाः पशवस्तत्पशूनेवैतदेषु लोकेषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥ २ ॥ द्व्यक्षरो वषट्कारः । द्विपाद्वै पुरुषस्तत्पुरुषमेवैतद्विपादमेषु पशुषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥३॥ सोऽयन्द्विपात्पुरुषः । पशुषु प्रतिष्ठित ऽएवमेवैष ऽएतल्लोकान्प्रतिष्ठापयति लोकेषु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति पशुषु प्रतिष्ठितेष्वात्मानम्प्रतिष्ठापयत्येवमेष पुरुषः पशुषु प्रतिष्ठितो य ऽएवं विद्वान्यजते ॥ ४ ॥ अथ यद्वषट्कृते जुहोति । एष वै वषट्कारो य ऽएष तपति स ऽएष मृत्युस्तदेनमुपरिष्टान्मृत्योः संस्करोति तदेनमतो जनयति स ऽएतम्मृत्युमतिमुच्यते यज्ञो वा ऽअस्यात्मा भवति तद्यज्ञ ऽएव भूत्वैतन्मृत्युमतिमुच्यत ऽएतेनो हास्य सर्वे यज्ञक्रतव ऽएतम्मृत्युमतिमुक्ताः ॥ ५ ॥ * अथ यामेताम्माहुतिञ्जुहोति । एषा ह वा ऽअस्याहुतिरमुष्मिँल्लोक ऽआत्मा भवति स यदैवंविदस्म्माल्लोकात्प्रैत्यथैनमेषाहुतिरेतस्य पृष्ठे सत्याह्वयत्येह्यहं वै त ऽइहात्मास्म्मीति तद्यदाह्वयति तस्म्मादाहुतिर्न्नाम ॥ ६ ॥

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥



* शतम् ५६०० ।

[आघारौ स्तोतुमाख्यायिकया तत्सृष्टिप्रतिपादनम्]

ब्रह्म वा ऽइदमग्र ऽआसीत् । तद्देवानसृजत तद्देवान्त्सृष्टेषु लोकेषु व्यारोहयदस्मिन्नेव लोकेऽग्निं वायुमन्तरिक्षे दिव्येव सूर्य्यम् ॥ १ ॥ अथ येऽत ऽऊर्द्ध्वा लोकाः । तद्या ऽअत ऽऊर्द्ध्वा देवतास्तेषु ता देवता व्यारोहयत्स यथा हैवेम ऽआविर्ल्लोका ऽइमाश्च देवता ऽएवमु हैव त ऽआविर्ल्लोकास्ताश्च देवता येषु ता देवता व्यारोहयत् ॥ २ ॥ अथ ब्रह्मैव परार्द्धमगच्छत् । तत्परार्द्धङ्कृत्वैक्षत कथन्निवमाँल्लोकान्प्रत्यवेयामिति तद्द्वाभ्यामेव प्रत्यवैद्रूपेण चैव नाम्ना च स यस्य कस्य च नामास्ति तन्नाम यस्यो ऽअपि नाम नास्ति यद्वेद रूपेणेदꣳ रूपमिति तद्रूपमेतावद्वा ऽइदं ष्यावद्रूपञ्चैव नाम च ॥ ३ ॥ ते हैते ब्रह्मणो महती ऽअभ्वे । स यो हैते ब्रह्मणो महती ऽअभ्वे वेद महद्धैवाभ्वम्भवति ॥ ४ ॥ ते हैते ब्रह्मणो महती यक्षे । स यो हैते ब्रह्मणो महती यक्षे वेद महद्धैव यक्षम्भवति तयोरन्यतरज्यायो रूपमेव यद्व्यपि नाम रूपमेव तत्स यो हैतयोर्ज्यायो वेद ज्यायान्ह तस्माद्भवति यस्माज्ज्यायान्बुभूषति ॥ ५ ॥ मर्त्या ह वा ऽअग्रे देवा ऽआसुः । स यदैव ते ब्रह्मणापुरथामृता ऽआसुः स यन्मनस ऽआघारयति मनो वै रूपम्मनसा हि वेदेदꣳ रूपमिति तेन रूपमाप्नोत्यथ यं वाच ऽआघारयति वाग्वै नाम वाचा हि नाम गृह्णाति तेनो नामाप्नोत्येतावद्वा ऽइदꣳ सर्वं ष्यावद्रूपञ्चैव

नाम च तत्सर्वमाप्नोति सर्वं वा ऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृतम्भवत्यक्षय्यो लोकः ॥ ६ ॥ तद्वा ऽअदꣳ ऽआग्नेय्यामिष्टा ऽउद्यते । यथा तदृषिभ्यो यज्ञः प्रारोचत तं यथातन्वत तद्यज्ञन्तन्वानानृषीन्गन्धर्वा ऽउपनिषेदुस्ते ह स्म सन्निदधतीदं वा ऽअत्यरीरिचन्निदमून्मक्रन्निति स यदैषां यज्ञः सन्तस्थेऽथैनाँस्तद्दर्शयाञ्चक्रुरिदं वा ऽअत्यरीरिचतेदमून्मकर्त्तेति ॥ ७ ॥ स यदतिरेचयाञ्चक्रुः । यथा गिरिरेवन्तदासाथ यदून्यञ्चक्रुर्यथा इश्वभ्राः प्रदरा एवन्तदास ॥ ८ ॥ स यत्र शंय्योराह । तदभिमृशति 'यज्ञ नमश्च त ऽउप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्वे'ति स यदतिरेचयति तन्नमस्कारेण शमयत्यथ यदूनङ्करोत्युप चेति तेन तदून्यूनम्भवति यज्ञस्य शिवे सन्तिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तन्तच्छिवन्तेन तदुभयꣳ शमयति स्विष्टे मे सन्तिष्ठस्वेति यद्वै यज्ञस्याऽन्यूनातिरिक्तन्तत्स्विष्टन्तेनो तदुभयꣳ शमयत्येवमु हास्यैतेन यज्ञेनान्यूनातिरिक्तेनैवेष्टम्भवति य ऽएवं विद्वानेवमभिमृशति तस्मादेवमेवाभिमृशेत्ते ह ते गन्धर्वा ऽआसुः शुष्पं स्यवमान्कृषिरुद्वालवान्धानान्तर्वान् ॥ ९ ॥

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥



(१) शु० य० सं० अ० २ क० १९ ।

[दर्शपूर्णमासनामात्मना आधारस्तुतिः, अधिदैवमध्यात्ममेदेन दर्शपूर्णमासप्रतिपादनञ्च]

एष वै पूर्णमाः । य ऽएष तपत्यहरहर्ह्येवैष पूर्णो ऽथैष ऽएव दुर्शो यच्चन्द्रमा ददृश ऽइव ह्येषः ॥ १ ॥ अथो ऽइतरथाहुः । एष ऽएव पूर्णमा यच्चन्द्रमा ऽएतस्य ह्यनु पूरणम्पौर्णमासीत्याचक्षतेऽथैष ऽएव दुर्शो य एष तपति ददृश ऽइव ह्येषः ॥ २ ॥ इयमेव पूर्णमाः । पूर्णेव हीयमसावेव द्यौर्दर्शो ददृश ऽइव ह्यसौ द्यौः ॥ ३ ॥ रात्रिरेव पूर्णमाः । पूर्णेव हीयः रात्रिरहरेव दुर्शो ददृश ऽइव हीदमहरेषा नु देवत्रा दर्शपूर्णमासयोर्म्मीमाꣳसा ॥ ४ ॥ अथाध्यात्मम् । उदान ऽएव पूर्णमा ऽउदानेन ह्ययम्पुरुषः पूर्य्यत ऽइव प्राण ऽएव दुर्शो ददृश ऽइव ह्ययम्प्राणस्तदेतावन्नादुश्चान्नप्रदुश्च दर्शपूर्णमासौ ॥ ५ ॥ प्राण ऽएवान्नादुः । प्राणेन हीदमन्नमद्यत ऽउदान ऽएवान्नप्रदु ऽउदानेन हीदमन्नम्प्रदीयते स यो हैतावन्नादुश्चान्नप्रदुश्च दर्शपूर्णमासौ वेदान्नादो हैव भवति प्र हास्मा ऽअन्नाद्यन्दीयते ॥ ६ ॥ मन ऽएव पूर्णमाः । पूर्णमिव हीदम्मनो ब्रागेव दुर्शो ददृश ऽइव हीयं वाक्तदेतावद्ध्यात्मम्प्रत्यक्षन्दर्शपूर्णमासौ स यदुपवसथे व्रतोपायनीयमश्नाति तेनैतावद्ध्यात्मम्प्रत्यक्षन्दर्शपूर्णमासौ प्रीणाति यज्ञेन प्रातर्हैवो ॥७॥ तदाहुः । यन्न पूर्णमासायेति हविर्गृह्यते न दुर्शायेति हविर्गृह्यते न पूर्णमासायानुब्रूहि न दुर्शायानुब्रूहि न पूर्णमासं यजन न दुर्श

ऽयजेऱ्यथ केनास्य दर्शपूर्णमासाविष्टौ भवत ऽइति स यम्मनस ऽआघाऱयति मनो वै पूर्णमास्तेन पूर्णमासं ऽयजत्यथ यं वाच ऽआघाऱयति वाग्वै दुर्शस्तेनो दुर्शं ऽयजत्येतेनो हास्य दर्शपूर्णमासाविष्टौ भवतः ॥ ८ ॥ तद्धैके । चरू निर्वपन्ति पौर्णमास्याꣳ सरस्वतेऽमावास्यायाꣳ सरस्वत्या ऽएतत्प्रत्यक्षन्दर्शपूर्णमासौ यजामह ऽइति ब्रुवन्तस्तदु तथा न कुर्य्याद्यमनो वै सरस्वान्न्वाक्सरस्वती स यदेवैतावाघाराविघाऱयति तदेवास्य दर्शपूर्णमासाविष्टौ भवतस्तस्मादेतौ चरू न निर्वपेत् ॥ ९ ॥ तदाहुः । आगूर्त्तो वा ऽएष भवति यो दर्शपूर्णमासाभ्यां ऽयजते पौर्णमासेन हीष्ट्वा वेदामावास्येन यक्ष्य ऽइत्यामावास्येनेष्ट्वा वेद पुनः पौर्णमासेन यक्ष्य ऽइति स ऽआगूर्त्येवामुँल्लोकमेति यदामुँल्लोकमेति कथमनागूर्त्तो भवतीति स यदेवैता ऽउभयत्राघाराविघाऱयति तदेवास्य दर्शपूर्णमासौ सन्तिष्ठेते स सꣳस्थितयोरेव दर्शपूर्णमासयोरथामुँल्लोकमेति तथानागूर्त्तो भवति ॥ १० ॥

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥
काण्डिकासंख्या ॥ ११९ ॥

[दर्शपूर्णमासयोरश्वमेधात्मना स्तुतिः]

अपि ह वा ऽएतर्हि । देवेभ्योऽश्वमेधमालभन्ते तदाहुः प्राक्रतोऽश्वमेध ऽइतीतर ऽइन्नूनः स तद्वा ऽएष

ऽएवाश्वमेधो यच्चन्द्रमाः ॥ १ ॥ तदाहुः । पदे पदेऽश्वस्य मेध्यस्याहुतिञ्जुहुतीति स यत्सायम्प्रातरग्निहोत्रञ्जुहोति द्वे सायमाहुती जुहोती द्वे प्रातस्ताश्चतस्र ऽआहुतयश्चतुष्पाद्वा ऽअश्वस्तदस्य पदे पद ऽएवाहुतिर्हुता भवति ॥ २ ॥ तदाहुः । विवृत्तेऽश्वस्येष्टिर्निर्वपतीत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष ऽएताश्च रात्रिन्न पुरस्तान्न पश्चाद्दृशे तदिमँल्लोकमागच्छति सोऽस्मिमँल्लोके विवर्त्तते ॥ ३ ॥ स यदामावास्येन यजते । विवृत्त ऽएवास्यैतदिष्टिर्निर्वपत्यथ यत्पौर्णमासेन यजतेऽश्वमेधमेवैतदालभते तमालब्ध्य देवेभ्यः प्रयच्छति सँवत्सरे वा ऽइतरमश्वमेधमालभन्त ऽएष वै मासः परिप्लवमानः सँवत्सरङ्करोति तदस्य सँवत्सरे सँवत्सर ऽएवाश्वमेध ऽआलब्धो भवति ॥ ४ ॥ तं वा ऽएतम् । मासि मास्येवाश्वमेधमालभन्ते स यो हैवं विद्वानग्निहोत्रञ्च जुहोति दर्शपूर्णमासाभ्याञ्च यजते मासि मासि हैवास्याश्वमेधेनेष्टम्भवत्येतदु हास्याग्निहोत्रञ्च दर्शपूर्णमासौ चाश्वमेधमभिसम्पद्येते ॥ ५ ॥

द्वितीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[प्रणीतादीनां यज्ञशरीरावयवत्वेन सम्पत्तिकथनम्]


शिरो ह वा ऽएतद्यज्ञस्य यत्प्रणीताः । स यत्प्रणीताः प्रणयति शिर ऽएवैतद्यज्ञस्य संस्करोति स

विद्याच्छिर ऽएव म ऽएतत्संस्क्रियत ऽइति ॥ १ ॥ प्राण ऽएवास्येद्धमः । प्राणेन हीदः सर्वमिद्धं श्वत्प्राणभृन्निमिषद्येजति स विद्यादहमेवैष ऽइद्धम ऽइति ॥ २ ॥ अनूकमेवास्य सामिधेन्यः । तस्मात्ता ब्रूयात्सन्तन्वन्निव मेऽनुब्रूहीति सन्ततमिव हीदमनूकम्मनश्चैवास्य वाक्चचाघारौ सरस्वाँश्च सरस्वती च स विद्याद्मनश्चैव मे वाक्चचाघारौ सरस्वाँश्च सरस्वती चेति ॥ ३ ॥ पञ्च प्रयाजाः । इम ऽएवास्य ते शीर्षण्याः पञ्च प्राणा मुखमेवास्य प्रथमः प्रयाजो दक्षिणा नासिका द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः पञ्चमोऽथ यच्चतुर्त्थे प्रयाजे समानयति तस्मादिदꣳ श्रोत्रमन्तरतः सन्तृण्णश्चक्षुषी ऽआज्यभागौ स विद्याच्चक्षुषी ऽएव म ऽएताविति ॥ ४ ॥ अथ य ऽआग्नेयः पुरोडाशः । अयमेवास्य स दक्षिणोऽर्द्धो हृदयमेवास्योपाꣳशुयाजः स यत्तेनोपाꣳशु चरन्ति तस्मादिदङ्गुहेव हृदयम् ॥ ५ ॥ अथ योऽग्नीषोमीयः पुरोडाशः । अयमेवास्य स ऽउत्तरोऽर्द्ध ऽऐन्द्रं वा सान्नाय्यमन्तराꣳ समेवास्य स्विष्टकृद्धिषम्प्राशित्रम् ॥ ६ ॥ स यत्प्राशित्रमवद्यति । यथैव तत्प्रजापतेराविद्धन्निरकृन्तन्नेवमेवैतस्यैतद्यद्वेष्टितं श्वद्ग्रथितं श्वद्वरुण्यन्तन्निष्कृन्तन्ति स विद्याद्यथैव तत्प्रजापतेराविद्धन्निरकृन्तन्नेवमेव म ऽइदं श्वद्वेष्टितं श्वद्ग्रथितं श्वद्वरुण्यन्तन्निष्कृन्तन्तीति ॥ ७ ॥ उदुरमेवास्येडा ।

तद्यथैवाद ऽइडायाꣳ समवद्यन्त्येवमेवेदं विश्वꣳरूपमन्नमुदरे समवधीयते ॥ ८ ॥ त्रयोऽनुयाजाः । इम ऽएवास्य तेऽवाञ्चस्त्रयः प्राणा बाहू ऽएवास्य सूक्तवाकश्च शꣳस्योर्वाकश्च चत्वारः पत्नीसंयाजाश्चतस्रो वै प्रतिष्ठा ऽऊरू द्वावष्ठीवन्तौ द्वौ पादावेवास्य समिष्टयजुः ॥ ९ ॥ ता ऽएकविꣳशतिराहुतयः । द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्दुशाग्नीषोमीय ऽउपाꣳशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शꣳस्योर्वाकश्चाथ यदेवादुः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥ १० ॥ ता ऽएकविꣳशतिराहुतयः । द्वादश वै मासाः सँवत्सरस्य पञ्चऽर्त्तवस्त्रयो लोकास्तद्विꣳशतिरेष ऽएवैकविꣳशो य ऽएष तपति सैषा गतिरेषा प्रतिष्ठा तदेताङ्गतिमेताम्प्रतिष्ठाङ्गच्छति ॥ ११ ॥ तद्ध स्मैतदारुणिराह । अर्द्धमासशो वा ऽअहममुनादित्येन स लोको भवामि तामहन्दर्शपूर्णमासयोः सम्पदं वेदेति ॥ ११ ॥ तदाहुः । आत्मयाजी श्रेया३न्देवयाजी३ इत्यात्मयाजीति ह ब्रूयात्स ह वा ऽआत्मयाजी यो वेदेदम्मेऽनेनाङ्गꣳ संस्क्रियत ऽइदम्मेऽनेनाङ्गमुपधीयत ऽइति स यथाहिस्त्वचो निर्म्मुच्येतैवमस्मान्मर्त्याच्छरीरात्पाप्मनो निर्म्मुच्यते स ऽऋङ्मयो यजुर्म्मयः साममय ऽआहुतिमयः स्वर्गꣳलोकमभिसम्भवति ॥ १३ ॥ अथ ह स देवयाजी यो वेद । देवानेवाहमिदं स्वर्जे देवान्त्सपर्य्यामीति स यथा श्रेयसे

पापीयान्न्वलिः हुरेद्वैश्यो वा राज्ञे वलिः हुरेदेवः स स ह न तावन्तँल्लोकञ्जयति यावन्तमितरः ॥ १४ ॥

द्वितीयाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥



[दर्शपूर्णमासयागस्य विशिष्टफलसाधनताप्रतिपादनम्]

सँवत्सरो यज्ञः । स यो ह वै सँवत्सरो यज्ञ ऽइति वेदान्ते हैवास्य सँवत्सरस्येष्टम्भवत्यथो यत्किञ्च सँवत्सरे क्रियते सर्वः हैवास्य तदाप्तमवरुद्धमभिजितम्भवति ॥ १ ॥ ऋतव ऽऋत्विजः । स यो ह वा ऽऋतव ऽऋत्विज ऽइति वेदान्ते हैवास्यऽर्त्तूनामिष्टम्भवत्यथो यत्किञ्चऽर्त्तुषु क्रियते सर्वः हैवास्य तदाप्तमवरुद्धमभिजितम्भवति ॥ २ ॥ मासा हवीँष्षि । स यो ह वै मासा हवीँष्षीति वेदान्ते हैवास्य मासानामिष्टम्भवत्यथो यत्किञ्च मासेषु क्रियते सर्वः हैवास्य तदाप्तमवरुद्धमभिजितम्भवति ॥ ३ ॥ अर्द्धमासा हविष्पात्राणि । स यो ह वा ऽअर्द्धमासा हविष्पात्राणीति वेदान्ते हैवास्यार्द्धमासानामिष्टम्भवत्यथो यत्किञ्चार्द्धमासेषु क्रियते सर्वः हैवास्य तदाप्तमवरुद्धमभिजितम्भवति ॥ ४ ॥ अहोरात्रे परिवेष्ट्री । स यो ह वा ऽअहोरात्रे परिवेष्ट्री ऽइति वेदान्ते हैवास्याहोरात्रयोरिष्टम्भवत्यथो यत्किञ्चाहोरात्रयोः क्रियते सर्वः हैवास्य तदाप्तमवरुद्धमभिजितम्भवति ॥ ५ ॥ इयमेव प्रथमा सामिधेनी । अग्निर्द्वितीया वायु-

स्तृतीयान्तरिक्षश्चतुर्थी द्यौष्पञ्चम्यादित्यः षष्ट्री चन्द्रमाः सप्तमी मनोऽष्टमी वाङ्नवमी तपो दशमी ब्रह्मैकादश इश्येता हि वा ऽइदः सर्वः समिन्धत ऽएताभिरिदः सर्वः समिद्धन्तस्मात्सामिधेन्यो नाम ॥ ६ ॥ स वै त्रिः प्रथमामन्वाह । स यत्प्रथममन्वाह प्राचीन्तेन दिशञ्जयति यद्द्वितीयन्दक्षिणान्तेन दिशञ्जयति यत्तृतीयमूर्द्धा मेव तेन दिशञ्जयति ॥ ७ ॥ त्रिर्वैवोत्तमामन्वाह । स यत्प्रथममन्वाह प्रतीचीन्तेन दिशञ्जयति यद्द्वितीयमुदीचीन्तेन दिशञ्जयति यत्तृतीयमिमामेव तेन प्रतिष्ठाञ्जयत्येवमु हाभिरिमाँल्लोकाञ्जयत्येता दिशः ॥ ८ ॥ ऋतमेव पूर्व ऽआघारः । सत्यमुत्तरोऽव ह वा ऽऋतसत्ये रुन्द्धेथो यत्किञ्चऽर्त्तसत्याभ्याञ्जय्यः सर्वः हैव तज्जयति ॥ ९ ॥ त्विषिरेव प्रथमः प्रयाजः । अपचितिर्द्वितीयो यशास्तृतीयो ब्रह्मवर्चसञ्चतुर्थोऽन्नाद्यम्पञ्चमः ॥ १० ॥ स प्रथमम्प्रयाजमनुमन्त्रयेत । त्विषिमान्भूयासमित्यपचितिमान्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयम्ब्रह्मवर्चसी भूयासमिति चतुर्थमन्नादो भूयासमिति पञ्चमन्त्विषिमान्ह वा ऽअपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नादो भवति य ऽएवमेतद्वेद ॥ ११ ॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः क्व स्विदुवापरीषु महनागमिवाभिसः सारन्दिदृक्षितारो य ऽएवमेतत्प्रयाजानां यशो वेदितेति ॥ १२ ॥ भूतमेव पूर्व ऽआज्यभागः । भविष्यदुत्तरोऽव ह वै भूतञ्च भविष्यच्च

रुन्द्धेऽथो यत्किञ्च भूतेन च भविष्यता च जुष्यः सर्वः हैव तज्जयति ॥ १३ ॥ ब्रह्माग्नेयः पुरोडाशः । स यो ह वै ब्रह्माग्नेयः पुरोडाश ऽइति वेदाव ह ब्रह्म रुन्द्धेऽथो यत्किञ्च ब्रह्मणा जुष्यः सर्वः हैव तज्जयति ॥ १४ ॥ क्षत्रमुपाꣳशुयाजः । स यो ह वै क्षत्रमुपाꣳशुयाज ऽइति वेदाव ह क्षत्रः रुन्द्धेऽथो यत्किञ्च क्षत्रेण जुष्यः सर्वः हैव तज्जयति तद्यदुपाꣳशुयाजङ्कुर्वन्त्येके नैके तस्मादुच्चैश्चोपाꣳशु च क्षत्रायाचक्षते ॥ १५ ॥ विडुत्तरः पुरोडाशः । स यो ह वै विडुत्तरः पुरोडाश ऽइति वेदाव ह विशः रुन्द्धेऽथो यत्किञ्च विशा जुष्यः सर्वः हैव तज्जयति तद्यदाग्नेयश्च पुरोडाश ऽउपाꣳशुयाजश्च पूर्वौ भवतस्तस्मादुभे ब्रह्म च क्षत्रञ्च विशि प्रतिष्ठिते ॥ १६ ॥ राष्ट्रः सान्नाय्यम् । स यो ह वै राष्ट्रः सान्नाय्यमिति वेदाव ह राष्ट्रः रुन्द्धेऽथो यत्किञ्च राष्ट्रेण जुष्यः सर्वः हैव तज्जयति तद्यत्सन्नयन्त्येके नैके तस्माद्राष्ट्रः सञ्चैति वि च ॥ १७ ॥ तपः स्विष्टकृत् । स यो ह वै तपः स्विष्टकृदिति वेदाव ह तपो रुन्द्धेऽथो यत्किञ्च तपसा जुष्यः सर्वः हैव तज्जयति ॥ १८ ॥ लोकः प्राशित्रम् । स यो ह वै लोकः प्राशित्रमिति वेदाव ह लोकः रुन्द्धेऽथो यत्किञ्च लोकेन जुष्यः सर्वः हैव तज्जयति नो ह लवेन लोकाद्व्यथते लवेन ह वा ऽअमुष्मिँल्लोके लोकाद्व्यथन्तेऽथ य ऽएवं वेद न ह बहु चन पापङ्कृत्वा लोकाद्व्यथते ॥ ९९ ॥ श्रद्धेडा ।

स यो ह वै श्रद्धेडेति वेदाव ह श्रद्धाꣳ रुन्द्धेऽथो यत्किञ्च श्रद्धया जरुषः सर्वः हैव तज्जयति ॥ २० ॥ अशनिरेव प्रथमोऽनुयाजः । ह्रादुनिर्द्वितीय ऽउल्कुषी तृतीयः ॥२१॥ स प्रथममनुयाजमनुमन्त्रयेत । अशन्न्यमुञ्जहीति यन्द्विष्याद्ध्रादुन्न्यमुञ्जहीति द्वितीयमुल्कुष्यमुञ्जहीति तृतीयम् ॥ २२ ॥ स य ऽएष क्षिप्रम्म्रियते । अशनिर्हैतमनुयाजो हन्त्यथ यो विस्रवन्न्मिश्र ऽइव ह्रादुनिर्हैतमनुयाजो हन्त्यथ योऽभ्युष्टमिश्र ऽइवोल्कुषी ह तमनुयाजो हन्ति ॥ २३ ॥ सैषा यज्ञमेनिः । एतया वै मेन्न्या देवा ऽअसुरान्पराभावयाञ्चक्रुस्तथो ऽएवैवंविद्यजमानः पाप्मानन्द्विषन्तम्भ्रातृव्यम्पराभावयति ॥ २४ ॥ स यदनुयाजान्तो यज्ञः स्यात् । अशन्न्यन्तः स्याद्ध्रादुन्न्यन्त ऽउल्कुष्यन्तस्तस्माद्वै देवानां रुयज्ञ ऽइडान्तो वैव शꣳरुवन्तो वा ॥ २५ ॥ प्रयाजैर्वै देवाः । स्वर्गꣳलोकमायँस्तानसुरा ऽअन्वाजिगाथ्सँस्तानननुयाजैः प्रत्त्यौहँस्तद्यदनुयाजा ऽइज्यन्ते पाप्मानमेव तद्द्विषन्तम्भ्रातृव्यं रुयजमानः प्रत्त्यूहति ॥ २६ ॥ प्राणा वै प्रयाजाः । अपाना ऽअनुयाजास्तस्माᳬत्प्रयाजाः प्राञ्चो हूयन्ते तद्धि प्राणरूपम्प्रत्यञ्चोऽनुयाजास्तदपानरूपमेता ह वै दर्शपूर्णमासयोरुपसदो यदनुयाजास्तस्मात्त ऽउपसद्रूपेण प्रत्यञ्चो हूयन्ते ॥ २७ ॥ सꣳस्था सूक्तवाकः । स यो ह वै सꣳस्था सूक्तवाक ऽइति वेदाव ह सꣳस्थाꣳ रुन्द्धेऽथो यत्किञ्च सꣳस्थया जरुषः सर्वः हैव तज्जयति गच्छति वयसः सꣳस्थाम् ॥ २८ ॥

प्रतिष्ठा शँख्योर्वाकः । स यो ह वै प्रतिष्ठा शँख्योर्वाक ऽइति वेदाव ह प्रतिष्ठाꣳ रुन्द्धेऽथो यत्किञ्च प्रतिष्ठया जुख्यः सर्वः हैव तज्जयति गच्छति प्रतिष्ठाम् ॥ २९ ॥ ते देवाः । एताꣳपत्नीसँख्याजान्पश्चात्पर्य्यौहन्त मिथुनमेवैतदुपरिष्टाददधत प्रजात्यै तद्यत्पत्नीसंख्याजा ऽइज्यन्ते मिथुनमेवैतदुपरिष्टाद्धत्ते प्रजात्यै देवानाꣳ ह वै प्रजातिमनु प्रजायते मिथुनेन मिथुनेन ह प्रजायते य ऽएवमेतद्वेद ॥ ३० ॥ अन्नः समिष्टयजुः । स यो ह वा ऽअन्नः समिष्टयजुरिति वेदाव हान्नः रुन्द्धेऽथो यत्किञ्चान्नेन जुख्यः सर्वः हैव तज्जयति ॥ ३१ ॥ सँवत्सरो यजमानः । तमृतवो याजयन्ति वसन्त ऽआग्नीद्धस्तस्माद्वसन्ते दावाश्चरन्ति तद्ध्यग्निरूपड्ग्रीष्मोऽद्धर्य्युस्तप्त ऽइव वै ग्रीष्ममस्तप्तमिवाद्धर्य्युर्निष्क्रामति वर्षा ऽउद्गाता तस्माद्यदा बलवद्वर्षति साम्न ऽइवोपब्दिः क्रियते शरद्ब्रह्मा तस्माद्यदा सस्यम्पच्च्यते ब्रह्मण्यवत्यः प्रजा ऽइत्याहुर्हेमन्तो होता तस्माद्धेमन्वषट्कृताः पशवः सीदन्त्येता ह वा ऽएनन्देवता याजयन्ति स यद्येनमेषावीरा याजयेयुरेता ऽएव देवता मनसा ध्यायेदेता हैवैनन्देवता याजयन्ति ॥ ३२ ॥ अथ हैषैव तुला । यद्दक्षिणो वेद्यन्तः स यत्साधु करोति तदन्तर्वेद्यथ यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीत तुलायाꣳ ह वा ऽअमुष्मिमँल्लोक ऽआदधति यतरद्यꣳस्यति तदुन्वेष्यति यदि साधु वासाधु वेत्यथ य ऽएवं वेदास्मिन्नेवैव लोके

तुलामारोहत्यत्यमुष्मिमँल्लोके तुलाधानम्मुच्यते साधुकृत्या हैवास्य यच्छति न पापकृत्या ॥ ३३ ॥ [अर्ध प्रपाठकः ५२]

द्वितीयाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

[अग्निहोत्रावयवोपासनाप्रकारः]

वाग्घ वा ऽएतस्याग्निहोत्रस्याग्निहोत्री * । मन ऽएव वत्सस्तदिदम्मनश्च वाक्च समानमेव सन्तानेव तस्मात्समान्या रज्वा वत्सञ्च मातरञ्चाभिदधति तेज ऽएव श्रद्धा सत्यमाज्यम् ॥ १ ॥ तद्धैतज्जनको वैदेहः । याज्ञवल्क्यम्पप्रच्छ वेत्थाग्निहोत्रं म्याज्ञवल्क्या३ ऽइति वेद सम्म्राडिति किमिति पय ऽएवेति ॥ २ ॥ यत्पयो न स्यात् । केन जुहुया ऽइति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्याता ङ्केन जुहुया ऽइति या ऽअन्या ऽओषधय ऽइति यदन्या ऽओषधयो न स्युः केन जुहुया ऽइति या ऽआरण्या ऽओषधय ऽइति यदारण्या ऽओषधयो न स्युः केन जुहुया ऽइति वानस्पत्येनेति यद्वानस्पत्यन्न स्यात्केन जुहुया ऽइत्यग्निरिति यदापो न स्युः केन जुहुया ऽइति ॥ ३ ॥ स होवाच । न वा ऽइह तर्हि किञ्चनासीदुथैतदुहूयतैव सत्यꣳ श्रद्धायामिति वेत्थाग्निहोत्रं म्याज्ञवल्क्य धेनुशतन्ददामीति होवाच ॥ ४ ॥ तदुप्येते ऽश्लोकाः । किꣳ

* अग्निहोत्रमिति कर्मनामधेयम् । अग्नये होत्रं होमोऽस्मिन्निति तद्व्युत्पत्तिः । उपचारात् तदर्थं पयोऽप्यग्निहोत्रम्, तस्य दोग्ध्री धेनुरप्यग्निहोत्रीत्युच्यते ।

स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथꣳ स्विदस्य काव्यङ्कथः सन्ततो ऽअग्निभिरिति कथꣳ स्विदस्यानपप्प्रोषितम्भवतीत्येवैतदाह ॥ ५ ॥ यो जविष्ठो भुवनेषु । स विद्वान्प्रवसन्विदे तथा तदस्य काव्यन्तथा सन्ततो ऽअग्निभिरिति मन ऽएवैतदाह मनसैवास्यानपप्प्रोषितम्भवतीति ॥ ६ ॥ यत्स दूरम्परेत्य । अथ तत्र प्रमाद्यति कस्मिन्नस्य हुताहुतिर्गृहे यामस्य जुह्वतीति यत्स दूरम्परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य साहुतिर्हुता भवतीत्येवैतदाह ॥ ७ ॥ यो जागार भुवनेषु । विश्वा जातानि योऽबिभः तस्मिन्नस्य हुताहुतिर्गृहे यामस्य जुह्वतीति प्राणमेवैतदाह तस्मादाहुः प्राण ऽएवाग्निहोत्रमिति ॥ ८ ॥

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



[अग्निहोत्रे मिथुनत्वदर्शनम्]

यो ह वा ऽअग्निहोत्रे । षण्मिथुनानि वेद मिथुनेन मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिर्यजमानश्च पत्नी च तदेकम्मिथुनन्तस्मादस्य पत्नीवदग्निहोत्रꣳ स्यादेतन्मिथुनमुपाप्नवानीति वत्सश्चाग्निहोत्री च तदेकम्मिथुतन्तस्मादस्य पुँवत्साग्निहोत्री स्यादेतन्मिथुनमुपाप्नवानीति स्थाली चाङ्गाराश्च तदेकम्मिथुनꣳ स्रुक्च स्रुवश्च तदेकम्मिथुनमाहवनीयश्च समिच्च तदेकम्मिथुनमाहुतिश्च स्वाहाकारश्च तदेकम्मिथुनमेतानि ह वा

ऽअग्निहोत्रे षण्मिथुनानि तानि ष ऽएवं वेद मिथुनेन मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिः ॥ १ ॥

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[प्रसङ्गतः आख्यायिकया ब्रह्मचारिधर्मप्रतिपादनम्]

ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत् । तस्मै ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीदुस्तु मह्यमप्येतस्मिन्भाग ऽइति यामेव रात्रिः समिधन्नाहुराता ऽइति तस्माद्याꣳ रात्रिम्ब्रह्मचारी समिधन्नाहुरत्यायुष ऽएव तामवदाय वसति तस्माद्ब्रह्मचारी समिधमाहरेन्नेदायुषोऽवदाय वसानीति ॥ १ ॥ दीर्घसत्रं वा ऽएष ऽउपैति । यो ब्रह्मचर्यमुपैति स यामुपयन्त्समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्त्सोदयनीयाथ या ऽअन्तरेण सत्रया ऽएवास्य ता ब्राह्मणो ब्रह्मचर्यमुपयन् ॥ २ ॥ चतुर्धा भूतानि प्रविशति । अग्निम्पदा मृत्युम्पदाचार्यम्पदात्मन्येवास्य चतुर्थः पादः परिशिष्यते ॥ ३ ॥ स यदग्नये समिधमाहरति । य ऽएवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तद्धः संस्कृत्यात्मन्धत्ते स ऽएनमाविशति ॥ ४ ॥ अथ यदात्मानन्दरद्रीकृत्येव । अह्वीर्भूत्वा भिक्षते य ऽएवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति तद्धः संस्कृत्यात्मन्धत्ते स ऽएनमाविशति ॥ ५ ॥ अथ यदाचार्यवचसङ्करोति । यदाचार्याय कर्म्म करोति य ऽएवास्याचार्ये पादस्तमेव तेन परिक्रीणाति तद्धः संस्कृत्यात्मन्धत्ते

स ऽएनमाविशति ॥ ६ ॥ न ह वै स्नात्वा भिक्षेत। अप ह वै स्नात्वा भिक्षाञ्जयत्युप ज्ञातीनामशनायामुप पितॄणाꣳ स ऽएवं विद्वान्यस्या ऽएव भूयिष्ठꣳ श्लाघेत ताम्भिक्षेतेत्याहुस्तल्लोक्क्यमिति स यद्यन्याम्भिक्षितव्यान्न विन्देदुपि स्वामेवाचार्य्यजायाम्भिक्षेताथो स्वाम्मातरन्नैनꣳ सप्तम्म्यभिक्षितातीयात्तमेवं विद्वाꣳसमेवञ्चरन्तꣳ सर्वे वेदा ऽआविशन्ति यथा ह वा ऽअग्निꣳ समिद्धो रोचत ऽएवꣳ ह वै स स्नात्वा रोचते य ऽएवं विद्वान्ब्रह्मचर्य्यञ्चरति ॥ ७ ॥

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

[आख्यायिकया दर्शपूर्णमासयोः सर्वोत्पत्तिहेतुत्वकथनम्]

उद्दालको ह वारुणिः। उदीच्च्यान्प्रवृतो धावयाञ्चकार तस्य निष्क ऽउपाहित ऽआसैतद्ध स्म वै तत्पूर्वेषां प्रवृतानान्धावयतामेकधनमुपाहितम्भवत्युपवल्हाय विभ्यतान्ताꣳ होदीच्च्यानाम्ब्राह्मणान्भीर्विवेद ॥ १ ॥ कौरुपाञ्चालो वा ऽअयम्ब्रह्मा ब्रह्मपुत्रः। षट्टै नोऽयमर्द्धन्न पर्य्यादुदीत हन्तैनम्ब्रह्मोद्यमाह्वयामहा ऽइति केन वीरेणेति स्वैदायनेनेति शौनको ह स्वैदायन ऽआस ॥ २ ॥ ते होचुः। स्वैदायन त्वया वीरेणमम्प्रतिसंरुध्यतामहा ऽइति स होवाचोपान्न खलु रमताहुन्वेनं वेदानीति तꣳ हाभिप्रपेदे तꣳ हाभिप्रपन्नमभ्युवाद स्वैदायना३ ऽइति हो३ गौतमस्य पुत्रे-

तीतरः प्रतिशुश्राव तद्ध तत ऽएव प्रष्ठौहो ऽन्दङ्क्ते ॥ ३ ॥ स वै गौतमस्य पुत्र व्वृतो जनन्धावयेत् । यो दर्शपूर्णमासयोरष्टौ पुरस्ताद्धाज्यभागान्निर्व्वपेत्पञ्च मध्यतो हविर्भागान्न्यष्ट्व प्राजापत्यानष्ट्वा ऽउपरिष्टाद्धाज्यभागान् ॥ ४ ॥ स वै गौतमस्य पुत्र व्वृतो जनन्धावयेत् । यस्तद्दर्शपूर्णमासयोर्व्विद्याद्यस्मादिमाः प्रजा ऽअदन्तका जायन्ते यस्मादासाञ्जायन्ते यस्मादासाम्प्रभिद्यन्ते यस्मादासाꣳ सन्तिष्ठन्ते यस्मादासाम्पुनरुत्तमे व्वयसि सर्व्व ऽएव प्रभिद्यन्ते यस्मादधर ऽएवाग्रे जायन्तेऽथोत्तरे यस्मादवणीयाꣳस ऽएवाधरे प्रथीयाꣳस ऽउत्तरे यस्मादृꣳष्ट्वा व्वर्षीयाꣳसो यस्मात्तस्मा ऽएव जम्भ्याः ॥ ५ ॥ स वै गौतमस्य पुत्र व्वृतो जनन्धावयेत् । यस्तद्दर्शपूर्णमासयोर्व्विद्याद्यस्मादिमाः प्रजा लोमशा जायन्ते यस्मादासाम्पुनरिव इम्मश्रूण्यौपपक्ष्याणि दुर्ब्बीरिणानि जायन्ते यस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ पुनरुत्तमे व्वयसि सर्व्व ऽएव पलितो भवति ॥ ६ ॥ स वै गौतमस्य पुत्र व्वृतो जनन्धावयेत् । यस्तद्दर्शपूर्णमासयोर्व्विद्याद्यस्मात्कुमारस्य रेतः सिक्तन्न सम्भवति यस्मादस्य मध्यमे व्वयसि सम्भवति यस्मादस्य पुनरुत्तमे व्वयसि न सम्भवति ॥ ७ ॥ यो गायत्रीꣳ हरिणीम् । ज्योतिष्पक्षां व्यजमानꣳ स्वर्ग्गꣳलोकमभिव्वहन्तीं व्विद्यादिति तस्मै ह निष्कम्प्रददावनूचानः स्वैदायनासि सुव्वर्णं व्वाव सुवर्णव्विदे ददतीति तद्ध होपगुह्य निश्चक्राम तद्ध ह पप्रच्छुः

किमिवैष गौतमस्य पुत्रोऽभूदिति ॥ ८ ॥ स होवाच । यथा ब्रह्मा ब्रह्मपुत्रो मूर्द्धास्य विपतेद्य एनमुपवल्हेतेति ते ह तत एव विप्प्रेयुस्तद्ह तत एव समित्पाणिः प्रतिचक्रम उप त्वायानीति किमल्पेष्यमाण इति यानेव मा प्रश्नान्प्राक्षीस्तानेव मे ब्रिब्रूहीति स होवाचानुपेतायैव त एनान्ब्रवाणीति ॥ ९ ॥ तस्मा उ हैतदुवाच । द्वावाघारौ पञ्च प्रयाजा आग्नेय आज्यभागोऽष्टम एतेऽष्टौ पुरस्तदाज्यभागाः सौम्य आज्यभागो हविर्भागाणाम्प्रथमो हविर्हि सोम आग्नेयः पुरोडाशोऽग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदेते पञ्च मध्यतो हविर्भागाः ॥१०॥ प्राशित्रञ्चेडा च । यच्चाग्नीध आदुधाति ब्रह्मभागो यजमानभागोऽन्वाहार्य एते षट् प्राजापत्यास्त्रयोऽनुयाजाश्चत्वारः पत्नीसँय्याजाः† समिष्टयजुरष्टममेतेऽष्टा उपरिष्टादाज्यभागाः ॥ ११ ॥ अथ यदपुरोऽनुवाक्यकाः प्रयाजा भवन्ति । तस्मादिमाः प्रजा अदन्तका जायन्तेऽथ यत्पुरोऽनुवाक्यवन्ति हवीꣳषि भवन्ति तस्मादासाꣳ जायन्तेऽथ यदपुरोऽनुवाक्यका अनुयाजा भवन्ति तस्मादासाम्प्रभिद्यन्तेऽथ यत्पुरोऽनुवाक्यवन्तः पत्नीसँय्याजा भवन्ति तस्मादासाꣳ सन्तिष्ठन्तेऽथ यदपुरोऽनुवाक्यकः

(१) उपांशु इज्यते इति उपांशुयाजः । एवमुपांशुजपश्च "जिह्वोष्ठौ चालयेत् किञ्चिद् देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशु स जपः स्मृतः ॥" इति स्मृत्युक्तः

(२) प्राशित्रं ब्रह्मणो भागः ।

† पत्नीदेवताका दर्शपूर्णमासाङ्गभूताश्चत्वारो यागविशेषाः पत्नीसंयाजाः ।


समिष्टयजुर्भवति तस्मादासाम्पुनरुक्तमे ब्रुवसि सर्व ऽएव प्रभिद्यन्ते ॥ १२ ॥ * अथ यदनुवाक्यामनूच्य । याज्यया यजति तस्मादुधर ऽएवाग्रे जायन्तेऽथोत्तरेऽथ यद्गायत्रीमनूच्य त्रिष्टुभा यजति तस्मादुणीयाꣳस ऽएवाधरे प्रथीयाꣳस ऽउत्तरेऽथ यत्प्राञ्चावाघारावाघार-यति तस्माद्द्वꣳष्ट्रा ब्रुवीयाꣳसोऽथ यत्सच्छन्दसावेव सं-स्याज्ये भवतस्तस्मात्समा ऽएव जम्भ्याः ॥ १३ ॥ अथ यद्बर्हिस्तृणाति । तस्मादिमाः प्रजा लोमशा जायन्तेऽथ यत्पुनरिव प्रस्तरꣳ[A] स्तृणाति तस्मादासाम्पुनरिव श्म-श्रूण्यौपपक्ष्याणि दुर्ब्बीरिणानि जायन्तेऽथ यत्केवल-मेवाग्रे प्रस्तरमनुप्रहरति तस्माच्छीर्षण्येवाग्रे पलितो भवत्यथ यत्सर्वमेव बर्हिरनुप्रहरति तस्मात्पुनरुक्तमे ब्रुवसि सर्व ऽएव पलितो भवति ॥ १४ ॥ अथ यदाज्य-हविषः प्रयाजा भवन्ति । तस्मात्कुमारस्य रेतः सिक्तन्न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यमथ यन्मध्ये यजस्य ददधना पुरोडाशेनेति चरन्ति तस्मादस्य मध्यमे ब्रुवसि सम्भवति द्रुप्सीवैव भवति द्रुप्सीव हि रेतोऽथ यदाज्यहविष ऽएवानुयाजा भवन्ति तस्मादस्य पुनरुक्तमे ब्रुवसि न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यम् ॥ १५ ॥ वेदिरेव गायत्री । तस्यै येऽष्ट्रौ पुरस्तादाज्यभागाः स दक्षिणः पक्षो येऽष्ट्रा ऽउपरिष्ट्रादाज्यभागाः स

* शतम् ५७०० ।

(A) प्रस्तरः कुशमुष्टिः ।

ऽउत्तरः पक्षः सैषा गायत्री हरिणी ज्योतिष्पक्षा यजमानꣳ स्वर्गꣳलोकमभिवहति य ऽएवमेतद्वेद ॥ १६ ॥

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



[स्रुगादानप्रकारः]

अथातः स्रुचोरादानस्य । तद्धैतदेके कुशला मन्यमाना दक्षिणेनैव जुहूमादददते सव्येनोपभृतन्न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयात्प्रतिप्रतिन्वा ऽअयमद्ध्वर्युर्यजमानस्य द्विषन्तम्भ्रातृव्यमकरित्युद्यामिनमितीश्वरो ह तथैव स्यात् ॥ १ ॥ इत्थमेव कुर्य्यात् । उभाभ्यामेव पाणिभ्याꣳस्रुचम्परिगृह्योपभृत्यधिनिदध्यात्तस्य नोपमीमाꣳसास्ति तत्पशव्यमायुष्यन्ते ऽअसꣳशिꣳश्रयन्नाददीत ते * यत्सꣳशिꣳश्रयेदुयोगक्षेमो यजमानमृच्छेत्तस्मादुसꣳशिꣳश्रयन्नाददीत ॥ २ ॥ अथातोऽतिक्रमणस्य । व्रज्रेण ह वा ऽअन्योऽद्ध्वर्युर्यजमानस्य पशून्विधमति व्रज्रेण हास्मा ऽअन्य ऽउपसमूहत्येष ह वा ऽअद्ध्वर्युर्व्रज्रेण यजमानस्य पशून्विधमति य ऽआश्रावयिष्यन्दक्षिणेनातिक्रामति सव्येनाश्राव्याथ हास्मा ऽएष ऽउपसमूहति य ऽआश्रावयिष्यन्सव्येनातिक्रामति दक्षिणेनाश्राव्यैष हास्मा ऽउपसमूहति ॥ ३ ॥ अथातो धारणस्य । तद्धैतदेके कुशला मन्यमानाः प्रगृह्य बाहू स्रुचौ धारयन्ति न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयाच्छूलौ न्वा ऽअयमद्ध-

* 'ग' 'ज' पुस्तकयोः 'ते' इति नास्ति ।

र्ष्युर्ब्बाहू ऽअकृत शूलबाहुर्भविष्यतीतीश्वरो ह तथैव स्यादुथ हैष मध्यमः प्राणस्तस्मादु तमुपन्यूच्यैवैव धारयेत् * ॥ ४ ॥ अथात ऽआश्श्रावणस्य। षड्ढ वा ऽआश्श्रावितानि न्यक्तिर्ष्यगूर्द्धङ्कृपणम्बह्निः श्रयन्तःश्रि ॥ ५ ॥ एतद्ध वै न्यक् । योऽयमुच्चैरादाय शनैर्निदधाति स यमिच्छेत्पापीयान्स्यादिति तस्योच्चैरादाय शनैर्निदध्यात्तेन स पापीयाञ्भवति ॥ ६ ॥ अथ हैतत्तिर्ष्यक् । योऽयं श्यावतैवादत्ते तावता निदधाति स यमिच्छेन्नैव श्रेयान्स्यान्न पापीयानिति तस्य यावतैवादुदीत तावता निदध्यात्तेन स नैव श्रेयान्न पापीयान्भवति ॥ ७ ॥ अथ हैतदूर्द्धम् । योऽयः शनैरादायोच्चैर्निदधाति स यमिच्छेच्छ्रेयान्स्यादिति तस्य शनैरादायोच्चैर्निदध्यात्तेन स श्रेयान्भवति ॥ ८ ॥ अथ हैतत्कृपणम् । योऽयमणु दीर्घमस्वरमाश्श्रावयति यो हैनन्तत्र ब्रूयात्कृपणन्वा ऽअयमद्धर्ष्युर्ष्यजमानमकद्विषतो भ्रातृव्यस्योपावसायिनमितीश्वरो ह तथैव स्यात् ॥ ९ ॥ अथ हैतद्बह्निःश्रि । योऽयमपव्याद्यायोष्ट्वा ऽउच्चैरस्वरमाश्श्रावयति श्रीर्वै स्वरो वाश्वत ऽएव तच्छ्रियन्धत्तेऽशनायुको भवति ॥ १० ॥ अथ हैतदन्तःश्रि । योऽयः सन्धायोष्ट्वा ऽउच्चैः स्वरवदाश्श्रावयति श्रीर्वै स्वरोऽन्तरत ऽएव तच्छ्रियन्धत्तेऽन्नादो भवति ॥ ११ ॥ स वै मन्द्रमिवोरसि । परास्तभ्योभयतो बाहतमुच्चैरन्ततो निदध्यात्तस्य नोपमीमाथे

* तथा चोक्तं सूत्रकृता "नाभिदेशे धारणम्" (का० श्रौ० सू० १. २. १)।

सास्ति तत्पशव्यमायुष्यम् ॥ १२ ॥ अथातो होमस्य । तद्धैतदेके कुशला मन्यमानाः प्राचीꣳ स्रुचमुपावहृत्य हुत्वा पर्य्याहृत्योपभृत्यधिनिदधति न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयादनुयुवन्न्वा ऽअयमद्धर्य्युर्य्यजमानमकद्विषतो ब्भ्रातृव्यस्यान्ववसायिनमितीश्वरो ह तथैव स्यात् ॥ १३ ॥ पार्श्वत ऽउ हैके । स्रुचमुपावहृत्य हुत्वा पर्य्याहृत्योपभृत्यधिनिदधति न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयादुतीर्त्थेन न्न्वा ऽअयमद्धर्य्युराहुतीः प्रारौत्सीत्सं वा शरिष्यते घुणिर्वा भविष्यतीतीश्वरो ह तथैव स्यात् ॥ १४ ॥ इत्थमेव कुर्य्यात् । प्राचीमेव स्रुचमुपावहृत्य हुत्वा तेनैवाधिहृत्योपभृत्यधिनिदध्यात्तस्य नोपमीमाꣳसास्ति तत्पशव्यमायुष्यम् ॥ १५ ॥ प्रदग्धाहुतिर्ह वा ऽअन्योऽद्धर्य्युः । आहुतीर्हान्यः सन्तर्प्पयत्येष ह वै प्रदग्धाहुतिरद्धर्य्युर्य्योऽयमाज्यः हुत्वावदानानि जुहोत्येतः ह वै तदृश्यमाना व्वागभ्युवाद प्रदग्धाहुतिर्न्वा ऽअयमद्धर्य्युरित्यथ हैना ऽएष सन्तर्प्पयति योऽयमाज्यः हुत्वावदानानि जुहोत्यथ पुनरन्तत ऽआज्येनाभिजुहोत्येष हैनाः सन्तर्प्पयति तासाꣳ सन्तृप्तानान्देवा हिरण्मयाँश्चमसान्पूरयन्ते ॥ १६ ॥ तदु होवाच याज्ञवल्क्यः । यद्वा ऽउपस्तीर्य्यावदायाभिघारयति तदेवैनाः सन्तर्प्पयति तासाꣳ सन्तृप्तानान्देवा हिरण्मयाँश्चमसान्पूरयन्तेऽयस्थूणशहपतीनाꣳ ह वै शौल्बायनोऽद्धर्य्युरास ॥ १७ ॥ स

(१) "नां वै" इति 'ग' 'ज' पुस्तकयोः पाठः ।

होवाच । इदमहेदꣳ सत्रङ्कृशपश्श्वल्पाज्यमथायङ्गृहꣳ पतिरस्मीति मन्न्यत ऽइति ॥ १८ ॥ स होवाच । अद्धर्ष्ववा वै नोऽक्कुक्ष ऽएते वै ते स्रुचौ ये स्वꣳ सँवत्सरन्नाशक ऽआदातुं ऋद्धै त्वाहुमेतयोरनुशिष्ट्याम्प्र प्रजया पशुभिर्ज्जायेथा ऽअभि स्वर्ग्गꣳलोकं वहेरिति ॥ १९ ॥ स होवाच । उप त्वयानीति स होवाचात्र वाव खल्ल्वर्हसि यो नः सँवत्सरेऽद्धर्ष्युरभूरनुपेतायैव त ऽएनद्ब्रवाणीति तस्मा ऽउ हैतदेव स्रुचोरादानमुवाच यदेतद्व्याख्याम तस्मादेवंविदमेवाद्धर्ष्युङ्ब्रूवीत नानेवंविदम् ॥ २० ॥

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥
कण्डिकासंख्या १०४ ॥



[मित्रविन्देष्टिः]

प्रजापतिर्व्वै प्रजाः सृजमानोऽतप्यत । तस्माच्छ्रान्तात्तेपानाच्छ्रीरुदक्रामत्सा दीप्यमाना ऽभ्राजमाना लेलायन्त्यतिष्ठन्तान्दीप्यमानाम्भ्राजमानाꣳलेलायन्तीन्देवा ऽअब्भ्यद्ध्यायन् ॥ १ ॥ ते प्रजापतिमब्रुवन् । हुनामेमामेदमस्या ददामहा ऽइति स होवाच स्त्री वा ऽएषा यच्छ्रीर्न्न वै स्त्रियङ्घ्नन्त्युत त्वा ऽअस्या जीवन्त्या ऽएवाददत ऽइति ॥ २ ॥ तस्या ऽअग्निरन्नाद्यमादत्त । सोमो राज्यं वरुणः साम्राज्यमिन्द्रः क्षत्रमिन्द्रो बलम्बृहस्पतिः

(१) 'ग' 'ज' पुस्तकयोः 'एतद्व०' इति पाठ उपलभ्यते ।

ब्रह्मवर्चसꣳ सविता राष्ट्रम्पूषा भगः सरस्वती पुष्टिन्त्वष्टा रूपाणि ॥ ३ ॥ सा प्रजापतिमब्रवीत् । आ वै म ऽइदमदिषतेति स होवाच यज्ञेनैनाꣳपुनर्ग्रा-चस्वेति ॥ ४ ॥ सैतान्दशहविषमिष्टिमपश्यत् । आग्ने-यमष्टाकपालम्पुरोडाशꣳ सौम्यꣳ चरुं वारुणन्दशकपालम्पु-रोडाशम्मैत्रꣳ चरुमैन्द्रमेकादशकपालम्पुरोडाशम्बार्हस्पत्यꣳ चरुꣳ सावित्रन्द्वादशकपालं वाष्ट्राकपालं वा पुरोडाशम्पौष्णꣳ चरुꣳ सारस्वतꣳ चरुन्त्वाष्ट्रन्दशकपालम्पुरोडाशम् * ॥ ५ ॥ तानेतयानुवाक्यया याज्यया वदत् । अग्निः सोमो वरुणो मित्र ऽइन्द्रो बृहस्पतिः सविता यः सहस्री ॥ पूषा नो गोभिर्वसा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति ते प्रत्युपा-तिष्ठन्त ॥ ६ ॥ तानेतया याज्यया । परस्तात्प्रतिलोम-म्प्रत्यैत्वष्टा रूपाणि ददती सरस्वती पूषा भगः सविता मे ददातु ॥ बृहस्पतिर्ददिन्द्रो बलम्मे मित्रः क्षत्रं वरुणः सोमो ऽअग्निरिति ते पुनर्दानायाद्रियन्त ॥ ७ ॥ सैतानु-पहोमानपश्यत् । अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन्मन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादायाग्निरुदक्क्रामत्पुनरस्या ऽअन्नाद्यमददात् ॥ ८ ॥ सोमो राजा राजपतिः । राज्य-मस्मिन्मन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय सोम ऽउदक्क्रामत्पुनरस्यै राज्यमददात् ॥ ९ ॥ वरुणः स-म्राट् सम्राट्पतिः साम्राज्यमस्मिन्मन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय वरुण ऽउदक्क्रामत्पुनरस्यै साम्रा-

* का० श्रौ० सू० अ० ५ कं० १२ सू० ३ ।

ज्ज्यमददात् ॥ १० ॥ मित्रः क्षत्रं क्षत्रपतिः । क्षत्रमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय मित्र ऽउदक्क्रामत्पुनरस्यै क्षत्रमददात् ॥ ११ ॥ इन्द्रो बलम्बलपतिः । बलमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादयेन्द्र ऽउदक्क्रामत्पुनरस्यै बलमददात् ॥ १२ ॥ बृहस्पतिर्ब्रह्म ब्रह्मपतिः । ब्रह्मवर्चसमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय बृहस्पतिरुदक्क्रामत्पुनरस्यै ब्रह्मवर्चसमददात् ॥ १३ ॥ सविता राष्ट्रं राष्ट्रपतिः । राष्ट्रमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय सवितोदक्क्रामत्पुनरस्यै राष्ट्रमददात् ॥ १४ ॥ पूषा भगम्भगपतिः । भगमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय पूषोदक्क्रामत्पुनरस्यै भगमददात् ॥ १५ ॥ सरस्वती पुष्टिम्पुष्टिपतिः । पुष्टिमस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय सरस्वत्युदक्क्रामत्पुनरस्यै पुष्टिमददात् ॥ १६ ॥ त्वष्टा रूपाणाꣳ रूपकृद्रूपपतिः । रूपेण पशूनस्मिन्नन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय त्वष्टोदक्क्रामत्पुनरस्यै रूपेण पशूनददात् ॥ १७ ॥ ता वा ऽएताः । दश देवता दश हवीꣳषि दशाहुतयो दश दक्षिणा दशन्दशिनी विराट् श्रीर्विराट् श्रिया ँ हैतद्विराज्यन्नाद्ये प्रतितिष्ठति ॥ १८ ॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । उपाꣳशु देवता यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा ऽएकः समि-

(१) का० श्रौ० सू० ५. १२. १ । (२) का० श्रौ० सू० ५. १३. १ । (३) का० श्रौ० सू० ५. १३. ४ ।

ष्टयजुः * पुष्टिमन्तावाज्यभागा[1]वग्निना रयिमश्नवत्पो-
षमेव दिवे दिवे। यशसं वीरवत्तमम्' ॥ [2]'गयस्फानो ऽअमीवहा
वसुवित्पुष्टिवर्द्धनः। सुमित्रः सोम नो भवे'ति सहस्र-
वत्यौ सँस्थाज्ये [3]'नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु
युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम्' ॥ 'उत नो ब्रह्म-
न्नविष ऽउक्थेषु देवहूतमः। शन्नः शोचा मरुद्वृधोऽग्ने
सहस्रसातम' ऽइति ॥ १९ ॥ ताꣳ हैताङ्गोतमो राहू-
गणः। विद्राञ्चकार सा ह जनकं वैदेहम्प्रत्युत्ससाद ताꣳ
हाङ्गजिद्ब्राह्मणेष्वन्विययेष तामु ह याज्ञवल्क्ये विवेद स
होवाच सहस्रम्भो याज्ञवल्क्य दद्मो यस्मिन्नयन्त्वयि
मिथ्रविन्दामन्त्रविदामेति विन्दते मिथ्रः राष्ट्रमस्य भव-
त्यप पुनर्म्मृत्युञ्जयति सर्वमायुरेति य ऽएवं विद्वानेतयेष्ट्या
यजते यो वै तदेवं वेद ॥ २० ॥

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ २ ॥

[हविषः समृद्धिः]

अथातो हविषः समृद्धिः। षड्ढ वै ब्रह्मणो द्वारोऽ-
ग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः ॥ १ ॥ स य
ऽउपदग्धेन हविषा यजते। अग्निना ह स ब्रह्मणो
द्वारेण प्रतिपद्यते सोऽग्निना ब्रह्मणो द्वारेण प्रतिपद्य
ब्रह्मणः सायुज्यꣳ सलोकतामश्नुते ॥ २ ॥ अथ यो

* प्रधानयागादौ सम्यग् इष्टा देवता इज्यन्ते अनेन स होम मन्त्रश्च समिष्टयजु ।

(१) ऋ० सं० १. १ १। (२) ऋ० स० १. ६. २१। (३) ऋ० सं० ३. १. १३।
(४) ऋ० सं० ३. १. १३।

विपतितेन हविषा यजते । वायुना ह स ब्रह्मणो द्वारेण प्रतिपद्यते स वायुना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यः सलोकतामश्नुते ॥ ३ ॥ अथ योऽभ्रतेन हविषा यजते । अद्भिर्ह स ब्रह्मणो द्वारेण प्रतिपद्यते सोऽद्भिर्ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यः सलोकतामश्नुते ॥ ४ ॥ अथ य उपरक्तेन हविषा यजते । चन्द्रमसा ह स ब्रह्मणो द्वारेण प्रतिपद्यते स चन्द्रमसा ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यः सलोकतामश्नुते ॥ ५ ॥ अथ यो लोहितेन हविषा यजते । विद्युता ह स ब्रह्मणो द्वारेण प्रतिपद्यते स विद्युता ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यः सलोकतामश्नुते ॥ ६ ॥ अथ यः सुभ्रतेन हविषा यजते । आदित्येन ह स ब्रह्मणो द्वारेण प्रतिपद्यते स आदित्येन ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यः सलोकतामश्नुते सैषा हविषः समृद्धिः स यो हैवमेताꣳ हविषः समृद्धिं वेद सर्वसमृद्धेन हैवास्य हविषेष्टं भवति ॥ ७ ॥ अथातो यज्ञस्य समृद्धिः । यद्वै यज्ञस्य न्यूनं प्रजननमस्य तदथ यदतिरिक्तं पशव्यमस्य तदथ यत्सङ्कसुकꣳ श्रिया अस्य तदथ यत्सम्पन्नꣳ स्वर्ग्यमस्य तत् ॥ ८ ॥ स यदि मन्येत । न्यूनं मे यज्ञेऽभूदिति प्रजननं म एतत्प्रजनिष्य इत्येव तदुपासीत ॥ ९ ॥ अथ यदि मन्येत । अतिरिक्तं मे यज्ञेऽभूदिति पशव्यं म एतत्पशुमान्भविष्यामीत्येव तदुपासीत ॥१०॥ अथ यदि मन्येत । सङ्कसुकं मे यज्ञेऽ-

भूदिति श्रिश्रयै म ऽएतदा मा श्श्रीस्तेजसा यशसा ब्रह्मवर्चसेन परिवृता गमिष्यतीत्येव तदुपासीत ॥ ११ ॥ अथ यदि मन्येत । सम्पन्नम्मे यज्ञेऽभूदिति स्वर्ग्यम्म ऽएतत्स्वर्ग्गलोको भविष्यामीत्येव तदुपासीत सैषा यज्ञस्य समृद्धिः स यो हैवमेतां यज्ञस्य समृद्धिं वेद सर्वसमृद्धेन हैवास्य यज्ञेनेष्टम्भवति ॥ १२ ॥

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

[अरण्योरश्वत्थविकृतित्वविधानमाख्यायिकया]

उर्वशी हाप्सराः । पुरूरवसमैडञ्चकमे तꣳ ह विन्दुमानोवाच त्रिः स्म माह्नो वैतसेन * दण्डेन हतादकामाꣳ स्म मा निपद्यासै मो स्म त्वा नग्नन्दर्शमेष वै न स्त्रीणामुपचार ऽइति ॥ १ ॥ सा हास्मिमञ्ज्योगुवास । अपि हास्माद्बिभेण्यास तावज्योग्घास्मिन्नुवास ततो ह गन्धर्वाः समूदिरे ज्योग्वा ऽइयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयम्पुनरागच्छेदिति तस्यै हाविर्द्वर्युरणा शयन ऽउपबद्धास ततो ह गन्धर्वा ऽअन्यतरमुरणम्प्रमेथुः ॥ २ ॥ सा होवाच । अवीर ऽइव बत मेऽजन ऽइव पुत्रꣳ हरन्तीति द्वितीयम्प्रमेथुः सा ह तथैवोवाच ॥ ३ ॥ अथ हायमीक्षाञ्चक्रे । कथन्नु तद-

* वैतस इति पुंस्प्रजननस्य नाम । तथाहि "शेपो वैतस इति पुंस्प्रजननस्य" वैतसो वितस्तं भवति, (निरु० अ० ३ पा० ४ ख० २१) ।

वीरङ्कथमजनथꣳ स्याद्यत्राहꣳ स्यामिति स नग्न ऽएवानूत्पपात चिरन्तन्मेने यद्वासः पर्य्यधास्यत ततो ह गन्धर्व्वा विद्युतञ्जनयाञ्चक्रुस्तं यथा दिवैवन्नग्नन्ददर्श ततो हैवेयन्तिरोबभूव पुनरैमीत्येत्तिरोभूताꣳ स ऽआद्ध्या जल्पन्कुरुक्षेत्रꣳ समया चचारान्यतः प्लक्षेति बिसवती तस्यै हाद्ध्यन्तेन वव्राज तद्ध ता ऽअप्सरस ऽआतयो भूत्वा परिपुप्लुविरे ॥ ४ ॥ तꣳ हेयं ज्ञात्वोवाच । अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वा ऽआविरसामेति तथेति तस्मै हाविरासुः ॥ ५ ॥ ताꣳ हायं ज्ञात्वाभिपरोवाद । 'हये जाये मनसा तिष्ठ घोरे वचाꣳसि मिश्रा कृणवावहै नु ॥ न नौ मन्त्रा ऽअनुदितास ऽएते मयस्करन्परतरे चनाहन्नि'त्युप नु रम सन्नु वदावहा ऽइति हैवैनान्तदुवाच ॥ ६ ॥ तꣳ हेतरा प्रत्युवाच । 'किमेता वाचा कृणवा तवाहम्प्राक्रमिषमुषसामग्रियेव ॥ पुरूरवः पुनरस्तम्परेहि दुरापना वात ऽइवाहमस्मी'ति न वै त्वन्तदकरोर्य्यदहमब्रवन्दुरापा वा ऽअहन्त्वयेतर्ह्यस्मि पुनर्ग्गृहानिहीति हैवैनन्तदुवाच ॥ ७ ॥ अथ हायम्परियून ऽउवाच । 'सुदेवो ऽअद्य प्रपतेदुनावृत्परावतम्परमाङ्गन्तवा ऽउ ॥ अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो ऽअद्यु'रिति सुदेवोऽद्योद्वा बदध्नीत प्रवा पतेत्तदेनं वृका वा इश्वानो वाद्युरिति हैव तदुवाच ॥ ८ ॥ तꣳ हेतरा प्रत्युवाच । 'पुरूरवो

(१) ऋ० सं० अष्ट० ८ अ० ५ व० १ । (२) ऋ० सं० अष्ट० ८ अ० ५ व० १ । (३) ऋ० सं० अष्ट० ८ अ० ५ वर्ग ३ । (४) ऋ० सं० अष्ट० ८ अ० ५ वर्ग ३ ।

मा मृथा मा प्रपप्तो मा त्वा व्वृकासो ऽअशिवास ऽउक्षन् ॥ न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणाꣳ हृदयान्येते'ति मैतदादृथा न वै स्त्रैणः सख्यमस्ति पुनर्ग्गृहानिहीति हैवैनन्तदुवाच ॥ ९ ॥ 'यद्विरूपाचरम् । मर्त्येष्ववसः रात्रीः शरदश्चतस्रः ॥ घृतस्य स्तोकः सकृदह्न ऽआश्नान्तादेवेदन्तातृपाणा चरामी'ति तदेतदुक्तप्रत्युक्तम्पञ्चदशर्च्चं बह्वृचाः प्राहुस्तस्यै ह हृदयमाव्ययाञ्चकार ॥ १० ॥ सा होवाच । सँवत्सरतमीꣳ रात्रिमागच्छतात्तन्म ऽएकाꣳ रात्रिमन्ते शयितासे जात ऽउ तेऽयन्तर्हि पुत्रो भवितेति स ह सँवत्सरतमीꣳ रात्रिमाजगामेद्धिरण्यविमितानि ततो हैनमेकमूचुरेतꣳप्रपद्यस्वेति तद्धास्मै तामुपप्रजिग्घ्युः ॥ ११ ॥ सा होवाच । गन्धर्वा वै ते प्रातर्व्वरन्दातारस्तं व्वृणासा ऽइति तं वै मे त्वमेव व्वृणीष्वेति युष्माकमेवैकोऽसानीति ब्रूतादिति तस्मै ह प्रातर्गन्धर्वा वरन्ददुः स होवाच युष्माकमेवैकोऽसानीति ॥ १२ ॥ ते होचुः । न वै सा मनुष्येष्वग्नेर्य्यज्ञिया तनूरस्ति यद्येष्ट्वास्माकमेकः स्यादिति तस्मै ह स्थाल्यामोप्याग्निम्प्रददुरनेनेष्ट्वास्माकमेको भविष्यसीति तꣳ ह कुमारश्चादायावव्राज सोऽरण्य ऽएवाग्निन्निधाय कुमारेणैव ग्राममेयाय पुनरैमीत्येत्तिरोभूतं ऋषोऽग्निरइवत्थन्तं ऋषा स्थाली शमीन्ताꣳ स ह पुनर्गन्धर्वानेयाय ॥ १३ ॥ ते होचुः । सँवत्सरश्चातुष्प्राश्यम्-

(१) ऋ० सं० अष्ट० ८ अ० ५ वर्ग ४ ।

मोदन्त्सम्पच स एतस्यैवाश्वत्थस्य तिस्रस्तिस्रः समिधो घृतेनाञ्चज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्याधत्तात्स यस्ततोऽग्निर्ज्जनिता स ऽएव स भवितेति ॥ १४ ॥ ते होचुः । परोऽक्षमिव वा ऽएतदाश्वत्थीमेवोत्तरारणिङ्कुरुष्व शमीमयीमधरारणिः स यस्ततोऽग्निर्ज्जनिता स ऽएव स भवितेति ॥ १५ ॥ ते होचुः । परोऽक्षमिव वा ऽएतदाश्वत्थीमेवोत्तरारणिङ्कुरुष्वाश्वत्थीमधरारणिः स यस्ततोऽग्निर्ज्जनिता स ऽएव स भवितेति ॥१६॥ स ऽआश्वत्थीमेवोत्तरारणिमचक्रे । आश्वत्थीमधरारणिः स यस्ततोऽग्निर्ज्जज्ञे स ऽएव स ऽआस तेनेष्ट्वा गन्धर्व्वाणामेक ऽआस तस्मादाश्वत्थीमेवोत्तरारणिङ्कुर्वीताश्वत्थीमधरारणिः स यस्ततोऽग्निर्ज्जायते स ऽएव स भवति तेनेष्ट्वा गन्धर्व्वाणामेको भवति ॥ १७ ॥

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[चातुर्मास्ययाजिनो द्वैविध्यं दर्शयितुं तत्रत्यैर्यागैः शरीरावयवकल्पनम्]

प्रजापतिर्ह चातुर्म्मास्यैरात्मानं विदधे । स ऽइममेव दक्षिणम्बाहुं वैश्वदेवः हविरकुरुत तस्यायमेवाङ्गुष्ठ ऽआग्नेयः हविरिदः सोम्यमिदः सावित्रम् ॥ १ ॥ स वै वर्षिष्ठः पुरोडाशो भवति । तस्मादियमासां वर्षिष्ठेदः सारस्वतमिदम्पौष्णमथ य ऽएष ऽउपरिष्टाद्वस्तस्य सन्धिस्तन्मारुतमिदं वैश्वदेवन्द्यावापृथिवीयन्तद्वा

"अश्वत्थशमीगर्भारणी प्रयच्छति" (का० श्रौ० सू० ४. ७. २०)

ऽअनिरुक्तम्भवति तस्म्मात्तदुनिरुक्तम् ॥ २ ॥ अयमेव दुक्षिण ऽऊरुर्वरुणप्प्रघासाः । तस्य यानि पञ्च हवीꣳषि समायीनि * ता ऽइमाः पञ्चाङ्गुलयः कुल्फावेवैन्द्राग्नः हविस्तद्वै द्विदेवत्यम्भवति तस्म्मादिमौ द्वौ कुल्फाविदुं वारुणमिदुम्मारुतमनूकङ्कायस्तद्वा ऽअनिरुक्तम्भवति तस्म्मात्तदुनिरुक्तम् ॥ ३ ॥ मुखमेवास्यानीकवतीष्टिः । मुखः हि प्राणानामनीकमुरः सान्तपनीयोरसा हि समिव तप्यत ऽउदुरङ्गहमेधीया प्रतिष्ठा वा ऽउदुरम्प्रतिष्ठित्या ऽएव शिश्नान्न्येवास्य क्रैडिनः हविः शिश्नैर्हि क्रीडतीवायमेवावाङ् प्राण ऽआदित्येष्टिः ॥ ४ ॥ अयमेवोत्तर ऽऊरुर्म्महाहविः तस्य यानि पञ्च हवीꣳषि समायीनि ता ऽइमाः पञ्चाङ्गुलयः कुल्फावेवैन्द्राग्नः हविस्तद्वै द्विदेवत्यम्भवति तस्म्मादिमौ द्वौ कुल्फाविदुम्माहेन्द्रमिदुं वैश्वकर्म्मणन्तद्वा ऽअनिरुक्तम्भवति तस्म्मात्तदुनिरुक्तमथ यदिदुमन्तरुदरे तत्पितृयज्ञस्तद्वा ऽअनिरुक्तम्भवति तस्म्मात्तदुनिरुक्तम् ॥ ५ ॥ अयमेवोत्तरो बाहुः शुनासीरीयम् । तस्य यानि पञ्च हवीꣳषि समायीनि ता ऽइमाः पञ्चाङ्गुलयोऽथ य ऽएष ऽउपरिष्टाद्धस्तस्य सन्धिस्तच्छुनासीरीयमिदुं वायव्यन्दोः सौर्य्यन्तद्वा ऽअनिरुक्तम्भवति तस्म्मात्तदुनिरुक्तम् ॥ ६ ॥ तानि वा ऽएतानि । चातुर्म्मास्यानि † त्रिषन्धीनि ‡ द्विसमस्तानि तस्म्मादि-

* पर्वचतुष्टयसञ्चारीणि ।

† चतुर्षु चतुर्षु मासेषु क्रियमाणानि चातुर्मास्यानि वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयाख्यानि चत्वारि पर्वाणि ।

‡ त्रयः सन्धयोऽन्तरालकालाश्चत्वारो मासा येषु तानि त्रिषन्धीनि ।

मानि पुरुषस्याङ्गानि त्रिषन्धीनि द्विसमस्तानि तेषां वै चतुर्णान्द्वयोस्त्रीणि त्रीणि हवीꣳष्यनिरुक्तानि भवन्ति द्वे द्वे द्वयोः ॥७॥ [अर्धः प्रपाठकः ॥५६॥] तेषां वै चतुर्ष्वग्निम्मन्थन्ति। तस्माच्चतुर्भिरङ्गैरायुते द्वयोः प्रणयन्ति तस्माद्द्वाभ्यामेत्येवमु ह प्रजापतिश्चातुर्म्मास्यैरात्मानं विदधे तथो ऽएवैवंविद्यजमानश्चातुर्म्मास्यैरात्मानं विधत्ते ॥८॥ तदाहुः सर्वगायत्रं वैश्वदेवꣳ हविः स्यात्सर्वत्रैष्टुभं वरुणप्रघासाः सर्वजागतम्महाहविः सर्वानुष्टुभꣳ शुनासीरीयश्चतुष्टोमस्याप्त्या ऽइति तदु तथा न कुर्य्याद्यत्वा ऽएतान्यभिसम्पद्यन्ते तेनैवास्य स काम ऽउपाप्तो भवति ॥ ९ ॥ तानि वा ऽएतानि । चातुर्म्मास्यानि द्वापष्ट्यानि त्रीणि शतानि बृहत्यः सम्पद्यन्ते तदेभिः सँवत्सरञ्च महाव्रतञ्चाप्नोत्यथो द्विप्रतिष्ठो वा ऽअयं यजमानो यजमानमेवैतत्स्वर्गे लोक ऽआयातयति प्रतिष्ठापयति ॥ १० ॥

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[प्रश्नप्रतिवचनैरग्निहोत्रहोमस्य सर्वदेवतृप्तिकरत्वप्रतिपादनम्]

शौचेयो ह प्राचीनयोग्यः । उद्दालकमारुणिमाजगाम ब्रह्मोद्यमग्निहोत्रं विविदिषिष्यामीति (१) ॥ १ ॥ स होवाच । गौतम का तेऽग्निहोत्री को वत्सः किमुपस्तृष्ट्वा किꣳ संस्योजनङ्किन्दुह्यमानङ्किन्दुग्धङ्किमाहियमाणङ्किमधिश्रितङ्किमवज्योत्यमानङ्किमद्भिः प्रत्यानीतङ्किमुद्वास्यमानङ्किमुद्वा-

(१) 'ग' 'ज' पुस्तकयोः "विविदिषामीति" इति पाठो दृश्यते ।


सितङ्किमुन्नीयमानङ्किमुन्नीतङ्किमुद्यतङ्किꣳ ह्रियमाणङ्किन्नि-
गृहीतम् ॥ २ ॥ काꣳ समिधमादधासि का पूर्वाहुतिः
किमुपासीषदः किमपैक्षिष्ट्वाः कोत्तराहुतिः ॥ ३ ॥ किꣳ
हुत्वा प्रकम्पयसि । किꣳ स्रुचम्परिमृज्य कूर्च्चे न्यमार्ज्जीः
किन्द्वितीयम्परिमृज्य दक्षिणतो हुस्तमुपासीषदः किम्पूर्व-
म्प्राशीः किन्द्वितीयङ्किमुत्स्रुप्यापाः किꣳ स्रुच्च्यप ऽआनीय
निरौक्षीः किन्द्वितीयङ्किन्तृतीयमेतान्दिशमुदौक्षीः किञ्ज-
घनेनाहवनीयमपो न्यनैषीः किꣳ समतिष्ट्रिपो यदि वा
ऽएतद्विद्वानग्निहोत्रमहौषीरथ ते हुतं स्यद्यु वा ऽअविद्वा-
नहुतमेव त ऽइति ॥ ४ ॥ स होवाच । इडैव मे मानव्य-
ग्निहोत्री वायव्यो वत्सः सजूरुपसृष्टा विराट् संस्यो-
जनमाश्विनन्दुह्यमानं वैश्वदेवन्दुग्धं वायव्यमाहियमाण-
माग्नेयमधिश्रितमैन्द्राग्नमवज्यो(स्यमानं वारुणमद्भिः
प्रत्यानीतं वायव्यमुद्वास्यमानन्द्यावापृथिव्यमुद्वासितमा-
श्विनमुन्नीयमानं वैश्वदेवमुन्नीतम्महादेवायोद्यतं वाय-
व्यꣳ ह्रियमाणं वैष्णवन्निगृहीतम् ॥ ५ ॥ अथ याꣳ
समिधमादधासि । आहुतीनाꣳ सा प्रतिष्ठा या
पूर्वाहुतिर्देवाँस्तयाप्प्रैषं स्यदुपासीषदम्बार्हस्पत्यन्तद्यदपैक्षि-
षीमश्वामुञ्च लोकौ तेन समिधां स्योत्तराहुतिर्म्मा-
न्तया स्वर्गे लोकेऽधाम् ॥६॥ अथ यद्धुत्वा प्रकम्पयामि ।
वायव्यन्तद्यत्स्रुचम्परिमृज्य कूर्च्चे स्यमार्ज्जिषमोषधिवन-
स्पतीꣳस्तेनाप्प्रैषं यद्द्वितीयम्परिमृज्य दक्षिणतो हुस्तमुपा-
सीषदम्पितॄꣳस्तेनाप्प्रैषं स्यत्पूर्वम्प्राशिषम्मान्तेनाप्प्रैषं स्यद्द्वि-

तीयम्प्रजान्तेनाथ यदुत्स्रुप्प्यापाम्पशूँस्तेनाप्रैषं स्यत्स्रुच्च्यप ऽआनीय निरौक्षिषद्ः सर्प्पदेवजनाँस्तेनाप्रैषं स्यद्द्वितीय-ङ्गन्धर्व्वाप्सरसस्तेनाथ यत्तृतीयमेतान्दिशमुदौक्षिषꣳ स्व-र्ग्गस्य लोकस्य तेन द्वारं व्यवारिषं स्यज्जघनेनाहवनीय-मपो ह्यनैषमस्मै लोकाय तेन व्वृष्टिमदां स्यत्सम्मति-ष्टिपं स्यत्पृथिव्व्या ऽऊनन्तत्तेनापूपुरमित्येतन्नो भगवन्त्स-हेति होवाच ॥ ७ ॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्ग्येति स होवाच यस्मिन्-न्काल ऽउद्धृतास्तेऽग्नयः स्युरुपावहृतानि पात्राणि होष्य-न्त्स्या ऽअथ त ऽआहवनीयोऽनुगच्छेद्वेत्थ तद्भयं स्यदुत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य ज्येष्ठः पुत्रो म्म्रियेत यस्यैतदुविदितꣳ स्याद्विद्याभिस्त्वेवाहुमता-रिषमिति किं विदितङ्का प्रायश्चित्तिरिति प्राण ऽउदान-मप्यगादिति गार्हपत्य ऽआहुतिञ्जुहुयाꣳ सैव प्राय-श्चित्तिर्न्न तदागः कुर्व्वीयेत्येतन्नो भगवन्त्सहेति होवाच ॥ ८ ॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्ग्येति स होवाच यत्र त ऽएतस्मिन्नेव काले गार्हपत्योऽनुगच्छेद्वेत्थ तद्भयं स्यदुत्र जुह्वतो भव-तीति वेदेति होवाच पुरा चिरादस्य गृहपतिर्म्म्रियेत यस्यैतदुविदितꣳ स्याद्विद्याभिस्त्वेवाहुमतारिषमिति किं विदितङ्का प्रायश्चित्तिरित्युदानः प्राणमप्यगादित्याहव-नीय ऽआहुतिञ्जुहुयाꣳ सैव प्रायश्चित्तिर्न्न तदागः कुर्वी-येत्येतन्नो भगवन्त्सहेति होवाच ॥ ९ ॥ शौचेयो ज्ञप्तः ।

प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र त ऽएतस्मिन्नेव कालेऽन्वाहार्य्यपचनोऽनुगच्छेद्वेत्थ तद्भयं य्यदुत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य सर्वे पशवो म्म्रियेरन्न्यस्यैतदविदितꣳ स्याद्विद्याभिस्त्वेवाहुमतारिषमिति किं विदितङ्का प्रायश्चित्तिरिति व्व्यान ऽउदानमप्प्यगादिति गार्हपत्य ऽआहुतिर्जुहुयाꣳ सैव प्रायश्चित्तिर्न्न तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥ १० ॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र त ऽएतस्मिन्नेव काले सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्भयं य्यदुत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्यादायादङ्कुलꣳ स्याद्यस्यैतदविदितꣳ स्याद्विद्याभिस्त्वेवाहुमतारिषमिति किं विदितङ्का प्रायश्चित्तिरिति पुरा चिरादग्निम्मथित्वा यान्दिशं वातो वायात्तान्दिशमाहवनीयमुद्धृत्य वायव्व्यामाहुतिर्जुहुयाꣳ स विद्याꣳ समृद्धम्मेऽग्निहोत्रꣳ सर्वदेवत्यं वायुꣳ ह्येव सर्वाणि भूतान्यपियन्ति वायोः पुनर्व्विसृज्यन्ते सैव प्रायश्चित्तिर्न्न तदागः कुर्वीयेत्येतन्नौ भगवन्त्सहेति होवाच ॥ ११ ॥ शौचेयो ज्ञप्तः । प्रक्ष्यामि त्वेव भगवन्तमिति पृच्छेव प्राचीनयोग्येति स होवाच यत्र त ऽएतस्मिन्नेव काले निवाते सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्भयं य्यदुत्र जुह्वतो भवतीति वेदेति होवाचाप्रियमेवास्मिँल्लोके पश्येताप्रियममुष्मिन्न्यस्यैतदविदितꣳ स्याद्विद्या-

भिस्त्वेवाहमतारिषमिति किं विदितङ्का प्रायश्चित्तिरिति पुरा चिरादग्निम्मथित्वा प्राञ्चमाहवनीयमुद्धृत्य जघनेनाहवनीयमुपविश्याहमेवैनत्पिबेयꣳ स विद्याꣳ समृद्धम्मेऽग्निहोत्रꣳ सर्व्वदेवत्यम्ब्राह्मणꣳ ह्येव सर्व्वाणि भूतान्यपियन्ति ब्राह्मणात्पुनर्विसृज्यन्ते सैव प्रायश्चित्तिर्न्न तदागः कुर्व्वीयेत्यथ वा ऽअहमेतन्नावेदिषमिति होवाच ॥ १२ ॥ शौचेयो ज्ञप्तेः । इमानि समित्काष्ठान्न्युपायानि भगवन्तमिति स होवाच यदेवन्नावक्ष्यो मूर्द्धा ते व्यपतिष्यदेह्युपेहीति तथेति तꣳ होपनिन्ये तस्मै हैताꣳ शोकतरां व्याहृतिमुवाच यत्सत्यन्तस्मादु सत्यमेव वदेत् ॥ १३ ॥

पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥



[उपनयनधर्मनिरूपणम्]

ब्रह्मचार्य्यमागामित्याह । ब्रह्मण ऽएवैनदात्मानन्निवेदयति ब्रह्मचार्य्यसानीत्याह ब्रह्मण ऽएवैनदात्मानम्परिददात्यथैनमाह को नामासीति प्रजापतिर्व्वै कः प्राजापत्यमेवैनन्तत्कृत्वोपनयते ॥ १ ॥ अथास्य हस्तङ्गृह्णाति । इन्द्रस्य ब्रह्मचार्य्यस्यग्निराचार्य्यस्तवाहमाचार्य्यस्तवासाविति त्येते वै श्रेष्ठे वलिष्ठे देवते ऽएताभ्यामेवैनꣳ श्रेष्ठाभ्यां वलिष्ठाभ्यान्देवताभ्यांम्परिददाति तथा हास्य ब्रह्मचारी न कांश्चनार्त्तिमार्च्छति न स य ऽएवं वेद ॥ २ ॥ अथैनम्भूतेभ्यः परिददाति । प्रजापतये त्वा परिददामि

देवाय त्वा सवित्रे परिददामीत्येते वै श्रेष्ठे वर्षिष्ठे देवते ऽएताभ्यामेवैनꣳ श्रेष्ठाभ्यां वर्षिष्ठाभ्यान्देवताभ्याम्परिदधाति तथा हास्य ब्रह्मचारी न काञ्चनार्त्तिमार्च्छति न स य ऽएवं वेद ॥ ३ ॥ अद्भ्यस्त्वौषधीभ्यः परिददामीति । तदेनमद्भ्यश्चौषधिभ्यश्च परिददाति द्यावापृथिवीभ्यान्त्वा परिददामीति तदेनमाभ्यान्द्यावापृथिवीभ्याम्परिददाति ययोरिदꣳ सर्वमधि विश्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या ऽइति तदेनꣳ सर्वेभ्यो भूतेभ्यः परिददात्यरिष्ट्यै तथा हास्य ब्रह्मचारी न काञ्चनार्त्तिमार्च्छति न स य ऽएवं वेद ॥४॥ * ब्रह्मचार्य्यसीत्याह । ब्रह्मणऽएवैनन्तत्परिददात्यपोऽशानेत्यमृतं वा ऽआपोऽमृतमशानेत्येवैनन्तदाह कर्म्म कुर्विति वीर्य्यं वै कर्म्म वीर्य्यङ्कुर्वित्येवैनन्तदाह समिधमाधेहीति समित्स्वात्मानन्तेजसा ब्रह्मवर्चसेनेत्येवैनन्तदाह मा सुपुप्थ्या ऽइति मा मृथा ऽइत्येवैनन्तदाहापोऽशानेत्यमृतं वा ऽआपोऽमृतमशानेत्येवैनन्तदाह तदेनमुभयतोऽमृतेन परिगृह्णाति तथा हास्य ब्रह्मचारी न काञ्चनार्त्तिमार्च्छति न स य ऽएवं वेद ॥ ५ ॥ अथास्मै सावित्रीमन्वाह† । ताꣳ ह स्मैताम्पुरा सँवत्सरेऽन्वाहुः सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वाचन्ददधम ऽइति ॥ ६ ॥ अथ षट्सु मासेषु । षड्वा ऽऋतवः सँवत्सरस्य सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वा-

* अन्नशतम् ५८००।
† पा० गृ० सू० २. ३. १।

चन्दद्ध्म ऽइति ॥ ७ ॥ अथ चतुर्विंऽशत्यहे । चतुर्विंऽशतिर्वै सँवत्सरस्यार्द्धमासाः सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वाचन्दद्ध्म ऽइति ॥ ८ ॥ अथ द्वादशाहे । द्वादश वै मासा सँवत्सरस्य सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वाचन्दद्ध्म ऽइति ॥ ९ ॥ अथ षडहे । षड्वा ऽऋतवः सँवत्सरस्य सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वाचन्दद्ध्म ऽइति ॥ १० ॥ अथ त्र्यहे । त्रयो वा ऽऋतवः सँवत्सरस्य सँवत्सरसम्मिता वै गर्भाः प्रजायन्ते जात ऽएवास्मिँमस्तद्वाचन्दद्ध्म ऽइति ॥११॥ तदुपि श्लोकङ्गायन्ति । आचार्यो गर्भी भवति हस्तमाधाय दक्षिणन्तृतीयस्याꣳ स जायते सावित्र्या सह ब्राह्मण ऽइति सद्यो ह त्वाव ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मणः सद्यो वा ऽअग्निर्जायते तस्मात्सद्य ऽएव ब्राह्मणायानुब्रूयात् ॥ १२ ॥ ताꣳ हैतामेके । सावित्रीमनुष्टुभमन्वाहुर्वाग्वा ऽअनुष्टुप्तदस्मिमन्वाचन्दद्ध्म ऽइति न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयादा न्वा ऽअयमस्य वाचमदित मूको भविष्यतीतीश्वरो ह तथैव स्यात्तस्मादेताङ्गायत्रीमेव सावित्रीमनुब्रूयात् ॥ १३ ॥ अथ हैके दक्षिणतः । तिष्ठते वासीनाय वान्वाहुर्न्न तथा कुर्य्याद्यो हैनन्तत्र ब्रूयाद्बुल्बवन्वा ऽअयमिममजीजनत बुल्बो भविष्यतीतीश्वरो ह तथैव स्यात्तस्मात्पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात् ॥ १४ ॥ तां वै पच्छोऽन्वाह । त्रयो वै

प्राणाः प्राण ऽउदानो व्यानस्तानेवास्मिँस्तद्दधात्यथार्द्धर्चशो द्वौ वा ऽइमौ प्राणौ प्राणोदानावेव प्राणोदानावेवास्मिँस्तद्दधात्यथ कृत्स्नामेको वा ऽअयम्प्राणः कृत्स्न ऽएव प्राणमेवास्मिँस्तत्कृत्स्नन्दधाति ॥ १५ ॥ तदाहुः । न ब्रह्मणम्ब्रह्मचर्य्यमुपनीय मिथुनञ्चरेद्वडभो वा ऽएष भवति यो ब्रह्मचर्य्यमुपैति नेदिमम्ब्राह्मणं विषिक्ताद्रेतसो जनयानीति ॥ १६ ॥ तदु वा ऽआहुः । काममेव चरेद्वडभो वा ऽइमाः प्रजा दैव्यश्चैव मानुष्यश्च ता वा ऽइमा मानुष्यः प्रजाः प्रजननात्प्रजायन्ते च्छन्दाँसि वै दैव्यः प्रजास्तानि मुखतो जनयते तत ऽएतञ्जनयते तस्मादु काममेव चरेत् ॥ १७ ॥ तदाहुः । न ब्रह्मचारी सन्मद्धञ्ञीयादोषधीनां वा ऽएष परमो रसो यन्मधु नेदन्नाद्यस्यान्तङ्गच्छानीत्यथ ह स्माह श्वेतकेतुरारुणेयो ब्रह्मचारी सन्मद्धञ्ञँस्त्रस्यै वा ऽएतद्विद्यायै शिष्टं स्यन्मधु स तु रसो यस्येदृक्विशिष्टमिति यथा ह वा ऽऋचं वा यजुर्वा साम वाभिव्याहरेत्तादृक्तद्य ऽएवं विद्वान्ब्रह्मचारी सन्मद्धञ्ञाति तस्मादु काममेवाश्नीयात् ॥ १८ ॥

पञ्चमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[शतातिरात्राख्यसत्रविधानमाख्यायिकया]

देवाश्वा ऽऊर्द्धान्त्स्वर्गँल्लोकं स्यतः । असुरास्तमसान्तरदधुस्ते होचुर्न्न वा ऽअस्यान्येन सत्रादपघातोऽस्ति हन्त सत्रमासामहा ऽइति ॥ १ ॥ ते शताग्निष्टोमः

सत्रमुपेयुः । ते यावदासीनः परापश्यन्येत्तावतस्तमोऽपाघ्नन्तैवमेव शतोक्थ्येन यावत्तिष्ठन्परापश्यन्येत्तावतस्तमोऽपाघ्नत ॥ २ ॥ ते होचुः । अप वाव तमो हन्मह्ये न त्वेव सर्वमिव हन्त प्रजापतिम्पितरम्प्रत्ययामेति ते प्रजापतिम्पितरम्प्रतीत्योचुरसुरा वै नो भगव ऽऊर्द्धान्त्स्वर्गंल्लोकं ग्यतस्तमसान्तरदधुः ॥ ३ ॥ ते शताग्निष्टोमः सत्रमुपैम। ते यावदासीनः परापश्यन्येत्तावतस्तमोऽपाहन्न्मह्येवमेव शतोक्थ्येन यावत्तिष्ठन्परापश्यन्येत्तावतस्तमोऽपाहन्न्महि प्र नो भगवञ्छाधि यथासुराँस्तमोऽपहत्य सर्वम्पाप्मानमपहत्य स्वर्गंल्लोकम्प्रज्ञास्याम ऽइति ॥ ४ ॥ स होवाच। असर्वक्रतुभ्यां वै यज्ञाभ्यामगन्त यदग्निष्टोमेन चोक्थ्येन च शतातिरात्रः सत्रमुपेत तेनासुराँस्तमोऽपहत्य सर्वम्पाप्मानमपहत्य स्वर्गंल्लोकम्प्रज्ञास्यथेति ॥ ५ ॥ ते शतातिरात्रः सत्रमुपेयुः । तेनासुराँस्तमोऽपहत्य सर्वम्पाप्मानमपहत्य स्वर्गंल्लोकम्प्रजज्ञुस्तेषामर्वाक्पश्चाशोष्वेवाहः स्वहरभि रात्रिसामानि परीयू रात्रिमभ्यहःसामानि ॥ ६ ॥ ते होचुः । अमुहाम वै न प्रजानीमो हन्त प्रजापतिमेव पितरम्प्रत्ययामेति ते प्रजापतिमेव पितरम्प्रतीत्योचुरहन्नो रात्रिसामानि रात्र्यामह्नो भवन्ति नः ॥ विपश्चिद्यज्ञान्मुग्धान्विद्वान्धीरोऽनुशाधि न ऽइति ॥ ७ ॥ तान्ह्येतदुपजगौ । महाहिमिव वै ह्रदाद्बलीयानन्ववेत्य ॥ अनुत्त स्वादास्थानात्ततः सत्रन्न तायत ऽइति ॥ ८ ॥ आश्विनं वै वः शस्यमानम् । प्रातरनुवाकमास्थानादनुत्त

यमास्थानादनुद्धन्धीराः सन्तो ऽअधीरवत् ॥ प्रशास्ता तमुपेत शनैरप्रतिशः सतेति ॥ ९ ॥ ते होचुः । कथन्नु भगवः शस्तङ्कथमप्रतिशस्तमिति स होवाच यत्र होताश्विनः शः सन्नाग्नेयस्य क्रतोर्गायत्रस्य च्छन्दसः पारङ्गच्छात्तः प्रतिप्रस्थाता वसतीवरीः परिहृत्य मैत्रावरुणस्य हविर्द्धानयोः प्रातरनुवाकमुपाकुरुतादुच्चैर्होता शः सति शनैरितरो जञप्यमान ऽइवान्वाह तन्न वाचा वाचम्प्रत्येति न च्छन्दसा च्छन्दः ॥ १० ॥ परिहिते प्रातरनुवाके । यथायतनमेवोपाꣳश्वन्तर्ष्यामौ हुत्वा द्रोणकलशे पवित्रम्प्रपीड्य निदधाति तिरोह्नयैश्चरित्वा प्रत्यञ्चः प्रतिपरेत्य तिरोह्नयानेव भक्षयाद्धा ऽअथानुपूर्व्वं ऋषञ्जपुच्छः सꣳस्थाप्य स ऽऊर्द्धा ऽअन्तर्ष्यामाद्ग्रहास्तान्गृहीत्वा विप्प्रुषाꣳ होमैः हुत्वा सन्तनिञ्च बहिष्पवमानेन स्तुत्वाहरेव प्रतिपद्याद्धा ऽइति ॥ ११ ॥ तदेतेऽभि श्श्लोकाः । चतुर्भिः सैन्धवैर्युक्तैर्द्वीरा व्व्यजहुस्तमः ॥ विद्वाꣳसो ये शतक्रतुदेवाः सत्रमतन्वतेति ॥ १२ ॥ चत्वारो ह्यत्र युक्ता भवन्ति । द्वौ होतारौ द्वावद्धर्य्यू पवेर्न्नु शक्वेव हनूनि कल्प्पयन्नहन्नोरन्तौ व्व्यतिषजन्त धीराः ॥ न दानवा यज्ञियन्तन्तुमेषां विजानीमो विततम्मोहयन्ति नः ॥ पूर्व्वस्याह्नः परिशिष्यन्ति कर्म्म तदुत्तरेणाभिवितन्वतेऽह्ना ॥ दुर्विज्ञान-

(१) "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" ॥ (कर्मप्र०)
"कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ" (का० श्रौ० सू० २. ३. ३०)

(२) अभिषवे ग्रहणे च पतितानां सोमबिन्दूना ग्रहणाशक्यत्वात् तत्प्रत्यवायपरिहाराय घृतहोमस्य विप्रुड्होम इति संज्ञा ।

ङ्काव्यन्देवतानाꣳ सोमाः सोमैर्व्यतिषक्ताः प्लवन्ते ॥ समानान्त्सदमुक्षन्ति हुयान्काष्टभृतो यथा ॥ पूर्णान्न्परि-स्रुतः कुम्भाञ्जनमेजयसादन ऽइत्यसुररक्षसान्न्यपेयुः ॥१३॥

पञ्चमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[पञ्चमहायज्ञानां महासत्रत्वप्रतिपादनम्]

पञ्चैव महायज्ञाः * । ताान्येव महासत्राणि भूत-यज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ ऽइति ॥ १ ॥ अहरहर्भूतेभ्यो बलिꣳ हरेत् । तथैतम्भूतयज्ञꣳ समाप्नोत्यहरहर्द्यादोदपात्रात्तथैतम्मनुष्ययज्ञꣳ समाप्नो-त्यहरहः स्वधाकुर्य्यादोदपात्रात्तथैतम्पितृयज्ञꣳ समाप्नोत्य-हरहः † स्वाहाकुर्य्यादाकाष्ट्रात्तथैतन्देवयज्ञꣳ समाप्नोति ॥२॥ अथ ब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञस्तस्य वा ऽएतस्य ब्रह्मयज्ञस्य वागेव जुहूर्म्मन ऽउपभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक ऽउदयनं ऋषावन्तꣳ ह वा ऽइमा-म्पृथिवीं वित्तेन पूर्णान्दुदँल्लोकञ्जयति त्रिस्तावन्तञ्जयति भूयाꣳसञ्चाक्षय्यं य ऽएवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥ ३ ॥ पय ऽआहुतयो ह वा ऽएता देवानाम् । यदृचः स य ऽएवं विद्वानृचोऽहरहः स्वाध्यायमधीते पय ऽआहुतिभिरेव तद्देवाँस्तर्पयति त

* "अथातः पञ्च महायज्ञाः" पा० गृ० सू० का० २ क० ९ सू० १ ।

† "अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठादेवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात्" पा० गृ० सू० २. ९. १६ ।

ऽएनन्तृप्ता॒स्तर्प्पयन्ति योगक्षेमे॒ण प्रा॒णेन॒ रे॒तसा सर्वा॑त्म॒ना स॒र्वाभिः॑ पु॒ण्याभिः॑ सम्प॒द्भिर्घृ॒तकु॑ल्या॒ मधु॑कुल्याः॑ पितॄ॒न्त्स्वधा॒ ऽअभि॒वह॑न्ति ॥ ४ ॥ आज्या॑हुतयो ह॒ वा॒ ऽए॒ता॒ देवा॑नाम् । यद्यजू॑ꣳषि स यꣳ ऽएवं॑ विद्वा॒न्यजू॑ꣳष्य॒हर॑हः॒ स्वाध्या॑य॒मधी॑त॒ ऽआज्या॑हुति॒भिरेव॒ तद्देवाँ॑स्तर्प्पयति त॒ ऽएनन्तृप्ता॒स्तर्प्पयन्ति योगक्षेमे॒ण प्रा॒णेन॒ रे॒तसा॒ सर्वा॑त्म॒ना स॒र्वाभिः॑ पु॒ण्याभिः॑ सम्प॒द्भिर्घृ॒तकु॑ल्या॒ मधु॑कुल्याः॑ पितॄ॒न्त्स्वधा॒ ऽअभि॒वह॑न्ति ॥ ५ ॥ सोमा॑हुतयो ह॒ वा॒ ऽए॒ता॒ देवा॑नाम् । यत्सा॒मानि॑ स यꣳ ऽएवं॑ विद्वान्त्सा॒मान्य॒हर॑हः॒ स्वाध्या॑य॒मधी॑ते॒ सोमा॑हुति॒भिरेव॒ तद्देवाँ॑स्तर्प्पयति त॒ ऽएनन्तृप्ता॒स्तर्प्पयन्ति योगक्षेमे॒ण प्रा॒णेन॒ रे॒तसा॒ सर्वा॑त्म॒ना स॒र्वाभिः॑ पु॒ण्याभिः॑ सम्प॒द्भिर्घृ॒तकु॑ल्या॒ मधु॑कुल्याः॑ पितॄ॒न्त्स्वधा॒ ऽअभि॒वह॑न्ति ॥ ६ ॥ मेद॑ ऽआहुतयो ह॒ वा॒ ऽए॒ता॒ देवा॑नाम् । यद॑थर्वाङ्गिरसः॒ स यꣳ ऽएवं॑ विद्वा॒नथर्वाङ्गिरसो॒ऽहर॑हः॒ स्वाध्या॑य॒मधी॑ते॒ मेद॑ ऽआहुति॒भिरेव॒ तद्देवाँ॑स्तर्प्पयति त॒ ऽएनन्तृप्ता॒स्तर्प्पयन्ति योगक्षेमे॒ण प्रा॒णेन॒ रे॒तसा॒ सर्वा॑त्म॒ना स॒र्वाभिः॑ पु॒ण्याभिः॑ सम्प॒द्भिर्घृ॒तकु॑ल्या॒ मधु॑कुल्याः॑ पितॄ॒न्त्स्वधा॒ ऽअभि॒वह॑न्ति ॥७॥ मद्धा॑हुतयो ह॒ वा॒ ऽए॒ता॒ देवा॑नाम् । यद॒नु॒शा॒स॒नानि॑ * वि॒द्या † वा॑कोवा॒क्यमि॑तिहासपुराण॒गाथा

* अनुशिष्यन्ते—व्युत्पाद्यन्ते एभिरित्यनुशासनानि-व्याकरणनिरुक्तादीनि षडङ्गानि ।

† न्यायमीमांसादय. ।

(१) उक्तिप्रत्युक्तिरूपं प्रकरण वाकोवाक्यम् ।

नाराशꣳस्यः स यꣳ ऽएवं विद्वाननुशासनानि विद्या वाकोवाक्यमितिहासपुराणङ्गाथा नाराशꣳसीरित्यहरहः स्वाध्यायमधीते मद्भाहुतिभिरेव तद्देवाँस्तर्पयति तꣳ ऽएनन्तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्ल्या मधुकुल्ल्याः पितॄन्त्स्वधा ऽअभिवहन्ति ॥ ८ ॥ तस्य वा ऽएतस्य ब्रह्मयज्ञस्य । चत्वारो वषट्कारा यद्वातो वाति यद्विद्योतते यत्स्तनयति यदवस्फूर्ज्जति तस्मादेवंविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्ज्जत्यधीयीतैव वषट्काराणामच्छम्बट्काराय्याति ह वै पुनर्म्मृत्युम्मुच्यते गच्छति ब्रह्मणः सात्मताꣳ स चेदुपि प्रबलमिव न शक्नुयादप्येकन्देवपदमधीयीतैव तथा भूतेभ्यो न हीयते ॥ ९ ॥

पञ्चमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
कण्डिकासंख्या ॥ ११२ ॥

[स्वाध्यायप्रशंसा]

अथातः स्वाध्यायप्रशꣳसा । प्रियꣳ स्वाध्यायप्रवचनं भवतो युक्तमना भवत्यपराधीनोऽहरहरर्थान्त्साधयते सुखꣳ स्वपिति परमचिकित्सक ऽआत्मनो भवतीन्द्रियसंयमꣳ श्चैकारामता च प्रज्ञावृद्धिर्यशो लोकपक्तिः प्रज्ञा वर्द्धमाना चतुरो धर्म्मान्ब्राह्मणमभिनिष्पादयति ब्रह्मण्यम्प्रतिरूपचर्य्यां यꣳशो लोकपक्तिँल्लोकः पच्यमान-

इच्चतुर्भिर्ह्मर्मैर्ब्राह्मणम्भुनक्त्यर्चा च दानेन चाज्येयतया चावद्यतया च ॥ १ ॥ ये ह वै के च श्रमाः । इमे द्यावापृथिवी ऽअन्तरेण स्वाद्ध्यायो हैव तेषाम्परमता काष्ठा य ऽएवं विद्वान्त्स्वाद्ध्यायमधीते तस्म्मात्स्वाद्ध्यायोऽद्ध्येतव्यः ॥ २ ॥ यद्यद्ध वा ऽअयञ्छन्दसः । स्वाद्ध्यायमधीते तेन तेन हैवास्य यज्ञक्रतुनेष्टम्भवति य ऽएवं विद्वान्त्स्वाद्ध्यायमधीते तस्म्मात्स्वाद्ध्यायोऽद्ध्येतव्यः ॥ ३ ॥ यदि ह वा अप्यभ्यक्तः । अलङ्कृतः सुहितः सुखे शयने शयानः स्वाद्ध्यायमधीत ऽआ हैव स नखाग्रेभ्यस्तप्यते य ऽएवं विद्वान्त्स्वाद्ध्यायमधीते तस्म्मात्स्वाद्ध्यायोऽद्ध्येतव्यः ॥ ४ ॥ मधु ह वा ऽऋचः । घृतङ्ह सामान्यमृतं य्यजूꣳषि यद्ध वा ऽअयं वाकोवाक्यमधीते क्षीरौदनमाꣳसौदनौ हैव तौ ॥ ५ ॥ मधुना ह वा ऽएष देवाँस्तर्प्पयति । य ऽएवं विद्वानृचोऽहरहः स्वाद्ध्यायमधीते त ऽएनन्तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥ ६ ॥ घृतेन ह वा ऽएष देवाँस्तर्प्पयति । य ऽएवं विद्वान्त्सामान्यहरहः स्वाद्ध्यायमधीते त ऽएनन्तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥ ७ ॥ अमृतेन ह वा ऽएष देवाँस्तर्प्पयति । य ऽएवं विद्वान्य्यजूꣳष्यहरहः स्वाद्ध्यायमधीते त ऽएनन्तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥८॥ क्षीरौदनमाꣳसौदनाभ्याꣳ ह वा ऽएष देवाँस्तर्प्पयति । य ऽएवं विद्वाꣳवाकोवाक्यमितिहासपुराणमित्यहरहः स्वाद्ध्यायमधीते त ऽएनन्तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वै-

ब्भोगैः ॥ ९ ॥ यन्ति वा ऽआपः । एत्यादित्य ऽएति चन्द्रमा यन्ति नक्षत्राणि यथा ह वा ऽएता देवता नेयुर्न्न कुर्य्युरेवꣳ हैव तदुहब्र्ब्राह्मणो भवति यदुहꣳ स्वाध्यायन्नाधीते तस्मात्स्वाध्यायोऽध्येतव्यस्तस्मादप्यृचं वा यजुर्वा साम वा गाथां वा कुंव्यां वाभिव्याहरेद्व्रतस्याव्यवच्छेदाय ॥ १० ॥

पञ्चमाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

[आख्यायिकया व्याहृत्युत्पत्तिकथनम्]

प्रजापतिर्व्वा ऽइदमग्र ऽआसीत् । एक ऽएव सोऽकामयत स्याम्प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्माच्छ्रान्तात्तेपानात्त्रयो लोका ऽअसृज्यन्त पृथिव्यन्तरिक्षन्द्यौः ॥ १ ॥ स ऽइमाँस्त्रीँल्लोकानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतीꣳष्यजायन्ताग्निरुर्य्वोऽयम्पवते सूर्य्यः ॥ २ ॥ स ऽइमानि त्रीणि ज्योतीꣳष्यभितताप । तेभ्यस्तप्तेभ्यस्त्रयो वेदा ऽअजायन्ताग्नेर्ऋग्वेदो वायोर्य्यजुर्वेदः सूर्य्यात्सामवेदः ॥ ३ ॥ स इमाँस्त्रीन्वेदानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्यृग्वेदाद्भुव ऽइति यजुर्वेदात्स्वरिति सामवेदात्तदृग्वेदेनैव होत्रमकुर्वत यजुर्वेदेनाद्ध्वर्य्यवꣳ सामवेदेनोद्गीथं य्यदेव त्रय्यै विद्यायै शुक्रन्तेन ब्रह्मत्वमथोच्चक्राम ॥ ४ ॥ ते देवाः प्प्रजापतिमब्ब्रुवन् । यदि न ऋक्तो वा यजुष्टो वा सामतो वा यज्ञो ह्वलेत्केनैनम्भिषज्येमेति ॥ ५ ॥ स होवाच ।

यद्वृक्तो भूरिति चतुर्गृहीतमाज्यङ्गृहीत्वा गार्हपत्ये जुहवथ यदि यजुष्टो भुव ऽइति चतुर्गृहीतमाज्यङ्गृहीत्वाग्नीद्रीये जुहवथान्वाहार्यपचनेवा† हविर्यज्ञे यदि सामतः स्वरिति चतुर्गृहीतमाज्यङ्गृहीत्वाहवनीये जुहवथ यद्यु ऽअविज्ञातमसत्सर्वाण्यनुद्रुत्याहवनीये जुहवथ तदृग्वेदेनैव ऽग्वेदमभिषज्यति यजुर्वेदेन यजुर्वेदः सामवेदेन सामवेदः स यथा पर्वणा पर्व सन्दद्ध्यादेवः हैव स सन्दधाति य ऽएताभिर्भिभषज्यत्यथ यो ह्यतोऽन्येन भिषज्यति यथा शीर्णेन शीर्णः सन्धिरसेद्यथा वा शीर्णे गरमभिनिदद्ध्यादेवन्तत्तस्मादेवंविदमेव ब्रह्माणङ्कुर्वीत नानेवंविदम् ॥ ६ ॥ तदाहुः । यदृचा होत्रङ्क्रियते यजुषाद्ध्वर्यवः साम्नोद्गीथोऽथ केन ब्रह्मत्वमित्यनया त्रय्या विद्ययेति ह ब्रूयात् ॥ ७ ॥

पञ्चमाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

[अंश्वदाभ्ययोर्ग्रहयोरात्मवागादिरूपतया समुचित्यानुष्ठानम्]

प्रजापतिर्ह वा ऽएष यदंशुः । सोऽस्यैष ऽआत्मैवात्मा ह्ययम्प्रजापतिर्वागेवादाभ्यः स यदंशुङ्गृहीत्वादाभ्यङ्गृह्णात्यात्मानमेवास्यैतत्संस्कृत्य तस्मिन्नेतां वाचम्प्रतिष्ठापयति ॥ १ ॥ अथ मनो ह वा ऽअंशुः । वागदाभ्यः प्राण ऽएवाथंशुरुदानोऽदाभ्यश्चक्षुरेवाथंशुः श्रोत्रमदा-

† अन्वाहार्यपचने—दक्षिणाग्नौ ।

ब्भ्यस्तद्यदेतौ ग्रहौ गृह्णन्ति सर्वस्वायैव कृत्स्नतायै ॥ २ ॥ अथ देवाश्च ह वा ऽअसुराश्च । उभये प्राजापत्या ऽअस्पर्द्धन्त त ऽएतस्मिन्नेव यज्ञे प्रजापतावस्पर्द्धन्ता-स्माकमयꣳ स्यादस्माकमयꣳ स्यादिति ॥ ३ ॥ ततो देवाः । अर्च्यन्तः श्राम्यन्तश्चेरुस्त ऽएतङ्गृहन्ददृशुरेत-मदाब्भ्यन्तमगृह्णत ते सवनानि प्रावृहन्त ते सर्वं यज्ञः समवृञ्जतान्तरायन्नसुरान्न्यज्ञात् ॥ ४ ॥ ते होचुः । अदभाम वा ऽएनानिति तस्माददाब्भ्यो न वै नोऽदभन्निति तस्मा-ददाब्भ्यो वाग्वा ऽअदाब्भ्यः सेयमदब्धा वाक्तस्मा-द्वेवादाब्भ्य ऽएवः ह वै द्विषतो ब्भ्रातृव्यस्य सर्वं यज्ञः संवृङ्क्त ऽएवन्द्विषन्तम्भ्रातृव्यः सर्वस्माद्यज्ञा-न्निर्भजति बहिर्द्धा करोति य ऽउ ऽएवमेतद्वेद ॥ ५ ॥ स येनैव पात्रेणाꣳशुङ्गृह्णाति । तस्मिन्नेव पात्रे निग्राभ्या(1)-ब्भ्योऽप ऽआनीय तस्मिन्नेतानꣳशून्गृह्णाति A ॥६॥ 'उपया-मगृहीतोऽसि । अग्नये त्वा गायत्रच्छन्दसङ्गृह्णामी'ति गायत्र-म्प्रातःसवनन्तत्प्रातःसवनम्प्रवृहन्ती'न्द्राय त्वा त्रिष्टुप्छन्द-सङ्गृह्णामी'ति त्रैष्टुभम्माध्यन्दिनꣳ सवनन्तन्माध्यन्दिनꣳ सवनम्प्रवृहति 'विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसङ्ग-ह्णामी'ति जागतन्तृतीयसवनन्ततृतीयसवनम्प्रवृहत्य'नुष्टु-प्तेऽभिगर' ऽइति षड्वा ऽऊर्द्धः सवनेब्भ्यस्तदानुष्टुभन्त-

(१) अभिषोतव्यस्य सोमस्य सेवनीया आपो निग्राभ्या उच्यन्ते ।

(A) का० श्रौ० सू० अ० १२ क० ५ सू० १६ ।

(२) शु० य० वे० सं० अ० ८ क० ४७ । (३) शु० य० वे० सं० अ० ८ क० ४७ । (४) शु० य० वे० सं० अ० ८ क० ४७ । (५) शु० य० वे० सं० अ० ८ क० ४७ ।

दुर्वैतत्प्रवृहति तन्नाभिषुणोति वज्रो वै ग्रावा वाग्दाब्भ्यो नेद्वज्रेण वाचꣳ हिꣳसानीति ॥ ७ ॥ अꣳशूनेवाधूनोतिB । 'ऊर्ज्जेशीनान्त्वा पत्मन्नाधूनोमि कुकूनानान्त्वा पत्मन्नाधूनोमि भन्दुनानान्त्वा पत्मन्नाधूनोमि मदिन्तमानान्त्वा पत्मन्नाधूनोमि मधुन्तमानान्त्वा पत्मन्नाधूनोमी'त्येता वै दैवीरापस्तद्याश्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रसन्दधाति ॥ ८ ॥ 'शुक्रन्त्वा शुक्र ऽआधूनोमी'ति। शुक्रꣳ ह्येतच्छुक्र ऽआधूनो'त्यह्नो रूपे सूर्य्यस्य रश्मिमष्टि्व'ति तदुह्नश्चैवैनमेतद्रूपे सूर्य्यस्य च रश्मिमष्ट्वाधूनोति ॥ ९ ॥ 'ककुभः रूपं व्वृषभस्य रोचते बृहदि'ति । एतद्वै ककुभः रूपं व्वृषभस्य रोचते बृहद्य ऽएष तपति 'शुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगा' ऽइति तच्छुक्रमेवैतच्छुक्रस्य पुरोगाङ्करोति सोमः सोमस्य पुरोगां 'ऋषत्ते सोमादाब्भ्यन्नाम जागृवि तस्मै त्वा गृह्णामी'त्येतद्ध वा ऽअस्यादाब्भ्यन्नाम जागृवि यद्वाक्तद्वाचमेवैतद्वाचे गृह्णाति ॥ १० ॥ अथोपनिष्क्रम्य जुहोति* । 'तꣳस्मै ते सोम सोमाय स्वाहे'ति तत्सोममेवैतत्सोमाय जुहोति तथो वाचमग्नौ न प्रवृणक्त्यथ हिरण्यमभिष्ठ्यनित्य-

(B) का० श्रौ० सू० १२. ५. १९ ।

(१) शु० य० वे० सं० अ० ८ क० ४८ । (२) शु० य० वे० स० अ० ८ क० ४८ । (३) शु० य० वे० सं० अ० ८ क० ४८ । (४) शु य० वे० सं० अ० ८ क० ४९ । (५) शु० य० वे० सं० अ० ८ क० ४९ । (६) शु० य० वे० म० अ० ८ क० ४९ ।

* "तस्मै त इति जुहोति" का० श्रौ० सू० १२ ५. २ ।

(७) शु० य० वे० सं० अ० ८ क० ४९ ।

सावेव बन्धुस्तस्य तावतीरेव दक्षिणा यावतीरदःशोः * ॥ ११ ॥ अथाऽशून्पुनरप्यर्जति † । 'उशिक्त्वन्देव सोमाग्नेः प्रियम्पाथोऽपीहि वशी त्वन्देव सोमेन्द्रस्य प्रियम्पाथोऽपीह्यस्म्मत्सखा त्वन्देव सोम विश्वेषान्देवानाम्प्रियम्पाथोऽपीही'ति सवनानि वा ऽअदः प्रवृहति तान्येवैतत्पुनरापाययत्ययातयामानि करोति तैर्यातयामैर्यज्ञन्तन्वते ॥ १२ ॥

पञ्चमाध्याये नवमं ब्राह्मणम् ॥ ९ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

[आख्यायिकया समिदाधानादीनां वनस्पत्यादिरूपफलप्राप्ति-साधनताकथनम्]

भृगुर्ह वै वारुणिः । वरुणम्पितरं विद्ययातिमेने तद्ध वरुणो विदाञ्चकारातिवै मा विद्यया मन्न्यत ऽइति ॥ १ ॥ स होवाच । प्राङ् पुत्रक व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा दक्षिणा व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा प्रत्यग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वोदग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वैतयोः पूर्वयोरुत्तरमन्ववान्तरदेशं व्रजतात्तत्र यत्पश्येस्तन्म ऽआचक्षीथा ऽइति ॥ २ ॥ स ह तत ऽएव प्राङ् प्रवव्राज । इदु पुरुषैः पुरुषान्पर्वाण्येषाम्पर्वशः संव्रश्चम्पर्वशो विभजमानानिदन्तवेदम्म-

* "अदृशुवदक्षिणा" का० श्रौ० सू० १२. ५. २२ ।

† का० श्रौ० सू० १२. ५. २१ ।

(१) शु० य० वे० सं० अ० ८ क० ५० ।

मेति स होवाच भीष्ममम्बत भोः पुरुषान्न्वा ऽएतऱ्पुरुषाः पर्व्वाण्येषाम्पर्व्वशः संव्रश्च्यम्पर्व्वशो व्व्यभक्षतेति ते होचुरित्थं वा ऽइमेऽस्म्मानमुष्मिँल्लोकेऽसचन्त तान्न्वयमिदुमिह प्रतिसचामहा ऽइति स होवाचास्तीह प्रायश्चित्तीरित्यस्तीति काति पिता ते वेदेति ॥ ३ ॥ स ह तत ऽएव दक्षिणा प्रवव्राज । इदु पुरुषैः पुरुषान्पर्व्वाण्येषाम्पर्व्वशः सङ्कर्त्तम्पर्व्वशो विभजमानानिदन्तवेदम्मेति स होवाच भीष्ममम्बत भोः पुरुषान्न्वा ऽएतऱ्पुरुषाः पर्व्वाण्येषाम्पर्व्वशः सङ्कर्त्तम्पर्व्वशो व्व्यभक्षतेति ते होचुरित्थं वा ऽइमेऽस्म्मानमुष्मिँल्लोकेऽसचन्त तान्न्वयमिदुमिह प्रतिसचामहा ऽइति स होवाचास्तीह प्रायश्चित्तीरित्यस्तीति काति पितैव ते वेदेति ॥ ४ ॥ स ह तत ऽएव प्रत्यङ् प्रवव्राज । इदु पुरुषैः पुरुषाँस्तूष्णीमासीनाँस्तूष्णीमासीनैरद्यमानान्त्स होवाच भीष्ममम्बत भोः पुरुषान्न्वा ऽएतऱ्पुरुषास्तूष्णीमासीनाँस्तूष्णीमासीना ऽअदन्तीति ते होचुरित्थं वा ऽइमेऽस्म्मानमुष्मिँल्लोकेऽसचन्त तान्न्वयमिदुमिह प्रतिसचामहा ऽइति स होवाचास्तीह प्रायश्चित्तीरित्यस्तीति काति पितैव ते वेदेति ॥ ५ ॥ स ह तत ऽएवोदङ् प्रवव्राज । इदु पुरुषैः पुरुषानाक्रन्दुयत ऽआक्रन्दुयद्भिरद्यमानान्त्स होवाच भीष्ममम्बत भोः पुरुषान्न्वा ऽएतऱ्पुरुषा ऽआक्रन्दुयत ऽआक्रन्दुयन्तोऽदन्तीति ते होचुरित्थं वा ऽइमेऽस्म्मानमु-

(१) 'ग' 'ज' पुस्तकयोः 'एदु' इति पाठ उपलभ्यते ।

ष्मिमँल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहा ऽइति स होवाचास्तीह प्रायश्चित्तीरित्यस्तीति काति पितैव ते वेदेति ॥ ६ ॥ स ह तत ऽएवैतयोः पूर्वयोः । उत्तरमन्ववान्तरदेशम्प्रवव्राजेदु स्त्रियौ कल्ल्याणीश्चातिकल्ल्याणीश्च ते ऽअन्तरेण पुरुषः कृष्णः पिङ्गाक्षो दण्डपाणिस्तस्थौ तꣳ हैनन्दृष्ट्वा भीर्विवेद स हेत्य संविवेश तꣳ ह पितोवाचाधीष्व स्वाध्यायङ्कस्मान्नु स्वाध्यायन्नाधीष ऽइति स होवाच किमद्धयेष्ये न किञ्चनास्तीति तद्ध ब्रुणो विदाञ्चकाराद्रयेग्वा ऽइति ॥ ७ ॥ स होवाच । याꣳवै तत्प्राच्च्यान्दिश्श्यद्राक्षीः पुरुषैः पुरुषान्पर्व्वाण्ययेषाम्पर्व्वशः संव्व्रश्चम्पर्व्वशो विभजमानानिदन्तवेदम्ममेति व्वनस्पतयो वै ते ऽअभूवन्त्स यद्व्वनस्पतीनाꣳ समिधमादधाति तेन व्वनस्पतीनवरुन्द्धे तेन व्वनस्पतीनाँल्लोकञ्जयति ॥ ८ ॥ अथ यानेतद्दक्षिणायान्दिश्श्यद्राक्षीः । पुरुषैः पुरुषान्पर्व्वाण्ययेषाम्पर्व्वशः सङ्कर्त्तम्पर्व्वशो विभजमानानिदन्तवेदम्ममेति पशवो वै ते ऽअभूवन्त्स यत्पयसा जुहोति तेन पशूनवरुन्द्धे तेन पशूनाँल्लोकञ्जयति ॥ ९ ॥ अथ यानेतत्प्रतीच्च्यान्दिश्श्यद्राक्षीः । पुरुषैः पुरुषाꣳस्तूष्णीमासीनाꣳस्तूष्णीमासीनैरद्यमानानोषधयो वै ता ऽअभूवन्त्स यत्तृणेनाव ज्योतयति तेनौषधीरवरुन्द्धे तेनौषधीनाँल्लोकञ्जयति ॥ १० ॥ अथ यानेतदुदीच्च्यान्दिश्श्यद्राक्षीः । पुरुषैः पुरुषानाक्रन्दुयत ऽआक्रन्दुयद्भिरद्यमानानापो वै ता ऽअभूवन्त्स

(१) 'घ्र' इत्यस्य स्थाने 'द्रा' इति 'ग' 'ज' पुस्तकयोः ।

यदप्यः प्रत्यानयति तेनापोऽवरुन्द्धे तेनापाँल्लोकञ्जयति ॥ ११ ॥ अथ ये ऽएते । स्त्रियावद्राक्षीः कल्याणीश्चाति-कल्याणीश्च सा या कल्याणी सा श्रद्धा स यत्पूर्वा-माहुतिञ्जुहोति तेन श्रद्धामवरुन्द्धे तेन श्रद्धाञ्जयत्यथ याऽतिकल्याणी साऽश्रद्धा स यदुत्तरामाहुतिञ्जुहोति तेनाश्रद्धामवरुन्द्धे तेनाश्रद्धाञ्जयति ॥१२॥ अथ य ऽएने । सोऽन्तरेण पुरुषः कृष्णः पिङ्गाक्षो दण्डपाणिरस्थात्क्रोधो वै सोऽभूत्स यस्त्रुच्यप ऽआनीय निनयति तेन क्रोधमवरुन्द्धे तेन क्रोधञ्जयति स य ऽएवं विद्वान-ग्निहोत्रञ्जुहोति तेन सर्वञ्जयति सर्वमवरुन्द्धे ॥ १३ ॥

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[आख्यायिकयाग्निहोत्राहुतिप्राशस्त्यप्रतिपादनम्]

जनको ह वै वैदेहः । ब्राह्मणैर्द्धावयद्भिः समाजगाम श्वेतकेतुनारुणेयेन सोमशुष्मेण सात्ययज्ञिना याज्ञ-वल्क्येन तान्होवाच कथङ्कथमग्निहोत्रञ्जुहुथेति ॥ १ ॥ स होवाच । श्वेतकेतुरारुणेयो घर्म्मावेव सम्म्राडहमजस्रौ यशसा विष्प्यन्दमानावन्योऽन्यस्मिञ्जुहोमीति कथन्त-दित्यादित्यो वै घर्म्मस्तप्तः सायमग्नौ जुहोम्यग्निर्वै घर्म्म-स्तम्प्रातरादित्ये जुहोमीति किꣳ स भवति य ऽएवञ्जुहोत्य-जस्र ऽएव श्रिश्रया यशसा भवत्येतयोश्च देवतयोः सायुज्यꣳ सलोकताञ्जयतीति ॥ २ ॥ अथ होवाच सोमशुष्मः सात्य-यज्ञिः । तेज ऽएव सम्म्राडहन्तेजसि जुहोमीति कथन्त-

(१) 'विष्यन्द' इति ग' 'ज' पुस्तकयोः ।

दित्यादित्यो वै तेजस्तद्ः सायमग्नौ जुहोम्यग्निर्वै तेजस्तम्प्रातरादित्ये जुहोमीति किꣳ सु भवति य ऽएवञ्जुहोतीति तेजस्वी यशस्व्यन्नादो भवत्येतयोश्चैव देवतयोः सायुज्यꣳ सलोकताञ्जयतीति ॥ ३ ॥ अथ होवाच याज्ञवल्क्यः। यदहमग्निमुद्धराम्यग्निहोत्रमेव तदुद्यच्छाम्यादित्यं वा ऽअस्तं यन्तꣳ सर्वे देवा ऽअनुयन्ति ते म ऽएतमग्निमुद्धृतन्दृष्ट्वोपावर्त्तन्तेऽथाहम्पात्राणि निर्णिज्ज्योपवाप्याग्निहोत्रीन्दोहयित्वा पश्यन्म्पश्यतस्तर्प्पयामीति स्वन्ने दिष्टं ब्याज्ञवल्क्याग्निहोत्रस्यामीमाꣳसिष्टा धेनुशतन्ददामीति होवाच न त्वेवैनयोस्त्वमुत्क्रान्तिन्न गतिन्न प्रतिष्टान्न तृप्तिन्न पुनरावृत्तिन्न लोकम्प्रत्युत्थायिनमित्युक्त्वा रथमास्थाय प्रधावयाञ्चकार ॥ ४ ॥ ते होचुः। अति वै नोऽयꣳ राजन्न्यबन्धुरवादीद्धन्तैनम्ब्रह्मोद्यमाह्वयामहा ऽइति स होवाच याज्ञवल्क्यो ब्राह्मणा वै वयꣳ स्मो राजन्न्यबन्धुरसौ यद्यमुं वयञ्जयेम कमजैष्म्मेति ब्रूयामाथ यद्यसावस्मान्ऽजयेद्ब्राह्मणान्न्राजन्न्यबन्धुरजैषीदिति नो ब्रूयुर्म्मेदमाद्दमिति तद्धास्य जज्ञुरथ ह याज्ञवल्क्यो रथमास्थायानुप्रधावयाञ्चकार तꣳ हान्वाजगाम स होवाचाग्निहोत्रं ब्याज्ञवल्क्य वेदितूꣳमित्यग्निहोत्रꣳ सम्म्राडिति ॥ ५ ॥ ते वा ऽएते ऽआहुती हुते ऽउत्क्रामतः। ते ऽअन्तरिक्षमाविशतस्ते ऽअन्तरिक्षमेवाहवनीयङ्कुर्व्वाते वायुꣳ समिधम्मरीचीरेव शुक्रकामाहुतिन्ते ऽअन्तरिक्षन्तर्प्पयतस्ते तत ऽउत्क्रामतः ॥ ६ ॥ ते दिवमाविशतः। ते दिवमेवा-

हवनीयङ्कुर्व्वाते ऽआदित्यः समिधश्चन्द्रमसमेव शुक्रा-माहुतिन्ते दिवन्तर्प्पयतस्ते तत ऽआवर्त्तेते ॥ ७ ॥ ते ऽइमामाविशतः । ते ऽइमामेवाहवनीयङ्कुर्व्वाते ऽअग्निः समिधमोषधीरेव शुक्रामाहुतिन्ते ऽइमान्तर्प्पयतस्ते तत ऽउत्क्रामतः ॥ ८ ॥ ते पुरुषमाविशतः । तस्य मुखमेवाह-वनीयङ्कुर्व्वाते जिह्वाष्ठं समिधमन्नमेव शुक्रामाहुतिन्ते पुरुषन्तर्प्पयतः स य ऽएवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतम्भवति ते तत ऽउत्क्रामतः ॥९॥ [अर्धः प्रपाठकः ॥५१॥] ते स्त्रियमाविशतः । तस्या ऽउपस्थमेवाहनीयङ्कुर्व्वाते धार-काष्ठं समिधन्धारका ह वै नामैषैतया ह वै प्रजापतिः प्रजा धारयाञ्चकार रेत ऽएव शुक्रामाहुतिन्ते स्त्रियन्तर्प्पयतः स य ऽएवं विद्वाञ्मिथुनमुपैत्यग्निहोत्रमेवास्य हुतम्भवति यस्ततः पुत्रो जायते स लोकः प्रत्युत्थाय्येतदग्निहोत्रं याज्ञवल्क्य नातः परमस्तीति होवाच तस्मै ह याज्ञवल्क्यो वरन्ददौ स होवाच कामप्रश्न ऽएव मे त्वयि याज्ञवल्क्यास दिति ततो ब्रह्मा[1] जनक ऽआस ॥ १० ॥

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥


[आख्यायिकयाऽग्निहोत्रदर्शपूर्णमासादियागदेवतानां तत्त्वतः प्राण-शब्दाभिधेयपरमात्मरूपताप्रतिपादनम्]

जनको ह वैदेहः । बहुदक्षिणेन यज्ञेनेजे स ह गवाꣳ सहस्रमवरुन्धन्नुवाचैता वो ब्राह्मणा यो ब्रह्मिष्ठः स ऽउदजतामिति ॥ १ ॥ स होवाच याज्ञवल्क्यः ।

(१) ब्रह्मिष्ठः ।

गृहेषु पशून्बद्ध्ना ऽइति तेन सुयवसे A यजेत सुयवसे पशून्बद्ध्ना इति जीर्य्यन्ति ह वै जुह्वतो यजमानस्याग्नयोऽग्नीञ्जीर्य्यतोऽनु यजमानो यजमानमनु गृहाश्च पशवश्च ॥ १ ॥ * स यत्पशुबन्धेन यजते। अग्नीनेवैतत्पुनर्णवान्कुरुतेऽग्नीनाम्पुनर्णवतामनु यजमानो यजमानमनु गृहाश्च पशवश्चायुष्यो ह वा ऽअस्यैष ऽआत्मनिष्क्रयणो भवति माꣳसीयन्ति B ह वै जुह्वतो यजमानस्याग्नयस्ते यजमानमेव ध्यायन्ति यजमानः सङ्कल्पयन्ति पचन्ति वा ऽअन्येष्वग्निषु व्वृथा माꣳसमथैतेषान्नातोऽन्या माꣳसाशा विद्यते यस्यो चैते भवन्ति ॥ २ ॥ स यत्पशुबन्धेन यजते। आत्मानमेवैतन्निष्क्रीणीते वीरेण वीरं वीरो हि पशुर्वीरो यजमान ऽएतदु ह वै परममन्नाद्यं व्यन्माꣳसः स परमस्यैवान्नाद्यस्यात्ता भवति तं वै सँवत्सरो नानीजानमतीयादायुर्वै सँवत्सर आयुरेवैतदमृतमात्मन्धत्ते ॥ ३ ॥

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



[पशुबन्धस्येष्टिविधत्वम्, सोमविधत्वञ्च]

हविर्य्यज्ञविधो ह वा ऽअन्यः पशुबन्धः। सवविधोऽन्यः स ह वै हविर्य्यज्ञविधो यस्मिन्नन्व्रतमुपनयति

(A) शोभनानि यवसानि तृणानि यस्मिन्नृतौ स कालः सुयवसः।

* शतम् ५९०० ।

(B) मांसीयन्ति = मांसं खादितुमिच्छन्ति ।

(१) "व्रतोपायन-प्रणीताज्यभाग-भागावदान-पूर्णपात्र-विष्णुक्रमान् कुर्याद्धविर्यज्ञविधे" (का० श्रौ० सू० ६. २. ४)

हवनीयङ्कुर्वाते ऽआदित्यः समिधश्चन्द्रमसमेव शुक्रा-माहुतिन्ते दिवन्तर्प्पयतस्ते तत ऽआवर्त्तेते ॥ ७ ॥ ते ऽइमामाविशतः । ते ऽइमामेवाहवनीयङ्कुर्वाते ऽअग्निः समिधमोषधीरेव शुक्रामाहुतिन्ते ऽइमान्तर्प्पयतस्ते तत ऽउत्क्रामतः ॥ ८ ॥ ते पुरुषमाविशतः । तस्य मुखमेवाह-वनीयङ्कुर्वाते जिह्वाष्ठं समिधमन्नमेव शुक्रामाहुतिन्ते पुरुषन्तर्प्पयतः स य ऽएवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतम्भवति ते तत ऽउत्क्रामतः ॥९॥ [अर्धः प्रपाठकः ॥५१॥] ते स्त्रियमाविशतः । तस्या ऽउपस्थमेवाहनीयङ्कुर्वाते धार-काष्ठं समिधन्धारका ह वै नामैषैतया ह वै प्रजापतिः प्रजा धारयाञ्चकार रेत ऽएव शुक्रामाहुतिन्ते स्त्रियन्तर्प्पयतः स य ऽएवं विद्वाञ्मिथुनमुपैत्यग्निहोत्रमेवास्य हुतम्भवति यस्ततः पुत्रो जायते स लोकः प्रत्युत्थाय्येतदग्निहोत्रं स्याज्ञवल्क्य नातः परमस्तीति होवाच तस्मै ह याज्ञवल्क्यो वरन्ददौ स होवाच कामप्रश्न ऽएव मे स्वयि याज्ञवल्क्यास दिति ततो ब्रह्मा[1] जनक ऽआस ॥ १० ॥

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[आख्यायिकयाऽग्निहोत्रदर्शपूर्णमासादियागदेवतानां तत्त्वतः प्राण-शब्दाभिधेयपरमात्मरूपताप्रतिपादनम्]

जनको ह वैदेहः । बहुदक्षिणेन यज्ञेनेजे स ह गवाꣳ सहस्रमवरुन्धन्नुवाचैता वो ब्राह्मणा यो ब्रह्मिष्ठः स ऽउदजतामिति ॥ १ ॥ स होवाच याज्ञवल्क्यः ।

(१) ब्रह्मिष्ठः ।

गृहेषु पशून्बद्धना ऽइति तेन सुयवसे A यजेत सुयवसे पशून्बद्धना इति जीर्य्यन्ति ह वै जुह्वतो यजमानस्याग्नयोऽग्नीञ्जीर्य्यतोऽनु यजमानो यजमानमनु गृहाश्च पशवश्च ॥ १ ॥ * स यत्पशुबन्धेन यजते। अग्नीनेवैतत्पुनर्णवान्कुरुतेऽग्नीनाम्पुनर्णवतामनु यजमानो यजमानमनु गृहाश्च पशवश्चायुष्यो ह वा ऽअस्यैष ऽआत्मनिष्क्रयणो भवति माꣳसीयन्ति B ह वै जुह्वतो यजमानस्याग्नयस्ते यजमानमेव ध्यायन्ति यजमानः सङ्कल्पयन्ति यचन्ति वा ऽअन्येष्वग्निषु व्वृथा माꣳसमथैतेषान्नातोऽन्या माꣳसाशा विद्यते यस्यो चैते भवन्ति ॥ २ ॥ स यत्पशुबन्धेन यजते। आत्मानमेवैतन्निष्क्रीणीते वीरेण वीरं वीरो हि पशुर्वीरो यजमान ऽएतदु ह वै परममन्नाद्यं व्यन्माꣳसः स परमस्यैवान्नाद्यस्यात्ता भवति तं वै सँवत्सरो नानीजानमतीयादायुर्वै सँवत्सर आयुरेवैतदमृतमात्मन्धत्ते ॥ ३ ॥

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[पशुबन्धस्येष्टिविधत्वम्, सोमविधत्वञ्च]

हविर्य्यज्ञविधो ह वा ऽअन्यः पशुबन्धः। सवविधोऽन्यः स ह वै हविर्य्यज्ञविधो यस्मिन्नन्व्रतमुपनयति

(A) शोभनानि यवसानि तृणानि यस्मिन्नृतौ स कालः सुयवसः।

* शतम् ५९०० ।

(B) मांसीयन्ति = मांसं खादितुमिच्छन्ति ।

(१) "व्रतोपायन-प्रणीताज्यभाग-भागावदान-पूर्णपात्र-विष्णुक्रमान् कुर्याद्धविर्यज्ञविधे" (का० श्रौ० सू० १. २. ४)

यस्मिन्नप्तः प्रणयति यस्मिन्पूर्णपात्रन्निनयति यस्मिन्विष्णुक्रमान्क्रमयत्यथ हैष सर्वविधो यस्मिन्नेतानि न क्रियन्ते ॥ १ ॥ तदाहुः । इष्टिः पशुबन्धा३ महायज्ञा३ ऽइति महायज्ञ ऽइति ह ब्रूयादिष्टिं वै तर्हि पशुबन्धमकृत्व्येनमकृक्षथा ऽइत्येनम्ब्रूयात् ॥ २ ॥ तस्य प्रयाजा ऽएव प्रातःसवनम् । अनुयाजास्तृतीयसवनम्पुरोडाश ऽएव माध्यन्दिनः सवनम् ॥ ३ ॥ तद्धैके । वपायाꣳ हुतायान्दक्षिणा नयन्ति तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयाद्बर्हिर्द्धा इवा ऽअयम्प्राणेभ्यो दक्षिणा ऽअनैषीन्न प्राणानददक्षदन्धो वा स्रामो वा बधिरो वा पक्षहतो वा भविष्यतीतीश्वरो ह तथैव स्यात् ॥ ४ ॥ इत्थमेव कुर्य्यात् । पुरोडाशेडायामेवोपहूतायान्दक्षिणा नयेदैन्द्रो वा ऽअयम्मध्यतः प्राण ऽइममेवैतदैन्द्रम्मध्यतः प्राणन्दक्षिणाभिर्दक्षयत्यैन्द्रं वै माध्यन्दिनः सवनम्माध्यन्दिने वै सवने दक्षिणा नीयन्ते तस्मात्पुरोडाशेडायामेवोपहूतायान्दक्षिणा नयेत् ॥ ५ ॥ तदाहुः । अद्धर्य्यो यदीक्षितस्य नानवभृथोऽवकल्पते क्वैनमदिदीक्ष ऽइत्यावभृथादनूद्दृढंहेयुरद्धर्य्युश्च प्रतिप्रस्थाता च होता च मैत्रावरुणश्च ब्रह्मा चाग्नीद्धश्चैतैर्वा ऽएष षड्ढोता * तमनुद्रुत्य षड्ढोतारञ्जुहोत्येकामाहुतिङ्कृत्वा पञ्च वाज्या 'द्यौष्पृष्टमन्तरिक्षमात्मा भौर्य्यज्म्पृथिवीꣳ शरीरैः । वाचस्पतेऽच्छिद्रया वाचा-

* षड् होतारो होमनिष्पादका यस्मिन् स षड्होता ।

(१) "षड्होतारं पञ्चगृहीतं मनसानुद्रुत्य जुहोत्येकामाहुतिं पञ्च वा" (का० श्रौ० सू० ६. १. ३३)

ङ्करोति वपामवदधाति तदन्तरिक्षस्य रूपङ्करोति हिरण्यशकलमवदधाति तदादित्यस्य रूपङ्करोत्यथ यदुपरिष्टादभिघारयति तद्दिवो रूपङ्करोति सा वा ऽएषा पञ्चावत्ता वपा भवति पाङ्क्तो यज्ञः [A] पाङ्क्तः पशुः [B] पञ्चऽर्त्तवः संवत्सरस्य तस्मात्पञ्चावत्ता वपा भवति ॥ ४ ॥

सप्तमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

[अग्निहोत्रे मह इत्युपस्थानं कर्तव्यनिमित्तं विधातुमाख्यायिका]

तद्यथा ह वै । इदुः रथचक्रं वा कौलालचक्रं वा प्रतिष्ठितङ्क्रन्देदेवः हैवेमे लोका ऽअद्रुवा ऽअप्रतिष्ठिता ऽआसुः ॥ १ ॥ स ह प्रजापतिरीक्षाञ्चक्रे । कथन्विमे लोका द्रुवाः प्रतिष्ठिताः स्युरिति स ऽएभिश्चैव पर्वतैर्नदीभिश्चेमामदृंहद्रुवोभिश्च मरीचिभिश्चान्तरिक्षऔमूतैश्च नक्षत्रैश्च दिवम् ॥ २ ॥ स महऽइति व्याहरत् । पशवो वै महस्तस्माद्यस्यैते बहवो भवन्ति भूयिष्ठमस्य कुले महीयन्ते बहवो ह वा ऽअस्यैते भवन्ति भूयिष्ठः हास्य कुले महीयन्ते तस्माद्यद्येनमायतनाद्बाधेरन्वा प्र वा षापयेयुरग्निहोत्रः हुत्वा महऽइत्युपतिष्ठेत प्रति प्रजया पशुभिस्तिष्ठति नायतनाच्च्यवते ॥ ३ ॥

अष्टमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(A) धानाकरम्भादिपञ्चद्रव्यसाध्यत्वाद्यज्ञः पाङ्क्तः ।
(B) लोमत्वङ्मांसास्थिमज्जाख्यपञ्चधातुमयत्वात्पशुः पाङ्क्तः ।

यस्मिन्नप॒ः प्रण॒यति य॒स्मिन्न्पूर्णपात्र॒न्निन॒यति य॒स्मिन्न्विष्णु॒क्रम॒मान्क्रम॒यत्य॒थ हैष स॒र्वविधो य॒स्मिन्ने॒तानि न॒ विक्रय॒न्ते ॥ १ ॥ त॒दाहु॒ः । इ॒ष्टिः॒ पशुबन्धा३ महायज्ञा३ ऽइति महायज्ञ ऽइति ह ब्रूयादिष्टिं वै त॒र्हि पशुबन्ध॒मकु॒र्व्यन्ने॒नमकृक्षथा ऽइत्ये॒नम्ब्रूयात् ॥ २ ॥ त॒स्य प्रयाजा ऽए॒व प्रातः॒सवन॒म् । अनुयाजा॒स्तृतीयसवन॒म्पुरोडा॒श ऽएव मा॒ध्यन्दि॒नः॒ स॒वनम् ॥ ३ ॥ तद्धै॒के । व॒पाया॑ꣳ हुता॒यान्दु॒क्षिणा नयन्ति त॒दु त॒था न॒ कु॒र्य्याद्यो हैन॒न्तत्र ब्रू॒याद्बर्हिर्द्धा इ॒वा ऽअय॒म्प्राणे॒भ्यो दु॒क्षिणा ऽअनैषी॒न्न प्रा॒णानद॒दक्षदन्धो वा स्रामो वा बधिरो वा पक्षहतो वा भविष्यती॒तीश्वरो ह त॒थैव॒ स्यात् ॥ ४ ॥ इत्थ॒मेव॒ कु॒र्य्यात् । पुरोडाशेडा॒यामे॒वोप॑हूतायान्दु॒क्षिणा नये॒दैन्द्रो वा ऽअय॒म्मद्ध्य॒तः॒ प्राण॒ ऽइ॒म॒मे॒वैत॒दैन्द्र॒म्मद्ध्य॒तः॒ प्राणन्दु॒क्षिणा॒भिर्द॑क्षयत्यै॒न्द्रं वै मा॒ध्यन्दि॒नः॒ स॒वनम्मा॒ध्यन्दि॒ने वै स॒वने दु॒क्षिणा नीय॒न्ते त॒स्मात्पुरोडाशेडा॒यामे॒वोप॑हूतायान्दु॒क्षिणा नये॒त् ॥ ५ ॥ त॒दाहु॒ः । अ॒द्ध॒र्य्यो य॒द्दीक्षि॒त॒स्य॒ नानवभृ॒थोऽवकॢ॒प्यते क्वै॒नमदिदीक्ष ऽइत्यावभृ॒थादनू॒द्गृ॒ः॒हेयु॒रद्ध॒र्य्युश्च॒ प्रतिप्रस्थाता॒ च हो॒ता च मैत्रावरुण॒श्च ब्रह्मा॒ चाग्नी॒द्ध्रश्चै॒तैर्वा ऽएष ष॒ड्ढोता * त॒मनुद्रु॒त्य ष॒ड्ढोता॑रञ्जुहोत्ये॒कामा॒हुतिङ्कृ॒त्वा प॒ञ्च वा॒ज्या द्यौष्पृ॒ष्ठ्मन्त॒रिक्षमात्मा॒ क्षैर्य्यज॒म्पृथिवीꣳ॑ शरीरै॒ः । वा॒चस्प॒ते॒ऽच्छिद्रया वा॒चा-

* षट् होतारो होमनिष्पादका यस्मिन् स षड्होता ।

(१) "षड्होतारं पञ्चगृहीतं मनसानुद्रुत्य जुहोत्येकामाहुतिं पञ्च वा" (का० श्रौ० सू० १. १. १३)

ङ्करोति वपामवदधाति तदन्तरिक्षस्य रूपङ्करोति हिरण्मय-
शकलमवदधाति तदादित्यस्य रूपङ्करोत्यथ यदुपरिष्टा-
दभिघारयति तद्दिवो रूपङ्करोति सा वा ऽएषा पञ्चावत्ता
वपा भवति पाङ्क्तो यज्ञः [A] पाङ्क्तः पशुः [B] पञ्चऽर्त्तवः संव-
त्सरस्य तस्मात्पञ्चावत्ता वपा भवति ॥ ४ ॥

सप्तमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

[अग्निहोत्रे मह इत्युपस्थानं कर्तव्यनिमित्तं विधातुमाख्यायिका]

तद्यथा ह वै । इदꣳ रथचक्रं वा कौलालचक्रं वा प्रतिष्ठितङ्क्रन्ददेवꣳ हैवेमे लोका ऽअद्रुवा ऽअप्रति-
ष्ठिता ऽआसुः ॥ १ ॥ स ह प्रजापतिरीक्षाञ्चक्रे । कथ-
न्विमे लोका द्रुवाः प्रतिष्ठिताः स्युरिति स ऽएभि-
श्चैव पर्वतैर्नदीभिश्चेमामदृꣳहद्रुवोभिश्च मरीचि-
भिश्चान्तरिक्षञ्चीमूतैश्च नक्षत्रैश्च दिवम् ॥ २ ॥ स
मह ऽइति व्याहरत् । पशवो वै महस्तस्माद्यस्यैते
बहवो भवन्ति भूयिष्ठमस्य कुले महीयन्ते बहवो ह वा
ऽअस्यैते भवन्ति भूयिष्ठꣳ हास्य कुले महीयन्ते तस्मा-
द्यद्येनमायतनाद्बाधेरन्वा प्र वा यापयेयुरग्निहोत्रꣳ हुत्वा
मह ऽइत्युपतिष्ठेत प्रति प्रजया पशुभिस्तिष्ठति नाय-
तनाच्च्यवते ॥ ३ ॥

अष्टमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(A) धानाकरम्भादिपञ्चद्रव्यसाध्यत्वाद्यज्ञः पाङ्क्तः ।
(B) लोमत्वक्सांसास्थिमज्जाख्यपञ्चधातुमयत्वात्पशुः पाङ्क्तः ।

[आहितादिभेदेनाग्नेश्चातुर्विध्यम्]

चत्वारो ह वा ऽअग्नयः । आहित ऽउद्धृतः प्रहृतो विहृतोऽयमेव लोक ऽआहितोऽन्तरिक्षलोक ऽउद्धृतो द्यौष्प्रहृतो दिशो विहृतोऽग्निरेवाहितो वायुरुद्धृत ऽआदित्यः प्रहृतश्चन्द्रमा विहृतो गार्हपत्य ऽएवाहित ऽआहवनीय ऽउद्धृतोऽथ यमेतमाहवनीयात्प्राञ्चम्प्रणयन्ति स प्रहृतोऽथ यमेतमुदञ्चम्पशुश्श्रपणायाहुरन्ति यञ्चोपयड्भ्यः स विहृतस्तस्मात्प्रहार्ष्येऽग्नौ पशुबन्धेन यजेत ॥ १ ॥

अष्टमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[पशोः प्रजापतिः सूर्य इन्द्राग्नीति देवतात्रयप्रतिपादनम्]

तदाहुः । किन्देवत्य ऽएष पशुः स्यादिति प्राजापत्यः स्यादित्याहुः प्रजापतिर्वा ऽएतमग्रेऽभ्यपश्यत्तस्मात्प्राजापत्य ऽएवैष पशुः स्यादिति ॥ १ ॥ अथो ऽअप्याहुः । सौर्य ऽएवैष पशुः स्यादिति तस्मादेतस्मिन्नस्तमिते पशवो बद्ध्यन्ते बद्ध्नन्त्येकान्न्यथागोष्ठमेक ऽउपसमायन्ति तस्मात्सौर्य ऽएवैष पशुः स्यादिति ॥ २ ॥ अथो ऽअप्याहुः । ऐन्द्राग्न ऽएवैष पशुः स्यादित्येते वै देवते ऽअन्ववृत्ये देवा यद्यात्तो यजते पारयत ऽएव यदि महसा यजते पारयत ऽएव तस्मादैन्द्राग्न * ऽएवैष पशुः स्यादिति ॥ ३ ॥ प्राण ऽएव पशुबन्धः । तस्माद्यावज्जी-

* "ऐन्द्राग्नः सौर्यः प्राजापत्यो वा यमिच्छेत्" (का० श्रौ० सू० ६. ३. २६)

वति नास्यान्न्यः पशूनामीष्टे बद्धा ह्यस्मिन्नेते भवन्ति ॥४॥ स ह प्रजापतिरग्निमुवाच। यजै त्वया त्वा लभा ऽइति नेति होवाच वायुम्ब्रूहीति स ह वायुमुवाच यजै त्वया त्वा लभा ऽइति नेति होवाच पुरुषम्ब्रूहीति स ह पुरुषमुवाच यजै त्वया त्वा लभा ऽइति नेति होवाच पशून्ब्रूहीति स ह पशूनुवाच यजै युष्माभिरा वो लभा ऽइति नेति होचुश्चन्द्रमसम्ब्रूहीति स ह चन्द्रमसमुवाच यजै त्वया त्वा लभा ऽइति नेति होवाचादित्यम्ब्रूहीति स हादित्यमुवाच यजै त्वया त्वा लभा ऽइति तथेति होवाच य ऽउ त ऽएते नाचीकमन्त किमु म ऽएतेषु स्यादिति यद्यत्कामयेथा ऽइति तथेति तमालभत सोऽस्यायम्पशुरालब्धः संज्ञप्तोऽश्वयत्तमेताभिराप्प्रीभिराप्प्रीणात्तद्यदेनमेताभिराप्प्रीभिराप्प्रीणात्तस्मादाप्प्रियो नाम तस्मादु पशुः संज्ञप्तम्ब्रूयाच्छेतान्नु मुहूर्त्तमिति स यावन्तमश्वमेधेनेष्ट्वा लोकञ्जयति तावन्तमेनेन जयति ॥ ५ ॥ तम्प्राची दिक्। प्राणेत्यनुप्प्राणत्प्राणमेवास्मिँस्तददधात्तन्दक्षिणा दिग्व्यानेत्यनुप्प्राणद्व्यानमेवास्मिँस्तददधात्तम्प्रतीची दिगपानेत्यनुप्प्राणदपानमेवास्मिँस्तददधात्तमुदीची दिगुदानेत्यनुप्प्राणदुदानमेवास्मिँस्तददधात्तमूर्द्धा दिक्समानेत्यनुप्प्राणत्समानमेवास्मिँस्तददधात्तस्मादु पुत्रञ्जातमकृत्तनाभिम्प्रश्नब्राह्मणान्ब्रूयादित्येनमनुप्प्राणितेति * यद्यु तान्न विन्देदपि

(१) 'ते' इति 'ग' 'ज' पुस्तकयोः।

* पा० गृ० सू० १. १६. १०।

स्वयमेवानुपरिक्रामममनुप्राण्यात्स सर्वमायुरेत्या हैव जरायै जीवति ॥ ६ ॥ स प्राणमेवाग्नेरादत्त । तस्मादेष नानुपदह्यमातो नानुपज्वलितो ज्वलत्यात्तो ह्यस्य प्राण ऽआ ह वै द्विषतो ब्भ्रातृव्यस्य प्राणन्दत्ते य ऽएवं वेद ॥ ७ ॥ रूपमेव वायोरादत्त । तस्मादेतस्य लेलयत ऽइवैवोपश्रृण्वन्ति न त्वेनम्पश्यन्त्यात्तꣳ ह्यस्य रूपमा ह वै द्विषतो ब्भ्रातृव्यस्य रूपन्दत्ते य ऽएवं वेद ॥ ८ ॥ चित्तमेव पुरुषस्यादत्त । तस्मादाहुर्देवचित्तन्त्वावतु मा मनुष्यचित्तमित्यात्तꣳ ह्यस्य चित्तमा ह वै द्विषतोब्भ्रातृव्यस्य चित्तन्दत्ते य ऽएवं वेद ॥ ९ ॥ चक्षुरेव पशूनामादत्त । तस्मादेते चाकश्यमाना ऽइवैव न जानन्त्यथ यदैवोपजिघ्रन्त्यथ जानन्त्यात्तꣳ ह्येषाञ्चक्षुरा ह वै द्विषतो ब्भ्रातृव्यस्य चक्षुर्दत्ते य ऽएवं वेद ॥ १० ॥ भामेव चन्द्रमस ऽआदत्त । तस्मादेतयोः सदृशयोः सतोर्न्नतराञ्चन्द्रमा भात्यात्ता ह्यस्य भा ऽआ ह वै द्विषतो ब्भ्रातृव्यस्य भान्दत्ते य ऽएवं वेद तद्यदादत्त तस्मादादित्यः ॥ ११ ॥

अष्टमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[पशुप्रायश्चित्ततया स्फ्त्याख्यहोमविधानम्]

केशिगृहपतीनामु ह । सम्म्राड्दुघाꣳ शार्दूलो जघान स ह ससत्रिण आमन्त्रयाञ्चक्रे केह प्रायश्चित्तिरिति ते होचुर्न्नेह प्रायश्चित्तिरस्ति खण्डिक ऽएवौद्गारिरस्य

प्रायश्चित्तिं वेद स ऽउ त ऽएतादृक्चैव कामयतेऽतश्च पापीय ऽइति ॥ १ ॥ स होवाच । सङ्गृहीतर्ष्युङ्गधि मे स्यन्त्स्यामि स यद्यह मे वक्ष्यति समाप्स्यामि यद्यु मा मारयिष्यति यज्ञं विकृष्टमनु विक्रक्ष्य ऽइति ॥ २ ॥ स ह युक्त्वा ययावाजगाम । तꣳ ह प्रतिख्यायोवाच यन्वे-तान्येवाजिनानि मृगेषु भवन्त्यथैषाम्पृष्टीरपिशीर्ष्य पचामहे कृष्णाजिनम्मे ग्रीवास्वाबद्धमित्येव मेदुमधृषोऽभ्यव-स्यन्तू३ मिति ॥ ३ ॥ नेति होवाच । सम्म्राड्दुघां* वै मे भगवः शार्दूलोऽवधीत्स यद्यह मे वक्ष्यसि समाप्स्यामि यद्यु मा मारयिष्यसि यज्ञं विकृष्टमनु विक्रक्ष्य ऽइति ॥ ४ ॥ स होवाच । आमन्त्रणीयान्वामन्त्रया ऽइति तान्ह्यामन्त्र्योवाच यद्यस्मै वक्ष्याम्यमुष्यैवेदम्प्रजा भविष्यति न मम लोकी त्वहम्भविष्यामि यद्यु वा ऽअस्मै न वक्ष्यामि ममैवेदम्प्रजा भविष्यति नामुष्य लोकी त्वसौ भविष्यतीति ते होचुर्म्मा भगवो वोच्चोऽयं वाव क्षत्रियस्य लोक ऽइति स होवाच वक्ष्याम्येवामूवै राज्ञयो भूयस्य ऽइति ॥ ५ ॥ तस्मा ऽउ हैतदुवाच । स्पृतीर्हुत्वान्न्यामाजतेति ब्रूतात्सा ते सम्म्राड्दुघा स्यादिति चन्द्रात्ते मन स्पृणोमि स्वाहा सूर्य्यात्ते चक्षु स्पृणोमि स्वाहा वातात्ते प्राणान्त्स्पृणोमि स्वाहा दिग्भ्यस्ते श्रोत्रꣳ स्पृणोमि स्वाहाद्भ्यस्ते लोहितꣳ स्पृणोमि स्वाहा पृथिव्यै ते शरीरꣳ स्पृणोमि स्वाहेत्यथान्न्यामाजतेति

* प्रवर्ग्यदोहनार्था ग्रामित्यर्थः ।


ब्रूतात्सा ते सम्म्राड्दुघा स्यादिति ततो हैव स ऽउत्स-
साद कैशिनीरेवेमा ऽअप्प्येतर्हि प्रजा जायन्ते ॥ ६ ॥

अष्टमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या॥१०२॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

अष्टाध्यायीनामैकादशं काण्डं समाप्तम्* ॥ ११ ॥



* अस्मिन्काण्डे कण्डिकासंख्या ॥ ४३७ ॥

अथ मध्यमनाम द्वादशं काण्डम्

[अस्मिन्काण्डे प्रतिपाद्या विषयाः—दीक्षाक्रमः, सत्राणि, पृष्ठ्याऽभिप्लवसाम—विषुवन्महाव्रतादिनिरूपणम्' गवामयनम्, अग्निहोत्रप्रायश्चित्तम्, मृतकाग्निहोत्रम्, मृतस्यदाहः]

[द्वादशाहे* दीक्षाक्रमः]

॥ ॐ ॥ अयं वै यज्ञो योऽयम्पवते। तमेत ऽईप्सन्ति ये सँवत्सराय दीक्षन्ते तेषाङ्गृहपतिः प्रथमो दीक्षतेऽयं वै लोको गृहपतिरस्मिन्नेव लोक ऽइदꣳ सर्वम्प्रतिष्ठितङ्गृहपता ऽउ वै ससत्रिणः प्रतिष्ठिताः प्रतिष्ठायामेवैतत्प्रतिष्ठाय दीक्षन्ते ॥ १ ॥ अथ ब्रह्माणन्दीक्षयति। चन्द्रमा वै ब्रह्मा सोमो वै चन्द्रमाः सौम्या ऽओषधय ऽओषधीस्तदनेन लोकेन सन्दधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेतौषधीस्तदनेन लोकेन नानाकुर्य्यादुच्छोषुका ह स्युस्तस्मादेता-

---

* द्वादशाहो द्विविधः सत्रात्मकोऽहीनात्मकश्चेति। तयोर्लक्षणं यथा—'आसत उपयन्तीति सत्रलिङ्गं यजत इत्यहीनस्य' (का० श्रौ० सू० १२ १. ५) इति। यस्य उत्पत्तिवाक्ये आस धातुः, उपोपसृष्ट इण् धातुर्वा श्रूयते तत् सत्रम्। यथा—'द्वादशाहमृद्धिकामा उपेयुः' 'देवा ह वै सत्रमासत' इति। यजधातुघटितवाक्यविहितत्वमहीनत्वम्। यथा—'द्वादशाहेन प्रजाकामं याजयेत्' इति।

लक्षणान्तरञ्च—'उभयतोऽतिरात्रे सत्रमुपरिष्टादहीनस्य' (का० सू० १२. १ ६) इति।

अत्र सत्रे अहीने वा योऽहःशब्दो रात्रिशब्दो वा श्रूयते स सर्वोऽप्यहोरात्रसमुदायवाचकः। तेन द्वादशरात्रो द्वादशाह इति समानार्थक एव।

(१) का० श्रौ० सू० १२. २. १५।

वन्तरेणान्यो न दीक्षेत ॥ २ ॥ अथोद्गातारन्दीक्षयति । पर्जन्यो वा ऽउद्गाता पर्जन्यादु वै व्वृष्टिर्जायते व्वृष्टिन्तद्दोषधिभिः सन्दधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेत व्वृष्टिन्तद्दोषधिभिर्नानाकुर्य्यादुवर्षुको ह स्यात्तस्मादेतावन्तरेणान्यो न दीक्षेत ॥ ३ ॥ अथ होतारन्दीक्षयति । अग्निर्वै होताधिदेवतं वागच्यात्ममन्नं व्वृष्टिरग्निश्च तद्वाचश्चान्नेन सन्दधाति तस्मादेतावन्तरेणाग्न्यो न दीक्षेत स यद्धैतावन्तरेणाग्न्यो दीक्षेताग्निश्च तद्वाचश्चान्नेन नानाकुर्य्यादशनायुका ह स्युस्तस्मादेतावन्तरेणान्यो न दीक्षेतैताँश्चतुरोऽद्धर्युर्दीक्षयति ॥ ४ ॥ अथाद्धर्युम्प्रतिप्प्रस्थाता[2] दीक्षयति । मनो वा ऽअद्धर्युर्वाग्घोता मनश्च तद्वाचश्च सन्दधाति तस्मादेतावन्तरेणान्यो न दीक्षेत स यद्धैतावन्तरेणान्यो दीक्षेत मनश्च तद्वाचश्च नानाकुर्य्याःप्रमायुका ह स्युस्तस्मादेतावन्तरेणान्यो न दीक्षेत ॥ ५ ॥ अथ ब्रह्मणे ब्राह्मणाच्छꣳसिनन्दीक्षयति । तद्ध हि सोऽन्वथोद्गात्रे प्प्रस्तोतारन्दीक्षयति तद्ध हि सोऽन्वथ होत्रे मैत्रावरुणन्दीक्षयति तद्ध हि सोऽन्वेताँश्चतुरः प्रतिप्प्रस्थाता दीक्षयति ॥ ६ ॥ अथाद्धर्य्वे प्प्रतिप्प्रस्थातारेन्नष्टा[3] दीक्षयति । तद्ध हि सोऽन्वेतेषां वै नवानाङ्क्लृप्तिमन्वितरे कल्प्यन्ते नव वै प्राणाः प्राणानेवैष्वेतद्दधाति तथा सर्वमायुर्य्यन्ति तथो ह न पुरायुषोऽ-

(१) 'ग' 'ज' पुस्तकयोः 'तदोषधिभ्यः' इति पाठ उपलभ्यते ।

(२) का० श्रौ० सू० १२. २. १६ । (३) का० श्रौ० सू० १२. २. १७ ।

स्म्माल्लोकात्प्रयन्ति ॥ ७ ॥ अथ ब्रह्मणे पोतारन्दीक्षयति । तद्ध हि सोऽन्ववथोद्गात्रे प्रतिहर्त्तारन्दीक्षयति तद्ध हि सोऽन्ववथ होत्रेऽच्छावाकन्दीक्षयति तद्ध हि सोऽन्वेताँश्चतुरो नेष्ट्रा दीक्षयति ॥ ८ ॥ अथाद्ध्वर्य्वे नेष्टारमुन्नेता दीक्षयति । तद्ध हि सोऽन्ववथ ब्रह्मण ऽआग्नीध्रन्दीक्षयति तद्ध हि सोऽन्ववथोद्गात्रे सुब्रह्मण्या-न्दीक्षयति तद्ध हि सोऽन्ववथ होत्रे ग्रावस्तुतन्दीक्षयति तद्ध हि सोऽन्वेताँश्चतुर ऽउन्नेता दीक्षयति ॥ ९ ॥ अथोन्नेतारम् । स्नातको वा ब्रह्मचारी वान्यो वा दीक्षितो दीक्षयति न पूतः पावयेदिति ह्याहुः सैषानुपूर्व्वदीक्षा स यत्र हैवं विद्वाꣳसो दीक्षन्ते दीक्षमाणा हैव ते यज्ञ-ङ्कल्पयन्ति यज्ञस्य क्लृप्तिमनु सत्रिणां स्योगक्षेमः कल्पते सत्रिणां स्योगक्षेमस्य क्लृप्तिमन्वपि तस्यार्द्धस्य योगक्षेमः कल्पते यस्मिन्नर्द्धे यजन्ते ॥ १० ॥ तेषां वा ऽउन्नेतोत्तमो दीक्षते । प्रथमोऽवभृथादुदयतामुदैति प्राणो वा ऽउन्नेता प्राणमेवैष्वेतदुभयतो दधाति तथा सर्व्वमायुर्य्यन्ति तथो ह न पुरायुषोऽस्म्माल्लोकात्प्र-यन्ति सैषानुपूर्व्वदीक्षा स यत्र हैवं विद्वाꣳसो दीक्षेरँ-स्तदेव दीक्षेत ॥ ११ ॥

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



(१) का० श्रौ० सू० १२, २. १८ । (२) का० श्रौ० सू० १२. २. १९ ।

[द्वादशाहस्याहःकल्पनिः]

श्रद्धाया वै देवाः । दीक्षान्निरमिमतादित्यै प्राय-णीयः * सोमाक्रयं विष्णोरातित्थ्यमादित्याप्रवर्ग्यꣳ स्वधाया ऽउपसदोऽग्नीषोमाभ्यामुपवसथमस्माल्लोकात्प्रा-यणीयमतिरात्रम् ॥ १ ॥ सँवत्सराच्चतुर्विꣳशमहः । ब्रह्म-णोऽभिप्लवड्क्षत्रात्पृष्ठ्यमग्नेरभिजितमद्भ्यः स्वरसाम्न ऽआदित्याद्विषुवन्तमुक्ताः स्वरसामान † ऽइन्द्राद्विश्वजि-तमुक्तौ पृष्ठ्याभिप्लवौ ‡ मित्रावरुणाभ्याङ्गोऽआयुषी वि-श्वेभ्यो देवेभ्यो दशरात्रन्दिग्भ्यो द्वाशरात्रिकम्पृष्ठ्यः षडहमेभ्यो लोकेभ्यश्छन्दोमान् ॥ २ ॥ सँवत्सरादशम-महः । प्रजापतेर्म्महाव्रतꣳ § स्वर्गाल्लोकादुदयनीयमति-रात्रन्तदेतत्सँवत्सरस्य जन्म स यो हैवमेतत्सँवत्सरस्य जन्म वेदा हास्माच्छ्रेयाञ्जायते सात्मा भवति सँवत्सरो भवति सँवत्सरो भूत्वा देवानप्येति ॥ ३ ॥

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[उक्ताहःकल्प्यर्थवादः]

यद्वै दीक्षन्ते । अग्नाविष्णू ऽएव देवते यजन्तेऽ-ग्नाविष्णू देवते भवन्त्यग्नाविष्णवोः सायुज्यः सलोक-

* प्रकृष्टमयनमारम्भो यत्रेति व्युत्पत्त्या प्रायणीयशब्दो द्वादशाहस्य प्रथमदिनवाचकः ।

† "यज्ञा यज्ञा" (४. ८. १) इत्यस्यां योनावुत्पन्नानि चत्वारि स्वरसंज्ञकानि सामानि येषु ते स्वरसामानः । ‡ प्रथमोऽग्निष्टोमः ततश्चत्वार उक्थ्याः, पुन. षष्ठोऽग्निष्टोम , एवं विधस्याह्नः षट्कस्य अभिप्लव इति संज्ञा (तै० सं० सा० ७. ४. ११. १७, ऐ० ब्रा० ४. ३१ ।

§ महाव्रतं यज्ञस्यान्तिममहः । महानवर्तिष्ट अनेन कर्मणा इति महाव्रतम् (तै० ब्रा० सा० भा० १. २. ६) ।

ताञ्जयन्ति ॥ १ ॥ अथ यत्प्रायणीयेन यजन्ते । अदितिमेव देवतां ऋजन्तेऽदितिर्देवता भवन्त्यदितेः सायुज्यः सलोकताञ्जयन्ति ॥ २ ॥ अथ यत्क्रयेण चरन्ति । सोममेव देवतां ऋजन्ते सोमो देवता भवन्ति सोमस्य सायुज्यः सलोकताञ्जयन्ति ॥ ३ ॥ अथ यदातित्थ्येन यजन्ते । विष्णुमेव देवतां ऋजन्ते विष्णुर्देवता भवन्ति विष्णोः सायुज्यः सलोकताञ्जयन्ति ॥ ४ ॥ अथ यत्प्रवर्ग्येण यजन्ते । आदित्यमेव देवतां ऋजन्त ऽआदित्यो देवता भवन्त्यादित्यस्य सायुज्यः सलोकताञ्जयन्ति ॥ ५ ॥ अथ यदुपसद ऽउपयन्ति । एता ऽएव देवता यजन्ते या ऽएता ऽउपसत्स्वेता देवता भवन्त्येतासान्देवतानाꣳ सायुज्यः सलोकताञ्जयन्ति ॥ ६ ॥ अथ यदग्नीषोमीयेण पशुना यजन्ते । अग्नीषोमावेव देवते यजन्तेऽग्नीषोमौ देवते भवन्त्यग्नीषोमयोः सायुज्यः सलोकताञ्जयन्ति ॥ ७ ॥ अथ यत्प्रायणीयमतिरात्रमुपयन्ति । अहोरात्रे ऽएव देवते यजन्तेऽहोरात्रे देवते भवन्त्यहोरात्रयोः सायुज्यः सलोकताञ्जयन्ति ॥ ८ ॥ अथ यच्चतुर्विꣳशमहरुपयन्ति । सँवत्सरमेव देवतां ऋजन्ते सँवत्सरो देवता भवन्ति सँवत्सरस्य सायुज्यः सलोकताञ्जयन्ति ॥ ९ ॥ अथ यदभिप्लवः षडहमुपयन्ति । अर्द्धमासाँश्च मासाँश्च देवता यजन्तेऽर्द्धमासाश्च मासाश्च देवता भवन्त्यर्द्धमासानाञ्च मासानाञ्च सायुज्यः सलोकताञ्जयन्ति ॥ १० ॥ अथ यत्पृष्ठ्यः षडहमुपयन्ति ।

ऋतूनेव देवता यजन्त ऽऋतवो देवता भवन्त्यृतूनाꣳ सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ ११ ॥ अथ यदभिजितमुपयन्ति । अग्निमेव देवतां स्यजन्तेऽग्निर्देवता भवन्त्यग्नेः सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १२ ॥ अथ यत्स्वरसाम्न ऽउपयन्ति । अप ऽएव देवता यजन्त ऽआपो देवता भवन्त्यपाꣳ सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १३ ॥ अथ यद्विषुवन्तमुपयन्ति । आदित्यमेव देवतां स्यजन्त ऽआदित्यो देवता भवन्त्यादित्यस्य सायुज्यꣳ सलोकताꣳ श्नयन्त्युक्ताः स्वरसामानः ॥ १४ ॥ अथ यद्विश्वजितमुपयन्ति । इन्द्रमेव देवतां स्यजन्त ऽइन्द्रो देवता भवन्तीन्द्रस्य सायुज्यꣳ सलोकताꣳ श्नयन्त्युक्तौ पृष्ठ्याभिप्लवौ ॥ १५ ॥ अथ यद्गोऽआयुषी ऽउपयन्ति । मित्रावरुणावेव देवते यजन्ते मित्रावरुणौ देवते भवन्ति मित्रावरुणयोः सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १६ ॥ अथ यद्दशरात्रमुपयन्ति । विश्वानेव देवान्देवता * यजन्ते विश्वे देवा देवता भवन्ति विश्वेषान्देवानाꣳ सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १७ ॥ अथ यद्दाशरात्रिकम्पृष्ठ्यꣳ षडहमुपयन्ति । दिश ऽएव देवता यजन्ते दिशो देवता भवन्ति दिशाꣳ सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १८ ॥ अथ यच्छन्दोमानुपयन्ति । इमानेव लोकान्देवता यजन्त ऽइमे लोका देवता भवन्त्येषाँल्लोकानाꣳ सायुज्यꣳ सलोकताꣳ श्नयन्ति ॥ १९ ॥ अथ यद्दशममहरुपयन्ति । सँवत्सरमेव देवतां स्यजन्ते

* 'ग' 'ज' पुस्तकयोः 'देवतां' इति पाठ उपलभ्यते ।

सँवत्सरो देवता भवन्ति सँवत्सरस्य सायुज्यꣳ सलोकता-ञ्जयन्ति ॥ २० ॥ अथ यज्ञमहाव्रतमुपयन्ति । प्रजापतिमेव देवतां यजन्ते प्रजापतिर्देवता भवन्ति प्रजापतेः सायुज्यꣳ सलोकताञ्जयन्ति ॥ २१ ॥ अथ यदुदयनीयमतिरात्रमुपयन्ति । सँवत्सरमेव तदाप्त्वा स्वर्गे लोके प्रतितिष्ठन्ति तान्यदि पृच्छेयुः कामयध्वं देवतां यजद्धे का देवता स्थ कस्यान्देवतायां वसथेत्यत ऽएवैकतमाम्ब्रूयुर्यस्यै तु नेदिष्टꣳ स्युरेते ह वै सति सद ऽएते हि सतीषु देवतासु सीदन्तो यन्ति सत्रसदो हैवेतरे सयो हैवं विदुषान्दीक्षितानाम्पापकꣳ सत्रे कीर्त्तयेदेताब्भ्यस्त्वा देवताभ्य ऽआवृश्चाम ऽइत्येनम्ब्रूयुः स पापीयान्भवति श्रेयाꣳस ऽआत्मना ॥ २२ ॥ स ऽएष सँवत्सरस्त्रिमहाव्रतः । चतुर्विꣳशे महाव्रतं विषुवति महाव्रतम्महाव्रत ऽएव महाव्रतन्तꣳ ह स्मैतम्पूर्व्व ऽउपयन्ति त्रिमहाव्रतन्ते तेजस्विन ऽआसुः सत्यवादिनः सꣳशितव्रता ऽअथ य ऽउ हैनमप्येतर्हि तथोपेयुर्यथामपात्रमुदक ऽआसिक्ते विम्भित्त्येदेवꣳ हैव ते विम्भित्त्येयुरुपर्य्युपयन्ति तदेषाꣳ सत्येन श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिरवरुद्धम्भवति ॥ २३ ॥

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

१ 'ग' 'ज' पुस्तकयोः 'ते' इति ।

[द्वादशाहस्य संवत्सरात्मना स्तुतिः]

पुरुषो वै सँवत्सरः । तस्य पादावेव प्रायणीयोऽतिरात्रः पादाभ्याꣳ हि प्रयन्ति तयोर्यच्छुक्लन्तदुह्नो रूपं यत्कृष्णन्तद्रात्रेर्नक्षत्राण्येवौषधिवनस्पतीनाꣳ रूपमूरू चतुर्विꣳशमहरुरोऽभिप्लवः पृष्ठम्पृष्ठ्यः ॥ १ ॥ अयमेव दक्षिणो बाहुरभिजित् । इम ऽएव दक्षिणे त्रयः प्राणाः स्वरसामानो मूर्द्धा विषुवानिम ऽएवोत्तरे त्रयः प्राणाः स्वरसामानः ॥ २ ॥ अयमेवोत्तरो बाहुर्विश्वजित् । उक्तौ पृष्ठ्याभिप्लवौ यावश्वौ प्राणौ ते गोऽआयुषी ऽअङ्गानि दशरात्रो मुखम्महाव्रतः हस्तावेवोदयनीयोऽतिरात्रो हस्ताभ्याꣳ हुयन्ति तयोर्यच्छुक्लन्तदुह्नो रूपं यत्कृष्णन्तद्रात्रेर्नक्षत्राण्येव नक्षत्राणाꣳ रूपꣳ स ऽएष सँवत्सरोऽध्यात्मम्प्रतिष्ठितः स यो हैवमेतꣳ सँवत्सरमध्यात्मम्प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥ ३ ॥

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

[संवत्सरसत्रस्याहःक्लृप्तिर्ब्राह्मणद्वयेन]

समुद्रं वा ऽएते प्रतरन्ति । ये सँवत्सराय दीक्षन्ते तस्य तीर्थमेव प्रायणीयोऽतिरात्रस्तीर्थेन हि प्रस्रान्ति तद्यत्प्रायणीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रम्प्रस्रायुस्तादृक्तत् ॥ १ ॥ गाधमेव प्रतिष्ठा चतुर्विꣳशमहः ।

यथोपपक्षदग्नं वा कण्ठदग्नं वा यतो विश्श्रम्य प्रस्नान्ति प्रस्नेयोऽभिप्लवः प्रस्नेयः पृष्ठ्यः ॥ २ ॥ गाधमेव प्रतिष्ठाभिजित् । यथोपपक्षदग्नं वा कण्ठदग्नं वा यतो विश्श्रम्योत्क्रामन्त्यूरुदग्न ऽएव प्रथमः स्वरसामा जानुदग्नो द्वितीयः कुल्फदग्नस्तृतीयो द्वीपः प्रतिष्ठा विषुवान्कुल्फदग्न ऽएव प्रथमोऽर्वाक्सामा जानुदग्नो द्वितीय ऽऊरुदग्नस्तृतीयः ॥ ३ ॥ गाधमेव प्रतिष्ठा विश्श्वजित् । यथोपपक्षदग्नं वा कण्ठदग्नं वा यतो विश्श्रम्य प्रस्नान्ति प्रस्नेयः पृष्ठ्यः प्रस्नेयोऽभिप्लवः प्रस्नेये गोऽआयुषी प्रस्नेयो दशरात्रः ॥ ४ ॥ गाधमेव प्रतिष्ठामहाव्रतम् । यथोपपक्षदग्नं वा कण्ठदग्नं वा यतो विश्श्रम्योत्स्नान्ति तीर्थमेवोदयनीयोऽतिरात्रस्तीर्थेन ह्युत्स्नान्ति तद्यदुदयनीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रम्प्रस्नाय तीर्थेनोत्स्नायुस्तादृक्तत् ॥ ५ ॥ तदाहुः । कति सँवत्सरस्यातिरात्राः कत्यग्निष्टोमाः कत्युक्थ्याः कति षोडशिनः कति षडहा ऽइति द्वावतिरात्रौ षट्शतमग्निष्टोमा द्वे चत्वारिꣳशे शते ऽउक्थ्यानामिति नु ष ऽउक्थ्यान्त्स्वरसाम्न ऽउपयन्ति ॥ ६ ॥ अथ येऽग्निष्टोमान् । द्वादशशतमग्निष्टोमा द्वे चतुस्त्रिꣳशे शते ऽउक्थ्यानान्द्वादश षोडशिनः षष्टिः षडहा ऽइति नु सँवत्सरस्याप्तिः ॥ ७ ॥ द्वादश वै मासाः सँवत्सरस्य । तेषामेतत्तेज ऽइन्द्रियं यत्पृष्ठ्यानि तद्यन्मासि मासि पृष्ठ्यान्युपयन्ति मासश ऽएव तत्सँवत्सरस्य तेज ऽआप्नु-

वन्त्यथ कथन्त्रयोदशस्य मासस्य तेज ऽआप्नुवन्तीत्युप-रिष्टाद्विषुवतो विश्श्वजितः सर्वपृष्टमग्निष्टोममुपयन्त्ये-वमु त्रयोदशस्य मासस्य तेज ऽआप्नुवन्ति ॥ ८ ॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः सँवत्सराय न्त्वा ऽअहन्दीक्षिष्ष्य ऽइति तꣳ ह पितोपेक्ष्योवाच वेत्थ न्वायुष्मन्तसँवत्सरस्य गाधप्रतिष्ठा ऽइति वेदेति होवाचैतद्ध तद्विद्वानुवाच ॥ ९ ॥

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

तदाहुः । कस्मादुभयतोज्योतिषोऽभिप्लवा भव-न्त्यन्यतोज्योतिः पृष्ठ्य ऽइतीमे वै लोका ऽअभिप्लवा ऽउभयतोज्योतिषो वा ऽइमे लोका ऽअग्निनेत ऽआदि-त्येनामुत ऽऋतवः पृष्ठ्योऽन्यतोज्योतिषो वा ऽऋतव ऽएष ऽएषाज्ज्योतिर्य्य ऽएष तपति ॥ १ ॥ देवचक्रे वा ऽएते पृष्ठ्यप्रतिष्ठिते । यजमानस्य पाप्मानन्तृꣳहती परिप्लवेते स यो हैवं विदुषान्दीक्षितानाम्पापकꣳ सत्रे कीर्त्तयत्येते हास्य देवचक्रे शिरश्छिन्तो दशरात्र ऽउद्धिः पृष्ठ्याभिप्लवौ चक्रे ॥ २ ॥ तदाहुः । यत्तसमे ऽएव चक्रे भवतोऽथैते विषमा स्तोमाः कथमस्यैते समा स्तोमा ऽउपेता भवन्तीति यदेव षडन्न्यान्न्यहानि षडन्न्यानि तेनेति ब्रूयात् ॥ ३ ॥ पृष्ठ्याभिप्लवौ तन्त्रे कुर्वी-तेति ह स्माह पैङ्ग्यः । त्रयो स्तोत्राणि च शस्त्राणि च सञ्चारयेदिति स यत्तसञ्चारयति तस्मादिमे प्राणा

नाना सन्त ऽएकोतयः समानमूतिमनुसञ्चरन्त्यथ यन्न सञ्चारयेत्प्रमायुको यजमानः स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा ॥ ४ ॥ नवाग्निष्टोमा मासि सम्पद्यन्ते । नव वै प्राणाः प्राणानेवैष्वेतद्दधाति तथा सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्म्माल्लोकात्प्रयन्ति ॥५॥ एकविꣳशतिरुक्थ्याः । द्वादश वै मासाः सँवत्सरस्य पञ्चर्त्तवस्त्रयो लोकास्तद्विꣳशतिरेष ऽएवैकविꣳशो य ऽएष तपत्येतामभिसम्पदꣳ स ऽएतया सम्पदा मासि मासि स्वर्गꣳल्लोकꣳ रोहति मासशः स्वर्गꣳल्लोकꣳ समश्नुत ऽएकविꣳशश्च स्तोमम्बृहतीश्च च्छन्दः ॥ ६ ॥ चतुस्त्रिꣳशदग्निष्टोमा मासि सम्पद्यन्ते । त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशः सर्वासान्देवतानामाप्त्या ऽएक ऽउक्थ्यः षोडशिमान्नं वा ऽउक्थ्यो वीर्य्यꣳ षोडशी ॥ ७ ॥ एतेन वै देवाः । वीर्य्येणान्नेन सर्वान्न्कामानाप्नुवन्त्सर्वान्न्कामानाश्नुवत तथो ऽएवैष ऽएतेन वीर्य्येणान्नेन सर्वान्न्कामानाप्नोति सर्वान्न्कामानश्नुते तस्म्मात्पृष्ठ्याभिप्लवा ऽउपैवेयात्सँवत्सराय दीक्षित ऽएतस्म्मै कामाय ॥ ८ ॥ अथादित्याश्च ह वा ऽआङ्गिरसश्च । उभये प्राजापत्या ऽअस्पर्द्धन्त वयम्पूर्वे स्वर्गꣳल्लोकमेष्याम वयम्पूर्व ऽइति ॥ ९ ॥ त ऽआदित्याः । चतुर्भिः स्तोमैश्चतुर्भिः पृष्टैर्ल्लघुभिः सामभिः स्वर्गꣳल्लोकमभ्यप्लवन्त यदभ्यप्लवन्त तस्मादभिप्लवाः ॥ १० ॥ अन्वञ्च ऽइवाङ्गिरसः । सर्वैः स्तोमैः सर्वैः पृष्टैर्गुरुभिः सामभिः

स्वर्गꣳलोकमस्पृशन्न्यदुस्पृशँस्तस्मात्पृष्ठ्यः ॥ ११ ॥ अभिप्लवः षडहः । षड्ढ्यहानि भवन्त्यभिप्लवः पञ्चाहः पञ्च ह्यहानि भवन्ति षड्ढ्येव प्रथममहस्तदुत्तममभिप्लवश्चतुरहश्चत्वारो हि स्तोमा भवन्ति त्रिवृत्पञ्चदशः सप्तदश एकविꣳश इत्यभिप्लवस्त्र्यहस्त्र्यावृद्धि ज्योतिर्गौरायुरभिप्लवो द्व्यहो द्वे ह्येव सामनी भवतो बृहद्रथन्तरे एवाभिप्लव एकाह एकाहस्यो हि स्तोमैस्तायते चतुर्ण्णामुक्थ्यानान्द्वादश स्तोत्राणि द्वादश शस्त्राण्यतियन्ति स सप्तमोऽग्निष्टोम एवमु सप्ताग्निष्टोमाः सम्पद्यन्ते ॥ १२ ॥ प्रोतिर्ह कौशाम्बेयः । कौसुरुविन्दिरुद्दालक आरुणौ ब्रह्मचर्य्यमुवास तꣳ हाचार्य्यः पप्रच्छ कुमार कति ते पिता सँवत्सरस्याहान्यमन्यतेति ॥ १३ ॥* दशेति होवाच । दश वा इति होवाच दशाक्षरा विराड्विराजो यज्ञः ॥ १४ ॥ कति त्वेवेति । नवेति होवाच नव वा इति होवाच नव वै प्राणाः प्राणैरु यज्ञस्तायते ॥ १५ ॥ कति त्वेवेति । अष्टेति होवाचाष्टौ वा इति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञः ॥ १६ ॥ कति त्वेवेति । सप्तेति होवाच सप्त वा इति होवाच सप्त च्छन्दाꣳसि चतुरुत्तराणि च्छन्दोभिरु यज्ञस्तायते ॥ १७ ॥ [अर्धः प्रपाठकः ६६] कति त्वेवेति । षडिति होवाच षड्वा इति होवाच षडृतवः सँवत्सरः सँवत्सरो यज्ञः समानमेतदुहर्ष्वत्प्रायणीयोदयनीयौ ॥ १८ ॥ कति त्वेवेति ।

* अत्र शतम् ६००० ।

पञ्चेति होवाच पञ्च वा ऽइति होवाच पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः सँवत्सरस्य सँवत्सरो यज्ञः समानमेतदुहर्ष्यच्चतुर्विंशमहाव्रते ॥ १९ ॥ कति त्वेवेति । चत्वारीति होवाच चत्वारि वा ऽइति होवाच चतुष्पादाः पशवः पशवो यज्ञः समानमेतदुहर्ष्यत्पृष्ठ्याभिप्लवौ ॥ २० ॥ कति त्वेवेति । त्रीणीति होवाच त्रीणि वा ऽइति होवाच त्रीणि च्छदाꣳसि त्रयो लोकास्त्रिसवनो यज्ञः समानमेतदुहर्ष्यदभिजिद्विश्वजितौ ॥ २१ ॥ कति त्वेवेति । द्वे ऽइति होवाच द्वे वा ऽइति होवाच द्विपाद्वै पुरुषः पुरुषो यज्ञः समानमेतदुहर्ष्यत्स्वरसामानः ॥ २२ ॥ कति त्वेवेति । एकमिति होवाचाहरेवेति तदेतदुहरहरिति सर्वः सँवत्सरः सैषा सँवत्सरस्योपनिषत्स यो हैवमेताꣳ सँवत्सरस्योपनिषदं वेदा हास्माच्छ्रेयाञ्जायते सात्मा भवति सँवत्सरो भवति सँवत्सरो भूत्वा देवानप्येति ॥ २३ ॥

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[दशरात्रनिरूपणम्]

स वा ऽएष सँवत्सरो बृहतीमभिसम्पन्नः । द्वावार्क्ष्यतामहन्नाꣳ षडहौ द्वौ पृष्ठ्याभिप्लवौ गोऽआयुषी दशरात्रस्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गे लोकेऽयतन्त बृहत्या स्वर्गꣳलोकमाप्नुवँस्तथो ऽएवैष ऽएतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या स्वर्गꣳलोकमाप्नोत्यथ यो बृहत्याङ्कामस्तमेवैतेनैवंविदवरुन्द्धे ॥ १ ॥

यद्वै चतुर्विꣳशमहः । दशरात्रस्य वै तत्सप्तमं वा नवमं वाभिप्लवात्पृष्ठ्यो निर्म्मितः पृष्ठ्यादभिजिदभिजितः स्वरसामानः स्वरसामभ्यो विषुवान्विषुवतः स्वरसामानः स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्यः पृष्ठ्यादभिप्लवोऽभिप्लवाद्वोऽआयुषी गोऽआयुर्भ्यान्दशरात्रः ॥२॥ अथैतदुहराक्षर्यत् । यन्महाव्रतम्पञ्चविꣳशो ह्येतस्य स्तोमो भवति नाक्षराच्छन्दो व्व्येत्येकस्मान्न द्वाभ्यान्न स्तोत्रियया स्तोमः ॥ ३ ॥ अभिप्लवम्पूर्व्वम्पुरस्ताद्विषुवत ऽउपयन्ति । पृष्ठ्यमुत्तरम्पुत्रा वा ऽअभिप्लवः पिता पृष्ठ्यस्तस्मात्पूर्व्ववयसे पुत्राः पितरमुपजीवन्ति पृष्ठ्यमुपरिष्टाद्विषुवतः पूर्व्वमुपयन्त्यभिप्लवमुत्तरन्तस्मादुत्तरवयसे पुत्रापितोपजीवत्युप ह वा ऽएनम्पूर्व्ववयसे पुत्रा जीवन्त्युपोत्तरवयसे पुत्राञ्जीवति य ऽएवमेतद्वेद ॥ ४ ॥ तदाहुः । यच्चतुर्विꣳशमहरुपेत्य प्रेयात्कथमनागूर्त्ती भवतीति यदेवादः प्रायणीयमतिरात्रमुपयन्ति तेनेति ब्ब्रूयात् ॥ ५ ॥ तदाहुः । यद्द्वादश मासाः सँवत्सरस्याथैतदुहरत्येति यद्वै षुवतमवरेषामेताꣳ३त्परेषाꣳ३मित्यवरेषाञ्चैव परेषाञ्चेति ह ब्ब्रूयादात्मा वै सँवत्सरस्य विषुवानङ्गानि मासा यत्र वा ऽआत्मा तदङ्गानि यत्रो ऽअङ्गानि तदात्मा न वा ऽआत्माङ्गान्न्यतिरिच्च्यते नात्मानमङ्गान्न्यतिरिच्च्यन्त ऽएवमु हैतदवरेषाञ्चैव परेषाञ्च भवति ॥ ६ ॥ अथ ह वा ऽएष महासुपर्ण्ण ऽएव यत्सँवत्सरः । तस्य यान्पुरस्ताद्विषुवतः षण्मासानुपयन्ति सोऽन्यतरः पक्षोऽथ यान्षडु-

परिष्टात्सोऽन्यतर ऽआत्मा विषुवान्यत्र वा ऽआत्मा तत्पक्षौ यत्र वा पक्षौ तदात्मा न वा ऽआत्मा पक्षावतिरिच्यते नात्मानम्पक्षावतिरिच्येते ऽएवमु हैतदुवरेषा ऽएव परेषाश्च भवति ॥ ७ ॥ तदाहुः । यत्पुरस्ताद्विषुवत ऽऊर्द्धान्स्तोमान्षण्णमासानुपयन्ति षडुपरिष्टादावृत्ताञ्कथमस्यैत ऽऊर्द्धा स्तोमा ऽउपेता भवन्तीति यमेवामुमूर्द्ध्वस्तोमन्दशरात्रमुपयन्ति तेनेति ब्रूयाद्देवेभ्यो ह वै महाव्रतन्न तस्त्थे कथमूर्द्धैः स्तोमैर्विषुवन्तमुपागातावृत्तैर्म्मामिति ॥ ८ ॥ ते ह देवा ऽऊचुः । उप तं यज्ञक्रतुञ्जानीत य ऽऊर्द्धस्तोमो येनेदमाप्नवामेति त ऽएतमूर्द्धस्तोमन्दशरात्रमपश्यन्त्सँवत्सरविधन्तस्य षः पृष्ठ्यः षडहु ऽऋतवः स ऽइमे लोकाश्छन्दोमाः सँवत्सरो दशममहस्तेनैनदाप्नुवँस्तदेभ्योऽतिष्ठत तिष्ठते ह वा ऽअस्मै महाव्रतं य ऽएवमेतद्वेदु ॥ ९ ॥ अथ वा ऽअतोऽहून्नामभ्यारोहुः । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमभ्यारोहन्ति चतुर्विꣳशेन महाव्रतमभिप्लवेन परमभिप्लवम्पृष्ठ्येन परम्पृष्ठ्यमभिजिता विश्वजितꣳ स्वरसामभिः परान्त्स्वरसाम्नोऽथैतदुहरनभ्यारूढं यद्वैषुवतमभि ह वै श्रेयाꣳसः रोहति नैनम्पापीयानभ्यारोहति य ऽएवमेतद्वेदु ॥१०॥ अथ वा ऽअतोऽहान्निवाहुः । प्रायणीयोऽतिरात्रश्चतुर्विꣳशायाहे निवहति चतुर्विꣳशमहरभिप्लवायाभिप्लवः पृष्ठ्याय पृष्ठ्योऽभिजितेऽभिजित्स्वरसामभ्यः स्वरसामानो विषुवते विषुवान्त्स्वरसामभ्यः स्वरसामानो विश्वजिते विश्वजित्पृष्ठ्याय

पृष्ठ्योऽभिप्लवायाभिप्लवो गोऽआयुर्भ्यार्ङ्कोऽआयुषी दशरात्राय दशरात्रो महाव्रताय महाव्रतमुदयनीयायाति-रात्रायोदयनीयोऽतिरात्रः स्वर्ग्गाय लोकाय प्रतिष्ठाया ऽअन्नाद्याय ॥ ११ ॥ तानि वा ऽएतानि । यज्ञारण्यानि यज्ञैकुन्तत्राणि तानि शतꣳ शतꣳ रथाहन्न्यान्न्यन्तरेण तानि येऽविद्वाꣳस ऽउपयन्ति यथारण्यान्न्याम्मुग्धाँश्चरतोऽशनाया वा पिपासा वा पाप्मानो रक्षाꣳसि सँचेरन्नेवꣳ हैवैनानशनाया वा पिपासा वा पाप्मानो रक्षाꣳसि सचन्तेऽथ ये विद्वाꣳसो यथा प्रवाहात्प्रवाहमभयादभयमेवꣳ हैव ते देवतायै देवतामुपसंख्यन्ति ते स्वस्ति स्वर्ग्गँल्लोकꣳ समश्नुवते ॥ १२ ॥ तदाहुः । कति सँवत्सरस्याहानि पराञ्चि कृत्यर्वाञ्चीति स यानि सकृत्सकृदुपयन्ति तानि पराञ्च्यथ यानि पुनः पुनस्तान्न्यर्वाञ्च्यर्वाञ्चीति ह त्वेवैनाञ्युपासीत षडहयोर्ह्यावृत्तिमन्वावर्त्तन्ते[3] ॥ १३ ॥

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[संवत्सरस्याभिप्लवाद्यात्मना स्तुतिर्ब्राह्मणद्वयेन]

पुरुषो वै सँवत्सरः । तस्य प्राण ऽएव प्रायणीयोऽतिरात्रः प्राणेन हि प्रयन्ति वागेवारम्भणीयमहर्वाचा

(१) 'ग' 'ज' पुस्तकयोः 'यज्ञकुन्तत्राणि' इत्यस्य स्थाने 'यज्ञक्षत्राणि' इति पाठ उपलभ्यते ।

(२) 'सचेरन्नेवꣳ हैवैनानशनाया वा पिपासा वा पाप्मानो रक्षाꣳसि' एतावान् पाठः 'ग' 'ज' पुस्तकयोर्नास्ति ।

(३) 'ग' 'ज' पुस्तकयोः 'व्वर्तते' इति पाठोः दृश्यते ।

ह्यारभन्ते यद्यदारभन्ते ॥ १ ॥ अयमेव दक्षिणो हस्तोऽभिप्लवः षडहः । तस्येदमेव प्रथममहस्तस्येदमेव प्रातः सवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनङ्गायत्र्या ऽआयतने तस्मादियमासाꣳ हसिष्टुा ॥ २ ॥ इदमेव द्वितीयमहः । तस्येदमेव प्रातःसवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनन्त्रिष्टुभ ऽआयतने तस्मादियमस्यै वर्षीयसी ॥३॥ इदमेव तृतीयमहः । तस्येदमेव प्रातःसवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनञ्जगत्या ऽआयतने तस्मादियमासां वर्षिष्ठा ॥ ४ ॥ इदमेव चतुर्थमहः । तस्येदमेव प्रातःसवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनं विराज ऽआयतनेऽन्नं वै विराट् तस्मादियमासामन्नादितमा ॥ ५ ॥ इदमेव पञ्चममहः । तस्येदमेव प्रातः सवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनम्पङ्क्तेरायतने पृथुरिव वै पङ्क्तिस्तस्मादयमासाम्प्रथिष्ठः ॥ ६ ॥ इदमेव षष्ठमहः । तस्येदमेव प्रातःसवनमिदम्माध्यन्दिनः सवनमिदन्तृतीयसवनमतिच्छन्दस ऽआयतने तस्मादयमासां वर्षिष्ठो गायत्रमेतदहर्भवति तस्मादिदम्फलकꣳ हसिष्टुः स ऽइतोऽभिप्लवः षडहः स ऽइतः स ऽइतः स ऽइत ऽआत्मा पृष्ठ्यः ॥ ७ ॥ एतद्ध स्म वै तद्विद्वानाह पैङ्ग्यः । प्लवन्त ऽइव वा ऽअभिप्लवास्तिष्टुतीव पृष्ठ्य ऽइति प्लवत ऽइव ह्ययमङ्गैस्तिष्टुतीवात्मनेति ॥ ८ ॥ शिर ऽएवास्य त्रिवृत् । तस्मात्त्रिविधम्भवति त्वगस्थि मस्तिष्कः ॥ ९ ॥ ग्रीवाः

पञ्चदशः । चतुर्दश वा ऽएतासाङ्करूकराणि वीर्य्यम्पञ्चदशन्तस्मादेताभिरण्वीभिः सतीभिर्गुरुम्भारः हरति तस्मादग्रीवाः पञ्चदशः ॥ १० ॥ उरः सप्तदशः । अष्टावन्ये जत्रवोऽष्टावन्य ऽउरः सप्तदशन्तस्मादुरः सप्तदशः ॥ ११ ॥ उदुरमेकविꣳशः । विꣳशतिर्वा ऽअन्तरुदुरे कुन्तापान्युदुरमेकविꣳशन्तस्मादुदुरमेकविꣳशः ॥ १२ ॥ पार्श्वे त्रिणवः । त्रयोदशान्याः पर्शवस्त्रयोदशान्याः पार्श्वे त्रिणवे तस्मात्पार्श्वे त्रिणवः ॥ १३ ॥ अनूकन्त्रयस्त्रिꣳशः । द्वात्रिꣳशद्वा ऽएतस्य करूकराण्यनूकन्त्रयस्त्रिꣳशन्तस्मादनूकन्त्रयस्त्रिꣳशः ॥ १४ ॥ अयमेव दक्षिणः कृष्णोऽभिजित् । यदिदमक्ष्णः शुक्लः स प्रथमः स्वरसामा यत्कृष्णः स द्वितीयो यन्मण्डलः स तृतीयो नासिके विषुवान्न्यदिदमक्ष्णो मण्डलः स प्रथमोऽर्ब्वाक्सामा यत्कृष्णः स द्वितीयो यच्छुक्लः स तृतीयः ॥ १५ ॥ अयमेवोत्तरः कृष्णो विश्वजित् । उक्तौ पृष्ठ्याभिप्लवौ षाववाञ्चौ प्राणौ ते गोऽआयुषी ऽअङ्गानि दशरात्रो मुखम्महाव्रतमुदान ऽएवोदयनीयोऽतिरात्र ऽउदानेन ह्युद्यन्ति स ऽएष सँवत्सरोऽध्यात्मम्प्रतिष्ठितः स यो हैवमेतः सँवत्सरमध्यात्मम्प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥ १६ ॥

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

यद्बालाके । इदन्त्रिवृदिति सर्वमन्योऽन्यमभिसम्पद्यमानम् ॥ कथꣳस्विद्यज्ञः पुरुषः प्रजापतिरन्योऽन्यत्रातिरिच्यन्त एते ॥ १ ॥ यदूर्द्धा स्तोमा अनुयन्ति । यज्ञमभ्यावर्त्तः सामभिः कल्प्पमानाः ॥ कथꣳस्वित्ते पुरुषमाविशन्ति कथम्प्राणैः सयुजो भवन्ति ॥ २ ॥ प्रायणीयोऽतिरात्रः । चतुर्विꣳशमहश्चत्वारोऽभिप्लवाः पृष्ठ्य इत्येते ॥ कथꣳस्वित्ते पुरुषमाविशन्ति कथम्प्राणैः सयुजो भवन्ति ॥ ३ ॥ अभिजिता स्वरसामानः । अभिक्लृप्ता उभयतो विषुवन्तमुपयन्ति ॥ कथꣳस्वित्ते पुरुषमाविशन्ति कथम्प्राणैः सयुजो भवन्ति ॥ ४ ॥ त्रिवृत्प्रायाः । सप्तदशाभिक्लृप्तास्त्रयस्त्रिꣳशान्ताश्चतुरुत्तरेण ॥ कथꣳस्वित्ते पुरुषमाविशन्ति कथम्प्राणैः सयुजो भवन्तीति ॥ ५ ॥ शिरस्त्रिवृत् । पञ्चदशोऽस्य ग्रीवा उर आहुः सप्तदशाभिक्लृप्तम् ॥ एकविꣳशमुदरङ्कल्प्पयन्ति पाश्वर्वे पर्शुस्त्रिणवेनाभिक्लृप्ते ॥ ६ ॥ अभिप्लवा उभयतोऽस्य बाहू । पृष्टꣳपृष्ठ्य इति धीरा वदन्ति ॥ अनूकमस्य चतुरुत्तरेण सँवत्सरे ब्राह्मणाः कल्प्पयन्ति ॥ ७ ॥ कर्ण्णावस्याभिजिद्विश्वजिच्च । अक्ष्याबाहुः स्वरसामाभिक्लृप्ते ॥ नस्यम्प्राणं विषुवन्तमाहुर्ग्गोऽआयुषी प्राणावेतावेवाञ्जौ ॥ ८ ॥ अङ्गान्यस्य दशरात्रमाहुः । मुखम्महाव्रतः सँवत्सरे ब्राह्मणाः कल्प्पयन्ति ॥ सर्वस्तोमः सर्वसामानमेतः सँवत्सरमध्यात्मम्प्रविष्टम् ॥ समन्धीर

ऽआत्मना कल्पयित्वा ब्रह्मध्नस्यास्ते विष्टपेऽजातशोकः ॥ ९ ॥

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

पुरुषो वै संवत्सरः । पुरुष ऽइत्येकः संवत्सर ऽइत्येकमत्र तत्समन्द्वे वै संवत्सरस्याहोरात्रे द्वाविमौ पुरुषे प्राणावत्र तत्समन्त्रय ऽऋतवः संवत्सरस्य त्रय ऽइमे पुरुषे प्राणा ऽअत्र तत्समश्चतुरक्षरो वै संवत्सरश्चतुरक्षरोऽयं यजमानोऽत्र तत्समम्पञ्चऽर्त्तवः संवत्सरस्य पञ्चेमे पुरुषे प्राणा ऽअत्र तत्समः षडृतवः संवत्सरस्य षडिमे पुरुषे प्राणा ऽअत्र तत्समः सप्तऽर्त्तवः संवत्सरस्य सप्तेमे पुरुषे प्राणा ऽअत्र तत्समम् ॥ १ ॥ द्वादश वै मासाः संवत्सरस्य । द्वादशेमे पुरुषे प्राणा ऽअत्र तत्समन्त्रयोदश वै मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा नाभिस्त्रयोदश्यत्र तत्समश्चतुर्विंशतिर्वै संवत्सरस्यार्द्धमासाश्चतुर्विंशोऽयम्पुरुषो विंशत्यङ्गुलिश्चतुरङ्गोऽत्र तत्समः षड्विंशतिर्वै संवत्सरस्यार्द्धमासाः षड्विंशोऽयम्पुरुषः प्रतिष्ठे षड्विंश्यावत्र तत्समम् ॥ २ ॥ त्रीणि च वै शतानि षष्टिश्च । संवत्सरस्य रात्रयस्त्रीणि च शतानि षष्टिश्च पुरुषस्यास्थीन्यत्र तत्समन्त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि त्रीणि च शतानि षष्टिश्च पुरुषस्य मज्जानोऽत्र तत्समम् ॥ ३ ॥ सप्त च

वै शतानि विꣳशतिश्च । सँवत्सरस्याहोरात्राणि सप्त च शतानि विꣳशतिश्च पुरुषस्यास्थीनि च मज्जानश्चात्र तत्समम् ॥ ४ ॥ दश च वै सहस्राण्यष्टौ च शतानि । सँवत्सरस्य मुहूर्त्ता यावन्तो मुहूर्त्तास्तावन्ति पञ्चदश कृत्वः क्षिप्राणि यावन्ति क्षिप्राणि तावन्ति पञ्चदश कृत्व ऽएतर्हीणि यावन्त्येतर्हीणि तावन्ति पञ्चदश कृत्व ऽइदानीनि यावन्तीदानीनि तावन्तः पञ्चदश कृत्वः प्राणा यावन्तः प्राणास्तावन्तोऽना यावन्तोऽनास्तावन्तो निमेषा यावन्तो निमेषास्तावन्तो लोमगर्त्ता यावन्तो लोमगर्त्तास्तावन्ति स्वेदायनानि यावन्ति स्वेदायनानि तावन्त ऽएते स्तोका वर्षन्ति ॥ ५ ॥ एतद्ध स्म वै तद्विद्वानाह बार्क्कलिः । सार्व्वभौमम्मेघं वर्षन्तं वेदाहमस्य वर्षस्य स्तोकानिति ॥ ६ ॥ तदेष श्लोकोऽभ्युक्तः । श्रमादन्यत्र परिवर्त्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि ॥ अहोरात्राभ्याम्पुरुषः समेन कति कृत्वः प्राणिति चाप चानितीति ॥ ७ ॥ तदेष श्लोकः प्रत्युक्तः । शतꣳ शतानि पुरुषः समेनाष्टौ शता यन्निमतन्तद्वदन्ति ॥ अहोरात्राभ्याम्पुरुषः समेन तावत्कृत्वः प्राणिति चाप चानितीति ॥ ८ ॥

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[संवत्सरादि दीक्षापक्षः]

देवा ह वै सहस्रसँवत्सराय दिदीक्षिरे । तेषाम्पञ्च शतानि सँवत्सराणाम्पर्य्यवेतान्न्यासुरथेदꣳ सर्वमेव शश्रमाम

ये स्तोमा यानि पृष्ठानि यानि च्छन्दाꣳसि ॥ १ ॥ ततो देवाः । एतद्यज्ञस्यायातयामापश्यꣳयँस्तेनायातयाम्ना या वेदे व्यष्टिरासीत्तां व्याश्नुवतायातयामा वा ऽअस्य वेदा ऽअयातयाम्न्या हास्य त्रय्या विद्ययार्त्विज्यङ्कृतम्भवति य ऽएवमेतद्वेद ॥ २ ॥ तदेतद्यज्ञस्यायातयाम । ओ श्रावयास्तु श्रौषड्यज ये यजामहे वौषडिति तासां वा ऽएतासाम्पञ्चानां व्याहृतीनाꣳ सप्तदशाक्षराण्यो श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं यये यजामह ऽइति पञ्चाक्षरम् ॥ ३ ॥ द्व्यक्षरो वषट्कारः । स ऽएष सप्तदशः प्रजापतिरधिदेवताऽऽद्यात्मञ्च प्रतिष्ठितः स यो हैवमेतꣳ सप्तदशम्प्रजापतिमधिदेवताऽऽद्यात्मञ्च प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥ ४ ॥ ते ह देवा ऽऊचुः । उप तं यज्ञक्रतुमानीत यः सहस्रसँवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो यः सहस्रसँवत्सरेण समाप्नुयादिति ॥ ५ ॥ ते विश्वजितमेव सर्वपृष्ठम् । पृष्ठ्यस्य षडहस्याऽऽꣳसवमपश्यꣳयँस्ते हि स्तोमा भवन्ति तानि पृष्ठानि तानि च्छन्दाꣳसि ॥ ६ ॥ पृष्ठ्यमेव षडहम् । द्वादशाहस्याऽऽꣳसवमपश्यꣳयँस्ते हि स्तोमा भवन्ति तानि पृष्ठानि तानि च्छन्दाꣳसि ॥ ७ ॥ द्वादशाहमेव । सँवत्सरस्याऽऽꣳसवमपश्यꣳयँस्ते हि स्तोमा भवन्ति तानि पृष्ठानि तानि च्छन्दाꣳसि ॥ ८ ॥ सँवत्सरमेव । तापश्चितस्याऽऽꣳसवमपश्यꣳयँस्ते हि स्तोमा भवन्ति तानि

पृष्ट्वानि तानि च्छन्दाꣳसि ॥ ९ ॥ तापश्चित्तमेव । सहस्रꣳसँवत्सरस्याऽऽप्तꣳसवमपश्यꣳस्ते हि स्तोमा भवन्ति तानि पृष्ट्वानि तानि च्छन्दाꣳसि ॥ १० ॥ स वै सँवत्सरन्दीक्षाभिरेति । सँवत्सरमुपसद्भिः सँवत्सरꣳ सुत्याभिः ॥ ११ ॥ स यत्सँवत्सरन्दीक्षाभिरेति । पूर्वार्द्धमेव तेन सहस्रꣳसँवत्सरस्यावरुन्द्धेऽथ यत्सँवत्सरमुपसद्भिर्म्मध्यमेव तेन सहस्रꣳसँवत्सरस्यावरुन्द्धेऽथ यत्सँवत्सरꣳ सुत्याभिरुत्तमार्द्धमेव तेन सहस्रꣳसँवत्सरस्यावरुन्द्धे ॥ १२ ॥ स वै द्वादश मासान्दीक्षाभिरेति । द्वादशोपसद्भिर्द्वादश सुत्याभिस्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गे लोकेऽयतन्त बृहत्या स्वर्गꣳलोकमाप्नुवँस्तथो ऽएवैष ऽएतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या स्वर्गꣳलोकमाप्नोत्यथ यो बृहत्याङ्कामस्तमेवैतेनैवंविदुवरुन्द्धे ॥ १३ ॥ तद्वा ऽएतत्। त्रयꣳ सह क्रियतेऽग्निरर्क्यम्महदुक्थꣳ स यत्सँवत्सरन्दीक्षाभिरेति सँवत्सरमुपसद्भिस्तेनास्याग्न्यर्क्कावाप्तौ भवतोऽथ यत्सँवत्सरꣳ सुत्याभिरेति तेनो ऽएवास्य महदुक्थमाप्तम्भवति स वा ऽएष ऽएव सहस्रꣳसँवत्सरस्य प्रतिमा यत्तापश्चित ऽएष प्रजानाम्प्रजात्यै यत्तापश्चितः ॥ १४ ॥

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥

कण्डिकासंख्या १३२ ॥

[ज्योतिष्टोमे उद्गात्राद्यन्वारम्भः]

पुरुषः ह नारायणम्प्रजापतिरुवाच । यजस्व यजस्वेति स होवाच यजस्व यजस्वेति वाव त्वम्मामाऽथ त्रिरयक्षि वसवः प्रातःसवनेनागू रुद्रा माध्यन्दिनेन सवनेनादित्यास्तृतीयसवनेनाथ मम यज्ञवास्त्वेव यज्ञवास्तावेवाहमास ऽइति ॥ १ ॥ स होवाच । यजस्वैवाहं वै ते तद्वक्ष्यामि यथा त ऽउक्थानि मणिरिव सूत्र ऽओतानि भविष्यन्ति सूत्रमिव वा मणाविति ॥ २ ॥ तस्मा ऽउ हैतदुवाच । प्रातःसवने बहिष्पवमान ऽउद्गातारमन्वारभासै ३इयनोऽसि गायत्रच्छन्दा ऽअनु त्वारभे स्वस्ति मा सम्पारयेति ॥ ३ ॥ अथ माध्यन्दिने पवमाने । उद्गातारमन्वारभासै सुपर्णोऽसि त्रिष्टुप्छन्दा ऽअनु त्वारभे स्वस्ति मा सम्पारयेति ॥ ४ ॥ अथ तृतीयसवन ऽआर्भवे पवमाने । उद्गातारमन्वारभासा ऽऋभुरसि जगच्छन्दा ऽअनु त्वारभे स्वस्ति मा सम्पारयेति ॥ ५ ॥ अथ सꣳस्थितेषु सꣳस्थितेषु सवनेषु जपेः । मयि भर्गो मयि महो मयि यशो मयि सर्वमिति ॥ ६ ॥ अयं वै लोको भर्गः । अन्तरिक्षलोको महो द्यौर्यशो येऽन्ये लोकास्तत्सर्वम् ॥७॥ अग्निर्वै भर्गः । वायुर्म्मह ऽआदित्यो यशो येऽन्ये देवास्तत्सर्वम् ॥ ८ ॥ ऋग्वेदो वै भर्गः । यजुर्वेदो महः सामवेदो यशो येऽन्ये वेदास्तत्सर्वम् ॥ ९ ॥ वाग्वै भर्गः । प्राणो महश्चक्षुर्यशो येऽन्ये प्राणास्तत्सर्वम् ॥ १० ॥ तद्विद्यात् । सर्वाँल्लोकानात्मन्नधिषि सर्वेषु

लोकेष्वात्मानमधाꣳ सर्वान्देवानात्मन्नधिषि सर्वेषु देवेष्वात्मानमधाꣳ सर्वान्वेदानात्मन्नधिषि सर्वेषु वेदेष्वात्मानमधाꣳ सर्वान्प्राणानात्मन्नधिषि सर्वेषु प्राणेष्वात्मानमधामित्यक्षिता वै लोका ऽअक्षिता देवा ऽअक्षिता वेदा ऽअक्षिताः प्राणा ऽअक्षितः सर्वमक्षिताद्ध वा ऽअक्षितमुपसङ्क्रामत्यप पुनर्म्मृत्युञ्जयति सर्वमायुरेति य ऽएवमेतद्वेद ॥ ११ ॥

तृतीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[सोमादीनां नित्यत्वम्]

सावित्रः ह स्मैतम्पूर्वे पशुमालभन्ते । अथेतर्हि प्राजापत्यं स्यो ह्येव सविता स प्रजापतिरिति ब्रुवन्तस्तस्मात्सह्यु प्याग्नीस्तेन यजेरन्यद्गृहपतेरेवाग्निषु यद्येदश्वाघन्या पत्नीः संस्याजयन्ति तस्यान्नोऽप्यसदिति ते ततो यदानिकामन्दीक्षन्ते ॥ १ ॥ तदु वा ऽआहुः । नानाधिष्ण्या ऽएव स्युर्यदि दीक्षितस्योपतपेत्पाइर्वतोऽग्निहोत्रꣳ हुद्वसेत्स यद्यगदो भवति सद्यः सृज्यैनम्पुनरुपह्वयन्ते यद्यु म्रियते स्वैरेव तमग्निभिर्दहन्त्यशवाग्निभिरितरे यजमाना ऽआसत ऽइति तदुहैवाहिताग्नेः कर्म्म समानधिष्ण्यास्त्वेव भवन्ति तस्य तदेव ब्राह्मणं स्यत्पुरश्चरणे ॥ २ ॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषामग्निहोत्रमनन्तरितम्भवतीति व्रतेनेति ब्रूयात् ॥ ३ ॥

तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषाम्पौर्णमासः हविरनन्तरितम्भवतीत्याज्येन च पुरोडाशेन चेति ब्रूयात् ॥ ४ ॥ तदाहुः यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषाम्पितृयज्ञोऽनन्तरितो भवतीत्यौपासनैरिति ब्रूयात् ॥५॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषामामावास्यः हविरनन्तरितम्भवतीति दद्ध्ना च पुरोडाशेन चेति ब्रूयात् ॥ ६ ॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषामाग्रयणेष्टिरनन्तरिता भवतीति सौम्येन चरुणेति ब्रूयात् ॥ ७ ॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषाञ्चातुर्म्मास्यान्यनन्तरितानि भवन्तीति पयस्ययेति ब्रूयात् ॥ ८ ॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषाम्पशुबन्धोऽनन्तरितो भवतीति पशुना च पुरोडाशेन चेति ब्रूयात् ॥ ९ ॥ तदाहुः । यत्सँवत्सराय सँवत्सरसदो दीक्षन्ते कथमेषाꣳ सोमोऽनन्तरितो भवतीति सवनैरिति ब्रूयात् ॥ १० ॥ ते वा ऽएवमेते यज्ञक्रतवः । सँवत्सरमपियन्ति स यो हैवमेतां व्यज्ञक्रतूनाꣳ सँवत्सरेऽपीतिं वेदाप्यस्य स्वर्गे लोके भवति ॥ ११ ॥ सँवत्सरस्य समता वेदितव्या । एकम्पुरस्ताद्विषुवतोऽतिरात्रमुपयन्त्येकमुपरिष्टात्त्रयः पञ्चाशतम्पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति त्रयः पञ्चाशतमुपरिष्टाद्विꣳशतिशतम्पुरस्ताद्विषुवत ऽउक्थ्यान्न्यहान्न्युपयन्ति विꣳशतिशतमुपरिष्टाद्विति नु यु ऽउक्थ्यान्त्स्वरसाम्न ऽउपयन्ति ॥ १२ ॥ अथ

येऽग्निष्टोमान् । षट्पञ्चाशतम्पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति षट्पञ्चाशतमुपरिष्ट्रात्सप्तदशꣳ शतम्पुरस्ताद्विषुवत ऽउक्थ्यान्न्यहान्न्युपयन्ति सप्तदशमुपरिष्टात्षट् पुरस्ताद्विषुवतः षोडशिन ऽउपयन्ति षडुपरिष्टात्त्रिꣳशतम्पुरस्ताद्विषुवतः षडहानुपयन्ति त्रिꣳशतमुपरिष्टादेषा हास्य समता समेन ह वा ऽअस्याऽव्यृद्धेनान्न्यूनेनानतिरिक्तेनायनेनेतम्भवति य ऽएवमेतद्वेद ॥ १३ ॥

तृतीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

[अग्निहोत्रप्रायश्चित्तं ब्राह्मणद्वयेन]

दीर्घसत्रꣳ ह वा ऽएत ऽउपयन्ति । येऽग्निहोत्रꣳ हुत्वैत्यैजरामर्यꣳ सत्रं स्यादग्निहोत्रꣳ हरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा ॥ १ ॥ तदाहुः । यदेतस्य दीर्घसत्रिणोऽग्निहोत्रꣳ हुतोऽन्तरेणाग्नी युक्तं वा वियायात्सं वा चरेयुः किन्तत्र कर्म्म का प्रायश्चितिरिति कुर्वीत हैव निष्कृतिमपीष्ट्या यजेत तदु तन्नाद्रियेतेमान्वा ऽएष लोकाननुवितनुते योऽग्नी ऽआधत्ते ॥ २ ॥ तस्यायमेव लोको गार्हपत्यः । अन्तरिक्षलोकोऽन्वाहार्य्यपचनोऽसौ लोक ऽआहवनीयः कामन्वा ऽएषु लोकेषु व्रयाꣳसि युक्तश्चायुक्तश्च सञ्चरन्ति स यदि हास्याप्यन्तरेण ग्रामोऽग्नीन्विययान्नैव मे का चनार्त्तिरस्ति न रिष्टिरिति

हैव विद्यात् ॥ ३ ॥ त्रयो ह त्वाव पशवोऽमेद्ध्याः । दुर्वराह ऽऐडकः श्वा तेषां य्यद्यधिश्रिश्रतेऽग्निहोत्रेऽन्तरेण कश्चि-त्स्रुचेरित्किन्तत्र कर्म्म का प्रायश्चित्तिरिति तद्वैके गार्ह-पत्याद्भस्म्मोपहृत्याहवनीयान्निर्वपन्तो यन्ती'दं विष्णुर्वि-चक्रम, ऽइत्त्येतयऽर्च्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यजमनु-सन्तन्म्मो भस्म्मनास्य पदमपिवपाम ऽइति ब्रुवन्तस्तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयादुासान्त्वा ऽअयं य्यज-मानस्यावाप्स्यीक्षिप्रे परमासानावप्स्यते ज्येष्ठ्यगृह्यः रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥ ४ ॥ इत्थमेव कुर्य्यात् । उदस्थाल्लीं वैवोदकमण्डलुं वादाय गार्हपत्यादुग्र ऽआह-वनीयान्निनयन्नियादिदं विष्णुर्विचक्रम ऽइत्त्येतयैवऽर्च्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यजमनुसन्तनोति यद्वै यज्ञस्य रिष्टं य्यदुशान्तमापो वै तस्य सर्व्वस्य शान्तिरद्भिरेवैन-त्तच्छान्त्या शमयत्येतदेव तत्र कर्म्म ॥ ५ ॥ तदाहुः । यस्याग्निहोत्रन्दोह्यमानꣳ स्कन्देत्किन्तत्र कर्म्म का प्राय-श्चित्तिरिति स्कन्नप्प्रायश्चित्तेनाभिमृश्याद्भिरुपनिनीय परि-शिष्टेन जुहुयाद्यद्यु नीची स्थाली स्याद्यदि वा भिद्येत स्कन्नप्प्रायश्चित्तेनैवाभिमृश्याद्भिरुपनिनीय यदन्न्यद्विन्दे-त्तेन जुहुयात् ॥ ६ ॥* अथ यत्र स्कन्नꣳ स्यात् । तदभि-मृशेदुस्कन्नधित प्राजनीति यदा वै स्कन्दत्यथ धीयते यदा धीयतेऽथ प्रजायते योनिर्वा ऽइयꣳ रेतः पयस्तद-स्यां य्योनौ रेतो दधात्यनुष्ठ्या हास्य रेतः सिक्तम्प्रजायते

(१) शु० य० स० ५. १५ । ऋ० स० १. २. ७ । का० श्रौ० सू० २५. ४. १८ ।
* अत्र शतम् ६१०० ।

ष ऽएवमेतद्वेदामुतो वै दिवो वर्षतीहौषधयो वनस्पतयः प्रजायन्ते पुरुषाद्रेत स्कन्दति पशुभ्यस्तत ऽइदꣳ सर्वम्प्रजायते तद्विद्याद्ध्रुयसी मे प्रजातिरभूद्धुꣳ प्रजया पशुभिर्भविष्यामि श्रेयान्भविष्यामीति ॥ ७ ॥ अथ यत्रावभिन्नꣳ स्यात् । तदुदस्थाल्लीं वैवोदकमण्डलुं वा निनयेद्यद्वै यज्ञस्य रिष्टं यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तच्छान्त्या शमयति भूर्भुवः स्वरित्येताभिर्व्याहृतिभिरेता वै व्याहृतयः सर्वप्रायश्चित्तीस्तदनेन सर्वेण प्रायश्चित्तिङ्कुरुते तानि कपालानि सञ्चित्य यत्र भस्म्मोद्धृतꣳ स्यात्तन्निवपेदेतदेव तत्र कर्म्म ॥ ८ ॥ तदाहुः । यस्याग्निहोत्री दोह्यमानोपविशेत्किन्तत्र कर्म्म का प्रायश्चित्तिरिति ताꣳ हैके यजुषोत्थापयन्त्युदस्थाꣳ देव्यदितिरितीयं वा ऽअदितिरिमामेवास्मा ऽएतदुत्थापयाम ऽइति ब्रुवन्त ऽआयुर्यज्ञपतावधादित्यायुरेवास्मिँस्तद्दधम ऽइति ब्रुवन्त ऽइन्द्राय कृण्वती भागमितीन्द्रियमेवास्मिँस्तद्दधम ऽइति ब्रुवन्तो मित्राय वरुणाय चेति प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवास्मिँस्तद्दधम ऽइति ब्रुवन्तस्तान्तस्यामाहुत्याम्ब्राह्मणाय दद्याद्यमनभ्यागमिष्यन्मन्येतार्त्तिं वा ऽएषा पाप्मानं यजमानस्य प्रतिदृश्योपाविक्षदार्त्तिमेवास्मिँस्तत्पाप्मानम्प्रतिमुञ्चाम ऽइति ब्रुवन्तः ॥ ९ ॥ तदुहोवाच याज्ञवल्क्यः । अश्रद्दधानेभ्यो हैभ्यो गौरपक्रामत्यार्त्यो वा ऽआहुतिं

(१) का० श्रौ० सू० २५. १. १३ ।

विक्ष्यन्तीत्थमेव कुर्य्याद्दण्डेनैवैनां विपिष्य्योत्थापयेदिति तद्यथैवाद्यो धावयतोऽश्वो वाश्वतरो वा गदायेत बलीवर्दो वा युक्तस्तेन दण्डप्रजितेन तोत्त्रप्रजितेन यमद्धानः समीप्सति तः समश्नुत ऽएवमेवैतया दण्डप्रजितया तोत्त्रप्रजितया यꣳ स्वर्गꣳलोकः समीप्सति तः समश्नुते ॥ १० ॥ अथ होवाचारुणिः । द्यौर्वा ऽएतस्याग्निहोत्रस्याग्निहोत्र्ययमेव वत्सो योऽयम्पवत ऽइयमेवाग्निहोत्रस्थाली न वा ऽएवं विदुषोऽग्निहोत्री नश्यति क्व ह्यसौ नश्येन्नैवं विदुषोऽग्निहोत्रीवत्सो नश्यति क्व ह्येष नश्येन्नैवं विदुषोऽग्निहोत्रस्थाली भिद्यते क्वच ह्रीयम्भिद्येत श्रिश्रयो वै पर्जन्यो वर्षति तद्विद्याच्छ्रेमाणम्मे महिमानमधारयमाणोपाविक्षच्छ्रेयान्भविष्यामीति तामात्मन्येव कुर्वीतात्मन्येव तच्छ्रियन्धत्त ऽइति ह स्माहारुणिरेतदेव तत्र कर्म्म ॥ ११ ॥ तदाहुः । यस्याग्निहोत्री दोह्यमाना वाश्यते[1] किन्तत्र कर्म्म का प्रायश्चित्तिरिति स्तम्बमाच्छिद्य ग्रासयेदेतदेव तत्र कर्म्म ॥ १२ ॥

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

तदाहुः । यस्याग्निहोत्री लोहितन्दुहीत किन्तत्र कर्म्म का प्रायश्चित्तिरिति व्व्युत्क्रामतेत्युक्त्वा मेक्षणङ्क[2]त्वान्वाहार्य्यपचनम्परिश्रयितवै ब्रूयात्तस्मिन्नेनच्छ्रपयि-

(१) का० श्रौ० सू० २५. १. १८ । (२) का० श्रौ० सू० २५. २. २ ।

त्वा तस्मिँमस्तूष्णीञ्जुहुयादुनिरुक्तो वै प्रजापतिः प्राजापत्यमग्निहोत्रꣳ सर्वं वा ऽअनिरुक्तन्तदनेन सर्वेण प्रायश्चित्तिङ्कुरुते तान्तस्यामाहुत्याम्ब्राह्मणाय दद्याद्यमनभ्यागमिष्यन्मन्येतार्त्तिं वा ऽएषा पाप्मानं यजमानस्य प्रतिदृश्य दुहे या लोहितन्दुह ऽआर्त्तिमेवास्मिँमस्तत्पापमानम्प्रतिमुञ्चत्यथ यदन्यद्विन्देत्तेन जुहुयादुनार्त्तेनैव तदार्त्तं यजस्य निष्कुरोत्येतदेव तत्र कर्म्म ॥ १ ॥ तदाहुः । यस्याग्निहोत्रन्दोह्यमानममेद्ध्यमापद्येत किन्तत्र कर्म्म का प्रायश्चित्तिरिति तद्धैके होतव्यम्मन्यन्ते प्रयतमेतन्नैतस्याहोमोऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्ते बीभत्सन्ता३ऽइ तु देवा ऽइत्थमेव कुर्य्याद्गार्हपत्यादुष्णम्भस्म निरुह्य तस्मिन्नेनदुष्णे भस्मँस्तूष्णीन्निनयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म्म ॥ २ ॥ तदाहुः । यस्याग्निहोत्रन्दोहितममेद्ध्यमापद्येत किन्तत्र कर्म्म का प्रायश्चित्तिरिति य ऽएवैतेऽङ्गारा निरूढा येष्वधिश्रयिष्यन्भवति तान्प्रत्युह्य तस्मिन्नेनदुष्णे भस्मँस्तूष्णीन्निनयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म्म ॥ ३ ॥ तदाहुः । यस्याग्निहोत्रमधिश्रितममेद्ध्यमापद्येत किन्तत्र कर्म्म का प्रायश्चित्तिरिति य ऽएवैतेऽङ्गारा निरूढा येष्वधिश्रितम्भवति तेष्वेनत्तूष्णीञ्जुहुयात्तद्धुतमहुतं यजदहैनत्तेषु जुहोति तेन हुतं यजद्वेनाँस्तेनैवानुगम-

(१) "•दनिरुक्तमनिरुक्तो" इति 'ग' 'ज' पुस्तकयोः ।

यति तेनाहुतमद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म्म ॥ ४ ॥ तदाहुः । यदुधिश्श्रतेऽग्निहोत्रे यजमानो म्म्रियेत किन्तत्र कर्म्म का प्रायश्चित्तिरिति तदेवैनदभिपर्य्याधाय विष्पन्दयेदुथो खल्वाहुरेतावती सर्वस्य हविर्य्यज्ञस्य प्रायश्चित्तिरित्येतदेव तत्र कर्म्म ॥ ५ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्च्युन्नीतꣳ स्कन्देत्किन्तत्र कर्म्म का प्रायश्चित्तिरिति स्कन्नप्प्रायश्चित्तेनाभिमृश्श्याद्भिरुपनिनीय परिशिष्टेन जुहुयाद्यद्यु नीची स्रुक् स्याद्यदि वा भिद्येत स्कन्नप्प्रायश्चित्तेनैवाभिमृश्श्याद्भिरुपनिनीय यत्स्थाल्ल्याम्परिशिष्टꣳ स्यात्तेन जुहुयात् ॥ ६ ॥ तद्धैके । प्प्रतिपरेत्य यत्स्थाल्ल्याम्परिशिष्टम्भवति तेन जुह्वति तदु तथा न कुर्य्यात्स्वर्ग्यं वा ऽएतद्यदग्निहोत्रं य्यो हैनन्तत्र ब्रूयात्प्रति न्वा ऽअयꣳ स्वर्ग्याल्लोकादवारुक्षन्नास्येदुꣳ स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥ ७ ॥ इत्थमेव कुर्य्यात् । तदेवोपविशेद्यत्स्थाल्ल्याम्परिशिष्टꣳ स्यात्तदस्म्मा ऽउन्नीयाहरेयुस्तद्धैक ऽउपवल्हन्ते हुतोच्छिष्टं वा ऽएतद्यातयाम वा ऽएतन्नैतस्य होतव्व्यमिति तदु तन्नाद्रियेत यदा वा ऽएतदुयातयामाथैनद्धविरातश्चनकुर्व्वते तस्म्माद्यत्स्थाल्ल्याम्परिशिष्टꣳ स्यात्तदस्म्मा ऽउन्नीयाहरेयुर्य्यद्यु तत्र न स्याद्यदन्यद्विन्देत्तदग्नावधिश्श्रित्यावज्योत्यापः प्रत्यानीयोद्वास्य तददो हैवोन्नेष्यामीत्युक्तम्भवत्यथान्न यथोन्नीतमेवास्म्मा ऽउन्नीयाहरेयुस्तेन कामञ्जुहुयादेतदेव तत्र कर्म्म ॥ ८ ॥ तदाहुः ।

यस्याग्निहोत्रꣳ स्रुच्च्युन्नीतममेध्यमापद्येत किन्तत्र कर्म्म का प्रायश्चित्तिरिति तद्धैके होतव्यम्मन्यन्ते प्रयतमेतन्नैतस्याहोमोऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्त इति तद्धैक उत्सिच्य च्छर्दयन्ति तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयात्परासिञ्चत न्वा अयमग्निहोत्रं क्षिप्रेऽयं यजमानः परासेक्ष्यत इतीश्वरो ह तथैव स्यादित्थमेव कुर्य्यादाहवनीये समिधमभ्याधायाहवनीयादेवोष्णम्भस्म निरुह्य तस्मिन्नेनदुष्णे भस्ममँस्तूष्णीन्निनेयदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म्म ॥ ९ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्च्युन्नीतमुपरिष्टादववर्षेत्किन्तत्र कर्म्म का प्रायश्चित्तिरिति तद्विद्यादुपरिष्टान्मा शुक्रमागन्नुप मान्देवाः प्राभूवञ्छ्रेयान्भविष्यामीति तेन कामञ्जुहुयादेतदेव तत्र कर्म्म ॥ १० ॥

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[गार्हपत्याद्यनुगमने प्रायश्चित्तम्]

तदाहुः । यत्पूर्वस्यामाहुत्याꣳ हुतायामथाग्निरनुगच्छेत्किन्तत्र कर्म्म का प्रायश्चित्तिरिति यम्प्रतिवेशः शकलं विन्देत्तमभ्यस्याभिजुहुत्यादारौ दारावग्निरिति ब्रुवन्दारौ दारौ ह्येवाग्निर्य्यद्यु अस्य हृदयं व्यथेव लिखेद्धिरण्यमभिजुहुयादग्नेर्वा एतद्रेतो यद्धिरण्यं य उ वै पुत्रः स पिता यः पिता स पुत्रस्तस्माद्धिरण्यमभिजुहुयादेतदेव तत्र कर्म्म ॥ १ ॥ तदाहुः । यस्याहवनीय उद्धृतः

पुराग्निहोत्रादनुगच्छेस्किन्तत्र कर्म्म का प्रायश्चित्तिरिति गार्हपत्यादेवैनम्प्राश्चमुद्धृत्योपसमाधायाग्निहोत्रञ्जुहुयात्स यद्यपि शतमेव कृत्वः पुनः पुनरुद्धृतोऽनुगच्छेद्गार्हपत्यादेवैनम्प्राश्चमुद्धृत्योपसमाधायाग्निहोत्रञ्जुहुयादेतदेव तत्र कर्म्म ॥२॥ [अर्धः प्रपाठकः ४८] तदाहुः । यस्य गार्हपत्योऽनुगच्छेस्किन्तत्र कर्म्म का प्रायश्चित्तिरिति तꣳ हैक ऽउल्मुकादेव निर्म्मन्थन्ति यतो वै पुरुषस्यान्ततो नश्यति ततो वै स तस्य प्रायश्चित्तिमिच्छत ऽइति ब्रुवन्तस्तदु तथा न कुर्य्यादुल्मुकꣳ ह वै वादाय चरेयुरुल्मुकस्य वावव्रश्च्चमित्थमेव कुर्य्यादुल्मुकादङ्गारमादाय तमरण्योरभिविमथ्नीयादुप ह तङ्काममाप्नोति य ऽउल्मुकमत्थ्य ऽउपो तं ब्योऽरण्योरेतदेव तत्र कर्म्म ॥ ३ ॥ तदाहुः । यस्याग्नावग्निमब्भ्युद्धरेयुः किन्तत्र कर्म्म का प्रायश्चित्तिरितीश्वरौ वा ऽएतौ सम्पद्याशान्तौ यजमानस्य प्रजाश्च पशूँश्च निर्दहस्तदभिमन्त्रयेत 'समितंꣳ सङ्कल्पेथाꣳ सम्प्रियौ रोचिष्णू सुमनस्यमानौ ॥ इषमूर्ज्जमभि संवसानौ ॥ सं वाम्मनाꣳसि सं व्रता समु चित्तान्याकरम् ॥ अग्ने पुरीष्याधिपा भव त्वन्न ऽइषमूर्ज्जं यजमानाय धेही'ति शान्तिमेवाभ्यामेतद्ददति यजमानस्य प्रजायै पशूनामहिꣳसायै ॥ ४ ॥ यदु ऽअस्य हृदयं व्यथेव लिखेत् । अग्नयेऽग्निमतेऽष्टाकपालम्पुरोडाशन्निर्व्वपेत्तस्यावृत्सप्तदश सामिधेनीरनुब्रूयाद्बार्हस्पत्यावाज्यभागौ विराजौ संस्थाज्ये ऽअथैते याज्यानुवाक्ये

(१) शु० य० सं० (अ० १२ क० ५७–५८)।

ऽ'अग्निनाग्निः समिद्ध्यते कविर्गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्य' ऽइत्यथ याज्या 'त्वꣳ हि[1] अग्ने ऽअग्निना विप्रो विप्रेण सन्त्सता ॥ सखा सख्या समिद्ध्यस' ऽइति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामहिꣳसाया ऽएतदेव तत्र कर्म्म ॥ ५ ॥ तदाहुः । यस्याहवनीयेऽननुगते गार्हपत्योऽनुगच्छेत्किन्तत्र कर्म्म का प्रायश्चितिरिति तꣳ हैके तत ऽएव प्राञ्चमुद्धरन्ति प्राणा वा ऽअग्नयः प्राणानेवास्मा ऽएतदुद्धराम ऽइति वदन्तस्तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयात्प्राचो ह्वा ऽअयं यजमानस्य प्राणान्प्रारौत्सीन्मरिष्यत्ययं यजमान ऽइतीश्वरो ह तथैव स्यात् ॥ ६ ॥ अथ हैके प्रत्यञ्चमाहरन्ति । प्राणोदानाविमाविति वदन्तस्तदु तथा न कुर्य्यात्स्वर्ग्यं वा ऽएतद्यदग्निहोत्रं स्यो हैनन्तत्र ब्रूयात्प्रति ह्वा ऽअयꣳ स्वर्गाल्लोकादुवारुक्षन्नास्येदꣳ स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥ ७ ॥ अथ हैकेऽन्यङ्गार्हपत्यम्मन्थन्ति । तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयादग्नेर्न्वा ऽअयमधि द्विषन्तम्भ्रातृव्यमजीजनत क्षिप्रेऽस्य द्विषन्भ्रातृव्यो जनिष्यते प्रियतमꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥ ८ ॥ अथ हैकेऽनुगमन्यान्यम्मन्थन्ति । तस्याशान्नेयादपि यत्परिशिष्टमभूत्तदजीजसत नास्य दायादश्चन परिशेक्ष्यत ऽइतीश्वरो ह तथैव स्यात् ॥ ९ ॥ इत्थमेव कुर्य्यात् । अरण्योरग्नी समारोह्योदङ्डुदवसाय निर्म्मथ्य जुह्वद्वसेत्तथा ह न

(१) ऋ० सं० १. १. २२ । (२) ऋ० सं० ६. ३. ३१. ।

काञ्चन परिचक्षाङ्करोति नवावसान उ ऽउ ऽअस्याभितोराव्रहृ हृतम्भवति * ॥ १० ॥

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[अग्न्यन्तरगमनमार्गादौ प्रायश्चित्तम्]

अथ प्रातर्भस्माहृत्युद्धृत्य । गोमयेनालिप्यारण्योरेवाग्नी समारोह्य प्रत्यवस्यति मथित्वा गार्हपत्यमुद्धृत्याहवनीयमाहृत्यान्वाहार्यपचनमग्नये पथिकृतेऽष्टाकपालम्पुरोडाशन्निर्वपेत्तस्यावृत्ता ऽएव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संस्थाज्ये ऽअथैते याज्यानुवाक्ये 'वेत्थो हि वेधो ऽअद्धनः पथश्च देवाञ्जसा ॥ अग्ने यज्ञेषु सुक्रतो'वित्यथ याज्या'देवानामपि पन्थामगन्म यच्छक्वनवाम तदनुप्रवोढुम् ॥ अग्निर्विद्वान्स यजात्सेदु होता सो ऽअद्धरान्त्स ऽऋतून्कल्पयाती'त्यग्निर्वै पथिकृत्पथामपिनेता स ऽएवैनं यज्ञपथमपिनयत्येतदेव तत्र कर्म्म ॥ १ ॥ तदाहुः । यस्याग्नयः सहसृज्येरन्किन्तत्र कर्म्म का प्रायश्चित्तिरिति स यदि परस्ताद्दहन्नभीयात्तद्विद्यात्परस्तान्मा शुक्रमागन्नुप मान्देवाः प्राभूवञ्छेयान्भविष्यामीति यद्यु ऽअस्य हृदयं व्यथेव लिखेदग्नये विविचयेऽष्टाकपालम्पुरोडाशन्निर्वपेत्तस्यावृत्ता ऽएव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संस्थाज्ये ऽअथैते

* का० श्रौ० सू० २५. ३. ४–९ ।

(१) ऋ० सं० ४. ५. २१ । (२) ऋ० सं० ७. ५. ३० ।

याज्यानुवाक्ये 'वि ते विष्वग्वातजूतासो ऽअग्ने भामासः शुचे शुचयश्चरन्ति ॥ तुविम्रक्षासो दिव्या नवग्वा वना-वनन्ति धृषता रुजन्त' इत्यथ याज्या 'त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिः रत्नधातमम् ॥ गुहा सन्तः सुभग विश्श्वदर्शतन्तुविष्वणसः सुयजङ्घृतश्रिय'मित्यथो ह यो द्विषतो ब्भ्रातृव्याद्व्याविवृत्सेत तत्काम ऽएतया यजेत वि हैवास्माद्वर्त्तत ऽएतदेव तत्र कर्म्म ॥ २ ॥ यद्वयमितो दुहन्नभीयात् । तद्विद्यादभि द्विषन्तम्भ्रातृव्यम्भविष्यामि श्रेयान्भविष्यामीति यद्यु ऽअस्य हृदयं व्येव लिखेद-ग्नये संवर्ग्गायाष्टाकपालम्पुरोडाशन्निर्वपेत्तस्यावृत्ता ऽएव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ सँस्थाज्ये ऽअथैते याज्यानुवाक्ये 'परस्या ऽअधि संवतोऽ-वराँ२॥ऽअभ्यातर ॥ यत्राहमस्मि तांँ२॥ ऽअवे'त्यथ याज्या 'मा नो ऽअस्मिन्नमहाधने परावर्भारभृद्यथा ॥ सं वर्ग्गः सः रयिञ्जये'त्यथो ह यो द्विषतो ब्भ्रातृव्यात्सं-विवृक्षेत तत्काम ऽएतया यजेत सः हैवास्माद्वृङ्क्त ऽएतदेव तत्र कर्म्म ॥ ३ ॥ तदाहुः । यस्य वैद्युतो दुहेत्किन्तत्र कर्म्म का प्रायश्चित्तिरिति तद्विद्यादुपरिष्टान्न्मा शुक्रमागन्नुप मान्देवाः प्राभूवञ्छ्रेयान्भविष्यामीति यद्यु ऽअस्य हृदयं व्येव लिखेदग्नयेऽप्सुमतेऽष्टाकपाल-म्पुरोडाशन्निर्वपेत्तस्यावृत्ता ऽएव सप्तदश सामिधेनीरनु-

(१) ऋ० सं० ४. ५. ८। (२) ऋ० सं० ३. ८. २६। (३) शु० य० सं० ११. ७१। (४) ऋ० सं० ६. ५. २६।

ब्ब्रूयाद्वार्ग्नघ्नावाज्यभागौ विराजौ सँस्याज्ये ऽअथैते याज्यानुवाक्ये 'ऽअप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे॥ गर्भे सञ्जायसे पुन'रित्यथ याज्या 'गर्भो ऽअस्योषधीनाङ्गर्भो वनस्पतीनाम् । गर्भो विश्श्वस्य भूतस्याग्ने गर्भो ऽअपामसी'ति शान्तिमेवाभ्यामेतद्ददति यजमानस्य प्रजायै पशूनामहिꣳसाया ऽएतदेव तत्र कर्म्म ॥ ४ ॥ तदाहुः । यस्याग्नयोऽमेध्यैरग्निभिः सꣳसृज्येरन्निक-न्तत्र कर्म्म का प्रायश्चित्तिरित्यग्नये शुचयेऽष्टाकपा-लम्पुरोडाशान्निर्वपेत्तस्यावृत्ता ऽएव सप्तदश सामिधेनी-रनुब्ब्रूयाद्वार्ग्नघ्नावाज्यभागौ विराजौ संस्याज्ये ऽअथैते या-ज्यानुवाक्ये 'ऽअग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः॥ शुची रोचत ऽआहुत' इत्यथ याज्ये 'दर्ग्ने शुचयस्तव शुक्रा ब्भ्राजन्त ऽईरते॥ तव ज्ज्योतीꣳष्यर्च्चय' ऽइति शान्ति-मेवाभ्यामेतद्ददति यजमानस्य प्रजायै पशूनामहिꣳसाया ऽएतदेव तत्र कर्म्म ॥ ५ ॥ तदाहुः । यस्याहवनीयमनुद्धृत-मादित्योऽभ्यस्तमियात्किन्तत्र कर्म्म का प्रायश्चित्तिरित्येते वै रश्म्मयो विश्श्वे देवास्तेऽस्माद्पप्रयन्ति तदस्मै व्यृ-द्ध्यते यस्माद्देवा ऽअपप्रयन्ति तामनु व्यृद्धिं व्यश्च वेद यश्च न ता ऽउभावाहतुरनुद्धृतमस्याभ्यस्तमगादिति तत्रेत्थ-कुर्य्याद्धरितः हिरण्यन्दर्भे प्रबध्य पश्चाद्धर्त्तवै ब्ब्रूया-त्तदेतस्य रूपङ्क्रियते य ऽएष तपत्यहर्वा ऽएष तदुद्गो

(१) ऋ० सं० ६. ३. १०। शु० य० सं० १२. ३६। (२) शु० य० सं० १३. ३७। (३) ऋ० सं० ६. ३. ४०। (४) ऋ० सं० ६. १ ३९।

रूपङ्क्रियते पवित्रन्दर्भाः पवयस्येवैनन्तदथेद्धममादीप्य प्राञ्चः हर्त्तवै ब्रूयाद्ब्राह्मण ऽआर्षेय ऽउद्धरेद्ब्राह्मणो वा ऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनन्तद्देवताभिः समर्द्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्य ऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यङ्गृहीत्वा समिधमुपसङ्गृह्य प्राङुद्वाद्रवत्यथाहवनीये समिधमभ्याधाय दुक्षिणञ्जान्वाच्य जुहोति विश्वेभ्यो देवेभ्यः स्वाहेति स यथा ब्राह्मणमावसथवासिनङ्कुद्धं शयन्तमुक्षवेहतोपमन्त्रयेतैवमेवैतद्विश्वान्देवानुपमन्त्रयते जानन्ति हैनमुप हैनमावर्त्तन्त ऽएतदेव तत्र कर्म्म ॥ ६ ॥ तदाहुः । यस्याहवनीयमनुद्धृतमादित्योऽभ्युदियात्किन्तत्र कर्म्म का प्रायश्चित्तिरित्येते वै रश्मयो विश्वे देवास्तेऽस्मादूषिवाꣳसोऽपप्रयन्ति तदस्मै व्यृद्ध्यते यस्मादेवा ऽअपप्रयन्ति तामनु व्यृद्धिं शयश्च वेद यश्च न ता ऽउभावाहतुरनुद्धृतमस्याभ्युदगादिति तत्रेत्थङ्कुर्य्याद्रजतः हिरण्यन्दर्भे प्रवल्ह्य पुरस्ताद्धर्त्तवै ब्रूयात्तच्चन्द्रमसो रूपङ्क्रियते रात्रिर्वै चन्द्रमास्तद्रात्रे रूपङ्क्रियते पवित्रन्दर्भाः पवयस्येवैनन्तदथेद्धममादीप्याञ्चः हर्त्तवै ब्रूयाद्ब्राह्मण ऽआर्षेय ऽउद्धरेद्ब्राह्मणो वा ऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनन्तद्देवताभिः समर्द्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्य ऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य यथागृहीतमाज्यङ्गृहीत्वा समिधमुपसङ्गृह्य प्राङुद्वाद्रवत्यथाहवनीये समिधमभ्याधाय दुक्षिणञ्जान्वाच्य जुहोति

विश्वेभ्यो देवेभ्यः स्वाहेति सोऽसावेव बन्धुर्न्न ह वै तत्र का चनार्त्तिर्न्न रिष्टिर्भवति यत्रैषा प्रायश्चित्तिः क्रियत एतदेव तत्र कर्म्म ॥ ७ ॥

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥



[मृताग्निहोत्रनिरूपणम्]

तदाहुः । यदेष दीर्घसत्र्यग्निहोत्रजुह्वत्प्रवसन्म्रियेत जुहुयुरस्माइ ऽइ नाइ ऽइति तद्धैके होतव्यम्मन्यन्त ऽआगन्तोरिति तदु तथा न कुर्य्यादुतस्थानो वा ऽएष तस्मै यदेनः शवदह्याया ऽइव जुहुयुर्य्यज्ञाय वा ऽएष ऽआहुतिभ्यस्तस्थानः स हैनममृष्यमाणस्तृप्रः सचते ॥ १ ॥ अथ हैक ऽआहुः । एवमेवान्वाहिता ऽआहूयमानाः शयीरन्निति तदु तथा न कुर्य्यादुतस्थानो वा ऽएष तस्मै यदेनः शवदह्याया ऽइवेन्धीरन्यज्ञाय वा ऽएष ऽआहुतिभ्यस्तस्थानः स हैनममृष्यमाणस्तृप्रः सचते ॥ २ ॥ अथ हैकेऽरण्योः । अग्नी समारोह्य निदधति तमाहृते निर्म्मन्थन्ति तदु तथा न कुर्य्यादुतस्थानो वा ऽएष तस्मै यदेनः शवदह्याया ऽइव निर्म्मन्थेयुर्य्यज्ञाय वा ऽएष आहुतिभ्यस्तस्थानः स हैनममृष्यमाणस्तृप्रः सचते ॥ ३ ॥ इत्थमेव कुर्य्यात् । निवान्न्यवत्सामेष्टवै ब्ब्रूयात्तस्यै पयसा जुहुयादार्त्तं वा

ऽएतत्पयो यन्निवान्यवत्साया * ऽआर्त्तमेतदग्निहोत्रं यन्न्मृतस्य तदार्त्तेनैव तदार्त्तिन्निष्कृत्य श्रेयान्भवति ॥ ४ ॥ तदप्युपमास्ति । यद्द्वौ रथौ मृदितौ समागच्छेताꣳ स्यादेवान्यतरः स्यदायेति ॥ ५ ॥ तस्य वा ऽएतस्याग्निहोत्रस्योषचारः । प्राचीनावीती दोहयति यज्ञोपवीती वै देवेभ्यो दोहयत्यथैवम्पितॄणाम् ॥६॥ नाङ्गारेष्ववधिश्रयति। यद्धाङ्गारेष्ववधिश्रयेद्देवत्रा कुर्य्याद्गार्हपत्यादुष्णम्भस्म दक्षिणा निरुह्य तस्मिन्नेनदुधिश्रयति पितृदेवत्यमेवैनत्तत्करोति ॥७॥ नावज्ज्योतयति नापः प्रत्यानयति । यद्धावज्ज्योतयेद्यदपः प्रत्यानयेद्देवत्रा कुर्य्यान्न त्रिः प्रतिष्ठापः हरति यत्त्रिः प्रतिष्ठापः हरेद्देवत्रा कुर्य्यात्सकृदेव निकुर्वन्हरति पितृदेवत्यमेवैनत्तत्करोति ॥ ८ ॥ नोन्नेष्यामीत्याह । न चतुरुन्नयति यद्धोन्नेष्यामीति ब्रूयाद्यच्चतुरुन्नयेद्देवत्रा कुर्य्यात्सकृदेव तूष्णीङ्यक्वपुर्य्यस्यति पितृदेवत्यमेवैनत्तत्करोति ॥ ९ ॥ नोपरिष्टात्समिधमब्भ्यस्य हरति । यद्धोपरिष्टात्समिधमब्भ्यस्य हरेद्देवत्रा कुर्य्यादधस्तादुपास्य हरति पितृदेवत्यमेवैनत्तत्करोति ॥ १० ॥ नोत्तरेण गार्हपत्यमेति । यद्धोत्तरेण गार्हपत्यमियाद्देवत्रा कुर्य्याद्दक्षिणेन गार्हपत्यमेति पितृदेवत्यमेवैनत्तत्करोति ॥ ११ ॥ अथ यान्यमून्युदीचीनाग्राणि तृणानि भवन्ति । दक्षिणाग्राणि तानि करोति पितृदेवत्यमेवैनत्तत्करोत्यथाहवनीये समिधमब्भ्याधाय सꣳयञ्जान्वाच्य सकृदेव तूष्णीन्यक्वपुर्य्यस्यति

* निवः पाता अन्यः परकीयवत्सो यस्याः । परकीयेण वत्सेन या मृतवत्सा गौर्दुह्यते सा निवान्यवत्सा । "अभिमृश्याधाः पिष्ट्वा निवान्यादुग्धे" (का० श्रौ० सू० ५. ८. १८) ।

पितृदेवत्यमेवैनत्तत्करोति नोदिङ्गयति नोपमृष्टे न प्राश्नाति नोदुक्षति पितृदेवत्यमेवैनत्तत्करोति ॥ १२ ॥ तदाहुः । यदेष दीर्घसत्र्यग्निहोत्रꣳहुत्वत्प्रवसन्म्रियेत कथमेनमग्निभिः कुर्य्युरिति तद्ध हैके दग्ध्वाहरन्ति तमाहृतमग्निभिः सङ्ख्रापयन्ति तदु तथा न कुर्य्याद्यथान्यस्यां स्योनौ रेतः सिक्तन्तदन्यस्याम्प्रजिजनयिषेत्तादृक्तदुस्थीन्येतान्न्याहृत्य कृष्णाजिने न्युप्य पुरुषविधिं विधायोर्णाभिः प्रच्छाद्याज्येनाभिघार्य तमग्निभिः समुपोषेत्तदेनꣳ स्वाद्योनेः प्रजनयतीति ॥ १३ ॥ तद्ध हैके ग्रामाग्निना दहन्ति । तदु तथा न कुर्य्यादेष वै विश्श्वात्क्रव्यादग्निः स हैनमीश्श्वरः सपुत्रद्ꣳ सपशुद्ꣳ समन्तोः ॥ १४ ॥ अथ हैके प्रदुव्यन दहन्ति । तदु तथा न कुर्य्यादेष वा ऽअशान्तोऽग्निः स हैनमीश्श्वरः सपुत्रद्ꣳ सपशुम्प्रदग्धोः ॥ १५ ॥ अथ हैक ऽउल्मुक्क्येन दहन्ति । तदु तथा न कुर्य्यादेष वै रुद्रियोऽग्निः स हैनमीश्श्वरः सपुत्रद्ꣳ सपशुमभिमन्तोः ॥ १६ ॥ अथ हैकेऽन्तरेणाग्नीꣳश्चितिश्चित्वा । तमग्निभिः समुपोषन्त्येतद्वै यजमानस्यायतनं यदुन्तरेणाग्नीनिति तदु तथा न कुर्य्याद्यो हैनन्तत्र ब्रूयान्मद्ध्ये न्वा ऽअयङ्गामस्याशासनमजीजनत क्षिप्रेऽस्याशासनञ्जनिष्यते प्रियतमद्ꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥ १७ ॥

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[और्ध्वदेहिकनिरूपणम्]

अथ ह स्माह नाको मौद्गल्यः। मरिष्यन्तं वै यजमानमन्वेत यत्रैवास्मा आशसनञ्जोषितꣳ स्यात्तदरण्योरग्नी समारोह्य निर्मन्थ्य जुहूवद्धसेत्स यदास्माल्लोकाद्यजमानः प्रेयात् ॥ १ ॥ अथैनमन्तरेणाग्नीञ्चिनुतिञ्चित्त्वा। तमग्निभिः समुपोषेदिति तदु तथा न कुर्य्यादुत्तस्थानो वा एष तस्मै यदेनꣳ शवदह्याया इव जुहुयुर्य्यज्ञाय वा एष आहुतिभ्यस्तस्थानꣳ स ह वैनमभृष्यमाणस्तृप्रꣳ सचते ॥ २ ॥ इत्थमेव कुर्य्यात्। तिस्र एव स्थालीरेष्टवै ब्रूयात्तासु गोमयानि च शुम्बलानि चावधाय नाना त्रिष्वग्निषु प्रवृञ्ज्यात्ते यै ततः सन्तापादग्नयो जायेरँस्तैरेनन्दहेयुस्तथाह तैरेव दग्धो भवति नो प्रत्यक्षमिव ॥ ३ ॥ तस्मादुप्येतदृषिणाभ्यनूक्तम्। 'यो अग्निर्नरग्नेरद्ध्यजायत शोकात्पृथिव्या उत वा दिवस्परि ॥ येन प्रजा विश्वकर्म्मा जजान तमग्ने हेडः परि ते वृणक्त्विति' यथोक्तथा ब्राह्मणम् ॥ ४ ॥ अथैनं विपुरीषङ्कृत्वा। अस्याम्पुरीषम्प्रतिष्ठापयति पुरीषं वा इयन्तत्पुरीष एवैतत्पुरीषन्दधाति या ह वा अस्यैषा वृकला सपुरीषा तस्यै ह विदग्धायै शृगालः सम्भवति नेत्शृगालः सम्भवदिति तदु तथा न कुर्य्यात्क्षोधुका ह्यस्य प्रजा भवति तमन्तरतः प्रक्षाल्याज्येनान्वनक्ति मेद्ध्यमेवैनत्तत्करोति ॥ ५ ॥ अथास्य सप्तसु प्राणायतनेषु *।

(१) शु० य० सं० अ० १३ क० ४५।

* का० श्रौ० सू० २५. ७. २०–३४।

सप्त हिरण्ययशकलान्प्रत्यस्यति ज्योतिर्वा ऽअमृतꣳ हिरण्ययꣳज्योतिरेवास्मिँमस्तदमृतन्दधाति ॥ ६ ॥ अथैनमन्तरेणाग्नीꣳश्चितिꣳचित्वा । कृष्णाजिनमुत्तरलोम प्राचीनग्रीवम्प्रस्तीर्य तस्मिन्नेनमुत्तानन्निपाद्य जुहूङ्कृतेन पूर्णान्दक्षिणे पाणावादधाति सव्य ऽउपभृतमुरसि ध्रुवाम्मुखेऽग्निहोत्रहवणीन्नासिकयोः स्रुवौ कर्णयोः प्राशित्रहरणे शीर्षञ्चमसम्प्रणीताप्प्रणयनम्पार्श्वयोः शूर्प्पे ऽउदरे पात्रीꣳ समवत्तधानीम्पृषदाज्यवतीꣳ शिश्नस्यान्ते शम्म्यामाण्डयोरन्ते वृषारावन्वगुलूखलञ्च मुसलञ्चान्तरेणोरू ऽअन्यानि यज्ञपात्राणि दक्षिणे पाणौ स्फ्यम् ॥ ७ ॥ स ऽएष यज्ञायुधी यजमानः । यथा विब्भ्यदामोषमतीयादेवमेव योऽस्य स्वर्गं लोकं जितो भवति तमभ्यत्येति तमेते सन्ताप्प्या ऽअग्नयो यथा पुत्राः पितरम्प्रोषुषमागतꣳ शिवमुपस्पृशन्त्येवꣳ शिवꣳ हैवैनमुपस्पृशन्ति प्र हैवैनङ्कल्पयन्ति ॥ ८ ॥ तं यदि गार्हपत्यः पूर्वः प्राप्नुयात् । तद्विद्यात्प्रतिष्ठ ऽएनमग्निः पूर्वः प्रापत्प्रतिष्ठास्यति प्रत्येव तेऽस्मिँल्लोके स्थास्यन्ति येऽस्मात्प्रत्यञ्च ऽइति ॥ ९ ॥ अथ यद्याहवनीयः । तद्विद्यान्मुख्य ऽएनमग्निः पूर्वः प्रापन्मुखतो लोकानजैषीन्मुखमेव तेऽस्मिँल्लोके भविष्यन्ति येऽस्मात्प्रत्यञ्च ऽइति ॥ १० ॥ अथ यद्यन्वाहार्यपचनः । तद्विद्यादन्नादु ऽएनमग्निः पूर्वः प्रापदन्नमत्स्यत्यन्नमेव तेऽस्मिँल्लोकेऽत्स्यन्ति येऽस्मात्प्रत्यञ्च ऽइति ॥ ११ ॥ अथ यदि

सर्वे सकृत्। तद्विद्यात्कल्ल्याणँल्लोकमजैषीदित्येतान्यस्मिन्विज्ञानानि ॥ १२ ॥ तां वा ऽएताम्। यजमानात्माहुतिमन्ततो जुहोति स योऽस्य स्वर्गे लोको जितो भवति तत ऽआहुतिमयोऽमृतः सम्भवति ॥ १३ ॥ अथ यान्यश्ममयानि च मृन्मयानि च भवन्ति। तानि ब्राह्मणाय ‡ दद्याच्छवोद्वहमु ह तन्मन्यन्ते यस्तानि प्रतिगृह्णात्यप ऽएवैनान्यभ्यवहरेयुरापो वा ऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति ॥ १४ ॥ अथैतामाहुतिञ्जुहोति *। पुत्रो वा भ्राता वा यो वान्यो ब्राह्मणः स्याद'स्मात्त्वमधि जातोऽसि त्वदयञ्जायतांपुनः ॥ असौ स्वर्गाय लोकाय स्वाहे'त्यनपेक्षमेत्याप ऽउपस्पृशन्ति † ॥ १५ ॥

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥
कण्डिकासंख्या ॥ ९५ ॥

‡ का० श्रौ० सू० २५ ७. ३६।
* का० श्रौ० सू० २५. ७. ४०।
(१) शु० य० स० ३३. २२।
† 'अनपेक्षमित्योपस्पृशन्त्यपः'(का० श्रौ० सू० २५. ७. ४१)

[ज्योतिष्टोमप्रायश्चित्तम्]

सोमो वै राजा यज्ञः प्रजापतिः । तस्यैतास्तन्वो या ऽएता देवता या ऽएता ऽआहुतीर्जुहोति ॥ १ ॥ स यद्य-ज्ञस्याच्छैत् । यान्तत्प्रति देवताम्मन्येत तामनुसमीक्ष्य जुहु-याद्यदि दीक्षोपसत्स्वाहवनीये यदि प्रसुत ऽआग्नीध्रे वि वा ऽएतद्यज्ञस्य पर्व स्रंसते यद्ध्वलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्देवतया यज्ञम्भिषज्यति तया देवतया यज्ञम्प्रति सन्दधाति ॥ २ ॥ स यद्येनम्मनसाभि-ध्यातः । यज्ञो नोपनमेत्परमेष्ठिने स्वाहेति जुहुयात्परमेष्ठी हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥३॥ [* काण्डस्यार्धम् २३०] अथ यद्येनं वाचाभिव्याहृतः । यज्ञो नोपनमेत्प्रजापतये स्वाहेति जुहुयात्प्रजापतिर्हि स तर्हि भव-त्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥४॥ अथ यस्य राजानमुच्छेत्ता । नाहुरन्त ऽएयुरन्धसे स्वाहेति जुहुयादुन्धो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥ ५ ॥ अथ यदि सातः । किञ्चिदापद्येत सवित्रे स्वाहेति जुहुयात्सविता हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥ ६ ॥ अथ यदि दीक्षासु । किञ्चिदापद्येत विश्श्वकर्म्मणे स्वाहेति जुहुयाद्विश्श्वकर्म्मा हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥ ७ ॥ अथ यदि सोमक्रयण्याम् । किञ्चिदापद्येत पूष्णे स्वाहेति जुहुयात्पूषा हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं श्यज्ञो नमति ॥ ८ ॥ अथ यदि क्रयायोपोत्थितः । किञ्चि-

* इयमर्धकाण्डसङ्ख्याऽत्र काण्डे लिखिता । सापि 'क' पुस्तक एव ।

दापयेतेन्द्राय च मरुद्भ्यश्च स्वाहेति जुहुयादिन्द्रश्च हि स तर्हि मरुतश्च भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥९॥ अथ यदि पण्यमानः । किञ्चिदापद्येतासुराय स्वाहेति जुहुयादसुरो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १० ॥ अथ यदि क्रीतः । किञ्चिदापद्येत मित्राय स्वाहेति जुहुयान्मित्रो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ ११ ॥ अथ यद्यूरावासन्नः । किञ्चिदापद्येत विष्णवे शिपिविष्टाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि शिपिविष्टो भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १२ ॥ अथ यदि पर्युह्यमाणः । किञ्चिदापद्येत विष्णवे नरन्धिषाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि नरन्धिषो भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १३ ॥ अथ यद्यागतः । किञ्चिदापद्येत सोमाय स्वाहेति जुहुयात्सोमो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १४ ॥ अथ यद्यासन्न्यामासन्नः । किञ्चिदापद्येत वरुणाय स्वाहेति जुहुयाद्वरुणो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १५ ॥ अथ यद्याग्नीद्ध्रगतः । किञ्चिदापद्येताग्नये स्वाहेति जुहुयादग्निर्हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १६ ॥ अथ यदि हविर्द्धानगतः । किञ्चिदापद्येतेन्द्राय स्वाहेति जुहुयादिन्द्रो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसते नमति ॥ १७ ॥ अथ यद्युपावह्रियमाणः किञ्चिदापद्येताथर्वणे

स्वाहेति जुहुयादुथर्वा हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ १८ ॥ अथ यद्यꣳशुषु न्युप्तः। किञ्चिदापद्येत विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयाद्विश्वे हि स तर्हि देवा भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ १९ ॥ अथ यद्याप्यायमानः। किञ्चिदापद्येत विष्णव ऽआप्रीतपाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्ह्याप्रीतपा भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २० ॥ अथ यद्यभिषूयमाणः। किञ्चिदापद्येत यमाय स्वाहेति जुहुयाद्यमो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २१ ॥ अथ यदि सम्भ्रियमाणः। किञ्चिदापद्येत विष्णवे स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २२ ॥ अथ यदि पूयमानः। किञ्चिदापद्येत वायवे स्वाहेति जुहुयाद्वायुर्हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २३ ॥ अथ यदि पूतः। किञ्चिदापद्येत शुक्राय स्वाहेति जुहुयाच्छुक्रो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥२४॥ अथ यदि क्षीरश्रीः। किञ्चिदापद्येत शुक्राय स्वाहेति जुहुयाच्छुक्रो हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २५ ॥ अथ यदि सक्तुश्रीः। किञ्चिदापद्येत मन्थिने स्वाहेति जुहुयान्मन्थी हि स तर्हि भवत्यप पाप्मानꣳ हत ऽउपैनं ग्रसो नमति ॥ २६ ॥ अथ यदि चमसेषून्नीतः। किञ्चिदापद्येत विश्वेभ्यो देवेभ्यः स्वा-

हेति जुहुयाद्विश्वे हि स तर्हि देवा भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ २७ ॥ अथ यदि होमायोद्यतः । किञ्चिदापद्येतासवे स्वाहेति जुहुयादसुर्हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ २८ ॥ अथ यदि हूयमानः । किञ्चिदापद्येत रुद्राय स्वाहेति जुहुयाद्रुद्रो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ २९ ॥ अथ यद्यभ्यावृत्तः । किञ्चिदापद्येत व्राताय स्वाहेति जुहुयाद्व्रातो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥३०॥ अथ यदि प्रतिख्यातः । किञ्चिदापद्येत नृचक्षसे स्वाहेति जुहुयान्नृचक्षा हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ ३१ ॥ अथ यदि भक्ष्यमाणः किञ्चिदापद्येत भक्षाय स्वाहेति जुहुयाद्भक्षो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ ३२ ॥ अथ यदि नाराशः सेषु सन्नः । किञ्चिदापद्येत पितृभ्यो नाराशः सेभ्यः स्वाहेति जुहुयात्पितरो हि स तर्हि नाराशः सा भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ ३३ ॥ अथ यद्यवभृथायोद्यतः । किञ्चिदापद्येत सिन्धवे स्वाहेति जुहुयात्सिन्धुर्हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ ३४ ॥ अथ यद्यभ्यवह्रियमाणः । किञ्चिदापद्येत समुद्राय स्वाहेति जुहुयात्समुद्रो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्यज्ञो नमति ॥ ३५ ॥*

* शतम् ६२०० ।

अथ यदि प्रप्लुतः । किञ्चिदापद्येत सलिलाय स्वाहेति जुहुयात्सलिलो हि स तर्हि भवत्यप पाप्मानः हत ऽउपैनं ग्रसज्ञो नमति ॥ ३६ ॥ ता वा ऽएताः । चतुस्त्रिः शतमाज्याहुतीर्जुहोति त्रयस्त्रिःशद्वै देवाः प्रजापतिश्च तुस्त्रिःश ऽएतदु सर्वैर्देवैर्ब्रह्मभिषज्यति सर्वैर्देवैर्ब्रह्म प्रति सन्दधाति ॥३७॥ ता ब्रह्मैव जुहुयात् । नाब्रह्मा ब्रह्मा वै यज्ञस्य दक्षिणत ऽआस्ते ब्रह्मा यज्ञन्दक्षिणतो गोपायति यदि तु ब्रह्मा न विद्यादपि य ऽएव कश्च विद्यात्स जुहुयाद्ब्रह्माणन्त्वामन्य ब्रह्मणातिसृष्टस्तासां वा ऽएतासां व्याहृतीनाम्बन्धुता वसिष्ठो ह विराजं विदाञ्चकार ताꣳ हेन्द्रोऽभिदध्यौ ॥ ३८ ॥ स होवाच । ऋषे विराजः ह वै वेत्थ ताम्मे ब्रूहीति स होवाच किम्मम ततः स्यादिति सर्वस्य च ते यज्ञस्य प्रायश्चित्तिम्ब्रूयाꣳ रूपञ्च त्वा दर्शयेयेति स होवाच यन्नु मे सर्वस्य यज्ञस्य प्रायश्चित्तिम्ब्रूयाः किमु स स्याद्यन्त्वः रूपन्दर्शयेथा ऽइति जीवस्वर्ग ऽएवास्माल्लोकात्प्रेयादिति ॥ ३९ ॥ ततो हैतामृषिरिन्द्राय विराजमुवाच । इयं वै विराडिति तस्माद्योऽस्यै भूयिष्ठँल्लभते स ऽएव श्रेष्ठो भवति ॥ ४० ॥ अथ हैतामिन्द्र ऽऋषये । प्रायश्चित्तिमुवाचाग्निहोत्रादुग्म ऽआ महत ऽउक्थात्ता ह स्मैताः पुरा व्याहृतीर्वसिष्ठा ऽएव विदुस्तस्माद्ध स्म पुरा वासिष्ठ ऽएव ब्रह्मा भवति यतस्त्वेना ऽआप्त्येतर्हि य ऽएव कश्चाधीते ततोऽप्त्येतर्हि य ऽएव कश्च ब्रह्मा भवति स ह वै ब्रह्मा

भवितुमर्हति स वा ब्रह्मन्नित्यामन्त्रितः प्रतिशृणुयाद्य ऽएवमेता व्याहृतीर्वेद ॥ ४१ ॥

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥

[* सौत्रामणीहविः]

विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् । तन्त्वष्टा हतपुत्रोऽभ्यचरत्सोऽभिचरणीयमपेन्द्रः सोममाहरत्तस्येन्द्रो यज्ञवेशसङ्कृत्वा प्रासहा सोममपिबत्स त्विष्ट्वङ् व्यार्च्छत्तस्येन्द्रियं वीर्यमङ्गादङ्गादस्रवत् ॥ १ ॥ तस्याक्षिभ्यामेव तेजोऽस्रवत् । सोऽजः पशुरभवद्धूम्रोऽथ यत्पक्ष्मभ्यस्ते गोधूमा यदश्रुभ्यस्तत्कुवलम् ॥ २ ॥ नासिकाभ्यामेवास्य वीर्यमस्रवत् । सोऽविः पशुरभवन्मेषोऽथ यच्छ्लेष्मणस्ता ऽउपवाका यत्स्नीहा तद्वदरम् ॥ ३ ॥ मुखादेवास्य बलमस्रवत् । स गौः पशुरभवदृषभोऽथ ये फेनास्ते यवा यत्स्नेहस्तत्कर्कन्धु ॥ ४ ॥ श्रोत्रादेवास्य यशोऽस्रवत् । तदेकशफमभवदुश्वोऽश्वतरो गर्दभः ॥ ५ ॥ स्तनाभ्यामेवास्य शुक्रमस्रवत् । तत्पयोऽभवत्पशूनाञ्च्यो-

* सुष्ठु त्रायत इति सुत्रामा तस्येय सौत्रामणी नाम पशुयग. । स च स्वतन्त्रोऽङ्गभूतश्चेति द्विविधः । चयनानन्तरं तदङ्गत्वेनानुष्ठीयमाना सौत्रामण्यङ्गभूता । स्वातन्त्र्येण विहिता च प्रधानभूता । सा नित्या काम्या नैमित्तिकी चेति त्रिविधा । तत्र फलमनुद्दिश्य विहिता नित्या हविर्यज्ञान्तर्गता । सैव च ऋद्धिफलोद्देशेन विधीयमाना काम्या । सोमवमनादिषु निमित्तेषूत्पन्नेषु तदनन्तरमनुष्ठेयतया विहिता नैमित्तिकी । स्वतन्त्रसौत्रामण्यां ब्राह्मणस्यैवाधिकारः । अङ्गभूतायां तु क्षत्रियवैश्यावप्यधिकारिणौ ।

रुरस ऽएवास्य हृदयात्त्विषिरस्रवत्स इश्येनोऽपाष्टिहाभवद्व्रयसाꣳ राजा ॥ ६ ॥ नाभ्या ऽएवास्य शुषोऽस्रवत् । तत्सीसमभवन्नायो न हिरण्ययः रेतस ऽएवास्य रूपमस्रवत्तत्सुवर्णः हिरण्ययमभवच्छिश्नादेवास्य रसोऽस्रवत्सा परिस्रुदभवत्स्फिगीभ्यामेवास्य भामोऽस्रवत्सा सुराभवदुन्नस्य रसः ॥ ७ ॥ मूत्रादेवास्यौजोऽस्रवत् । स ऽवृकोऽभवदारण्यानाम्पशूनाꣳ ऋतिरुवध्यादेवास्य मज्ञ्युरस्रवत्स व्व्याघ्रोऽभवदारण्यानाम्पशूनाꣳ राजा लोहितादेवास्य सहोऽस्रवत्स सिꣳहोऽभवदारण्यानाम्पशूनामीशः ॥ ८ ॥ लोमभ्य ऽएवास्य चित्तमस्रवत् । ते इश्यामाका ऽअभवँस्त्वच ऽएवास्यापचितरस्रवत्सोऽश्वत्थो वनस्पतिरभवन्माꣳसेभ्य ऽएवास्योर्ग्गस्रवत्स ऽउदुम्बरोऽभवदुस्थिभ्य ऽएवास्य स्वधास्रवत्स न्यग्रोधोऽभवन्मज्ञभ्य ऽएवास्य भक्षः सोमपीथोऽस्रवत्ते व्रीहयोऽभवन्नेवमस्येन्द्रियाणि व्रीर्य्याणि व्व्युदक्क्रामन् ॥ ९ ॥ अथ ह वै तर्हि । नमुचिनैवासुरेण सह चचार स ऽऐक्षत नमुचिरपुनर्व्वा ऽअयमभूद्धन्तास्येन्द्रियं व्रीर्य्यः सोमपीथमन्नाद्यः हराणीति तस्यैतयैव सुरयेन्द्रियं व्रीर्य्यः सोमपीथमन्नाद्यमहरस्स ह न्यण्णः शिश्नये तन्देवा ऽउपसञ्जग्मिरे श्रेष्ठो वै नोऽयमभूत्तमिमम्पाप्मानविदद्धन्तेमम्भिषज्यामेति ॥ १० ॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्मणौ भिषजौ स्थो युवमिमम्भिषज्यतमिति तावब्रूतामस्तु नौ भाग ऽइति तेऽब्रुवन्न्य ऽएषोऽजः स वाम्भाग ऽइति तथेति तस्मा-

दाश्विनो धूम्रो भवति ॥ ११ ॥ ते सरस्वतीमब्रुवन् । त्वं वै भैषज्यमसि त्वमिमम्भिषज्ज्येति साब्रवीद्वरं तु मे भाग ऽइति तेऽब्रुवन्य ऽएषोऽविः स ते भाग ऽइति तथेति तस्मात्सारस्वतो मेषो भवति ॥ १२ ॥ अथाब्रुवन् । एतावद्वा ऽअस्मिन्नेतर्हि यावदयमृषभोऽस्यैवायमस्त्विति तथेति तस्मादैन्द्र ऽऋषभो भवति ॥ १३ ॥ तावश्विनौ च सरस्वती च । इन्द्रियं वीर्य्यन्नमुचेराहृत्य तदस्मिन्नपुनरदधुस्तम्पाप्मनोऽत्रायन्त सुत्रातम्बतैनम्पाप्मनोऽत्रास्महीति तद्वाव सौत्रामण्यभवत्तत्सौत्रामण्यै सौत्रामणीत्वन्त्रायते मृत्योरात्मानमप पाप्मानꣳ हते य ऽएवमेतत्सौत्रामण्यै सौत्रामणीत्वं वेद त्रयस्त्रिꣳशद्दक्षिणा भवन्ति त्रयस्त्रिꣳशद्धि तन्देवता ऽअभिषज्यँस्तस्मादाहुर्भेषजन्दक्षिणा ऽइति ॥ १४ ॥

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[सुराक्रयादि]

अप वा ऽएतस्मात् । तेज ऽइन्द्रियं वीर्य्यङ्क्रामति यꣳ सोमोऽतिपवत ऽऊर्द्धं वावाश्वं वा ॥ १ ॥ तदाहुः । अन्नं वा ऽएतद्ब्राह्मणस्य यत्सोमो न वै सोमेन ब्राह्मणꣳ सोमवामी स यो वा ऽअलम्भूत्यै सन्नभूतिन्न प्राप्नोति यो वालम्पशुभ्यः सन्नपशून्न विन्दते स सोमवामी पशवो हि सोम ऽइति ॥ २ ॥ स ऽएतमाश्विनन्धूम्रमालभेत ।

(१) 'ग' 'ज' पुस्तकयोः "चा" इति ।

सारस्वतम्मेषमैन्द्रमृषभमश्विनौ वै देवानाम्भिषजौ ताभ्यामेवैनम्भिषज्यति सरस्वती भेषजन्तयैवास्मै भेषजङ्करोतीन्द्र ऽइन्द्रियं वीर्य्यन्तेनैवास्मिन्निन्द्रियं वीर्य्यन्दधाति ॥ ३ ॥ चक्षुर्व्वा ऽअश्विनौ तेजः । यदाश्विनो भवति चक्षुरेवास्मिँस्तत्तेजो दधात्यथो श्रोत्रः समानः हि चक्षुश्च श्रोत्रञ्च ॥४॥ प्राणः सरस्वती वीर्य्यम् । यत्सारस्वतो भवति प्राणमेवास्मिँस्तद्वीर्य्यन्दधात्यथो ऽअपानः समानः हि प्राणश्चापानश्च ॥५॥ [अर्धप्रपाठकः ६०] वागिन्द्रो बलम् । यदैन्द्रो भवति वाचमेवास्मिँस्तद्बलन्दधात्यथो मनः समानः हि वाक्च मनश्च ॥ ६ ॥ आश्विनीरजाः । सारस्वतीरवीरैन्द्रीर्ग्गाव ऽइत्याहुर्य्यदेते पशव ऽआलब्भ्यन्त ऽएताभिरेव देवताभिरेतान्पशूनवरुन्द्धे ॥ ७ ॥ वडवानुशिशुर्भवति । यश ऽएवैकशफमवरुन्द्ध ऽआरण्यानाम्पशूनाँल्लोमानि भवन्त्यारण्यानाम्पशूनामवरुद्ध्यै वृकलोमानि भवन्त्योज ऽएव जूतिमारण्यानाम्पशूनामवरुन्द्धे व्याघ्रलोमानि भवन्ति मन्युमेव राज्यमारण्यानाम्पशूनामवरुन्द्धे सिंहलोमानि भवन्ति सह ऽएवेशामारण्यानाम्पशूनामवरुन्द्धे ॥ ८ ॥ व्रीहयश्च श्यामाकाश्च भवन्ति । गोधूमाश्च कुवलानि (A) चोपवाकाश्च बदराणि (B) च यवाश्च कर्क्कन्धूनि च शष्पाणि * च तोक्मानि † चोभयमेव

(A) स्थूलानि बदरीफलानि ।

(१) उपवाका इन्द्रयवा. ।

(B) सूक्ष्मबदरीफलानि ।

(२) 'ग' 'ज' पुस्तकयोः 'च' इति नास्ति ।

* विरूढा व्रीहयः शष्पाणि । † विरूढा यवाः तोक्माः ।

ग्राम्यश्चान्नमारण्यश्चावरुन्द्धेऽथो ऽउभयेनैवान्नेन यथारूपमिन्द्रियं वीर्य्यमात्मन्धत्ते ॥ ९ ॥ सीसेन शष्प्पाणि क्रीणाति । ऊर्ण्याभिस्तोक्मानि सूत्रैर्व्रीहीनुभयोर्वा ऽएतद्रूपमयसश्च हिरण्यस्य च यत्सीसमुभयꣳ सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यावरुद्ध्यै ॥ १० ॥ ऊर्ण्यासूत्रेण वक्रीणाति । तद्वा ऽएतत्स्त्रीणाङ्कर्म्म यदूर्ण्यासूत्रङ्कर्म्म वा ऽइन्द्रियं वीर्य्यन्तदेतदुत्सन्नꣳ स्त्रीषु तद्यदेवेन्द्रियं वीर्य्यमुत्सन्नꣳ स्त्रीषु तदेवावरुन्द्धे ॥ ११ ॥ तद्धैतदन्येऽङ्गूर्य्यवः । सीसेन क्लीबाच्छष्प्पाणि वक्रीणन्ति तत्तदिति न वा ऽएष स्त्री न पुमान्यत्क्लीबो नेष्टिर्न पशुबन्धः सौत्रामणीति ब्रुवन्तस्तदु तथा न कुर्य्यादुभयं वै सौत्रामणीष्टिश्च पशुबन्धश्च व्यृद्धमु वा ऽएतन्मनुष्येषु यत्क्लीबो यज्ञमुख ऽएव ते यज्ञस्य व्यृद्धिन्दधति ये तथा कुर्वन्ति सोमविक्रयिण ऽएव वक्रीणीयात्सोमो वै सौत्रामणी यज्ञमुख ऽएव तत्सोमरूपङ्करोति यज्ञस्य समृद्ध्यै ॥ १२ ॥ शतातृण्णा कुम्भी भवति । बहुधेव हि स व्यस्रवदुथो शतोष्मानो वै यज्ञो यज्ञमेवावरुन्द्धे सतम्भवति सदेवावरुन्द्धे चप्प्यम्भवत्यन्नाद्यस्यैवावरुद्ध्यै पवित्रम्भवति पुनन्ति ह्येनं बालो भवति पाप्मनो व्यावृत्त्यै सुवर्णꣳ हिरण्यम्भवति रूपस्यैवावरुद्ध्यै शतमानम्भवति शतायुर्वै पुरुषः शतेन्द्रिय ऽआयुरेवेन्द्रियं वीर्य्यमात्मन्धत्ते ॥ १३ ॥ आश्वत्थम्पात्रम्भवति । अपचितिमेवावरुन्द्ध ऽऔदुम्बरम्भवत्यूर्जमेवावरुन्द्धे नैयग्रोधम्भवति स्वधामेवा-

वरुन्द्धे स्थाल्ल्यो भवन्ति पृथिव्व्या ऽएवान्नाद्यमवरुन्द्धे ॥ १४ ॥ पालाशान्युपशयानि भवन्ति । ब्ब्रह्म वै पलाशो ब्ब्रह्मणैव स्वर्ग्गल्लोकञ्जयत्यपाष्टिहस्य पत्रे भवतस्त्विषिमेव राज्ज्यं व्वयसामवरुन्द्धे षट्त्रिःशदेतानि भवन्ति षट्त्रिःशदक्षरा वै बृहती व्वार्हताः पशवो बृहत्त्यैवास्म्मै पशूनवरुन्द्धे ॥१५॥ तदाहुः । अन्न्यदेवत्त्याः पशवो भवन्त्यन्न्यदेवत्त्याः पुरोडाशा व्विलोमैतत्क्रियते कथमेतत्सलोम भवतीत्यैन्द्रः पशूनामुत्तमो भवत्यैन्द्रः पुरोडाशानाम्प्रथम ऽइन्द्रियं वै व्वीर्य्यमिन्द्र ऽइन्द्रियेणैवास्म्मा ऽइन्द्रियं व्वीर्य्यः सन्दधातीन्द्रियेणेन्द्रियं व्वीर्य्यमवरुन्द्धे ॥ १६ ॥ सावित्रः पुरोडाशो भवति । सवितृप्प्रसूतत्तायै वारुणो भवति व्वरुणो वा ऽएतङ्गृह्णाति यः पाप्म्मना गृहीतो भवति व्वरुणेनैवैनं व्वरुण्यान्मुञ्चत्यन्तो भवत्यन्ततः ऽएवैनं व्वरूणपाशात्प्रमुञ्चति ॥ १७ ॥ एकादशकपाल ऽऐन्द्रो भवति । एकादशाक्षरा वै त्रिष्ट्टुबिन्द्रियमु वै व्वीर्य्यन्त्रिष्ट्टुबिन्द्रियस्यैव व्वीर्य्यस्यावरुद्ध्यै ॥ १८ ॥ द्वादशकपालः सावित्रो भवति । द्वादश वै मासाः सँव्वत्सरस्य सँव्वत्सरं वा ऽअन्नाद्यमश्व्वायत्तः सँव्वत्सरादेवास्म्मा ऽअन्नाद्यमवरुन्द्धे ॥ १९ ॥ दुशकपालो वारुणो भवति । दुशाक्षरा वै विराड्ड्रन्नं विराड्ड्रुरुणोऽन्नपतिर्व्वरुणेनैवास्म्मा ऽअन्नमवरुन्द्धे मद्ध्यत ऽएतैः पुरोडाशैः प्प्रचरति मद्ध्यं वा ऽएतेषां रूयोनिः स्वादेवैनान्न्योनेः प्प्रजनयति ॥ २० ॥ व्वडव्वानुशिशुर्द्दक्षिणा भवति । उभयं वा ऽएषा जनय-

त्यश्वश्चाश्वतरश्चोभयतः सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यैवावरुद्ध्यै ॥ २१ ॥

सप्तमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[सौत्रामणीग्रहग्रहणादि]

इन्द्रस्येन्द्रियमन्नस्य रसम् । सोमस्य भक्षः सुरयासुरो नमुचिरहरत्सोऽश्विनौ च सरस्वतीश्चोपाधावच्छेपानोऽस्मि नमुचये न त्वा दिवा न नक्तं हनानि न दण्डेन न धन्वना न पृथेन न मुष्टिना न शुष्केण नार्द्रेणाथ म इदमहार्षीदिदम्म आजिहीर्षतीति ॥ १ ॥ तेऽब्रुवन् । अस्तु नोऽत्राप्यथाहरामेति सह न एतदथाहरतेत्यब्रवीदिति ॥ २ ॥ तावश्विनौ च सरस्वती च । अपाम्फेनं ब्रह्मसिञ्चन्न शुष्को नार्द्र इति तेनेन्द्रो नमुचेरासुरस्य व्युष्टायाꣳ रात्रावनुदित आदित्ये न दिवा न नक्तमिति शिर उदवासयत् ॥ ३ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । 'अपाम्फेनेन नमुचेः शिर इन्द्रोदवर्त्तयः ॥ विश्वा यदजय स्पृध' इति पाप्मा वै नमुचिः पाप्मानं वाव तद्द्विषन्तम्भ्रातृव्यः हत्वेन्द्रियं वीर्यमस्यावृङ्क्त स यो भ्रातृव्यवान्स्यात्स सौत्रामण्या यजेत पाप्मानमेव तद्द्विषन्तम्भ्रातृव्यः हत्वेन्द्रियं वीर्यमस्य वृङ्क्ते तस्य शीर्षञ्छिन्ने लोहितमिश्रः सोमोऽतिष्ठत्तस्मादबीभत्सन्त त एतदुन्धसोर्विपानमपश्यन्त्सोमो राजामृतः

(१) शु० य० सं० १९. ७१। (२) शु० य० सं० १९. ७२।

सुत, ऽइति तेनैनꣳ स्वदयित्वात्मन्नदधत ॥४॥ 'स्वाद्वीन्त्वा स्वादुने'ति सुराꣳ सन्दधाति । स्वदयत्येवैना'न्तीव्व्रान्ती-व्व्रेणे'तीन्द्रियमेवास्मिन्दधात्य'मृताममृतेने'त्यायुरेवास्मिन्दधाति 'मधुमतीम्मधुमते'ति रसमेवास्यान्दधाति 'सृजामि सꣳ सोमेने'ति सोमरूपमेवैनाङ्करोति ॥ ५ ॥ 'सोमोऽस्यश्विव्व्भ्याम्पच्च्यस्व । सरस्वत्यै पच्च्यस्वेन्द्राय सुत्राम्णे पच्च्यस्वे'त्येता वा ऽएतन्देवता ऽअग्ने यज्ञꣳ समभरँस्ताभिरेवैनꣳ सम्भरत्यथो ऽएता ऽएवैतद्देवता भागधेयेन समर्द्धयत्यासुनोति सुत्यायै तिस्रो रात्रीर्व्वसति तिस्रो हि रात्रीꣳ सोमꣳ क्रीतो व्वसति सोमरूपमेवैनाङ्करोति ॥ ६ ॥ द्वे व्वेदी * भवतꣳ । द्वौ वाव लोकावित्याहुर्द्देवलोकश्चैव पितृलोकश्चेत्युत्तरान्न्या भवति दक्षिणान्न्योत्तरो वै देवलोको दक्षिणꣳ पितृलोक ऽउत्तरयैव देवलोकमवरुन्द्धे दक्षिणया पितृलोकम् ॥ ७ ॥ पयश्च सुरा च भवतꣳ । सोमो वै पयोऽन्नꣳ सुरा पयसैव सोमपीथमवरुन्द्धे सुरयान्नाद्यं क्षत्रं वै पयो विट् सुरा सुराम्पूत्वा पयꣳ पुनाति विश ऽएव तत्क्षत्रञ्जनयति विशो हि क्षत्रञ्जायते ॥ ८ ॥ 'वाँयोः पूतः पवित्रेण । प्रत्यङ्क्सोमो ऽअतिद्रुत, ऽइति सोमातिपूतस्य † पुनाति यथारूपमेवैनम्पुनाती'न्द्रस्य

(१) शु० य० स० १९. १। (२) शु० य० सं० १९. १। (३) शु० य० सं० १९. १। (४) शु० य० सं० १९. १। (५) शु० य० सं० १९. १। (६) शु० य० सं० १९. १।

* का० श्रौ० सू० १९. २. १।

(७) शु० य० सं० १९. ३।

† मुखेतरच्छिद्रसोमवामिन इत्यर्थः। (८) शु० य० स० १९. ३।

युज्यः सखे'ति यदेवास्य तेनेन्द्रियं वीर्य्यमतिक्रान्तम्भवति तदस्मिन्न्पुनर्द्दधाति ॥ ९ ॥ 'वायोः[1] पूतः[2] पवित्रेण। प्राङ्क्सोमो ऽअतिद्रुत' ऽइति सोमवामिनः[3] पुनाति यथारूपमेवैनम्पुनाती'न्द्रस्य[4] युज्यः सखे'ति यदेवास्य तेनेन्द्रियं वीर्य्यमतिक्रान्तम्भवति तदस्मिन्न्पुनर्द्दधाति ॥ १० ॥ 'पुनाति[5] ते परिस्रुत'मिति। समृद्धिकामस्य पुनाति समृद्ध्यै 'सोमः[6] सूर्य्यस्य दुहिते'ति श्रद्धा वै सूर्य्यस्य दुहिता श्रद्धयैष सोमो भवति श्रद्धयैवैनः सोमङ्करोति 'वारेण शश्वता तने'ति वालेन ह्येषा पूयते ॥ ११ ॥ 'ब्रह्म[7] क्षत्रम्पवत' ऽइति पयः पुनाति। ब्रह्मण ऽएव तत्क्षत्रञ्जनयति ब्रह्मणो हि क्षत्रञ्जायते 'तेजः ऽइन्द्रिय'मिति तेज ऽएवास्मिन्निन्द्रियं वीर्य्यन्दधाति 'सुरया[8] सोम' ऽइति सुरया हि सोमः 'सुते ऽआसुत' ऽइत्यासुताद्धि सूयते 'मदाये[10]'ति मदाय वाव सोमो मदाय सुरोभावेव सोममद्य सुरामदञ्चावरुन्द्धे 'शुक्रेण[11] देव देवताः पिपृग्धी'ति शुक्रेण देव देवताः प्रीणीहीत्येवैतदाह 'रसेन[12]ान्नं यजमानाय धेही'ति रसमेवान्नं यजमाने दधाति पूर्वे पयोग्रहा गृह्यन्तेऽपरे सुराग्रहा विशन्तत्क्षत्रस्यानुवर्त्मानङ्करोति ॥ १२ ॥ 'कविर्[13]दङ्ग यवमन्तो यवञ्चि'दिति। पयोग्रहान्न्यङ्क्ते * सोमाꣳशवो वै यवाः सोमः पयः

(१) शु० य० सं० १९. १। (२) शु० य० सं० १९. १। (३) शु० य० सं० १९. ४। (४) शु० य० सं० १९. ४। (५) शु० य० सं० १९. ४। (६-१२) शु० य० सं० १९. ५। (१३) शु० य० सं० १९. ६।

* का० श्रौ० सू० १९. २. १४।

सोमेनैवैनꣳ सोमङ्करोत्येकया गृह्णात्येकधैव यजमाने श्रिश्रयन्दधाति श्रीर्हि पयः ॥ १३ ॥ 'नाना हि वान्देव-हितꣳ सदस्कृत'मिति । सुराग्रहान्गृह्णाति नाना हि सोमश्च सुरा च देवहितमिति देवहिते ह्येते नाना सदस्कृतमिति द्वे हि वेदी भवतो 'मा सꣳस्क्षाथाम्परमे व्योम'न्निति पाप्मनैवैनं व्यावर्त्तयति 'सुरा त्वमसि शुष्मिणी'ति सुरामेव सुराङ्करोति 'सोमँ ऽएष'ऽइति सोममेव सोमङ्करोति 'मा मा हिꣳसीः स्वां योनिमाविशन्ती'ति यथायोन्येवैनां व्यावर्त्तयत्यात्मनोऽहिꣳसाया ऽएकया गृह्णात्येकधैव यजमाने यशो दधाति यशो हि सुरा ॥ १४ ॥ क्षत्रं वै पयोग्रहाः विट् सुराग्रहा यदुव्यतिषक्तान्गृह्णीयाद्विशं क्षत्राद्व्यवच्छिन्द्यात्क्षत्रं विशः पापवस्यसङ्कुर्य्याद्यज्ञस्य व्यृद्धिं व्यतिषक्तान्गृह्णाति विशमेव क्षत्रेण सन्दधाति क्षत्रं विशा पापवस्यसस्य व्यावृत्यै यज्ञस्य समृद्ध्यै ॥ १५ ॥ प्राणा वै पयोग्रहाः । शरीरꣳ सुराग्रहा यदुव्यतिषक्तान्गृह्णीयाच्छरीरम्प्राणेभ्यो व्यवच्छिन्द्यात्प्राणाञ्छरीरात्प्रमायुको यजमानः स्याद्व्यतिषक्तान्गृह्णाति शरीरमेव प्राणैः सन्दधाति प्राणाञ्छरीरेणाथो ऽआयुरेवास्मिन्दधाति तस्मात्सौत्रामण्येजानꣳ सर्वमायुरेत्यथो य ऽएवमेतद्वेद ॥ १६ ॥ सोमो वै पयोग्रहाः । अन्नꣳ सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते सोमपीथश्चैवान्नाद्यञ्चावरुन्द्धे

(१) शु० य० सं० १९. ७। (२) शु० य० सं० १९. ७। (३) शु० य० सं० १९. ७। (४) शु० य० सं० १९. ७। (५) शु० य० सं० १९. ७।

॥ १७ ॥ पशवो वै पयोग्रहाः । अन्नः सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते पशूँश्चैवान्नाद्यञ्चावरुन्द्धे ॥ १८ ॥ ग्राम्या वै पशवः पयोग्रहाः । आरण्याः सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते ग्राम्यॉंश्चैव पशूनारण्याँश्चावरुन्द्धे ग्राम्येण चान्नेनारण्येन च पयोग्रहाञ्छ्रीणाति तस्माद्ग्राम्याणाम्पशूनाङ्ग्राम्यश्चैवान्नाद्यमारण्यञ्चावरुद्धम् ॥ १९ ॥ तदाहुः । एतस्यै वा ऽएतदघलायै देवतायै रूपं क्रियते घोरा ऽआरण्याः पशवो यदेतेषाम्पशूनाँल्लोमभिः पयोग्रहाञ्छ्रीणीयाद्रुद्रस्यास्ये पशूनपिदध्यादपशुर्यजमानः स्याद्यन्न श्रीणीयादनवरुद्धा ऽअस्य पशवः स्यू रुद्रो हि पशूनामीष्ट ऽइति सुराग्रहानेवैतेषाम्पशूनाँल्लोमभिः श्रीणाति सुरायामेव तद्रौद्रन्दधाति तस्मात्सुराम्पीत्वा रौद्रमना ऽअथो ऽआरण्येष्वेव पशुषु रुद्रस्य हेतिन्दधाति ग्राम्याणाम्पशूनामहिꣳसाया ऽअवरुद्धा ऽअस्य पशवो भवन्ति न रुद्रस्यास्ये पशूनपिदधाति ॥ २० ॥ 'यौ व्याघ्रं विषूचिका । उभौ वृकञ्च रक्षति॥ इश्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः' ॥ 'यदापिपेष मातरम्पुत्रः प्रमुदितो धयन्॥ एतत्तदग्ने ऽअनृणो भवाम्यहतौ पितरौ मये'ति ॥ २१ ॥ अद्धर्युश्च प्रतिप्रस्थाता च । जघनेन वेदिम्प्राञ्चमावृत्तं यजमानꣳ श्येनपत्राभ्यामूर्द्धञ्चावाञ्चञ्च पावयतः प्राणोदानयोस्तद्रूपम्प्राणोदानाः

(१) शु० य० सं० १९. १०। (२) शु० य० सं० १९. ११।

वेवावरुन्द्ध ऽऊर्द्धश्च ह्यमवाङ् च प्राण ऽआत्मानमनु-
सञ्चरति 'सम्पृच स्थ सम्मा भद्रेण पृङ्क्ते'ति पयोग्रहा-
न्त्समम्मृशति श्रियैवैनं व्यशसा समर्द्धयति 'विपृच स्थ वि
मा पाप्मना पृङ्क्ते'ति सुराग्रहान्न्पाप्मनैवैनं व्यावर्त्त-
यति ॥ २२ ॥

सप्तमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

[ग्रहभक्षणसुरापावनादि]

इन्द्रस्य वै यत्र । इन्द्रियाणि वीर्य्याणि व्यद्रुक्रा-
मँस्तानि देवा ऽएतेनैव यज्ञेन पुनः समदधुर्य्यत्पयोग्रहाश्च
सुराग्रहाश्च गृह्यन्त ऽइन्द्रियाण्येवास्मिमँस्तद्वीर्य्याणि
पुनः सन्दधत्युत्तरेऽग्नौ पयोग्रहाञ्जुह्वति शुक्रेणैवैनन्तत्सो-
मपीथेन समर्द्धयन्ति ॥ १ ॥ स जुहोति 'सुरावन्तम्बर्हिषदः
सुवीर'मिति सुरावान्त्वा ऽएष बर्हिषद्यज्ञो यत्सौत्रामणी
बर्हिषैवैनं व्यज्ञेन समर्द्धयति 'यज्ञः हिन्वन्ति महिषा
नमोभि'रित्यृत्विजो वै महिषा यज्ञो नम ऽऋत्विग्भिरेव
यज्ञः समर्द्धयति यज्ञेन यजमान'न्दुधाना सोम'मिति सोम-
पीथमेवास्मिन्दधति 'दिवि देवतास्वि'ति दिव्येवैनन्दे-
वतासु दधति 'मदेमेन्द्र'मिति मदाय वाव सोमो मदाय
सुरोभावेव सोममदश्च सुरामदश्चावरुन्द्धे 'यजमानाः

(३) शु० य० सं० १९. ११। (४) शु० य० सं० १९. ११। (५) शु० य० सं० १९ ३२। (६) शु० य० सं० १९. ३२। (७) शु० य० सं० १९. ३२। (८) शु० य० सं० १९. ३२। (९) शु० य० सं० १९. ३२। (१०) शु० य० सं० १९. ३२।

स्वर्क्का' ऽइत्यर्क्को * वै देवानामन्नमन्नं ह्यज्रो यज्ञेनैवैनमन्नाद्येन समर्द्धयति हुत्वा भक्षयन्ति समृद्धमेवास्य तद्वर्द्धयन्ति ॥ २ ॥ स भक्षयति । 'यमश्विना नमुचेरासुरादधी'त्यश्विनौ ह्येतन्नमुचेरध्याहरताꣳ 'सरस्वत्यसुनोदिन्द्रियाये'ति सरस्वती ह्येतमसुनोदिन्द्रियाये'मन्तः शुक्रम्मधुमन्तमिन्दु'मिति शुक्रो वा ऽएष मधुमानिन्दुर्यत्सोमः 'सोमꣳ राजानमिह भक्षयामी'ति सोम ऽएवास्य राजा भक्षितो भवति दक्षिणेऽग्नौ सुराग्रहाञ्जुह्वति पाप्मनैवैनन्तद्व्यावर्त्तयन्ति ॥ ३ ॥ स जुहोति । 'यस्ते रसः सम्भृत ऽओषधीष्विव'त्यपाश्च वा ऽएष ऽओषधीनाश्च रसो यत्सुरापाश्चैवैनमेतदोषधीनाश्च रसेन समर्द्धयति 'सोमस्य शुष्म्मः सुरया सुतस्ये'ति य ऽएव सोमे शुष्म्मो यः सुरायान्तमेवावरुन्द्धे 'तेन जिन्व यजमानम्मदेने'ति तेन प्रीणीहि यजमानम्मदेनेत्येवैतदाह 'सरस्वतीमश्विनाविन्द्रमग्नि'मिति देवताभिरेव यज्ञꣳ समर्द्धयति देवताभिर्यज्ञेन यजमानꣳ हुत्वा भक्षयन्ति व्यृद्धमेवास्य तत्समर्द्धयन्ति ॥४॥ स भक्षयति । 'यदिन्द्र रिप्तꣳ रसिनः सुतस्ये'ति सुतासुतयोरेव रसमवरुन्द्धे 'यदिन्द्रो ऽअपिबच्छचीभि'रितीन्द्रो ह्येतदपिवच्छचीभिर'हन्तदस्य मनसा शिवेने'त्यशिव ऽइव वा

* 'अर्कमन्न भवत्यर्चति भूतानि' (निरु० नै० का० ५. ४)।

(१) शु० य० सं १९. ३४। (२) शु० य० सं० १९. ३४। (३) शु० य० सं० १९. ३४। (४) शु० य० सं० १९. ३४। (५) शु० य० सं० १९. ३३।

(६) 'सुरापाश्चैन०' इति 'ग' 'ज' पुस्तकयोः पाठः।

(७) शु० य० सं० १९. ३३।

(८) शु० य० सं० १९. ३३। (९) शु० य० सं० १९. ३३। (१०) शु० य० सं० १९. ३५। (११) शु० य० स० १९. ३५। (१२) शु० य० सं० १२. ३५।

ऽएष भक्षो यत्सुरा ब्राह्मणस्य शिवमेवैनमेतत्कृत्वात्मन्धत्ते 'सोमः[1] राजानमिह भक्षयामी'ति सोम ऽएवास्य राजा भक्षितो भवति ॥ ५ ॥ तद्धैतदुन्येऽद्धर्य्वः । राजन्यं वा वैश्यं वा परिक्रीणन्ति स ऽएतद्भक्षयिष्यतीति तदु तथा न कुर्य्याद्यो ह वा ऽएतद्भक्षयति तस्य हैवम्पितॄन्[2]पितामहानेष सोमपीथोऽन्वेति दक्षिणस्यैवाग्नेस्त्रीन्[3]ङ्गारान्निर्व्वर्त्य बहिष्परिधि तदेताभिर्व्व्याहृतिभिर्जुहुयात् ॥ ६ ॥ 'पितृ[4]भ्यः स्वधायिभ्यः स्वधा नम' ऽइति । पितृनेव पितृलोके स्वधायान्दधाति 'पितामहे[5]भ्यः स्वधायिभ्यः स्वधा नम' ऽइति पितामहानेव पितामहलोके स्वधायान्दधाति 'प्रपितामहे[6]भ्यः स्वधायिभ्यः स्वधा नम' ऽइति प्रपितामहानेव प्रपितामहलोके स्वधायान्दधाति ॥ ७ ॥ अप ऽआनीय निनयति । 'अक्षन्[7]न्पितर' ऽइत्यन्नाद्यमेवैषु दधात्य'मीमदन्त पितर' ऽइति मदयत्येवैनान्'तीतृपन्त पितर' ऽइति तर्प्पयत्येवैना'न्पितरः[8] शुन्धद्ध्व'मित्यनुपूर्व्वमेवैनान्त्सर्व्वान्पावयति पवित्रं वै सौत्रामणी ॥ ८ ॥ त्रिभिः पवित्रैः पावयन्ति । त्रयो वा ऽइमे लोका ऽएभिरेवैनँल्लोकैः पुनन्ति ॥ ९ ॥ पावमानीभिः पावयन्ति । पवित्रं वै पावमान्यः पवित्रेणैवैनम्पुनन्ति ॥ १० ॥ तिसृभिस्तिसृभिः पावयन्ति । त्रयो वै प्राणाः

(१) शु० य० सं० १९. ३५। (२) शु० य० स० १९. ३६। (३) शु० य० सं० १९. ३६। (४) शु० य० सं० १९. ३६। (५) शु० य० सं० १९. ३६। (६) शु० य० सं० १९. ३६। (७) शु० य० सं० १९. ३६। (८) शु० य० सं० १९. ३६।

प्राण ऽउदानो व्यानस्तैरेवैनम्पुनन्ति ॥ ११ ॥ नवभिः पावयन्ति । नव वै प्राणा प्राणैरेवैनम्पुनन्ति प्राणेषु पुनः पूतम्प्रतिष्ठापयन्ति ॥ १२ ॥ पवित्रेण पावयन्ति । अजाविकस्य वा ऽएतद्रूपं यत्पवित्रमजाविकेनैवैनम्पुनन्ति ॥ १३ ॥ वालेन पावयन्ति । गोऽश्ववस्य वा ऽएतद्रूपं यद्वालो गोऽश्वेनैवैनम्पुनन्ति ॥ १४ ॥ हिरण्येन पावयन्ति । देवानां वा ऽएतद्रूपं यद्धिरण्यन्देवानामेवैनः रूपेण पुनन्ति ॥ १५ ॥ सुरया पावयन्ति । सुरा हि पूता पूतयैवैनम्पुनन्ति तद्यथा सुरा पूयमाना वल्कसेन विविच्यत ऽएवमेवैतद्यजमानः सर्वस्मात्पाप्मनो निर्म्मुच्यते य ऽएवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥ १६ ॥ तदाहुः । याजयितव्यः सौत्रामण्या३ न याजयितव्या३मित्यनन्तरायꣳ ह्येवास्यै[1] सर्वम्पाप्मानमपघ्नन्तीति तदु ह स्माह रेवोत्तरा स्थपतिः पाटवश्चाक्रोऽपि प्रदानम्प्रदाय याजयितव्यमेवात्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजो यत्र वा ऽआत्मा पूतः पूतानि तत्राङ्गान्युभय ऽएव पुनत ऽउभये पाप्मानमपघ्नते तस्मादपि प्रदानम्प्रदाय याजयितव्यमेवेति ॥ १७ ॥ पितृलोकं वा ऽएतेऽन्ववयन्ति । ये दक्षिणेऽग्नौ चरन्त्याज्याहुतिर्जुहोति यज्ञो वा ऽआज्यं यज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥ १८ ॥ स जुहोति । 'ये[2] समानाः समनसः पितरो यमराज्ये ॥ तेषाꣳलोकः स्वधा नमो यज्ञो देवेषु कल्पता'मिति

(१) "ह्येवास्मात्" इति 'ग' 'ज' पुस्तकयोः । (२) शु० य० सं० १९. ४५ ।

पितृनेव यमे परिददात्यथो पितृलोकमेव जयति सर्वे यज्ञोपवीतानि कृत्वोत्तरमग्निमुपसमायन्त्ययं वै लोक ऽउत्तरोऽग्निरस्मिन्नेव लोके प्रतितिष्ठन्त्याज्याहुतिञ्जुहोति यज्ञो वा ऽआज्यं स्वयज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥ १९ ॥ स जुहोति । 'ये समानाः समनसो जीवा जीवेषु मामकाः ॥ तेषाꣳ श्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समा' ऽइति स्वानामेव श्रियमवरुन्द्धेऽथो ज्योग्जीवातुमेवैषु दधाति पयः समन्वारब्धेषु जुहोति प्राणो वा ऽअन्नम्पयः प्राण ऽएवान्नाद्येऽन्ततः प्रतितिष्ठन्ति ॥२०॥ स जुहोति । 'द्वे सृती ऽअशृणवम्पितृणामह'मिति द्वे वाव सृती ऽइत्याहुर्देवानाञ्चैव पितृणाञ्चेति 'ताभ्यामिदं विश्वमेजत्समेती'ति ताभ्याꣳ हीदꣳ सर्वमेजत्समेति 'यदन्तरा पितरम्मातरञ्चे'त्यसौ वै पितेयम्माताभ्यामेव पितृन्देवलोकमपिनयत्येकाकी हुतोच्छिष्टम्भक्षयत्येकधैव श्रियमात्मन्धत्ते श्रीर्हि पयः ॥ २१ ॥ स भक्षयति । 'इदꣳ हविः प्रजननम्मे ऽअस्तु'ति प्रजननꣳ हि यदि पयो यदि सोमो 'दशवीर'मिति प्राणा वै दश वीराः प्राणानेवात्मन्धत्ते 'सर्वगꣳण'मित्यङ्गानि वै सर्वे गणा ऽअङ्गान्येवात्मन्धत्ते 'स्वस्तय ऽआत्मसनी'त्यात्मानमेव सनोति

(१) शु० य० सं० १९. ४६। (२) शु० य० सं० १९. ४७। (३) शु० य० सं० १९. ४७। (४) शु० य० सं० १९. ४७। (५) शु० य० सं० १९. ४८। (६) शु० य० सं० १९. ४८। (७) शु० य० सं० १९. ४८। (८) शु० य० सं० १९. ४८। (९) शु० य० सं० १९. ४८।

'[1]प्रजासनी'ति प्रजामेव सनोति '[2]पशुसनी'ति पशूनेव सनोति 'लोक[3]सनी'ति लोकाय वै यजते तमेव जयत्य'[4]भय-सनी'ति स्वर्गो वै लोकोऽभयꣳ स्वर्ग ऽएव लोकेऽन्ततः प्रतितिष्ठत्य'[5]ग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतो ऽअस्मासु धत्ते'ति तद्य ऽएवैनमेते याजयन्ति तानेतदाहै-तन्म्मयि सर्व्वन्धत्तेति हिरण्ययेन मार्ज्जयन्तेऽमृतं वै हिरण्यम-मृत ऽएवान्ततः प्रतितिष्ठन्ति ॥ २२ ॥

अष्टमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
कण्डिकासंख्या १२० ॥

[सुरानिर्माणादि]

प्रजापतिर्य्यज्ञमसृजत । तमाहरत्तेनायजत तेनेष्ट्वा रिरिचान ऽइवामन्यत स ऽएतं य्यज्ञक्रतुमपश्यत्सौत्रा-मणीन्तेनायजत ततो वै स पुनराप्प्यायत रिच्च्यत ऽइव वा ऽएष यः सोमेन यजते वीव ह्यस्य वित्तं वेदो हरन्ति ॥ १ ॥ सोमेनेष्ट्वा सौत्रामण्या यजेत । यथा धेनुर्दुग्धा पुनराप्प्यायेतैवꣳ हैव पुनराप्प्यायत ऽआ प्प्रजया पशुभिः प्प्यायते प्प्रत्यस्मिँल्लोके तिष्ठत्यभि स्वर्गꣳलोकꣳजयति य ऽएवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥ २ ॥ तद्धैतत्पप्रच्छ । सुप्ला सार्ञ्जयः प्रतीदर्शमैभावतं य्यन्न

(१) शु० य० सं० १९. ४८ । (२) शु० य० सं० १९. ४८ । (३) शु० य० सं० १९. ४८ । (४) शु० य० सं० १९. ४८ । (५) शु० य० सं० १९. ४८ ।

दीक्षयेव दीक्षते न सोमाꣳशव ऽइव न्युप्यन्तेऽथ कथꣳ सौत्रामणी सोमयज्ञो भवतीति ॥ ३ ॥ स होवाच । शिरो वा ऽएतद्यज्ञस्य यद्व्रतमात्मा दीक्षैतत्खलु वै व्रतस्य रूपं यत्सत्यमेतद्दीक्षायै यच्छ्रद्धा मनो यजमानस्य रूपं वाग्य-ज्ञस्येति ॥ ४ ॥ स यद्वाचा व्रतमुपैति । आत्मन्न्येवैतद्य-ज्ञस्य शिरः प्रतिदधाति सत्यꣳ श्रद्धायान्दधाति यजमानं यज्ञे ॥ ५ ॥ तस्मादेतस्य यज्ञस्य । व्रतमेव दीक्षा वृषो वै व्रतं योषा दीक्षा वृषा सत्यं योषा श्रद्धा वृषा मनो योषा वाग्वृषा पत्न्यै यजमानस्तस्माद्यत्रैव पतिस्तत्र जायाथो यज्ञमुख ऽएव तन्मिथुनानि करोति प्रजात्यै ॥ ६ ॥ एते खलु वा ऽएतस्य यज्ञस्य । सोमाꣳशव ऽइत्या-हुर्यच्छष्पाणि तोक्मानि लाजा ऽइति ॥ ७ ॥ प्रातः-सवनस्यैतद्रूपम् । यच्छष्पाण्ययं वै लोकः प्रातःसवनः स ऽआश्विन ऽआश्विनेन पयसा प्रथमाꣳ रात्रिम्प-रिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेण प्रातःसवनेन समर्द्धयति ॥ ८ ॥ माध्यन्दिनस्यैतत्सव-नस्य रूपम् । यत्तोक्मान्यन्तरिक्षं वै माध्यन्दिनः सवनन्तत्सारस्वतः सारस्वतेन पयसा द्वितीयाꣳ रात्रि-म्परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेण माध्यन्दिनेन सवनेन समर्द्धयति ॥ ९ ॥ तृतीयसवनस्यै-तद्रूपम् । यल्लाजा द्यौर्वै तृतीयसवनः सैन्द्रयैन्द्रेण पयसा तृतीयाꣳ रात्रिम्परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेण तृतीयसवनेन समर्द्धयति ॥ १० ॥

एकस्यै दुग्ध्येन । प्रथमाꣳ राज्रिम्परिषिञ्चति द्वयोर्दुग्ध्येन द्वितीयान्तिसृणान्दुग्ध्येन तृतीयां यथारूपमेवैनं यथा-देवतः सवनैः समर्द्धयति ॥ ११ ॥ 'परीतो षिञ्चता सुत'-मिति परिषिञ्चति सुत्यायै 'सोमो य ऽउत्तमः हवि'-रित्युत्तमं वा ऽएतद्धविर्य्यत्सोम ऽउत्तममेवैनः हविष्कु-रोति 'दधन्वा यो नर्य्यो ऽअप्स्वन्तरे'त्यद्रिश्च ह्येषोऽ-न्तरेण च सूयते 'सुषाव सोममद्रिभि'रित्यद्रिभिर्वै सोमः सूयतेऽद्रिभिरेवैनः सुनोति सोमसुत्यायै ॥ १२ ॥ तदाहुः। उभयोर्वा ऽएतद्रूपः सुतस्य चासुतस्य च यत्सौत्रामण्य-पामेष ऽओषधीनाꣳ रसो यत्पयस्तत्सुतस्य रूपमन्नस्यै-ष रसो यत्परिस्रुत्तदासुतस्य रूपमुभाभ्यामेवैनः सवा-भ्याꣳ सुनोत्युभाभ्याꣳ सवाभ्यामवरुन्द्धे ॥ १३ ॥ तदाहुः। यद्ग्रावभिः सोमः सूयतेऽथ कथः सौत्राम-णीति प्रैषाप्प्रीभिरिति ब्रूयाद्बार्हता वै प्रैषा बार्हता ग्रावाणो ग्रावभिर्वै सोमः सूयते ग्रावभिरेवैनः सुनोति सोमसुत्यायै ॥ १४ ॥ सर्वे पयस्वन्तो भवन्ति । पयसा हि सूयते सर्वे सोमवन्तो भवन्ति सोमरूपतायै सर्वे परिस्रुन्मन्तो भवन्ति परिस्रुता हि सूयते सर्वे घृतवन्तो भवन्त्येतद्वै प्रत्यक्षाद्यज्ञरूपं यद्घृतम्प्रत्यक्षादेवैनं यज्ञरू-पङ्करोति सर्वे मधुमन्तो भवन्त्येतद्वै प्रत्यक्षात्सोमरूपं यन्मधु प्रत्यक्षादेवैनः सोमरूपङ्करोति ॥ १५ ॥ *

(१) शु० य० सं० १९. २। (२) शु० य० सं० १९. २। (३) शु० य० सं० १९. २। (४) शु० य० सं० १९. २।

* शतम् ६१००।

सर्व ऽआश्विना भवन्ति । भैषज्याय सर्वे सारस्वता ऽअन्नाद्यस्येवावरुद्ध्यै सर्व ऽऐन्द्रा इन्द्रियस्येव वीर्यस्यावरुद्ध्यै ॥ १६ ॥ यद्वेव सर्व ऽआश्विना भवन्ति । सर्वे सारस्वताः सर्व ऽऐन्द्रा ऽएता वा ऽएतन्देवता ऽअग्रे यज्ञः समभरँस्ताभिरेवैनः सम्भरत्यथो ऽएता एवैतद्देवता भागधेयेन समर्द्धयति ॥ १७ ॥ सन्तता याज्यापुरोऽनुवाक्यया भवन्ति । समानदेवत्याः प्रजानाꣳ सन्तत्या ऽअव्यवच्छेदाय सर्वा ऽआश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऽऐन्द्र्यः समानी बन्धुता ॥ १८ ॥ अनुष्टुभ ऽआप्रियो भवन्ति । वाग्वा ऽअनुष्टुब्वाचो वै सोमः सूयते वाचैवैनः सुनोति सोमसुत्यायै सर्वा ऽआश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऽऐन्द्र्यः समानी बन्धुता ॥ १९ ॥ जागता ऽअनुप्रैषा भवन्ति । इयं वै जगत्यनया वै सोमः सूयतेऽनयैवैनः सुनोति सोमसुत्यायै सर्व ऽआश्विना भवन्ति सर्वे सारस्वताः सर्व ऽऐन्द्राः समानी बन्धुता ॥ २० ॥ स वा ऽएष प्रत्यक्षात्सोमयज्ञ ऽएव यत्सौत्रामणी तं यद्येकाकी यजमानो भक्षयेदिष्टिर्वैव स्यात्पशुबन्धो वा सर्व ऽऋत्विजो भक्षयन्ति सर्वे वा ऽऋत्विजः सोमम्भक्षयन्ति सोमरूपतायै ॥ २१ ॥ आश्विनमद्ध्वर्यवो भक्षयन्ति । अश्विनौ वै देवानामद्ध्वर्यू स्वमेवैतद्भागधेयꣳ स्व ऽआयतने भक्षयन्ति ॥ २२ ॥ सारस्वतः होता ब्रह्मा मैत्रावरुणः । वाग्वै यज्ञस्य होता हृदयम्ब्रह्मा मनो मैत्रावरुणः स्वमेवैतद्भागधेयꣳ स्व

ऽआयतने भक्षयन्ति ॥ २३ ॥ ऐन्द्रं ऋजमानो भक्षयति । ऐन्द्रो वा ऽएष यज्ञो यत्सौत्रामणीन्द्रायतन ऽएष ऽएतर्हि यो यजते स्वमेवैतद्भागधेयꣳ स्व ऽआयतने भक्षयति ॥२४॥ चक्षुर्वा ऽआश्विनो ग्रहः । प्राणः सारस्वतो वागैन्द्र ऽआश्विनात्सारस्वतेऽवनयति चक्षुरेवास्य तत्प्राणैः सन्दधाति सारस्वतादैन्द्रे प्राणानेवास्य तद्वाचा सन्दधात्यथो प्राणानेवास्य तद्वाचि प्रतिष्ठापयति तस्मात्सर्वे प्राणा वाचि प्रतिष्ठिताः ॥२५॥ त्रय आश्विनम्भक्षयन्ति । अद्ध्वर्युः प्रतिप्रस्थाताग्नीद्ध्रस्त्रिवृद्वा ऽइदꣳ श्रक्षुः शुक्लं कृष्णमङ्गनीनका यथारूपमेवास्मिँमश्चक्षुर्दधति[1] ॥२६॥ त्रयः सारस्वतम् । होता ब्रह्मा मैत्रावरुणस्त्रेधाविहितो वा ऽअयम्प्राणः प्राण ऽउदानो व्यान ऽइति यथारूपमेवास्मिन्प्राणन्दधति ॥ २७ ॥ एकाक्ष्यैन्द्रं ऋजमानो भक्षयति । एकधा वा ऽएषा प्राणानाꣳ श्रीर्ऋद्वागेकधैव वाचꣳ श्रियमात्मन्धत्ते तस्मात्सौत्रामण्येजान ऽएकधा स्वानाꣳ श्रेष्ठो भवत्यथो य ऽएवमेतद्वेद ॥ २८ ॥ ऋतवो वा ऽऋत्विजः मासा भक्षाः षड्वा ऽऋत्विजो भक्षयन्ति षड्वा ऽऋतव ऽऋत्विग्भिरेवर्तूनवरुन्द्धे ॥ २९ ॥ द्वादश भक्षा भवन्ति । द्वादश वै[2] मासा भक्षैरेव मासानवरुन्द्धे पुनः पुनरभिनिवर्त्तमृत्विजो भक्षयन्ति तस्मादृतवश्च मासाश्चान्योऽन्यमभिनिवर्त्तन्ते ॥ ३० ॥ त्रयोदशं ऋजमानो भक्षयति । यो ह वा ऽएष त्रयोदशो मास ऽएष ऽएव प्रत्य-

(१) 'ग' 'ज' पुस्तकयो 'धा' इति । (२) ग' 'ज' पुस्तकयो. "वै" इति नास्ति ।

क्षात्सँवत्सर ऽएतमेवाप्त्वावरुन्द्धे स वा ऽएष सँवत्सर ऽएव यत्सौत्रामणी तेन सर्वञ्जयति सर्वमवरुन्द्धे ॥ ३१ ॥ त्रयः पशवो भवन्ति । त्रयो वा ऽइमे लोका ऽइमानेव तैर्ल्लोकानवरुन्द्ध ऽइममेव लोकमाश्विनेनान्तरिक्षः सारस्वतेन दिवमैन्द्रेण यथारूपमेव यथादेवतमिमाँल्लोकाञ्जयति चाव च रुन्द्धे ॥ ३२ ॥ त्रयः पुरोडाशा भवन्ति । त्रयो वा ऽऋतव ऽऋतूनेव[1] तैरवरुन्द्धे ग्रीष्ममेवैन्द्रेण वर्षाः सावित्रेण हेमन्तं वारुणेन यथारूपमेव यथादेवतमृतूञ्जयति चाव च रुन्द्धे ॥ ३३ ॥ षड्ग्रहा भवन्ति । षड्वा ऽऋतव ऽऋतूनेव[2] तैरवरुन्द्धे वसन्तग्रीष्ममात्रेवाश्विनाभ्यां वर्षाशरदौ सारस्वताभ्याꣳ हेमन्तशिशिरावैन्द्राभ्यां यथारूपमेव यथादेवतमृतूञ्जयति चाव च रुन्द्धे ॥ ३४ ॥ सन्तता याज्यापुरोऽनुवाक्यया भवन्ति । समानदेवत्यया ऽऋतूनाꣳ सन्तत्या ऽअव्यवच्छेदाय सर्वाः पुरोऽनुवाक्यया भवन्ति सर्वा याज्यास्तस्मादृतवः सर्वे पराञ्चः सर्वे प्रत्यञ्चः सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा ऽउत्तमास्तस्मादृतवः सर्वे प्रथमाः सर्वे मध्यमाः सर्व ऽउत्तमाः सर्वेषाङ्ग्रहाणान्द्वे याज्यापुरोऽनुवाक्ये भवतोऽहोरात्रयोस्तद्रूपमहोरात्रे ऽएवावरुन्द्धे तस्मादृतवश्च मासाश्चाहोरात्रयोरेव प्रतिष्ठिताः ॥ ३५ ॥ स वा ऽएष सँवत्सर ऽएव यत्सौत्रामणी । चन्द्रमा ऽएव प्रत्यक्षादादित्यो यजमानस्तस्येयमेव पृथिवी वेदिरन्तरिक्षमुत्तरवेदि-

(१-२) "ऋतूनेवैतै०" इति ग' 'ज' पुस्तकयोः ।

द्यौर्ब्बर्हिर्द्दिश ऽऋत्विजो वनस्पतय ऽइद्ध्म ऽआप ऽआज्यमोषधय ऽआहुतयोग्निरेवाग्निः सँवत्सरः सप्तस्था तद्वा ऽइदः सर्व्वः सँवत्सर ऽएव यदिदङ्किञ्च तस्मान्नौत्रामण्येजानः सर्व्वञ्जयति सर्व्वमवरुन्द्धे ॥ ३६ ॥

अष्टमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[राज्ञोऽभिषेकादि]

त्वष्टा हतपुत्रः । अभिचरणीयमपेन्द्रः सोममाह रत्तस्येन्द्रो यज्ञवेशसङ्कृत्वा प्रासहा सोममपिबत्स विष्वङ्व्यार्च्छत्तस्य मुखात्प्राणेभ्यः श्रीयशसान्यूर्द्धान्युदक्रामँस्तानि पशून्प्राविशँस्तस्मात्पशवो यशो यशो ह भवति य ऽएवं विद्वान्त्सौत्रामण्याभिषिच्यते ॥ १ ॥ ततोऽस्मा ऽएतमश्विनौ च सरस्वती च । यज्ञः समभरन्त्सौत्रामणीम्भैषज्याय तयैनमभ्यषिञ्चँस्ततो वै स देवानाꣳ श्रेष्ठोऽभवच्छ्रेष्ठः स्वानाम्भवति य ऽएनयाभिषिच्यते ॥२॥ कृष्णाजिनेऽभिषिञ्चति । यज्ञो वै कृष्णाजिनं स्यज्ञ ऽएवैनमेतदभिषिञ्चति लोमतश्छदाꣳसि वै लोमानि च्छन्दः स्वेवैनमेतदभिषिञ्चति ॥ ३ ॥ आसन्द्यामभिषिञ्चति । आसन्दी सद्वै साम्राज्यः साम्राज्येनैवैनः साम्राज्यङ्गमयति ॥ ४ ॥ औदुम्बरी भवति । ऊग्वा ऽउदुम्बर ऽऊर्ज्जयैवाद्ध्यभिषिच्यते जानुसम्मिता भवति जानुसम्मितो वा ऽअयँल्लोकोऽस्मा ऽउ वै लोकाय क्षत्रियोऽभिषिच्यते क्षत्रमु

वा ऽएष भवति यः सौत्रामण्याभिषिच्यते तस्मा-ज्जानुसम्मितापरिमिता तिरश्ची ॥ ५ ॥ राष्ट्रं वा ऽआसन्दी । अपरिमितसमृद्धमु वै राष्ट्रम्मुञ्जविवयना भवति यज्ञिया हि मुञ्जा द्वा ऽउत्तरस्यां वेद्याम्पादौ भवतो द्वौ दक्षिणस्यामयं वै लोक ऽउत्तरा वेदिर्दक्षिणा पितृलोकस्त-देनमुभयोर्लोकयोरध्यभिषिञ्चति ॥ ६ ॥ एतद्ध स्म वै तद्विद्वानाह । गौरीवितिः शाक्त्यः क्षत्रमिवाह किल वय-ममुष्मिँल्लोके भविता स्म ऽइति शश्वद्धास्मा ऽऋषभो याज्ञतुरः प्रोवाच श्विक्वनानाथं राजा ॥ ७ ॥ स ऽआस-न्दीमास्तृणाति * । 'क्षत्रस्य योनिरसि क्षत्रस्य नाभिर-सी'ति क्षत्रस्य वा ऽएषा योनिः क्षत्रस्य नाभिः ॥८॥ अथै-नाङ्कृष्णाजिनेनास्तृणाति † । 'मा त्वा हिꣳसीन्मा मा हिꣳसी'रिति यज्ञो वै कृष्णाजिनं यज्ञस्य चैवात्मनश्चा-हिꣳसायै ॥ ९ ॥ अथाधिरोहति । वारुण्यऽर्चा वरुणो वै देवानाथं राजा स्वयैवैनमेतद्देवतयाभिषिञ्चति 'निषसाद धृतव्रतो वरुणः पस्त्यास्वा ॥ साम्राज्याय सुक्रतु'रिति ॥१०॥ अथ सुवर्णरजतौ रुक्मौ ‡ व्यूपास्यति । 'मृत्योः पाहि विद्योत्पाही'ति व्वृष्टिर्वै विराट् तस्या ऽएते घोरे तन्वौ विद्युच्च

---

* का० श्रौ० सू० १९. ४. ७ ।

(१) शु० य० सं० २०. १ ।

† का० श्रौ० सू० १९. ४. ८ ।

(२) शु० य० सं० २०. १ । (३) शु० य० सं० २०. २ ।

‡ मण्डलाकारो भूषणविशेषो रुक्म. । (म० भा०)

(४) शु० य० सं० २०. २ ।

ह्रादुनिश्च ततः सुवर्ण ऽएव रुक्मो विद्युतो रूपꣳ रजतो ह्रादुनेस्ताभ्यामेवास्मै देवताभ्याꣳ शर्म्म यच्छति तस्मात्सौत्रामण्येजानस्यैताभ्यान्देवताभ्यान्न शङ्का भवत्यथो ष ऽएवमेतद्वेद ॥ ११ ॥ पशूनां वसयाभिषिञ्चति । श्रीर्वै पशूनां वसा * श्रिश्चयैवैनमेतत्पशूनाꣳ रसेनाभिषिञ्चत्यथो परमं वा ऽएतदन्नाद्यं यद्वसा परमेणैवैनमेतदन्नाद्येनाभिषिञ्चति ॥ १२ ॥ शफाग्रहा भवन्ति । शफैर्वै पशवः प्रतितिष्ठन्ति प्रतिष्ठामेवैनङ्गमयति त्रयस्त्रिꣳशद्गृहा भवन्ति त्रयस्त्रिꣳशद्वै सर्वा देवताः सर्वाभिरेवैनमेतद्देवताभिरभिषिञ्चति जगतीभिर्जुहोति जागता वै पशवो जगत्यैवास्मै पशूनवरुन्द्धे षोडशभिर्ऋग्भिर्जुहोति षोडशकला वै पशवोऽनुकलमेवास्मिञ्छ्रियन्दधाति[1] ॥ १३ ॥ 'सीसेने[2] तन्त्रम्मनसा मनीषिण' ऽइति । द्वौ द्वौ† समासꣳ हुत्वा सते सथ्सत्रवान्त्समवनयत्यहोरात्राण्यैवैतदर्द्धमासाꣳमासानृतून्त्सँवत्सरे प्रतिष्ठापयति तानीमान्यहोरात्राण्यर्द्धमासा मासा ऽऋतवः सँवत्सरे प्रतिष्ठिताः ॥ १४ ॥ वैतसः सतो भवति । अप्सुयोनिर्वै वेतस ऽआपो वै सर्वा देवताः सर्वाभिरेवैनमेतद्देवताभिरभिषिञ्चति ॥१५॥ सर्वसुरब्युन्मर्दनम्भवति परमो वा ऽएष गन्धो यत्सर्वसुरब्युन्मर्दनङ्गन्धेनैवैनमेतदभिषिञ्चति ॥ १६ ॥ पुरस्तात्प्रत्यङ्ङभिषिञ्चति । पुरस्ताद्धि प्रत्यगन्नमद्यते शीर्षतः शीर्षतो ह्यन्नमद्यत ऽआ मुखादन्ववस्रावयति

* मांसपाकभाण्डे स्थितः स्नेहात्मको द्रवविशेषो वसाशब्देनोच्यते ।

† "द्वौ द्वौ हुत्वा शेषान्सते करोति" (का० श्रौ० सू० १९. ४. ११)

(१) 'ग' 'ज' पुस्तकयोः "दधति" इति । (२) शु० य० सं० १९. ८० ।

मुखेन ह्यन्नमद्यते सर्वतः परिक्रामः सर्वाभ्य ऽएवास्मिन्नेतद्दिग्भ्योऽन्नाद्यन्दधाति तस्मात्सौत्रामण्येजानस्य सर्वासु दिक्ष्वन्नाद्यमवरुद्धम्भवत्यथो य ऽएवमेतद्वेद ॥ १७ ॥ आश्विनेन प्रथमेन यजुषाभिषिञ्चति । अथ सारस्वतेनाथैन्द्रेणैताभिरेवैनमेतद्देवताभिरभिषिञ्चति तः हैक ऽएताभिश्च देवताभिरभिषिञ्चन्ति भूर्भुवः स्वरित्येताभिरु च व्याहृतिभिरेता वै व्याहृतय ऽइदः सर्वन्तदेनमनेन सर्वेणाभिषिञ्चाम ऽइति न तथा कुर्य्यादेताभिरेवैनन्देवताभिरभिषिञ्चेदेता ऽउ ह्येव देवता इदः सर्वम् ॥ १८ ॥ पुरस्तात्स्विष्टकृतोऽभिषिञ्चति । क्षत्रं वै स्विष्टकृत्क्षत्रेणैवैनमेतदभिषिञ्चत्यन्तरा वनस्पतिञ्च स्विष्टकृतञ्चाभिषिञ्चति सोमो वै वनस्पतिरग्निः स्विष्टकृदग्नीषोमाभ्यामेवैनमेतत्परिगृह्याभिषिञ्चति तस्माद्ये चैतद्विदुर्ये च न त ऽआहुः क्षत्रियो वाव क्षत्रियस्याभिषेक्तेति ॥ १९ ॥ अथैनञ्जानुमात्रे धारयन्ति । अथ नाभिमात्रेऽथ मुखमात्र ऽएष्वेवास्मा ऽएतल्लोकेष्वायतनानि कल्पयत्यभिषेको वा ऽएष यद्वाजपेयमभिषेकः सौत्रामणी तद्यथैवाद्वो वाजपेये यूपः रोहति तदेवैतद्रूपङ्क्रियते ॥ २० ॥ [अर्धः प्रपाठकः ॥५६॥] तदाहुः । प्रेव वा ऽएषोऽस्माल्लोकाच्च्यवते यः सौत्रामण्याभिषिच्यत ऽइति कृष्णाजिने प्रत्यवरोहति यज्ञो वै कृष्णाजिनं यज्ञ ऽएवान्ततः प्रतितिष्ठति ॥ २१ ॥ 'प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे' ऽइति । क्षत्र

(१) शु० य० सं० २०. १०।

ऽएव राष्ट्रे प्रतितिष्ठति क्षत्राद्राष्ट्राद्वप्रभ्रष्टःशाय 'प्रत्यश्वेषु[1] प्रतितिष्ठामि गोष्विति गोऽश्व ऽएव प्रतितिष्ठति गोऽश्वाद्वप्रभ्रष्टःशाय 'प्रत्यङ्गेषु[2] प्रतितिष्ठाम्यात्म'न्नित्यङ्गेष्वेवात्मन्प्रतितिष्ठत्यङ्गेभ्य ऽआत्मनोऽप्रभ्रष्टःशाय 'प्रति प्राणेषु[3] प्रतितिष्ठामि पुष्टि' ऽइति प्राणेष्वेव पुष्टे प्रतितिष्ठति प्राणेभ्यः पुष्टाद्वप्रभ्रष्टःशाय 'प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञ' ऽइति[4] तदनयोर्द्यावापृथिव्योः प्रतितिष्ठति ययोरिदः सर्वमधि ॥ २२ ॥ अथ साम गायति । क्षत्रं वै साम क्षत्रेणैवैनमेतदभिषिञ्चत्यथो साम्राज्यं वै साम साम्राज्येनैवैनः साम्राज्यङ्गमयति सर्वेषां वा ऽएष वेदानाथ्ं रसो यत्साम सर्वेषामेवैनमेतद्वेदानाथ्ं रसेनाभिषिञ्चति ॥ २३ ॥ बृहत्यागायति । बृहत्यां वा ऽअसावादित्यः श्रियाम्प्रतिष्ठायाम्प्रतिष्ठितस्तपति बृहत्यामेवैनमेतच्छ्रियाम्प्रतिष्ठायाम्प्रतिष्ठापयति ॥२४॥ ऐन्द्रयाम्बृहत्यागायति*। ऐन्द्रो वा ऽएष यज्ञो यत्सौत्रामणीन्द्रायतन ऽएष ऽएतर्हि यो यजते स्व ऽएवैनमेतदायतनेऽभिषिञ्चति ॥ २५ ॥ अथ यस्मात्सः शानानि नाम । एतैर्वै सामभिर्देवा ऽइन्द्रमिन्द्रियाय वीर्य्याय समश्रयँस्तथो ऽएवैतमृत्विजो यजमानमेतैरेव सामभिरिन्द्रियाय वीर्य्याय सश्रयन्ति सश्श्रवसे विश्श्रवसे सत्य-

(१) शु० य० सं० २०. १०। (२) शु० य० सं० २०. १०। (३) शु० य० सं० २०. १०। (४) शु० य० सं० २०. १०।

* का० श्रौ० सू० १९. ५. २।

श्रवसे श्रवस ऽइति सामानि भवन्त्येष्वेवैनमेतल्लोकेषु श्रावयन्ति चतुर्निधनम्भवति चतस्रो वै दिशः सर्वास्वेवैनमेतद्दिक्षु प्रतिष्ठापयन्ति सर्वं निधनमुपावयन्ति संविदाना ऽएवास्मिन्छ्रियन्दधति ॥ २६ ॥ तदाहुः । यदेतत्साम गीयतेऽथ क्रैतस्य साम्न ऽउक्थङ्का प्रतिष्ठा व्यृद्धः हि तद्यत्स्तुतमननुशस्तमिति ॥ २७ ॥ त्रया देवा ऽएकादशेति । एतद्वा ऽएतस्य साम्न ऽउक्थमेषा प्रतिष्ठा ॥ २८ ॥ अथो 'त्रयो देवा ऽएकादशे'ति । त्रयस्त्रिꣳशद्वहुहोति त्रया हि देवा ऽएकादश 'त्रयस्त्रिꣳशाः सुराधस' ऽइति त्रयस्त्रिꣳशद्धि देवा 'बृहस्पतिपुरोहिता' ऽइति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिता ऽइत्येवैतदाह 'देवस्य सवितुः सव' ऽइति देवेन सवित्रा प्रसूता ऽइत्येवैतदाह 'देवा देवैरवन्तु मे'ति देवा ह्येतन्देवैरभिषिञ्चन्ति ॥ २९ ॥ 'प्रथमा द्वितीयै'रिति । प्रथमा ह्येतन्द्वितीयैरभिषिञ्चन्ति 'द्वितीयास्तृतीयै'रिति द्वितीया ह्येतन्तृतीयैरभिषिञ्चन्ति 'तृतीयाः सत्येने'ति तृतीया ह्येतः सत्येनाभिषिञ्चन्ति 'सत्यं यज्ञेने'ति सत्यꣳ ह्येतं यज्ञेनाभिषिञ्चति 'यज्ञो यजुर्भि'रिति यज्ञो ह्येतं यजुर्भिरभिषिञ्चति 'यजूꣳषि सामभि'रिति यजूꣳषि ह्येतꣳ साम-

(१) शु० य० सं० २०. ११। (२) शु० य० स० २०. ११। (३) शु० य० स० २०. ११। (४) शु० य० सं० २०. ११। (५) शु० य० स० २०. ११। (६) शु० य० सं० २०. १२। (७) शु० य० स० २०. १२। (८) शु० य० स० २०. १२। (९) शु० य० सं० २०. १२। (१०) शु० य० स० २०. १२। (११) शु० य० सं० २०. १२।

भिरभिषिञ्चन्ति 'सामान्यृग्भि'रिति सामानि ह्येतमृग्भि-रभिषिञ्चन्त्यृ'चः पुरोऽनुवाक्याभि'रित्यृचो ह्येतम्पुरोऽनु-वाक्याभिरभिषिञ्चन्ति 'पुरोऽनुवाक्या याज्याभि'रिति पुरोऽनुवाक्या ह्येतं याज्याभिरभिषिञ्चन्ति 'याज्या वषट्कारै'रिति याज्या ह्येतं वषट्कारैरभिषिञ्चन्ति 'वषट्-कारा ऽआहुतिभि'रिति वषट्कारा ह्येतमाहुतिभिरभिषिञ्च-न्त्या'हुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहे'ति तदेनमेता-भिर्देवताभिः परोऽवरमभिषिच्च्याथास्मा ऽआहुतिभिः सर्वान्न्कामान्त्समर्द्धयत्यथऽर्त्विक्षूपहवमिष्ट्वा भक्षयत्यृतवो वा ऽऋत्विज ऽऋतुष्वेवैतदुपहवमिच्छते ॥ ३० ॥ स भक्ष-यति । 'लोमाँनि प्रयतिर्म्मम त्वङ्म ऽआनतिरागतिः ॥ माꣳसम्म ऽउपनतिर्व्वस्वस्थि मज्जाम ऽआनति'रिति प्रैव वा ऽएष लोकाँश्च देवताश्च विशति यः सौत्रामण्या-भिषिच्यते तदेतदवान्तरामात्मानमुपह्वयते तथा कृत्स्न ऽएव सर्वतनूः साङ्गः सम्भवति ॥ ३१ ॥

अष्टमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

[सौत्रामणीशेषः]

एतस्माद्वै यज्ञात्पुरुषो जायते । स यद्ध वा ऽअ-स्मिँल्लोके पुरुषोऽन्नमत्ति तदेनममुष्मिँल्लोके प्रत्यत्ति स

(१) शु० य० सं० २०. १२। (२) शु० य० सं० २०. १२। (३) शु० य० सं० २०. १२। (४) शु० य० सं० २०. १२। (५) शु० य० सं० २०. १२। (६) शु० य० सं० २०. १२। (७) शु० य० सं० २०. १३।

वा ऽएष परिस्रुतो यज्ञस्तायतेऽनाद्या वै ब्राह्मणेन परिस्रुत्स ऽएतस्मादनाद्याज्जायते तद्ध हामुष्मिँल्लोकेऽन्नन्न प्रत्यत्ति तस्मादेष ब्राह्मणयज्ञ ऽएव यत्सौत्रामणी ॥ १ ॥ तस्य लोमान्येव शष्पाणि । त्वक्तोक्मानि माꣳसँल्लाजा ऽअस्थि कारोतरो मज्जा मासरꣳ रसः परिस्रुन्नग्नꣳहुर्लोहितꣳ रेतः पयो मूत्रꣳ सुरोवद्ध्यं वल्कसम् ॥ २ ॥ हृदयमेवास्यैन्द्रः पुरोडाशः । यकृत्सावित्रꣳ क्लोमा वारुणो मतस्ने ऽएवास्याश्वत्थश्च पात्रमौदुम्बरश्च पित्तन्नैयग्रोधमान्त्राणि स्थाल्ल्यो गुदा ऽउपशयानि श्येनपत्रे प्लीहासन्दी नाभिः कुम्भो वनिष्ठुः प्लाशिः शतातृण्णा तद्यत्सा बहुधा वितृण्णा भवति तस्मात्प्लाशिर्बहुधा विकृत्तो मुखꣳ सतञ्जिह्वा पवित्रञ्चप्यम्पायुर्वस्तिर्वालः ॥ ३ ॥ अङ्गान्येवास्याश्विवनः पशुः । आत्मा सारस्वतो रूपमैन्द्र ऽऋषभस्तस्मादाहुर्ग्गावः पुरुषस्य रूपमित्यायुर्हिरण्यन्तच्छतमानम्भवति तस्माच्छतायुः पुरुषः ॥ ४ ॥ चक्षुषी ऽएवास्याश्विनौ ग्रहौ । पक्ष्माणि गोधूमसक्तवश्च कुवलसक्तवश्च नासिके ऽएवास्य सारस्वतौ ग्रहावथ यानि नासिकयोर्ल्लोमानि तान्युपवाकसक्तवश्च बदरसक्तवश्च श्रोत्रे ऽएवास्यैन्द्रौ ग्रहावथ यानि कर्ण्ययोर्ल्लोमानि यानि च भ्रुवोस्तानि यवसक्तवश्च कर्कन्धुसक्तवश्च ॥ ५ ॥ अथ यान्युपस्थे लोमानि । यानि चाधस्तात्तानि

(१) 'सर्जस्वक्त्रिफलाशुण्ठीपुनर्नवाश्चतुर्जातकपिप्पलीगजपिप्पलीवंशावकाबृहच्छत्राचित्रकेन्द्रवारुण्यश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयविरूढयवव्रीहय एकीकृता नग्नहु.' (म० भा०)।

व्वृकलोमान्न्यथ यान्न्युरसि लोमानि यानि च निकक्ष्यो-
स्तानि व्व्याघ्रलोमानि केशाश्च श्म्मश्रूणि च सिंह-
हलोमानि ॥ ६ ॥ त्रयः पशवो भवन्ति । त्रेधाविहितो
वा ऽअयम्पुरुषस्यात्मात्मानमेवास्य तै स्पृणोति षदुवाङ्ना-
भेस्तदाश्विवनेन यदूर्द्ध्वन्नाभेरवाचीनः शीर्ष्णस्तत्सारस्वतेन
शिर ऽऐन्द्रेण यथारूपमेव यथादेवतमात्मानम्मृत्यो स्पृत्वा-
मृतङ्कुरुते ॥ ७ ॥ त्रयः पुरोडाशा भवन्ति । त्रेधाविहितं वा
ऽइदम्पुरुषस्य वयो वय ऽएवास्य तै स्पृणोति पूर्ववयसमै-
वैन्द्रेण मध्यमवयसः सावित्रेणोत्तमवयसं वारुणेन यथा-
रूपमेव यथादेवतं वयो मृत्यो स्पृत्वामृतङ्कुरुते ॥ ८ ॥
षड्ग्रहा भवन्ति । षड्वा ऽइमे शीर्षन्प्राणाः प्राणानेवास्य
तै स्पृणोति चक्षुषी ऽएवाश्विनाभ्यान्नासिके सारस्व-
ताभ्याꣳ श्रोत्रे ऽऐन्द्राभ्यां ꣳयथारूपमेव यथादेवत-
म्प्राणान्म्मृत्यो स्पृत्वामृतान्कुरुते ॥ ९ ॥ सन्तता याज्या-
पुरोऽनुवाक्क्या भवन्ति । समानदेवत्याः प्राणानाꣳ
सन्तत्या ऽअव्यवच्छेदाय सर्वाः पुरोऽनुवाक्क्या भवन्ति
सर्वा याज्यास्तस्मात्प्राणाः सर्वे पराञ्चः सर्वे प्रत्यञ्चः
सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा ऽउत्तमास्त-
स्मात्प्राणाः सर्वे प्रथमाः सर्वे मध्यमाः सर्व ऽउत्तमाः
सर्वेषाङ्गृहाणान्ते याज्यापुरोऽनुवाक्क्ये भवतः प्राणो-
दानयोस्तद्रूपम्प्राणोदानावेवावरुन्द्धे तस्मात्सर्वे प्राणाः
प्राणोदानयोरेव प्रतिष्ठिताः ॥ १० ॥ स वा एष ऽआ-

(१) "मात्मानम्मृत्यो स्पृत्वामृतङ्कुरुते" इति 'ग' 'ज' पुस्तकयोः ।

त्मैव यत्सौत्रामणी । मन ऽएव प्रत्यक्षाद्वाग्यजमानस्त-
स्यात्मैव वेदिः प्रजोत्तरवेदिः पशवो बर्हिरङ्गान्यृत्विजो-
ऽस्थीनीद्धम ऽआज्यम्मज्जा मुखमग्निरन्नमाहुतिर्व्रयः
सꣳस्था तस्मात्सौत्रामण्येजानो व्रय ऽउपगच्छति ॥११॥
तद्यौ ह वा ऽइमौ पुरुषाविवाक्ष्योः । एतावेवाश्विनावथ
यत्कृष्णन्तत्सारस्वतं श्यच्छुक्लन्तदैन्द्रन्तद्यदाश्विने पशौ
सत्यथैता देवताः सह यजत्येतान्येवैतत्सार्द्धङ्कृत्वात्मन्धत्ते
॥ १२ ॥ मन ऽएवेन्द्रः । वाक्सरस्वती श्श्रोत्रे ऽअश्विनौ
यद्वै मनसा ध्यायति तद्वाचा वदति यद्वाचा वदति
तत्कर्णाभ्याꣳ शृणोति तद्यत्सारस्वते पशौ सत्यथैता
देवताः सह यजत्येतान्येवैतत्सार्द्धङ्कृत्वात्मन्धत्ते ॥ १३ ॥
प्राण ऽएवेन्द्रः । जिह्वा सरस्वती नासिके ऽअश्विनौ
यद्वै प्राणेनान्नमात्मन्प्रणयते तत्प्राणस्य प्राणत्वञ्जिह्वया
वा ऽअन्नस्य रसं विजानाति नासिके ऽउ वै प्राणस्य
पन्थास्तद्यदैन्द्रे पशौ सत्यथैता देवताः सह यजत्येता-
न्येवैतत्सार्द्धङ्कृत्वात्मन्धत्ते ॥ १४ ॥ हृदयमेवेन्द्रः । यक्रु-
त्सविता क्लोमा वरुणस्तद्यदैन्द्रे पुरोडाशे सत्यथैता
देवताः सह यजत्येताभ्येवैतत्सार्द्धङ्कृत्वात्मन्धत्ते ॥ १५ ॥
प्राण ऽएव सविता । व्यानो वरुणः शिश्नमिन्द्रो यद्वै
प्राणेनान्नमत्ति तद्व्यानेन व्यनिति शिश्नेन वा ऽअन्नस्य
रसꣳ रेतः सिञ्चति तद्यत्सावित्रे पुरोडाशे सत्यथैता
देवताः सह यजत्येताभ्येवैतत्सार्द्धङ्कृत्वात्मन्धत्ते ॥ १६ ॥
योनिरेव वरुणः । रेत ऽइन्द्रः सवितैव रेतसः प्रजनयिता

तद्यद्वारुणे पुरोडाशे सत्त्यथैता देवताः सह यजत्येताभ्ये-वैतत्सार्द्धङ्कृत्वात्मन्धत्ते स य ऽएवमेतद्वेदैता ऽएव देवता अनुसम्भवत्येता देवता ऽअनु प्रजायत ऽआ प्रजया पशुभिः प्यायते प्रत्यस्मिँल्लोके तिष्ठत्यभि स्वर्गँल्लो-कञ्जयति य ऽएवं विद्वान्त्सौत्रामण्या यजते यो वैत-देवं वेद ॥ १७ ॥

नवमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[अवभृथेष्टिः]

अवभृथमिष्ट्वा यन्ति । अवभृथं वै सोमनेष्ट्वा यन्ति सोम ऽएष यत्सौत्रामणी ॥ १ ॥ 'यद्देवा देवहेडन'मिति । देवकृतादेवैनमेनसो मुञ्चति 'यदि दिवा यदि नक्त'मिति यदेवाहोरात्राभ्यामेनः करोति तस्मादेवैनम्मुञ्चति 'यदि जाग्रद्यदि स्वप्न' ऽइति मनुष्या वै जागरितम्पितरः सुप्तम्मनुष्यकिल्विषाच्चैवैनम्पितृकिल्विषाच्च मुञ्चति ॥ २ ॥ 'यद्ग्रामे यदरण्य' ऽइति । ग्रामे वा ह्यरण्ये वैनः क्रियते तस्मादेवैनम्मुञ्चति 'यत्सभाया'मिति सभ्या-देवैनमेनसो मुञ्चति 'यदिन्द्रिय' ऽइति दैवादेवैनमेनसो मुञ्चति 'यच्छूद्रे यदुर्य्ये यदेनश्चकृमा वयं शूद्रे कस्याधि धर्म्मणि तस्यावयजनमसी'ति सर्वस्मादेवैनमेतस्मादेनसो मुञ्चति ॥ ३ ॥ 'यर्दापो ऽअग्घ्न्या ऽइति । वरुणेति

(१) शु० य० सं० २०. १४। (२) शु० य० सं० २०. १५। (३) शु० य० सं० २०. १६। (४) शु० य० सं० २०. १७। (५) शु० य० सं० २०. १७। (६) शु० य० सं० २०. १७। (७) शु० य० सं० २०. १७। (८) शु० य० सं २०. १८।

शपामहे ततो वरुण नो मुञ्चे'ति वरुण्यादेवैनमेनसो मुञ्चत्य-
'वभृथ निचुम्पुण निचेरुरसि निचुम्पुण' ऽइति यो ह वा ऽअ-
यमपामावर्त्तः स ह वावभृथः स ह वैष वरुणस्य पुत्रो वा ब्भ्राता
वा तमेवैतत्स्तौत्य'वं देवैर्देवकृतमेनो यक्षी'ति देवकृतमेवैनो-
ऽवयजते'ऽव मर्त्यैर्म्मर्त्यकृत'मिति मर्त्यकृतमेवैनोऽवयजते
'पुरुराण्णो देव रिषस्पाही'ति सर्व्वाभ्यो मार्त्तिभ्यो
गोपायेत्त्येवैतदाह ॥ ४ ॥ 'समुद्रे ते हृदयमप्स्वन्त'रिति ।
आपो वै समुद्रो रसो वा ऽआपस्तदेनमेतेन रसेन
सृजति 'सन्त्वा विशन्त्वोषधीरुताप' ऽइति तदेन-
मेतेनोभयेन रसेन सृजति यच्चौषधिषु यच्चाप्सु
द्वौ विक्रमा ऽउदङ्ङुत्क्रामत्येतावती वै मनुष्ये जूति-
र्यावान्विक्रमस्तद्यावत्येवास्मिञ्जूतिस्तयैव पाप्मानं विज-
हाति ॥ ५ ॥ 'समिद्भिर्या न ऽआप ऽओषधयः सन्त्व'ति ।
अञ्जलिनाप ऽउपाचति वज्रो वा ऽआपो वज्रेणैवैतस्मि-
न्नधेयङ्करुते 'दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि
यञ्च वयन्द्विष्म' ऽइति यामस्य दिशन्द्वेष्यः स्यात्तान्दि-
शम्परासिञ्चेत्तेनैव तम्पराभावयति ॥ ६ ॥ 'द्रुपदादिव
मुमुचानः । स्विन्नः स्नातो मलादिव ॥ पूतम्पवित्रेणेवाज्य-
मापः शुन्धन्तु मैनस' ऽइति वासोऽपप्लावयति यथे-
षीकाम्मुञ्जाद्विवृहेदेवमेनः सर्व्वस्मात्पाप्मनो विवृहति

(१) शु० य० सं० २०. १८। (२) शु० य० सं० २० १८। (३) शु० य० सं० २०. १८। (४) शु० य० २०. १८। (५) शु० य० सं० २०. १९. (६) शु० य० सं० २०. १९। (७) शु० य० सं० २०. १९। (८) शु० य० सं० २०. १९। (९) शु० य० सं० २०. २०।

स्नाति तम ऽएवापहते ॥ ७ ॥ 'उद्वयन्तमसस्परी'ति । पाप्मा वै तमः पाप्मानमेव तमोऽपहते 'स्वः पश्यन्त ऽउत्तर'मित्ययं वै लोकोऽद्भ्य ऽउत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति 'देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तम'मिति स्वर्गो वै लोकः सूर्य्यो ज्योतिरुत्तमꣳ स्वर्ग ऽएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमेत्याहवनीयमुपतिष्ठते ॥ ८ ॥ 'अपो ऽअर्य्याङ्वचारिष'मिति । अपामेव रसमवरुन्द्धे 'रसेन समसृक्षमही'त्यपामेव रसमात्मन्धत्ते 'पयस्वानग्न ऽआगमन्तम्मा सꣳसृज वर्च्चसा प्रजया च धनेन चे'त्याशिषमेवैतदाशास्ते ॥ ९ ॥ 'एधोऽस्येधिषीमही'ति समिधमादत्ते * । एधो ह वा ऽअग्नेः समि'त्समिदसि तेजोऽसि तेजो मयि धेही'त्याहवनीये समिधमभ्यादधात्यग्निमेवैतया समिन्द्धे स ऽएनꣳ समिद्धस्तेजसा समिन्द्धे ॥ १० ॥ आदित्यश्चरुं श्रयक्ष्यमाणो निर्व्वपति । आदित्यमीजान ऽइयं वा अदितिरस्यामेव यज्ञन्तनुतेऽस्यामिष्ट्वा प्रतितिष्ठति धेनुर्दक्षिणेयं वै धेनुरिमामेव सर्व्वाभ्यः कामान्दुहे वत्सम्पूर्व्वस्यान्दुदाति मातरमुत्तरस्यां श्रयदा वै वत्सो मातरन्धयत्यथ सा प्रत्ता दुहे प्रत्तामेवेमाꣳ सर्व्वाभ्यः कामान्दुहे ॥ ११ ॥ तदाहुः । प्रेव वा ऽएषोऽस्मा-

(१) शु० य० सं० २०. २१ । (२) शु० य० सं० २०. २१ । (३) शु० य० सं० २०. ११ । (४) शु० य० सं० २० २२ । (५) शु० य० सं० २०. २२ । (६) शु० य० सं० २०. २२ । (७) शु० य० सं० २०. २३ । (८) शु० य० सं० २०. २३ ।

* का० श्रौ० सू० १९. ५. १९ ।

ल्लोकाच्च्यवते योऽपोऽवभृथमभ्यवैतीत्यवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतेऽयं वै लोको मित्रोऽसौ वरुणो यदेवेदमन्तरेण तत्पयस्या तद्यन्मैत्रावरुण्या पयस्यया यजत एष्वेवैतल्लोकेषु प्रतितिष्ठति प्राणो वै मित्रोऽपानो वरुणोऽन्नमेव पयस्या तद्यन्मैत्रावरुण्या पयस्यया यजते प्राण एवान्नाद्येऽन्ततः प्रतितिष्ठति ॥१२॥

नवमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[सौत्रामण्यर्थवादः]

दुष्टरीतुर्ह पौंस्यायनः । दशपुरुषः राज्यादुपरुद्ध आस रेवोत्तरसमु ह पाटवश्चाक्रुंस स्थपतिः सृञ्जया अपरुरुधुः ॥ १ ॥ स होवाच । दुष्टरीतुम्पौंस्यायनः सौत्रामण्या त्वा याजयानि यदिदः सृञ्जयेषु राष्ट्रन्तत्वयि धास्यामीति तथेति तयैनमयाजयत् ॥ २ ॥ तदु ह बल्हिकः प्रातिपीयः शुश्रुवे । कौरव्यो राजा यो ह वा अयन्दुष्टरीतुः पौंस्यायनो दशपुरुषः राज्यादुपरुद्धोऽभूत्तमयश्चाक्र स्थपतिः सौत्रामण्या याजयिष्यति यदिदः सृञ्जयेषु राष्ट्रन्तद्धास्मिन्धास्यतीति ॥ ३ ॥ स होवाच । तन्वा अहन्तं वेदिष्यामि यदि स तस्मिन्राष्ट्रन्धास्यति बहिर्द्धा वैनः राष्ट्राद्धास्यतीति स आजगाम यस्यां वेलायाङ्गहा गृह्यन्ते ॥ ४ ॥ स होवाच । स्थपते चाक्र नाहवनीये सुरा होतव्येत्या-

हुर्न्नान्यत्राहवनीयाद्यद्याहवनीये सुराꣳ होष्यसि पापवस्यसङ्करिष्यसि जामि यज्ञस्य यद्यन्यत्राहवनीयाद्बहिर्द्धैनꣳ राष्ट्राद्धास्यसि नैनꣳ राष्ट्रे धास्यसि नास्मिन्त्राष्ट्रन्धास्यसीति ॥ ५ ॥ स होवाच। नाहवनीये सुराꣳ होष्यामि नान्यत्राहवनीयान्न पापवस्यसङ्करिष्यामि न जामि यज्ञस्य नैनम्बहिर्द्धा राष्ट्राद्धास्यामि राष्ट्र ऽएनन्धास्यामि राष्ट्रमस्मिन्धास्यामीति ॥ ६ ॥ स होवाच। कथꣳ हि करिष्यसी३ ऽइति स हैतदुवाचासुरेषु वा ऽएषोऽग्ग्रे यज्ञ आसीत्सौत्रामणी स देवानुपप्रैत्सोऽप ऽआगच्छत्तमापः प्रत्यनन्दँस्तस्मादु श्रेयाꣳसमागतम्प्रत्येव नन्दन्ति तꣳ होचुरेह्येव भगव ऽइति ॥ ७ ॥ स होवाच। विभेमि वै प्रणयत मेति कस्माद्भगवो विभेषीत्यसुरेभ्य ऽइति तथेति तमापः प्राणयँस्तस्माद्यो वधन्नो भवति स विभ्यतम्प्रणयति यदापः प्राणयँस्तस्मादापः प्रणीतास्तत्प्रणीतानाम्प्रणीतात्वम्प्रति ह तिष्ठति य ऽएवमेतत्प्रणीतानाम्प्रणीतात्वं वेद ॥ ८ ॥ तदिष्टाः प्रयाजा ऽआसुः। अपर्य्यग्निकृतमथासुरा ऽअन्वाजग्ग्मुस्ते देवाः पर्य्यग्निनैवासुरान्सपत्नान्भ्रातृव्यान्यज्ञादन्तरायँस्तथो ऽएवैष ऽएतत्पर्य्यग्निनैव द्विषन्तम्भ्रातृव्यं य्यज्ञादन्तरेति ॥ ९ ॥ देवयोनिर्व्वा ऽएष यदाहवनीयः। तस्यैतावमृतपक्षौ यावेतावभितोऽग्नी तद्यदाहवनीये यज्ञन्तन्वते देवयोनावेवैतद्देवेभ्यो यज्ञन्तन्वत ऽउप हैनम्पुनर्य्यज्ञो नमति नास्मायज्ञो

व्ययवच्छिद्यते य ऽएवमेतद्वेद यस्य वैवं विदुष ऽएतत्कर्म्म क्रियते ॥ १० ॥ उत्तरेऽग्नौ पयोग्रहाञ्जुहोति । उत्तरेऽग्नौ पशुञ्जुपयन्ति पशूनेव तन्मर्त्यान्त्सतोऽमृतयोनौ दधाति मर्त्यान्त्सतोऽमृतयोनेः प्रजनयत्यप ह वै पशूनाम्पुनर्म्मृत्युञ्जयति नास्माद्यज्ञो व्ययवच्छिद्यते य ऽएवमेतद्वेद यस्य वैवं विदुष ऽएतत्कर्म्म क्रियते ॥ ११ ॥ दक्षिणेऽग्नौ सुराग्रहाञ्जुहोति । दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंस्युक्ताभिः पितृनेव तन्मर्त्यान्त्सतोऽमृतयोनौ दधाति मर्त्यान्त्सतोऽमृतयोनेः प्रजनयत्यप ह वै पितृणाम्पुनर्म्मृत्युञ्जयति नास्माद्यज्ञो व्ययवच्छिद्यते य ऽएवमेतद्वेद यस्य वैवं विदुष ऽएतत्कर्म्म क्रियते ॥ १२ ॥ तद्यदेतावग्नी ऽआहवनीयाद्विहियेते । तेनाहवनीयावथ यदाहवनीयम्पुनर्नाश्नुवाते तेनानाहवनीयौ तेनोभौ होमा ऽउपाप्नोति यश्चाहवनीये यश्चानाहवनीये यच्च हुतं यच्चाहुतम्पुनर्हायमित्वोवाच न तदस्ति यत्सृञ्जयानाꣳ राष्ट्रन्दुष्टरीतोस्तदद्य तथायश्चाक्रꣳस्थपतिर्य्यज्ञेऽकरिति ॥१३॥ उत्तरेऽग्नौ पशुभिः पुरोडाशैः पयोग्रहैरिति चरन्ति । यदु चान्यत्तेन देवानेव तद्देवलोके प्रीणाति त ऽएनम्प्रीताः प्रीणन्त्यथो देवलोकमेव जयति ॥ १४ ॥ दक्षिणेऽग्नौ सुराग्रहाञ्जुहोति । दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंस्युक्ताभिः पितृनेव तत्पितृलोके प्रीणाति त ऽएनम्प्रीताः प्रीणन्त्यथो पितृलोकमेव जयति ॥ १५ ॥ स वा ऽएष आत्मैव यत्सौत्रामणी । तस्मात्सा निरुक्ता निरुक्तो ह्यात्मा

लोको वयोधास्तस्मात्सोऽनिरुक्तोऽनिरुक्तो हि लोक ऽआत्मा वै यज्ञस्य सौत्रामणी बाहू ऽऐन्द्रश्च वयोधाश्च तद्यदेतावभितः पशू भवतस्तस्मादिमावात्मानमभितो बाहू यथो वै पशुरेवं ह्युपस्तद्यदेतः सौत्रामणिकं ह्युपमेतौ यूपावभितो भवतस्तस्माद्विमावात्मानमभितो बाहू ॥ १६ ॥

नवमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या ११२॥

इति नवमोऽध्यायः ॥ ९ ॥

मध्यमनाम द्वादश काण्डं समाप्तम्* ॥ १२ ॥



* अस्मिन्काण्डे कण्डिकासंख्या ४५९ ।

अथाश्वमेधनाम त्रयोदशं काण्डम्

[अस्मिन्काण्डे प्रतिपाद्या विषयाः—अश्वमेधः, तद्गतं प्रायश्चित्तम्, पुरुषमेधः, सर्वमेधः, दशरात्रः, पितृमेधः]

[ब्रह्मौदनपाकः]

॥ ॐ ॥* ब्रह्मौदनम्पचति । रेत ऽएव तद्धत्ते यदाज्य-मुच्छिष्यते तेन रशनामभ्यञ्जादत्ते तेजो वा ऽआज्य-म्प्राजापत्योऽश्वः प्रजापतिमेव तेजसा समर्द्धयत्यपूतो वा ऽएषोऽमेध्यो यदश्वः ॥ १ ॥ दर्भमयी रशना भवति। पवित्रं वै दर्भाः पुनात्येवैनम्पूतमेवैनम्मेध्यमालभते ॥ २ ॥ अश्वस्य वा ऽआलब्धस्य । रेत ऽउदक्रामत्तत्सुवर्णः हिरण्यमभवद्यत्सुवर्णः हिरण्यन्ददात्यश्वमेव रेतसा समर्द्धयति ॥ ३ ॥ † प्रजापतिर्यज्ञमसृजत । तस्य महि-मापाक्रामत्स महार्त्विजः प्राविशत्तम्महर्त्विग्भिरन्वैच्छत्त-म्महर्त्विग्भिरन्वविन्दद्यन्महार्त्विजो ब्रह्मौदनम्प्राश्नन्ति महिमानमेव तद्यज्ञस्य यजमानोऽवरुन्द्धे ब्रह्मौदने सुव-र्णः हिरण्यन्ददाति रेतो वा ऽओदनो रेतो हिरण्यः रेतसैवास्मिँस्तद्रेत्तो दधाति शतमानम्भवति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्य्यमात्मन्धत्ते चतुष्टयीरपो

* ब्राह्मणेभ्य ऋत्विग्भ्यो देय ओदन. वह्मौदन ।

† अत्र शतम् ६४०० ।

(१) 'क' इति 'ज' पुस्तके ।

वसतीवरीर्म्मेऽध्यमायाहे गृह्णाति ता दिग्भ्यः समाहृता भवन्ति दिक्षु वा ऽअन्नमन्नमापोऽन्नेनैवास्मा ऽअन्नमवरुन्द्धे ॥ ४ ॥

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[अश्वस्य बन्धनप्रोक्षणादि]

व्यृद्धमु वा ऽएतद्यज्ञस्य । यदयजुष्केण क्रियत 'ऽइमामगृभ्णन्रशनामृतस्ये'त्यश्वाभिधानीमादत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै द्वादशारत्निर्भवति द्वादश मासाः संवत्सरः संवत्सरमेव यज्ञमाप्नोति ॥ १ ॥ तदाहुः । द्वादशारत्नी रशना कार्य्या३ त्रयोदशारत्नी३रित्यृषभो वा ऽएष ऽऋतूनां व्यृत्संवत्सरस्तस्य त्रयोदशो मासो विष्टपं वृषभ ऽएष यज्ञानां व्यृदश्वमेधो यथा वा ऽऋषभस्य विष्टपमेवमेतस्य विष्टपन्त्रयोदशमरत्निं रशनायामुपादध्यात्तद्यथर्षभस्य* विष्टपं संस्क्रियते तादृक्तत् ॥ २ ॥ 'अभिधा ऽअसी'ति । तस्मादश्वमेधयाजी सर्वा दिशोऽभिजयति 'भुवनमसी'ति भुवनन्तज्जयति 'यन्तासि धर्त्ते'ति यन्तारमेवैनन्धर्त्तारङ्करोति' 'स त्वमग्नि वैश्वानर'मित्यग्निमेवैनं वैश्वानरङ्गमयति 'सप्रथसङ्गच्छे'ति प्रजयैवैनम्पशुभिः प्रथयति 'स्वाहाकृत' ऽइति वषट्कार

(१) शु० य० सं० २२. २ ।

* 'ऽथ ऽऋषभस्य' इति 'ग' 'ज' पुस्तकयोः ।

(२) शु० य० सं० २२. ३ । (३) शु० य० सं० २२. ३ । (४) शु० य० सं० २२. ३ । (५) शु० य० सं० २२. ३ । (६) शु० य० सं० २२. ३ । (७) शु० य० सं० २२. ३ ।

ऽएवास्यैष 'स्वगा[1] त्वा देवेभ्य' ऽइति देवेभ्य ऽएवैनꣳ स्वगा करोति 'प्रजा[2]पतय' ऽइति प्राजापत्योऽश्वः स्वयैवैनन्देवतया समर्द्धयति ॥ ३ ॥ ईश्वरो वा ऽएषः । आर्त्तिमार्त्तोऽर्यो ब्रह्मणे देवेभ्योऽप्रतिप्रोच्याश्वमव-दृधनाति 'ब्रह्म[3]न्नश्वमभन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यास'मिति ब्रह्माणमामन्त्रयते ब्रह्मण ऽएवैनम्प्रति-प्रोच्य बदृधनाति नार्त्तिमार्च्छति 'तम्वर्धान देवेभ्यः प्रजापतये तेन रादृधनुही'ति ब्रह्मा प्रसौति स्वयैवैनन्देवतया समर्द्धयत्यथ प्रोक्षत्यसावेव बन्धुः ॥ ४ ॥ स प्रोक्षति । 'प्रजा[5]पतये त्वा जुष्टम्प्रोक्षामी'ति प्रजापतिर्वै देवानां व्रीर्य-वत्तमो व्रीर्यमेवास्मिन्दधाति तस्मादुश्वः पशूनां व्रीर्य-वत्तमः ॥५॥ 'इन्द्राग्नि[6]भ्यान्त्वा जुष्टम्प्रोक्षामी'ति । इन्द्राग्नी वै देवानामोजस्वितमा ऽओज ऽएवास्मिन्दधाति तस्मा-दुश्वः पशूनामोजस्वितमः ॥ ६ ॥ 'वायवे त्वा जुष्टम्प्रो-क्षामी'ति । वायुर्वै देवानामाशिष्टो जवमेवास्मिन्दधाति तस्मादुश्वः पशूनामाशिष्टः ॥ ७ ॥ 'विश्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामी'ति । विश्वे वै देवा देवानां यशस्वितमा यश ऽएवास्मिन्दधाति तस्मादुश्वः पशूनां यशस्वितमः 'सर्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामी'ति ॥ ८ ॥ तदाहुः । यत्प्राजापत्योऽश्वोऽथ कथाप्यन्न्याभ्यो

(१) शु० य० सं० २२. ४। (२) शु० य० सं० २२. ४। (३) शु० य० सं० २२. ४। (४) शु० य० सं० २२. ४। (५) शु० य० सं० २२. ५। (६) शु० य० सं० २२. ५। (७) शु० य० सं० २२. ५। (८) शु० य० सं० २२. ५। (९) शु० य० सं० २२. ५।

देवताभ्यः प्रोक्षतीति सर्वा वै देवता ऽअश्वमेधेऽन्वायत्ता यदाह सर्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामीति सर्वा ऽएवास्मिन्देवता ऽअन्वायातयति तस्मादश्वमेधे सर्वा देवता ऽअन्वायत्ताः पाप्मा वा ऽएतम्भ्रातृव्य ऽईप्सति योऽश्वमेधेन यजते वज्रो ऽश्वः 'परो मर्त्तः परः श्वे'ति श्ववानश्चतुरक्षः हुत्वाधस्पदमश्वस्योपप्लावयति वज्रेणैवैनमवक्रामति नैनम्पाप्मा भ्रातृव्य ऽआप्नोति ॥ ९ ॥

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

—:०:—

[सहस्रमाहुतयः]

यथा वै हविषोऽहुतस्य स्कन्देत् । एवमेतत्पशोः स्कन्दति यन्निक्तमनालब्धमुत्सृजन्ति यत्स्तोकीया जुहोति सर्वहुतमेवैनञ्जुहोत्यस्कन्दायास्कन्नः हि तद्यद्धुतस्य स्कन्दति सहस्रञ्जुहोति सहस्रसम्मितो वै स्वर्गो लोकः स्वर्गस्य लोकस्याभिजित्यै ॥ १ ॥ तदाहुः । यन्मिता जुहुयात्परिमितमवरुन्धीतेत्यमिता जुहोत्यपरिमितस्यैवावरुद्ध्या ऽउवाच ह प्रजापतिः स्तोकीयासु वा ऽअहमश्वमेधः सꣳस्थापयामि तेन सꣳस्थितेनैवात ऽऊर्द्ध्वञ्चरामीति ॥ २ ॥ 'अग्नये स्वाहे'ति । अग्नय ऽएवैनञ्जुहोति 'सोमाय स्वाहे'ति सोमायैवैनञ्जुहो'त्यपाम्मोदाय

(१) शु० य० सं० २२. ५ । (२) शु० य० सं० २२. ६ । (३) शु० य० सं० २२. ६ । (४) शु० य० सं० २२. ६ ।

स्वाहे'त्यद्भ्य ऽएवैनञ्जुहोति 'सवित्रे स्वाहे'ति सवित्र ऽएवैनञ्जुहोति 'वायवे स्वाहे'ति वायव ऽएवैनञ्जुहोति 'विष्णवे स्वाहे'ति विष्णव ऽएवैनञ्जुहोती'न्द्राय स्वाहे'तीन्द्रायैवैनञ्जुहोति 'बृहस्पतये स्वाहे'ति बृहस्पतय ऽएवैनञ्जुहोति 'मित्राय स्वाहे'ति मित्रायैवैनञ्जुहोति 'वरुणाय स्वाहे'ति वरुणायैवैनञ्जुहोत्येतावन्तो वै सर्वे देवास्तेभ्य ऽएवैनञ्जुहोति पराचीर्जुहोति पराङिव वै स्वर्गो लोकः स्वर्गस्य लोकस्याभिजित्यै ॥ ३ ॥ ईश्वरो वा ऽएषः । पराङ् प्रदुघोर्य्यः पराचीराहुतीर्जुहोति पुनरावर्त्ततेऽस्मिन्नेव लोके प्रतितिष्ठत्येताꣳ ह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दायास्कन्नः हि तद्यद्धुतस्य स्कन्दति ॥ ४ ॥ यथा वै हविषोऽहुतस्य स्कन्देत् । एवमेतत्पशो स्कन्दति यम्प्रोक्षितमनालब्धमुत्सृजन्ति यद्रूपाणि जुहोति सर्वहुतमेवैनञ्जुहोत्यस्कन्दायास्कन्नः हि तद्यद्धुतस्य स्कन्दति 'हिङ्काराय स्वाहा हिङ्कृताय स्वाहे'त्येतानि वा ऽअश्वस्य रूपाणि तान्येवावरुन्द्धे ॥ ५ ॥ तदाहुः । अनाहुतिर्वै रूपाणि नैता होतव्या ऽइत्यथो खल्वाहुरत्र वा ऽअश्वमेधः सन्तिष्ठते यद्रूपाणि जुहोति होतव्या ऽएवेति बहिर्द्धा वा ऽएतमायतनात्करोति भ्रातृव्यमस्मै जनयति यस्यानायतनेऽग्न्यत्राग्नेराहुतीर्जुहोति ॥ ६ ॥ सावित्र्या

(१) शु० य० सं० २२. ६ । (२) शु० य० सं० २२. ६। (३) शु० य० सं० २२. ६। (४) शु० य० सं० २२. ६। (५) शु० य० सं २२. ६। (६) शु० य० सं० २२. ६।

(७) शु० य० सं० २२. ६। (८) शु० य० स० २२. ७।

ऽएवेष्टेः । पुरस्तादनुद्रुत्य सकृदेव रूपाण्याहवनीये जुहोत्यायतन ऽएवाहुतीर्जुहोति नास्मै ब्भ्रातृव्यञ्जनयति यज्ञमुखे यज्ञमुखे जुहोति यज्ञस्य सन्तत्या ऽअव्यवच्छेदाय ॥ ७ ॥ तदाहुः । यद्यज्ञमुखे यज्ञमुखे जुहुयात्पशुभिर्व्यृद्ध्येत पापीयान्त्स्यात्सकृदेव होतव्या न पशुभिर्व्यृद्ध्यते न पापीयान्भवत्यष्टाचत्वारिꣳशतञ्जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुन्द्ध ऽएकमतिरिक्तञ्जुहोति तस्मादेकः प्रजास्वर्द्धुकः ॥ ८ ॥

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥



[सावित्र्य इष्टयः]

प्रजापतिरश्वमेधमसृजत । सोऽस्मात्सृष्टः पराङैत्स दिशोऽनुप्राविशत्तन्देवाः प्रैषमैच्छँस्तमिष्टिभिरनुप्रायुञ्जत तमिष्टिभिरन्वैच्छँस्तमिष्टिभिरन्वविन्दन्यद्विष्टिभिर्यजतेऽश्वमेव तन्मेध्यं क्रियमाणोऽन्विच्छति ॥ १ ॥ सावित्र्यो भवन्ति । इयं वै सविता यो वा ऽअस्यान्निर्लयते योऽन्यत्रैत्यस्यां वाव तमनुविन्दन्ति न वा ऽइमाङ्कश्चन तिर्य्यङ्नोर्द्धोऽत्येतुमर्हति यत्सावित्र्यो भवन्त्यश्वस्यैवानुवित्त्यै ॥ २ ॥ तदाहुः । प्र वा ऽएतदश्वो मीयते यत्पराङेति न ह्येनम्प्रत्यावर्त्तयन्तीति यत्सायन्धृतीर्जुहोति क्षेमो वै धृतिः क्षेमो रात्रिः क्षेमेणैवैनन्दाधार तस्मात्सायम्मनुष्याश्च पशवश्च क्षेम्या भवन्त्यथ यत्प्रातरिष्टि-

भिर्यजत ऽइच्छत्येवैनन्तत्तस्माद्दिवा नष्टैष ऽएति यद्दव सायन्धृतीर्जुहोति प्रातरिष्टिभिर्यजते योगक्षेममेव तद्यजमानः कल्पयते तस्माद्यत्रैतेन यज्ञेन यजन्ते क्वलृप्तः प्रजानां ह्योगक्षेमो भवति ॥ ३ ॥

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[गाथागानम्]

अप वा ऽएतस्मात् । श्री राष्ट्रङ्क्रामति योऽश्वमेधेन यजते यदा वै पुरुषः श्रियङ्गच्छति वीणास्मै वाद्यते ब्राह्मणौ वीणागाथिनौ संवत्सरङ्गायतः श्रियै वा ऽएतद्रूपं ह्यद्वीणा श्रियमेवास्मिँस्तद्धत्तः ॥ १ ॥ तदाहुः । यदुभौ ब्राह्मणौ गायेतामपास्मात्क्षत्रङ्क्रामेद्ब्रह्मणो वा ऽएतद्रूपं ह्यद्ब्राह्मणो न वै ब्रह्मणि क्षत्रः रमत ऽइति ॥ २ ॥ यदुभौ राजन्न्यौ । अपास्माद्ब्रह्मवर्चसङ्क्रामेत्क्षत्रस्य वा ऽएतद्रूपं ह्यद्राजन्न्यो न वै क्षत्रे ब्रह्मवर्चसः रमत ऽइति ब्राह्मणोऽन्न्यो गायति राजन्न्योऽन्न्यो ब्रह्म वै ब्राह्मणः क्षत्रः राजन्न्यस्तदस्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवति ॥ ३ ॥ तदाहुः । यदुभौ दिवा गायेताम्प्रभ्रष्टःशुकास्माच्छ्रीः स्याद्ब्रह्मणो वा ऽएतद्रूपं ह्यदुहर्ह्यदा वै राजा कामयतेऽथ ब्राह्मणमिनाति पापीयाँस्तु भवति ॥ ४ ॥ यदुभौ नक्तम् । अपास्माद्ब्रह्मवर्चसङ्क्रामेत्क्षत्रस्य वा ऽएतद्रूपं ह्यद्रात्रिर्न वै क्षत्रे

ब्रह्मवर्चसꣳ रमत ऽइति दिवा ब्राह्मणो गायति नक्तꣳ राजन्न्यस्तथो हास्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवतीति ॥ ५ ॥ अयजतेत्यददादिति ब्राह्मणो गायतीष्टापूर्त्तं वै ब्राह्मणस्येष्टापूर्त्तेनैवैनꣳ स समर्द्धयतीत्ययुद्ध्यतेत्यमुꣳ सङ्गाममजयदिति राजन्न्यो युद्धं वै राजन्न्यस्य वीर्य्यं वीर्य्येणैवैनꣳ स समर्द्धयति तिस्रोऽन्यो गाथा गायति तिस्रोऽन्यः षट् सम्पद्यन्ते षड्वृतवः सँवत्सर ऽऋतुष्वेव सँवत्सरे प्रतितिष्ठति ताभ्याꣳ शतन्ददाति शतायुर्वै पुरुषः शतेन्द्रिय ऽआयुरेवेन्द्रियं वीर्य्यमात्मन्धत्ते ॥ ६ ॥

प्रथमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[अश्वकर्णे जपः, धृतिहोमश्च]

'विभूर्म्मात्रा प्रभुः पित्रे'ति । इयं वै मातासौ पिताभ्यामेवैनम्परिददा'त्यश्वोऽसि हयोऽसी'ति शास्त्येवैनन्तत्तस्माच्छिष्टाः प्रजा जायन्ते'ऽत्योऽसि मयो ऽसी'त्यत्येवैनन्नयति तस्मादश्वः पशूनत्येति तस्मादश्वः पशूनाꣳ श्रैष्ठ्यङ्गच्छ'त्यर्वासि सप्तिरसि वाज्यसी'ति यथायजुरेवैत'द्वृषासि नृमणा ऽअसी'ति मिथुनत्वाय 'यर्युन्नामासि शिशुर्न्नामासी'त्येतद्वा ऽअश्वस्य प्रियन्नाम-

(१) शु० य० सं० २२. १९ । (२) शु० य० सं० २२. १९ । (३) शु० य० सं० २२. १९ । (४) शु० य० सं० २२. १९ । (५) शु० य० सं० २२. १९ । (६) शु० य० सं० २२. १९ ।

ध्येयम्प्रियेणैवैनन्नाम्न्नाभिवदति तस्म्मादुप्यामित्रौ सङ्गत्य नाम्ना चेदभिवदतोऽन्योऽन्यः समेव जानाते ॥ १ ॥ 'आदित्यानाम्पत्त्वान्न्विहीं'ति । आदित्यानेवैनङ्गमयति 'देवा ऽआशापाला ऽएतन्देवेभ्योऽश्वम्मेधाय प्रोक्षितꣳ रक्षन्ते'ति शतं वै तल्प्या राजपुत्रा ऽआशापालास्तेभ्य ऽएवैनम्परिददाती'ह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहे'ति सँवत्सरमाहुतीर्जुहोति षोडश नवतीरेता वा ऽअश्वस्य बन्धनन्ताभिरेवैनम्बद्धनाति तस्म्मादुश्वः प्रमुक्तो बन्धनमागच्छति षोडश नवतीरेता वा ऽअश्वस्य बन्धनन्ताभिरेवैनम्बद्धनाति तस्म्मादुश्वः प्रमुक्तो बन्धनन्न जहाति ॥ २ ॥ राष्ट्रं वा ऽअश्वमेधः । राष्ट्रं ऽएते व्ययच्छन्ते येऽश्वः रक्षन्ति तेषां य ऽउदूचङ्गच्छन्ति राष्ट्रेणैव ते राष्ट्रम्भवन्त्यथ ये नोदूचङ्गच्छन्ति राष्ट्रात्ते व्यवच्छिद्यन्ते तस्म्माद्राष्ट्र्यश्वमेधेन यजेत परा वा ऽएष सिच्यते योऽबलोऽश्वमेधेन यजते यद्यमित्रा ऽअश्वं विन्देरन्यज्ञोऽस्य विच्छिद्येत पापीयान्त्स्याच्छतङ्कवचिनो रक्षन्ति यज्ञस्य सन्तत्या ऽअव्यवच्छेदाय न पापीयाञ्भवत्यथान्न्यमानीय प्रोक्षेयुः सैव तत्र प्रायश्चित्तिः ॥ ३ ॥

प्रथमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥



(१) शु० य० सं० २२. १९ । (२) शु० य० सं० २२. १९ । (३) शु० य० सं० २२. १९ ।

[औद्भ्रभणहोमः]

प्रजापतिरकामयत । अश्वमेधेन यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य सप्तधात्मनो देवता ऽअपाक्रामन्त्सा दीक्षाभवत्स ऽएतानि वैश्वदेवान्यपश्यत्तान्यजुहोत्तैर्वै स दीक्षामवारुन्द्ध यद्वैश्वदेवानि जुहोति दीक्षामेव तैर्यजमानोऽवरुन्द्धेऽन्वहञ्जुहोत्यन्वहमेव दीक्षामवरुन्द्धे सप्त जुहोति सप्त वै ता देवता ऽअपाक्रामँस्ताभिरेवास्मै दीक्षामवरुन्द्धे ॥ १ ॥ अप वा ऽएतेभ्यः प्राणाः क्रामन्ति । ये दीक्षामतिरेचयन्ति सप्ताहम्प्रचरन्ति सप्त वै शीर्षण्याः प्राणाः प्राणा दीक्षा प्राणैरेवास्मै प्राणान्दीक्षामवरुन्द्धे त्रेधा विभज्य देवताञ्जुहोति त्र्यावृतो वै देवास्त्र्यावृत ऽइमे लोका ऽऋद्ध्यामेव वीर्य्य ऽएषु लोकेषु प्रतितिष्ठति ॥ २ ॥ एकविꣳशतिः सम्पद्यन्ते । द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविꣳशस्तद्वैवं क्षत्रꣳ सा श्रीस्तदाधिपत्यन्तद्ब्रह्मन्नस्य विष्टपन्तत्स्वाराज्यमश्नुते ॥ ३ ॥ त्रिꣳशतमौद्भ्रभणानि जुहोति । त्रिꣳशदक्षरा विराड्विराडु कृत्स्नमन्नङ्कृत्स्नस्यैवान्नाद्यस्यावरुद्ध्यै चत्वार्यौद्भ्रभणानि जुहोति त्रीणि वैश्वदेवानि सप्त सम्पद्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणा दीक्षा प्राणैरेवास्मै प्राणान्दीक्षामवरुन्द्धे पूर्णाहुतिमुत्तमाञ्जुहोति प्रत्युत्तब्ध्यै सयुक्त्वाय ॥ ४ ॥

प्रथमाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

प्रजापतिरश्वमेधमसृजत । स सृष्टः प्रऽर्चमब्ली-नात्प्र साम तं वैश्वदेवान्न्युदयच्छन्न्यद्वैश्वदेवानि जुहो-त्यश्वमेधस्यैवोद्यत्यै ॥ १ ॥ 'काय स्वाहा । कस्मै स्वाहा कतमस्मै स्वाहे'ति प्राजापत्यम्मुख्यङ्करोति प्रजा-पतिमुखाभिरेवैनन्देवताभिरुद्यच्छति ॥ २ ॥ 'स्वाहाधिमा-धीताय स्वाहा । मनः प्रजापतये स्वाहा चित्तं विज्ञाता-ये'ति यदेव पूर्वासाम्ब्राह्मणन्तदत्र ॥ ३ ॥ 'अदित्यै स्वाहा । अदित्यै महद्यै स्वाहादित्यै सुमृडीकायै स्वाहे'तीयं वा ऽअदितिरनयैवैनमुद्यच्छति ॥ ४ ॥ 'सरस्वत्यै स्वाहा । सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहे'ति वाग्वै सरस्वती वाचैवैनमुद्यच्छति ॥ ५ ॥ 'पूष्णे स्वाहा । पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहे'ति पशवो वै पूषा पशुभिरेवैनमुद्यच्छति ॥ ६ ॥ 'त्वष्ट्रे स्वाहा । त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहे'ति त्वष्टा वै पशूनाम्मिथुनानाꣳ रूपकृद्रूपैरेवैनमुद्यच्छति ॥ ७ ॥ 'विष्णवे स्वाहा । विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहे'ति यज्ञो वै विष्णुर्यज्ञेनैवैनमुद्यच्छति 'विश्वो देवस्य नेतुरिति पूर्णाहुतिमुत्तमाञ्जुहोतीयं वै पूर्णाहुतिरस्यामेवान्ततः प्रतितिष्ठति ॥ ८ ॥

प्रथमाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

(१) शु० य० सं० २२. २० । (२) शु० य० सं० २२. २० । (३) शु० य० सं० २२. २० । (४) शु० य० सं० २२. २० । (५) शु० य० सं० २२. २० । (६) शु० य० सं० २२. २० । (७) शु० य० स० २२. २० । (८) शु० य० स० २२. २१ ।

[अध्वर्युकर्तृकजपः]

'आ ब्रह्मन्। ब्राह्मणो ब्रह्मवर्चसी जायता'मिति ब्राह्मण ऽएव ब्रह्मवर्चसन्दधाति तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चसी जज्ञे ॥ १ ॥ 'आ राष्ट्रे राजन्यः। शूर ऽइषव्योऽतिव्याधी महारथो जायता'मिति राजन्य ऽएव शौर्य्यम्महिमानन्दधाति तस्मात्पुरा राजन्यः शूर ऽइषव्योऽतिव्याधी महारथो जज्ञे ॥ २ ॥ 'दोग्ध्री धेनु'रिति। धेन्वामेव पयो दधाति तस्मात्पुरा धेनुर्दोग्ध्री जज्ञे ॥ ३ ॥ 'वोढानड्वा'निति। अनड्वाह्येव बलन्दधाति तस्मात्पुरानड्वान्वोढा जज्ञे ॥ ४ ॥ 'आशुः सप्ति'रिति। अश्व ऽएव जवन्दधाति तस्मात्पुराश्वः सर्त्ता जज्ञे ॥ ५ ॥ 'पुरन्धिर्योषे'ति। योषित्येव रूपन्दधाति तस्मात्पूषिणी युवतिः प्रिया भावुका ॥ ६ ॥ 'जिष्णू रथेष्ठा' ऽइति। राजन्य ऽएव जैत्रम्महिमानन्दधाति तस्मात्पुरा राजन्यो जिष्णुर्ज्जज्ञे ॥ ७ ॥ 'सभेयो युवे'ति। एष वै सभेयो युवा यः प्रथमवयसी तस्मात्प्रथमवयसी स्त्रीणाम्प्रियो भावुकः ॥ ८ ॥ 'आऽस्य यजमानस्य वीरो जायता'मिति। यजमानस्यैव प्रजायां वीर्य्यन्दधाति तस्मात्पुरेजानस्य वीरो जज्ञे ॥९॥ [अर्धः प्रपाठकः ॥५४॥] 'निकामे-निकामे नः पर्जन्यो वर्षत्वि'ति। निकामे-निकामे वै तत्र पर्जन्यो

(१) शु० य० सं० २२. २२। (२) शु० य० सं० २१. २२। (३) शु० य० सं० २२. २१। (४) शु० य० सं० २२. २२। (५) शु० य० सं० २२. २२। (६) शु० य० सं० २२. २१। (७) शु० य० सं० २२. २२। (८) शु० य० सं० २२. २२। (९) शु० य० सं० २२. २२। (१०) शु० य० सं० २२. २२।

वर्षति यत्रैतेन यज्ञेन यजन्ते 'फलवत्यो न ऽओषधयः पच्यन्ता'मिति फलवत्यो वै तत्रौषधयः पच्यन्ते यत्रैतेन यज्ञेन यजन्ते 'योगक्षेमो नः कल्पता'मिति योगक्षेमो वै तत्र कल्पते यत्रैतेन यज्ञेन यजन्ते तस्माद्यत्रैतेन यज्ञेन यजन्ते कल्पन्तः प्रजानां स्योगक्षेमो भवति ॥ १० ॥

प्रथमाध्याये नवमं ब्राह्मणम् ॥ ९ ॥

इति प्रथमोऽध्यायः ॥ १ ॥


[आज्यसक्तुधानालाजहोमः]

प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् । स ऽआत्मन्नश्वमेधमधत्त ते देवाः प्रजापतिमब्रुवन्नेष वै यज्ञो यदश्वमेधोऽपि नोऽत्रास्तु भाग ऽइति तेभ्य ऽएतानन्नहोमानकल्पयद्यदन्नहोमाञ्जुहोति देवानेव तत्प्रीणाति ॥१॥ आज्येन जुहोति । तेजो वा ऽआज्यन्तेजसैवास्मिँस्तत्तेजो दधात्याज्येन जुहोत्येतद्वै देवानाम्प्रियन्धाम यदाज्यम्प्रियेणैवैनान्धाम्ना समर्द्धयति ॥ २ ॥ सक्तुभिर्जुहोति । देवानां वा ऽएतद्रूपं स्यत्सक्तवो देवानेव तत्प्रीणाति ॥ ३ ॥ धानाभिर्जुहोति । अहोरात्राणां वा ऽएतद्रूपं स्यद्धाना ऽअहोरात्राण्येव तत्प्रीणाति ॥ ४ ॥ लाजैर्जुहोति । नक्षत्राणां वा ऽएतद्रूपं स्यल्लाजा नक्षत्राण्येव तत्प्रीणाति 'प्राणाय स्वाहापानाय स्वाहे'ति नामग्राहञ्जुहोति नाम-

(१) शु० य० सं० २१. २२। (२) शु० य० सं० २२. २२। (३) शु० य० सं० २२. २३।

ग्राहमेवैनाँस्तत्प्रीणा'त्येकस्मै स्वाहा द्वाभ्याꣳ स्वाहा शताय स्वाहैकशताय स्वाहे'त्यनुपूर्व्वꣳहोत्यनुपूर्व्वमेवैनाँस्तत्प्रीणात्येकोत्तरा जुहोत्येकवृद्ध्यै स्वर्ग्यो लोक ऽएकधैवैनꣳ स्वर्ग्यꣳल्लोकꣳ गमयति पराचीर्जुहोति पराङ्विव वै स्वर्ग्यो लोकः स्वर्ग्यस्य लोकस्याभिजित्यै ॥५॥ ईश्वरो वा ऽएषः । पराङ् प्रदुघोर्ष्यः पराचीराहुतीर्जुहोति नैकशतमत्येति यदेकशतमतीयादायुषा यजमानं व्यर्द्धयेदेकशतञ्जुहोति शतायुर्व्वै पुरुष ऽआत्मैकशत आयुष्येवात्मन्प्रतितिष्ठति व्यृद्ध्यै स्वाहा स्वर्ग्याय स्वाहे'त्युत्तमे ऽआहुती जुहोति रात्रिर्व्वै व्यृष्टिरहः स्वर्ग्यो ऽहोरात्रे ऽएव तत्प्रीणाति ॥ ६ ॥ तदाहुः । यदुभे दिवा वा नक्तं वा जुहुयादहोरात्रे मोहयेद्व्यृष्ट्यै स्वाहेत्यनुदित ऽआदित्ये जुहोति स्वर्ग्याय स्वाहेत्युदिते ऽहोरात्रयोरव्यतिमोहाय ॥ ७ ॥

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥



[पर्यङ्गपशुनिरूपणम्]

राजा वा ऽएष यज्ञानां यदश्वमेधः । यजमानो वा ऽअश्वमेधो यज्ञो यदश्वे पशून्नियुनक्ति यज्ञ ऽएव तद्यज्ञमारभते ॥ १ ॥ अश्वन्तुपरङ्कोमृगमिति । तान्मध्यमे यूप ऽआलभते सेनामुखमेवास्यैतेन सꣳश्यति तस्माद्राज्ञः सेनामुखम्भीष्ममम्भावुकम् ॥ २ ॥ कृष्णग्रीवमाग्नेयꣳ रराटे पुरस्तात् । पूर्वाग्निमेव तद्रुरुते

(१) शु० य० सं० २२. ३४ । (२) शु० य० सं० २२. ३४ ।

तस्माद्राजः पूर्वाग्निर्भावुकः ॥ ३ ॥ सारस्वतीम्मेषीमधस्ताद्धन्वोः । स्त्रीरेव तदनुगाः कुरुते तस्मात्स्त्रियः पुंसोऽनुवर्त्मानो भावुकाः ॥ ४ ॥ आश्विनावधोरामौ बाह्वोः । बाह्वोरेव बलन्धत्ते तस्माद्राजा बाहुबली भावुकः ॥ ५ ॥ सौमापौष्णꣳ श्यामशबलाभ्याम् । प्रतिष्ठामेव ताङ्कुरुत ऽइयं वै पूषास्यामेव प्रतितिष्ठति ॥ ६ ॥ सौर्य्ययामौ श्वेतश्च कृष्णश्च पाश्चर्वयोः । कवचे ऽएव ते कुरुते तस्माद्राजा सन्नद्धो वीर्य्यङ्करोति ॥७॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः । ऊर्वोरेव बलन्धत्ते तस्माद्राजोरुबली भावुकः ॥ ८ ॥ वायव्यꣳ श्वेतम्पुच्छे । उत्सेधमेव तङ्कुरुते तस्मादुत्सेधम्प्रजा भयेऽभिसꣳश्रयन्तीन्द्राय स्वपस्याय वेहुतं व्यज्ञस्य सेन्द्रतायै वैष्णवो वामनो यज्ञो वै विष्णुर्य्यज्ञ ऽएवान्ततः प्रतितिष्ठति ॥ ९ ॥ ते वा ऽएते । पञ्चदश पर्य्यङ्क्याः पशवो भवन्ति पञ्चदशो वै वज्रो वीर्य्यं वज्रो वज्रेणैवैतद्वीर्य्येण यजमानः पुरस्तात्पाप्मानमपहते ॥ १० ॥ पञ्चदश—पञ्चदशो ऽएवेतरेषु । पञ्चदशो वै वज्रो वीर्य्यं वज्रो वज्रेणैवैतद्वीर्य्येण यजमानोऽभितः पाप्मानमपहते ॥ ११ ॥ तदाहुः । अपाहैवैतैः पाप्मानः हता ऽइत्यकृत्स्नश्च त्वै प्रजापतिः संस्करोति न चेदः सर्वमवरुन्धे ॥ १२ ॥ सप्तदशैव * पशुरमध्यमे यूप ऽआलभेत । सप्तदशो वै प्रजापतिः

* त्रयोऽश्वतूपरगोमृगाः द्वौ चाग्नेयावेकादशिनौ द्वादश रोहितादयः, एव सप्तदश पशवो मध्यमे यूपे भवन्ति ।

प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै षोडश—षोडशेतरेषु षोडशकलं वा ऽइदꣳ सर्वन्तदिदꣳ सर्वमवरुन्द्धे ॥ १३ ॥ ताꣳकथमाप्रीणीयादित्याहुः । 'समिद्धो ऽअञ्जन्कृदरम्मतीना'मिति बार्हदुक्थीभिराप्रीणीयाद्बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्याप्प्रीर्ददर्श ता ऽएतास्ताभिरेवैनमेतदाप्रीणीम ऽइति ब्रुवन्तो न तथा कुर्य्याज्जामदग्नीभिरेवाप्रीणीयात्प्रजापतिर्वै जमदग्निः सोऽश्वमेधः स्वयैवैनन्देवतया समर्द्धयति तस्माज्जामदग्नीभिरेवाप्रीणीयात् ॥ १४ ॥ तद्धैके । एतेषाम्पर्य्यङ्क्त्याणान्नाना षाज्यापुरोऽनुवाक्क्याः कुर्वन्ति विन्द्याम ऽएतेषामविरित्येतरेषान्न कुर्म्म ऽइति न तथा कुर्य्यात्क्षत्रं वा ऽअश्वो विड्तरे पशवः प्रतिप्रतिनीथं ह ते प्रत्युद्यामिनीङ्क्षत्राय विशङ्कुर्वन्त्यथो ऽआयुषा यजमानं व्यर्द्धयन्ति ये तथा कुर्वन्ति तस्मात्प्राजापत्य ऽएवाश्वो देवदेवत्या ऽइतरे क्षत्रायैव तद्विशङ्कतानुकरामनुवर्त्मानङ्करोत्यथो ऽआयुषैव यजमानꣳ समर्द्धयति ॥ १५ ॥ हिरण्मयोश्वस्य शासो भवति । लोहमयाः पर्य्यङ्क्त्याणामायसा ऽइतरेषाञ्ज्योतिर्वै हिरण्यꣳ राष्ट्रमश्वमेधो ज्योतिरेव तद्राष्ट्रे दधात्यथो हिरण्यज्योतिषैव यजमानः स्वर्गꣳ लोकमेत्यथो ऽअनूकाशमेव तङ्कुरुते स्वर्गस्य लोकस्य समष्ट्यै ॥ १६ ॥ अथो क्षत्रं वा ऽअश्वः । क्षत्रस्यैतद्रूपं यद्धिरण्यं क्षत्रमेव तत्क्षत्रेण समर्द्धयति ॥ १७ ॥ अथ

(१) शु० य० स० २९. १ ।

यल्लोहमयाः पर्ण्यङ्क्थाणाम् । यथा वै राज्ञोऽराजानो राजकृतः सूतग्रामण्य ऽएवं वा ऽएतेऽश्वस्य यत्पर्ण्यङ्क्था ऽएवमु वा ऽएतद्धिरण्यस्य यल्लोहꣳ स्वेनैवैनाँस्तद्रूपेण समर्द्धयति ॥ १८ ॥ अथ यदायसा ऽइतरेषाम् । विड्वा ऽइतरे पशवो विश ऽएतद्रूपं यदयो विशमेव तद्विशा समर्द्धयति वैतस ऽइटसून ऽउत्तरतोऽश्वस्यावद्यन्त्यानुष्टुभो वा ऽअश्व ऽआनुष्टुभैषा दिक्स्वायामेवैनन्तद्दिशि दधात्यथ यद्वैतस ऽइटसूनेऽप्सुयोनिर्वा ऽअश्वोऽप्सुजा वेतसः स्वयैवैनं योन्या समर्द्धयति ॥ १९ ॥

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[उद्गात्रन्वारम्भः]

देवा वा ऽअश्वमेधे पवमानम् । स्वर्गꣳलोकन्न प्राजानँस्तमश्वः प्राजानाद्यदश्वमेधेऽश्वेन पवमानाय सर्प्पन्ति स्वर्ग्गस्य लोकस्य प्रज्ञात्यै पुच्छमन्वारभन्ते स्वर्ग्गस्यैव लोकस्य समष्ट्यै न वै मनुष्यः स्वर्गꣳलोकमञ्जसा वेदाश्वो वै स्वर्गꣳलोकमञ्जसा वेद ॥ १ ॥ यदुद्गातोद्गायेत् । यथाक्षेत्रज्ञोऽन्येन पथा नयेत्तादृक्तदथ यदुद्गातारमपरुद्ध्याश्वमुद्गीथाय व्वृणीते यथा क्षेत्रज्ञोऽञ्जसा नयेदेवमेवैतद्यजमानमश्वः स्वर्गꣳलोकमञ्जसा नयति हिङ्करोति सामैव तद्धिङ्करोत्युद्गीथ ऽएव स वडवा ऽउप-

(१) 'व' इति 'ग' 'ज' पुस्तकयोः ।

रुन्धन्ति सꣳशिꣳशते यथोपगातार ऽउपगायन्ति तादृक्-द्धिरण्यन्दक्षिणा सुवर्णꣳ शतमानन्तस्योक्तम्ब्राह्मणम् ॥२॥

द्वितीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[ग्राम्यपश्वालम्भः, आरण्यपशूनामुत्सर्गश्च]

प्रजापतिरकामयत । उभौ लोकावभिजयेयन्देवलोकञ्च मनुष्यलोकञ्चेति स ऽएताꣳपशूनपश्यद्ग्राम्याꣳश्चारण्याꣳश्च तानालभत तैरिमौ लोकाववारुन्द्ध ग्राम्यैरेव पशुभिरिमꣳल्लोकमवारुन्द्धारण्यैरमुमयं वै लोको मनुष्यलोकोऽथासौ देवलोको यद्ग्राम्याꣳपशूनालभत ऽइममेव तैर्ल्लोकं यजमानोऽवरुन्द्धे यदारण्यानमुन्तैः ॥१॥ स यद्ग्राम्यैः सꣳस्थापयेत् । समद्धानः क्रामेयुः समन्तिकङ्ग्रामयोर्ग्रामान्तौ स्यातान्नऽक्षीकाः पुरुषव्याघ्राः परिमोषिण ऽआव्याधिन्यस्तस्करा ऽअरण्येष्वाजायेरन्यदारण्यैर्व्यर्द्धानः क्रामेयुर्विदूरङ्ग्रामयोर्ग्रामान्तौ स्यातामृक्षीकाः पुरुषव्याघ्राः परिमोषिण ऽआव्याधिन्यस्तस्करा ऽअरण्येष्वाजायेरन् ॥ २ ॥ तदाहुः । अपशुर्वा ऽएष यदारण्यो नैतस्य होतव्यं यजुर्जुहुयात्क्षिप्रं यजमानमरण्यम्मृतः हरेयुररण्यभागा ह्यारण्याः पशवो यन्न जुहुयाद्यज्ञवेशसꣳ स्यादिति पर्य्यग्निकृतानेवोत्सृजन्ति तन्नैव हुतन्नाहुतन्न यजमानमरण्यम्मृतः हरन्ति न यज्ञवेशसम्भवति ॥ ३ ॥ ग्राम्यैः सꣳस्थापयति । द्विपितापुत्रावववस्यतः समद्धानः क्रामन्ति समन्तिकङ्ग्राम-

योग्र्यामान्तौ भवतो नऽक्षीकाः पुरुषव्याघ्राः परिमोषिण ऽआव्याधिन्यस्तस्करा ऽअरण्येष्वाजायन्ते ॥ ४ ॥

द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[पञ्चैकादशिनी]

प्रजापतिरश्वमेधमसृजत । सोऽस्मात्सृष्टः परा-ऽइत्स पङ्क्तिर्भूत्वा सँवत्सरम्प्राविशत्तेऽर्द्धमासा ऽअभवँ-स्तम्पञ्चदशिभिरनुप्रायुङ्क्त तमाप्नोत्तमाप्त्वा पञ्चदशिभि-रवारुन्द्धार्द्धमासानां वा ऽएषा प्रतिमा यत्पञ्चदशिनो यत्पञ्चदशिन ऽआलभतेऽर्द्धमासानेव तैर्यजमानोऽवरुन्द्धे ॥ १ ॥ तदाहुः । अनवरुद्धो वा ऽएतस्य सँवत्सरो भवति योऽन्यत्र चातुर्म्मास्येभ्यः सँवत्सरन्तनुत ऽइत्येष वै साक्षात्सँवत्सरो यच्चातुर्म्मास्यानि यच्चातुर्म्मास्यान्पशूना-लभते साक्षादेव तत्सँवत्सरमवरुन्द्धे वि वा ऽएष प्रजया पशुभिर्ऋद्ध्यतेऽप स्वर्गंल्लोकः राद्ध्नोति योऽन्यत्रैकाद-शिनेभ्यः सँवत्सरन्तनुत ऽइत्येष वै सम्प्रति स्वर्गो लोको यदेकादशिनी प्रजा वै पशव ऽएकादशिनी यदैकादशिना-न्पशूनालभते न स्वर्गंल्लोकमपराद्ध्नोति न प्रजया पशुभिर्व्यृद्ध्यते ॥ २ ॥ प्रजापतिर्विराजमसृजत । सास्मा-त्सृष्टा पराच्यैत्साश्वम्मेध्यम्प्राविशत्तान्दशिभिरनुप्रा-युङ्क्त तामाप्नोत्तामाप्त्वा दशिभिरवारुन्द्ध यद्दशिन ऽआल-भते विराजमेव तैर्यजमानोऽवरुन्द्धे शतमालभते शतायुर्वै पुरुषः शतेन्द्रिय ऽआयुरेवेन्द्रियं वीर्यमात्मन्धत्ते ॥ ३ ॥

एकादश दशत ऽआलभते। एकादशाक्षरा वै त्रिष्टुबिन्द्रियमु वै वीर्य्यन्त्रिष्टुबिन्द्रियस्यैव वीर्य्यस्यावरुद्ध्या ऽएकादश दशत ऽआलभते दश वै पशोः प्राणा ऽआत्मैकादशः प्राणैरेव पशून्त्समर्द्धयति वैश्वदेवा भवन्ति वैश्वदेवो वा ऽअश्वोऽश्वस्यैव सर्वत्वाय बहुरूपा भवन्ति तस्माद्बहुरूपाः पशवो नानारूपा भवन्ति तस्मान्नानारूपाः पशवः ॥ ४ ॥

द्वितीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

[अश्वस्य नियोजनाञ्जनमणिबन्धनादि]

'युञ्जन्ति ब्रध्नमरुषञ्चरन्त'मिति। असौ वा ऽआदित्यो ब्रध्नोऽरुषोऽमुमेवास्मा ऽआदित्यं युनक्ति स्वर्ग्गस्य लोकस्य समष्ट्यै ॥ १ ॥ तदाहुः। पराङ्वा ऽएतस्माद्यज्ञ ऽएति यस्य पशुरुपाकृतोऽन्यत्र वेदेरेती'त्येतꣳ स्तोतरनेन पथा पुनरश्वमावर्त्तयासि न' ऽइति वायुर्वै स्तोता तमेवास्मा ऽएतत्परस्ताद्धाति तथा नात्येति ॥२॥ अप वा ऽएतस्मात्। तेज ऽइन्द्रियम्पशवः श्रीः क्रामन्ति योऽश्वमेधेन यजते ॥ ३ ॥ 'वसवस्त्वाञ्जन्तु। गायत्रेण च्छन्दसे'ति महिष्यभ्यनक्ति तेजो वा ऽआज्यन्तेजो गायत्री तेजस्येवास्मिन्त्समीची दधाति ॥ ४ ॥ 'रुद्रास्त्वाञ्जन्तु। त्रैष्टुभेन च्छन्दसे'ति वावाता तेजो वा ऽआज्य-

(१) शु० य० सं० २३. ५। (२) शु० य० सं० २३. ७। (३) शु० य० सं० २३. ८। (४) शु० य० सं० २३. ८।

मिन्द्रियन्त्रिष्टुप्तेजश्चैवास्मिन्निन्द्रियञ्च समीची दधाति ॥ ५ ॥ 'आदित्यास्त्वाञ्जन्तु । जागतेन च्छन्दसे'ति परिवृक्ता तेजो वा ऽआज्यम्पशवो जगती तेजश्चैवास्मिन्पशूँश्च समीची दधाति ॥ ६ ॥ पत्न्योऽभ्यञ्जन्ति * । श्रियै वा ऽएतद्रूपं यत्पत्न्यः श्रियमेवास्मिँस्तद्दधति नास्मात्तेज ऽइन्द्रियम्पशवः श्रीरपक्रामन्ति ॥ ७ ॥ यथा वै हविषोऽहुतस्य स्कन्देत् । एवमेतत्पशो स्कन्दति यस्य निक्तस्य लोमानि शीयन्ते यत्काचानावयन्ति लोमान्येवास्य सम्भरन्ति हिरण्मया भवन्ति तस्योक्तम्ब्राह्मणमेकशतमेकशतङ्काचानावयन्ति शतायुर्वै पुरुष ऽआत्मैकशत ऽआयुष्ट्येवात्मन्प्रतितिष्ठति 'भूर्भुवः स्व'रिति प्राजापत्याभिरावयन्ति प्राजापत्योऽश्वः स्वयैवैनन्देवतया समर्द्धयन्ति 'लाजी३ञ्छाची३न्यञ्च्ये गञ्च्य' ऽइत्यतिरिक्तमन्नमश्वायोपावहरति प्रजामेवान्नादीङ्करुत 'ऽएतदन्नमत्त देवा ऽएतदन्नमद्धि प्रजापत' ऽइति प्रजामेवान्नाद्येन समर्द्धयति ॥ ८ ॥ अप वा ऽएतस्मात् । तेजो ब्रह्मवर्चसङ्क्रामति योऽश्वमेधेन यजते होता च ब्रह्मा च ब्रह्मोद्यं वदत ऽआग्नेयो वै होता बार्हस्पत्यो ब्रह्मा ब्रह्म बृहस्पतिस्तेजश्चैवास्मिन्ब्रह्मवर्चसञ्च समीची धत्तो यूपमभितो वदतो यजमानो वै यूपो यजमानमेवैतत्तेजसा

(१) शु० य० सं० २३. ८ ।
* का० श्रौ० सू० २०. ५. १५ ।
(२) शु० य० सं० २३. ८ । (३) शु० य० सं० २३. ८ । (४) शु० य० सं० २३. ८ ।

च ब्रह्मवर्चसेन चोभयतः परिधत्तः ॥ ९ ॥ 'कः[1] स्विदेकाकी चरती'ति । असौ वा ऽआदित्य ऽएकाकी चरत्येष ब्रह्मवर्चसम्ब्रह्मवर्चसमेवास्मिँस्तद्धत्तः ॥ १० ॥ 'कः[2] ऽउ स्विज्जायते पुन'रिति । चन्द्रमा वै जायते पुनरायुरेवास्मिँस्तद्धत्तः ॥ ११ ॥ 'किं[3]ꣳ स्विद्धिमस्य भेषज'मिति । अग्निर्वै हिमस्य भेषजन्तेज ऽएवास्मिँस्तद्धत्तः ॥ १२ ॥ * 'किम्[4]वावपनम्मह'दिति । अयं वै लोक ऽआवपनम्महदस्मिन्नेव लोके प्रतितिष्ठति ॥ १३ ॥ 'कां[5] स्विदासीत्पूर्वचित्ति'रिति । द्यौर्वै वृष्टिः पूर्वचित्तिर्द्दिवमेव वृष्टिमवरुन्द्धे ॥ १४ ॥ 'किं[6]ꣳ स्विदासीद्बृहद्बय' ऽइति । अश्वो वै बृहद्बय ऽआयुरेवावरुन्द्धे ॥ १५ ॥ 'काँ[7] स्विदासीत्पिलिप्पिले'ति । श्रीर्वै पिलिप्पिला श्रियमेवावरुन्द्धे ॥१६॥ 'कां स्विदासीत्पिशङ्गिले'ति अहोरात्रे वै पिशङ्गिले ऽअहोरात्रयोरेव प्रतितिष्ठति ॥ १७ ॥

द्वितीयाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥

कण्डिकासंख्या ॥ १०८ ॥



(१) शु० य० सं० २३. ९। (२) शु० य० सं० २३. ९। (३) शु० य० सं० २३. ९।
* अत्र शतम् १५००।
(४) शु० य० सं० २३. ९। (५) शु० य० सं० २३. ११। (६) शु० य० सं० २३. ११। (७) शु० य० सं० २३. ११। (८) शु० य० सं० २३. ११।

[अश्वस्य प्रोक्षणादि]

नियुक्तेषु पशुषु । प्रोक्षणीरद्धर्य्युरादत्तेऽश्वम्प्रोक्षिष्यन्नन्वारब्धे यजमान ऽआद्धरिकं ह्यजुरनुद्रुत्याश्वमेधिकं ह्यजुः प्रतिपद्यते ॥ १ ॥ 'वायुष्ट्वा पचतेरवत्त्वि'ति । वायुरेवैनम्पच'त्यसितग्रीवश्छागै'रित्यग्निर्वा ऽअसितग्रीवोऽग्निरेवैनञ्छागैः पचति ॥ २ ॥ 'न्यग्रोधश्चमसै'रिति । यत्र वै देवा यज्ञेनायजन्त त ऽएताँश्चमसान्न्यौब्जँस्ते न्यञ्चोऽरोहँस्तस्मान्न्यञ्चो न्यग्रोधा रोहन्ति ॥ ३ ॥ 'शल्म्मलिर्व्वृक्ष्ये'ति । शल्म्मलौ ह्यवृद्धिन्दधाति तस्माच्छल्म्मलिर्ब्वनस्पतीनां ब्वर्षिष्ठं ब्वर्द्धते ॥४॥ 'एष ह्य रात्थ्यो ह्यृषे'ति । अश्वेनैव रथः सम्पादयति तस्मादुश्वो नाऽन्यद्रथाद्वहति ॥ ५ ॥ 'पड्भिश्चतुर्भिरेदग'न्निति । तस्मादुश्वस्त्रिभिस्तिष्ठँस्तिष्ठत्त्यथ युक्तः सर्वैः पद्भिः सममायुते ॥ ६ ॥ 'ब्रह्माँकृष्णश्च नोऽवत्वि'ति । चन्द्रमा वै ब्रह्माकृष्णश्चन्द्रमस ऽएवैनम्परिददाति 'नमोऽग्नय' ऽइत्यग्नय ऽएव नमस्करोति ॥ ७ ॥ 'सँदृशितो रश्मिना रथ' ऽइति । रश्मिनैव रथः सम्पादयति तस्माद्रथः पर्य्युतो दर्शनीयतमो भवति ॥ ८ ॥ 'सँदृशितो रश्मिना हय' ऽइति । रश्मिनैवाश्वः सम्पादयति तस्मादुश्वो रश्मिना प्रतिहृतो भूयिष्ठः रोचते ॥ ९ ॥ 'सँदृशितो

(१) शु० य० सं० २३. १३ । (२) शु० य० सं० २३. १३ । (३) शु० य० सं० २३. १३ । (४) शु० य० सं० २३. १३ । (५) शु० य० सं० २३. १३ । (६) शु० य० सं० २३. १३ । (७) शु० य० सं० २३ १३ । (८) शु० य० सं० २३. १३ । (९) शु० य० २३. १४ । (१०) शु० य० सं० २३. १४ । (११) शु० य० सं० २३. १४ ।

ऽअप्स्वप्सुजा' ऽइति । अप्सुयोनिर्वा ऽअश्वः स्वयैवैनं रूपेण्या समर्द्धयति 'ब्रह्मा सोमपुरोगव' ऽइति सोमपुरोगवमेवैनꣳ स्वर्गꣳलोकङ्गमयति ॥१०॥ 'स्वयं वाजिꣳस्तन्वङ्कल्पय स्वे'ति । स्वयः रूपङ्कुरुष्व यादृशमिच्छसीत्येवैनन्तदाह 'स्वयं रूपजस्वे'ति स्वाराज्यमेवास्मिन्दधाति 'स्वयमुषस्वे'ति स्वयꣳलोकः रोचयस्व यावन्तमिच्छसीत्येवैनन्तदाह 'महिमा तेऽन्येन न सन्नश' ऽइत्यश्वमेव महिम्ना समर्द्धयति ॥११॥ 'न वा ऽउ ऽएतन्म्रियसे न रिष्यसी'ति । प्रश्वासयत्येवैनन्त'देवाँ२॥ ऽइदेषि पथिभिः सुगेभि'रिति देवयानानेवैनम्पथो दर्शयति 'यत्रासते सुकृतो यत्र ते ययु'रिति सुकृद्भिरेवैनः सलोकङ्करोति 'तत्र त्वा देवः सविता दधात्वि'ति सवितैवैनꣳ स्वर्गे लोके दधाति 'प्रजापतये त्वा जुष्टम्प्रोक्षामी'त्युपाꣳश्वथोपगृह्णाति ॥ १२ ॥ 'अग्निः पशुरासीत् । तेनायजन्त स ऽएतꣳलोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तञ्जेष्यसि पिबैता ऽअप' ऽइति यावानग्नेर्विजयो यावाँल्लोको यावदैश्वर्य्यन्तावाँस्ते विजयस्तावाँल्लोकस्तावदैश्वर्य्यम्भविष्यतीत्येवैनन्तदाह ॥ १३ ॥ 'वायुः पशुरासीत् । तेनायजन्त स ऽएतꣳलोकमजयद्यस्मिन्वायुः स ते लोको भविष्यति तञ्जेष्यसि पिबैता

(१) शु० य० सं० २३. १४। (२) शु० य० सं० २३. १५। (३) शु० य० सं० २३. १५। (४) शु० य० सं० २३. १५। (५) शु० य० सं० २३. १५। (६) शु० य० सं० २३. १६। (७) शु० य० सं० २३. १६। (८) शु० य० सं० २३. १६। (९) शु० य० सं० २३. १६। (१०) शु० य० सं० २२. ५। (११) शु० य० सं० २३. १७। (१२) शु० य० सं० २३. १७।

ऽअप' ऽइति यावान्न्वायोर्विजयो यावाँल्लोको यावदैश्वर्य्यन्तावाँस्ते विजयस्तावाँल्लोकस्तावदैश्वर्य्यम्भविष्यतीत्येवैनन्तदाह ॥ १४ ॥ 'सूर्य्यः[1] पशुरासीत् । तेनायजन्त स ऽएतँल्लोकमजयद्यस्मिन्त्सूर्य्यः स ते लोको भविष्यति तञ्जेष्यसि पिबैता ऽअप' ऽइति यावान्त्सूर्य्यस्य विजयो यावाँल्लोको यावदैश्वर्य्यन्तावाँस्ते विजयस्तावाँल्लोकस्तावदैश्वर्य्यम्भविष्यतीत्येवैनन्तदाह तर्प्पयित्वाऽश्वम्पुनः संस्कृत्य प्रोक्षणीरितराःपशून्प्रोक्षति तस्यातः ॥ १५ ॥

द्वितीयाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

[मृतस्याऽश्वस्य परिक्रमणादि]

देवा वा ऽउदञ्चः । स्वर्गँल्लोकन्न प्राजानँस्तमृश्वः प्राजानाद्यदृश्वेनोदञ्चो यन्ति स्वर्गस्य लोकस्य प्रज्ञात्यै वासोऽधिवासः हिरण्यमित्यृश्वायोपस्तृणन्ति यथा नाऽन्यस्मै पशवे तस्मिन्नेनमधि संज्ञपयन्त्यन्यैरेवैनन्तत्पशुभिर्व्यार्कुर्वन्ति ॥१॥ घ्नन्ति वा ऽएतत्पशुम् । यदेनः संज्ञपयन्ति 'प्राणाय[2] स्वाहापानाय स्वाहा व्यानाय स्वाहे'ति संज्ञप्यमान ऽआहुतीर्जुहोति प्राणानेवास्मिन्नेतद्दधाति तथो हास्यैतेन जीवतैव पशुनेष्टम्भवति ॥२॥ 'अम्बे[3] * ऽअम्बिकेऽम्बालिके । न मा नयति कश्चने'ति पत्नीरुदानयत्यूहूतै-

(१) शु० य० सं० २३. १७। (२) शु० य० सं० २३. १८। (३) शु० य० सं० २३. १८।

* 'आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालिकेऽम्बिके पूर्वे' (पा० सू० ६. १. १२८) इति प्रकृतिभावः ।

वैना ऽएतदुथो मेद्ध्या ऽएवैनाः करोति ॥ ६ ॥ 'गणानान्त्वा गणपतिः हवामह' ऽइति । पत्न्यः परियन्त्यपहन्नुवत ऽएवास्म्मा ऽएतदुतो न्येवास्म्मै हन्नुवतेऽथो धुवत ऽएवैनन्त्रिः परियन्ति त्रयो वा ऽइमे लोका ऽएभिरेवैनँल्लोकैर्द्धुवते त्रिः पुनः परियन्ति षट् सम्पद्यन्ते षड्वा ऽऋतव ऽऋतुभिरेवैनन्धुवते ॥ ४ ॥ अप वा ऽएतेभ्यः प्राणाः क्रामन्ति । ये यज्ञे धुवनन्तन्न्वते नव कृत्वः परियन्ति नव वै प्राणाः प्राणानेवात्मन्दधते नैभ्यः प्राणा ऽअपक्रामन्त्या'हुमजानि गर्भधमात्वमजासि गर्भध'मिति प्रजा वै पशवो गर्भः प्रजामेव पशूनात्मन्धत्ते 'ता ऽउभौ चतुरः पदः सम्प्रसारयावे'ति मिथुनस्यावरुद्ध्यै 'स्वर्गे लोके प्रोर्ण्णुवाथा'मित्येष वै स्वर्गो लोको यत्र पशुः संज्ञपयन्ति तस्म्मादेवमाह 'ऽवृषा वाजी रेतोधा रेतो दधात्वि'ति मिथुनस्यैवावरुद्ध्यै ॥ ५ ॥

द्वितीयाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

[संवादः]

अप वा ऽएतस्म्मात् । श्री राष्ट्रङ्क्रामति योऽश्वमेधेन यजते ॥ १ ॥ 'ऊर्द्धामेनामुच्छ्रापये'ति । ऽश्रीर्वै राष्ट्रमश्वमेधः श्रियमेवास्म्मै राष्ट्रमूर्द्धमुच्छ्रयति ॥ २ ॥ 'गिरौ

(१) शु० य० सं० २३. १९ । (२) शु० य० सं० २३. १९ । (३) शु० य० सं० २३. २० । (४) शु० य० सं० २३. २० । (५) शु० य० सं० २३. २० । (६) शु० य० सं० २३ २६ । (७) शु० य० सं० २३. २६ ।

भारः हुरन्निवे'ति । श्रीर्वै राष्ट्रस्य भारः श्रियमेवास्मै राष्ट्रः सन्नह्यत्यथो श्रियमेवास्मिन्नराष्ट्रमधिनिदधाति ॥ ३ ॥ 'अथास्यै मध्यमेधता'मिति । श्रीर्वै राष्ट्रस्य मध्यꣳ श्रियमेव राष्ट्रे मध्यतोऽन्नाद्यन्दधाति ॥ ४ ॥ 'शीते वाते पुनन्निवे'ति । क्षेमो वै राष्ट्रस्य शीतं क्षेममेवास्मै करोति ॥ ५ ॥ 'यकासकौ शकुन्तिके'ति । विड्वै शकुन्तिका 'हुलँगिति वञ्चती'ति विशो वै राष्ट्राय वञ्चन्त्या 'हन्ति गभे पसो निगल्गलीति धारके'ति विड्वै गभो राष्ट्रम्पसो † राष्ट्रमेव विश्श्याहन्ति तस्माद्राष्ट्री विशङ्घातुकः ॥ ६ ॥ 'माता च ते पिता च त' ऽइति । इयं वै मातासौ पिताऽभ्यामेवैनꣳ स्वर्गल्लोकन्नमयत्य 'ग्रं वृक्षस्य रोहत' ऽइति श्रीर्वै राष्ट्रस्याग्रयꣳ श्रियमेवैनꣳ राष्ट्रस्याग्रन्नमयति 'प्रतिलामीति ते पिता गभे मुष्टिमतꣳसय'दिति विड्वै गभो राष्ट्रम्मुष्टी राष्ट्रमेव विश्श्याहन्ति तस्माद्राष्ट्री विशङ्घातुकः ॥ ७ ॥ 'यद्धरिणो यवमत्ती'ति विड्वै यवो राष्ट्रꣳ हरिणो विशमेव राष्ट्राय्याङ्करोति तस्माद्राष्ट्री विशमत्ति 'न पुष्टम्पशु मन्यत' ऽइति तस्माद्राजा पशून्न पुष्यति 'शूद्रा यदुर्यजारा *

(१) शु० य० सं० २३. २६। (२) शु० य० सं० २३. २६। (३) शु० य० सं० २३. २२। (४) शु० य० सं० २३. २२। (५) शु० य० सं० २३. २२।

† 'पस इति पसतेः स्पृशतिकर्मणः' (निरु० ५. १६) इति यास्कः।

(६) शु० य० सं० २३. २४। (७) शु० य० सं० २३. २४। (८) शु० य० सं० २३. २४। (९) शु० य० सं० २३. ३०।

(१०) शु० य० सं० २३. ३०। (११) शु० य० सं० २३. ३०।

* 'अर्यः स्वामिवैश्ययोः' (पा० ३ १. १०३) इति निपातनादर्यो वैश्यो जार उपपतिर्यस्याः सा अर्यजारा।

न पोषाय धनायती'ति तस्माद्वैशीपुत्रन्नाभिषिञ्चति ॥ ८ ॥ अप वा ऽएतेभ्यः प्राणाः क्रामन्ति । ये यज्ञेऽपूतां वाचं वदन्ति 'दधिक्राव्णो ऽअकारिष'मिति सुरभिमतीमृचमन्ततोऽन्वाहुर्वाचमेव पुनते नैभ्यः प्राणा ऽअपक्रामन्ति ॥ ९ ॥

द्वितीयाध्याये नवमं ब्राह्मणम् ॥ ९ ॥

[अश्वशरीरे सूचीभिर्वितोदः]

यदसिपथान्कल्पयन्ति । सेतुमेव तद्यः सङ्क्रमणं यजमानः कुरुते स्वर्गस्य लोकस्य समष्ट्यै ॥१॥ सूचीभिः कल्पयन्ति । विशो वै सूच्यो राष्ट्रमश्वमेधो विशश्चैवास्मिन्राष्ट्रञ्च समीची दधति हिरण्मय्यो भवन्ति तस्योक्तम्ब्राह्मणम् ॥ २ ॥ त्रय्यः सूच्यो भवन्ति । लोहमय्यो रजता हरिण्यो दिशो वै लोहमय्योऽवान्तरदिशो रजता ऽऊर्द्धा हरिण्यस्ताभिरेवैनङ्कल्पयन्ति तिरश्चीभिश्चोर्द्ध्वाभिश्च बहुरूपा भवन्ति तस्माद्बहुरूपा दिशो नानारूपा भवन्ति तस्मान्नानारूपा दिशः ॥ ३ ॥

द्वितीयाध्याये दशमं ब्राह्मणम् ॥ १० ॥

---

(३) शु० य० सं० २३. ३२ ।

(४) 'ग' 'ज' पुस्तकयोः "हिरण्यमय्यो" इति पाठः ।

[परिपशव्याहुती]

प्रजापतिरकामयत । महान्भूयान्त्स्यामिति स ऽएतावश्वमेधे महिमानौ ग्रहावपश्यत्तावजुहोत्ततो वै स महान्भूयानभवत्स यः कामयेत महान्भूयान्त्स्यामिति स ऽएतावश्वमेधे महिमानौ ग्रहौ जुहुयान्महान्हैव भूयान्भवति ॥ १ ॥ वपामभितो जुहोति । यजमानो वा ऽअश्वमेधो राजा महिमा राज्येनैवैनमुभयतः परिगृह्णाति पुरस्तात्स्वाहाकृतयो वा ऽअन्ये देवा ऽउपरिष्टात्स्वाहाकृतयोऽन्ये तानेवैतत्प्रीणाति 'स्वाहा देवेभ्यो देवेभ्यः स्वाहे'ति राज्ञा वपाम्परियजति ये चैवास्मिँल्लोके देवा य ऽउ चामुष्मिँस्तानेवैतत्प्रीणाति त ऽएनमुभये देवाः प्रीताः स्वर्गँल्लोकमभिवहन्ति ॥ ३ ॥

द्वितीयाध्याये एकादशं ब्राह्मणम् ॥ ११ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

[अश्वस्यावदानम्]

प्रजापतेरक्ष्यश्वयत् । तत्परापतत्ततोऽश्वः समभवद्यदश्वयत्तदश्वस्याश्वत्वन्तद्वा ऽअश्वमेधेनैव प्रत्यदधुरेष ह वै प्रजापतिः सर्वङ्करोति योऽश्वमेधेन यजते सर्व ऽएव भवति सर्वस्य वा ऽएषा प्रायश्चित्तिः सर्वस्य भेषजः सर्वं वा ऽएतेन पाप्मानन्देवा ऽअतरन्नपि वा ऽएतेन ब्रह्महत्यामतरँस्तरति सर्वम्पाप्मानन्तरति ब्रह्महत्यां

(१) शु० य० सं० ६, ११ ।

ऋग्भ्योऽश्वमेधेन यजते ॥ १ ॥ उत्तरं वै तत्प्रजापतेरक्ष्यश्वयत् । तस्मादुत्तरतोऽश्वस्यावद्यन्ति दक्षिणतोऽऋग्भ्येषाम्पशूनाम् ॥ २ ॥ वैतसः कटो भवति । अप्सुयोनिर्वा ऽअश्वोऽप्सुजा वेतसः स्वयैवैनं ऋग्भ्या समर्द्धयति ॥ ३ ॥ चतुष्टोम स्तोमो भवति । सरङ्गा ऽअश्वस्य सक्थ्यावृहत्तद्देवाश्चतुष्टोमेनैव स्तोमेन प्रत्यदधुर्यच्चतुष्टोम स्तोमो भवत्यश्वस्यैव सर्वत्वाय सर्वस्तोमोऽतिरात्र ऽउत्तममहर्भवति सर्वं वै सर्वस्तोमोऽतिरात्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ४ ॥

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[वपाप्रचारः]

परमेण वा ऽएष स्तोमेन जित्वा । चतुष्टोमेन कृतेनायानामुत्तरेऽहन्नेकविꣳशे प्रतिष्ठायाम्प्रतितिष्ठत्येकविꣳशात्प्रतिष्ठाया ऽउत्तरमहर्ऋतूनत्यारोहत्यृतवो वै पृष्ठाऋतवः सँवत्सर ऽऋतुष्वेव सँवत्सरे प्रतितिष्ठति ॥ १ ॥ शक्वर्यः पृष्ठम्भवन्ति । अश्वदश्यच्छन्दोऽऋग्भ्येऽन्ये वा ऽअत्र पशव ऽआलब्भ्यन्त ऽउतेव ग्राम्या ऽउतेवारण्या यच्छक्वर्यः पृष्ठम्भवन्त्यश्वस्यैव सर्वत्वायान्ये पशव ऽआलब्भ्यन्तेऽन्येऽन्ये हि स्तोमाः क्रियन्ते ॥ २ ॥ तदाहुः । नैते सर्वे पशवो यदजावयश्चारण्याश्चैते वै सर्वे पशवो यद्गव्या ऽइति गव्यानुत्तमेऽहन्नालभत

(१) "गव्या ऽउत्तमे०" इति 'ग' 'ज' पुस्तकयोः पाठः ।

ऽएते वै सर्वे पशवो यद्गव्याः सर्वानेव पशूनालभते वैश्वदेवा भवन्ति वैश्वदेवो वा ऽअश्वोऽश्वस्यैव सर्वत्वाय बहुरूपा भवन्ति तस्माद्बहुरूपाः पशवो नानारूपा भवन्ति तस्मान्नानारूपाः पशवः ॥ ३ ॥

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

—०—

[यूपैकविंशतिः]

यत्तिस्रोऽनुष्टुभो भवन्ति । तस्माद्ऽश्वस्त्रिभिस्तिष्टुँस्तिष्टुति यच्चतस्रो गायत्र्यस्तस्माद्ऽश्वः सर्वैः पद्भिः प्रतिदधत्पलायते परमं वा ऽएतच्छन्दो यदनुष्टुप्परमोऽश्वः पशूनाम्परमश्चतुष्टोम स्तोमानाम्परमेणैवैनम्परमताङ्गमयति ॥ १ ॥ शाक्वरर्ष्यः पृष्ठम्भवन्ति । अन्यदन्यच्छन्दोऽन्येऽन्ये हि स्तोमाः क्रियन्ते यच्छाक्वरर्ष्यः पृष्ठम्भवन्त्यश्वस्यैव सर्वत्वाय ॥ १ ॥ एकविꣳशम्मध्यममहर्भवति । असौ वा ऽआदित्य ऽएकविꣳशः सोऽश्वमेधः स्वेनैवैनꣳ स्तोमेन स्वायान्देवतायाम्प्रतिष्ठापयति ॥ ३ ॥ वामदेव्यम्मैत्रावरुणसाम भवति । प्रजापतिर्वै वामदेव्यम्प्राजापत्योऽश्वः स्वयैवैनन्देवतया समर्द्धयति ॥४॥ पार्थुरश्म्मम्ब्रह्मसाम भवति । रश्मिभिना वा ऽअश्वो यत ऽईश्वरो वा ऽअश्वोऽयतोऽधृतोऽप्रतिष्ठितः परास्परावतङ्गन्तोर्व्यत्पार्थुरश्म्मम्ब्रह्मसाम भवत्यश्वस्यैव धृत्यै ॥ ५ ॥ सङ्कृत्यच्छावाकसाम भवति । उत्सन्नयज्ञ ऽइव वा ऽएष यदश्वमेधः किं वा ह्येतस्य क्रियते किं वा न यत्स-

ङ्कृत्यच्छावाकसाम भवत्यश्वस्यैव सर्वत्वाय सर्वस्तोमोऽतिरात्र ऽउत्तममहर्भवति सर्वं वै सर्वस्तोमोऽतिरात्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ६ ॥ एकविꣳशोऽग्निर्भवति । एकविꣳश स्तोम ऽएकविꣳशतिर्यूपा यथा वा ऽऋषभा वा व्वृषाणो वा सꣳस्फुरेरन्नेवमेते स्तोमाः समृच्छन्ते यदेकविꣳशास्तान्यत्समर्प्ययेदार्त्तिमार्च्छेद्यजमानो हन्येतास्य यज्ञः ॥ ७ ॥ द्वादश ऽएवाग्निः स्यात् । एकादश यूपा यद्वादुशोऽग्निर्भवति द्वादश मासाः सँवत्सरः सँवत्सरमेव यज्ञमाप्नोति यदेकादश यूपा विराड्वा ऽएषा सम्मीयते यदेकादशिनी तस्यै य ऽएकादश स्तन ऽएवास्यै स दुह ऽएवैनान्तेन ॥ ८ ॥ तदाहुः । यद्वादुशोऽग्निः स्यादेकादश यूपा यथा स्थूरिणा यायात्तादृक्तदित्येकविꣳश ऽएवाग्निर्भवत्येकविꣳश स्तोम ऽएकविꣳशतिर्यूपास्तद्यथा प्रष्टिभिर्यायात्तादृक्तत् ॥ ९ ॥ शिरो वा ऽएतद्यज्ञस्य यदेकविꣳशः । यो वा ऽअश्वमेधे त्रीणि शीर्षाणि वेद शिरो ह राज्ञाम्भवत्येकविꣳशोऽग्निर्भवत्येक विꣳश स्तोम ऽएकविꣳशतिर्यूपा ऽएतानि वा ऽअश्वमेधे त्रीणि शीर्षाणि तानि य ऽएवं वेद शिरो ह राज्ञाम्भवति यो वा ऽअश्वमेधे तिस्रः ककुदो वेद ककुद्ध राज्ञाम्भवत्यकविꣳशोऽग्निर्भवत्येकविꣳश स्तोम ऽएकविꣳशतिर्यूपा ऽएता वा ऽअश्वमेधे तिस्रः ककुदस्ता य ऽएवं वेद ककुद्ध राज्ञाम्भवति ॥ १० ॥

तृतीयाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[अश्वस्य लोहितश्रपणादि]

सर्वाभ्यो वै देवताभ्योऽश्वऽआलभ्यते । यत्प्राजापत्यङ्कुर्य्याद्या देवता ऽअपिभागास्ता भागधेयेन व्यर्द्धये'च्छौदन्दद्भिरवकान्दन्तमूलै'रित्याज्यमवदाना कृत्वा प्रत्याख्यायन्देवताभ्य ऽआहुतीर्जुहोति या ऽएव देवता ऽअपिभागास्ता भागधेयेन समर्द्धयत्यरण्येऽनूच्च्यान्हुत्वा द्यावापृथिव्यामुत्तमामाहुतिञ्जुहोति द्यावापृथिव्योर्वै सर्वा देवताः प्रतिष्ठितास्ता ऽएवैतत्प्रीणाति देवासुराः संयत्ता ऽआसन् ॥ १ ॥ तेऽब्रुवन् । अग्नयः स्विष्टकृतोऽश्वस्य वयमुद्धारमुद्धरामहै तेनासुरानभिभविष्याम ऽइति ते लोहितमुदहरन्त ब्भ्रातृव्याभिभूत्यै यस्स्विष्टकृद्भ्यो लोहितञ्जुहोति ब्भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य ऽएवं वेद ॥ २ ॥ गोमृगकण्ठेन प्रथमामाहुतिञ्जुहोति । पशवो वै गोमृगा रुद्रः स्विष्टकृत्पशूनेव रुद्रादन्तर्द्धाति तस्माद्यत्रैषाऽश्वमेध ऽआहुतिर्हूयते न तत्र रुद्रः पशूनभिमन्यते ॥ ३ ॥ अश्वशफेन द्वितीयामाहुतिञ्जुहोति । पशवो वा ऽएकशफा रुद्रः स्विष्टकृत्पशूनेव रुद्रादन्तर्द्धाति तस्माद्यत्रैषाऽश्वमेध ऽआहुतिर्हूयते न तत्र रुद्रः पशूनभिमन्यते ॥ ४ ॥ अयस्मयेन चरुणा तृतीयामाहुतिञ्जुहोति । आयास्या[२] वै प्रजा रुद्रः स्विष्टकृत्प्रजा ऽएव रुद्रादन्तर्द्धाति तस्माद्य-

(१) शु० य० स० २५. १ ।

(२) "आयस्यो" इति 'ग' 'ज' पुस्तकयोः पाठः ।

त्रैषाऽश्वमेध ऽआहुतिर्हूयते न तत्र रुद्रः प्रजा ऽअभिमन्यते ॥ ५ ॥

तृतीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

—०—

[अश्वमेधेनापमृत्युनिरासः]

सर्वेषु वै लोकेषु । मृत्यवोऽन्वायत्तास्तेभ्यो यदाहुतीर्न जुहुयाल्लोके लोक ऽएनम्मृत्युर्विन्देद्यन्मृत्युभ्य ऽआहुतीर्जुहोति लोके लोक ऽएव मृत्युमपजयति ॥ १ ॥ तदाहुः । यदमुष्मै स्वाहामुष्मै स्वाहेति जुह्वत्सञ्चक्षीत बहुम्मृत्युमभिव्रङ्क्षीत मृत्यव ऽआत्मानमपिदध्यादिति 'मृत्यवे स्वाहे'त्येकस्म्मा ऽएवैकामाहुतिञ्जुहोत्येको ह वा ऽअमुष्मिँल्लोके मृत्युरशनायैव तमेवामुष्मिँल्लोकेऽपजयति ॥२॥ [अर्धः प्रपाठकः कण्डिकाः ५६] '[2]ब्रह्महत्यायै स्वाहे'ति द्वितीयामाहुतिञ्जहोति । अमृत्युर्ह वा ऽअन्न्यो ब्ब्रह्महत्यायै मृत्युरेष ह वै साक्षान्मृत्युर्य्यद्ब्रह्महत्या साक्षादेव मृत्युमपजयति ॥ ३ ॥ एताꣳ ह वै मुण्डिभ ऽऔदन्यः । ब्रह्महत्यायै प्रायश्चित्तिं विदाञ्चकार यद्ब्रह्महत्याया ऽआहुतिञ्जुहोति मृत्युमेवाहुत्या तर्पयित्वा परिपाणङ्कृत्वा ब्ब्रह्मग्घ्ने भेषजङ्करोति तस्माद्यस्यैषाश्वमेध ऽआहुतिर्हूयतेऽपि योऽस्यापरीषु प्रजायाम्ब्राह्मणः हन्ति तस्मै भेषजङ्करोति ॥ ४ ॥

तृतीयाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

—०—

(१) शु० य० सं० ३९.१३। (२) शु० य० सं० ३९.१३।

[अश्वस्तोमीयहोमः]

अश्वस्य वा ऽआलब्धस्य । मेध ऽउदक्क्रामत्तदश्वस्तोमीयमभवद्यदश्वस्तोमीयञ्जुहोत्यश्वमेव मेधसा समर्द्धयति ॥ १ ॥ आज्येन जुहोति । मेधो वा ऽआज्यम्मेधोऽश्वस्तोमीयम्मेधसैवास्मिँमस्तन्मेधो दधात्याज्येन जुहोत्येतद्वै देवानाम्प्रियन्धाम यदाज्यम्प्रियेणैवैनान्धाम्ना समर्द्धयति ॥ २ ॥ अश्वस्तोमीयः हुत्वा द्विपदा जुहोति । अश्वो वा ऽअश्वस्तोमीयम्पुरुषो द्विपदा द्विपाद्वै पुरुषो द्विप्रतिष्ठस्तदेनम्प्रतिष्ठया समर्द्धयति ॥ ३ ॥ तदाहुः । अश्वस्तोमीयम्पूर्वः होतव्यांऽ३ द्विपदाऽ३ ऽइति पशवो वा ऽअश्वस्तोमीयम्पुरुषो द्विपदा यदश्वस्तोमीयः हुत्वा द्विपदा जुहोति तस्मात्पुरुष ऽउपरिष्टात्पशूनधितिष्ठति ॥ ४ ॥ षोडशाश्वस्तोमीया जुहोति । षोडशकला वै पशवः सा पशूनाम्मात्रा पशूनेव मात्रया समर्द्धयति यत्कनीयसीर्वा भूयसीर्वा जुहुयात्पशून्मात्रया व्यर्द्धयेत्षोडश जुहोति षोडशकला वै पशवः सा पशूनाम्मात्रा पशूनेव मात्रया समर्द्धयति नाऽन्यामुत्तमामाहुतिञ्जुहोति यदन्न्यामुत्तमामाहुतिञ्जुहुयात्प्रतिष्ठायै च्च्यवेत द्विपदा ऽउत्तमा जुहोति प्रतिष्ठा वै द्विपदाः प्रत्येव तिष्ठति 'जुम्बकाय स्वाहे'त्यवभृथ ऽउत्तमामाहुतिञ्जुहोति वरुणो वै जुम्बकः साक्षादेव वरुणमवयजते शुक्लस्य खलतेर्विकिल्धस्य पिङ्गाक्षस्य मूर्द्धनि जुहोत्येतद्वै वरुणस्य रूपः

(१) शु० य० सं० २५. ९ ।

रूपेणैव वरुणमवयजते ॥ ५ ॥ द्वादश ब्रह्मौदनानुत्थाय निर्वपति । द्वादशभिर्वेष्टिभिर्यजते तदाहुर्यज्ञस्य वा ऽएतद्रूपं यद्विष्टयो यद्विष्टिभिर्यजेतोपनामुक ऽएनं यज्ञः स्यात्पापीयाँस्तु स्याद्यातयामानि वा ऽएतदीजानस्य च्छन्दाꣳसि भवन्ति तानि किमेतावदाशु प्रयुञ्जीत सर्वा वै सꣳस्थिते यज्ञे वागाप्यते सात्राप्ता यातयाम्नी भवति वक्रूरीकृतेव हि भवत्युरुष्कृता वाग्वै यज्ञस्तस्मान्न प्रयुञ्जीतेति ॥ ६ ॥ द्वादशैव ब्रह्मौदनानुत्थाय निर्वपेत् । प्रजापतिर्वा ऽओदनः प्रजापतिः सँवत्सरः प्रजापतिर्यज्ञः सँवत्सरमेव यज्ञमाप्नोत्युपनामुक ऽएनं यज्ञो भवति न पापीयान्भवति ॥ ७ ॥

तृतीयाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

—०—

[अश्वमेधमहिमा]

एष वै प्रभूर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रभूतम्भवति ॥ १ ॥ एष वै विभूर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव विभूतम्भवति ॥ २ ॥ एष वै व्यष्टिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यष्टम्भवति ॥ ३ ॥ एष वै विधृतिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव विधृतम्भवति ॥ ४ ॥ एष वै व्यावृत्तिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यावृत्तम्भवति ॥ ५ ॥ एष वा ऽऊर्ज्जस्वान्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेवोर्ज्जस्वद्भवति ॥ ६ ॥ एष वै

पयस्वान्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव पयस्वद्भवति ॥ ७ ॥ एष वै ब्रह्मवर्चसी नाम यज्ञः । यत्रैतेन यज्ञेन यजन्त ऽआ ब्राह्मणो ब्रह्मवर्चसी जायते ॥ ८ ॥ एष वा ऽअतिव्याधी नाम यज्ञः । यत्रैतेन यज्ञेन यजन्त ऽआ राजन्योऽतिव्याधी जायते ॥ ९ ॥ एष वै दीर्घो नाम यज्ञः । यत्रैतेन यज्ञेन यजन्त ऽआ दीर्घारण्ययज्ञायते ॥ १० ॥ एष वै क्लृप्तिर्नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव क्लृप्तमभवति ॥ ११ ॥ एष वै प्रतिष्ठा नाम यज्ञः । यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितमभवति ॥ १२ ॥

तृतीयाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

—०—

[अश्वमेधप्रायश्चित्तम्]

अथातः प्रायश्चित्तीनाम् । यद्यश्वो वडवाꣳ स्कन्देद्वायव्यमपयोऽनुनिर्वपेद्वायुर्वै रेतसां विकर्त्ता प्राणो वै वायुः प्राणो हि रेतसां विकर्त्ता रेतसैवास्मिँमस्तद्रेतो दधाति ॥ १ ॥ अथ यदि स्त्रामो विन्देत् । पौष्णञ्चरुमनुनिर्वपेत्पूषा वै पशूनामीष्टे स यस्यैव पशवो यः पशूनामीष्टे तमेवैतत्प्रीणात्यगदो हैव भवति ॥ २ ॥ अथ यद्यक्षतामयो विन्देत् । वैश्वानरन्द्वादशकपालम्भूमिकपालम्पुरोडाशमनुनिर्वपेदियं वै वैश्वानर ऽइमामेवैतत्प्रीणात्यगदो हैव भवति ॥ ३ ॥ अथ यद्यक्ष्यामयो विन्देत् । सौर्यञ्चरुमनुनिर्वपेत्सूर्यो वै प्रजानाञ्चक्षुर्यदा ह्येवैष ऽउ-

देत्यथेदः सर्वश्चरति चक्षुषैवास्मिँस्तच्चक्षुर्दधाति स यच्चरुर्भवति चक्षुषा ह्ययमात्मा चरति ॥ ४ ॥ अथ यद्युदके म्रियेत । वारुणं ऋषभमयश्चरुमनुनिर्वपेद्वरुणो वा एनङ्गृह्णाति योऽप्सु म्रियते सा यैवैनन्देवता गृह्णाति तामेवैतत्प्रीणाति सास्मै प्रीताऽयमालम्भायानुमन्यते तयानुमतमालभते स यद्यवमयो भवति वरुण्या हि यवाः ॥ ५ ॥ अथ यदि नश्येत् । त्रिहविषमिष्टिमनुनिर्वपेद्द्यावापृथिव्ऽयमेककपालम्पुरोडाशं वायव्ऽयम्पयः सौर्य्यश्चरुं ऋषद्वै किञ्च नश्यत्यन्तरैव तद्द्यावापृथिवी नश्यति तद्वायुरुपवात्यादित्योऽभितपति नैताभ्यो देवताभ्य ऽऋते किञ्चन नश्यति सैषा पृथगेव नष्टवेदनी स यद्यस्याप्यन्यन्नश्येदेतयैव यजेतानु हैवैनद्विन्दत्यथ यद्यमित्रा ऽअश्वं विन्देरन्यदि वा म्रियेत यदि वाप्स्वन्यमानीय प्रोक्षेयुः सैव तत्र प्रायश्चित्तिः ॥ ६ ॥

तृतीयाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

—०—

[अश्वमेधारम्भकालादि]

प्रजापतिरकामयत । सर्वान्कामानाप्नुयाꣳ सर्वा व्ऽयष्टीर्व्ऽयश्नुवीयेति स ऽएतमश्वमेधन्त्रिरात्रं ऋषभकतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वा सर्वान्कामानाप्नोत्सर्वा व्ऽयष्टीर्व्ऽयाश्नुत सर्वाꣳह वै कामानाप्नोति सर्वा व्ऽयष्टीर्व्ऽयश्नुते योऽश्वमेधेन यजते ॥ १ ॥ तदाहुः ।

कस्मिन्नृतावभ्यारम्भ ऽइति ग्रीष्मेऽभ्यारभेतेत्यु हैक ऽआहुर्ग्रीष्मो वै क्षत्रियस्यऽर्त्तुः क्षत्रिययज्ञ ऽउ वा ऽएष यदश्वमेध ऽइति ॥ २ ॥ तद्वै वसन्त ऽएवाभ्यारभेत । वसन्तो वै ब्राह्मणस्यऽर्त्तुर्य्य ऽउ वै कञ्च यजते ब्राह्मणी-भूयैवैव यजते तस्माद्वसन्त ऽएवाभ्यारभेत ॥ ३ ॥ सा यासौ फाल्गुनी पौर्णमासी भवति । तस्यै पुरस्तात्षडहे वा सप्ताहे वऽर्त्विज ऽउपसमायन्त्यद्वर्य्युश्च होता च ब्रह्मा चोद्गाता चैतान्वा ऽअन्वन्य ऽऋत्विजः ॥ ४ ॥ तेभ्योऽद्वर्य्युश्चातुष्प्राश्यम्ब्रह्मौदनन्निर्वपति । तस्योक्तम्ब्राह्मणञ्चतुरः पात्राँश्चतुरोऽञ्जलीँश्चतुरः प्रसृतान्द्वादशविध-न्द्वादश मासाः सँवत्सरः सर्वः सँवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ५ ॥ तमेते चत्वार ऽऋत्विजः प्राश्नन्ति । तेषामुक्तम्ब्राह्मणन्तेभ्यश्चत्वारि सहस्राणि ददाति सर्वं वै सहस्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै चत्वारि च सुवर्णानि शतमानानि हिरण्यानि तस्यो ऽएवोक्तम् ॥ ६ ॥ अथास्मा ऽअद्वर्य्युर्निष्कम्प्रतिमुञ्चन्वाचयति * । 'तेजोऽसि शुक्रममृत'मिति तेजो वै शुक्रममृतः हिरण्यन्तेज ऽएवास्मिन्थ्छुक्रममृतन्दधा'त्यायुष्प्या ऽआयुर्म्मे पाही'त्यायुरेवास्मिन्दधात्यथैनमाह वाचं यच्छेति वाग्वै यज्ञो यज्ञस्यै-

* 'निष्कं प्रतिमुञ्चन्वाचयति तेजोऽसीति' (का० श्रौ० सू० २०. १. ९) । चतुःसुवर्ण-निर्मित आभरणविशेषो निष्कः ।

(१) शु० य० सं० २२. १ । (२) शु० य० सं० २२. १ ।

वाभ्यारम्भाय ॥७॥ चतस्रो जाया ऽउपकॢप्ता भवन्ति। महिषी[1] वावाता परिवृक्ता पालागली सर्वा निष्क्रीण्यो[2]ऽलङ्कृता मिथुनस्यैव सर्वत्वाय ताभिः सहाग्न्यगारम्प्रपद्यते पूर्वया[3] द्वारा यजमानो दक्षिणया पत्न्यः ॥ ८ ॥ सायमाहुत्याꣳ हुतायाम्। जघनेन गार्हपत्यमुदङ्वावातया सह संविशति तदेवापीतराः संविशन्ति सोऽन्तरोरू ऽअसंवर्त्तमानः शेतेऽनेन तपसा स्वस्ति सँवत्सरस्योदृचः समश्नवा ऽइति ॥ ९ ॥ प्रातराहुत्याꣳ हुतायाम्। अद्ध्वर्युः पूर्णाहुतिञ्जुहोति सर्वं वै पूर्णः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै तस्यां वरेण वाचं विसृजते * वरन्ददामि ब्रह्मण ऽइति सर्वं वै वरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ १० ॥ † अथ योऽस्य निष्कः प्रतिमुक्तो भवति। तमद्ध्वर्यवे ‡ ददात्यद्ध्वर्यवे ददमृतमायुरात्मन्धत्तेऽमृतꣳ ह्यायुर्हिरण्यम् ॥ ११ ॥ अथाग्नेयीमिष्टिन्निर्वपति। पथश्च कामाय यज्ञमुखस्य चाच्छम्बट्कारायाथो ऽअग्निमुखा ऽउ वै सर्वा देवताः सर्वे कामा ऽअश्वमेधे मुखतः सर्वान्देवान्प्रीत्वा सर्वाञ्कामानाप्नवानीति ॥ १२ ॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति। पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः

(१) महिषी = प्रथमपरिणीता स्त्री। वावाता = वल्लभा। परिवृक्ता=अवल्लभा। पालागली=दूतपुत्री

(२) 'निष्क्रिन्न्यो०' इति 'ग' 'ज' पुस्तकयोः पाठः।

* तथा चोक्तं सूत्रकृता—'आ वरदानाद्वाग्यमनम्' (का० श्रौ० सू० २०।१।११)।

† शतम् ६६०० ।

‡ 'अध्वर्यवे च प्रतिमुक्तं निष्कम्' (का० श्रौ० सू० २०।१।२०)।

पुरस्तात्पाप्मानमपहते बार्त्रघ्नावाज्यभागौ पाप्मा वै व्वृत्रः पाप्मनोऽपहत्या 'ऽअग्निर्मूर्द्धा दिवः ककुद्भुवो यज्ञस्य रजसश्च नेते'त्युपाꣳशु हविषो याज्यानुवाक्यये मूर्द्धन्व-त्यन्या भवति सद्वत्यन्यैष वै मूर्द्धा य ऽएष तपत्येतस्यैवा-वरुद्ध्या ऽअथ यत्सद्वती सदेवावरुन्द्धे विराजौ सँस्याज्ये सर्वदेवत्यं वा ऽएतच्छन्दो यद्विराट् सर्वे कामा ऽअश्वमेधे सर्वान्देवान्प्रीत्वा सर्वान्कामानाप्नवानीति हिरण्मयन्दक्षिणा सुवर्णः शतमानन्तस्योक्तम्ब्राह्मणम् ॥ १३ ॥ अथ पोष्णी-न्निर्वपति । पूषा वै पथीनामधिपतिरश्वायैवैतत्स्वस्त्ययनङ्क-रोत्यथो ऽइयं वै पूषेमामेवास्मा ऽएतद्गोप्त्रीङ्करोति तस्य हि नार्त्तिरस्ति न ह्वला यमियमद्धृग्गोपायतीमामे-वास्मा ऽएतद्गोप्त्रीङ्करोति ॥ १४ ॥ तस्यै सप्तदश सामिधेन्यो भवन्ति । सप्तदशो वै प्रजापतिः प्रजा-पतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै व्वृधन्वन्तावाज्यभागौ यजमानस्यैव व्वृद्ध्यै 'पूषँस्तवे व्रते वयम्पथस्पथः परिपतिं वचस्ये'त्युपाꣳशु हविषो याज्यानुवाक्यये व्रतवत्यन्या भवति पथन्वत्यन्या वीर्य्यं वै व्रतं वीर्य्यस्याप्त्यै वीर्य्य-स्यावरुद्ध्या ऽअथ यत्पथन्वत्यश्वायैवैतत्स्वस्त्ययनङ्करोत्य-नुष्टुभौ सँस्याज्ये वाग्वा ऽअनुष्टुब्वाग्वै प्रजापतिः प्रजापतिरश्वमेधोऽश्वमेधस्यैवाप्त्यै वासः शतन्दक्षिणा रूपं वा ऽएतत्पुरुषस्य यद्वासस्तस्मादयमेव कश्च सुवास-समाहुः को न्वयमिति रूपसमृद्धो हि भवति रूपेणैवैनः

(१) शु० य० सं० १३. १४-१५। (२) शु० य० सं० ३४. ४१-४२।

समर्द्धयति शतम्भवति शतायुर्वै पुरुषः शतेन्द्रिय ऽआयु-
रेवेन्द्रियं वीर्य्यमात्मन्धत्ते ॥ १५ ॥

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

[ब्राह्मणद्वयेन सावित्र्य इष्टयः, पारिप्लवाशंसनादि च निरूप्यन्ते]

एतस्यान्तायमानायाम् । अश्श्वन्निवक्त्वोदानयन्ति यु-
स्मिन्त्सर्वाणि रूपाणि भवन्ति यो वा जवसमृद्धः सह-
स्राहम्पूठ्व्य ऋषो दक्षिणायान्धुर्य्यप्रतिधुरः ॥ १ ॥ तद्य-
त्सर्वरूपो भवति । सर्वं वै रूपः सर्वमश्श्वमेधः सर्वस्याप्त्यै
सर्वस्यावरुद्ध्या ऽअथ यज्जवसमृद्धो वीर्य्यं वै जवो वीर्य्य-
स्याप्त्यै वीर्य्यस्यावरुद्ध्या ऽअथ यत्सहस्राहः सर्वं वै
सहस्रः सर्वमश्श्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्या ऽअथ
यत्पूठ्व्य ऽएष वा ऽअपरिमितं वीर्य्यमभिवर्द्धते यत्पूठ्व्योऽ-
परिमितस्यैव वीर्य्यस्यावरुद्ध्या ऽअथ यद्दक्षिणायान्धुर्य्य-
प्रतिधुर ऽएष वा ऽएष य ऽएष तपति न वा ऽएतङ्कश्चन
प्रतिप्रतिरेतस्यैवावरुद्ध्यै ॥ २ ॥ तदु होवाच भाल्लवेयः ।
द्विरूप ऽएवैषोऽश्श्वः स्यात्कृष्णसारङ्गः प्रजापतेर्वा ऽएषोऽ-
क्ष्णः समभवद्द्विरूपं वा ऽइदञ्चक्षुः शुक्लञ्चैव कृष्णञ्च
तदेनꣳ स्वेन रूपेण समर्द्धयतीति ॥ ३ ॥ अथ होवाच
सात्ययज्ञिः । त्रिरूप ऽएवैषोऽश्श्वः स्यात्तस्य कृष्णः
पूर्वार्द्धः शुक्लोऽपरार्द्धः कृत्तिकाग्निः पुरस्तात्तद्यत्कृष्णः
पूर्वार्द्धो भवति यदेवेदुङ्कृष्णमक्ष्णस्तदस्य तदथ यच्छु-
क्लोऽपरार्द्धो यदेवेदुः शुक्लमक्ष्णस्तदस्य तदथ यत्कृत्ति-

काञ्जिः पुरस्तात्सा कनीनका स ऽएव रूपसमृद्धोऽतो यतमोऽस्योपकल्पेत बहुरूपो वा द्विरूपो वा त्रिरूपो वा कृत्तिकाञ्जिस्तमालभेत जवेन त्वेव समृद्धः स्यात् ॥ ४ ॥ तस्यैते पुरस्ताद्रक्षितार ऽउपक्लृप्ता भवन्ति । राजपुत्राः कवचिनः शतदः राजन्न्या निषङ्गिणः शतदः सूतग्रामण्याम्पुत्रा ऽइषुपर्षिणः शतं क्षात्रसङ्ग्रहीतृणाम्पुत्रा दण्डिनः शतमश्वशतन्निरष्टन्निरमणं यस्मिन्नेनमपिसृज्य रक्षन्ति ॥ ५ ॥ अथ सावित्रीमिष्टिन्निर्वपति । सवित्रे प्रसवित्रे द्वादशकपालम्पुरोडाशः सविता वै प्रसविता सविता म ऽइमं यज्ञम्प्रसुवादिति ॥ ६ ॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । वार्त्रघ्नावाज्यभागौ 'यु ऽइमा विश्वा जातान्या देवो यातु सविता सुरत्न' ऽइत्युपाꣳशु हविषो याज्यानुवाक्ये विराजौ सँस्याज्ये हिरण्मयन्दक्षिणा सुवर्णः शतमानन्तस्योक्तम्ब्राह्मणम् ॥ ७ ॥ तस्यै प्रयाजेषु तायमानेषु । ब्ब्राह्मणो वीणागाथी दीक्षणत ऽउत्तरमन्द्रामुदाग्घनँस्तिस्रः स्वयः सम्भृता गाथा गायतीत्ययजतेत्यददादिति तस्योक्तम्ब्राह्मणम् ॥८॥ अथ द्वितीयान्निर्वपति । सवित्र ऽआसवित्रे द्वादशकपालम्पुरोडाशः सविता वा ऽआसविता सविता म ऽइमं यज्ञमासुवादिति [* काण्डस्यार्धम् २१६] ॥९॥ तस्यै सप्तदश सामिधेन्यो भवन्ति । सद्वन्तावाज्यभागौ सदेवावरुन्द्धे 'विश्वानि देव सवितः' 'स घा नो

(१) ऋ० सं० ४. ४. २६ ।

* इयं काण्डार्धसंख्याऽत्र 'क' पुस्तक एवास्ति ।

(२) ऋ० सं० ४. ४. २६ । (३) ऋ० सं० ५. ४. १२ ।

देवः सविता सहावे'त्युपाꣳशु हविषो याज्यानुवाक्ये ऽअनुष्टुभौ सँऽयाज्ये रजतः हिरण्मयन्दक्षिणा नानारूपा ऽअथो ऽउत्क्रमायानपक्रमाय शतमानम्भवति शतायुर्वै पुरुषः शतेन्द्रिय ऽआयुरेवेन्द्रियं वीर्य्यमात्मन्धत्ते ॥१०॥ तस्यै प्रयाजेषु तायमानेषु । ब्राह्मणो वीणागाथी दक्षिणत ऽउत्तरमन्द्रामुदाग्घँस्तिस्रः स्वयः सम्भृता गाथा गायतीत्ययजतेत्यददादिति तस्योक्तम्ब्राह्मणम् ॥ ११ ॥ अथ तृतीयान्निर्व्वपति । सवित्रे सत्यप्रसवाय द्वादशकपालम्पुरोडाशमेष ह वै सत्यः प्रसवो यः सवितुः सत्येन मे प्रसवेनेमं यज्ञम्प्रसुवादिति ॥ १२ ॥ तस्यै सप्तदशैव सामिधेन्न्यो भवन्ति । रयिमन्ताव्राज्यभागौ वीर्य्यं वै रयिर्वीर्य्यस्याप्त्यै वीर्य्यस्यावरुद्ध्या 'ऽआ विश्वदेवः सत्पति''[1]न्न प्रमिये सवितुर्दैव्यस्य तदि'त्युपाꣳशु हविषो याज्यानुवाक्ये नित्ये सँऽयाज्ये नेद्यज्ञपथाद्यानीति कल्पꣳ ऽएव यज्ञेऽन्ततः प्रतितिष्ठति त्रिष्टुभौ भवत ऽइन्द्रियं वै[2] वीर्य्यन्त्रिष्टुविन्द्रियस्यैव वीर्य्यस्यावरुद्ध्यै हिरण्मयन्दक्षिणा सुवर्णः शतमानन्तस्योक्तम्ब्राह्मणम् ॥ १३ ॥ तस्यै प्रयाजेषु तायमानेषु । ब्राह्मणो वीणागाथी दक्षिणत ऽउत्तरमन्द्रामुदाग्घँस्तिस्रः स्वयः सम्भृता गाथा गायतीत्ययजतेत्यददादिति तस्योक्तम्ब्राह्मणम् ॥ १४ ॥ एतस्याꣳ सꣳस्थितायाम् । उपोत्थायाद्ध्वर्युश्च यजमानश्चाश्वस्य

(१) ऋ० सं० ४. ८. २६ । (२) ऋ० सं० ३. ८. ५ । (३) 'ग' 'ज' पुस्तकयो 'इन्द्रे वै' इति पाठः ।

दुक्षिणे कर्ण्ण ऽआजपतो 'विभूर्म्मात्रा प्रभूः पित्रेति तस्योक्तम्ब्राह्मणमथैनमुदश्वम्प्राश्वम्प्रसृजत ऽएषा होभयेषान्देवमनुष्ष्याणान्दिग्म्यदुदीची प्राची स्वायामेवैनन्तद्दिशि धत्तो न वै स्व ऽआयतने प्रतिष्ठितो रिष्ष्यत्यरिष्ट्यै ॥ १५ ॥ स ऽआह 'देवा ऽआशापालाः । एतन्देवेब्भ्योऽश्वम्मेधाय प्रोक्षितः रक्षते'त्युक्ता मानुषा ऽआशापाला ऽअथैते दैवा ऽआप्त्याः साद्ध्या ऽअन्वाद्ध्या मरुतस्तमेत ऽउभये देवमनुष्ष्याः संविदाना ऽअप्प्रत्यावर्त्तयन्तः सँवत्सरः रक्षन्ति तद्यन्न प्रत्यावर्त्तयन्त्येष वा ऽएष य ऽएष तपति क ऽउ ह्येतमर्हति प्रत्यावर्त्तयितुं स्यद्धयेनम्प्रत्यावर्त्तेयुः परागेवेदः सर्व्वꣳ स्यात्तस्म्मादुप्प्रत्यावर्त्तयन्तो रक्षन्ति ॥ १६ ॥ स ऽआहाशापालाः । ये वा ऽएतस्योदृचङ्गमिष्ष्यन्ति राष्ट्रन्ते भविष्ष्यन्ति राजानो भविष्ष्यन्त्यभिषेचनीया ऽअथ य ऽएतस्योदृचन्न गमिष्ष्यन्त्यराष्ट्रन्ते भविष्ष्यन्त्यराजानो भविष्ष्यन्ति राजन्न्या विशोऽनभिषेचनीयास्तस्म्मान्न्मा प्रमदत स्नात्वाचैवैनमुदकान्निरुन्धीद्धं बुडवाब्भ्यश्च ते यद्यद्ब्राह्मणजातमुपनिगच्छेत तत्तत्पृच्छेत ब्ब्राह्मणाः कियद्भूयमश्वेमधस्य वित्थेति ते ये न विद्युर्ज्जिनीयात तान्त्सर्व्वं वा ऽअश्वमेधः सर्व्वस्यैष न वेद यो ब्ब्राह्मणः सन्नश्वमेधस्य न वेद सोऽब्ब्राह्मणो ज्येय ऽएव स पानङ्करवाथ खादन्निवपाथाथ यत्किञ्च जनपदे कृतान्नः सर्व्वं

(१) शु० य० सं० २२. १९। (२) शु० य० सं० २२. १९।

वस्तत्सुतन्तेषाꣳ रथकारकुल * ऽएव वो वसतिस्तद्ध्यश्व-स्यायतनमिति ॥ १७ ॥

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥ २ ॥
कण्डिकासंख्या ॥ ११७ ॥

प्रमुच्च्याऽश्वन्दुक्षिणेन वेदिम् । हिरण्मयङ्कशिपुप-स्तृणाति तस्मिन्न्होतोपविशति दुक्षिणेन होतारꣳ हिर-ण्मये कूर्चे † यजमानो दक्षिणतो ब्रह्मा चोद्गाता च हिरण्मयोः कशिपुनोः ‡ पुरस्तात्प्रत्यङ्ङध्वर्युर्हिरण्मये वा कूर्चे हिरण्मये वा फलके ॥ १ ॥ समुपविष्टेष्व-ध्वर्युः सम्प्रेष्यति । होतर्भूतान्न्याचक्ष्व भूतेष्विमं यज-मानमध्यूहेति सम्प्रेषितो होताध्वर्युमामन्त्रयते पारिप्ल-वमाख्यानमाख्यास्यन्नध्वर्यविति हवै होतरित्यध्वर्युः ॥ २ ॥ मनुर्वैवस्वतो राजेत्याह । तस्य मनुष्या विशस्त ऽइम ऽआसत ऽइत्यऽश्रोत्रिया गृहमेधिन ऽउपसमेता भवन्ति तानुपदिशत्यृचो वेदः सोऽयमित्यृचाꣳ सूक्तं व्याचक्षाण ऽइवानुद्रवेद्वीणागणगिन ऽउपसमेता भवन्ति तानध्वर्युः सम्प्रेष्यति वीणागणगिन ऽइत्याह पुराणैरिमं यजमानꣳ राजभिः साधुकृद्भिः सङ्गायतेति तन्ते तथा सङ्गायन्ति तद्यदेनमेवꣳ सङ्गायन्ति पुराणैरेवैनन्तद्राजभिः साधुकृद्भिः

* 'रथकारगृहवासाश्च' (का० श्रौ० सू० २०।२।१६)
† सपादमासनं कूर्चः ।
‡ कशिपुशब्देन मृद्वासनं मसूरक उच्यते ।

सलोकङ्कुर्वन्ति ॥ ३ ॥ सम्प्रेष्याद्ध्वर्युः प्रक्रमामाहोति । अन्वाहार्यपचने वाऽश्वस्य वा पदम्परिलिख्य यतरथास्य तत्रावृद्भवति पूर्वा स्वेव स्थितिः ॥ ४ ॥ सावित्र्या ऽएवेष्टेः । पुरस्तादनुद्रुत्य सकृदेव रूपाण्याहवनीये जुहोत्यथ सायन्धृतिषु हूयमानासु राजन्न्यो वीणागाथी दक्षिणत ऽउत्तरमन्द्रामुदाग्घँस्तिस्रः स्वयः सम्भृता गाथा गायतीत्ययुद्धयतेत्यमुः सङ्ग्रामम्मजयदिति तस्योक्तम्ब्राह्मणम् ॥ ५ ॥ अथ श्वोभूते द्वितीयेऽहन् । एवमेवैतासु सावित्रीष्विष्टिषु सथ्ंस्थितास्वेषैवावृदुद्ध्वर्यविति हवै होतरित्येवाद्ध्वर्युर्ध्वर्यमो वैवस्वतो राजेत्याह तस्य पितरो विशस्त ऽइम ऽआसत ऽइति स्थविरा ऽउपसमेता भवन्ति तानुपदिशति यजूथ्ंषि वेदः सोऽयमिति यजुषामनुवाकं व्याचक्षाण ऽइवानुद्रवेदेवमेवाद्ध्वर्युः सम्प्रेष्यति न प्रक्रमामाहोति ॥ ६ ॥ अथ तृतीयेऽहन् । एवमेवैतास्विष्टिषु सथ्ंस्थितास्वेषैवावृदुद्ध्वर्यविति हवै होतरित्येवाद्ध्वर्युर्वरुण ऽआदित्यो राजेत्याह तस्य गन्धर्वा विशस्त ऽइम ऽआसत ऽइति युवानः शोभना ऽउपसमेता भवन्ति तानुपदिशत्यथर्वाणो वेदः सोऽयमित्यथर्वणामेकम्पर्व व्याचक्षाण ऽइवानुद्रवेदेवमेवाद्ध्वर्युः सम्प्रेष्यति न प्रक्रमामाहोति ॥ ७ ॥ अथ चतुर्थेऽहन् । एवमेवैतास्विष्टिषु सथ्ंस्थितास्वेषैवावृदुद्ध्वर्यविति हवै होतरित्येवाद्ध्वर्युः सोमो वैष्णवो राजेत्याह तस्याप्सरसो विशस्ता ऽइमा ऽआसत ऽइति युवतयः शोभना ऽउपसमेता भवन्ति ता ऽउपदिशत्यङ्गिरसो वेदः सोऽयमि-

त्यङ्गिरसामेकम्पर्व व्याचक्षाण ऽइवानुद्रवेदेवमेवाद्ध्वर्य्युः सम्प्रेष्यति न प्रक्रक्रमाञ्जुहोति ॥ ८ ॥ अथ पञ्चमेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदुद्ध्वर्य्विति हवै होतरित्येवाद्ध्वर्य्युरर्ब्बुदः काद्रवेयो राजेत्याह तस्य सर्पा विशस्त ऽइम ऽआसत ऽइति सर्पाश्च सर्पविदश्चोपसमेता भवन्ति तानुपदिशति सर्पविद्या वेदः सोऽयमिति सर्पविद्याया ऽएकम्पर्व व्याचक्षाण ऽइवानुद्रवेदेवमेवाद्ध्वर्य्युः सम्प्रेष्यति न प्रक्रक्रमाञ्जुहोति ॥ ९ ॥ अथ षष्ठेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदुद्ध्वर्य्विति हवै होतरित्येवाद्ध्वर्य्युः कुबेरो वैश्रवणो राजेत्याह तस्य रक्षाꣳसि विशस्तानीमान्न्यासत ऽइति सेलगाः पापकृत ऽउपसमेता भवन्ति तानुपदिशति देवजनविद्या वेदः सोऽयमिति देवजनविद्याया ऽएकम्पर्व व्याचक्षाण ऽइवानुद्रवेदेवमेवाद्ध्वर्य्युः सम्प्रेष्यति न प्रक्रक्रमाञ्जुहोति ॥ १० ॥ अथ सप्तमेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदुद्ध्वर्य्विति हवै होतरित्येवाद्ध्वर्य्युरसितो धान्वो राजेत्याह तस्यासुरा विशस्त ऽइम ऽआसत ऽइति कुसीदिन ऽउपसमेता भवन्ति तानुपदिशति माया वेदः सोऽयमिति काश्चिन्मायाद्ध्वर्य्यादेवमेवाद्ध्वर्य्युः सम्प्रेष्यति न प्रक्रक्रमाञ्जुहोति ॥ ११ ॥ अथाष्टमेऽहन्। एवमेवैतास्विष्टिषु सꣳस्थितास्वेषैवावृदुद्ध्वर्य्विति हवै होतरित्येवाद्ध्वर्य्युर्म्मत्स्यः साम्मदो राजेत्याह तस्योदकेचरा विशस्त ऽइम ऽआसत ऽइति मत्स्याश्च मत्स्यहनश्चोपसमेता भवन्ति तानुपदिशतीति

हासो वेदः सोऽयमिति कञ्चिदितिहासमाचक्षीतैवमेवाद्ध्वर्युः सम्प्रेष्यति न प्रक्रमाञ्जुहोति ॥ १२ ॥ अथ नवमेऽहन्। एवमेवैतास्विष्टिषु सप्तस्थितास्वेषैवावृदुद्ध्वर्य्यविति हवै होतरित्येवाद्ध्वर्युस्तार्क्ष्यो वैपश्यतो राजेत्याह तस्य वयाꣳसि विशस्तानीमान्यासत ऽइति वयाꣳसि च वायोविद्विकाश्चोपसमेता भवन्ति तानुपदिशति पुराणं वेदः सोऽयमिति किञ्चित्पुराणमाचक्षीतैवमेवाद्ध्वर्युः सम्प्रेष्यति न प्रक्रमाञ्जुहोति ॥ १३ ॥ अथ दशमेऽहन्। एवमेवैतास्विष्टिषु सप्तस्थितास्वेषैवावृदुद्ध्वर्य्यविति हवै होतरित्येवाद्ध्वर्युर्ब्रह्मा ऽइन्द्रो राजेत्याह तस्य देवा विशस्त ऽइम ऽआसत ऽइति श्रोत्रिया अप्रतिग्राहका ऽउपसमेता भवन्ति तानुपदिशति सामानि वेदः सोऽयमिति साम्नान्दशतम्ब्रूयादेवमेवाद्ध्वर्युः सम्प्रेष्यति न प्रक्रमाञ्जुहोतीति ॥ १४ ॥ एतत्पारिप्लवम्। सर्वाणि राज्यान्याचष्टे सर्वा विशः सर्वान्वेदान्त्सर्वान्देवान्त्सर्वाणि भूतानि सर्वेषाꣳ ह वै स ऽएतेषाꣳ राज्यानाꣳ सायुज्यꣳ सलोकतामश्नुते सर्वासां विशामैश्वर्यमाधिपत्यङ्गच्छति सर्वान्वेदानवरुन्द्धे सर्वान्देवान्प्रीत्वा सर्वेषु भूतेष्वन्ततः प्रतितिष्ठति यस्यैवंविदेतद्धोता पारिप्लवमाख्यानमाचष्टे यो वैतदेवं वेदैतदेव समानमाख्यानम्पुनः पुनः सँवत्सरम्परिप्लवते तद्यत्पुनः पुनः परिप्लवते तस्मात्पारिप्लवः षट्त्रिꣳशतन्दशाहानाचष्टे षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनवरुन्द्धे ॥ १५ ॥

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[यूपकाष्ठादि]

सँवत्सरे पर्य्यवेते दीक्षा । प्राजापत्यमालब्भ्योत्सी-दन्तीष्टयः पुरोहितस्याग्निषु यजेतेत्यु हैक आहुः किमु दीक्षितो यजेत द्वादश दीक्षा द्वादशोपसदस्तिस्रः सुत्या-स्तत्त्रिणवमभिसम्पद्यते वज्रो वै त्रिणवः क्षत्रमश्ववः क्षत्रं राजन्यो वज्रेण खलु वै क्षत्रꣳ स्यूतन्तद्वज्रेणैव क्षत्रꣳ स्यूणोति ॥ १ ॥ दीक्षणीयायाꣳ सꣳस्थितायाम् । सायं वाचि विसृष्टायां वीणागणगिन ऽउपसमेता भवन्ति तानद्वर्य्युः सम्प्रेष्यति वीणागणगिन ऽइत्याह देवैरिमं यजमानः सङ्गायतेति तन्ते तथा सङ्गायन्ति ॥ २ ॥ अह-रहर्वाचि विसृष्टायाम् । अग्नीषोमीयाणामन्ततः सꣳस्थाया-म्परिहृतासु वसतीवरीषु तद्यदेनन्दैवैः सङ्गायन्ति देवैरे-वैनन्तत्सलोकङ्कुर्वन्ति ॥ ३ ॥ प्रजापतिना सुत्यासु । एव-मेवाहरहः परिहृतास्वेव वसतीवरीषूदवसानीयायामन्ततः सꣳस्थितायां तद्यदेनम्प्रजापतिना सङ्गायन्ति प्रजापति-नैवैनन्तदन्ततः सलोकङ्कुर्वन्ति ॥ ४ ॥ एकविꣳशतिर्य्यूपाः । सर्व ऽएकविꣳशत्यरत्नयो राज्जुदालोऽग्निष्टो भवति पैतु-दारवावभितः षड्वैल्वास्त्रय ऽइत्थास्त्रय ऽइत्थात्षट् खादि-रास्त्रय ऽएवेत्थात्रय ऽइत्थात्षट् पालाशास्त्रय ऽएवेत्थात्रय ऽइत्थात् ॥ ५ ॥ तद्यदेत ऽएवं य्यूपा भवन्ति । प्रजापतेः प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमद्रियत तस्य यः श्लेष्म्मासीत्सासार्द्धः समवद्रुत्य मद्यतो नस्त ऽउदभि-नत्स ऽएष वनस्पतिरभवद्वज्जुदालस्तस्मात्स श्लेष्मणः

श्लेष्म्मणो हि समभवत्तेनैवैनन्तद्रूपेण समर्द्धयति तद्य-
त्सोऽग्निष्टो भवति मध्यं वा एतद्यूपानां यदग्निष्टो*
मध्यमेतत्प्राणानां यन्नासिके स्व एवैनन्तदायतने दधाति
॥ ६ ॥ अथ यदापोमयन्तेज आसीत् । यो गन्धः स
सार्द्धः समवद्रुत्य चक्षुष्ट्र उदभिनत्स एष वनस्पति-
रभवत्पीतुदारुस्तस्मात्स सुरभिर्गन्धाद्धि समभवत्तस्मादु
ज्वलनस्तेजसो हि समभवत्तेनैवैनन्तद्रूपेण समर्द्धयति तद्य-
त्तावभितोऽग्निष्टुम्भवतस्तस्मादिमे अभितो नासिकाञ्च-
क्षुषी स्व एवैनौ तदायतने दधाति ॥ ७ ॥ अथ यत्कु-
न्तापमासीत् । यो मज्जा स सार्द्धः समवद्रुत्य श्श्रोत्रत
उदभिनत्स एष वनस्पतिरभवद्विल्वस्तस्मात्तस्यान्तरतः
सर्वमेव फलमाद्यम्भवति तस्मादु हारिद्र इव भवति
हारिद्र इव हि मज्जा तेनैवैनन्तद्रूपेण समर्द्धयत्यन्तरे पैतुदा-
रवौ[1] भवतो बाह्ये बैल्ल्वा अन्तरे हि चक्षुषी बाह्ये श्श्रोत्रे
स्व एवैनाँस्तदायतने दधाति ॥ ८ ॥ अस्थिभ्य एवास्य
खदिरः समभवत् । तस्मात्स दारुणो बहुसारो दारुणमिव
ह्यस्थि तेनैवैनन्तद्रूपेण समर्द्धयत्यन्तरे बैल्ल्वा भवन्ति
बाह्ये खादिरा अन्तरे हि मज्जानो बाह्यान्यस्थीनि स्व
एवैनाँस्तदायतने दधाति ॥ ९ ॥ माꣳसेभ्य एवास्य
पलाशः समभवत् । तस्मात्स बहुरसो लोहितरसो लोहि-
तमिव हि माꣳसन्तेनैवैनन्तद्रूपेण समर्द्धयत्यन्तरे खादिरा
भवन्ति बाह्ये पालाशा अन्तराणि ह्यस्थीनि बाह्यानि

* अग्निसमीपे तिष्ठतीति-अग्निष्टः=मध्यमो यूप इत्यर्थः ।
(१) 'पैतुदारुवौ' इति 'ग' 'ज' पुस्तकयोः पाठः ।

मार्ꣳसानि स्व ऽएवैनाँस्तदायतने दधाति ॥ १० ॥ अथ यदेकविꣳशतिर्भवन्ति । एकविꣳशस्त्यरत्नय ऽएकविꣳशो वा ऽएष य ऽएष तपति द्वादश मासाः पञ्चऽर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविꣳशः सोऽश्वमेध ऽएष प्रजापतिरेवमेतम्प्रजापतिं क्रयज्ञङ्कृत्स्नꣳ संस्कृत्य तस्मिन्नेकविꣳशतिमग्नीषोमीयान्पशूनालभते तेषाꣳ समानङ्कर्म्मेत्येतत्पूर्वेद्युः कर्म्म ॥ ११ ॥

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

—०—

[सवनीयाः पशवः]

अथ प्रातग्गोतमस्य । चतुरुत्तर स्तोमो भवति तस्य चतसृषु बहिष्पवमानमष्टास्वष्टास्वाज्यानि द्वादशसु माध्यन्दिनः पवमानः षोडशसु पृष्ठानि विꣳशत्यामार्भवः पवमानश्चतुर्विꣳशत्यामग्निष्टोमसाम* ॥ १ ॥ तस्य हैके । अग्निष्टोमसाम चतुःसाम कुर्वन्ति नाग्निष्टोमो नोक्थ्य ऽइति ब्रुवन्तस्तद्यदि तथा कुर्य्युः सार्द्धꣳ स्तोत्रियः शस्त्वा सार्द्धमनुरूपः शः सेद्रथन्तरम्पृष्ठः राथन्तरः शस्त्रमग्निष्टोमो यज्ञस्तेनेमँल्लोकमृद्ध्नोति ॥ २ ॥ एकविꣳशतिः सवनीयाः पशवः । सर्व ऽआग्नेयास्तेषाꣳ समानङ्कर्म्मेत्यु हैक ऽआहुर्द्वे त्वेवैते ऽएकादशिन्यावालभेत य ऽएवैकाद-

* येन साम्ना अग्निष्टोमसंस्था सामाप्यते तदग्निष्टोमसाम ।

शिनेषु कामस्तस्य कामस्याप्त्यै ॥ ३ ॥ सप्तꣳस्थितेऽग्निष्टोमे। परिहृतासु वसतीवरीष्ववद्धऽर्षुरन्नहोमाञ्जुहोति तेषामुक्तम्ब्राह्मणं 'प्राणाय स्वाहापानाय स्वाहे'ति द्वादशभिरनुवाकैर्द्वादश मासाः सँवत्सरः सर्वः सँवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ४ ॥ एकविꣳशम्मध्यममहर्भवति। असौ वा ऽआदित्य ऽएकविꣳशः सोऽश्वमेधः स्वेनैवैनꣳ स्तोमेन स्वायान्देवतायाम्प्रतिष्ठापयति तस्मादेकविꣳशम् ॥ ५ ॥ यद्वैवैकविꣳशम्। एकविꣳशो वै पुरुषो दश हस्त्या ऽअङ्गुलयो दश पाद्या ऽआत्मैकविꣳशस्तदनेनैकविꣳशेनात्मनैतस्मिन्नेकविꣳशे प्रतिष्ठायाम्प्रतितिष्ठति तस्मादेकविꣳशम् ॥ ६ ॥ यद्वैवैकविꣳशम्। एकविꣳशो वै स्तोमानाम्प्रतिष्ठा बहु खलु वा ऽएतदेतस्मिन्नहन्युच्चावचमिव कर्म्म क्रियते तद्यदेतदेतस्मिन्नहन्युच्चावचम्बहु कर्म्म क्रियते तदेतस्मिन्नेकविꣳशे प्रतिष्ठायाम्प्रतिष्ठितङ्क्रियाता ऽइति तस्माद्वैवैतदेकविꣳशमहः ॥ ७ ॥ तस्य प्रातःसवनम्। 'अग्निर्[1]न्तम्मन्ये यो वसु'रिति होता पाङ्क्तमाज्यꣳ शस्त्वैकाहिकमुपसꣳशꣳसति बार्हतश्च प्रऽउगम्माधुच्छन्दसश्च त्रिचश ऽउभे सꣳशꣳसति यश्च बार्हते प्रऽउगे कामो य ऽउ च माधुच्छन्दसे तयोरुभयोः कामयोराप्त्यै कक्लृप्तम्प्रातःसवनम् ॥ ८ ॥ अथातो माध्यन्दिनꣳ सवनम्। अतिच्छन्दाः प्रतिपन्नमरुत्वतीयस्य 'त्रिकं[2]-

(१) शु० य० सं० २२. २३। (२) शु० य० सं० १५. ४१। (३) ऋ० सं० २. ६. २८।

द्रुकेषु महिषो यवाशिर'मित्यतिष्ठा वा ऽएषा च्छन्दसां यदतिच्छन्दा ऽअतिष्ठा ऽअश्वमेधो यज्ञानामश्वमेधस्यै-वाप्त्यै सैषैव त्रिः शस्ता त्रिचः सम्पद्यते तेनो तङ्कामम्मा-प्नोति यस्त्रिच 'ऽइदं वसो सुतमन्ध' ऽइत्यनुचर ऽएष ऽएव नित्य ऽएकाहातान 'ऽइत्था हि सोम ऽइन्मदे'ऽवि-तांसि सुन्वतो वृक्तबर्हिष' ऽइति पङ्क्तीश्च षट्पदाश्च शस्त्वैकाहिके निविदन्दधातीति मरुत्वतीयम् ॥ ९ ॥ अथातो निष्केवल्यम् । महानाम्न्यः पृष्ठम्भवन्ति सानुरूपाः सप्रगाथाः शतःसति सर्वे वै कामा महानाम्नीषु सर्वे कामा ऽअश्वमेधे सर्वेषाङ्कामानामाप्त्या 'ऽइन्द्रो मदाय वावृधे' 'प्रेदम्ब्रह्म वृत्रतूर्येष्वाविथे'ति पङ्क्तीश्च षट्-पदाश्च शस्त्वैकाहिके निविदन्दधाति क्लृप्तम्माध्यन्दि-नः सवनम् ॥ १० ॥ अथातस्तृतीयसवनम् । अतिच्छन्दा ऽएव प्रतिपद्वैश्वदेवस्या'भि त्यं देवः सवितारमो-ण्यो'रिति तस्या ऽएतदेव ब्राह्मणं यदपूर्वस्या 'ऽअभि त्वाँ देव सवित'रित्यनुचरोऽभिवानभिभूत्यै रूप'मुर्दु ष्य देवः सविता दुमूना' ऽइति सावित्रः शस्त्वैकाहिके निविदन्दधाति 'महीं द्यावापृथिवी ऽइह ज्येष्ठे' ऽइति चतुर्ऋचन्द्यावापृथिवीयः शस्त्वैकाहिके निविदन्दधा'त्यृभु-र्विभ्वाँ वाज ऽइन्द्रो नो ऽअच्छे'त्यार्भवः शस्त्वैकाहिके

(१) ऋ० सं० ५. ७. १७। (२) ऋ० सं० १. ५. २९। (३) ऋ० सं० ६. ३. १८। (४) ऋ० सं० १. ६. १। (५) ऋ० सं० ६. ३. १६। (६) शु० य० सं० ४. २५। (७) ऋ० सं० १. २. १३। (८) ऋ० सं० ५. ४. ५। (९) ऋ० सं० ३. ८. ८। (१०) ऋ० सं० ३. ७. ३।

निविदन्दधाति 'को नु[1] वाग्मिन्नावरुणावृताय'न्निति वैश्वदेवः शस्त्वैकाहिके निविदन्दधातीति वैश्वदेवम् ॥ ११ ॥ अथात ऽआग्निमारुतम् । 'मूर्द्धानन्दिवो ऽअरतिम्पृथिव्या'[2] ऽइति वैश्वानरीयः शस्त्वैकाहिके निविदन्दधा'त्यग्नि[3] रुद्रास ऽइन्द्रवन्तः सजोषस' ऽइति मारुतः शस्त्वैकाहिके निविदन्दधाती'मर्मृज[4] षु वो ऽअतिथिमुषर्बुध'मिति नवर्चज्ञातवेदसीयः शस्त्वैकाहिके निविदन्दधाति तद्यदैकाहिकानि निविद्धानानि भवन्ति प्रतिष्ठा वै ज्योतिष्टोमः प्रतिष्ठाया ऽअप्रच्च्युत्यै ॥ १२ ॥ तस्यैते पशवो भवन्ति । 'अश्ववस्तूपरो* गोमृग,† ऽइति पञ्चदश पर्ष्यङ्ग्यास्तेषामुक्तम्ब्राह्मणमथैत ऽआरण्या 'वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरी'[5]निति तेषाम्वेवोक्तम् ॥ १३ ॥ अथैतानेकविंशतये । चातुर्म्मास्यदेवताभ्य ऽएकविंशतिमेकविंशतिम्पशूनालभत ऽएतावन्तो वै सर्वे देवा यावत्यश्चातुर्म्मास्यदेवताः सर्वे कामा ऽअश्वमेधे सर्वान्देवान्प्रीत्वा सर्वान्कामानाप्नवानीति न तथा कुर्य्यात् ॥ १४ ॥ सप्तदशैव पशून्मध्यमे यूप ऽआलभेत । प्रजापतिः सप्तदशः सर्वः सप्तदशः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै षोडश षोडशेतरेषु षोडशकलं वा ऽइदः सर्वः

(१) ऋ० सं० ४. २. १३ । (२) ऋ० सं० ४. ५. ९ । शु० य० सं० ७. २५।३३. ८ । (३) ऋ० सं० ४. ३. ११ । (४) ऋ० सं० ४. ५. १७ । (५) शु० सं० य० २४. १ ।

* 'शृङ्गोत्पत्तिकालेऽतीतेऽपि शृङ्गहीनश्छागः = तूपरः ।

† गोमृगः ■ गवयः ।

(६) शु० य० सं० २४. २० ।

सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै त्रयोदश त्रयोदशारण्यानाकाशेष्वालभते त्रयोदश मासाः संवत्सरः सर्वः संवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ १५ ॥ अथ पुरा बहिष्पवमानात् । अश्वान्निक्त्वोदानयन्ति तेन पवमानाय सर्पन्ति तस्योक्तम्ब्राह्मणꣳ स्तुते बहिष्पवमानेऽश्वमास्तावमाक्रमयन्ति स यद्यव वा जिघ्रेद्वि वा वर्त्तेत समृद्धो मे यज्ञ ऽइति ह विद्यात्तमुपाकृत्याद्धर्युराह होतरभिष्टुहीति तमेकादशभिर्होताभिष्टौति ॥ १६ ॥ 'यदुक्कन्दः प्रथमञ्जायमान' ऽइति । त्रिः प्रथमया त्रिरुत्तमया ताः पञ्चदश सम्पद्यन्ते पञ्चदशो वै वज्रो वीर्यं वज्रो वज्रेणैवैतद्वीर्येण यजमानः पुरस्तात्पाप्मानमपहते तद्वै यजमानायैव वज्रः प्रदीयते योऽस्य स्तृत्यस्तꣳ स्तर्त्तव ऽउप प्रागाच्छसनं वाज्यर्वोप प्रागात्परमं ग्यत्सधस्थमिति ॥ १७ ॥ एते ऽउद्धृत्य । 'मा नो मित्रो वरुणो ऽअर्य्यमायु'रित्येतत्सूक्तमद्रिगावावपति 'चतुस्त्रिꣳशद्वाजिनो देवबन्धो'रित्यु हैक ऽएतां वङ्क्रीणाम्पुरस्ताद्दधति नेदुनायतने प्रणवन्दुधामेत्यथो नेदेकवचनेन बहुवचनं व्यवायामेति न तथा कुर्य्यात्सार्द्धमेव सूक्तमावपे'दुर्वं प्रागाच्छसनं वाज्यर्वो'प प्रागात्परमं ग्यत्सधस्थ'मिति ॥ १८ ॥

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

(१) शु० य० सं० २९. १२ । (२) शु० य० सं० २५. २४ । (३) शु० य० सं० २५. ४१ । (४) शु० य० सं० २९. २३ । (५) शु० य० सं० २९. २४ ।

[संवादः]

एते ऽउक्त्वा । यदुद्भिगोः परिशिष्टम्भवति तदाह ब्रासोऽधिवासः हिरण्ण्यमित्यश्वायोपस्तृणन्ति तस्मिन्नेनमधि संज्ञपयन्ति संज्ञप्तेषुः पशुषु पत्न्यः पात्रेजनैरुदायन्ति चतस्रश्च जायाः कुमारी पञ्चमी चत्वारि च शतान्यनुचरीणाम् ॥ १ ॥ निष्टितेषु पात्रेजनेषु । महिषीमश्वायोपनिपादयन्त्यथैनावधिवासेन * सम्प्रोर्ण्णुवन्ति † '[1]स्वर्गे लोके प्रोर्ण्णुवाथा'मित्येष वै स्वर्गो लोको यत्र पशुः संज्ञपयन्ति निरायत्त्याश्वस्य शिश्नम्महिष्युपस्थे निधत्ते ‡ '[2]वृषा वाजी रेतोधा रेतो दधात्वि'ति मिथुनस्यैव सर्वत्वाय ॥ २ ॥ तयोः शयानयोः । अश्वं यजमानोऽभिमेथ'[3]त्युत्सक्थ्या ऽअव गुदन्धेही'ति तन्न कश्चन प्रत्यभिमेथति नेद्यजमानम्प्रतिप्रतिः कश्चिदसदिति ॥ ३ ॥ अथाद्धर्युः कुमारीमभिमेथति । कुमारि हुये हये कुमारि 'षकाँसकौ शकुन्तिके'ति तत्कुमारी प्रत्यभिमेथत्यद्धर्यो हुये हयेऽद्धर्यो 'यकोऽसकौ शकुन्तक' ऽइति ॥ ४ ॥ अथ ब्रह्मा महिषीमभिमेथति । महिषि हुये हये महिषि '[6]माता च ते पिता च तेऽग्रं वृक्षस्य रोहत' ऽइति तस्यै शतः राजपुत्र्योऽनुचर्यो भवन्ति ता ब्रह्माणम्प्रत्यभिमेथ-

* अथ उपरिष्टाच्छादनक्षमं वासोऽधिवास ।

† का० श्रौ० सू० २०. ६. १५ ।

(१) शु० य० सं० २३. २० ।

‡ 'अश्वशिश्नमुपस्थे कुरुते' (का० श्रौ० सू० २०. ६. १६) ।

(२) शु० य० सं० २३ २० । (३) शु० य० सं० २३. २१ । (४) शु० य० सं० २३. २२ । (५) शु० य० सं० २१. २३ । (६) शु० य० सं० २३. २४ ।

न्ति ब्रह्मन्हुये हये ब्रह्म'न्न्माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडत' ऽइति ॥ ५ ॥ अथोद्गाता वावातामभिमेथति । वावाते हुये हये वावात 'ऽऊर्द्धामेनामुच्छ्रापये'ति तस्यै शतङ्क राजन्न्या ऽअनुचर्य्यो भवन्ति ता ऽउद्गातारम्प्रत्यभिमेथन्त्युद्गातर्हुये हय ऽउद्गात'रूर्द्धमेनमुच्छ्रयता'दिति ॥ ६ ॥ अथ होता परिवृक्तामभिमेथति । परिवृक्ते हुये हये परिवृक्ते 'यर्दस्या अङ्हुभेद्या' ऽइति तस्यै शतङ्क सूतग्रामण्यान्दुहितरोऽनुचर्य्यो भवन्ति ता होतारम्प्रत्यभिमेथन्ति होतर्हुये हये होत'र्य्यर्देवासो ललामगु'मिति ॥ ७ ॥ अथ क्षत्ता पालागलीमभिमेथति । पालागलि हुये हये पालागलि 'यद्धरिणो यवमत्ति न पुष्टम्पशु मन्यत' ऽइति तस्यै शतङ्क्षात्रसङ्ग्रहीतृणान्दुहितरोऽनुचर्य्यो भवन्ति ताः क्षत्तारम्प्रत्यभिमेथन्ति क्षत्तर्हुये हये क्षत्त'र्य्यद्धरिणो यवमत्ति न पुष्टम्बहु मन्यत' ऽइति ॥ ८ ॥ सर्वाप्तिर्वा ऽएषा वाचः । यदभिमेथिकाः सर्वे कामा ऽअश्वमेधे सर्वया वाचा सर्वान्कामानाप्नवामेत्युत्थापयन्ति महिषीन्ततस्ता यथेतम्प्रतिपरायन्त्यथेतरे सुरभिमतीमृचमन्ततोऽन्वाह'र्दधिक्राव्णो ऽअकारिष'मिति ॥ ९ ॥ [अर्धप्रपाठकः ॥५३॥] अप वा ऽएतेभ्य ऽआयुर्देवताः क्रामन्ति । ये यज्ञेऽपूतां वाचं वदन्ति वाचमेवैतत्पुनते देवयज्यायै देवतानामनपक्रमाय या च गोमृगे वपा भवति या चाजे तूपरे

(१) शु० य० सं० २३. २५। (२) शु० य० सं० २३. २६। (३) शु० य० सं० २३. २७। (४) शु० य० सं० २३. २८। (५) शु० य० सं० २३. २९। (६) शु० य० सं० २३. ३०। (७) शु० य० सं० २३. ३१। (८) शु० य० सं० २३. ३२।

ते ऽअश्वे प्रत्यवधायाहरन्ति नाश्वस्य वपास्तीति वदन्तो न तथा कुर्य्यादुश्वस्यैव प्रत्यक्षम्मेद ऽआहरेत्प्रज्ञाता ऽइतराः ॥ १० ॥ श्रुतासु वपासु । स्वाहाकृतिभिश्चरित्वा प्रत्यञ्चः प्रतिपरेत्य सदसि ब्रह्मोद्यं वदन्ति पूर्वया द्वारा प्रपद्य यथाधिष्ण्यं व्युपविशन्ति ॥ ११ ॥ स होताद्धर्य्युम्पृच्छति । 'कः स्विदेकाकी चरती'ति तम्प्रत्याह 'सूर्य ऽएकाकी चरती'ति ॥ १२ ॥ अथाद्धर्य्युर्होतारम्पृच्छति । 'किꣳ स्वित्सूर्यसमज्योति'रिति तम्प्रत्याह ब्रह्म 'सूर्यसमज्योति'रिति ॥ १३ ॥ अथ ब्रह्मोद्गातारम्पृच्छति । 'पृच्छामि त्वा चितये देवसखे'ति तम्प्रत्याहा'पि तेषु त्रिषु पदेष्वस्म्मी'ति ॥ १४ ॥ अथोद्गाता ब्रह्माणम्पृच्छति । 'केष्वन्तः पुरुष ऽआविवेशे'ति तम्प्रत्याह 'पञ्चस्वन्तः पुरुष ऽआविवेशे'ति ॥ १५ ॥ एतस्यामुक्तायामुत्थाय । सदसोऽधि प्राञ्चो यजमानमभ्यायन्त्युग्रेण हविर्द्धाने ऽआसीनमेत्य यथायतनम्पर्य्युपविशन्ति ॥ १६ ॥ स होताद्धर्य्युम्पृच्छति । 'कां स्विदासीत्पूर्वचित्ति'रिति तम्प्रत्याह 'द्यौरासीत्पूर्वचित्ति'रिति ॥ १७ ॥ अथाद्धर्य्युर्होतारम्पृच्छति । 'का ऽईमरे पिशङ्गिले'ति तम्प्रत्याहा'जारे पिशङ्गिले'ति ॥ १८ ॥ अथ ब्रह्मोद्गातारम्पृच्छति । 'कस्यस्य

(१) शु० य० सं० २३. ४५। (२) शु० य० सं० २३. ४६। (३) शु० य० सं० २३. ४७। (४) शु० य० सं० २३. ४८। (५) शु० य० सं० २३. ४९। (६) शु० य० सं० २३. ५०। (७) शु० य० सं० २३ ५१। (८) शु० य० सं० २३. ५२। (९) शु० य० सं० २३. ५३। (१०) शु० य० सं० २३. ५४। (११) शु० य० सं० २३. ५५। (१२) शु० य० सं० २३. ५६। (१३) शु० य० सं० २३. ५७।

विष्टुाः क्रत्यक्षराणी'ति तम्प्रत्याह 'षड्ैस्य विष्टुाः शतमक्षराणी'ति ॥ १९ ॥ अथोद्गाता ब्रह्माणम्पृच्छति । 'को ऽअस्य वेद भुवनस्य नाभि'मिति तम्प्रत्याह 'वेदाहमस्य भुवनस्य नाभि'मिति ॥ २० ॥ अथाद्ध्वर्युं ऋत्विजमानः पृच्छति । 'पृच्छामि त्वा परमन्तम्पृथिव्या' ऽइति तम्प्रत्याहे'यं वेदिः परो ऽअन्तः पृथिव्या' ऽइति ॥ २१ ॥ सर्वाप्तिर्ब्रह्मौ ऽएषा वाचः । यद्ब्रह्मोद्यः सर्वे कामा ऽअश्ववमेधे सर्वया वाचा सर्वान्न्कामानाप्नवामेति ॥ २२ ॥ उदिते ब्रह्मोद्ये । प्रपद्याद्ध्वर्युर्हिरण्मयेन पात्रेण प्राजापत्यम्महिमानङ्गहङ्गच्छाति तस्य पुरोरु'ग्घिरण्ण्यगर्भः समवर्त्तताग्र' ऽइत्यथास्य पुरोऽनुवाक्यया 'सुंभूः स्वयम्भूः प्रथम' ऽइति 'होर्ता यक्षत्प्रजापति'मिति प्रैषः 'प्रजांपते न त्वदेतान्यन्न्य' ऽइति होता यजति वषट्कृते जुहोति 'यस्तेऽहन्त्सँवत्सरे महिमा सम्बभूवे'ति नानुवषट्करोति सर्वहुतः हि जुहोति ॥ २३ ॥

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

—०—

[वपाहोमः]

अथातो वपानाꣳ होमः । नानैव चरेयुरा वैश्वदेवस्य वपायै वैश्वदेवस्य वपायाꣳ हुतायान्तदन्विवतरा

(१) शु० य० सं० २३. ५८. । (२) शु० य० सं० २३. ५९ । (३) शु० य० २३. ६० । (४) शु० य० सं० २३. ६१ । (५) शु० य० सं० २३. ६२ । (६) शु० य० सं० २१. १ । (७) शु० य० सं० २३. ६३ । (८) शु० य० सं० २१. ६४ । (९) शु० य० सं० २३. ६५ । (१०) शु० य० सं० २३. २

जुहुयुरिति ह स्माह सत्यकामो जाबालो विश्वे वै सर्वे देवास्तदेनान्न्यथादेवतम्प्रीणातीति ॥ १ ॥ ऐन्द्राग्नस्य वपायाश्च हुतायाम् । तदन्विवतरा जुहुयुरिति ह स्माहतुः सौमापौ मानुतन्तव्याविन्द्राग्नी वै सर्वे देवास्तदेवैनान्न्यथादेवतम्प्रीणातीति ॥ २ ॥ कायस्य वपायाश्च हुतायाम् । तदन्विवतरा जुहुयुरिति ह स्माह शैलालिः प्रजापतिर्वै कः प्रजापतिमु वा ऽअनु सर्वे देवास्तदेवैनान्न्यथादेवतम्प्रीणातीति ॥ ३ ॥ एकविंशतिश्चातुर्म्मास्यदेवता ऽअनुद्रुत्य । एकविंशतिधा कृत्वा प्रचरेयुरिति ह स्माह भाल्लवेय ऽएतावन्तो वै सर्वे देवा यावत्यश्चातुर्म्मास्यदेवतास्तदेवैनान्न्यथादेवतम्प्रीणातीति ॥ ४ ॥ नानैव चरेयुः । इतीन्द्रोतः शौनकः किमुत त्वेरँस्तदेवैनान्न्यथादेवतम्प्रीणातीत्येतदुह तेषां वचोऽन्या त्वेवात स्थितिः ॥ ५ ॥ अथ होवाच याज्ञवल्क्यः । सकृदेव प्राजापत्याभिः प्रचरेयुः सकृद्देवदेवत्याभिस्तदेवैनान्न्यथादेवतम्प्रीणात्यञ्जसा यज्ञस्य सꣳस्थामुपैति न ह्वलतीति ॥ ६ ॥ हुतासु वपासु । प्रपद्याद्धर्षु रजतेन पात्रेण प्राजापत्यम्महिमानमुत्तरङ्गहङ्गहाति तस्य पुरोरुग्यः प्राणतो निमिषतो महित्वेति विपर्यस्ते याज्ज्यानुवाक्ये ऽअयातयामताया ऽएष ऽएव प्रैषो वषट्कृते जुहोति 'यस्ते रात्रौ सँवत्सरे महिमा सम्बभूवे'ति नानुवषट्करोति तस्योक्तम्ब्राह्मणम् ॥ ७ ॥ नान्येषाम्पशूनान्तेदन्या ऽअवद्यन्ति । अवद्यन्त्यश्वस्य

(१) शु० य० सं० २२. ३। (२) शु० य० सं० २२. ४।

दक्षिणतोऽन्येषाम्पशूनामवद्यन्त्युत्तरतोऽश्वस्य प्लक्षशाखास्वन्येषाम्पशूनामवद्यन्ति वेतसशाखास्वश्वस्य ॥ ८ ॥ तदु होवाच सात्ययज्ञिः । इतरथैव कुर्य्युः पथ एव नापोद्वित्यमिति पूर्वा त्वेव स्तुतिरुक्थ्यो यज्ञस्तेनान्तरिक्षलोकमृद्ध्नोति सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वं वै सर्वस्तोमोऽतिरात्रः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ९ ॥ तस्य त्रिवृद्बहिष्पवमानम् * । पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमान एकविंशानि पृष्ठानि त्रिणवस्तृतीयः पवमानस्त्रयस्त्रिंशमग्निष्टोमसामैकविंशान्युक्थान्येकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिरर्धद्वितीयस्याहः पृष्ठ्यस्य षडहस्य तच्छस्त्रमतिरात्रो यज्ञस्तेनामुँल्लोकमृद्ध्नोति ॥ १० ॥ एकविंशतिः सवनीयाः पशवः । सर्व आग्नेयास्तेषाꣳ समानङ्कर्म्मेत्यु हैक आहुश्चतुर्विंशतिन्त्वेवैतान्गठ्यानालभेत द्वादशभ्यो देवताभ्यो द्वादश मासाः सँवत्सरः सर्वः सँवत्सरः सर्वमश्वमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ११ ॥ †

पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

—०—

* सामगानामुत्तरार्चिके तृचात्मकानि सूक्तान्याम्नातानि (साम० उ० १. १. १–९)। तत्र 'उपास्मै' इत्याद्य सूक्तम् । 'देवि द्युतत्या' इति द्वितीयम् । 'पवमानस्य ते' इति तृतीयम् । प्रातःस्वनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गीयते । तदिदं सूक्तत्रयगानमाश्रित्य स्तोत्रं बहिष्पवमानमित्युच्यते । तत्र स्थितानामृचां पवमानार्थत्वाद्बहिःसम्बन्धाच्च ।

† शतम् ६७०० ।

[प्रत्यृतु पश्वालम्भः]

एतेन हेन्द्रोतो दैवापः शौनकः। जनमेजयम्पारिक्षितं ऋाजयाश्चकार तेनेष्ट्वा सर्वाम्पापकृत्याꣳ सर्वाम्ब्रह्महत्यामपजघान सर्वाꣳ ह वै पापकृत्याꣳ सर्वाम्ब्रह्महत्यामपहन्ति योऽश्वमेधेन यजते ॥ १ ॥ तदेतद्गाथयाभिगीतम्। आसन्दीवति धान्यादुः रुक्मिणः हरितस्रजम् ॥ अवदध्नादुश्वः सारङ्गन्देवेभ्यो जनमेजय ऽइति ॥ २ ॥ एते ऽएव पूर्वे ऽअहनी। ज्योतिरतिरात्रस्तेन भीमसेनमेते ऽएव पूर्वे ऽअहनी गौरतिरात्रस्तेनोग्रसेनमेते ऽएव पूर्वे ऽअहनी ऽआयुरतिरात्रस्तेन श्रुतसेनमित्येते पारिक्षितीयास्तदेतद्गाथयाभिगीतम्पारिक्षिता यजमाना ऽअश्वमेधैः परोऽवरम् ॥ अजहुः कर्म्म पापकम्पुण्याः पुण्येन कर्म्मणेति ॥ ३ ॥ एते ऽएव पूर्वे ऽअहनी। अभिजिदतिरात्रस्तेन ह पर ऽआट्णार ऽईजे कौसल्ल्यो राजा तदेतद्गाथयाभिगीतमट्णारस्य परः पुत्रोऽश्वम्मेध्यमबन्धयत्॥ हैरण्यनाभः कौसल्ल्यो द्विशः पूर्णा अमहःहतेति ॥ ४ ॥ एते ऽएव पूर्वे ऽअहनी। विश्वजिदतिरात्रस्तेन ह पुरुकुत्सो दौर्ग्गहेणेज ऽऐक्ष्वाको राजा तस्मादेतदृषिणाऽभ्यनूक्त'मस्म्माकमत्र पितरस्त ऽआसन्त्सप्त ऽऋषयो दौर्ग्गहे वक्ष्यमान' ऽइति ॥ ५ ॥ एते ऽएव पूर्वे ऽअहनी। महाव्रतमतिरात्रस्तेन ह मरुत्त ऽआविक्षित ऽईज ऽआयोगवो राजा तस्य ह ततो मरुतः परिवेष्टारोऽग्निः क्षत्ता विश्वे देवाः

(१) ऋ० सं० ३. ७. १८।

सभासदो बभूवुस्तदेतद्गाथयाभिगीतम्मरुतः परिवेष्टारो मरुत्तस्यावसन्नगृहे ॥ आविक्षितस्याग्निः क्षत्ता विश्वे देवाः सभासद ऽइति मरुतो ह वै तस्य परिवेष्टारोऽग्निः क्षत्ता विश्वे देवाः सभासदो भवन्ति योऽश्वमेधेन यजते ॥ ६ ॥ एते ऽएव पूर्वे ऽअहनी । अप्तोर्य्यामोऽतिरात्रस्तेन हैतेन वक्रैव्य ऽईजे पाञ्चालो राजा विक्रवय ऽइति ह वै पुरा पञ्चालानाचक्षते तदेतद्गाथयाभिगीतमश्वमेध्यमालभत विक्रवीणामतिपूरुषः ॥ पाञ्चालः परिवक्रायाऽ सहस्रशतदक्षिणमिति ॥ ७ ॥ अथ द्वितीयया । सहस्रमासन्नयुता शता च पञ्चविंशतिः ॥ दिक्तोदिक्तः पञ्चालानाम्ब्राह्मणा या विभेजिर ऽइति ॥ ८ ॥ त्रिवृदग्निष्टोमः । पञ्चदश ऽउक्थ्यः सप्तदशस्तृतीयमहः सोक्थकमेकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिरित्येषोऽनुष्टुप्सम्पन्नस्तेन हैतेन द्वसा द्वैतवन ऽईजे मात्स्यो राजा यत्रैतद्द्वैतवनः सरस्तदेतद्गाथयाभिगीतञ्चतुर्दश द्वैतवनो राजा सङ्गामजिद्धयान् ॥ इन्द्राय व्वृत्रघ्नेऽवदधात्तस्माद्द्वैतवनः सर ऽइति ॥ ९ ॥ चतुर्विंशः पवमानः । त्रिवृदभ्यावर्त्तश्चतुश्चत्वारिंशः पवमाना ऽएकविंशमभ्यावर्त्तमष्टाचत्वारिंशः पवमानास्त्रयस्त्रिंशमभ्यावर्त्तमाग्निष्टोमसामाद्द्वात्रिंशान्युक्थान्येकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिरिति ॥ १० ॥ एतद्विष्णोः क्रान्तम् । तेन हैतेन भरतो दौःषन्तिरीजे तेनेष्ट्वेमां व्व्यष्टिं व्व्यानशे येयम्भरतानान्तदेतद्गाथयाभिगीतमष्टासप्ततिम्भरतो दौः

षन्तिर्य्यमुनामनु ॥ गङ्गायां व्वृत्रघ्नेऽवन्धनात्पञ्चपञ्चाशतः हयानिति ॥ ११ ॥ अथ द्वितीयया । त्रयस्त्रिंशद्शतः शतः राजाश्वान्बद्धाय मेद्ध्यान् ॥ सौद्युम्निरत्यष्टादन्यानमायान्मायवत्तर ऽइति ॥ १२ ॥ अथ तृतीयया । शकुन्तलानाडपित्यप्सरा भरतन्दधे ॥ परः सहस्रानिन्द्रायाश्वान्मेद्ध्यान्य ऽआहरद्विजित्य पृथिवीꣳ सर्वामिति ॥ १३ ॥ अथ चतुर्थ्या । महदद्य भरतस्य न पूर्वे नापरे जनाः ॥ दिवम्मर्त्य ऽइव बाहुभ्यान्नोदापुः पञ्च मानवा ऽइति ॥१४॥ एकविंशस्तोमेन ऽऋषभो याज्ञतुर ऽईजे श्वित्क्वनानाꣳ राजा तदेतद्गाथयाभिगीतं श्याज्ञतुरे यजमाने ब्रह्माण ऽऋषभे जनाः ॥ अश्वमेधे धनँल्लब्ध्वा विभजन्ते स्म दक्षिणा ऽइति ॥ १५ ॥ त्रयस्त्रिंशस्तोमेन । शोणः सात्रासाह ऽईजे पाञ्चालो राजा तदेतद्गाथयाभिगीतः सात्रासाहे यजमानेऽश्वमेधेन तौर्वशाः ॥ उदीरते त्रयस्त्रिंशाः षट् सहस्राणि वर्म्मिणामिति ॥ १६ ॥ अथ द्वितीयया । षट् षट् षड्ढा सहस्राणि यज्ञे कोकपितुस्तव ॥ उदीरते त्रयस्त्रिंशाः षट् सहस्राणि वर्म्मिणामिति ॥ १७॥ अथ तृतीयया । सात्रासाहे[1] यजमाने पाञ्चाले राज्ञि सुस्रजि ॥ अमायदिन्द्रः सोमेनातृप्यन्ब्राह्मणा धनैरिति ॥ १८ ॥ गोविनतेन शतानीकः । सात्राजित ऽईजे काश्यस्याश्वमादाय ततो हैतदर्वाक्काशयोऽग्नीन्नादधत ऽआत्तसोमपीथाः स्म ऽइति वदन्तः ॥ १९ ॥ तस्य विधा चतुर्विंशाः पव-

(१-२) 'सात्रासहे' इति 'ग' 'ज' पुस्तकयोः पाठः ।

मानाः । त्रिवृदभ्यावर्त्तञ्चतुश्चत्वारिंशाः पवमाना ऽएकविंशान्याज्यानि तृणवान्युक्थान्येकविंशानि पृष्ठानि षट्त्रिंशाः पवमानास्त्रयस्त्रिंशमभ्यावर्त्तमाग्निष्टोमसामादेकविंशान्युक्थान्येकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिः ॥ २० ॥ तदेतद्गाथयाभिगीतम् । शतानीकः समन्तासु मेध्यः सात्राजितो हयम् ॥ आदत्त यज्ञङ्काशीनाम्भरतः सत्त्वतामिवेति ॥ २१ ॥ अथ द्वितीयया । श्वेतः समन्तासु वशश्चरन्तः शतानीको धृतराष्ट्रस्य मेध्यम् ॥ आदाय सह्वा दृशमास्यमश्श्वः शतानीको गोविनतेन हेज ऽइति ॥ २२ ॥ अथ चतुरर्थ्या । महदद्य भरतानान्न पूर्वे नापरे जनाः ॥ दिवम्मर्त्य ऽइव पक्षाभ्यान्नोदापुः सप्त मानवा ऽइति ॥ २३ ॥ अथातो दक्षिणानाम् । मध्यम्प्रति राष्ट्रस्य यदन्यद्भूमेश्च पुरुषेभ्यश्च ब्राह्मणस्य च वित्तात्प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुस्तदेव होतृका ऽअन्नवाभक्ताः ॥ २४ ॥ उदयनीयायाꣳ सꣳस्थितायाम् । एकविंशतिं वशा ऽअनूवन्ध्या ऽआलभते मैत्रावरुणीर्वैश्वदेवीर्बार्हस्पत्या ऽएतासान्देवतानामाप्त्यै तद्यद्बार्हस्पत्या ऽअन्त्या[1] भवन्ति ब्रह्म वै बृहस्पतिस्तदु ब्रह्मण्येवान्ततः प्रतितिष्ठति ॥ २५ ॥ अथ यदेकविंशतिर्भवन्ति । एकविंशो वा ऽएष य ऽएष तपति द्वादश मासाः पञ्चर्त्तवस्त्रय ऽइमे लोका ऽअसावादित्य ऽएकविंश ऽएतामभिसम्पदम् ॥ २६ ॥ उदवसानीयायाꣳ

(१) 'ग' 'ज' पुस्तकयोः "०स्पत्यान्त्या" इति पाठः ।

सꣳस्थितायाम् * । चतस्रश्च जायाः कुमारीम्पञ्चमीञ्चत्वारि च शतान्न्यनुचरीणां ऋथासमुदितन्दक्षिणान्ददाति ॥ २७ ॥ अथोत्तरः सँवत्सरमृतुपशुभिर्य्यजते† । षड्भिराग्नेयैर्व्वसन्ते षड्भिरैन्द्रैर्ग्रीष्मे षड्भिः पार्जन्न्यैर्व्वा मारुतैर्व्वा वर्षासु षड्भिर्म्मैत्रावरुणैः शरदि षड्भिरैन्द्राबार्हस्पत्यैर्हेमन्ते षड्भिरैन्द्राबार्हस्पत्यैः शिशिरे षड्ऋतवः सँवत्सर ऽऋतुष्वेव सँवत्सरे प्रतितिष्ठति षट्त्रिꣳशदेते पशवो भवन्ति षट्त्रिꣳशदक्षरा बृहती बृहत्यामधि स्वर्गो लोकः प्रतिष्ठितस्तद्बन्ततो बृहत्यैव च्छन्दसा स्वर्गे लोके प्रतितिष्ठति ॥२८॥

पञ्चमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥

कण्डिकासंख्या ॥ १०६ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

—०—

[पुरुषमेधः]

पुरुषो ह नारायणोऽकामयत । अतितिष्ठेयꣳ सर्व्वाणि भूतान्न्यहमेवेदꣳ सर्व्वꣳ स्यामिति स ऽएतम्पुरुषमेधम्पञ्चरात्रं ऋयज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वात्यतिष्ठत्सर्व्वाणि भूतानीदꣳ सर्व्वमभवदतितिष्ठति सर्व्वाणि भूतानीदꣳ सर्व्वम्भवति य ऽएवं विद्वान्पुरुषमेधेन यजते यो वैतदेवं वेद ॥ १ ॥ तस्य त्रयोविꣳशतिर्दीक्षाः ‡ । द्वा-

* 'उदवसानीयान्ते भार्या ददाति यथासंवादꣳ सानुचरी.' (का० श्रौ०सू०२०.८.२४) इति।

† तथा च सूत्रितं कात्यायनमहर्षिणा 'प्रत्यृतु पशूनालभते षट् षट् वसन्तायाग्नेयानैन्द्रान्पार्जन्यान्मारुतान्वा मैत्रावरुणानैन्द्राबार्हस्पत्यान्' (का० श्रौ० सू० २०. ८. ३०) इति ।

‡ 'पुरुषमेधस्त्रयोविꣳशतिदीक्षोऽतिष्ठाकामस्य' (का० श्रौ० सू० २१. १. १) इति ।

दशोपसदः पञ्च सुत्याः स ऽएष चत्वारिꣳशद्रात्रः सदीक्षोपसत्कश्चत्वारिꣳशदक्षरा विराट् तद्विराजमभिसम्पद्यते 'ततो विराडजायत विराजो ऽअधि पूरुष' ऽइत्येषा वै सा विराडेतस्या ऽएवैतद्विराजो यज्ञम्पुरुषञ्जनयति ॥ २ ॥ ता वा ऽएताः । चतस्रो दशतो भवन्ति तद्यदेताश्चतस्रो दशतो भवन्त्येषाञ्चैव लोकानामाप्त्यै दिशाञ्चैममेव लोकम्प्रथमया दशताप्नुवन्नन्तरिक्षन्द्वितीयया दिवन्तृतीयया दिशश्चतुर्थ्या तथैवैतद्यजमान ऽइममेव लोकम्प्रथमया दशताप्नोत्यन्तरिक्षन्द्वितीयया दिवन्तृतीयया दिशश्चतुर्थ्यैतावद्वा ऽइदꣳ सर्वं यावदिमे च लोका दिशश्च सर्वम्पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ३ ॥ एकादशाग्नीषोमीयाः[1] पशव ऽउपवसथे । तेषाꣳ समानङ्कर्म्मैकादश यूपा ऽएकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानः पुरस्तात्पाप्मानमपहते ॥ ४ ॥ ऐकादशिनाः सुत्यासु पशवो भवन्ति । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानः पुरस्तात्पाप्मानमपहते ॥ ५ ॥ येद्वैवकादशिना भवन्ति । एकादशिनी वा ऽइदꣳ सर्वम्प्रजापतिर्य्यैकादशिनी सर्वः हि प्रजापतिः सर्वम्पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ६ ॥ स वा ऽएष पुरुषमेधः पञ्चरात्रो यज्ञ-

(१) शु० य० सं० २१. ५ ।

(२) 'ग' 'ज' पुस्तकयोः "एकादशाग्निषोमीयाः" इति पाठो दृश्यते, स तु प्रामादिक एव, 'ईदग्नेः सोमवरुणयोः' (पा० ६. ३. २७) इति सूत्रेण—ईद्विधानात् ।

† का० श्रौ० सू० २१. १. ५ ।

क्रतुर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्त्तवः सँव-त्सरो यश्चिकश्च पञ्चविधमधिदेवतमध्यात्मन्तदेनेन सर्व-माप्नोति ॥ ७ ॥ तस्याग्निष्टोमः प्रथममहर्भवति । अथोक्थ्योऽथातिरात्रोऽथोक्थ्योऽथाग्निष्टोमः स वा ऽएष ऽउभयतोज्योतिरुभयतऽउक्थ्यः ॥ ८ ॥ यवमध्यः पञ्चरात्रो भवति । इमे वै लोकाः पुरुषमेध ऽउभयतो-ज्योतिषो वा ऽइमे लोका ऽअग्निनेत ऽआदित्येनामुतस्त-स्मादुभयतोज्योतिरन्नमुक्थ्य ऽआत्मातिरात्रस्तयुदेता ऽउ-क्थ्यावतिरात्रमभितो भवतस्तस्मादयमात्मान्नेन परि-वृढोऽथ यदेष वर्षिष्ठोऽतिरात्रोऽहन्नाथं स मध्ये तस्मा-द्यवमध्यो युते ह वै द्विषन्तम्भ्रातृव्यमयमेवास्ति नास्य द्विषन्भ्रातृव्य ऽइत्याहुर्य्य ऽएवं वेद ॥ ९ ॥ तस्याय-मेव लोकः प्रथममहः । अयमस्य लोको वसन्त ऽऋ-तुर्य्यदूर्द्ध्वमस्मात्लोकादर्वाचीनमन्तरिक्षात्तद्द्वितीयमहस्तद्वस्य ग्रीष्मः ऽऋतुरन्तरिक्षमेवास्य मध्यममहरन्तरिक्षमस्य वर्षाशरदावृतू यदूर्द्ध्वमन्तरिक्षादर्वाचीनन्दिवस्तच्चतुर्थमह-स्तद्वस्य हेमन्त ऽऋतुर्द्यौरेवास्य पञ्चममहर्द्यौरस्य शिशिर ऽऋतुरित्यधिदेवतम् ॥ १० ॥ अथाध्यात्मम् । प्रतिष्ठै-वास्य प्रथममहः प्रतिष्ठा ऽअस्य वसन्त ऽऋतुर्य्यदूर्द्ध्व-म्प्रतिष्ठाया ऽअवाचीनम्मध्यात्तद्द्वितीयमहस्तद्वस्य ग्रीष्मः ऽऋतुर्म्मध्यमेवास्य मध्यममहर्म्मध्यमस्य वर्षाशरदावृतू यदूर्द्ध्वम्मध्यादवाचीनः शीर्ष्णस्तच्चतुर्थमहस्तद्वस्य हेमन्त ऽऋतुः शिर ऽएवास्य पञ्चममहः शिरोऽस्य शिशिर ऽऋतु-

रेवमिमे च लोकाः सँवत्सरश्चात्मा च पुरुषमेधमभिसम्पद्यन्ते सर्वं वा ऽइमे लोकाः सर्वः सँवत्सरः सर्वमात्मा सर्वम्पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै ॥ ११ ॥

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

[ब्राह्मणादीनामष्टाचत्वारिंशत्संख्यकानामग्निष्टे यूपे नियोजनादि]

अथ यस्मात्पुरुषमेधो नाम । इमे वै लोकाः पूरयमेव पुरुषो योऽयम्पवते सोऽस्याम्पुरि शेते तस्मात्पुरुषस्तस्य यदेषु लोकेष्वन्नन्तदस्यान्नम्मेधस्तद्यदस्यैतदन्नम्मेधस्तस्मात्पुरुषमेधोऽथो यदस्मिन्नम्मेद्धयान्पुरुषानालभते तस्माद्वेव पुरुषमेधः ॥ १ ॥ ताञ्वै मद्धयमेऽहन्नालभते । अन्तरिक्षं वै मद्धयममहरन्तरिक्षमु वै सर्वेषाम्भूतानामायतनमथो ऽअन्नं वा ऽएते पशव ऽउदुरम्मद्धयममहरुदुरे तदुन्नन्दधाति ॥ २ ॥ ताञ्वै दुश दशालभते । दुशाक्षरा विराड्विराडु कृत्स्नमन्नङ्कृत्स्नस्यैवान्नाद्यस्यावरुद्ध्यै ॥ ३ ॥ एकादश दशत ऽआलभते । एकादशाक्षरा त्रिष्टुब्वज्जस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानो मद्धयतः पाप्मानमपहते ॥ ४ ॥ अष्टाचत्वारिꣳशतम्मद्धयमे यूप ऽआलभते । अष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुन्द्धे ॥५॥ एकादशैकादशेतरेषु । एकादशाक्षरा त्रिष्टुब्वज्जस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानोऽभितः पाप्मानमपहते ॥ ६ ॥ अष्टा ऽउत्तमानालभते । अष्टाक्षरा गायत्री ब्रह्म गायत्री तद्ब्रह्मैवैतदस्य

सर्वस्योत्तमङ्करोति तस्माद्ब्रह्मास्य सर्वस्योत्तममित्याहुः ॥ ७ ॥ ते वै प्राजापत्या भवन्ति । ब्रह्म वै प्रजापतिर्ब्राह्मो हि प्रजापतिस्तस्मात्प्राजापत्या भवन्ति ॥ ८ ॥ स वै पशूनुपाकरिष्यन् * । एतास्तिस्रः सावित्रीराहुतीर्जुहोति 'देव सवितस्तत्सवितुर्वरेण्यं विश्वानि देव सवित'रिति सवितारम्प्रीणाति सोऽस्मै प्रीत ऽएतान्पुरुषान्प्रसौति तेन प्रसूतानालभते ॥ ९ ॥ ब्रह्मणे ब्राह्मणमालभते । ब्रह्म वै ब्राह्मणो ब्रह्मैव तद्ब्रह्मणा समर्द्धयति क्षत्राय राजन्यं क्षत्रं वै राजन्यः क्षत्रमेव तत्क्षत्रेण समर्द्धयति मरुद्भ्यो वैश्यं विशो वै मरुतो विशमेव तद्विशा समर्द्धयति तपसे शूद्रन्तपो वै शूद्रस्तप ऽएव तत्तपसा समर्द्धयत्येवमेता देवता यथारूपम्पशुभिः समर्द्धयति ता ऽएनꣳ समृद्धाः समर्द्धयन्ति सर्वैः कामैः ॥ १० ॥ आज्येन जुहोति । तेजो वा ऽआज्यन्तेजसैवास्मिँस्तत्तेजो दधात्याज्येन जुहोत्येतद्वै देवानाम्प्रियन्धाम यदाज्यम्प्रियेणैवैनान्धाम्ना समर्द्धयति त ऽएनꣳ समृद्धाः समर्द्धयन्ति सर्वैः कामैः ॥ ११ ॥ नियुक्तान्पुरुषान् । ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपा'दित्येतेन षोडशर्चेन षोडशकलं वा ऽइदꣳ सर्वꣳ सर्वम्पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्या ऽइत्थमसीत्थमसीत्युपस्तौत्येवैनमेतद्ब्रह्मणा समर्द्धयत्येवाथो यथैष तथैनमेतदाह

* 'पशूनुपाकरिष्यन्नतिरात्रेण देव सवितरिति प्रत्यृचं जुहोति (का० श्रौ० सू० २१. १. ६) इति ।

(१) शु० य० स० ३०. १-३ । (२) शु० य० स० ३१. १ ।

तत्पुर्य्यग्निकृताः पशवो बभूवुरसंज्ञप्ताः ॥ १२ ॥ अथ हैनं वाग्भ्युवाद । पुरुष मा सन्तिष्टिपो यदि सꣳस्थापयिष्यसि पुरुष ऽएव पुरुषमत्स्यतीति ताꣳपुर्य्यग्निकृतानेवोदसृजत्तद्देवत्या ऽआहुतीरजुहोत्ताभिस्ता देवता ऽअप्रीणात्ता ऽएनम्प्रीता ऽअप्रीणन्त्सर्वैः कामैः ॥ १३ ॥ आज्येन जुहोति । तेजो वा ऽआज्यन्तेजसैवास्मिँस्तत्तेजो दधाति ॥ १४ ॥ ऐकादशिनैः सꣳस्थापयति । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानो मध्यतः[1] पाप्मानमपहते ॥ १५ ॥ उदयनीयायाꣳ सꣳस्थितायाम् । एकादश वशा ऽअनूबन्ध्या ऽआलभते मैत्रावरुणीर्वैश्यदेवीर्ब्बार्हस्पत्या ऽएतासान्देवतानामाप्त्यै तद्यद्बार्हस्पत्या ऽअन्त्या भवन्ति ब्रह्म वै बृहस्पतिस्तद्ब्रह्मण्येवान्ततः प्रतितिष्ठति ॥ १६ ॥ अथ यदेकादश भवन्ति । एकादशाक्षरा त्रिष्टुब्वज्रस्त्रिष्टुब्वीर्य्यन्त्रिष्टुब्वज्रेणैवैतद्वीर्य्येण यजमानोऽन्ततः पाप्मानमपहते त्रैधातव्युदवसानीयासावेव बन्धुः ॥ १७ ॥ अथातो दक्षिणानाम् । मध्यम्प्रति राष्ट्रस्य यदन्यद्भूमेश्च ब्राह्मणस्य च वित्तात्सपुरुषम्प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यद्ध्वर्योरुदीच्युद्गातुस्तदेव होतृका ऽअन्वाभक्ताः ॥१८॥ अथ यदि ब्राह्मणो यजेत । सर्ववेदसन्दद्यात्सर्वं वै ब्राह्मणः सर्वः सर्ववेदसः सर्वम्पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै

(१) 'ग' 'ज' पुस्तकयोः "मथ्यतः" इति पाठः ।

॥१९॥ अथात्मन्नग्नी समारोह्य *। उत्तरनारायणेनादित्यमुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात्तदेव मनुष्येभ्यस्तिरो भवति यद्यु ग्रामे विवत्सेदरण्योरग्नी समारोह्योत्तरनारायणनैवादित्यमुपस्थाय † गृहेषु प्रत्यवस्येदथ तान्यज्ञक्रतूनाहरेत यानभ्याप्नुयात्स वा ऽएष न सर्वस्मा ऽअनुवक्तव्यः सर्वः हि पुरुषमेधो नेत्सर्वस्मा ऽइव सर्वम्ब्रवाणीति यो न्वेव ज्ञातस्तस्मै ब्रूयादथ योऽनूचानोऽथ योऽस्य प्रियः स्यान्नेत्त्वेव सर्वस्मा ऽइव ॥ २० ॥

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥

[सर्वमेधः]

ब्रह्म वै स्वयम्भु तपोऽतप्यत। तदैक्षत न वै तपस्यानन्त्यमस्ति हन्ताहम्भूतेष्वात्मानञ्जुहवानि भूतानि चात्मनीति तत्सर्वेषु भूतेष्वात्मानः हुत्वा भूतानि चात्मनि सर्वेषाम्भूतानाञ्च श्रैष्ठ्यञ्च स्वाराज्यमाधिपत्यम्पर्य्यैत्तथैवैतद्यजमानः सर्वमेधे सर्वान्मेधान्हुत्वा सर्वेषाम्भूतानाञ्च

* का० श्रौ० सू० २१. १. १७। 'गार्हपत्येऽधरारणिमनुप्रहृत्याहवनीय उत्तरारणिमात्मन्यग्नी समारोप्यारण्यं व्रजेत्' इति शाङ्खायनोक्तिः। तथा च मनुः 'आत्मन्यग्निं समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्' (मनु० ६. ३८) इति।

'त्रैधातव्यन्ते समारोह्यात्मन्नग्नी सूर्यमुपस्थायादभ्यः सम्भृत इत्यनुवा केनानपेक्षमाणोऽप्यं गत्वा न प्रत्यवेयात्' 'ग्रामे वा विवत्समन्नरण्यो' (का० श्रौ० सू० २१। १। १७-१८) इति कात्यायनोक्तिः।

(१) "अद्भ्यः सम्भृतः" इत्यादिषण्णां कण्डिकानामुत्तरनारायणमिति संज्ञा।

(२) 'ग' 'ज' पुस्तकयोः 'सर्व्वेषाम्भूतानाम्' इत्यस्य स्थाने 'सर्व्वाणि भूतानि' इति पाठः समुपलभ्यते।

श्रैष्ठ्यꣳ स्वाराज्यमाधिपत्यम्पर्येति ॥ १ ॥ स वा ऽएष सर्वमेधो दशरात्रो यज्ञक्रतुर्भवति । दशाक्षरा विराड्विराडु कृत्स्नमन्नङ्कृत्स्नस्यैवान्नाद्यस्यावरुद्धयै तस्मिन्नग्निम्पराद्धर्यञ्चिनोति परमो वा ऽएष यज्ञक्रतूनां यत्सर्वमेधः परमेणैवैनम्परमताङ्गमयति ॥ २ ॥ तस्याग्निष्टुदग्निष्टोमः प्रथममहर्भवति । अग्निर्वा ऽअग्निष्टुदग्निष्टोमोऽग्निमुखा ऽउ वै सर्वे देवाः सर्वेषान्देवानामाप्त्यै तस्याग्नेया ग्रहा भवन्त्याग्नेयः पुरोरुचः सर्वमाग्नेयमसदिति ॥ ३ ॥ इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति । इन्द्रो वै सर्वे देवाः सर्वेषान्देवानामाप्त्यै तस्यैन्द्रा ग्रहा भवन्त्यैन्द्र्यः पुरोरुचः सर्वमैन्द्रमसदिति ॥ ४ ॥ सूर्यस्तुदुक्थ्यस्तृतीयमहर्भवति । सूर्यो वै सर्वे देवाः सर्वेषान्देवानामाप्त्यै तस्य सौर्या ग्रहा भवन्ति सौर्यः पुरोरुचः सर्वꣳ सौर्यमसदिति ॥ ५ ॥ वैश्वदेवश्चतुर्थमहर्भवति । विश्वे वै सर्वे देवाः सर्वेषान्देवानामाप्त्यै तस्य वैश्वदेवा ग्रहा भवन्ति वैश्वदेव्यः पुरोरुचः सर्वं वैश्वदेवमसदिति ॥ ६ ॥ आश्वमेधिकम्मद्ध्यमम्पञ्चममहर्भवति । तस्मिन्नश्वम्मेद्ध्यमालभतेऽश्वमेधस्यैवाप्त्यै ॥ ७ ॥ पौरुषमेधिकम्मद्ध्यमꣳ षष्ठमहर्भवति । तस्मिन्मेद्ध्यान्पुरुषानालभते पुरुषमेधस्यैवाप्त्यै ॥ ८ ॥ अप्तोर्यामꣳ सप्तममहर्भवति । सर्वेषां यज्ञक्रतूनामाप्त्यै तस्मिन्त्सर्वान्मेद्ध्यानालभते यच्च प्राणि यच्चाप्राणं वपा वपावताऽजुहोति

(१-२) 'ग' 'ज' पुस्तकयोः 'तस्य' इति पाठो नोपलभ्यते ।

त्वच ऽउत्कर्त्तमवपाकानाꣳ संव्व्रश्चमोषधिवनस्पतीनाम्प्र-किरन्ति शुष्काणाश्चार्द्राणाश्चान्नमन्नꣳहोत्र्यन्नस्यान्नस्याप्त्यै सर्व्वꣳहोति सर्व्वस्मै जुहोति सर्व्वस्याप्त्यै सर्व्वस्यावरुद्ध्यै प्रातःसवने हुतासु वपास्वेवमेव तृतीयसवने हुतेषु हविःषु ॥ ९ ॥ त्रिणवमष्टममहर्भवति । वज्रो वै त्रिणवो वज्रेण खलु वै क्षत्रꣳ स्पृतन्तद्वज्रेणैव क्षत्रꣳ स्पृणोति ॥ १० ॥ त्रयस्त्रिꣳशन्नवममहर्भवति । प्रतिष्ठा वै त्रय-स्त्रिꣳशः प्रतिष्ठित्यै ॥ ११ ॥ विश्वजित्सर्व्वपृष्ठोऽति-रात्रो दशममहर्भवति । सर्व्वं वै विश्वजित्सर्व्वपृष्ठोऽति-रात्रः सर्व्वः सर्व्वमेधः सर्व्वस्याप्त्यै सर्व्वस्यावरुद्ध्यै ॥ १२ ॥ अथातो दक्षिणानाम् । मद्ध्यम्प्रति राष्ट्रस्य यदन्यद्ब्रा-ह्मणस्य वित्तात्सभूमि सपुरुषम्प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्य्योरुदीच्युद्गातुस्तदेव होतृका ऽअन्वाभक्ताः ॥ १३ ॥ तेन हैतेन विश्वकर्म्मा भौवन ऽईजे । तेनेष्ट्वात्यतिष्ठत्सर्व्वाणि भूतानीदꣳ सर्व्वमभवदति-तिष्ठति सर्व्वाणि भूतानीदꣳ सर्व्वम्भवति य ऽएवं विद्वा-न्त्सर्व्वमेधेन यजते यो वैतदेवं वेद ॥ १४ ॥ तꣳ ह कश्यपो याजयाञ्चकार । तदपि भूमिः श्लोकꣳगौ न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्म्मन्भौवन मन्दु ऽआसिथ ॥ उपमङ्क्ष्यति स्या सलिलस्य मद्ध्ये मृषैष ते सङ्करः कश्यपायेति ॥ १५ ॥

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

[ब्राह्मणचतुष्टयेन पितृमेधनिरूपणम्]

* अथास्मै श्मशानङ्कुर्वन्ति । गृहान्वा प्रज्ञानं वा यो वै कश्च म्रियते स शवस्तस्मा ऽएतदुन्नङ्करोति तस्माच्छवान्नः शवान्नः ह वै तच्छ्मशानमित्याचक्षते परोक्षꣳ श्मशा ऽउ हैव नाम पितॄणामत्तारस्ते हामुष्मिँल्लोकेऽकृतश्मशानस्य साधुकृत्यामुपदम्भयन्ति तेभ्य ऽएतदुन्नङ्करोति तस्माच्छ्मशान्नꣳ श्मशान्नः ह वै तच्छ्मशानमित्याचक्षते परोऽक्षम् ॥ १ ॥ तद्वै न क्षिप्रङ्कुर्य्यात् । नेन्नवमघङ्करवाणीति चिर ऽएव कुर्य्यादघमेव तत्तिरः करोति यत्र समा नानु चन स्मरेयुरश्रुतिमेव तदघङ्गमयति यद्यनुस्मरेयुः ॥ २ ॥ अयुङ्नेषु सँवत्सरेषु कुर्य्यात् । अयुङ्नः हि पितॄणामेकनक्षत्र ऽएकनक्षत्रः हि पितॄणाममावास्यायाममावास्या वा ऽएकनक्षत्रमेको हि यद्वेताꣳ रात्रिः सर्वाणि भूतानि सँवसन्ति तेनो तङ्काममाप्नोति यः सर्वेषु नक्षत्रेषु ॥ ३ ॥ शरदि कुर्य्यात् । स्वधा वै शरत्स्वधो वै पितॄणामन्नन्तदेनमन्ने स्वधायान्दधाति माघे वा मा नोऽघमभूदिति निदाघे वा नि नोऽघन्धीयाता ऽइति ॥४॥ [अर्धप्रपाठकः ॥५०॥] चतुःस्रक्ति । देवाश्चासुराश्चोभये प्राजापत्या दिक्ष्वस्पर्द्धन्त ते देवा ऽअसुरान्सपत्नान्भ्रातृव्यान्दिग्भ्योऽनुदन्त तेऽदिक्काः पराभवँस्तस्माद्या दैव्यः प्रजा-

* अत्राध्यायारम्भे 'अथास्मै कल्याणङ्कुर्वन्ति' इत्यधिकः पाठः 'ग' 'ज' पुस्तकयोरुपलभ्यते । स तु प्रामादिक एव प्रतीयते, प्राचीनतमहस्तलिखितपुस्तकेष्वदर्शनात् ।

इच्चतुःस्रक्तीनि ताः श्मशानानि कुर्वन्तेऽथ या ऽआसुर्यः प्राच्च्यास्त्वय्ये स्त्वत्परिमण्डलानि तेऽनुदन्त ह्येनान्दिग्भ्य ऽउभे दिशावन्तरेण व्रिदधाति प्राचीश्च दक्षिणाश्चैतस्याꣳ ह दिशि पितृलोकस्य द्वारन्द्वारैवैनम्पितृलोकम्प्रपादयति स्रक्तिभिर्दिक्षु प्रतितिष्ठतीतरेणात्मनावान्तरदिक्षु तदेनꣳ सर्वासु दिक्षु प्रतिष्ठापयति ॥ ५ ॥ अथातो भूमिजोषणस्य । उदीचीनप्रवणे करोत्युदीची वै मनुष्याणान्दिक्तदेनम्मनुष्यलोक ऽआभजत्येतद्ध वै पितरो मनुष्यलोक ऽआभक्ता भवन्ति यदेषाम्प्रजा भवति प्रजा हास्य श्रेयसी भवति ॥ ६ ॥ दक्षिणाप्प्रवणे * कुर्य्यादित्याहुः । दक्षिणाप्प्रवणो वै पितृलोकस्तदेनम्पितृलोक ऽआभजतीति न तथा कुर्य्यादामीवद्ध नाम तच्छ्मशानकरणङ्क्षिप्रे हैषामपरोऽनुप्रैति ॥ ७ ॥ दक्षिणाप्प्रवणस्य प्रत्यर्षे कुर्य्यादित्यु हैक ऽआहुः । तत्प्रत्युच्छ्रितमघम्भवतीति नो ऽएव तथा कुर्य्यायद्वा ऽउदीचीनप्रवणे करोति तदेव प्रत्युच्छ्रितमघम्भवति ॥ ८ ॥ यस्यैव समस्य सतः । दक्षिणतः पुरस्तादुाप ऽएत्य सꣳस्थायाप्रग्घत्य ऽएतान्दिशमभिनिष्पद्याक्षय्या ऽआपोऽपिपद्येरँस्तत्कुर्य्यादुन्नं वा ऽआपोऽन्नाद्यमेवास्मा ऽएतत्परस्तात्प्रत्युद्दधात्यमृतमु वा ऽआप ऽएषो ह जीवानान्दिगन्तरेण सप्तऽर्षीणाञ्चोदयनमादित्यस्य चास्तमयनममृतमेव तज्जीवेषु दधाति तद्धैतत्प्रतिमीवन्नाम श्मशानकरणꣳजीवेभ्यो हितं स्यद्वाव

* 'दक्षिणाप्रवण एके' (का० श्रौ० सू० २१. ३. १७)।

जीवेभ्यो हितन्तृप्तिभ्यः ॥ ९ ॥ कम्वति * कुर्य्यात् । कम्मेऽसदित्यथो शम्वति शम्मेऽसदिति नाधिपथङ्कुर्य्यान्नाकाशे नेदाविरघङ्करवाणीति ॥ १० ॥ गुहा सदवतापि स्यात् । तद्यद्गुहा भवत्यघमेव तद्गुहा करोत्यथ यदवताप्यसौ वा ऽआदित्यः पाप्मनोऽपहन्ता स ऽएवास्मात्पाप्मानमपहन्त्यथो ऽआदित्यज्योतिषमेवैनङ्करोति ॥११॥ न तस्मिन्नन्कुर्य्यात् । यस्येत्थादनूकाशः स्याद्याचमानहः ह नाम तक्षिप्प्रे हैषामपरोऽनुप्प्रैति ॥ १२ ॥ चित्रम्पश्चात्स्यात् । प्रजा वै चित्रश्चित्रः हास्य प्रजा भवति यदि चित्रन्न स्यादुपः पश्चाद्वोत्तरतो वा स्युरापो ह्येव चित्रश्चित्रः हैवास्य प्रजा भवति ॥ १३ ॥ ऊषरे करोति । रेतो वा ऽऊषाः प्रजननन्तदेनम्प्रजनन ऽआभजत्येतद्ध वै पितरः प्रजनन ऽआभक्ता भवन्ति यदेषाम्प्रजा भवति प्रजा हास्य श्रेयसी भवति ॥ १४ ॥ समूले समूलः हि पितृणां वीरिणमिश्र ऽएतद्धास्याः पित्र्यमनतिरिक्तमथो ऽअघमेव तद्वद्धू करोति ॥ १५ ॥ न भूमिपाशमभिविदद्ध्यात् । न शरन्नाश्मगन्धान्नाद्ध्याण्डान्न पृश्निपर्ण्यान्नाश्वत्थस्यान्तिकङ्कुर्य्यान्न विभीतकस्य न तिल्वकस्य न स्फूर्ज्जकस्य न हरिद्रोर्न्न न्यग्रोधस्य ये चान्ये पापनामानो मङ्क्लोपेप्सया नाम्नामेव परिहाराय ॥ १६ ॥ अथात ऽआवृदेव । अग्निविधयाग्निचितः श्मशानङ्करोति

* 'शम्वति कम्वति वा' (का० श्रौ० सू० २१. ३. २२.) इति ।

(१) 'वीरिणमिश्रमेतद्धास्या.' इति 'ग' पुस्तके । 'वीरिणमिश्रमेतमेतद्धास्याः' इति च 'ञ' पुस्तके ।

यद्वै यजमानोऽग्निश्चिनुतेऽमुष्मै तल्लोकाय यज्ञेनात्मानꣳ संस्कुरुत ऽएतदु ह यज्ञियङ्कर्म्मासꣳस्थितमा श्मशानकरणात्तद्यदग्निविधयाग्निचितꣳ श्मशानङ्करोत्यग्निचित्यामेव तत्सꣳस्थापयति ॥१७॥ तद्वै न महत्कुर्य्यात् । नेन्महद्घङ्करवाणीति यावानपक्षपुच्छोऽग्निस्तावत्कुर्य्यादित्यु हैक ऽआहुः समानो ह्यस्यैष ऽआत्मा यथैवाग्नेस्तथेति ॥ १८ ॥ पुरुषमात्रन्त्वेव कुर्य्यात् । तथापरस्मा ऽअवकाशन्न करोति पश्चाद्वरीयः प्रजा वै पश्चात्प्रजामेव तद्वरीयसीङ्कुरुत ऽउत्तरतो वर्षीयः प्रजा वा ऽउत्तराः प्रजामेव तद्वर्षीयसीङ्कुरुते तद्विधायापसलविसृष्टाभि स्पन्याभिः पर्य्यातनोत्यपसलवि पित्र्यꣳ हि कर्म्म ॥ १९ ॥ अथोद्धन्तवा ऽआह । स यावत्येव निवप्स्यन्स्यात्तावदुद्धन्न्यात्पुरुषमात्रन्त्वेवोद्धन्न्यात्तथापरस्मा ऽअवकाशन्न करोत्यथो ऽओषधिलोको वै पितर ऽओषधीनाꣳ ह मूलान्युपसर्पन्त्यथो नेदस्या ऽअन्तर्हितोऽसदिति ॥ २० ॥

अष्टमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

अन्तर्द्धायो हैके निवपन्ति । देवाश्चासुराश्चोभये प्राजापत्या ऽअस्मिँल्लोकेऽस्पर्द्धन्त ते देवा ऽअसुरान्त्सपत्नान्भ्रातृव्यानस्माल्लोकादनुदन्त तस्माद्या दैव्यः प्रजा ऽअनन्तर्हितानि ताः श्मशानानि कुर्वतेऽथ या ऽआसुर्यः प्राच्यास्वेव त्वदन्तर्हितानि ते चम्वान्त्वद्यस्मिँस्त्वत् ॥ १ ॥ अथैनत्परिश्रिन्त्रिः परिश्रयति ।

षा ऽएवामूः परिश्रिश्रतस्ता ऽएता यजुषा ताः परिश्रयति तूष्णीमिमा दैवश्चैव तत्पित्र्यश्च व्याकरोत्यपरिमिताभिरपरिमितो ह्यसौ लोकः ॥ २ ॥ अथैनत्पलाशशाखया व्युदूहति * । यदेवादो व्युदूहनन्तदेत'दुपेतो यन्तु पणयोऽसुम्ना देवपीयव, ऽइति पणीनेवैतदसुम्नान्देवपीयूनसुररक्षसाञ्यस्माल्लोकादुपह'न्त्यस्य लोकः सुतावत' ऽइति सुतवान्हि य ऽईजानो 'द्युभिरहोभिरक्तुभिर्व्यक्त'मिति तदेनमृतुभिश्चाहोरात्रैश्च सलोकङ्करोति ॥ ३ ॥ 'यमो ददात्ववसानमस्मा' ऽइति । यमो ह वा ऽअस्यामवसानस्येष्टे तमेवास्मा ऽअस्यामवसानं ग्याचति तान्दक्षिणोदस्यत्युदगितरान्दैवश्चैव तत्पित्र्यश्च व्याकरोति ॥ ४ ॥ अथ दक्षिणतः सीरं ग्युनक्ति । उत्तरत ऽइत्यु हैक ऽआहुः स यथा कामयेत तथा कुर्ग्याद्युङ्क्तेति सम्प्रेष्याभिमन्त्रयते 'सविता ते शरीरेभ्यः पृथिव्याँल्लोकमिच्छत्वि'ति सवितैवास्यैतच्छरीरेभ्यः पृथिव्याँल्लोकमिच्छति 'तस्मै युज्यन्तामुस्रिया' ऽइत्येतस्मा ऽउ हि कर्म्मण ऽउस्रिया युज्यन्ते ॥ ५ ॥ षड्गवम्भवति । षडृतवः सँवत्सर ऽऋतुष्वेवैनमेतत्सँवत्सरे प्रतिष्ठाया म्प्रतिष्ठापयति तदपसलवि पर्य्याहृत्योत्तरतः प्रतीचीम्प्रथमाꣳ सीताङ्कृषति 'वायुः पुनात्वि'ति 'सविता

* का० श्रौ० सू० २१. १. ११ ।

(१) शु० य० सं० ३५. १ । (२) शु० य० सं० ३५. १ । (३) शु० य० ३५. १ । (४) शु० य० सं० ३५. १ । (५) शु० य० सं० ३५. २ । (६) शु० य० सं० ३५. २ । (७) शु० य० सं० ३५. ३ । (८) शु० य० सं० ३५. ३ ।

पुनात्वि'ति जघनार्द्धेन दक्षिणा'ग्नेर्भ्राजसे'ति दक्षिणार्द्धेन प्राचीꣳ 'सूर्य्यस्य वर्च्चसे'त्युग्नेणोदीचीम् ॥ ६ ॥ * व्रतस्रꣳ सीता यजुषा कृषति † । तद्यद्व्रतसृषु दिक्ष्वन्नन्तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तद्वै यजुषाद्धा वै तद्यद्यजुरद्धो तद्यदिमा दिशः ॥ ७ ॥ अथात्मानं विकृषति । तद्यदेव सँवत्सरेऽन्नन्तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तूष्णीमपरिमिताभिरपरिमितो ह्यसौ लोकः ॥ ८ ॥ अथैनद्विमुञ्चति । कृत्वा तत्कर्म्म यस्मै कर्म्मण ऽएनद्युङ्क्ते 'विमुच्यन्तामुस्रिया' ऽइत्येतस्मा ऽउ हि कर्म्मण ऽउस्रिया युज्यन्ते तद्दक्षिणोदस्यत्युदगितरद्वै वश्चैव तत्पितृभ्यश्च व्याकरोति॥९॥

अष्टमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

—०—

अथ सर्व्वौषधं वपति । यदेवादः सर्व्वौषधन्तदेतद्बह्वीभिस्तद्रूपत्येकयेदन्दैवश्चैव तत्पितृभ्यश्च व्याकरो'त्यश्श्वत्थे वो निषदनम्पर्णे वो वसतिष्कृते'ति ज्योग्जीवातुमेवैभ्य ऽएतद्दाशास्ते तथो हैषामेकैकोऽपरो जरसानुप्प्रैति ॥ १ ॥ अथैनन्निवपति । इयं वै पृथिवी प्रतिष्ठास्यामेवैनमेतत्प्रतिष्ठायाम्प्रतिष्ठापयति पुरादित्यस्योदयात्तिर ऽइव वै पितरस्तिर ऽइव रात्रिस्तिर ऽएव तत्करोति यथा कुर्व्वतोऽभ्यु-

(१) शु० य० सं० १५. १। (२) शु० य० सं० १५. २

* अत्र शतम् ६८००।

† का० श्रौ० सू० २१. ४. १।

(३) शु० य० सं० १५. ३।(४) शु० य० सं० १५. ४।

दियात्तदेनमुभयोरहोरात्रयोः प्रतिष्ठापयति ॥२॥ 'सविता[1] ते शरीराणि। मातुरुपस्थ आवपत्वि'ति सवितैवास्यैतच्छरीराण्यस्यै पृथिव्यै मातुरुपस्थ आवपति 'तस्यै[2] पृथिवि शम्भवे'ति यथैवास्मा इयः शꣳ स्यादेवमेतदाह 'प्रजापतौ[3] त्वा देवतायामुपोदके लोके निदधाम्यसा'विति नाम गृह्णात्ययं वै लोक उपोदकस्तदेनम्प्रजापतौ देवतायामुपोदके लोके निदधाति ॥ ३ ॥ अथ कञ्चिदाह। एतान्दिशमनवानन्त्स्तत्वा कुम्भम्प्रक्षीयानपेक्षमाण एहीति तत्र जपति 'परम्मृत्यो[4] अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरा'निति ज्योग्जीवातुमेवैभ्य एतदाशास्ते तथो हैषामेकैकोऽपरो जरसानुप्रैति ॥ ४ ॥ अथैनं यथाकङ्कल्पयति। 'शं वातः[5] शः हि ते घृणिः शन्ते भवन्त्विष्टकाः॥ शन्ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन्' ॥ 'कल्पन्तान्ते[6] दिशस्तुभ्यमापः शिवतमास्तुभ्यम्भवन्तु सिन्धवः ॥ अन्तरिक्षः शिवन्तुभ्यङ्कल्पन्तान्ते दिशः सर्वा' इत्येतदेवास्मै सर्वङ्कल्पयत्येतदस्मै शिवङ्करोति ॥ ५ ॥ अथ त्रयोदश पादमात्र्य इष्टका अलक्षणाः कृता भवन्ति। या एवामूरग्नाविष्टकास्ता एता यजुषा ता उपदधाति तूष्णीमिमा दैवश्चैव तत्पित्र्यश्च व्याकरोति ॥ ६ ॥ त्रयोदश भवन्ति। त्रयोदश मासाः

(१) शु० य० सं० १५. ५। (२) शु० य० सं० १५. ५। (३) शु० य० सं० १५. ६। (४) शु० य० सं० १५. ७। (५) शु० य० सं० १५. ८। (६) शु० य० सं० ५१. ९।

सँवत्सर ऽऋतुष्वेवैनमेतत्सँवत्सरे प्रतिष्ठायाम्प्रतिष्ठापयति ॥ ७ ॥ पादमात्र्यो भवन्ति । प्रतिष्ठा वै पादः प्रतिष्ठामेवास्मै करोत्यलक्षणा भवन्ति तिर ऽइव वै पितरस्तिर ऽइव तद्यदलक्षणन्तिर ऽएव तत्तिरः करोति ॥ ८ ॥ तासामेकाम्मध्ये प्राचीमुपदधाति । स ऽआत्मा तिस्रः पुरस्तान्मूर्द्धसदःहितास्तच्छिरस्तिस्रो दक्षिणतः स दक्षिणः पक्षस्तिस्र ऽउत्तरतः स ऽउत्तरः पक्षस्तिस्रः पश्चात्तत्पुच्छः सोऽस्यैष पक्षपुच्छवानात्मा यथैवाग्नेस्तथा ॥ ९ ॥ अथ प्रदरात्पुरीषमाहर्त्तवा ऽआह । एतद्वास्याः पित्र्यमनतिरिक्तमथो ऽअघमेव तद्वृङ्क्ते करोत्यस्मिन्नु हैकेऽवान्तरदेशे कर्षूङ्कृत्वा ततोऽभ्याहारङ्कुर्वन्ति परिकृषन्त्यु हैके दक्षिणतः पश्चादुत्तरतस्ततोऽभ्याहारङ्कुर्वन्ति स यथा कामयेत तथा कुर्य्यात् ॥ १० ॥ तद्वै न महत्कुर्य्यात् । नेन्महद्घङ्करवाणीति यावानुद्बाहुः पुरुषस्तावत्क्षत्रियस्य * कुर्य्यान्मुखदग्घम्ब्राह्मणस्योपस्थदग्घꣳ स्त्रिया ऽऊरुदग्घं वैश्यस्याष्ठीवद्दग्घः शूद्रस्यैवं वीर्य्या ह्येत ऽइति ॥ ११ ॥ अधोजानु त्वेव कुर्य्यात् । तथापरस्मा ऽअवकाशन्न करोति तस्य क्रियमाणस्य तेजनीमुत्तरतो धारयन्ति प्रजा ह सा प्रजामेव तदुत्तरतो धारयन्ति तान्न न्यस्येद्धृत्वा वैनामूद्वा वा गृहेषूच्छ्रयेत्प्रजामेव तद्गृहेषूच्छ्रयति ॥ १२ ॥ कृत्वा यवान्न्वपति । अघम्मे यवयानित्यवकाभिः प्रच्छादयति कम्मेऽसदिति दर्भैः प्रच्छादयत्यरूक्षतायै ॥ १३ ॥

अष्टमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

अथैनञ्छङ्कुभिः परिणिहन्ति । पालाशम्पुरस्ताद्ब्रह्म वै पलाशो ब्रह्मपुरोगवमेवैनꣳ स्वर्गꣳलोकङ्गमयति शमी मयमुत्तरतः शम्मेऽसदिति वारणम्पश्चाद्घम्मे वारयाता ऽइति व्वृत्रशङ्कुन्दक्षिणतोऽघस्यैवानत्ययाय ॥ १ ॥ अथ दक्षिणतः परिवक्रे खनन्ति । ते क्षीरेण चोदकेन च पूरयन्ति ते हैनममुष्मिँल्लोकेऽक्षिते कुल्ल्ये ऽउपधावतः सप्सोत्तरतस्ता ऽउदकेन पूरयन्ति न ह वै सप्त स्रवन्ती रघमत्येतुमर्हत्यघस्यैवानत्ययाय ॥ २ ॥ अश्मनस्त्रीꣳस्त्रीन्प्र किरन्ति । ता ऽअभ्युत्तरन्त्य'श्मन्न्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः ॥ अत्रा जहीमोऽशिवा ये ऽअसञ्छिवान्वयमुत्तरेमाभि वाजा'नीति यथैव यजुस्तथा वन्धुः ॥ ३ ॥ अपामार्ग्गैरपमृजते । अघमेव तदुपमृजतेऽ 'पाघमप किल्विषमप कृत्यामपो रपः ॥ अपामार्ग स्वमस्मदुप दुःष्वप्न्यꣳ सुवे'ति यथैव यजुस्तथा वन्धुः ॥ ४ ॥ यत्रोदकम्भवति तत्स्नान्ति । 'सुमित्रिया न ऽआप ऽओषधयः सन्तु'र्त्यञ्जलिनाप ऽउपाचति वज्रो वा ऽआपो वज्रेणैवैतद्रिमत्रधेयङ्करुते 'दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्म' ऽइति यामस्य दिशन्द्वेष्यः स्यात्तान्दिशम्परासिञ्चेत्तेनैव तम्पराभावयति ॥ ५ ॥ स यदि स्थावरा ऽआपो भवन्ति । स्थापयन्त्येषाम्पाप्मानम्थ यदि वहन्ति वहन्त्येवैषाम्पाप्मानꣳ स्नात्वाहतानि वा-

* 'उरः क्षत्रियस्योर्ध्वबाहु वा' (का० श्रौ० सू० २१. ४. १९) इति ।

(१) शु० य० सं० १५. १० । (२) शु० य० सं० १५. ११ । (३) शु० य० सं० १५. १२ । (४) शु० य० सं० १५. १२ ।

साꣳसि परिधायानड्डुहः पुच्छमन्ववारब्भ्यायन्त्याग्नेयो वा ऽअनड्वानग्निमुखा ऽएव तत्पितृलोकाज्जीवलोकमब्भ्यायन्त्यथो ऽअग्निर्वै पथोऽतिवोढा स ऽएनानतिवहति ॥ ६ ॥ 'उद्वयन्तमसस्परी'ति । एतामृचञ्जपन्तो यन्ति तत्तमसः पितृलोकादादित्यज्ज्योतिरब्भ्यायन्ति तेब्भ्य ऽआगतेब्भ्य ऽआञ्जनाब्भ्यञ्जने प्रयच्छन्त्येष ह मानुषोऽलङ्कारस्तेनैव तन्मृत्युमन्तर्दधते ॥ ७ ॥ अथ गृह्येष्वग्निꣳ समाधाय । वारणान्परिधीन्परिधाय वारणेन स्रुवेणाग्नय ऽआयुष्मत ऽआहुतिञ्जुहोत्यग्निर्वा ऽआयुष्मानायुष ऽईष्टे तमेवैब्भ्य ऽआयुर्दधाति[1] 'त्र्यग्न ऽआयूꣳषि पवस' ऽइति पुरोऽनुवाक्याभाजनम् ॥ ८ ॥ अथ जुहोति । 'आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ॥ घृतम्पीत्वा मधु चारु गव्यम्पितेव पुत्रमभिरक्षतादिमान्त्स्वाहे'ति यथैवैनानभिरक्षेद्यथाभिगोपायेदेवमेतदाह ॥ ९ ॥ तस्य पुराणोऽनड्वान्दक्षिणा * । पुराणा युवाः पुराण्यासन्दी सोपबर्हणैषा न्वादिष्टा दक्षिणा कामं व्यथाश्श्रद्धम्भूयसीर्दद्यादिति न्वग्निचितः ॥ १० ॥ अथानग्निचितः । एतदेव भूमिजोषणमेतत्समानकर्म्म यदन्यदग्निकर्म्मणः कुर्य्यादाहिताग्नेः शर्करा ऽइत्यु हैक ऽआहुर्य्या ऽएवामूरग्न्याधेयशर्करास्ता ऽएता ऽइति न कुर्य्यादित्येक ऽईश्वरो हैता ऽअनग्निचितः सन्तप्तोरिति स यथा कामयेत तथा

(१) शु० य० सं० १५. १४। (२) शु० य० सं० ३५. १६। (३) शु० य० सं० ३५. १७।

* तथा च कात्यायनः "आसन्दी सोपधाना दक्षिणाऽनड्वान्यवाश्च सर्वं पुराणम् (का० श्रौ० सू० २१. ४. २९) इति।

कुर्य्यात् ॥ ११ ॥ मर्य्यादाया ऽएव लोष्टमाहृत्य । अन्तरेण निदधाती'मञ्जीवेभ्यः परिधिन्दधामि मैषान्नु गादपरो ऽअर्त्थमेतम् ॥ शतञ्जीवन्तु शरदः पुरूचीरन्तर्म्मृत्युन्दधतामपर्व्वतेने'ति जीवेभ्यश्चैवैताम्पितृभ्यश्च मर्य्यादाङ्करोत्यसम्भेदाय तस्मादु हैतज्जीवाश्च पितरश्च न सन्दृश्यन्ते ॥ १२ ॥

अष्टमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥४॥ कण्डिकासंख्या ॥१००॥

इत्यऽष्टमोऽध्यायः ॥ ८ ॥

अश्वमेधनाम त्रयोदश काण्ड † समाप्तम् ॥ १३ ॥



(१) शु० य० सं० १५. १५ ।

† अस्मिन्काण्डे कण्डिकासंख्या ४१२ ।

अथोपनिषन्नाम * चतुर्दशं काण्डम्

—०—

काण्डेऽस्मिन्प्रतिपाद्या विषयाः—धर्मः, प्रवर्ग्यः, महावीरः, प्रवर्ग्योत्सादनम्' प्रवर्ग्यकर्तृनियमः, बृहदारण्यकम्, काम्यहवनादि, गर्भाधानादि, जातकर्म, वंशब्राह्मणमिति ।

[धर्मोपक्रमः]

॥ ॐ ॥ देवा ह वै सत्रन्निषेदुः । अग्निरिन्द्रः सोमो मरुतो विष्णुर्विश्वे देवा ऽअश्यत्रैवाश्विनभ्याम् ॥ १ ॥ तेषाङ्कुरुक्षेत्रन्देवयजनमास । तस्मादाहुः कुरुक्षेत्रन्देवानान्देवयजनमिति तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगच्छति तदेव मन्यत ऽइदुन्देवयजनमिति तद्धि देवानान्देवयजनम् ॥ २ ॥ त ऽआसत । श्रियङ्गच्छेम यशः स्यामान्नादाः स्यामेति तथो ऽएवेमे सत्रमासते ये[1] सत्रमासते श्रियङ्गच्छेम यशः स्यामान्नादाः स्यामेति ॥३॥ ते होचुः । यो नः श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिर्यज्ञस्योदृचम्पूर्वोऽवगच्छात्स नः श्रेष्ठोऽसत्तदु नः सर्वेषाꣳ सहेति तथेति ॥ ४ ॥ तद्विष्णुः प्रथमः प्राप । स देवानाꣳश्रेष्ठोऽभवत्तस्मादाहुर्विष्णुर्देवानाꣳ श्रेष्ठ ऽइति ॥ ५ ॥ स यः स विष्णुर्यज्ञः स । स यः स यज्ञोऽसौ स ऽआदित्यस्तद्धेदं यशो विष्णुर्न्न शशाक सँस्यन्तुन्तदिद-

* उपनिषच्छब्देन मुख्यया वृत्त्या ब्रह्मविद्योच्यते । उप समीपस्थं प्रत्यगात्मैकत्वं नीति निश्चितं सत् तत्पराणं सहेतुं संसार सादयतीत्युपनिषदिति व्युत्पत्तेः । अन्यस्तु विद्यासमर्थकत्वेनोपचारादुपनिषदित्युच्यते ।

(१) 'ये सत्रमासते" इति पाठः 'ग' 'ज' पुस्तकयोर्न दृश्यते ।

म॒प्ये॒तर्हि॑ नैव स॒र्व ऽइ॑व य॒शः॑ शक्नोति सँ॒ख्यन्तुम् ॥ ६ ॥ स॒ तिस्रो॑धन्व॒मादा॑या॒पचक्राम । स॒ धनु॑रात्न्यौ॑ शि॒र ऽउप॑स्तु॒ब्भ्य तस्थौ॑ तु॒न्देवा॑ ऽअ॒नभिधृ॑ष्णुवन्तः॑ समन्तम्प॑रि॒ण्यविशन्त ॥ ७ ॥ ता॒ ह॒ ब्रु॒म्ब्र॒य ऽऊचुः॑ । इमा॑ वै॑ ब्रु॒म्ब्र॒यो य॒दुप॑दी॒का॑ यो॑ऽस्य॒ ज्या॒मप्य॒द्यात्कि॒मस्म्मै॑ प्र॒यच्छे॒ते॑त्यन्ना॒द्यमस्म्मै॑ प्र॒यच्छे॒मापि॑ धन्वन्न॒पो॑ऽधिगच्छे॒त्तथा॑स्म्मै॑ स॒र्व॑मन्ना॒द्यम्प्र॒यच्छे॒मे॑ति॒ तथे॑ति ॥ ८ ॥ त॒स्योप॑परासृ॒त्य । ज्या॒मपि॑जक्षुस्त॒स्याञ्छि॒न्नायान्धनु॒रात्न्यौ॑ विष्फु॒र॒न्त्यौ॑ वि॒ष्ण्णोः॑ शि॒रः॑ प्र॒चिच्छिदतुः॑ ॥ ९ ॥ तद्घृ॒ङ्घृ॑ङिति॑ पपात । त॒त्पति॑त्वासा॒वादि॒त्यो॑ऽभवद॒थेत॒रः॑ प्रा॒ङेव॑ प्रावृ॒ज्यत तद्य॑द्घृ॒ङ्घृ॑ङि॒त्य॒पत॒त्तस्मा॒द्घर्म्मो॑ऽथ य॒त्प्रावृ॒ज्यत त॒स्मा॒त्प्र॑वृ॒ग्र्यः॑ ॥ १० ॥ ते॒ देवा॑ ऽअब्रुवन् । महा॒न्व॒त नो॒ वी॒रो॑ऽपादी॒ति॒ त॒स्मा॒न्नमहावीरस्त॒स्य॒ यो र॒सो व्य॒क्षर॒त्तम्पा॑णि॒भिः॑ स॒म्ममृ॒जुस्त॒स्मा॒त्सम्राट् ॥ ११ ॥ त॒न्देवा॑ ऽअ॒ब्भ्य॑मृ॒ज्यन्त । य॒था वि॒त्तिं वेत्स्य॒माना॑ ऽएवन्तमि॒न्द्रः॑ प्र॒थमः॑ प्रा॒प त॒मन्व॒क्रम॒नुव्यपद्यत तम्पर्य्यगृह्णात्त॒म्परि॑गृह्येदं य॒शो॑ऽभव॒द्यदि॑दमि॒न्द्रो य॒शो य॒शो ह॒ भव॑ति य॒ ऽएवं वेद ॥ १२ ॥ स॒ ऽउ॒ ऽएव॒ मख॑ः स॒ वि॒ष्ण्णुः॑ । त॒त ऽइ॒न्द्रो मख॒वानभव॒न्मख॒वान्ह॒ वै त॒न्मघ॒वानित्या॒चक्षते॑ परो॑ऽक्षम्परो॑ऽक्षकामा॑ हि॒ देवाः॑ ॥ १३ ॥ ता॒भ्यो॒ व॒म्मी॒भ्यो॑ऽन्नाद्यम्प्रा॒यच्छन् । आपो॑ वै॑ स॒र्व॒मन्न॒न्ता॒भि॒र्हीदु॒मभिक्क्नू॑यमिवादु॒न्ति॒ य॒दिद॒ङ्किञ्चा॑दन्ति॒ ॥ १४ ॥ अ॒थे॒मं वि॒ष्ण्णुं य॒ज्ञ॒न्त्रेधा॒ व्य॑भजन्त ।

(१) ग' 'ञ' पुस्तकयोः 'किम्वदन्ति" इति ।

वसवः प्रातःसवनꣳ रुद्रा माध्यन्दिनꣳ सवनमादित्या-
स्तृतीयसवनम् ॥ १५ ॥ अग्निः प्रातःसवनम् । इन्द्रो
माध्यन्दिनꣳ सवनं विश्वे देवास्तृतीयसवनम् ॥ १६ ॥
गायत्री प्रातःसवनम् । त्रिष्टुम्माध्यन्दिनꣳ सवनञ्जगती
तृतीयसवनन्तेनापशीर्ष्णा यज्ञेन देवा ऽअर्च्चन्तः श्राम्य-
न्तश्चेरुः ॥ १७ ॥ तद्ध्यङ् ह वा ऽआथर्वणः । एतꣳ शुक्र-
मेतं ग्रयज्ञं विद्वाञ्चकार यथा यथैतद्यज्ञस्य शिरः प्रति-
धीयते यथैष कृत्स्नो यज्ञो भवति ॥ १८ ॥ स हेन्द्रेणोक्त
ऽआस । एतञ्चेदन्यस्मा ऽअनुब्रूयास्तत ऽएव ते
शिरश्छिन्द्यामिति ॥ १९ ॥ तदु हाश्विनोरनुश्रुतमास ।
दध्यङ्ङु ह वा ऽआथर्वण ऽएतꣳ शुक्रमेतं ग्रयज्ञं वेद यथा
यथैतद्यज्ञस्य शिरः प्रतिधीयते यथैष कृत्स्नो यज्ञो भवतीति[1]
॥ २० ॥ तौ हेत्योचतुः । उप त्वायावेति किमनुवक्ष्यमाणा-
वित्येतꣳ शुक्रमेतं ग्रयज्ञं ग्रयथा यथैतद्यज्ञस्य शिरः प्रति-
धीयते यथैष कृत्स्नो यज्ञो भवतीति ॥ २१ ॥ स होवाच ।
इन्द्रेण वा ऽउक्तोऽस्म्येतञ्चेदन्यस्मा ऽअनुब्रूयास्तत ऽएव
ते शिरश्छिन्द्यामिति तस्माद्वै बिभेमि यद्वै मे स शिरो
न च्छिन्द्यान्न वामुपनेष्य ऽइति ॥ २२ ॥ तौ होचतुः ।
आवान्त्वा तस्मात्त्रास्यावहे[2] ऽइति कथम्मा त्रास्येथे
ऽइति यदा ना ऽउपनेष्यसेऽथ ते शिरश्छित्त्वान्यत्राप-
निधास्यावोऽथाश्वस्य शिर ऽआहृत्य तत्ते प्रतिधास्या-
वस्तेन नावनुवक्ष्यसि स यदा नावनुवक्ष्यस्यथ ते तदिन्द्रः

(१) "भवति" इति 'ग' 'ज' पुस्तकयोः । (२) 'ग' 'ज' पुस्तकयोः "व्वह" इति ।

शिरश्छेत्स्यत्त्यथ ते स्वः शिर ऽआहृत्य तत्ते प्रतिधास्याव ऽइति तथेति ॥२३॥ तौ होपनिन्ये। तौ षदोपनिन्येऽथास्य शिरश्छित्त्वान्यत्रापनिदधतुरथाश्वस्य शिर ऽआहृत्य तद्धास्य प्रतिदधतुस्तेन हाभ्यामनूवाच स यदाभ्यामनूवाचाथास्य तदिन्द्रः शिरश्चिच्छेदाथास्य स्वः शिर ऽआहृत्य तद्धास्य प्रतिदधतुः ॥२४॥ तस्मादेतदृषिणाभ्यनूक्तम्। दक्ष्यड् ह यन्मद्धाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेत्ययतन्तदुवाचेति हैव तदुक्तम् ॥ २५ ॥ तन्न सर्वस्मा ऽअनुब्ब्रूयात्। एनस्यः हि तदथो नेन्म ऽइन्द्रः शिरश्छिनददिति यो न्वेव ज्ञातस्तस्मै ब्ब्रूयादथ योऽनूचानोऽथ योऽस्य प्रियः स्यान्न त्वेव सर्वस्मा ऽइव ॥ २६ ॥ सँवत्सरवासिनेऽनुब्ब्रूयात्। एष वै सँवत्सरो य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मात्सँवत्सरवासिनेऽनुब्ब्रूयात् ॥ २७ ॥ तिस्रो रात्रीर्व्रतञ्चरति। त्रयो वा ऽऋतवः सँवत्सरस्य सँवत्सर ऽएष य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मात्तिस्रो रात्रीर्व्रतञ्चरति ॥२८॥ तप्तमाचामति। तपस्व्यनुब्ब्रवा ऽइत्यमाथ्यसाइत्यनुब्ब्रूते तपस्व्यनुब्ब्रवा ऽइति ॥ २९ ॥ अमृन्मयपायी। अस्ति वा ऽअस्याथ्यं सृष्टःसृष्टमिव यदस्यामनृतं वदति तस्मादुमृन्मयपायी ॥ ३० ॥ अशूद्रोच्छिष्टी। एष वै घर्म्मो य ऽएष तपति सैषा श्रीः सत्यज्योतिरनृतथ्ं स्त्री शूद्रः श्वा कृष्णः शकुनिस्तानि न प्रेक्षेत नेच्छ्रियञ्च पाप्मानञ्च नेऽज्योतिश्च तमश्च नेत्सत्यानृते सृष्टःसृजा-

नीति ॥ ३१ ॥ अथैष वाव यशः । य ऽएष तपति तद्य-
त्तदादित्यो यशो यज्ञो हैव तद्यशस्तद्यत्तद्यज्ञो यशो यज-
मानो हैव तद्यशस्तद्यत्तद्यजमानो यश ऽऋत्विजो हैव
तद्यशस्तद्यत्तदृत्विजो यशो दक्षिणा हैव तद्यशस्तस्माद्या-
मस्मै दक्षिणामानयेयुर्न ताꣳ सद्योऽन्यस्मा ऽअति-
दिशेन्नेद्यꣳमेदं ऽयश आगँस्तत्सद्योऽन्यस्मा ऽअतिदिशा-
नीति श्रेयो वैव भूते द्वयहे वा तदात्मन्येवैतद्यशः कृत्वा
यदेव तद्भवति तत्स ददाति हिरण्यꣳ वासोऽश्वं वा
॥ ३२ ॥ अथैतद्वै[2] । आयुरेतज्ज्योतिः प्रविशति य ऽएत-
मनु वा ब्रूते भक्षयति वा तस्य व्रतचर्या नातपति
प्रच्छादयेत नेदेतस्मात्तिरोऽसानीति नातपति निष्ठी-
वेन्नेदेतमभिनिष्ठीवानीति नातपति प्रस्रावयेत नेदेतमभि-
प्रस्रावया ऽइति यावद्वा ऽएष ऽआतपति तावानेष नेदेत-
मेतर्हिनसानीत्यवज्योत्य रात्रावश्नीयात्तदतस्य रूपङ्क्रियते
य ऽएष तपति तदु होवाचासुरिरेकः ह वै देवा व्रतश्च-
रन्ति यत्सत्यन्तस्माद्दु सत्यमेव वदेत् ॥ ३३ ॥

प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

[प्रवर्ग्यः *]

स वै सम्भारान्त्सम्भरति । स यद्वा ऽएनानित्थाच्चे-
त्थाच्च सम्भरति तत्सम्भाराणाꣳ सम्भारत्वं स वै यत्र

(१) "ता ऽइत्सयो०" इति 'ग' 'ज' पुस्तकयो. ।
(२) "अथैतद्वा" इति 'ग' 'ज' पुस्तकयो. ।
(३) "०तदस्य" इति 'ग' 'ज' पुस्तकयोः पाठः ।
* तप्ते घृते पयःप्रक्षेपादिना प्रणीयते 'घर्म.' खाद्यविशेषः । स एव प्रक्षेपः प्रवृज्जन-

यत्र यज्ञस्य न्यक्तन्ततस्ततः सम्भरति ॥ १ ॥ कृष्णाजिने सम्भरति । यज्ञो वै कृष्णाजिनं यज्ञ एवैनमेतत्सम्भरति लोमतश्छन्दाꣳसि वै लोमानि च्छन्दः स्वेवैनमेतत्सम्भरत्युत्तरत उदीची हि मनुष्याणान्दिक्प्राचीनग्रीवे तद्धि देवत्रा ॥ २ ॥ अब्भ्यः । वज्रो वा अब्भिर्वीर्य्यं वै वज्रो वीर्य्येणैवैनमेतत्समर्द्धयति कृत्स्नङ्करोति ॥ ३ ॥ औदुम्बरी भवति । ऊग्वै रस उदुम्बर ऊर्ज्जैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति ॥ ४ ॥ अथो वैकङ्कती । प्रजापतिर्य्याम्प्रथमामाहुतिमजुहोत्स हुत्वा यत्र न्यमृष्ट ततो विकङ्कतः समभवद्यज्ञो वा आहुतिर्य्यज्ञो विकङ्कतो यज्ञेनैवैनमेतत्समर्द्धयति कृत्स्नङ्करोति ॥ ५ ॥ अरत्निमात्री भवति । बाहुर्वा अरत्निर्बाहुनो वै वीर्य्यङ्क्रियते वीर्य्यसम्मितैव तद्भवति वीर्य्येणैवैनमेतत्समर्द्धयति कृत्स्नङ्करोति ॥ ६ ॥ तामादत्ते । 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्यामाददे नारिरसी'त्यसावेव बन्धुः ॥ ७ ॥ ताꣳ सव्ये पाणौ कृत्वा । दक्षिणेनाभिमृश्य जपति 'युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुति'रित्यसावेव बन्धुः ॥ ८ ॥ अथ मृत्पिण्डं

मुच्यते । तादृशप्रकृष्टनतिनियन्यनेवास्य कर्मण. समाख्या प्रवर्ग्य इति । तत्र घर्मपात्राय मृन्मिते उदुम्बरलाकारपात्रविशेषो महावीरः । गौण्या तु वृत्त्या घर्म., प्रवर्ग्यः, महावीर' इति त्रीण्येव पदानि समानार्थानीति विवेकः । (तै० साय० भा० ५. ११. १. । शत० ब्रा० १४. १. १-११)

(१) 'ग' 'ञ' पुस्तकयो. 'ोजिनꣳ स०" इति पाठः ।

(२) शु० य० स० ३०. १ । (३) शु० य० स० ३७. २ ।

परिगृह्णाति * । अब्भ्या च दक्षिणतो हस्तेन च हस्तेनैवोत्तरतो 'देवी द्यावापृथिवी' ऽइति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्स ऽइमे द्यावापृथिवी ऽअगच्छद्यन्मृदियन्तद्यदापोऽसौ तन्मृदुश्चाप्राश्च महावीराः कृता भवन्ति तेनैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति तस्मादाह देवी द्यावापृथिवी ऽइति 'मखस्य वामद्य शिरो राद्ध्यास'मिति यज्ञो वै मखो यज्ञस्य वामद्य शिरो राद्ध्यासमित्येवैतदाह 'देवयजने पृथिव्या' ऽइति देवयजने हि पृथिव्यै सम्भरति 'मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइति यज्ञो वै मखो यज्ञाय त्वा यज्ञस्य त्वा शीर्ष्णे ऽइत्येवैतदाह ॥ ९ ॥ अथ वल्मीकवपाम् । 'देव्यो वस्त्रय' ऽइत्येता वा ऽएतद्कुर्वत यथा यथैतद्यज्ञस्य शिरोऽच्छिद्यत ताभिरेवैनमेतत्समर्द्धयति कृत्स्नङ्करोति 'भूतस्य प्रथमजा' ऽइतीयं वै पृथिवी भूतस्य प्रथमजा तदनयैवैनमेतत्समर्द्धयति कृत्स्नङ्करोति 'मखस्य वोऽद्य शिरो राद्ध्यासन्देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुः ॥ १० ॥ अथ वराहुविहतम् । 'इयत्यग्र ऽआसी'दितीयती ह वा ऽइयमग्रे पृथिव्यास प्रादेशमात्री तामेमूष ऽइति वराह ऽउज्जघान सोऽस्याः पतिः प्रजापतिस्तेनैवैनमेतन्मिथुनेन प्रियेण धाम्ना समर्द्धयति कृत्स्नङ्करोति 'मखस्य तेऽद्य शिरो राद्ध्यासन्देवयजने

* 'मृदमादत्ते पिण्डवद्देवी द्यावापृथिवी' (का० श्रौ० सू० २६. १. ०) इति ।

(१) शु० य० सं० ३७. १ । (२) शु० य० सं० ३७. २ । (३) शु० य० सं० ३७. ३ । (४) शु० य० सं० ३७. ३ । (५) शु० य० सं० ३७. ४ । (६) शु० य० सं० ३७. ४ । (७) शु० य० सं० ३७. ४ । (८) शु० य० सं० ३७. ५ । (९) शु० य० सं० ३७. ५ ।

पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥ ११ ॥ अथादारान् । 'इन्द्रस्यौज स्थे'ति यत्र वा ऽएनमिन्द्र ऽओजसा पर्य्यगृह्णात्तदस्य परिगृहीतस्य रसो व्यक्षरत्स पूयन्निवाशेत सोऽब्रवीदादीर्ष्येव वत म ऽएष रसोऽस्तौषीदिति तस्मादादारा ऽअथ यत्पूयन्निवाशेत तस्मात्पूतीकास्तस्मादग्नावाहुतिरिवाभ्याहिता ज्वलन्ति तस्मादु सुरभयो यज्ञस्य हि रसात्सम्भूता ऽअथ यदेनन्तद्विन्द्र ऽओजसा पर्य्यगृह्णात्तस्मादाहेन्द्रस्यौज स्थेति 'मखस्य वोऽद्य शिरो राध्यासन्देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१२॥ अथाजाक्षीरम् । यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्ततोऽजा समभवत्तयैवैनमेतच्छुचा समर्द्धयति कृत्स्नङ्करोति 'मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१३॥ तान्वा ऽएतान्पञ्च सम्भारात्सम्भरति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्त्तवः सँवत्सरस्य सँवत्सर ऽएष य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तान्सम्भृतानभिमृशति 'मखाय त्वा मखस्य त्वा शीर्ष्णऽइत्यसावेव बन्धुः ॥१४॥ अथोत्तरतः परिश्रितम्भवति । तदभिप्रयन्तो जपन्ति 'प्रेतु ब्रह्मणस्पतिरित्येष वै ब्रह्मणस्पतिर्य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह प्रेतु ब्रह्मणस्पतिरिति 'प्र देव्येतु सूनृते'ति देवी ह्येषा सूनृता-

(१) शु० य० सं० १७. ६ । (२) शु० य० सं० १७. ६ । (३) शु० य० सं० १७ ६ । (४) शु० य० सं० १७. ६ । (५) शु० य० सं० १७. ७ । (६) शु० य० सं० १७. ७ ।

'च्छो वीरन्नर्ध्यम्पङ्क्ति राधस'मित्युपस्तौत्येवैनमेतन्महयत्येव 'देवाँ यज्ञन्नयन्तु न' ऽइति सर्वानेवास्मा ऽएतद्देवानभिगोप्तॄन्करोति ॥ १५ ॥ परिश्रितम्भवति । एतद्वै देवा ऽअबिभयुर्ध्यद्वै न ऽइममिह रक्षाꣳसि नाष्ट्रा न हन्न्युरिति तस्मा ऽएताम्पुरम्पर्ध्यश्रयँस्तथैवास्मा ऽअयमेताम्पुरम्परिश्रयति ॥ १६ ॥ अथ खरे सादयति । 'मखायै त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुरथ प्रयौति मखाय त्वा मखस्य त्वा शीर्ष्ण ऽइत्यसावेव बन्धुरथ मृत्पिण्डमुपादाय महावीरङ्करोति 'मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुः प्रादेशमात्रम्प्रादेशमात्रमिव हि शिरो मध्ये सङ्गृहीतम्मध्ये सङ्गृहीतमिव हि शिरोऽथास्योपरिष्टाल्लम्बुलम्मुखमुन्नयति नासिकामेवास्मिन्नेतद्दधाति तन्निष्टितमभिमृशति 'मखस्य शिरोऽसी'ति मखस्य ह्येतत्सौम्यस्य शिर ऽएवमितरौ तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले ॥ १७ ॥ प्रजापतिर्वा ऽएष यज्ञो भवति । उभयं वा ऽएतत्प्रजापतिर्न्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद्यद्यजुषा करोति यदेवास्य निरुक्तम्परिमितꣳ रूपन्तदस्य तेन संस्करोत्यथ यत्तूष्णीं क्रियदेवास्यानिरुक्तमपरिमितꣳ रूपन्तदस्य तेन संस्करोति स ह वा ऽएतꣳ सर्वङ्करस्नम्प्रजापतिꣳ संस्करोति य ऽएवं विद्वानेतदेवङ्करोत्यथोपशयायै पिण्डम्परिशिनष्टि प्रायश्चित्त्यै ॥ १८ ॥ अथ गवेधुकाभिर्हिङ्करोति ।

(१) शु० य० सं० ३७. ७। (२) शु० य० सं० ३७. ७। (३) शु० य० ३७. ७। (४) शु० य० सं० ३७. ८। (५) शु० य० सं० ३७. ८।

यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत ऽएता ऽओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति 'मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुरेवमितरौ तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले ॥ १९ ॥ अथैनान्धूपयति। 'अश्वस्य त्वा वृष्णः शक्ना धूपयामी'ति वृषा वा ऽअश्वो वीर्य्यं वै वृषा वीर्य्येणैवैनमेतत्समर्द्धयति कृत्स्नङ्करोति 'देवयजने पृथिव्या मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुरेवमितरौ तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले ॥२०॥ अथैनाञ्छ्रपयति। श्रृतꣳ हि देवानामिष्टकाभिः श्रपयत्येता वा ऽएतदकुर्वत यथा यथैतद्यज्ञस्य शिरोऽच्छिद्यत ताभिरेवैनमेतत्समर्द्धयति कृत्स्नङ्करोति तदु येनैव सुश्रृताः स्युस्तेन श्रपयेदथ पचनमवधाय महावीरमवदधाति 'मखार्य त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुरेवमितरौ तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले तान्दिवैवोपवपेद्दिवोद्वपेदुहार्हि देवानाम् ॥ २१ ॥ स ऽउद्वपति। 'ऋजवे त्वे'त्यसौ वै लोक ऽऋजुः सत्यꣳ ह्यृजुः सत्यमेष य ऽएष तपत्येष ऽउ प्रथमः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाहर्ऋजवे त्वेति ॥ २२ ॥ 'साधवे त्वे'ति। अयं वै साधुर्योऽयम्पवत ऽएष हीमाँल्लोकान्त्सद्धोऽनुपवत ऽएष ऽउ द्वितीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह साधवे त्वेति ॥ २३ ॥

(१) शु० य० सं० १७. ८। (२) शु० य० सं० १७. ९। (३) शु० य० सं० १७. ९। (४) शु० य० सं० १७. ९। (५) शु० य० सं० १७. १०। (६) शु० य० सं० १७. १०।

'सुक्षित्यै त्वे'ति । अयं वै लोकः सुक्षितिरस्मिन्हि लोके सर्वाणि भूतानि क्षियन्त्यथो ऽअग्निर्वै सुक्षितिरग्निर्ह्येवास्मिँल्लोके सर्वाणि भूतानि क्षियत्येष ऽउ तृतीयः प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सुक्षित्यै त्वेति तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले ॥ २४ ॥ अथैनान्नाच्छृणत्ति । अजायै पयसा 'मखाय त्वा मखस्य त्वा शीर्ष्णे' ऽइत्यसावेव बन्धुरेवमितरौ तूष्णीम्पिन्वने तूष्णीꣳ रौहिणकपाले ॥ २५ ॥ अथैतद्वै । आयुरेतज्ज्योतिः प्रविशति य ऽएतमनु वा व्रते भक्षयति वा तस्य व्रतचर्या या सृष्टौ ॥ २६ ॥

प्रथमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

—०—

[महावीरसंस्कारः]

स यदैतदातित्थ्येन प्रचरति । अथ प्रवर्ग्येण चरिष्यन्पुरोपसद्वोऽग्नेण गार्हपत्यम्प्राचः कुशान्त्सꣳस्तीर्य द्वन्द्वम्पात्राण्युपसादयत्युपयमनीम्महावीरम्परीशासौ पिन्वने रौहिणकपाले रौहिणहवन्यौ स्रुचौ यदु चान्यद्रवति तद्दश दुशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैत यज्ञमभिसम्पादयत्यथ यद्द्वन्द्वन्द्वं वै वीर्य्यं यदा वै द्वौ सदꣳरभेते ऽअथ तौ वीर्य्यङ्कुरुतो द्वन्द्वं वै मिथुनम्प्रजननम्मिथुनेनैवैनमेतत्प्रजननेन समर्द्धयति कृरस्नङ्करोति ॥ १ ॥ अथाद्धर्युः । प्रोक्षणीरादायोपोत्तिष्ठन्नाह

(१) शु० य० सं० १७. १०। (२) शु० य० सं० १७. १०।

ब्ब्रह्मन्प्रचरिष्यामो होतरभिष्टुहीति ब्ब्रह्मा वै यज्ञस्य दक्षिणत ऽआस्तेऽभिगोप्ता तमेवैतदाहाप्रमत्त ऽआस्स्व यज्ञस्य शिरः प्रतिधास्याम ऽइति होतरभिष्टुहीति यज्ञो वै होता तमेवैतदाह यज्ञस्य शिरः प्रतिधेहीति प्रतिपद्यते होता ॥ २ ॥ 'ब्रह्म जज्ञानम्प्रथमम्पुरस्तादि'ति । असौ वा ऽआदित्यो ब्ब्रह्माहरहः पुरस्ताज्जायत ऽएष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह ब्ब्रह्म जज्ञानम्प्रथमम्पुरस्तादित्यथ प्रोक्षत्यसावेव बन्धुः ॥ ३ ॥ स प्रोक्षति । 'यमाय त्वे'त्येष वै यमो य ऽएष तपत्येष हीदꣳ सर्व्वꣳ श्यमयत्येतेनेदꣳ सर्व्वꣳ श्यतमेष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह यमाय त्वेति ॥ ४ ॥ 'मखाय त्वे'ति । एष वै मखो य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह मखाय त्वेति ॥ ५ ॥ 'सूर्य्यस्य त्वा तपस' ऽइति । एष वै सूर्य्यो य ऽएष तपत्येष प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सूर्य्यस्य त्वा तपस ऽइति ॥ ६ ॥ पूर्व्वया द्वारा स्तृणान्निर्हृत्य । दक्षिणतो निमिन्वन्ति यथैनाꣳ होताभिष्टुवन्परापश्येद्यज्ञो वै होता स ऽएवास्यामेतद्यज्ञम्प्रतिदधाति तथैषा घर्म्मम्पिन्वते ॥ ७ ॥ [अर्धः प्रपाठकः ॥६६॥] अग्नेणाहवनीयः सम्म्राडासन्दीम्पर्य्याहृत्य दक्षिणतः प्राचीमासादयत्युत्तराꣳ राजासन्द्यै ॥ ८ ॥ औदुम्बरी भवति । ऊग्वै रस ऽउदुम्बर ऽऊर्जैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति ॥९॥ अष्टःसदग्घा भवति । अष्टःसयोर्व्वा

(१) शु० य० सं० ११. १ । (२) शु० य० सं० १७. ११ । (३) शु० य० सं० १७. ११ । (४) शु० य० सं० १७. ११ ।

ऽइदꣳ शिरः प्रतिष्ठितन्तदुꣳसयोरेवैतच्छिरः प्रतिष्ठापयति ॥ १० ॥ बाल्वजीभी रज्जुभिर्व्यु॑ता भवति । यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत ऽएना ऽओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति ॥ ११ ॥ अथ यदुत्तरत ऽआसादयति । यज्ञो वै सोमः शिरः प्रवर्ग्य ऽउत्तरं वै शिरस्तस्मादुत्तरत ऽआसादयत्यथो राजा वै सोमः सम्राट् प्रवर्ग्य ऽउत्तरं वै राज्यात्साम्राज्यन्तस्मादुत्तरत ऽआसादयत्युत्तरो वै प्रजा नस्मादुत्तरत ऽआसादयति ॥ १२ ॥ स यत्रैनाꣳ होतान्वाह । 'अञ्जन्ति यꣳप्रथयन्तो न विप्रा' ऽइति तदेनꣳप्रचरणीयꣳमहावीरमाज्येन समनक्ति 'देवस्त्वा सविता मद्वानक्त्विव'ति सविता वै देवानाम्प्रसविता सर्वं वा ऽइदम्मधु यदिदङ्किञ्च तदेनमनेन सर्वेण समनक्ति तदस्मै सविता प्रसविता प्रसौति तस्मादाह देवस्त्वा सविता मद्वानक्त्विति ॥ १३ ॥ * अथोत्तरतः सिकता ऽउपकीर्णा भवन्ति । तद्रजतꣳ हिरण्यमधस्तादुपास्यति 'पृथिव्याः सꣳस्पृशस्पाहि'त्येतद्वै देवा ऽअबिभयुर्यद्वै न ऽइमꣳमधस्तादुक्षाणꣳसि नाष्ट्रा न हन्न्युरित्यग्नेर्वा ऽएतद्रेतो यद्धिरण्यन्नाष्ट्राणाꣳ रक्षसामपहत्या ऽअथो पृथिव्यु ह वा ऽएतस्माद्बिभयाञ्चकार यद्वै मायन्तप्तः शुशुचानो न

(१) "आसादयत्युत्तरो वै प्रजा तस्मादुत्तरत" इति पाठ 'ग' ज' पुस्तकयोर्न दृश्यते ।
(२) ऋ० सं० ४. २. २१ । (३) शु० य० सं० ३७. १ ।
* शतम् ६६०० ।
(४) शु० य० सं० १७ ११ ।

हिꣳस्यादिति तदेवास्या ऽएतदन्तर्दधाति रजतम्भवति रजतमेव हीयम्पृथिवी ॥ १४ ॥ स यत्रैताꣳ होतान्वाह । 'सꣳसीदस्व महाꣳ[1]॥ ऽअसी'ति तदुभयत ऽआदीप्ता मौञ्जाः प्रलवा भवन्ति तानुपास्य तेषु प्रवृणक्ति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्तत ऽएता ऽओषधयो जज्ञिरे तेनैवैनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति ॥ १५ ॥ अथ यदुभयत ऽआदीप्ता भवन्ति । सर्वाभ्य ऽएवैतद्दिग्भ्यो रक्षाꣳसि नाष्ट्रा ऽअपहन्ति तस्मिन्प्रवृज्यमाने पत्नी शिरः प्रोर्णुते तप्तो वा ऽएष शुशुचानो भवति नेन्मेऽयन्तप्तः शुशुचानश्चक्षुः प्रमुष्णादिति ॥ १६ ॥ स प्रवृणक्ति । '[2]अर्चिरसि शोचिरसि तपोऽसी'त्येष वै घर्म्मो य ऽएष तपति सर्वं वा ऽएतदेष तदेतमेवैतत्प्रीणाति तस्मादाहार्चिरसि शोचिरसि तपोऽसीति ॥ १७ ॥ अथास्यामाशिष ऽआशास्ते । इयं वै यज्ञोऽस्यामेवैतदाशिष ऽआशास्ते ता ऽअस्मा ऽइयः सर्वाः समर्द्धयति ॥ १८ ॥ 'अना[3]धृष्टा पुरस्ता'दिति । अनाधृष्टा ह्येषा पुरस्ताद्रक्षोभिर्नाष्ट्राभि'रग्नेरा[4]धिपत्य' ऽइत्यग्निमेवास्या ऽअधिपतिङ्करोति नाष्ट्राणाꣳ रक्षसामपहत्या 'ऽआयु[5]र्मे दा' ऽइत्यायुरेवात्मन्धत्ते तथो ह सर्वमायुरेति ॥ १९ ॥ 'पुष्ट[6]वती दक्षिणत' ऽइति । नात्र तिरोहितमिवास्ती'न्द्रस्या[7]धिपत्य' ऽइतीन्द्रमेवास्या ऽअधिपतिङ्करोति

(१) ऋ० सं० १. १. ९। (२) शु० य० सं० १७. ११। (३) शु० य० सं० १७. १२। (४) शु० य० सं० १७. १२। (५) शु० य० सं० १७. १२। (६) शु० य० सं० १७. १२। (७) शु० य० सं० १७. १२।

नाष्ट्राणाꣳ रक्षसामपहत्यै 'प्रजाम्मे दा' ऽइति प्रजामेव पशूनात्मन्धत्ते तथो ह पुत्री पशुमान्भवति ॥ २० ॥ 'सुषदा पश्चा'दिति । नात्र तिरोहितमिवास्ति 'देवस्य सवितुराधिपत्य' ऽइति देवमेवास्यै सवितारमधिपतिङ्करोति नाष्ट्राणाꣳ रक्षसामपहत्यै 'चक्षुर्म्मे दा' ऽइति चक्षुरेवात्मन्धत्ते तथो ह चक्षुष्मान्भवति ॥ २१ ॥ 'आश्रुतिरुत्तरत' ऽइति । आश्रावयन्नुत्तरत ऽइत्येवैतदाह 'धातुराधिपत्य' ऽइति धातारमेवास्या ऽअधिपतिङ्करोति नाष्ट्राणाꣳ रक्षसामपहत्यै 'रायस्पोषम्मे दा' ऽइति रयिमेव पुष्टिमात्मन्धत्ते तथो ह रयिमान्पुष्टिमान्भवति ॥ २२ ॥ 'विधृतिरुपरिष्टा'दिति । विधारयन्नुपरिष्टादित्येवैतदाह 'बृहस्पतेराधिपत्य' ऽइति बृहस्पतिमेवास्या ऽअधिपतिङ्करोति नाष्ट्राणाꣳ रक्षसामपहत्या 'ऽओजो मे दा' ऽइत्योज ऽएवात्मन्धत्ते तथौजस्वी बलवान्भवति ॥ २३ ॥ अथ दक्षिणत ऽउत्तानेन पाणिना निह्नुते । 'विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि'ति सर्वाभ्यो मार्त्तिभ्यो गोपायत्येवैतदाह यज्ञस्य शीर्षच्छिन्नस्य * पितृनगच्छत्त्रया वै पितरस्तैरेवैनमेतत्समर्द्धयति कृत्स्नङ्करोति ॥ २४ ॥ अथेमामभिमृश्य जपति । 'मनोरश्वासी'त्यश्वा ह

(१) शु० य० सं० ३७. १२ । (२) शु० य० सं० ३७ १२ । (३) शु० य० सं० ३७. १२ । (४) शु० य० सं० ३७. १२ । (५) शु० य० सं० ३७ १२ । (६) शु० य० सं० ३७. १२ । (७) शु० य० सं० ३७. १२ । (८) शु० य० स० ३७. १२ । (९) शु० य० सं० ३७. १२ । (१०) शु० य० सं० ३७. १२ । (११) शु० य० सं० ३७. १२ ।

* अत्र "रसो व्यक्षरस्स" इत्यधिक पाठ । 'ग' 'ज' पुस्तकयो [ ] इति चिह्नान्तर्गत उपलभ्यते ।

(१२) शु० य० स० ३७ १२ ।

वा ऽइयम्भूत्वा मनुमुवाह सोऽस्याः पतिः प्रजापतिस्तेनैवैनमेतन्मिथुनेन प्रियेण धाम्ना समर्द्धयति कृत्स्नङ्करोति ॥ २५ ॥ अथ वैकङ्कतौ शकलौ परिश्रयति प्राञ्चौ । 'स्वाहा मरुद्भिः परिश्रीयस्वे'त्यवरꣳ स्वाहाकारङ्करोति परान्देवतामेष वै स्वाहाकारो य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादवरꣳ स्वाहाकारङ्करोति परान्देवताम् ॥ २६ ॥ मरुद्भिः परिश्रीयस्वेति । विशो वै मरुतो विशैवैतत्क्षत्रम्परिवृङ्क्तऽइति तदिदङ्क्षत्रमुभयतो विशा परिवृढन्तूष्णीमुदञ्चौ तूष्णीम्प्राञ्चौ तूष्णीमुदञ्चौ तूष्णीम्प्राञ्चौ ॥ २७ ॥ त्रयोदश सम्पादयति । त्रयोदश वै मासाः सँवत्सरस्य सँवत्सर ऽएष य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मात्त्रयोदश सम्पादयति ॥ २८ ॥ अथ सुवर्णः हिरण्यमुपरिष्टान्निदधाति । 'दिवः सꣳस्पृशस्पाही'त्येतद्वै देवा ऽअबिभयुर्य्यद्वै न ऽइममुपरिष्टाद्रक्षाꣳसि नाष्ट्रा न हन्न्युरित्यग्नेर्वा ऽएतद्रेतो यद्धिरण्यन्नाष्ट्राणाꣳ रक्षसामपहत्या ऽअथो द्यौर्ह वा ऽएतस्माद्बिभयाञ्चकार यद्वै मायन्तप्तः शुशुचानो न हिꣳस्यादिति तदेवास्या ऽएतदन्तर्दधाति हरितम्भवति हरिणीव हि द्यौः ॥ २९ ॥ अथ धवित्रैराधूनोति । 'मधु मद्धि'ति त्रिः प्राणो वै मधु प्राणमेवास्मिन्नेतद्दधाति त्रीणि भवन्ति त्रयो वै प्राणाः प्राण ऽउदानो व्यानस्तानेवा-

(१) शु० य० सं० १७. १३ । (२) शु० य० सं० १७. १३ । (३) शु० य० सं० १७ १३ ।

स्मिन्नेतद्दधाति ॥ ३० ॥ अथापसलवि त्रिर्द्धूश्वन्ति । यज्ञस्य शीर्षच्छिन्नस्य * पितुनगच्छन्नया वै पितरस्तैरेवैनमेतत्समीरयति ॥ ३१ ॥ अप वा ऽएतेभ्यः प्राणाः क्रामन्ति । य यज्ञे ध्रुवनन्तश्वते पुनः प्रसलवि त्रिर्द्धूश्वन्ति षट् सम्पद्यन्ते षड्वा ऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति श्श्रपयन्ति रौहिणौ स यदार्द्धिर्ज्ञायतेऽथ हिरण्यमादत्ते ॥ ३२ ॥ स यत्रैताꣳ होतान्वाह । 'अप्नस्वतीमश्विना वाचमस्मे' ऽइति तदद्धर्य्युरुपोत्तिष्ठन्नाह रुचितो घर्म्म ऽइति स यदि रुचितः स्याच्छ्रेयान्यजमानो भविष्यतीति विद्यादथ यद्यरुचितः पापीयान्भविष्यतीति विद्यादथ यदि नैव रुचितो नारुचितो नैव श्रेयान्न पापीयान्भविष्यतीति विद्याद्यथा त्वेव रुचितः स्यात्तथा धवितव्यम् ॥३३॥ अथैनद्वै । आयुरेतज्ज्योतिः प्रविशति य ऽएतमनुवा ब्रूते भक्षयति वा तस्य व्रतचर्य्या या सृष्टौ ॥३४॥

प्रथमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

स यदैतदद्धर्य्युः । उपोत्तिष्ठन्नाह रुचितो घर्म्म ऽइति तदुपोत्थायावकाशैरुपतिष्ठन्ते प्राणा वा ऽअवकाशाः प्राणानेवास्मिन्नेतद्दधाति षडुपतिष्ठन्ते षड्वा ऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति ॥ १ ॥ 'गोब्भो देवाना'मिति ।

* अत्र "रसो ब्यक्षरत्स" इत्यधिकः पाठः [ ] इति चिह्नान्तर्गतः 'ग' 'ज' पुस्तकयोरुपलभ्यते ।

(१) शु० य० सं० १४ २९ । (२) "न्वेव" इति 'ग' 'ज' पुस्तकयोः । (३) "धवितव्यः" इति 'ग' 'ज' पुस्तकयो० । (४) शु० य० सं० १७. १४ ।

एष वै गर्भो देवानां यऽएष तपत्येष हीदꣳ सर्वङ्गृर्भ्णा[1]त्येतेनेदꣳ सर्वङ्गृभीतमेष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह गर्भो देवानामिति ॥ २ ॥ 'पिता[2] मतीना'मिति । पिता ह्येष मतीना'म्पतिः[3] प्रजाना'मिति पतिर्ह्येष प्रजानाम् ॥ ३ ॥ 'सꣳ[4]देवो देवेन सवित्रा गते'ति सꣳ हि देवो देवेन सवित्रा गत 'सꣳ सूर्य्येण रोचत' ऽइति सꣳ हि सूर्य्येण रोचते ॥ ४ ॥ 'सꣳ[5]समग्निरग्निना गते'ति । सꣳ ह्यग्निरग्निना गत 'सꣳ[6]देवेन सवित्रे'ति सꣳ हि देवेन सवित्रा गत 'सꣳ सूर्य्येणारोचिष्टे'ति सꣳ हि सूर्य्येणारोचिष्ट ॥ ५ ॥ 'स्वाहा[7] समग्निस्तपसा गते'ति सꣳ ह्यग्निस्तपसा गतावरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः 'सन्दै[8]व्येन सवित्रे'ति सꣳ हि दैव्येन सवित्रा गत 'सꣳ[9] सूर्य्येणारूरुचते'ति सꣳ हि सूर्य्येणारूरुचत ॥ ६ ॥ ते वा ऽएते त्रयोऽवकाशा भवन्ति । त्रयो वै प्राणाः प्राण ऽउदानो व्यानस्ताने[10]वास्मिन्नेतद्दधाति ॥ ७ ॥ 'धर्त्ता[11] दिवो विभाति तपसस्पृथिव्या'मिति । धर्त्ता ह्येष दिवो विभाति तपसस्पृथिव्या'न्धर्त्ता[12] देवो देवानाम मर्त्यस्तपोजा' ऽइति धर्त्ता ह्येष देवो देवानाममर्त्यस्तपोजा 'वाचमेस्[13]मे नियच्छ देवायुव'मिति यज्ञो वै वाग्यज्ञमस्म-

(१) "गृह्णा०" इति 'ग' 'ज' पुस्तकयोः । (२) शु० य० सं० ३७. १४ । (३) शु० य० सं० ३७. १४ । (४) शु० य० सं० ३७. १४ । (५) शु० य० सं० ३७. १४ । (६) शु० य० सं० ३७. १५ । (७) शु० य० सं० ३७. १५ । (८) शु० य० सं० ३७. १५ । (९) शु० य० सं० ३७. १५ । (१०) शु० य० सं० ३७. १५ । (११) शु० य० सं० ३७. १५ । (१२) "०स्तेने" इति 'ग' 'ज' पुस्तकयोः । (१३) शु० य० सं० ३७. १६ । (१४) शु० य० सं० ३७. १६ । (१५) शु० य० सं० ३७. १६ ।

ऽभ्यम्प्रयच्छ येन देवान्प्रीणामेत्येवैनदाह ॥ ८ ॥ 'अपश्श्यङ्गोपामनिपद्यमान'मिति । एष वै गोपा य ऽएष तपत्येष हीदꣳ सर्वङ्गोपायत्यथो न निपद्यते तस्मादाहापश्श्यङ्गोपामनिपद्यमानमिति ॥ ९ ॥ 'आ च परा च पथिभिश्चरन्त'मिति । आ च ह्येष परा च देवैः पथिभिश्चरति 'स सद्रीचीः स विषूचीर्वसान' ऽइति सद्रीचीश्च ह्येष विषूचीश्च दिशो वस्तेऽथो रश्मी'नावरीवर्त्ति भुवनेष्वन्त'रिति पुनः पुनर्ह्येष ऽएषु लोकेषु वरीवर्त्यमानश्चरति ॥ १० ॥ 'विश्श्वासाम्भुवाम्पते । विश्श्वस्य मनसस्पते विश्श्वस्य वचसस्पते सर्वस्य वचसस्पत' ऽइत्येतस्य सर्वस्य पत ऽइत्येत'द्देवश्श्रुत्वन्देव घर्म्म देवो देवान्पाही'ति नात्र तिरोहितमिवास्ति ॥ ११ ॥ 'अत्र प्रावीरनु वान्देवीतय' ऽइति । अश्श्विनावेवैतदाहाश्श्विनौ वा ऽएतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति तस्मादाहात्र प्रावीरनु वान्देवीतय ऽइति ॥ १२ ॥ 'मधु माद्धीभ्याम्मधु माधूचीभ्या'मिति । दक्ष्यङ् ह वा ऽआभ्यामाथर्वणो मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियन्धाम तदेवैनयोरेतेनोपगच्छति तस्मादाह मधु माद्धीभ्याम्मधु माधूचीभ्यामिति ॥ १३ ॥ 'हृदे त्वा मनसे त्वा दिवे त्वा सूर्य्याय त्वा । ऊर्द्धो ऽअद्धरन्दिवि देवेषु धेही'ति नात्र तिरोहितमि-

(१) शु० य० सं० ३७. १७ । (२) शु० य० सं० ३७. १७ । (३) शु० य सं० ३७. १७ । (४) शु० य० सं० ३७. १७ । (५) शु० य० सं० ३७. १८ । (६) शु० य० सं० ३७. १८ । (७) शु० य० सं० ३७. १८ । (८) शु० य० सं० ३७. १८ । (९) शु० य० सं० ३७. १९ ।

वास्ति ॥ १४ ॥ 'पितो नोऽसि पिता नो बोधी'ति। एष वै पिता य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह पिता नोऽसि पिता नो बोधीति 'नमस्ते ऽअस्तु मा मा हिꣳसी'रित्याशिषमेवैतदाशास्ते ॥ १५ ॥ अथ पत्न्यै शिरोऽपावृत्य। महावीरमीक्षमाणां वाचयति 'त्वष्टर्मन्तस्त्वा सपेमे'ति व्वृषा वै प्रवर्ग्यो योषा पत्नी मिथुनमेवैतत्प्रजननङ्क्रियते ॥ १६ ॥ अथैतद्वै। आयुरेतज्ज्योतिः प्रविशति य ऽएतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्य्या या सृष्ट्रौ ॥ १७ ॥

प्रथमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

—०—

[रौहिणहोमः, महावीरेषु अजापयस आसेकश्च]

अथातो रौहिणौ जुहोति। 'अꣳहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहे'त्युभावेतेन यजुषा प्राता 'रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहे'त्युभावेतेन यजुषा सायम् ॥ १ ॥ तद्यद्रौहिणौ जुहोति। अग्निश्च ह वा ऽआदित्यश्च रौहिणावेताभ्याꣳ हि देवताभ्यां यजमानाः स्वर्गꣳलोकꣳ रोहन्ति ॥ २ ॥ अथो ऽअहोरात्रे वै रौहिणौ। आदित्यः प्रवर्ग्योऽमुन्तदादित्यमहोरात्राभ्या-

(१) शु० य० सं० ३७. २०। (२) शु० य० सं० ३७. २०। (३) "०प०" इति 'ग' 'ज' पुस्तकयोः। (४) शु० य० सं० ३७. २०। (५) शु० य० सं० ३७. २१। (६) शु० य० सं० ३७. २१।

म्परिगृह्णाति तस्मादेषोऽहोरात्राभ्याम्परिगृहीतः ॥ ३ ॥ अथो ऽइमौ वै लोकौ रौहिणौ आदित्यः प्रवर्ग्योऽमुन्तदादित्यमाभ्याँल्लोकाभ्याम्परिगृह्णाति तस्मादेष ऽआभ्याँल्लोकाभ्याम्परिगृहीतः ॥ ४ ॥ अथो चक्षुषी वै रौहिणौ । शिरः प्रवर्ग्यः शीर्षँस्तच्चक्षुर्दधाति ॥५॥ अथ रज्जुमादत्ते । 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्यामाददेऽदित्यै रास्नासी'त्यसावेव बन्धुः ॥६॥ अथ गामाह्वयति । जघनेन गार्हपत्यं स्थ'न्निडं ऽएत्यदित ऽएहि सरस्वत्येही'तीडा हि गौरदितिर्हि गौः सरस्वती हि गौरथो वैराह्वयति नाम्ना'सावेत्यसावेही'ति त्रिः ॥ ७ ॥ तामागतामभिदधाति । 'अदित्यै रास्नासीन्द्राण्या ऽउष्णीष' ऽइतीन्द्राणी ह वा ऽइन्द्रस्य प्रिया पत्नी तस्या ऽउष्णीषो विश्वरूपतमः सोऽसीति तदाह तमेवैनमेतत्करोति ॥ ८ ॥ अथ वत्समुपार्जति । 'पूषाँसी'त्ययं वै पूषा योऽयन्पवत ऽएष हीदꣳ सर्वम्पुष्यत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह पूषासीति ॥ ९ ॥ अथोन्नयति । 'घर्म्मार्य दीष्वे'त्येष वा ऽअत्र घर्म्मो रसो भवति यमेषा पिन्वते तस्यै दयस्वेत्येवैतदाह ॥ १० ॥ अथ पिन्वने पिन्वयति । 'अश्विभ्याम्पिन्वस्वे'त्यश्विनावेवैतदाहाश्विनौ वा ऽएतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति तस्मादाहा-

(१) शु० य० सं० ३८. १ । (२) 'ग' 'ज' पुस्तकयो. "ऽदित्यै" इति पाठो न दृश्यते । (३) शु० य० सं० ३८. २ । (४) "नै" इति 'ग' 'ज' पुस्तकयो. । (५) शु० य० सं० ३८. २ । (६) शु० य० ३८ ३ । (७) शु० य० सं० ३८ ३ । (८) शु० य० सं० ३८. ३ । (९) शु० य० सं० ३८. ४ ।

श्विभ्यामिन्वस्वेति ॥ ११ ॥ 'सरस्वत्यै पिन्वस्वे'ति । वाग्वै सरस्वती वाचा वा एतदश्विनौ यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति तस्मादाह सरस्वत्यै पिन्वस्वेति ॥ १२ ॥ 'इन्द्राय पिन्वस्वे'ति । इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैतदश्विनौ यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति तस्मादाहेन्द्राय पिन्वस्वेति ॥ १३ ॥ अथ विप्रुषोऽभिमन्त्रयते । 'स्वाहेन्द्रवत्स्वाहेन्द्रव'दितीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतत्प्रीणाति तस्मादाह स्वाहेन्द्रवत्स्वाहेन्द्रवदिति त्रिष्कृत्व आह त्रिवृद्धि यज्ञोऽवरुद्ध्यै स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥ १४ ॥ अथास्यै स्तनमभिपद्यते । 'यस्ते स्तनः शशयो यो मयोभू'रिति यस्ते स्तनो निहितो गुहायामित्येवैतदाह 'यो रत्नधा वसुविद्यः सुदत्र' इति यो धनानान्दाता वसुवित्पणाय्य इत्येवैतदाह 'येन विश्वा पुष्यसि वार्याणी'ति येन सर्वान्देवान्त्सर्वाणि भूतानि बिभर्षीत्येवैतदाह 'सरस्वति तमिह धातवेऽक'रिति वाग्वै सरस्वती सैषा घर्मदुघा यज्ञो वै वाग्यज्ञमस्मभ्यम्प्रयच्छ येन देवान्प्रीणामेत्येवैतदाहाथ गार्हपत्यस्यार्द्धमे'त्युर्वन्तरिक्षमन्वेमी'त्यसावेव बन्धुः ॥ १५ ॥ अथ शफावादत्ते । 'गायत्रञ्छन्दोऽसि त्रैष्टुभञ्छन्दोऽसी'ति गायत्रेण चैवैना-

(१) शु० य० सं० १८. ४। (२) शु० य० सं० १८. ४। (३) शु० य० सं० १८. ४। (४) शु० य० सं० १८. ५। (५) शु० य० सं० १८. ५। (६) शु० य० सं० १८. ५। (७) शु० य० सं० १८ ५। (८) शु० य० सं० १८. ५। (९) शु० य० सं० १८. ६।

वेतत्त्रैष्टुभेन च च्छन्दसादत्ते 'द्यावापृथिवीभ्यान्त्वा परिगृह्णामी'तीमे वै द्यावापृथिवी परीशासावादित्यः प्रवर्ग्योऽमुन्तदादित्यमाभ्यान्द्यावापृथिवीभ्याम्परिगृह्णात्यथ मौञ्जेन बेदेनोपमाष्टर्यसावेव बन्धुः ॥ १६ ॥ अथोपयमन्योपगृह्णाति । 'अन्तरिक्षेणोपयच्छामी'त्यन्तरिक्षं वा ऽउपयमन्यन्तरिक्षेण हीदः सर्वमुपयतमथो ऽउदरं वा ऽउपयमन्युदरेण हीदः सर्वमन्नाद्यमुपयतन्तस्मादाहान्तरिक्षेणोपयच्छामीति ॥ १७ ॥ अथाजाक्षीरमानयति । तप्तो वा ऽएष शुशुचानो भवति तमेवैतच्छमयति तस्मिञ्छान्ते गोक्षीरमानयति ॥ १८ ॥ 'इन्द्राश्विनेभ्यां'ति । इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतत्प्रीणात्यश्विनेत्यश्विनावेवैतदाहाश्विनौ वा ऽएतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति तस्मादाहेन्द्राश्विनेति ॥ १९ ॥ 'मधुनेः सारघस्ये'ति । एतद्वै मधु सारघ'ङ्कर्म्मम्पाते'ति रसम्पातेत्येवैतदाह 'वसवे' ऽइत्येते वै वसव ऽएते हीदः सर्वं वासयन्ते 'यजँत वा'ड्डिति तद्यथा वषट्कृतः हुतमेवमस्यैतद्भवति ॥ २० ॥ 'स्वाहा सूर्य्यस्य रश्म्मये वृष्टिवनय' ऽइति । सूर्य्यस्य ह वा ऽएको रश्मिर्वृष्टिवनिर्न्नाम येनेमाः सर्वाः प्रजा विभर्त्ति तमेवैतत्प्रीणाति तस्मादाह स्वाहा सूर्य्यस्य रश्म्मये वृष्टिवनय ऽइत्यवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥२१॥ अथैतद्वै । आयुरेतज्ज्योतिः

(१) शु० य० सं० १८. ६ । (२) शु० य० सं० १८. ६ । (३) शु० य० सं० १८. ६ । (४) शु० य० सं० १८. ६ । (५) शु० य० सं० १८. ६ । (६) शु० य० सं० १८. ६ । (७) शु० य० सं० १८. ६ । (८) शु० य० सं० १८. ६ ।

प्रविशति य ऽएतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्या षा सृष्टौ ॥ २२ ॥

द्वितीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

माध्यन्दिनीये शतपथब्राह्मणे प्रथमः प्रपाठकः ॥ १ ॥
कण्डिकासंख्या ॥ १३२ ॥

—०—

[प्रवर्ग्यानुष्ठानम्]

स यत्रैताश्ं होतान्व्राह । 'प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृते'ति तदद्धर्युः प्राङुदायन्वातनामानि जुहोत्येतद्वै देवा ऽअबिभयुर्य्यद्वै न ऽइममन्तरा रक्षाश्ंसि नाष्ट्रा न हन्न्युरिति तमेतत्पुरैवाहवनीयात्स्वाहाकारेणाजुहवुस्तद्धुतमेव सन्तमग्नावजुहवुस्तथो ऽएवैनमेष ऽएतत्पुरैवाहवनीयात्स्वाहाकारेण जुहोति तद्धुतमेव सन्तमग्नौ जुहोति ॥ १ ॥ 'समुद्राय त्वा वाताय स्वाहे'ति । अयं वै समुद्रो योऽयम्पवत ऽएतस्माद्वै समुद्रात्सर्वे देवाः सर्वाणि भूतानि समुद्रवन्ति तस्मा ऽएवैनञ्जुहोति तस्मादाह समुद्राय त्वा वाताय स्वाहा ॥ २ ॥ 'सरिराय त्वा वाताय स्वाहे'ति । अयं वै सरिरो योऽयम्पवत ऽएतस्माद्वै सरिरात्सर्वे देवाः सर्वाणि भूतानि सहेरते तस्मा ऽएवैनञ्जुहोति तस्मादाह सरिराय त्वा वाताय स्वाहा ॥ ३ ॥ 'अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा

(१) शु० य० सं० १७. ७। (२) शु० य० सं० १८. ७। (३) शु० य० सं० १८. ७। (४) शु० य० सं० १८. ७।

व्रताय स्वाहे'ति । अयं वा ऽअनाधृष्ट्योऽप्रतिधृष्ट्यो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाहानाधृष्ट्याय त्वा व्रताय स्वाहा प्रतिधृष्ट्याय त्वा व्रताय स्वाहेति ॥ ४ ॥ [1]'अवस्यवे त्वा व्रताय स्वाहाशिमिदाय त्वा व्रताय स्वाहे'ति । अयं वा ऽअवस्युरशिमिदो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाहावस्यवे त्वा व्रताय स्वाहाशिमिदाय त्वा व्रताय स्वाहेति ॥ ५ ॥ '[2]इन्द्राय त्वा वसुमते रुद्रवते स्वाहे'ति । अयं वा ऽइन्द्रो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाहेन्द्राय त्वेति वसुमते रुद्रवत ऽइति तदिन्द्रमेवानु वसूँश्च रुद्राँश्चाभजत्यथो प्रातःसवनस्य चैवैतन्माध्यन्दिनस्य च सवनस्य रूपङ्क्रियते ॥ ६ ॥ '[3]इन्द्राय त्वादित्यवते स्वाहे'ति । अयं वा ऽइन्द्रो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाहेन्द्राय त्वेत्यादित्यवत ऽइति तदिन्द्रमेवान्वादित्यानाभजत्यथो तृतीयसवनस्यैवैतद्रूपङ्क्रियते ॥ ७ ॥ '[4]इन्द्राय त्वाभिमातिघ्ने स्वाहे'ति । अयं वा ऽइन्द्रो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाहेन्द्राय त्वेत्यभिमातिघ्न ऽइति सपत्नो वा ऽअभिमातिरिन्द्राय त्वा सपत्नघ्न ऽइत्येवैतदाह सोऽस्योद्धारो यथा श्रेष्ठस्योद्धार ऽएवमस्यैष ऽऋते देवेभ्यः ॥ ८ ॥ 'सवित्रे त्व ऽऋभुमते विभुमते वाजवते स्वाहे'ति । अयं वै सविता योऽयम्पवते तस्मा

(१) शु० य० सं० १८. ७ । (२) शु० य० सं० १८. ८ । (३) शु० य० सं० १८. ८ । (४) शु० य० सं० १८. ८ । (५) शु० य० सं० १८. ८ ।

ऽएवैनञ्जुहोति तस्मादाह सविश्रे त्वेत्यृभुमते विभुमते वाजवत ऽइति तदस्मिन्विश्श्वान्देवानन्वाभजति ॥ ९ ॥ 'बृहस्पतये त्वा विश्श्वदेव्यावते स्वाहे'ति । अयं वै बृहस्पतिर्य्योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाह बृहस्पतये त्वेति विश्श्वदेव्यावत ऽइति तदस्मिन्विश्श्वान्त्सर्व्वान्देवानन्वाभजति ॥ १० ॥ 'यमाय त्वाङ्गिरस्वते पितृमते स्वाहे'ति । अयं वै यमो योऽयम्पवते तस्मा ऽएवैनञ्जुहोति तस्मादाह यमाय त्वेत्यङ्गिरस्वते पितृमत ऽइति यज्ञस्य शीर्षच्छिन्नस्य * पितृनगच्छन्नया वै पितरस्तानेवैतदन्वाभजति ॥ ११ ॥ द्वादशैतानि नामानि भवन्ति । द्वादश वै मासाः सँवत्सरस्य सँवत्सर ऽएष य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्माद्द्वादश भवन्ति ॥ १२ ॥ अथोपयमन्या महावीर ऽआनयति । 'स्वाहा घर्म्मायेत्येष वै घर्म्मो य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह स्वाहा घर्म्मायेत्यवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥ १३ ॥ आनीते जपति । 'स्वाहा घर्म्मः पित्र' ऽइति यज्ञस्य शीर्षच्छिन्नस्य * पितृनगच्छन्नया वै पितरस्तानेवैतत्प्रीणात्यवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥ १४ ॥ नानुवाक्या-

(१) शु० य० सं० १८. ८ । (२) शु० य० सं० १८. ९ ।

* अत्र "रसो ऽभ्यक्षरत्स्व" इत्यधिकः पाठः 'ग' 'ञ' पुस्तकयोः [ ] इति विद्वान्तर्गत उपलभ्यते ।

(३) शु० य० सं० १८. ९ । (४) शु० य० सं० १८. ६ ।

मन्वाह । सकृदु ह्येव पराञ्चः पितरस्तस्मान्नानुवाक्यामन्वाहातिक्रम्याश्राव्याह घर्म्मस्य यजेति वषट्कृते जुहोति ॥ १५ ॥ 'विश्वा ऽआशा दक्षिणस'दिति । सर्वा ऽआशा दक्षिणसदित्येवैतदाह 'विश्वान्देवानयाडिहे'ति सर्वान्देवानयाक्षीदिहेत्येवैतदाह 'स्वाहाकृतस्य घर्म्मस्य मधोः पिबतमश्विने'त्यश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणात्यवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥ १६ ॥ अथ हुत्वोर्द्धमुत्कम्पयति । 'दिवि धा ऽइमं यज्ञमिमं यज्ञन्दिवि धा' ऽइत्यसौ वा ऽआदित्यो घर्म्मो यज्ञो दिवि वा ऽएष हितो दिवि प्रतिष्ठितस्तमेवैतत्प्रीणाति तस्मादाह दिवि धा ऽइमं यज्ञमिमं यज्ञन्दिवि धा ऽइत्यनुवषट्कृते जुहोति ॥ १७ ॥ 'स्वाहाग्नये यज्ञियाये'ति । तत्स्विष्टकृद्भ्राजन्नग्निर्हि स्विष्टकृ'च्छꣳ यजुर्भ्य' ऽइति यजुर्भिर्ह्येषोऽस्मिँल्लोके प्रतिष्ठितस्तान्येवैतत्प्रीणात्यवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः ॥ १८ ॥ अथ ब्रह्मानुमन्त्रयते । ब्रह्मा वा ऽऋत्विजाम्भिषक्तमस्तद्य ऽएवऽर्त्विजाम्भिषक्तमस्तेनैवैतद्यज्ञम्भिषज्यति ॥ १९ ॥ *'अश्विना घर्म्मम्पात'मिति । अश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति ॥ २० ॥*

(१) शु० य० सं० ३८. १०। (२) शु० य० सं० ३८. १०। (३) शु० य० सं० ३८. १०। (४) शु० य० सं० ३८. ११। (५) शु० य० सं० ३८. ११। (६) शु० य० सं० ३८. ११। (७) "स्तेनैवैनमेत०" इति 'ग' 'ञ' पुस्तकयोः पाठः। (८) शु० य० सं० ३८. १२।

'हार्द्वानेमहर्द्विवाभिरूतिभि'रिति । अनिरुक्तमनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञम्भिषज्यति ॥ २१ ॥ 'तन्त्रायिण' ऽइति । एष वै तन्त्रायी य ऽएष तपत्येष हीमाँल्लोकाँस्तन्त्रमिवानुसञ्चरत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह तन्त्रायिण ऽइति ॥ २२ ॥ 'नमो द्यावापृथिवीभ्या'मिति । तदाभ्यान्द्यावापृथिवीभ्यान्निह्नुते ययोरिदः सर्वमधि ॥ २३ ॥ अथ यजमानः । यज्ञो वै यजमानो यज्ञेनैवैतद्यज्ञम्भिषज्यति ॥२४॥ 'अर्पातामश्विना घर्म्म'मिति । अश्विनावेवैतदाहाश्विनौ ह्येतद्यज्ञस्य शिरः प्रत्यधत्तान्तावेवैतत्प्रीणाति ॥ २५ ॥ 'अनु द्यावापृथिवी ऽअमदःसाता'मिति । तदिमे द्यावापृथिवी ऽआह ययोरिदः सर्वमधी'हैव रातयः सन्तिवतीहैव नो धनानि सन्त्वित्येवैतदाह ॥ २६ ॥ अथ पिन्वमानमनुमन्त्रयते * । 'इषे पिन्वस्वे'ति वृष्ट्यै तदाह यदाहेषे पिन्वस्वेत्यू'र्जे पिन्वस्वे'ति यो वृष्टादूर्ग्रसो जायते तस्मै तदाह 'ब्रह्मणे पिन्वस्वे'ति तद्ब्रह्मण ऽआह 'क्षत्राय पिन्वस्वे'ति तत्क्षत्रायाह 'द्यावापृथिवीभ्याम्पिन्वस्वे'ति तदाभ्यान्द्यावापृथिवीभ्यामाह ययोरिदः सर्वमधि ॥ २७ ॥ स यदूर्जं पिन्वते । तद्यजमानाय पिन्वते

(१) शु० य० सं० ३८. १२। (२) शु० य० सं० १८. १२। (३) शु० य० सं० ३८. १२। (४) शु० य० सं० ३८. ११। (५) शु० य० सं० ३८. ११। (६) शु० य० सं० ३८. ११।

* का० श्रौ० सू० २६. ६. ८।

(७) शु० य० सं० ३८. १४। (८) शु० य० सं० ३८. १४। (९) शु० य०

यत्प्राङ् तद्देवेभ्यो यद्दक्षिणा तत्पितृभ्यो यत्प्रत्यङ् तत्पशुभ्यो यदुदङ् तत्प्रजाया ऽअनपराङ्न्त्वेव यजमानस्योर्द्धो ह्येव पिन्वित्त्वा[2]थ यान्दिशम्पिन्वते तान्पिन्वते यदा शाम्यन्ति विप्रुषः ॥ २८ ॥ अथ प्राङिवोदङ्डुत्क्रामति*। '[3]धर्म्मासि सुधर्म्मे'त्येष वै धर्म्मो य ऽएष तपत्येष हीदꣳ सर्व्वन्धारयत्येतेनेदꣳ सर्व्वन्धृतमेष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह धर्म्मासि सुधर्म्मेति ॥ २९ ॥ अथ खरे सादयति । '[4]अमेन्यस्मे नृम्णानि धारये'त्यक्रुक्षन्नो धनानि धारयेत्येवैतदाह 'ब्रह्म धारय क्षत्रन्धारय विशन्धारये'त्येतत्सर्व्वन्धारयेत्येवैतदाह ॥३०॥ अथ शाकलैर्जुहोति । प्राणा वै शाकलाः प्राणानेवास्मिन्नेतद्दधाति ॥ ३१ ॥ 'स्वाहा[5] पूष्णे शरस' इति । अयं वै पूषा योऽयम्पवत ऽएष हीदꣳ सर्व्वम्पुष्यत्येष ऽउ प्राणः प्राणमेवास्मिन्नेतद्दधाति तस्मादाह स्वाहा पूष्णे शरस ऽइत्यवरꣳ स्वाहाकारङ्करोति परान्देवतामस्रावेव वन्धुर्हुत्वा मध्यमे परिधा ऽउपश्रयति ॥ ३२ ॥ 'स्वाहा[6] ग्रावभ्य' ऽइति । प्राणा वै ग्रावाणः प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधा ऽउपश्रयति ॥ ३३ ॥ 'स्वाहा प्रतिरवेभ्य' ऽइति । प्राणा वै प्रतिरवाः प्राणान्हीदꣳ सर्व्वम्प्रतिरत-

(१) "न्वेव" इति 'ग' 'ज' पुस्तकयो. । (२) "पिन्वत्त्याय" इति 'ग' 'ज' पुस्तकयोः ।

* 'धर्म्मासीत्युत्कामत्युत्तरपूर्वार्द्धम्' का० श्रौ० सू० २६. ६. ९) इति ।

(३) शु० य० सं० ३८. १४ । (४) शु० य० सं० ३८. १४ । (५) शु० य० सं० ३८. १४ । (६) शु० य० सं० ३८. १५ ।

म्प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधा ऽउप-
इश्रयति ॥ ३४ ॥ 'स्वाहा पितृभ्य ऽऊर्ङ्बर्हिर्भ्यो घर्म्म-
पावभ्य' ऽइति । अहुत्वैवोदङ्ङीक्षमाणो दक्षिणार्द्धं
बर्हिष ऽउपगूहति यज्ञस्य शीर्षच्छिन्नस्य * पितृनगच्छ-
त्रया वै पितरस्तानेवैतत्प्रीणात्यथ यन्न प्रेक्षते सकृदु
ह्येव पराञ्चः पितरः ॥ ३५ ॥ 'स्वाहा द्यावापृथिवी-
भ्या'मिति । प्राणोदानौ वै द्यावापृथिवी प्राणोदाना-
वेवास्मिन्नेतद्दधाति हुत्वा मध्यमे परिधा ऽउपइश्रयति
॥ ३६ ॥ 'स्वाहा विश्वेभ्यो देवेभ्य ऽइति । प्राणा वै
विश्वे देवाः प्राणानेवास्मिन्नेतद्दधाति हुत्वा मध्यमे
परिधा ऽउपइश्रयति ॥ ३७ ॥ 'स्वाहा रुद्राय रुद्रहूतय'
ऽइति । अहुत्वैव दक्षिणेक्षमाणः प्रतिप्रस्थात्रे प्रय-
च्छति तः स ऽउत्तरतः शालाया ऽउदञ्चन्निरस्यत्येषा
ह्येतस्य देवस्य दिक्स्वायामेवैनमेतद्दिशि प्रीणात्यथ यन्न
प्रेक्षते नेन्मा रुद्रो हिनसदिति ॥ ३८ ॥ सप्तैता ऽआहु-
तयो भवन्ति । सप्त वा ऽइमे शीर्षन्प्राणास्तानेवास्मि-
न्नेतद्दधाति ॥ ३९ ॥ अथ महावीरादुपयमन्यामप्रत्यानयति।
'स्वाहा सञ्ज्योतिषा ज्योति'रिति ज्योतिर्वा ऽइतरस्मि-
न्नप्रयो भवति ज्योतिरितरस्यान्ते ह्येतदुभे ज्योतिषी सङ्-
च्छेते ऽअवरꣳ स्वाहाकारङ्करोति परान्देवतामसावेव बन्धुः

* अत्र "रसो व्यक्षरत्स" इत्यधिकः पाठः 'ग' 'ज' पुस्तकयोः [ ] इति विद्वान्तर्गत उपलभ्यते।

(१) शु० य० सं० ३८. १५। (२) शु० य० सं० ३८. १५। (३) शु० य० सं० ३८. १५। (४) शु० य० सं० ३८. १६। (५) शु० य० सं० ३८. १६।

॥ ४० ॥ * अथ रौहिणौ जुहोति । 'अहे॑: केतुना जुषताꣳ सुज्ज्योतिर्ज्योतिषा स्वाहे॑'त्यसावेव व॒न्धूः 'रात्रि॑: केतुना जुषताꣳ सुज्ज्योतिर्ज्योतिषा स्वाहे॑'त्यसावेव व॒न्धुः ॥ ४१ ॥ अथ यजमानाय घर्म्मोच्छिष्टम्प्रयच्छति । स ऽउपहव॒मिष्ट्वा भक्षयति 'मधु॑ हुतमिन्द्रतमे ऽअग्नावि॒'ति मधु हुतमिन्द्र-यवत्तमेऽग्नावित्येवैतदाहा'इश्यां॑म ते देव घर्म्म नमस्ते ऽअस्तु मा मा हिꣳसी॑रित्याशिषमेवैतदाशास्ते ॥ ४२ ॥ अथ दक्षिणतः सिकता ऽउपकीर्णा भवन्ति । तन्मार्ज्-यन्ते य ऽएव॒ मार्ज्जालीये व॒न्धुः सोऽत्रानुप्प्रहरति शाक-लानथोपसदा चरन्त्येतदु यज्ञस्य शिरः संस्कृतं स्यथा यथैनन्तदश्विनौ प्रत्यधत्ताम् ॥ ४३ ॥ तन्न प्रथमयज्ञे प्प्रवृञ्ज्यात् । एनस्यः हि तदथो नेन्न ऽइन्द्रः शिरश्छिनद्-दिति द्वितीये वैव॒ तृतीये वापशीर्ष्णा ह्येवाग्रे यज्ञेन देवा ऽअर्च्चन्तः श्राम्म्यन्तश्चेरुस्तस्माद्द्वितीये वैव॒ तृतीये वाथो तप्तो वा ऽएष शुशुचानो भवति ॥ ४४ ॥ तं स्यत्प्रथम-यज्ञे प्प्रवृञ्ज्यात् । एषोऽस्य तप्तः शुशुचानः प्रजाश्च पशूँश्च प्प्रदहेदथो ऽआयुः प्प्रमायुको यजमानः स्यात्त-स्माद्द्वितीये वैव॒ तृतीये वा ॥ ४५ ॥ तन्न सर्व्वस्मा ऽइव प्प्रवृञ्ज्यात् । सर्वं वै प्प्रवर्ग्यो नेत्सर्व्वस्मा ऽइव सर्वङ्करवाणीति यो न्वेव ज्ञातस्तस्मै प्प्रवृञ्ज्याद्यो वास्य-प्प्रियः स्याद्यो वानूचानोऽनूक्तेनैनम्प्राप्नुयात् ॥ ४६ ॥

* अत्र शतम् ७०००।

(१) शु० य० सं० १८. १६। (२) शु० य० सं० १८. १६। (३) शु० य० सं० १८. १६। (४) शु० य० सं० १८. १६।

सहस्रे प्रवृञ्ज्यात्। सर्वं वै सहस्रꣳ सर्वमेष सर्ववेदसे प्रवृञ्ज्यात्सर्वं वै सर्ववेदसꣳ सर्वमेष विश्वजिति सर्वपृष्ठे प्रवृञ्ज्यात्सर्वं वै विश्वजित्सर्वपृष्ठꣳ सर्वमेष वाजपेये राजसूये प्रवृञ्ज्यात्सर्वꣳ हि तत्सत्रे प्रवृञ्ज्यात्सर्वं वै सत्रꣳ सर्वमेष ऽएतान्यस्य प्रवर्ज्जनान्यतो नान्यत्र ॥ ४७ ॥ तदाहुः। यदुपशिरा ऽअप्रवग्र्योऽथ केनास्याग्निहोत्रꣳ शीर्षण्वद्भवतीत्याहवनीयेनेति ब्रूयात्कथन्दर्शपूर्णमासावित्याज्येन च पुरोडाशेन चेति ब्रूयात्कथञ्चातुर्म्मास्यानीति पयस्ययेति ब्रूयात्कथम्पशुबन्ध ऽइति पशुना च पुरोडाशेन चेति ब्रूयात्कथꣳ सौम्योऽध्वर ऽइति हविर्द्धानेनेति ब्रूयात् ॥ ४८ ॥ अथो ऽआहुः। यज्ञस्य शीर्षच्छिन्नस्य शिर ऽएतद्देवाः प्रत्यदधुर्य्यदातिथ्यन्न ह वा ऽअस्यापशीर्ष्णा केन चन यज्ञेनेष्टम्भवति य ऽएवमेतद्वेद ॥ ४९ ॥ तदाहुः। यत्प्रणीताः प्रणयन्ति यज्ञेऽथ कस्मादुत्र न प्रणयतीति शिरो वा ऽएतद्यज्ञस्य यत्प्रणीताः शिरः प्रवग्र्यो नेच्छिरसा शिरोऽभ्यारोहयाणीति ॥ ५० ॥ तदाहुः। यत्प्रयाजानुयाजा ऽअन्यत्र भवन्त्यथ कस्मादुत्र न भवन्तीति प्राणा वै प्रयाजानुयाजाः प्राणा ऽअवकाशाः प्राणाः शाकला नेत्प्राणैः प्राणानभ्यारोहयाणीति ॥ ५१ ॥ तदाहुः। यदाज्यभागावन्यत्र जुह्वत्यथ कस्मादुत्र न जुहोतीति चक्षुषी वा ऽएते यज्ञस्य यदाज्यभागौ चक्षुषी रौहिणौ नेच्चक्षुषा चक्षुरभ्यारोहयाणीति ॥ ५२ ॥ तदाहुः। यद्वा-

नस्पत्यैर्देवेभ्यो जुह्वत्यथ कस्मादेतम्मृन्मयेनैव जुहोतीति यज्ञस्य शीर्षच्छिन्नस्य रसो व्यक्षरत्स ऽइमे द्यावापृथिवी ऽअगच्छद्यन्मृदियन्तद्यदापोऽसौ तन्मृदुश्चापाश्च महावीराः कृता भवन्ति तेनैवनमेतद्रसेन समर्द्धयति कृत्स्नङ्करोति ॥ ५३ ॥ स यद्वानस्पत्यः स्यात् । प्रदह्येत यद्धिरण्मयः स्यात्प्रलीयेत यल्लोहमयः स्यात्प्रसिच्येत यदयस्मयः स्यात्प्रदहेत्परीशासावथैष ऽएवैतम्मा ऽअतिष्ठत तस्मादेतम्मृन्मयेनैव जुहोति ॥ ५४ ॥ अथैतद्वै । आयुरेतज्ज्योतिः प्रविशति य ऽएनमनु वा व्रूते भक्षयति वा तस्य व्रतचर्य्या या सृष्टौ ॥ ५५ ॥

द्वितीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

—०—

[प्रवर्ग्योत्सादनम्]

स वै तृतीयेऽहन् । षष्ठे वा द्वादशे वा प्रवर्ग्योपसदौ समस्य प्रवर्ग्यमुत्सादयत्युत्सन्नमिव हीदः शिरस्तद्यदेतमभितो भवति तत्सर्वदः समादायाग्नेण शालामन्तर्वेद्युपसमायन्ति ॥ १० ॥ अथाग्नीद्धः । आहवनीये* त्रीञ्छालाकानुपकल्पयते तेषामेकमुज्वलय्य मुखदग्धे धार्यमाणो जुहोति यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्तेमाँ-

* तथा च कात्यायनः—'आहवनीये त्रीञ्छालाकान्प्रदीप्य प्रदीप्याग्नीध्रो धारयति शतरुद्रियवत्प्रतिलोमं प्रमाणेषु' (का० श्रौ० सू० १६. ७. १) इति ।

ल्लोकानाविशत्तयैवैनमेतच्छुचा समर्द्धयति कृत्स्नङ्करोति ॥ २ ॥ अथ यन्न्मुखदग्ने । उपरीव वै तद्यन्न्मुखदग्न-मुपरीव तद्यदसौ लोकस्तद्यमुँल्लोकः शुगाविशत्तयैवैनमेतच्छुचा समर्द्धयति कृत्स्नङ्करोति ॥ ३ ॥ 'या[1] ते घर्म्म दिव्या शु'गिति । यैव दिव्या शु'ग्[2]या गायत्र्याꣳ हविर्द्धान' इति यैव गायत्र्याꣳ हविर्द्धाने 'सा[3] त ऽआप्प्यायतान्निष्ट्यायतान्तस्यै ते स्वाहे'ति नात्र तिरोहितमिवास्ति ॥ ४ ॥ अथ द्वितीयमुज्वलय्य । नाभिदग्ने धार्य्यमाणो जुहोति मध्यमिव वै तद्यन्नाभिदग्नम्मध्यमिवान्तरिक्षलोकस्तद्यान्तरिक्षलोकः शुगाविशत्तयैवैनमेतच्छुचा समर्द्धयति कृत्स्नङ्करोति ॥ ५ ॥ 'या[4] ते घर्म्मान्तरिक्षे शु'गिति । यैवान्तरिक्षे शु'ग्[5]या त्रिष्टुब्भ्याग्नीद्र' ऽइति यैव त्रिष्टुब्भ्याग्नीद्रे 'सा त ऽआप्प्यायतान्निष्ट्यायतान्तस्यै ते स्वाहे'ति नात्र तिरोहितमिवास्ति ॥६॥ [अर्धः प्रपाठकः ॥ ६१ ॥] अथ तृतीयमभ्याधाय । तस्मिन्नासीनो जुहोत्यध ऽइव वै तद्यदासीनोऽध ऽइव तद्यदयँल्लोकस्तद्यमँल्लोकः शुगाविशत्तयैवैनमेतच्छुचा समर्द्धयति कृत्स्नङ्करोति ॥ ७ ॥ 'या[6] ते घर्म्म पृथिव्याꣳ शु'गिति । यैव पृथिव्याꣳ शु'ग्या जगत्याꣳ सदस्ये'ति यैव जगत्याꣳ सदस्या 'सा[7] त ऽआप्प्यायतान्निष्ट्यायतान्तस्यै ते स्वाहे'ति नात्र तिरोहितमिवास्ति ॥ ८ ॥ अथो-

(१) शु० य० सं० १८. १८। (२) शु० य० सं० १८. १८। (३) शु० य० सं० १८. १८। (४) शु० य० सं० १८ १८। (५) शु० य० सं० १८ १८। (६) शु० य० सं० १८. १८। (७) शु० य० सं० १८. १८। (८) शु० य० सं० १८. १८। (९) शु० य० सं० १८. १८।

पनिष्क्रामति । 'क्षत्रस्य त्वा परस्पाये'[1]त्येतद्वै दैवं क्षत्रं य ए॒ष तपत्यस्य त्वा मानुषस्य क्षत्रस्य परस्पत्त्वाये[2]त्येवैतदाह 'ब्रह्मणस्तनूवम्पाही'[3]ति ब्रह्मण आत्मानङ्गोपाये[4]त्येवैतदाह 'विशस्त्वौ धर्म्मणा वय'मिति यज्ञो वै विड्यज्ञस्य त्वारिष्ट्या उ॒त्येवैतदाह॒'नुक्रामाम सुविताय नव्यस' उ॒ति यज्ञस्य-त्वारिष्ट्या अह्वलाया उ॒त्येवैतदाह ॥ ९ ॥ अथाह साम गायेति । साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्गायन्ति हि साम तद्यत्साम गायति नेदिमान्यवहिर्द्धा यज्ञाच्छरीरान्नाष्ट्रा रक्षाꣳसि हिनसन्निति साम हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥ १० ॥ आग्नेय्यागायति । अग्निर्हि रक्षसामपहन्तातिच्छन्दसि गायत्येषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तस्मादतिच्छन्दसि गायति ॥ ११ ॥ स गायति । अग्निष्टपति प्रतिदहत्यहावोऽहाव उ॒ति तन्नाष्ट्रा उ॒[5]एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥ १२ ॥ त उदञ्चो निष्क्रामन्ति । जघनेन चात्वालमग्रेणाग्नीध्रमेषा हि यज्ञस्य द्वाः स यस्यान्ततो दिश्यापो भवन्ति तद्यन्ति ॥ १३ ॥ तं वै परिष्यन्द उत्सादयेत् । तप्तो वा ए॒ष शुशुचानो भवति तं य॒दस्यामुत्सादयेदिमामस्य शुगृच्छेद्यदुप्प्सूत्सादयेदपोऽस्य शुगृच्छेदथ यत्परिष्यन्द उ॒त्सादयति तथो हु नैवापो हिनस्ति नेमां य॒दुहाप्सु न प्रास्यति तेनापो न हिनस्त्यथ यत्समन्तमापः परियन्ति शान्तिर्वा आप-

(१) शु० य० सं० ३८. १९ । (२) "परस्पाये०" इति 'ग' 'ज' पुस्तकयोः । (३) शु० य० सं० ३८. १९ । (४) शु० य० सं० ३८. १९ । (५) शु० य० सं० ३८. १९ । (६) "वै तद्र०" इति 'ग' 'ज' पुस्तकयोः ।

स्तेनो ऽइमान्न हिनस्ति तस्मात्परिष्यन्द ऽउत्सादयेत् ॥ १४ ॥ उत्तरवेदौ स्वेवोत्सादयेत् । यज्ञो वा ऽउत्तरवेदिः शिरः प्रवर्ग्यो यज्ञ ऽएवैतच्छिरः प्रतिदधाति ॥ १५ ॥ उत्तरनाभ्या सꣳस्पृष्टम् । प्रथमम्प्रवर्ग्यमुत्सादयति द्वाग्वा ऽउत्तरनाभिः शिरः प्रवर्ग्यः शीर्षंस्तद्वाचन्दधाति ॥ १६ ॥ [1]'चतुःस्रक्ति'रिति । एष वै चतुःस्रक्तिर्य्य ऽएष तपति दिशो ह्येतस्य स्रक्तयस्तस्मादाह चतुःस्रक्तिरिति ॥ १७ ॥ [2]'नाभिर्ऋतस्य सप्रथा' ऽइति । सत्यं वा ऽऋतꣳ सत्यस्य नाभिः सप्रथा ऽइत्येवैतदाह [3]'स नो विश्श्वायुः सप्रथा' ऽइति स न सर्व्वायुः सप्रथा ऽइत्येवैतदाह ॥ १८ ॥ [4]'अर्पे द्वेषो ऽअप ह्वर' ऽइति । नात्र तिरोहितमिवास्त्य[5]'ऋ्यव्रतस्य सश्चिमे'त्यृग्यद्वा ऽएतस्य व्रतमृग्यꣳमनुष्याणान्तस्मादाहाऋ्यव्रतस्य सश्चिमेत्यवमितरौ प्राञ्चौ तत्त्रिवृत्त्रिवृद्धीदꣳ शिरः ॥ १९ ॥ पुरस्तादुपशयाम्मृदम् । माꣳसमेवास्मिन्नेतद्दधाति तदभितः परीशासौ * वाहू ऽएवास्मिन्नेतद्दधात्यभितः परे रोहिणहुवर्ग्यौ स्रुचौ हस्तावेवास्मिन्नेतद्दधाति ॥ २० ॥ उत्तरतोऽभ्रिम् † । तद्धि तस्या ऽआयतनन्दक्षिणतः सम्भ्राडासन्दीन्तद्धि तस्या ऽआयतनमुत्तरतः कृष्णाजिनन्तद्धि तस्यायतनꣳ सर्व्वतो धविष्प्राणि ‡ प्राणा वै धविष्प्राणि प्राणानेवास्मिन्नेतद्-

(१) शु० य० सं० १८. २०। (२) शु० य० सं० १८. २०। (३) शु० य० सं० १८. २०। (४) शु० य० सं० १८. २०। (५) शु० य० सं० १८. २०।

* 'परीशासावभितः' (का० श्रौ० सू० २६. ७. १७) इति।

† 'अभ्रिमुत्तरतः' (का० सू० २६. ७. १९) इति।

‡ का० श्रौ० सू० २६. ७. २२।

धाति त्रीणि भवन्ति त्रयो वै प्राणाः प्राण ऽउदानो व्यानस्तानेवास्मिन्नेतद्दधाति ॥२१॥ अथैतद्रज्जुसन्दानम् । उपयमन्न्यामाधाय पश्चात्प्राचीमासादयत्युदरमेवास्मिन्नेतद्दधाति तदभितः पिन्वने ऽआण्डावेवास्मिन्नेतद्दधात्याण्डाभ्याꣳ हि व्वृषा पिन्वते पश्चात्स्थूणामयूखमूरू ऽएवास्मिन्नेतद्दधाति पश्चाद्रौहिणकपाले जानुनी ऽएवास्मिन्नेतद्दधाति ते यदेककपाले भवत ऽएककपाले ऽइव हीमे जानुनी पश्चाद्धृष्टी पादावेवास्मिन्नेतद्दधाति पादाभ्याꣳ हि धृष्टम्प्रहरत्युत्तरतः खरौ प्रचरणीयौ तद्धि तयोरायतनन्दक्षिणतो मार्ज्जालीयन्तद्धि तस्यायतनम् ॥२२॥ अथास्मिन्हव्य ऽआनयति । 'घर्म्मोऽसि'[1] तप्ते पुरीष'मित्यन्नं वै पुरीषमन्नमेवास्मिन्नेतद्दधाति 'तेने[2] वर्द्धस्व चा च प्यायस्वे'ति नात्र तिरोहितमिवास्ति 'वर्द्धिषीमहि[3] च वयमा च प्यासिषीमही'त्याशिषमेवैतदाशास्ते ॥ २३ ॥ स वै न सर्वमिवानयेत् । नेद्यजमानात्परागन्नमसदित्यर्द्धं वा भूयो वा परिशिनष्टि तस्मिन्नपराह्णे यजमानाय व्रतमभ्युत्सिच्य प्रयच्छति तद्यजमान ऽएवैतदन्नाद्यन्दधाति तथो ह यजमानान्न परागन्नम्भवति ॥ २४ ॥ अथैनमद्भिः परिषिञ्चति । शान्तिर्वा ऽआपः शमयत्येवैनमेतत्सर्व्वतः परिषिञ्चति सर्व्वत ऽएवैनमेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृद्धि यज्ञः ॥ २५ ॥ अथाह

(१) शु० य० सं० ३८. २१। (२) शु० य० सं० ३८. २१। (३) शु० य० सं० ३८. २१।

वार्षाहरः साम गायेति। एष वै वृषा हरिर्य ऽएष तपत्येष ऽउ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह वार्षाहरः साम गायेति ॥ २६ ॥ अथ चात्वाले मार्ज्जयन्ते। 'सुमित्रिया न ऽआप ऽओषधयः सन्त्विं'त्यञ्जलिनाप ऽउपाचति वज्रो वा ऽआपो वज्रेणैवैतन्मित्रमधेयङ्कुरुते 'दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्म' ऽइति यामस्य दिशन्द्वेष्यः स्यात्तान्दिशम्परासिञ्चेत्तेनैव तम्पराभावयति ॥ २७ ॥ अथ प्राङिवोदङ्डुत्क्रामति। 'उद्वयन्तमसस्परी'ति पाप्मा वै तमः पाप्मानमेव तमोऽपहते 'स्वः पश्यन्त ऽउत्तर'मित्ययं वै लोकोऽन्नय ऽउत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति 'देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तम'मिति स्वर्गो वै लोकः सूर्य्यो ज्योतिरुत्तमः स्वर्ग ऽएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमेत्याहवनीये समिधमभ्यादधाति 'समिदसि तेजोऽसि तेजो मयि धेही'त्याशिषमेवैतदाशास्ते ॥ २८ ॥ अथ प्रसुते दधिघर्म्मेण चरन्ति। यज्ञो वै सोमः शिरः प्रवर्ग्यो यज्ञ ऽएवैतच्छिरः प्रतिदधाति माध्यन्दिने सवन ऽएतद्वा ऽइन्द्रस्य निष्केवल्यः सवनं यदूर्ध्वं माध्यन्दिनः सवनः स्व ऽएवैनमेतद्भागे प्रीणाति स्तुते माध्यन्दिने पवमाने प्राणो वै माध्यन्दिनः पवमानः प्राणमेवास्मिन्नेतद्दधात्यग्निहोत्रहवण्या मुखं वा ऽएतद्यज्ञानां यदग्निहोत्रः

(१) शु० य० सं० ३८. २१। (२) शु० य० सं० १८. २३। (३) शु० य० सं० १८. २४। (४) शु० य० सं० ३८. २४। (५) शु० य० सं० ३८. २४। (६) शु० य० सं० १८. २५।

शीर्षस्तन्मुखन्दधाति ॥ २९ ॥ स ऽआनीयमान ऽआह । होतर्ब्रूदस्व यत्ते ब्राह्यमिति ब्रूदते ह्यत्र होताथोपोत्तिष्ठन्नाह 'इश्श्रातः हवि'रिति श्रातः हि भवत्यतिक्रम्म्याइश्राव्याह दधिघर्म्मस्य यजेति वषट्कृते जुहोत्यनुवषट्कृत ऽआह-रति भक्षन्तं ऋत्विजमानाय प्रयच्छति ॥ ३० ॥ स ऽउप-हवमिष्ट्वा भक्षयति । 'मयि त्यदिन्द्रियम्बृह'दित्येतद्वा ऽइन्द्रियम्बृहद्य ऽएष तपति 'मयि दक्षो मयि क्रतु'रिति क्रतूदक्षावेवात्मन्धत्ते 'घर्म्मस्त्रिशुग्विराजती'ति घर्म्मो ह्येष त्रिशुग्विराजति 'विराजा ज्योतिषा सहे'ति विराजा ह्येष ज्योतिषा सह 'ब्रह्मणा तेजसा सहे'ति ब्रह्मणा ह्येष तेजसा सह 'पयसो रेत ऽआभृत'मिति पयसो ह्येत-देत ऽआभृत'न्तस्य दोहमशीमह्युत्तरामुत्तराꣳ समा'मित्या-शिषमेवैतदाशास्तेऽथ चात्वाले मार्ज्जयन्तेऽसावेव बन्धुः ॥ ३१ ॥ अथातो दक्षिणानाम् । सुवर्णः हिरण्ययः शतमानम्ब्रह्मणे ददात्यासीनो वै ब्रह्मा यशः शयानः हिरण्ययन्तस्मात्सुवर्णः हिरण्ययः शतमानम्ब्रह्मणे ददाति ॥ ३२ ॥ अथ यैषा घर्म्मदुघा । तामद्ध्वर्य्वे ददाति तप्त ऽइव वै घर्म्मस्तप्तमिवाद्ध्वर्युर्निष्क्रामति तस्मात्तामद्ध्व-र्य्वे ददाति ॥ ३३ ॥ अथ यैषा यजमानस्य व्रतदुघा । ताꣳ होत्रे ददाति यज्ञो वै होता यज्ञो यजमानस्तस्मा-त्ताꣳ होत्रे ददाति ॥ ३४ ॥ अथ यैषा पत्न्यै व्रतदुघा ।

(१) ऋ० सं० ८. ८. ३७ । (२) शु० य० सं० ३८. २७ । (३) शु० य० सं० ३८. २७ । (४) शु० य० सं० ३८. २७ । (५) शु० य० सं० ३८. २७ । (६) शु० य० सं० ३८. २७ । (७) शु० य० सं० ३८. २८ । (८) शु० य० सं० ३८. २८ ।

तामुद्गातृभ्यो ददाति पत्नीकर्म्मैव वा ऽएतेऽत्र कुर्वन्ति यदुद्गातारस्तस्मात्तामुद्गातृभ्यो ददाति ॥ ३५ ॥ अथैतद्वै । आयुरेतज्ज्योतिः प्रविशति य ऽएतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्य्या या सृष्टौ ॥ ३६ ॥

तृतीयाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

[धर्मभेदे प्रायश्चित्तम्, प्रवर्ग्यप्रशंसा च]

सर्वेषां वा ऽएष भूतानाम् । सर्वेषान्देवानामात्मा यद्यज्ञस्तस्य समृद्धिमनु यजमानः प्रजया पशुभिर्ऋध्यते वि वा ऽएष प्रजया पशुभिर्ऋध्यते यस्य धर्म्मो विदीर्य्यते तत्र प्रायश्चित्तिः ॥ १ ॥ पूर्णाहुतिञ्जुहोति । सर्वं वै पूर्णः सर्वेणैवैतद्विषज्यति यत्किञ्च विवृढं ग्यज्ञस्य ॥ २ ॥ 'स्वाहा प्राणेभ्यः साधिपतिकेभ्य' ऽइति । मनो वै प्राणानामधिपतिर्म्मनसि हि सर्वे प्राणाः प्रतिष्ठितास्तद्मनसैवैतद्विषज्यति यत्किञ्च विवृढं ग्यज्ञस्य ॥ ३ ॥ 'पृथिव्यै स्वाहे'ति । पृथिवी वै सर्वेषान्देवानामायतनन्तत्सर्वाभिरेवैतद्देवताभिर्भिषज्यति यत्किञ्च विवृढं ग्यज्ञस्य ॥ ४ ॥ 'अग्नये स्वाहे'ति । अग्निर्वै सर्वेषान्देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्यति यत्किञ्च विवृढं ग्यज्ञस्य ॥ ५ ॥ 'अन्तरिक्षाय स्वाहे'ति । अन्तरिक्षं वै सर्वेषान्देवानामायतनन्तत्सर्वाभि-

(१) शु० य० सं० १९. १ । (२) शु० य० सं० १९. १। (३) शु० य० सं० १९. १। (४) शु० य० सं० १९. १।

रेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ ६ ॥ 'वायवे स्वाहे'ति । वायुर्वै सर्वेषान्देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ ७ ॥ 'दिवे[2] स्वाहे'ति । द्यौर्वै सर्वेषान्देवानामायतनन्तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ ८ ॥ 'सूर्य्याय[3] स्वाहे'ति । सूर्य्यो वै सर्वेषान्देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ ९ ॥ 'दिग्भ्यः[4] स्वाहे'ति । दिशो वै सर्वेषान्देवानामायतनन्तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ १० ॥ 'चन्द्राय[5] स्वाहे'ति । चन्द्रो वै सर्वेषान्देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ ११ ॥ 'नक्षत्रेभ्यः[6] स्वाहे'ति । नक्षत्राणि वै सर्वेषान्देवानामायतनन्तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ १२ ॥ 'अद्भ्यः[7] स्वाहे'ति । आपो वै सर्वेषान्देवानामायतनन्तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ १३ ॥ 'वरुणाय[8] स्वाहे'ति । वरुणो वै सर्वेषान्देवानामात्मा तत्सर्वाभिरेवैतद्देवताभिर्भिषज्ज्यति यत्किञ्च विवृढं रुयज्ञस्य ॥ १४ ॥ 'नाभ्यै स्वाहा पूताय स्वाहे'ति । अनिरुक्तमनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञम्भिषज्ज्यति ॥ १५ ॥

(१) शु० य० सं० ३६. १। (२) शु० य० सं० ३९. १। (३) शु० य० सं० ३९. १। (४) शु० य० सं० ३९. २। (५) शु० य० सं० ३९. २। (६) शु० य० सं० ३९. २। (७) शु० य० सं० ३९. २। (८) शु० य० सं० ३९. २। (९) शु० य० सं० ३९. २।

त्रयोदशैता ऽआहुतयो भवन्ति । त्रयोदश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजापतिमेवैतद्यज्ञम्भिषज्ज्यति ॥ १६ ॥ 'वाचे स्वाहे'ति । मुखमेवास्मिन्नेतद्दधाति 'प्राणाय स्वाहा प्राणाय स्वाहे'ति नासिके ऽएवास्मिन्नेतद्दधाति 'चक्षुषे स्वाहा चक्षुषे स्वाहे'त्यक्षिणी ऽएवास्मिन्नेतद्दधाति 'श्रोत्राय स्वाहा श्रोत्राय स्वाहे'ति कर्णावेवास्मिन्नेतद्दधाति ॥ १७ ॥ सप्तैता ऽआहुतयो भवन्ति । सप्त वा ऽइमे शीर्षन्प्राणास्तानेवास्मिन्नेतद्दधाति पूर्णाहुतिमुत्तमाञ्जुहोति सर्वं वै पूर्णः सर्वेणैवैतद्भिषज्ज्यति यत्किञ्च विवृढं यज्ञस्य ॥ १८ ॥ 'मनसः काममाकूति'मिति । मनसा वा ऽइदः सर्वमाप्तन्तन्मनसैवैतद्भिषज्ज्यति यत्किञ्च विवृढं यज्ञस्य ॥ १९ ॥ 'वाचः सत्यमशीये'ति । वाचा वा ऽइदः सर्वमाप्सन्तद्वाचैवैतद्भिषज्ज्यति यत्किञ्च विवृढं यज्ञस्य 'पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयताम्मयि स्वाहे'त्याशिषमेवैतदाशास्ते ॥ २० ॥ अथ तञ्चोपशयाञ्च पिष्ट्वा । मार्त्स्नया मृदा सꣳसृज्यावृता करोत्यावृता पचत्युत्सादनार्त्थमथ यः ऽउपशययोर्दृढः स्यात्तेन प्रचरेत् ॥ २१ ॥ संवत्सरो वै प्रवर्ग्यः । सर्वं वै संवत्सरः सर्वम्प्रवर्ग्यः स यत्प्रवृक्तस्तद्वसन्तो यद्रुचितस्तद्ग्रीष्मो यत्पिन्वितस्त-

---

(१) शु० य० सं० १९. ३ । (२) शु० य० सं० १९. ३ । (३) शु० य० सं० १९. ३ । (४) शु० य० सं० १९. ३ । (५) शु० य० सं० १९. ४ । (६) शु० य० सं० १९. ४ । (७) शु० य० सं० १९. ४ ।

द्वर्षा यदा वै वर्षाः पिन्वन्तेऽथैनाः सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वन्ते ह वा ऽअस्मै वर्षा य ऽएवमेतद्वेद ॥ २२ ॥ इमे वै लोकाः प्रवर्ग्यः । सर्वं वा ऽइमे लोकाः सर्वम्प्रवर्ग्यः स यत्प्रवृक्तस्तदयँल्लोको यद्रुचितस्तदन्तरिक्षलोको यत्पिन्वितस्तदसौ लोको यदा वा ऽअसौ लोकः पिन्वतेऽथैनः सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वा ऽअस्मा ऽअसौ लोको य ऽएवमेतद्वेद ॥ २३ ॥ एता वै देवताः प्रवर्ग्यः । अग्निर्वायुरादित्यः सर्वं वा ऽएता देवताः सर्वम्प्रवर्ग्यः स यत्प्रवृक्तस्तदग्निर्यद्रुचितस्तद्वायुर्यत्पिन्वितस्तदसावादित्यो यदा वा ऽअसावादित्यः पिन्वतेऽथैनः सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वा ऽअस्मा ऽअसावादित्यो य ऽएवमेतद्वेद ॥ २४ ॥ यजमानो वै प्रवर्ग्यः । तस्यात्मा प्रजा पशवः सर्वं वै यजमानः सर्वम्प्रवर्ग्यः स यत्प्रवृक्तस्तदात्मा यद्रुचितस्तत्प्रजा यत्पिन्वितस्तत्पशवो यदा वै पशवः पिन्वन्तेऽथैनान्त्सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वन्ते ह वा ऽअस्मै पशवो य ऽएवमेतद्वेद ॥ ॥ २५ ॥ अग्निहोत्रं वै प्रवर्ग्यः । सर्वं वा ऽअग्निहोत्रः सर्वम्प्रवर्ग्यः स यदधिश्रितन्तत्प्रवृक्तो यदुन्नीतन्तद्रुचितो यदुतन्तत्पिन्वितो यदा वा ऽअग्निहोत्रम्पिन्वतेऽथैनत्सर्वे देवाः सर्वाणि भूतान्युपजीवन्ति पिन्वते ह वा ऽअस्मा ऽअग्निहोत्रं य ऽएवमेतद्वेद ॥ २६ ॥ दर्शपूर्णमासौ वै प्रवर्ग्यः । सर्वं वै दर्शपूर्णमासौ सर्व-

म्प्रव॒र्ग्यः॑ स य॒दधि॒श्रिश्र॑तन्त॒त्प्र॒वृक्तो॑ यदु॒सन्न॑न्त॒द्रुचितो॑ य॒द्रुत॑न्त॒त्पि॑न्न्वि॒तो॑ यदा वै॒ दर्शपूर्ण्णमासौ॑ पि॒न्न्वेते ऽअथै॑नौ॑ स॒र्वे॑ देवाः॑ स॒र्वाणि॑ भू॒तान्न्यु॒पजीवन्ति पि॒न्न्वेते ह॒ वा ऽअस्म्मै॑ दर्शपूर्ण्णमासौ॑ य॒ ऽए॒व॒मेतद्वेद ॥ २७ ॥ चातु॑र्म्मास्या॒नि वै॒ प्र॒व॒र्ग्यः॑ । स॒र्व॑ वै॒ चातुर्म्मास्या॒नि स॒र्व॑म्प्र॒व॒र्ग्यः॑ स य॒दधि॒श्रिश्र॑तन्त॒त्प्र॒वृक्तो॑ यदु॒सन्न॑न्त॒द्रुचितो॑ य॒द्रु॑तन्त॒त्पि॑न्न्वि॒तो॑ यदा वै॒ चातुर्म्मास्या॒नि पि॒न्व॒न्ते॒ऽथै॒नानि॑ स॒र्वे॑ देवाः॑ स॒र्वाणि॑ भूतान्न्यु॒पजीवन्ति पि॒न्न्व॒न्ते ह॒ वा ऽअस्म्मै॑ चातुर्म्मास्या॒नि य॒ ऽए॒व॒मेतद्वेद ॥ २८ ॥ पशु॑बन्धो वै॒ प्र॒व॒र्ग्यः॑ । स॒र्व॑ वै॒ पशुबन्धः॑ स॒र्व॑म्प्र॒व॒र्ग्यः॑ स य॒दधि॒श्रिश्र॑तस्त॒त्प्र॒वृक्तो॑ यदु॒सन्न॑स्त॒द्रुचितो॑ य॒द्रुत॑स्त॒त्पि॑न्न्वि॒तो॑ यदा वै॒ पशुबन्धः॑ पि॒न्न्व॒ते॒ऽथै॒नः॑ स॒र्वे॑ देवाः॑ स॒र्वाणि॑ भू॒तान्न्यु॒पजीवन्ति पि॒न्न्व॒ते ह॒ वा ऽअस्म्मै॑ पशुबन्धो य॒ ऽए॒व॒मेतद्वेद ॥ २९ ॥ सो॒मो वै॒ प्र॒व॒र्ग्यः॑ । स॒र्व॑ वै॒ सो॒मः॑ स॒र्व॑म्प्र॒व॒र्ग्यः॑ स य॒दभि॒षुत॑स्त॒त्प्र॒वृक्तो॑ यदु॒न्नीत॑स्त॒द्रुचितो॑ य॒द्रुत॑स्त॒त्पि॑न्न्वि॒तो॑ यदा वै॒ सो॒मः॑ पि॒न्न्व॒ते॒ऽथै॒नः॑ स॒र्वे॑ देवाः॑ स॒र्वाणि॑ भू॒तान्न्यु॒पजीवन्ति पि॒न्न्व॒ते ह॒ वा ऽअस्म्मै॑ सो॒मो य॒ ऽए॒व॒मेतद्वेद न॒ ह॒ वा ऽअस्या॒ प्र॒वर्ग्येण॑ के॒न॑ च॒न॒ य॒ज्ञेने॒ष्ट॒म्भ॒व॒ति य॒ ऽए॒व॒मेतद्वेद॒ ॥ ३० ॥ अ॒थै॒तद्वै । आ॒यु॒रेत॒ज्ज्यो॒तिः॑ प्र॒विशति य॒ ऽए॒तम॒नु वा ब्रू॒ते॒ भक्ष॒यति वा त॒स्य व्र॒त॒च॒र्य्या या सृ॒ष्टौ ॥ ३१ ॥

तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे द्वितीयः प्रपाठकः ॥२॥ कण्डिकासंख्या ॥१२२॥

इति तृतीयोऽध्यायः ॥ ३ ॥

[बृहदारण्यकम् *]

(कोऽसौ पाप्मा मृत्युः, कुतो वा तस्योद्भवः, केन वा तस्यातिक्रमणम्,
कथं चेत्येतत्सर्वं स्पष्टयति)

द्वया ह प्राजापत्याः । देवाश्चासुराश्च ततः कानीयसा ऽएव देवा ज्यायसा ऽअसुरास्त ऽएषु लोकेष्वस्पर्द्धन्त ॥ १ ॥ ते ह देवा ऽऊचुः । हन्तासुराञ्यज्ञ ऽउद्गीथेनात्ययामेति ॥ २ ॥ ते ह वाचमूचुः । त्वन्न ऽउद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तन्देवेभ्य ऽआगायद्यत्कल्ल्याणं वदति तदात्मने तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स ऽएव स पाप्मा ॥ ३ ॥ अथ ह प्राणमूचुः । त्वन्न ऽउद्गायेति तथेति तेभ्यः प्राण ऽउदगायद्यः प्राणे भोगस्तन्देवेभ्य ऽआगायद्यत्कल्ल्याणञ्जिघ्रति तदात्मने तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपञ्जिघ्रति स ऽएव स पाप्मा ॥४॥ अथ ह चक्षुरूचुः । त्वन्न ऽउद्गायेति तथेति तेभ्यश्चक्षुरुदगायद्यश्चक्षुषि भोगस्तन्देवेभ्य ऽआगायद्यत्कल्ल्याणम्पश्यति तदात्मने तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपम्पश्यति स ऽएव स पाप्मा ॥ ५ ॥ अथ ह श्रोत्रमूचुः । त्वन्न ऽउद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः

* बृहत्त्वं चास्य ब्रह्मविद्याहेतूनामन्तरङ्गबहिरङ्गभूतानां बहूनामिहोपदेशात्, अर्थतो ग्रन्थपरिमाणतश्च बहुत्वात् । आरण्यकत्वं नास्य नियमपूर्वकमरण्येऽनूच्यमानत्वात् ।

श्रोत्रे भोगस्तन्देवेभ्य ऽआगायद्यत्कल्याणः शृणोति तदात्मने तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविद्ध्यन्त्स यः स पाप्मा यदेवेदमप्रातिरूपः शृणोति स ऽएव स पाप्मा ॥ ६ ॥ अथ ह मन ऽऊचुः । त्वन्न ऽउद्गायेति तथेति तेभ्यो मन ऽउदगायद्यो मनसि भोगस्तन्देवेभ्य ऽआगायद्यत्कल्याणः सङ्कल्पयति तदात्मने तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविद्ध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपः सङ्कल्पयति स ऽएव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपास्तृजन्नेवमेनाः पाप्मनाविद्ध्यन् ॥ ७ ॥ अथ हेममासन्न्यम्प्राणमूचुः । त्वन्न ऽउद्गायेति तथेति तेभ्य ऽएष प्राण ऽउदगायत्तेऽविदुरनेन वै न ऽउद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविद्ध्यत्स[1]न्त्संस्यथाश्मानमृत्त्वा लोष्टो विद्धः सेतैवः हैव विद्धः समाना विष्वञ्चो विनेशुस्ततो देवा ऽअभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य ऽएवं वेद ॥ ८ ॥ ते होचुः । क नु सोऽभूद्यो न ऽइत्थमसक्तेत्यय्मास्येऽन्तरिति सोऽयास्य ऽआङ्गिरसोऽङ्गानाꣳ हि रसः ॥ ९ ॥ सा वा ऽएषा देवता । दूर्नाम दूरꣳ ह्यस्या मृत्युर्दूरः ह वा ऽअस्मान्मृत्युर्भवति य एवं वेद ॥ १० ॥ सा वा ऽएषा देवता । एतासान्देवतानाम्पाप्मानम्मृत्युमपहृत्य यत्रासान्दिशामन्तस्तद्गमयाञ्चकार तदासाम्पाप्म-

(१) सन्त्स" इति 'ग' 'ङ' पुस्तकयोः ।

नो विन्न्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मान-म्मृत्युमन्ववायानीति ॥ ११ ॥ सा वा ऽएषा देवता । एतासान्देवतानाम्पाप्मानम्मृत्युमपहत्याथैना मृत्युमत्यव-हत् ॥ १२ ॥ स वै वाचमेव प्रथमामत्यवहत् । सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्यु-मतिक्रान्तो दीप्यते ॥ १३ ॥ अथ प्राणमत्यवहत् । स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १४ ॥ अथ चक्षुरत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स ऽआदित्योऽभवत्सोऽसावा-दित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १५ ॥ अथ श्रोत्र-मत्यवहत् । तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवँस्ता ऽइमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १६ ॥ अथ मनोऽत्यवहत् । तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा ऽअभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवꣳ ह वा ऽएनमेषा देवता मृत्युमतिवहति य ऽएवं वेद ॥१७॥ अथात्मनेऽन्नाद्यमागायत् । यद्धि किञ्चान्नमद्यतेऽनेनैव तद-द्यत ऽइह प्रतितिष्ठति ॥ १८ ॥ * ते देवा ऽअब्रुवन् । एतावद्वा ऽइदꣳ सर्वं यदन्नन्तदात्मन ऽआगासीरनु नोऽ-स्मिन्नन्न ऽआभजस्वेति ते वै माभिसँविशतेति तथेति तेः समन्तम्परिण्यविशन्त तस्म्माद्यदनेनान्नमत्ति तेनै-तास्तृप्यन्त्येवꣳ ह वा ऽएनꣳ स्वा ऽअभिसँविशन्ति भर्त्ता स्वानाꣳ श्रेष्ठः पुर ऽएता भवत्यन्नादोऽधिपतिर्य्य

* अत्र शतम् ७१०० ।

ऽएवं वेद ॥ १९ ॥ य ऽउ हैवंविदम् । स्वेषु प्रतिप्रति-र्बुभूषति न हैवालम्भाय्येभ्यो भवत्यथ य ऽएवैतमनु भवति यो वैतमनु भाय्यान्बुभूषति स हैवालम्भाय्येभ्यो भवति ॥ २० ॥ सोऽयास्य ऽआङ्गिरसः । अङ्गानाꣳ हि रसः प्राणो वा ऽअङ्गानाꣳ रसः प्राणो हि वा ऽअङ्गानाꣳ रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण ऽउत्क्रामति तदेव तच्छुष्यत्येष हि वा ऽअङ्गानाꣳ रसः ॥२१॥ एष ऽउ ऽएव बृहस्पतिः । वाग्वै बृहती तस्या ऽएष पतिस्तस्माद्बृहस्पतिः ॥ २२ ॥ एष ऽउ ऽएव ब्रह्मणस्पतिः । वाग्वै ब्रह्म तस्या ऽएष पतिस्तस्माद्ब्रह्मणस्पतिः ॥ २३ ॥ एष ऽउ ऽएव साम । वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वं यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम ऽएभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां य ऽएवमेतत्साम वेद ॥ २४ ॥ एष ऽउ वा ऽउद्गीथः । प्राणो वा ऽउत्प्राणेन हीदꣳ सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स ऽउद्गीथः ॥ २५ ॥ तद्धापि ब्रह्मदत्तश्चैकितानेयः । राजानम्भक्षयन्नुवाचायन्त्यस्य राजा मूर्द्धानं विपातयताद्यदितोऽयास्य ऽआङ्गिरसोऽन्येनोदुगायदिति वाचा च ह्येव स प्राणेन चोदुगायदिति ॥ २६ ॥ तस्य हैतस्य साम्नो यः स्वं वेद । भवति हास्य स्वन्तस्य वै स्वर ऽएव स्वन्तस्माद्यार्त्विज्यङ्करिष्यन्वाचि स्वरमिच्छेत तया

* अत्र 'ग' 'ज' पुस्तकयोः "ह" इत्यधिको दृश्यते ।

वाचा स्वरसम्पन्नयार्त्विज्यङ्कुर्य्यात्तस्माद्यज्ञे स्वरवन्तन्दिदृक्षन्त ऽएवाथो यस्य स्वम्भवति भवति हास्य स्वं य ऽएवमेतत्साम्नः स्वं वेद ॥ २७ ॥ तस्य हैतस्य साम्नो यः सुवर्णं वेद । भवति हास्य सुवर्णन्तस्य वै स्वर ऽएव सुवर्णम्भवति हास्य सुवर्णं य ऽएवमेतत्साम्नः सुवर्णं वेद ॥ २८ ॥ तस्य हैतस्य । साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष ऽएतत्प्राणः प्रतिष्ठितो गीयतेऽन्न ऽइत्यु हैक ऽआहुः ॥ २९ ॥ अथातः पवमानानामेवाभ्यारोहः । स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्म्मामृतङ्गमयेति ॥ ३० ॥ स यदाहासतो मा सद्गमयेति । मृत्युर्वा ऽअसत्सदमृतम्मृत्योर्म्मामृतङ्गमयामृतम्मा कुर्वित्येवैतदाह ॥ ३१ ॥ तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तमो ज्योतिरमृतम्मृत्योर्म्मामृतङ्गमयामृतम्मा कुर्वित्येवैतदाह मृत्योर्म्मामृतङ्गमयेति नात्र तिरोहितमिवास्ति ॥ ३२ ॥ अथ यानीतराणि स्तोत्राणि । तेष्वात्मनेऽन्नाद्यमागायेत्तस्माद्दु तेषु वरं वृणीत यङ्कामङ्कामयेत तꣳ स ऽएष ऽएवंविदुद्गातात्मने वा यजमानाय वा यङ्कामङ्कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्ष्यताया ऽआशास्ति य ऽएवमेतत्साम वेद ॥ ३३ ॥

चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[ज्ञानकर्मणोः स्तुत्यर्थं तत्फलभूतस्य प्रजापतेर्जगत्सृष्ट्यादौ स्वातन्त्र्यविभूतिवर्णनेन फलोत्कर्षवर्णनम्]

आत्मैवेदमग्र ऽआसीत् । पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहन्नामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र ऽउक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति ॥ १ ॥ स यत्पूर्वोऽस्मात्सर्वस्मात् । सर्वान्पाप्मन ऽओषत्तस्मात्पुरुष ऽओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य ऽएवं वेद ॥ २ ॥ सोऽबिभेत् । तस्मादेकाकी बिभेति स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत ऽएवास्य भयं वीयाय कस्मान्ह्यभेष्यद्द्वितीयाद्वै भयम्भवति ॥ ३ ॥ स वै नैव रेमे । तस्मादेकाकी न रमते स द्वितीयमैच्छत्स हैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ ॥ ४ ॥ स ऽइममेवात्मानन्द्वेधापातयत् । ततः पतिश्च पत्नी चाभवतान्तस्मादिदमर्द्धबृगलमिव स्व ऽइति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाश स्त्रिया पूर्य्यत ऽएव ताꣳ समभवत्ततो मनुष्या ऽअजायन्त ॥५॥ सो हेयमीक्षाञ्चक्रे। कथन्नु मात्मन ऽएव जनयित्वा सम्भवति हन्त तिरोऽसानीति ॥ ६ ॥ सा गौरभवत् । वृषभ ऽइतरस्ताꣳ समेवाभवत्ततो गावोऽजायन्त ॥ ७ ॥ वडवेतराभवत् । अश्ववृष ऽइतरो गर्द्दभीतरा गर्द्दभ ऽइतरस्ताꣳ समेवाभवत्तत ऽएकशफमजायत ॥ ८ ॥ अजेतराभवत् । वस्त इतरोऽविरितरा मेष ऽइतरस्ताꣳ समेवाभवत्ततोऽजावयोऽजायन्तैवमेव यदि-

(१) "०रो" इति 'ग' 'ज' पुस्तकयोः ।

दङ्किञ्च मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ९ ॥ सोऽवेत् । अहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याꣳ हास्यैतस्याम्भवति य ऽएवं वेद ॥ १० ॥ अथेत्यब्भ्यमन्थत् । स मुखाच्च योनेर्हस्ताभ्याञ्चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतः ॥ ११ ॥ तद्यदिदमाहुः । अमुं ष्यजामुं ष्यजेत्येकैकन्देवमेतस्यैव सा विसृष्टिरेष ऽउ ह्येव सर्वे देवाः ॥ १२ ॥ अथ यत्किञ्चेदमार्द्रम् । तद्रेतसोऽसृजत तदु सोम ऽएतावद्वा ऽइदꣳ सर्वमन्नꣳ चैवान्नादुश्च सोम ऽएवान्नमग्निरन्नादुः ॥ १३ ॥ सैषा ब्रह्मणोऽतिसृष्टिः । यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्याꣳ हास्यैतस्याम्भवति य ऽएवं वेद ॥ १४ ॥ तद्धेदन्तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यामेव व्याक्रियतासौनामायमिदꣳ रूप ऽइति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामायमिदꣳ रूप ऽइति ॥ १५ ॥ स ऽएष ऽइह प्रविष्टः । आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये तन्न पश्यन्त्यकृत्स्नो हि सः ॥ १६ ॥ प्राणन्नेव प्राणो नाम भवति । वदन्वाक्पश्यँश्चक्षुः शृण्वञ्छ्रोत्रम्मन्वानो मनस्तान्यस्यैतानि कर्म्मनामान्येव स योऽत ऽएकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत ऽएकैकेन भवति ॥ १७ ॥ [अर्धः प्रपाठकः ॥ ५० ॥] आत्मेत्येवोपासीत । अत्र ह्येते सर्वे ऽएकम्भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा-

नेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देदेवङ्कीर्त्तिꣳ श्लोकं विन्दते य ऽएवं वेद ॥ १८ ॥ तदेतत्प्रेयः पुत्रात् । प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादुन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियम्ब्रुवाणम्ब्रूयात्प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य ऽआत्मानमेव प्रियमुपास्ते न हास्य प्रियम्प्रमायुकम्भवति ॥ १९ ॥ तदाहुः । यद्ब्रह्मविद्यया सर्वम्भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ २० ॥ ब्रह्म वा ऽइदमग्र ऽआसीत् । तदात्मानमेवावेदहम्ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो यो देवानाम्प्रत्यबुद्ध्यत स ऽएव तदभवत्तथऽर्षीणान्तथा मनुष्याणाम् ॥ २१ ॥ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे । अहम्मनुरभवꣳ सूर्य्यश्चेति तदिदमप्येतर्हि य ऽएवं वेदाहम्ब्रह्मास्मीति स इदꣳ सर्वम्भवति तस्य ह न देवाश्चनाभूत्या ऽईशत ऽआत्मा ह्येषाꣳ स भवत्यथ योऽन्यान्देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवꣳ स देवानां यथा ह वै बहवः पशवो मनुष्यम्भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्शेव पशावादीयमानेऽप्रियम्भवति किमु बहुषु तस्मादेषान्तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ २२ ॥ ब्रह्म वा ऽइदमग्र ऽआसीत् । एकमेव तदेकꣳ सन्न व्यभवत्तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान ऽइति तस्मात्क्षत्रात्परन्नास्ति

तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र ऽएव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्मा- द्यद्यपि राजा परमताङ्गच्छति ब्रह्मैवान्ततऽउपनिश्रयति स्वां ह्येनिं ह्य ऽउ एनः हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान्भवति यथा श्रेयाꣳसः हिꣳसित्वा ॥ २३ ॥ स नैव व्यभवत् । स विशमसृजत यान्येतानि देवजातानि गणश ऽआख्यायन्ते वसवो रुद्रा ऽआदित्या विश्वे देवा मरुत ऽइति ॥ २४ ॥ स नैव व्यभवत् । स शौद्रं वर्णम- सृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वम्पुष्यति यदि दꣳकिञ्च ॥२५॥ स नैव व्यभवत् । तच्छ्रेयो रूपमत्यसृजत धर्म्मन्तदेतत्क्षत्रस्य क्षत्रं ह्यद्धर्म्मस्तस्माद्धर्म्मात्परन्नास्त्यथो ऽअबलीयान्बलीयाꣳसमाशꣳसते धर्म्मेण यथा राज्ञैवं ह्यो वै स धर्म्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्द्धर्म्मं वदतीति धर्म्मं वा वदन्तः सत्यं वदतीत्येतद्ध्येवैतदुभय- म्भवति ॥ २६ ॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रः । तदग्नि- नैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमि- च्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याꣳ हि रूपाभ्यां ब्र- ह्माभवत् ॥ २७ ॥ अथ यो ह वा ऽअस्माल्लोकात्स्वँल्लो- कमदृष्ट्वा प्रैति । स ऽएनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽह्यद्धा कर्म्माकृतं ह्यदु ह वा ऽअप्येनेवंविदꣳ म- हत्पुण्यङ्कर्म्म करोति तद्धास्यान्ततः क्षीयत ऽएवात्मान-

(१) 'यदि' इति 'ग' 'ज' पुस्तकयोः पाठः ।

मेव लोकमुपासीत स य ऽआत्मानमेव लोकमुपास्ते न हास्य कर्म्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ॥ २८ ॥ अथो ऽअयं वा ऽआत्मा । सर्वेषाम्भूतानाँल्लोकः स यज्जुहोति यद्यजते तेन देवानाँल्लोकोऽथ यदनुब्रूते तेनऽर्षीणामथ यत्प्रजामिच्छते यत्पितृभ्यो निपृणाति तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनन्दुदाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां श्यदस्य गृहेषु श्वापदा वयाꣳस्या पिपीलिकाभ्य ऽउपजीवन्ति तेन तेषाँल्लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वदा सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा ऽएतद्विदितम्मीमाꣳसितम् ॥ २९ ॥ आत्मैवेदमग्र ऽआसीत् । एक ऽएव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तम्मे स्यादथ कर्म्म कुर्वीयेत्येतावान्वै कामो नेच्छँश्चनातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तम्मे स्यादथ कर्म्म कुर्वीयेति स यावदप्येतेषामेकैकन्न प्राप्नोत्यकृत्स्न ऽएव तावन्मन्यते तस्यो कृत्स्नता ॥ ३० ॥ मन ऽएवास्यात्मा । वाग्जाया प्राणः प्रजा चक्षुर्म्मानुषं वित्तञ्चक्षुषा हि तद्विन्दति श्रोत्रन्दैवꣳ श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्म्मात्मना हि कर्म्म करोति स ऽएष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदꣳ सर्वं श्यदिदङ्किञ्च तदिदꣳ सर्वमाप्नोति यदिदङ्किञ्च य ऽएवं वेद ॥ ३१ ॥

चतुर्थाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[अद्यमानत्वेन सृष्टस्यान्नभूतस्य जगत उपासनार्थं
विभागेन सप्तधा निरूपणम्]

यत्सप्तान्नानि मेधया तपसाजनयत्पिता ॥ एकमस्य साधारणन्द्वे देवानभाजयत् ॥ त्रीण्यात्मनेऽकुरुत पशुभ्य ऽएकम्प्रायच्छत् ॥ तस्मिन्त्सर्वम्प्रतिष्ठितं श्वच्च प्राणिति यच्च न ॥ कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा ॥ यो वै तामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन ॥ स देवानपि-गच्छति स ऽऊर्ज्जमुपजीवतीति श्लोकाः ॥ १ ॥ यत्सप्ता-न्नानि मेधया तपसाजनयत्पितेति । मेधया हि तपसाजन-यत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं श्वदिदमद्यते स य ऽएतदुपास्ते न स पाप्मनो व्यावर्त्तते मिश्रश्ठं ह्येतत् ॥ २ ॥ द्वे देवानभाजयदिति । हुतश्च प्रहुतश्च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो ऽआहु-र्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात् ॥ ३ ॥ पशुभ्य ऽएकम्प्रायच्छदिति । तत्पयः पयो ह्येवाग्रे मनु-ष्याश्च पशवश्चोपजीवन्ति तस्मात्कुमारञ्जातङ्घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति ॥ ४ ॥ अथ वत्स-ञ्जातमाहुः । अतृणाद ऽइति तस्मिन्त्सर्वम्प्रतिष्ठितं श्वच्च प्राणिति यच्च नेति पयसि हीदः सर्वम्प्रतिष्ठितं श्वच्च प्राणिति यच्च न ॥ ५ ॥ तद्यदिदमाहुः । सँवत्सर-म्पयसा जुह्वदप पुनर्म्मृत्युञ्जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्म्मृत्युमपजयत्येवं विद्वान्त्सर्वदः हि देवेभ्योऽन्नाद्यम्प्रयच्छति कस्मात्तानि न क्षीयन्तेऽद्य-

मानानि सर्व्वदेति ॥ ६ ॥ पुरुषो वा ऽअक्षितिः । स हीदमन्नम्पुनः पुनर्ज्जनयते यो वै तामक्षितिं वेदेति पुरुषो वा ऽअक्षितिः स हीदमन्नन्धिया धिया जनयते कर्म्मभिर्य्यद्धैतन्न कुर्य्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखम्प्रतीकम्मुखेनेत्येतत्स देवानपिगच्छति स ऽऊर्ज्जमुपजीवतीति प्रशः सा ॥ ७ ॥ त्रीण्यात्मनेऽकुरुतेति । मनो वाचम्प्राणन्तान्न्यात्मनेऽकुरुतान्न्यत्रमना ऽअभूवन्नादर्शमन्न्यत्रमना ऽअभूवन्नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति ॥ ८ ॥ कामः सङ्कल्पः । विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्द्धीर्भीरित्येतत्सर्व्वम्मन ऽएव तस्मादुपि पृष्ठत ऽउपस्पृष्टो मनसा विजानाति ॥ ९ ॥ यः कश्च शब्दो वागेव सा । एषा ह्यान्तमायत्तैषा हि न प्राणोऽपानो व्यान ऽउदानः समानोऽन ऽइत्येतत्सर्व्वम्प्राण ऽएवैतन्मयो वा ऽअयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ १० ॥ त्रयो लोका ऽएत ऽएव । वागेवायँल्लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ११ ॥ त्रयो वेदा ऽएत ऽएव । वागेवऽग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ १२ ॥ देवाः पितरो मनुष्या ऽएत ऽएव । वागेव देवा मनः पितरः प्राणो मनुष्याः ॥ १३ ॥ पिता माता प्रजैत ऽएव । मन ऽएव पिता वाङ्माता प्राणः प्रजा ॥ १४ ॥ विज्ञातं विजिज्ञास्यम् । अविज्ञातमेत ऽएव यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्धि विज्ञाता वागेनन्तद्भूत्वावति ॥१५॥ यत्किञ्च विजिज्ञास्यम् । मनसस्तद्रूपम्मनो

हि विजिज्ञास्यम्मन ऽएनन्तद्भूत्वावति ॥ १६ ॥ यत्किञ्चाविज्ञातम् । प्राणस्य तद्रूपम्प्राणो ह्यविज्ञातः प्राण ऽएनन्तद्भूत्वावति ॥१७॥ तस्यै वाचः पृथिवी शरीरम् । ज्योती रूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ १८ ॥ अथैतस्य मनसः । द्यौः शरीरञ्ज्योती रूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनः समैतान्ततः प्राणोऽजायत स ऽइन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य ऽएवं वेद ॥ १९ ॥ अथैतस्य प्राणस्यापः । शरीरञ्ज्योती रूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य ऽआपस्तावानसौ चन्द्रः ॥२०॥ त ऽएते सर्व ऽएव समाः । सर्वेऽनन्ताः स यो हैतानन्तवत ऽउपास्तेऽन्तवन्तः स लोकञ्जयत्त्यथ यो हैताननन्तानुपास्तेऽनन्तः स लोकञ्जयति ॥ २१ ॥ स ऽएष सँवत्सरः । प्रजापतिः षोडशकलस्तस्य रात्रय ऽएव पञ्चदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदम्प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिम्प्राणभृतः प्राणन्न विच्छिन्द्यादुपि कृकलासस्यैतस्या ऽएव देवताया ऽअपचित्यै ॥ २२ ॥ यो वै स सँवत्सरः । प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदश कला ऽआत्मैवास्य षोडशी कला स

(१-२) "एव तद्भूत्वावति" इति 'ग' 'ज' पुस्तकयोः ।

वित्तेनैवा च पूर्ष्यतेऽप च क्षीयते तदेतन्नब्भ्यं ख्यदयमात्मा प्रधिर्वित्तन्तस्मादयमपि सर्वज्यानिक्षीयत ऽआत्मना चेज्जीवति प्रधिनागादित्याहुः ॥ २३ ॥ अथ त्रयो वाव लोकाः । मनुष्यलोकः पितृलोको देवलोक ऽइति सोऽयम्मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्म्मणा कर्म्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्याम्प्रशꣳसन्ति ॥ २४ ॥ अथातः सम्प्रत्तिः । यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वम्ब्रह्म त्वं ख्यज्ञस्त्वँल्लोक ऽइति स पुत्रः प्रत्याहाहम्ब्रह्माहं ख्यज्ञोऽहँल्लोक ऽइति ॥ २५ ॥ यद्वै किञ्चानूक्तम् । तस्य सर्वस्य ब्ब्रह्मेत्येकता ये वै के च यज्ञास्तेषाꣳ सर्वेषां ख्यज्ञ ऽइत्येकता ये वै के च लोकास्तेषाꣳ सर्वेषाँल्लोक ऽइत्येकतैतावद्वा ऽइदꣳ सर्वमेतन्मा सर्वꣳ सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशिष्टँल्लोक्क्यमाहुस्तस्मादेनमनुशासति स यदेवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सहु पुत्रमाविशति स यद्यनेन किञ्चिदक्ष्णया कृतम्भवति तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा ऽअमृता ऽआविशन्ति ॥२६॥ पृथिव्यै चैनमग्नेश्च । दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ २७ ॥ दिवश्चैनमादित्याच्च । दैवम्मन ऽआविशति तद्वै दैवम्मनो येनानन्येव भवत्यथो न शोचति ॥ २८ ॥ अद्भ्यश्चैनञ्चन्द्रमसश्च । दैवः प्राण ऽआविशति स वै दैवः प्राणो यः

सञ्चरँश्चासञ्चरँश्च न व्यथतेऽथो न रिष्यति स ऽएष ऽएवँवित्सर्वेषाम्भूतानामात्मा भवति यथैषा देवतैवः स यथैतान्देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति यदु किञ्चेमाः प्रजाः शोचन्त्यमैवासान्तद्भवति पुण्यमेवामुङ्गच्छति न ह वै देवान्पापङ्गच्छति ॥ २९ ॥ अथातो व्रतमीमाꣳसा । प्रजापतिर्ह कर्म्माणि ससृजे तानि सृष्ट्वान्यन्योऽन्येनास्पर्द्धन्त वदिष्याम्येवाहमिति व्राग्दद्धे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्म्माणि यथाकर्म्म ॥ ३० ॥ तानि मृत्युः श्रमो भूत्वोपयेमे । तान्न्याप्नोत्तान्न्याप्त्वा मृत्युरवारुन्ध तस्माच्छ्राम्यत्येव वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयम्मध्यमः प्राणः ॥ ३१ ॥ तानि ज्ञातुन्दद्धिरे । अयं वै नः श्रेष्ठो यः सञ्चरँश्चासचरँश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपम्भवामेति त ऽएतस्यैव सर्वे रूपमभवँस्तस्मादेत ऽएतेनाख्यायन्ते प्राणा ऽइति तेन ह वाव तत्कुलमाख्यायते यस्मिन्कुले भवति य ऽएवं वेद य ऽउ हैवंविदा स्पर्द्धतेऽनुशुष्य हैवान्ततो म्म्रियत ऽइत्यध्यात्मम् ॥ ३२ ॥ अथाधिदेवतम् । ज्वलिष्याम्येवाहमित्यग्निर्दद्धे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा ऽएवमन्या देवता यथादेवतꣳ स यथैषाम्प्राणानाम्मध्यमः प्राण ऽएवमेतासान्देवतानां वायुम्म्लोचन्ति ह्यन्या देवता न वायुः सैषानस्तमिता देवता यद्वायुः

॥ ३३ ॥ अथैष श्लोको भवति । यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तन्देवाश्चक्रिरे धर्म्मः स एवाद्य स उ श्व उदिति यद्वा एतेऽमुर्ह्यद्धियन्त तदेवाप्प्यद्य कुर्वन्ति तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नवदिति यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति य एवं वेद ॥ ३४ ॥

चतुर्थाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

—०—

[प्रपञ्चितस्याविद्याकार्यस्य संक्षेपेणोपसंहारः]

त्रयं वा इदन्नाम रूपङ्कर्म्म । तेषान्नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैर्न्नामभिः समेतदेषाम्ब्रह्मैतद्धि सर्वाणि नामानि बिभर्त्ति ॥ १ ॥ अथ रूपाणाम् । चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैं रूपैः समेतदेषाम्ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्त्ति ॥ २ ॥ अथ कर्म्मणाम् । आत्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्म्माण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैः कर्म्मभिः समेतदेषाम्ब्रह्मैतद्धि सर्वाणि कर्म्माणि बिभर्त्ति तदेतत्त्रयꣳ सदेकमयमात्मात्मो एकः सन्नेतत्त्र-

यन्तदेतदमृतꣳ सत्येन च्छन्नम्प्राणो वा ऽअमृतन्नामरूपे सत्यन्ताभ्यामयम्प्राणश्छन्नः ॥ ३ ॥

चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे तृतीयः प्रपाठकः ॥ ३ ॥
कण्डिकासंख्या ॥ १०१ ॥

इति चतुर्थोऽध्यायः ॥ ४ ॥

—०—

[अविद्याविषयमेव आत्मत्वेनोपगतवन्तं गार्ग्यं पूर्वपक्षिणं तद्विपरीतात्मदर्शिनमजातशत्रुं सिद्धान्तिनं चोपस्थाप्य आख्यायिकाप्रदर्शनम्]

दृप्तबालाकिर्हानूचानो गार्ग्य ऽआस । स होवाचाजातशत्रुङ्काश्यम्ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक ऽइति वै जना धावन्तीति ॥ १ ॥ स होवाच गार्ग्यः । य ऽएवासावादित्ये पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा ऽअतिष्ठाः सर्वेषाम्भूतानाम्मूर्द्धा राजेति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्तेऽतिष्ठाः सर्वेषाम्भूतानाम्मूर्द्धा राजा भवति ॥ २ ॥ स होवाच गार्ग्यः । य ऽएवासौ चन्द्रे पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥ स होवाच गार्ग्यः । य ऽएवायं

विद्युति पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठास्तेजस्वीति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥ स होवाच गार्ग्यः । य ऽएवायमाकाशे पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठाः पूर्णमप्रवर्त्तीति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते पूर्यते प्रजया पशुभिर्न्नास्यास्मात्लोकात्प्रजोद्वर्त्तते ॥ ५ ॥ स होवाच गार्ग्यः । य ऽएवायं वायौ पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा ऽइन्द्रो वैकुण्ठोऽपराजिता सेनेति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते जिष्णुर्ह्यपराजिष्णुर्ब्भवत्यन्यतस्त्यजायी ॥ ६ ॥ स होवाच गार्ग्यः । य ऽएवायमग्नौ पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा विषासहिरिति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥ स होवाच गार्ग्यः । य ऽएवायमप्सु पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठाः प्रतिरूप ऽइति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते प्रतिरूपः हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥ स होवाच गार्ग्यः । य ऽएवायमादर्शे पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मि-

न्तसँवदिष्ठा रोचिष्णुरिति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः सन्निगच्छति सर्वांस्तानतिरोचते ॥ ९ ॥ स होवाच गार्ग्यः । य ऽएवायन्दिक्षु पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा द्वितीयोऽनपग ऽइति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते द्वितीयवान्ह भवति नास्मादृणश्छिद्यते ॥ १० ॥ स होवाच गार्ग्यः । य ऽएवायं स्यन्तम्पश्चाच्छब्दोऽनूदेत्येतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा ऽअसुरिति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते सर्वदः हैवास्मिँल्लोक ऽआयुरेति नैनम्पुरा कालात्प्राणो जहाति ॥ ११ ॥ स होवाच गार्ग्यः । य ऽएवायञ्छायामयः पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा मृत्युरिति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्ते सर्वदः हैवास्मिँल्लोक ऽआयुरेति नैनम्पुरा कालान्मृत्युरागच्छति ॥ १२ ॥ स होवाच गार्ग्यः । य ऽएवायमात्मनि पुरुष ऽएतमेवाहम्ब्रह्मोपास ऽइति स होवाचाजातशत्रुर्म्मा मैतस्मिन्त्सँवदिष्ठा ऽआत्मन्वीति वा ऽअहमेतमुपास ऽइति स य ऽएतमेवमुपास्त ऽआत्मन्वी ह भवत्यात्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥ स होवाचाजातशत्रुः । एतावन्नू३ ऽइत्ये-

(१) "यश्चायमात्मनि" इति 'ग' 'ज' पुस्तकयोः ।

त्तावद्धीति नैतावता विदितम्भवतीति स होवाच गार्ग्य ऽउप त्वायानीति ॥ १४ ॥ स होवाचाजातशत्रुः । प्रतिलोमं वै तद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तम्पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयाञ्चक्रे बृहञ्छ्वेतपाण्डरवासः सोम राजन्निति स नोत्तस्थौ तम्पाणिनापेषं बोधयाञ्चकार स होत्तस्थौ ॥ १५ ॥ स होवाचाजातशत्रुः । यत्रैष ऽएतत्सुप्तोऽभूद्य ऽएष विज्ञानमयः पुरुषः कैष तदाभूत्कुत ऽएतदागादिति तदु ह न मेने गार्ग्यः ॥ १६ ॥ स होवाचाजातशत्रुः । यत्रैष ऽएतत्सुप्तोऽभूद्य ऽएष विज्ञानमयः पुरुषस्तदेषाम्प्राणानां विज्ञानेन विज्ञानमादाय य ऽएषोन्तर्हृदय ऽआकाशस्तस्मिञ्छेते ॥ १७ ॥ * तानि यदा गृह्णाति । अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत ऽएव प्राणो भवति गृहीता वाग्गृहीतश्चक्षुर्गृहीतञ्च श्रोत्रङ्गृहीतम्मनः ॥ १८ ॥ स यत्रैतत्स्वप्न्यया चरति । ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण ऽउतेवोच्चावचन्निगच्छति ॥ १९ ॥ स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकाममम्परिवर्त्तेतैवमेवैष ऽएतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकाममम्परिवर्त्तते ॥ २० ॥ अथ यदा सुषुप्तो भवति । यदा न कस्य चन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते

* शतम् ७१०० ।

॥२१॥ स यथा कुमारो वा महाब्राह्मणो वा। अतिग्लीमानन्दुस्य गत्वा शयीतैवमेवैष ऽएतच्छेते ॥ २२ ॥ स यथोर्णवाभिस्तन्तुनोच्चरेत् । यथाग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व ऽएत ऽआत्मानो व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यन्तेषामेष सत्यम् ॥ २३ ॥

पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

—०—

[प्राणा वै सत्यमित्यंशेनोक्तायाः प्राणोपनिषदो व्याख्यानम्]

यो ह वै शिशुम् । साधानः सप्प्रत्याधानः सस्थूणः सदामं वेद सप्त ह द्विषतो बभ्रातृव्यानवरुणद्धि ॥ १ ॥ अयं वाव शिशुर्योऽयम्मध्यमः प्राणः । तस्येदमेवाधानमिदम्प्रत्याधानम्प्राण स्थूणान्नन्दाम तमेताः सप्ताक्षितय ऽउपतिष्ठन्ते ॥ २ ॥ तद्या ऽइमा ऽअक्षँल्लोहिन्यो राजयः । ताभिरेनः रुद्रोऽन्ववायत्तोऽथ या ऽअक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयादित्यो यच्छुक्लन्तेनाग्निरुर्वत्कृष्णन्तेनेन्द्रोऽधरयैनं वर्त्तन्या पृथिव्यन्ववायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य ऽएवं वेद ॥ ३ ॥ तदेष श्लोको भवति । अर्वाग्बिलश्चमस ऽऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम् ॥ तस्यासत ऽऋषयः सप्त तीरे वागष्टमी ब्रह्मणा सँविदानेति ॥ ४ ॥

अर्व्वाग्बिलश्चमस ऽऊर्द्ध्वबुध्न ऽइति । इदन्तच्छिर ऽएष ह्यर्व्वाग्बिलश्चमस ऽऊर्द्ध्वबुध्नस्तस्मिन्न्यशो निहितं विश्श्वरूपमिति प्राणा वै यशो निहितं विश्श्वरूपम्प्राणानेतदाह तस्यासत ऽऋषयः सप्त तीर ऽइति प्राणा वा ऽऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा सँविदानेति वाग्ध्यष्टमी ब्रह्मणा सँवित्ते ॥ ५ ॥ इमावेव गोतमभरद्वाजौ । अयमेव गोतमोऽयम्भरद्वाज ऽइमावेव विश्श्वामित्रजमदग्नी ऽअयमेव विश्श्वामित्रोऽयऋमदग्निरिमावेव वसिष्ठकश्श्यपावयमेव वसिष्ठोऽयङ्कश्श्यपो वागेवात्रिर्व्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदुत्रिरिति सर्व्वस्यात्ता भवति सर्व्वमस्यान्नम्भवति य ऽएवं वेद ॥ ६ ॥

पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

ब्रह्मण उपाधिभूतयोर्मूर्तामूर्तयोः कार्यकरणविभागेनाध्यात्माधिदैवतयोः विभागप्रदर्शनम्]

द्वे वाव ब्रह्मणो रूपे । मूर्त्तञ्चैवामूर्त्तञ्च मर्त्यञ्चामृतञ्च स्थितञ्च यच्च सच्च त्यञ्च ॥ १ ॥ तदेतन्मूर्त्तम् । यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत् ॥ २ ॥ तस्यैतस्य मूर्त्तस्य । एतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत ऽएष रसो य ऽएष तपति सतो ह्येष रसः ॥ ३ ॥ अथामूर्त्तम् । वायुश्चान्तरिक्षञ्चैतदमृतमेतद्यदेतत्यम् ॥ ४ ॥ तस्यैतस्यामूर्त्तस्य । एतस्यामृतस्यैतस्य यत ऽएतस्य त्यस्यैष रसो य ऽएष ऽएतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस

ऽइत्यधिदेवतम् ॥ ५ ॥ अथाध्यात्मम् । इदमेव मूर्त्तं य-
दन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश ऽएतन्मर्त्यमेतत्स्थि-
तमेतत्सत् ॥ ६ ॥ तस्यैतस्य मूर्त्तस्य । एतस्य मर्त्यस्यै-
तस्य स्थितस्यैतस्य सत ऽएष रसो यच्चक्षुः सतो ह्येष
रसः ॥ ७ ॥ अथामूर्त्तम् । प्राणश्च यश्चायमन्तरात्मन्ना-
काश ऽएतदमृतमेतद्यदेतत्त्यम् ॥ ८ ॥ तस्यैतस्यामूर्त्तस्य ।
एतस्यामृतस्यैतस्य यत ऽएतस्य त्यस्यैष रसो योऽयन्द-
क्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥ ९ ॥ तस्य हैतस्य
पुरुषस्य रूपम् । यथा माहारजनं वासो यथा पाण्डवाविकं
यथेन्द्रगोपो यथाग्न्यर्च्चिर्यथा पुण्डरीकं यथा सकृद्वि-
द्युत्तः सकृद्विद्युत्तेव ह वा ऽअस्य श्रीर्भवति य ऽएवं
वेद ॥ १० ॥ अथात ऽआदेशः । नेति नेति न ह्येतस्मा-
दिति नेत्यन्यत्परमस्त्यथ नामधेयः सत्यस्य सत्यमिति
प्राणा वै सत्यन्तेषामेष सत्यम् ॥ ११ ॥

पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[प्रस्तुताया ब्रह्मविद्याया अङ्गत्वेन संन्यासविधानार्थं याज्ञवल्क्य-
मैत्रेयीसंवादरूपाख्यायिका]

मैत्रेयीति होवाच याज्ञवल्क्यः । उद्यास्यन्वा ऽअरे-
ऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्त-
ङ्करवाणीति ॥ १ ॥ सा होवाच मैत्रेयी । यन्नम ऽइयम्भगोः
सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथन्तेनामृता स्यामिति
नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितन्तथैव

शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ सङ्कल्पानाम्मन ऽएकायनमेवꣳ सर्वेषां वेदानाꣳ हृदयमेकायनमेवꣳ सर्वेषाङ्कर्म्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामद्धनाम्पादावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ ऽएकायनमेवꣳ सर्वेषां विसर्ग्गाणाम्पायुरेकायनमेवꣳ सर्व्वासां विद्यानां वागेकायनम् ॥ ११ ॥ स यथा सैन्धवखिल्ल्यः । उदके प्रास्त ऽउदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद्यतो यतस्त्वादुदीत लवणमेवैवं वा ऽअर ऽइदम्महद्भूतमनन्तमपारं विज्ञानघन ऽएवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१२॥ [अर्धः प्रपाठकः ॥५२॥] सा होवाच मैत्रेयी । अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति ॥ १३ ॥ स होवाच याज्ञवल्क्यः । न वा ऽअरेऽहम्मोहम्ब्रवीम्यलं वा ऽअर ऽइदं विज्ञानाय ॥१४॥ यत्र हि द्वैतमिव भवति । तदितर ऽइतरम्पश्यति तदितर ऽइतरञ्जिघ्रति तदितर इतरमभिवदति तदितर ऽइतरः शृणोति तदितर ऽइतरम्मनुते तदितर ऽइतरं विजानाति ॥ १५ ॥ यत्र त्वस्य सर्वमात्मैवाभूत् । तत्केन कम्पश्येत्तत्केन कञ्जिघ्रेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कम्मन्वीत तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तङ्केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १६ ॥

पञ्चमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[उक्तस्याध्यायद्वयस्यार्थोपसंहारः, आचार्यपरम्पराक्रमरूपवंशकथनञ्च]

इयम्पृथिवी । सर्वेषाम्भूतानाम्मद्ध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्याम्पृथिव्यान्तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मः शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ १ ॥ इमा ऽआपः । सर्वेषाम्भूतानाम्मद्ध्वासामपाꣳ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मः रैतस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ २ ॥ अयमग्निः । सर्वेषाम्भूतानाम्मद्ध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ ३ ॥ अयमाकाशः । सर्वेषाम्भूतानाम्मद्ध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मः हृद्याकाशस्तेजोमयोऽमृत मयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ ४ ॥ अयं वायुः । सर्वेषाम्भूतानाम्मद्ध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मम्प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ ५ ॥ अयमादित्यः । सर्वेषाम्भूतानाम्मद्ध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽ-

मृतमयः पुरुषो यश्चायमध्यात्मञ्चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥ ६ ॥ अयञ्चन्द्रः । सर्वेषाम्भूतानाम्मद्ध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिँश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मम्मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥ ७ ॥ इमा दिशः । सर्वेषाम्भूतानाम्मद्ध्वासान्दिशाꣳ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥ ८ ॥ इयं विद्युत् । सर्वेषाम्भूतानाम्मद्ध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मन्तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥ ९ ॥ अयꣳ स्तनयित्नुः । सर्वेषाम्भूतानाम्मद्ध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥१०॥ अयन्धर्म्मः । सर्वेषाम्भूतानाम्मद्ध्वस्य धर्म्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्म्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मन्धार्म्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स यो ऽयमात्मेदममृतमिदम्ब्रह्मेदꣳ सर्वम् ॥११॥ इदꣳ सत्यम् । सर्वेषाम्भूता-

नाम्मद्भस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मः सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥१२॥ इदम्मानुषम्। सर्वेषाम्भूतानाम्मद्भस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मम्मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ १३ ॥ अयमात्मा। सर्वेषाम्भूतानाम्मद्भस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदम्ब्रह्मेदः सर्वम् ॥ १४ ॥ स वा अयमात्मा। सर्वेषाम्भूतानामधिपतिः सर्वेषाम्भूतानाथं राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानः समर्पिताः ॥ १५ ॥ इदं वै तन्मधु। दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ॥ [1]'तद्वान्नरा सनये दंससं उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ॥ दध्यङ् ह यन्मद्भाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचे'ति ॥ १६ ॥ इदं वै तन्मधु। दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ॥ [2]'आथर्वणायाश्विना दधीचेऽश्व्यः शिरः प्रत्यैरयतम्॥ स वाम्मधु प्रवोचदृता-

(१) ऋ० सं १. ८ १०। (२) ऋ० सं १. ८. १७।

यन्त्वाष्ट्रं ऋषद्स्त्रावपि कक्ष्यं वा'मिति ॥ १७ ॥ इदं वै तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ॥ पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ॥ पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति स वा अयम्पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृतन्नैनेन किञ्चनासंवृतम् ॥ १८ ॥ इदं वै तन्मधु । दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ॥ 'रूपं रूपम्प्रतिरूपो बभूव तदस्य रूपम्प्रतिचक्षणाय ॥ इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशे'त्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥ अथ वध्रयः । तदिदं वयः शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्य्याच्च पाराशर्यः साङ्कृत्याच्च भारद्वाजाच्च भारद्वाज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्ण्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ २० ॥ अग्निवेश्यः सैतवात् । सैतवः पाराशर्य्यात्पाराशर्यो जातूकर्ण्यर्जातूकर्ण्यो भारद्वाजा-

(१) ऋ० सं० ४. ७. १३ ।

द्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणत्रैवणेत्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज ऽआत्रेयात् ॥२१॥ आत्रेयो माण्टेः । माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो ब्रात्स्याद्ब्रात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्य्यात्काप्यात्कैशोर्य्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य ऽआङ्गिरस ऽआभूतेस्त्वाष्ट्रात्त्वाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच ऽआथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद्दथर्वा दैवो मृत्योः प्राद्धृसनान्मृत्युः प्राद्धृसनः प्रद्धृसनात्प्रद्धृसन ऽएकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिव्र्यष्टेव्र्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ २२ ॥

पञ्चमाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति पञ्चमोऽध्यायः ॥ ५ ॥

[तत्त्वज्ञाने आगमोपपत्त्योरावश्यकत्वप्रतिपादनम्]

(तत्र च ब्रह्मविद्यास्तुत्यर्थाऽऽख्यायिका)

जनको ह वैदेहः । बहुदक्षिणेन * यज्ञेनेजे तत्र ह कुरुपञ्चालानाम्ब्राह्मणा ऽअभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कुः स्विदेषाम्ब्राह्मणानामनूचानतम ऽइति ॥ १ ॥ स ह गवाꣳ सहस्रमवरुरोध । दश दश पादा ऽएकैकस्याः शृङ्गयोरावद्धा बभूवुस्तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स ऽएता गा ऽउदजतामिति ते ह ब्राह्मणा न दधृषुः ॥ २ ॥ अथ ह याज्ञवल्क्यः । स्वमेव ब्रह्मचारिणमुवाचैताः सोम्योदज सामश्रवाꣳ ऽइति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथन्नु नो ब्रह्मिष्ठो ब्रुवीतेति ॥ ३ ॥ अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव । स हैनम्प्रपच्छ त्वन्नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसीꣳ ऽइति स ह होवाच नमो वयम्ब्रह्मिष्ठाय कुर्म्मो गोकामा ऽएव वयꣳ स्म ऽइति तꣳ ह तत ऽएव प्रष्टुन्दध्रे होताश्वलः ॥ ४ ॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वम्मृत्युनाप्तꣳ सर्वम्मृत्युनाभिपन्नꣳ केन यजमानो मृत्योराप्तिमतिमुच्यत ऽइति होताऽग्निर्वाजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक्तसोऽयमग्निः स होता सा मुक्तिः सातिमुक्तिः ॥५॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नꣳ केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत

* शाखान्तरप्रसिद्धेन, बहुदक्षिणाविशिष्टेनाश्वमेधेन वा ।

ऽइत्यद्धर्युणऽर्त्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याद्धर्युस्तद्यदिदञ्चक्षुः सोऽसावादित्यः सोऽद्धर्युः सा मुक्तिः सातिमुक्तिः ॥ ६ ॥ याज्ञवल्क्येति होवाच । यदिदः सर्वम्पूर्वपक्षापरपक्षाभ्यामाप्तः सर्वम्पूर्वपक्षापरपक्षाभ्यामभिपन्नङ्केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत ऽइति ब्रह्मणऽर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य ब्रह्मा तद्यदिदम्मनः सोऽसौ चन्द्रः स ब्रह्मा सा मुक्तिः सातिमुक्तिः ॥७॥ याज्ञवल्क्येति होवाच। यदिदमन्तरिक्षमनारम्बणमिवाथ केनाक्रमेण यजमानः स्वर्गंल्लोकमाक्रमत ऽइत्युद्गात्रऽर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽयम्प्राणः स वायुः स ऽउद्गाता सा मुक्तिः सातिमुक्तिरित्यतिमोक्षा ऽअथ सम्पदः ॥ ८ ॥ याज्ञवल्क्येति होवाच । कतिभिरयमद्यऽग्निर्होतास्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र ऽइति पुरोऽनुवाक्यया च याज्यया च शस्यैव तृतीया किन्ताभिर्जयतीति पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं यजुर्याज्यया द्यौर्लोकः शस्यया ॥९॥ याज्ञवल्क्येति होवाच । कत्ययमद्याध्वर्युरस्मिन्यज्ञ ऽआहुतीर्होष्यतीति तिस्र ऽइति कतमास्तास्तिस्र ऽइति या हुता ऽउज्ज्वलन्ति या हुता ऽअतिनेदन्ति या हुता ऽअधिशेरते किन्ताभिर्जयतीति या हुता ऽउज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत ऽइव हि देवलोको या हुता ऽअतिनेदन्ति मानुष्यलोकमेव ताभि-

(१) "मनुष्यलोक०" इति 'ग' 'ज' पुस्तकयो. । काण्वशाखायामपि "मनुष्यलो०" इत्येव पाठ उपलभ्यते ॥

र्जयत्यतीव हि मानुष्यलोको या हुता ऽअधिशेरते पितृलोकमेव ताभिर्जयत्यध ऽइव हि पितृलोकः ॥ १० ॥ याज्ञवल्क्येति होवाच । कतिभिरयमद्य ब्रह्मा यज्ञन्दक्षिणतो देवताभिर्गोपायिष्यतीत्येकयेति कतमा सैकेति मन ऽएवेत्यनन्तं वै मनोऽनन्ता विश्वे देवा ऽअनन्तमेव स तेन लोकञ्जयति ॥ ११ ॥ याज्ञवल्क्येति होवाच । कत्ययमद्योद्गातास्मिन्यज्ञे स्तोष्यतीति तिस्र ऽइति कतमास्तास्तिस्र ऽइति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीयाधिदेवतमथाध्यात्मङ्कतमास्ता या ऽअध्यात्ममिति प्राण ऽएव पुरोनुवाक्यापानो याज्या व्यानः शस्या किन्ताभिर्जयतीति यत्किञ्चेदम्प्राणभृदिति ततो ह होताश्वल ऽउपरराम ॥ १२ ॥

षष्ठाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[ग्रहातिग्रहविषये आर्तभागयाज्ञवल्क्यसंवादः]

अथ हैनञ्जारत्कारव ऽआर्त्तभागः पप्रच्छ । याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा ऽइत्यष्टौ ग्रहा ऽअष्टावतिग्रहा ये तेऽष्टौ ग्रहा ऽअष्टावतिग्रहाः कतमे त ऽइति ॥ १ ॥ प्राणो वै ग्रहः । सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥ जिह्वा वै ग्रहः । स रसेनातिग्रहेण गृहीतो जिह्वया हि रसान्विजानाति

(१) "मनुष्यलोक०" इति 'ग' 'घ' पुस्तकयोः । काण्वशाखायामपि "मनुष्यलोक०" इत्येव ॥

॥ ३ ॥ वाग्वै ग्रहः । स नाम्नातिग्रहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ४ ॥ चक्षुर्वै ग्रहः । स रूपेणातिग्रहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥ श्रोत्रं वै ग्रहः । स शब्देनातिग्रहेण गृहीतः श्रोत्रेण हि शब्दाञ्शृणोति ॥६॥ मनो वै ग्रहः । स कामेनातिग्रहेण गृहीतो मनसा हि कामान्कामयते ॥७॥ हस्तौ वै ग्रहः । स कर्मणातिग्रहेण गृहीतो हस्ताभ्याꣳ हि कर्म करोति ॥ ८ ॥ त्वग्वै ग्रहः । स स्पर्शेनातिग्रहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत ऽइत्यष्टौ ग्रहा ऽअष्टावतिग्रहाः ॥ ९ ॥ याज्ञवल्क्येति होवाच । यदिदꣳ सर्वम्मृत्योरन्नङ्कास्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्म्मृत्युञ्जयति ॥ १० ॥ याज्ञवल्क्येति होवाच । यत्रायम्पुरुषो म्रियते किमेनन्न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा ऽअनन्तमेव स तेन लोकञ्जयति ॥ ११ ॥ याज्ञवल्क्येति होवाच । यत्रायम्पुरुषो म्रियत ऽउदस्मात्प्राणाः क्रामन्त्याहो३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स ऽउच्छ्वयत्यादध्मायत्यादध्मातो मृतः शेते ॥ १२ ॥ याज्ञवल्क्येति होवाच । यत्रास्य पुरुषस्य मृतस्याग्निं वाग्प्येति वातम्प्राणश्चक्षुरादित्यम्मनश्चन्द्रन्दिशः श्रोत्रम्पृथिवीꣳ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा ऽअप्सु लोहितञ्च रेतश्च निधीयते क्वायन्तदा पुरुषो भवतीत्याहर सौम्य हस्तम् ॥ १३ ॥ आर्त्तभागेति होवाच । आवमेवैतद्वेदिष्यावो न

नावेतत्सजन ऽइति तौ होत्क्रम्य मन्त्रयाञ्चक्रतुस्तौ ह यदूचतुः कर्म्म हैव तदूचतुरथ ह यत्प्रशशंसतुः कर्म्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्म्मणा भवति पापः पापेनेति ततो ह जारत्कारव ऽआर्त्तभाग ऽउपरराम ॥ १४ ॥

षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

माध्यन्दिनीये शतपथब्राह्मणे चतुर्थः प्रपाठकः ॥ ४ ॥

कण्डिकासंख्या ॥ १०४ ॥

[कर्मफलानां संसारत्वप्रदर्शनायैव भुज्युयाज्ञवल्क्यसंवादः]

अथ हैनम्भुज्युर्ल्लाह्यायनिः पप्रच्छ । याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्व्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाङ्गिरस ऽइति तं व्यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता ऽअभवन्क्व पारिक्षिता ऽअभवन्निति तत्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता ऽअभवन्निति ॥ १ ॥ स होवाच । उवाच वै स तदुगच्छन्त्वै ते तत्र यत्राश्वमेधयाजिनो गच्छन्तीति क्व श्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिंशतं वै देवरथाह्वयान्ययँल्लोकस्तः समन्तँल्लोकन्द्विस्तावत्पृथिवी पर्य्येति ताम्पृथिवीन्द्विस्तावत्समुद्रः पर्य्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पक्षन्तावानन्तरेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वा-

(१) "त" इति 'ग' 'ङ' पुस्तकयोः ।

युरात्मनि धित्वा तत्रागमयत्यत्र पारिक्षिता ऽअभवन्नित्ये-वमिव वै स वायुमेव प्रशशक्षःस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्म्मृत्युञ्जयति सर्वमायुरेति य ऽएवं वेद ततो ह भुज्युर्ह्लाह्यायनिरुपरराम ॥ २ ॥

षष्ठाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

—०—

[मसंन्यासात्मज्ञानविषये कहोडयाज्ञवल्क्यसंवादः]

अथ हैनङ्कहोडः कौषीतकेयः पप्रच्छ । याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य ऽआत्मा सर्वान्तरस्तम्मे व्याचक्ष्वेत्येष त ऽआत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकम्मोहञ्जराम्मृत्युमत्येत्येतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यञ्चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते ऽएषणे ऽएव भवतस्तस्मात्पण्डितः पाण्डित्यन्निर्विद्य बाल्येन तिष्ठासेद्बाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनि-रमौनञ्च मौनञ्च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश ऽएव भवति य ऽएवं वेद ततो ह कहोडः कौषीतकेय ऽउपरराम ॥ १ ॥

षष्ठाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

[आत्मविषये उषस्तयाज्ञवल्क्यसंवादः]

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ । याज्ञवल्क्येति होवाच यत्साक्षादुपरोक्षाद्ब्रह्म य ऽआत्मा सर्वान्तरस्तम्मे व्याचक्ष्वेत्येष त ऽआत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त ऽआत्मा सर्वान्तरो योऽपानेनापानिति स त ऽआत्मा सर्वान्तरो यो व्यानेन व्यनिति स त ऽआत्मा सर्वान्तरो य ऽउदानेनोदनिति स त ऽआत्मा सर्वान्तरो यः समानेन समानिति स त ऽआत्मा सर्वान्तरः स होवाचोषस्तश्चाक्रायणो यथा वै ब्रूयादसौ गौरसावश्व ऽइत्येवमेवैतद्व्यपदिष्टम्भवति यदेव साक्षादुपरोक्षाद्ब्रह्म य ऽआत्मा सर्वान्तरस्तम्मे व्याचक्ष्वेत्येष त ऽआत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो न दृष्टेर्द्रष्टारम्पश्येर्न्न श्रुतेः श्रोतारः शृणुया न मतेर्म्मन्तारम्मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया ऽएष त ऽआत्मा सर्वान्तरोऽतोऽन्यदार्त्तन्ततो होषस्तश्चाक्रायण ऽउपरराम ॥ १ ॥

षष्ठाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

—०—

[सर्वान्तरस्यात्मनः स्वरूपाधिगमाय गार्गीयाज्ञवल्क्यसंवादः]

अथ हैनङ्गार्गी वाचक्नवी पप्रच्छ । याज्ञवल्क्येति होवाच यदिदः सर्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु खल्वाप ऽओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु वायुरोतश्च प्रोतश्चेत्याकाश ऽएव गार्गीति कस्मिन्नु खल्वाकाश

(१) "यमनिति" इति 'ग' 'ञ' पुस्तकयोः ।

ऽओतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्ग्गीति कस्मिन्नु-
न्तरिक्षलोका ऽओताश्च प्रोताश्चेति द्यौर्लोकेषु गार्ग्गीति
कस्मिन्नु द्यौर्लोका[2] ऽओताश्च प्रोताश्चेत्यादित्यलोकेषु
गार्ग्गीति कस्मिन्नादित्यलोका ऽओताश्च प्रोताश्चेति
चन्द्रलोकेषु गार्ग्गीति कस्मिन्नु चन्द्रलोका ऽओताश्च
प्रोताश्चेति नक्षत्रलोकेषु गार्ग्गीति कस्मिन्नु नक्षत्र-
लोका ऽओताश्च प्रोताश्चेति देवलोकेषु गार्ग्गीति क-
स्मिन्नु देवलोका ऽओताश्च प्रोताश्चेति गन्धर्वलोकेषु
गार्ग्गीति कस्मिन्नु गन्धर्वलोका ऽओताश्च प्रोताश्चेति
प्रजापतिलोकेषु गार्ग्गीति कस्मिन्नु प्रजापतिलोका ऽओ-
ताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्ग्गीति कस्मिन्नु
ब्रह्मलोका ऽओताश्च प्रोताश्चेति स होवाच गार्ग्गि
मातिप्राक्षीर्म्मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्या वै देवता
ऽअतिपृच्छसि गार्ग्गि मातिप्राक्षीरिति ततो ह गार्ग्गी
वाचक्नव्युपरराम ॥ १ ॥

षष्ठाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

[ब्रह्मलोकानामन्तरतमं सूत्रं दर्शयितुमुद्दालकयाज्ञवल्क्यसंवादः]

अथ हैनमुद्दालक ऽआरुणिः पप्रच्छ । याज्ञवल्क्येति
होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञ-
मधीयानास्तस्यासीद्भार्य्या गन्धर्वगृहीता तमपृच्छाम कोऽ-

---

(१) 'ग' 'ञ' पुस्तकयोः "द्यौर्लोके" इति पाठो दृश्यते ।

(२) "द्यौर्लोक" इति 'ग' 'ञ' पुस्तकयो. । तथैव तद्विशेषणीभूतौ ओतप्रोतशब्दावप्येक-वचनान्तावेवोक्तपुस्तकयोरुपलभ्येते ।

सीति सोऽब्रवीत्कबन्ध ऽआथर्वण ऽइति ॥ १ ॥ सोऽब्रवीत् । पतञ्चलङ्काप्यं ऋग्याज्ञिकाँश्च वेत्थ नु त्वङ्काप्य तत्सूत्रं ऋग्यस्मिन्नयञ्च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहन्तद्भगवन्वेदेति ॥ २ ॥ सोऽब्रवीत् । पतञ्चलङ्काप्यं ऋग्याज्ञिकाँश्च वेत्थ नु त्वङ्काप्य तमन्तर्य्यामिणं ऋग्य ऽइमञ्च लोकम्परञ्च लोकः सर्वाणि च भूतान्यन्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहन्तम्भगवन्वेदेति ॥ ३ ॥ सोऽब्रवीत् । पतञ्चलङ्काप्यं ऋग्याज्ञिकाँश्च यो वै तत्काप्य सूत्रं विद्यात्तञ्चान्तर्य्यामिणः स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स यज्ञवित्स भूतवित्स ऽआत्मवित्स सर्व्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्वं ऋग्याज्ञवल्क्य सूत्रमविद्वाँस्तञ्चान्तर्य्यामिणम्ब्रह्मगवीरुदजसे मूर्द्धा ते विपतिष्यतीति ॥ ४ ॥ वेद वा ऽअहं गौतम । तत्सूत्रन्तञ्चान्तर्य्यामिणमिति यो वा ऽइदङ्किञ्च ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ ५ ॥ वायुर्वै गौतम तत्सूत्रम् । वायुना वै गौतम सूत्रेणायञ्च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति तस्माद्वै गौतम पुरुषम्प्रेतमाहुर्व्यस्रंसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण सन्दृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्य्यामिणम्ब्रूहीति ॥ ६ ॥ यः पृथिव्यान्तिष्ठन् । पृथिव्या ऽअन्तरो यम्पृथिवी न वेद यस्य पृथिवी शरीरं ऋग्यः पृथिवीमन्तरो यमयति स त ऽआत्मान्तर्य्याम्य-

मृतः ॥ ७ ॥ योऽप्सु तिष्ठन् । अद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ ८ ॥ * योऽग्नौ तिष्ठन् । अग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ ९ ॥ य आकाशे तिष्ठन् । आकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ १० ॥ यो वायौ तिष्ठन् । वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ ११ ॥ य आदित्ये तिष्ठन् । आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ १२ ॥ यश्चन्द्रतारके तिष्ठन् । चन्द्रतारकादन्तरो यञ्चन्द्रतारकन्न वेद यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ १३ ॥ यो दिक्षु तिष्ठन् । दिग्भ्योऽन्तरो यन्दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ १४ ॥ यो विद्युति तिष्ठन् । विद्युतोऽन्तरो यं विद्युन्न वेद यस्य विद्युच्छरीरं यो विद्युतमन्तरो यमयति स त आत्मान्तर्याम्यमृतः ॥ १५ ॥ य स्तनयित्नौ तिष्ठन् । स्तनयित्नोरन्तरो यꣳ स्तनयित्नुर्न वेद यस्य स्तनयित्नुः शरीरं य स्तनयित्नुमन्तरो

* शतम् ७।१०० ।

यमयति स त ऽआत्मान्तर्याम्ममृत ऽइत्यधिदेवतमथाधिलोकम् ॥ १६ ॥ यः सर्वेषु लोकेषु तिष्ठन् । सर्वेभ्यो लोकेभ्योऽन्तरो यः सर्वे लोका न विदुर्यस्य सर्वे लोकाः शरीरं यः सर्वाँल्लोकानन्तरो यमयति स त ऽआत्मान्तर्याम्यमृत ऽइत्यु ऽएवाधिलोकमथाधिवेदम् ॥ १७ ॥ यः सर्वेषु वेदेषु तिष्ठन् । सर्वेभ्यो वेदेभ्योऽन्तरो यः सर्वे वेदा न विदुर्यस्य सर्वे वेदाः शरीरं यः सर्वान्वेदानन्तरो यमयति स त ऽआत्मान्तर्याम्यमृत ऽइत्यु ऽएवाधिवेदमथाधियज्ञम् ॥ १८ ॥ यः सर्वेषु यज्ञेषु तिष्ठन् । सर्वेभ्यो यज्ञेभ्योऽन्तरो यः सर्वे यज्ञा न विदुर्यस्य सर्वे यज्ञाः शरीरं यः सर्वान्यज्ञानन्तरो यमयति स त ऽआत्मान्तर्याम्यमृत इत्यु ऽएवाधियज्ञमथाधिभूतम् ॥ १९ ॥ यः सर्वेषु भूतेषु तिष्ठन् । सर्वेभ्यो भूतेभ्योऽन्तरो यः सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति स त ऽआत्मान्तर्याम्यमृत ऽइत्यु ऽएवाधिभूतमथाध्यात्मम् ॥ २० ॥ यः प्राणे तिष्ठन् । प्राणादन्तरो यम्प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयति स त ऽआत्मान्तर्याम्यमृतः ॥२१॥ यो वाचि तिष्ठन् । वाचोऽन्तरो यं वाङ्न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयति स त ऽआत्मान्तर्याम्यमृतः ॥ २२ ॥ यश्चक्षुषि तिष्ठन् । चक्षुषोऽन्तरोयञ्चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयति स त ऽआत्मान्तर्याम्यमृतः ॥२३॥

यः श्रोत्रे तिष्ठन् । श्रोत्रादन्तरो यꣳ श्रोत्रन्न वेद यस्य श्रोत्रꣳ शरीरं य्यः श्रोत्रमन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २४ ॥ यो मनसि तिष्ठन् । मनसोऽन्तरो यन्मनो न वेद यस्य मनः शरीरं य्यो मनोऽन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २५ ॥ यस्त्वचि तिष्ठन् । त्वचोऽन्तरो यन्त्वङ्न वेद यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २६ ॥ यस्तेजसि तिष्ठन् । तेजसोऽन्तरो यन्तेजो न वेद यस्य तेजः शरीरं य्यस्तेजोऽन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २७ ॥ यस्तमसि तिष्ठन् । तमसोऽन्तरो यन्तमो न वेद यस्य तमः शरीरं य्यस्तमोऽन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २८ ॥ यो रेतसि तिष्ठन् । रेतसोऽन्तरो यꣳ रेतो न वेद यस्य रेतः शरीरं य्यो रेतोऽन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ २९ ॥ य ऽआत्मनि तिष्ठन् । आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य ऽआत्मानमन्तरो यमयति स त ऽआत्मान्तर्य्याम्म्यमृतः ॥ ३० ॥ अदृष्टो द्रष्टा । अश्रुतः श्रोतामतो मन्ताविज्ञातो विज्ञाता नान्योऽस्ति द्रष्टा नान्योऽस्ति श्रोता नान्योऽस्ति मन्ता नान्योऽस्ति विज्ञातैष त ऽआत्मान्तर्य्याम्म्यमृतोऽतोऽन्यदार्त्तन्ततो होद्दालक ऽआरुणिरुपरराम ॥ ३१ ॥

षष्ठाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

[अशनायादिविनिर्मुक्तं निरुपाधिकं सर्वान्तरं ब्रह्म
वर्णयितुं गार्गीयाज्ञवल्क्यसंवादः]

अथ ह वाचक्नव्युवाच। ब्राह्मणा भगवन्तो हन्ता-हमिमं द्वे याज्ञवल्क्यन्द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे विवक्ष्यति न वै जातु युष्माकमिमङ्कश्चिद्ब्रह्मोद्यञ्जेतेति तौ चेन्मे न विवक्ष्यति मूर्द्धास्य विपतिष्यतीति पृच्छ गार्ग्गीति ॥ १ ॥ सा होवाच। अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उद्यन्धनुरधिज्यङ्कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहन्त्वा द्वाभ्याम्प्रश्नाभ्यामुपोदस्थान्तौ मे ब्रूहीति पृच्छ गार्ग्गीति ॥ २ ॥ सा होवाच। यदूर्द्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिँस्तदोतञ्च प्रोतञ्चेति ॥ ३ ॥ स होवाच। यदूर्द्ध्वङ्गार्ग्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतञ्च प्रोतञ्चेति ॥ ४ ॥ सा होवाच। नमस्ते याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्ग्गीति ॥ ५ ॥ सा होवाच। यदूर्द्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिन्नेव तदोतञ्च प्रोतञ्चेति ॥ ६ ॥ स होवाच। यदूर्द्ध्वङ्गार्ग्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे

(१) "सपत्नाधिव्याधिनौ" इति 'ग' 'ञ' पुस्तकयोः।

यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षत ऽआकाश ऽएव तद्यो-
तञ्च प्रोतञ्चेति कस्मिन्नु खल्वाकाश ऽओतश्च प्रोतश्चेति
॥ ७ ॥ स होवाच । एतद्वै तदक्षरङ्गार्गि ब्राह्मणा ऽअभि-
वदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमत-
मोऽवाय्वनाकाशमसङ्गमस्पर्शमगन्धमरसमचक्षुष्कमश्रोत्र-
मवागमनोऽतेजस्कमप्राणममुखमनामागोत्रमजरममरमभ-
यममृतमरजोऽशब्दमविवृतमसँव्वृतमपूर्व्वमनपरमनन्तरमबा-
ह्यन्न तदश्नोति कञ्चन न तदश्नोति कश्चन ॥ ८ ॥
एतस्य वा ऽअक्षरस्य । प्रशासने गार्गि द्यावा-
पृथिवी विधृते तिष्ठत ऽएतस्य वा ऽअक्षरस्य प्रशा-
सने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठत ऽएतस्य वा
ऽअक्षरस्य प्रशासने गार्ग्यहोरात्राण्यर्द्धमासा मासा
ऽऋतवः सँवत्सरा विधृतास्तिष्ठन्त्येतस्य वा ऽअक्षरस्य
प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः
पर्वतेभ्यः प्रतीच्योऽन्या यां यांञ्च दिशमेतस्य वा
ऽअक्षरस्य प्रशासने गार्गि ददतम्मनुष्याः प्रशꣳसन्ति
यजमानन्देवा दर्व्यम्पितरोऽन्वायत्ताः ॥ ९ ॥ यो वा
ऽएतदक्षरमविदित्वा गार्गि । अस्मिँल्लोके जुहोति ददाति
तपस्यत्यपि बहूनि वर्षसहस्राण्यन्तवानेवास्य स लोको
भवति यो वा ऽएतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति
स कृपणोऽथ य ऽएतदक्षरङ्गार्गि विदित्वास्माल्लोकात्प्रैति
स ब्राह्मणः ॥ १० ॥ तद्वा ऽएतदक्षरङ्गार्गि । अदृष्टन्द्र-
ष्टृश्रुतꣳ श्रोतृमतम्मन्त्रविज्ञातं विज्ञातृ नान्यदस्ति

द्रष्टृ नान्न्यदस्ति श्रोतृ नाऽन्यदस्ति मन्तृ नान्न्यदस्ति विज्ञात्रेतद्वै तदक्षरङ्गार्गि यस्मिन्नाकाश ऽओतश्च प्रोतश्चेति ॥ ११ ॥ सा होवाच । ब्राह्मणा भगवन्तस्तदेव बहु मन्यद्धं स्यदस्मान्नमस्कारेण मुच्च्याद्धै न वै जातु युष्माकमिमङ्कश्चिद्ब्रह्मोद्यञ्जेतेति ततो ह वाचक्नव्युपरराम ॥ १२ ॥

षष्ठाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

[ब्रह्मणो नियन्तव्यदेवताभेदसंकोचविकासद्वारेणाधिगन्तव्यं साक्षादपरोक्षत्वं वर्णयितुं शाकल्ययाज्ञवल्क्यसंवादः]

अथ हैनं विदग्धः शाकल्यः पप्रच्छ । कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्च्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच ॥ १ ॥ कत्येव देवा याज्ञवल्क्येति । त्रयस्त्रिꣳशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय ऽइत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्द्ध ऽइत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक ऽइत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ २ ॥ स होवाच । महिमान ऽएवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा ऽइति कतमे ते त्रयस्त्रिꣳशदित्यष्टौ वसव ऽएकादश

रुद्रा द्वादशादित्यास्त ऽएकत्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥ ३ ॥ कतमे वसव ऽइति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षꣳ चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव ऽएतेषु हीदꣳ सर्वं वसु हितमेते हीदꣳ सर्वं वासयन्ते तद्यदिदꣳ सर्वं वासयन्ते तस्मादसव ऽइति ॥४॥ कतमे रुद्रा ऽइति । दशेमे पुरुषे प्राणा ऽआत्मैकादशस्ते यदास्मान्मर्त्यादुच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा ऽइति ॥ ५ ॥ कतम ऽआदित्या ऽइति । द्वादश मासाः सँवत्सरस्यैत ऽआदित्या ऽएते हीदꣳ सर्वमादुदाना यन्ति तद्यदिदꣳ सर्वमादुदाना यन्ति तस्मादादित्या ऽइति ॥ ६ ॥ [अर्धः प्रपाठकः ॥ ५४ ॥] कतम ऽइन्द्रः कतमः प्रजापतिरिति । स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतम स्तनयित्नुरित्यशनिरिति कतमो यज्ञ ऽइति पशव ऽइति ॥ ७ ॥ कतमे षडिति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षꣳ चादित्यश्च द्यौश्चैते षडित्येते ह्येवेदꣳ सर्वꣳ षडिति ॥ ८ ॥ कतमे ते त्रयो देवा ऽइति । इम ऽएव त्रयो लोका ऽएषु हीमे सर्वे देवा ऽइति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध ऽइति योऽयम्पवत ऽइति ॥ ९ ॥ तदाहुः । यदयमेक ऽएव पवतेऽथ कथमध्यर्ध ऽइति यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्तेनाध्यर्ध ऽइति कतम ऽएको देव ऽइति स ब्रह्म त्यदित्याचक्षते ॥ १० ॥ पृथिव्येव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्द्यौ वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ

स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहन्तम्पुरुषः सर्वस्यात्मनः परायणं ब्रूयमात्थ य ऽएवायः शारीरः पुरुषः स ऽएष वदैव शाकल्य तस्य का देवतेति स्त्रिय ऽइति होवाच ॥ ११ ॥ रूपाण्येव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्ह्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ब्रूयमात्थ य ऽएवासावादित्ये पुरुषः स ऽएष वदैव शाकल्य तस्य का देवतेति चक्षुरिति होवाच ॥ १२ ॥ आकाश ऽएव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्ह्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ब्रूयमात्थ य ऽएवायं वायौ पुरुषः स ऽएष वदैव शाकल्य तस्य का देवतेति प्राण ऽइति होवाच ॥ १३ ॥ काम ऽएव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्ह्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ब्रूयमात्थ य ऽएवासौ चन्द्रे पुरुषः स ऽएष वदैव शाकल्य तस्य का देवतेति मन ऽइति होवाच ॥ १४ ॥ तेज ऽएव यस्यायतनम् । चक्षुर्लोको मनोज्योतिर्ह्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ब्रूयमात्थ य ऽएवायमग्नौ पुरुषः स ऽएष वदैव शाकल्य तस्य का देवतेति वागिति होवाच ॥ १५ ॥

तम ऽएव यस्यायतनम्। चक्षुर्लोको मनोज्योतिर्ग्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ग्यमात्थ य ऽएवायञ्छायामयः पुरुषः स ऽएष वृदैव शाकल्ल्य तस्य का देवतेति मृत्युरिति होवाच ॥ १६ ॥ आप ऽएव यस्यायतनम्। चक्षुर्लोको मनोज्योतिर्ग्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ग्यमात्थ य ऽएवायमप्सु पुरुषः स ऽएष वृदैव शाकल्ल्य तस्य का देवतेति वरुण ऽइति होवाच ॥ १७ ॥ रेत ऽएव यस्यायतनम्। चक्षुर्लोको मनोज्योतिर्ग्यो वै तम्पुरुषं विद्यात्सर्वस्यात्मनः परायणः स वै वेदिता स्याद्याज्ञवल्क्य वेद वा ऽअहन्तम्पुरुषः सर्वस्यात्मनः परायणं ग्यमात्थ य ऽएवायम्पुत्रमयः पुरुषः स ऽएष वृदैव शाकल्ल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥ १८ ॥ शाकल्ल्येति होवाच याज्ञवल्क्यः। स्वाꣳ स्विदिमे ब्राह्मणा ऽअक्षारावक्षयणमक्रता३ ऽइति ॥ १९ ॥ याज्ञवल्क्येति होवाच शाकल्ल्यः। यदिदङ्कुरुपञ्चालाना-म्ब्राह्मणानत्यवादीः किम्ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा ऽइति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ २० ॥ किन्देवतोऽस्याम्प्राच्यान्दिश्यसीति। आदित्यदेवत ऽइति स ऽआदित्यः कस्मिन्नु प्रतिष्ठित ऽइति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितम्भवतीति रूपेष्विति

चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानि भवन्तीति हृदय ऽइति हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥ किन्देवतोऽस्यान्दक्षिणायान्दिश्यस्मीति । यमदेवत ऽइति स यमः कस्मिन्प्रतिष्ठित ऽइति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठिता भवतीति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणान्ददाति श्रद्धायाꣳ ह्येव दक्षिणा प्रतिष्ठिता भवतीति कस्मिन्नु श्रद्धा प्रतिष्ठिता भवतीति हृदय ऽइति हृदयेन हि श्रद्धत्ते हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥ किन्देवतोऽस्याम्प्रतीच्यान्दिश्यस्मीति । वरुणदेवत ऽइति स वरुणः कस्मिन्नप्रतिष्ठित ऽइत्यप्स्विति कस्मिन्नप्स्वापः प्रतिष्ठिता भवन्तीति रेतस्मीति कस्मिन्नु रेतः प्रतिष्ठितम्भवतीति हृदय ऽइति तस्मादपि प्रतिरूपज्ञातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्म्मित ऽइति हृदये ह्येव रेतः प्रतिष्ठितम्भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥ किन्देवतोऽस्यामुदीच्यान्दिश्यस्मीति । सोमदेवत ऽइति स सोमः कस्मिन्नप्रतिष्ठित ऽइति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठिता भवतीति सत्य ऽइति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठिता भवतीति कस्मिन्नु सत्यम्प्रतिष्ठितम्भवतीति हृदय ऽइति हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यम्प्रतिष्ठितम्भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २४ ॥ किन्देवतोऽस्यान्ध्रुवायाꣳ

न्दिुश्श्रयसीति । अग्निर्देवत इुति सोऽग्निः कस्मिन्न्प्रति-
ष्ठित ऽइुति वाचीति कस्मिन्नु वाक्प्रतिष्ठिता भवतीति
मनसीति कस्मिन्नु मनः प्रतिष्ठितम्भवतीति हृदय
ऽइुति कस्मिन्नु हृदयम्प्रतिष्ठितम्भवतीति ॥ २५ ॥ अह-
ल्लिकेति होवाच याज्ञवल्क्यः । यत्रैतदन्न्यत्रास्म्मन्मन्यासै
यत्रैतदश्यत्रास्म्मत्स्याच्छ्वानो वैनदद्युर्व्वयाꣳसि वैनद्विमथ्नी-
रन्निति ॥ २६ ॥ कस्मिन्नु त्वञ्चात्मा च प्रतिष्ठितौ स्थ
ऽइुति । प्राण ऽइुति कस्मिन्नु प्राणः प्रतिष्ठित ऽइुत्य-
पान ऽइुति कस्मिन्न्वपानः प्रतिष्ठित ऽइुति व्यान
ऽइुति कस्मिन्नु व्यानः प्रतिष्ठित ऽइुत्युदान ऽइुति
कस्मिन्नूदानः प्रतिष्ठित ऽइुति समान ऽइुति ॥ २७ ॥
स ऽएष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्य्यो न
हि शीर्य्यतेऽसङ्गोऽसितो न सज्यते न व्यथत ऽइुत्येता-
न्यष्टावायतनान्यष्टौ लोका ऽअष्टौ पुरुषाः स यस्ता-
न्पुरुषान्व्यु्दुह्य प्रत्युह्यात्यक्रामीत्तन्त्वौपनिषदम्पुरुषम्पृ-
च्छामि तञ्चेन्मे न विवक्ष्यसि मूर्द्धा ते विपतिष्यतीति
तꣳ ह शाकल्यो न मेने तस्य ह मूर्द्धा विपपात तस्य
ह्याप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुः ॥२८॥
अथ ह याज्ञवल्क्य ऽउवाच । ब्राह्मणा भगवन्तो यो वः
कामयते स मा पृच्छतु सर्वे वा मा पृच्छत[1] यो वः काम-
यते तं वः पृच्छानि सर्वान्वा वः पृच्छानीति ते ह
ब्रह्मणा न दधृषुः ॥ २९ ॥ तान्ह[2]तैः श्लोकैः पप्रच्छ ।

(१) "पृच्छध" इति 'क' पुस्तके ।

यथा व्वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ॥ तस्य पर्णानि लोमानि त्वगस्योत्पाटिका बहिः ॥ ३० ॥ त्वच एवास्य रुधिरम्प्रस्यन्दि त्वच उत्पटः ॥ तस्मात्तदातृन्नात्प्रैति रसो व्वृक्षादिवाहतात् ॥ ३१ ॥ माꣳसान्यस्य शकराणि किनाटꣳ स्नाव तत्स्थिरम् ॥ अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ ३२ ॥ यद्वृक्षो व्वृक्णो रोहति मूलान्नवतरः पुनः ॥ मर्त्यः स्विन्मृत्युना व्वृक्णः कस्मान्मूलात्प्ररोहति ॥ ३३ ॥ रेतस इति मा वोचत जीवतस्तत्प्रजायते ॥ जात एव न जायते को न्वेनमनयेत्पुनः ॥ धानारुह उ वै व्वृक्षोऽन्यतः प्रेत्य सम्भवः ॥ यत्समूलमुद्वृहेयुर्व्वृक्षन्न पुनराभवेत् ॥ मर्त्यः स्विन्मृत्युना व्वृक्णः कस्मान्मूलात्प्ररोहति । विज्ञानमानन्दम्ब्रह्म रातेर्दातुः परायणम् ॥ तिष्ठमानस्य तद्विद इति ॥३४॥

षष्ठाध्याये नवमं ब्राह्मणम् ॥ ९ ॥

[उपदिष्टस्यैव ब्रह्मणोऽधिगमने उपायान्तरस्य प्रदर्शनं ब्राह्मणद्वयेन]

जनको ह वैदेह आसाञ्चक्रे । अथ ह याज्ञवल्क्य आववाज स ह वाच जनको वैदेहो याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राडिति होवाच यत्ते कश्चिदब्रवीत्तच्छृणवामेति ॥ १ ॥ अब्रवीन्म उदङ्कः शौल्वायनः ॥ प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्वायनोऽ-

ब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनम्प्रतिष्ठान्न मेऽब्रवीदित्येकपाद्वा ऽएतत्सम्म्राडिति ॥२॥ स वै नो ब्रूहि याज्ञवल्क्य । प्राण ऽएवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण ऽएव सम्म्राडिति होवाच प्राणस्य वै सम्म्राट्कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्यार्त्यपि तत्र बधशङ्का भवति यान्दिशमेति प्राणस्यैव सम्म्राट्कामाय प्राणो वै सम्म्राट् परमम्ब्रह्म नैनम्प्राणो जहाति सर्व्वाण्येनम्भूतान्यभिक्षरन्ति ॥ ३ ॥ देवो भूत्वा देवानप्येति । य ऽएवं विद्वानेतदुपास्ते हुस्त्यृषभः सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति क ऽएव ते किमब्रवीदिति ॥ ४ ॥ अब्रवीन्मे जित्वा शैलिनः । वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्य्यवान्ब्रूयात्तथा तच्छैलिनोऽब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳ स्यादित्येब्रवीत्तु ते तस्यायतनम्प्रतिष्ठान्न मेऽब्रवीदित्येकपाद्वा ऽएतत्सम्म्राडिति ॥ ५ ॥ स वै नो ब्रूहि याज्ञवल्क्य । वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्म्राडिति होवाच वाचा वै सम्म्राड्बन्धुः प्रज्ञायत ऽऋग्वेदो यजुर्वेदः सामवेदोऽ-

(१) "स ऽएवायत०" इति ग' 'ज' पुस्तकयोः ।
(२) "बधाशङ्का" इत्युक्तपुस्तकयोः ।
(३) "स्यादब्रवीत्तु" इति ग' ज' पुस्तकयोः ।

थर्वाङ्गिरस ऽइतिहासः पुराणं विद्या ऽउपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि वाचैव सम्राट् प्रजायन्ते वाग्वै सम्राट् परमम्ब्रह्म नैनं वाग्जहाति सर्वाण्येनम्भूतान्यभिक्षरन्ति ॥६॥ देवो भूत्वा देवानप्येति। य ऽएवं विद्वानेतदुपास्ते हस्त्यृषभः सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति क ऽएव ते किमब्रवीदिति ॥ ७ ॥ अब्रवीन्मे बर्कुर्वार्ष्णः। चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनम्प्रतिष्ठान्न मेऽब्रवीदिति त्येकपाद्वा ऽएतत्सम्राडिति ॥ ८ ॥ स वै नो ब्रूहि याज्ञवल्क्य। चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति स ऽआहाद्राक्षमिति तत्सत्यम्भवति चक्षुर्वै सम्राट् परमम्ब्रह्म नैनꣳ श्चक्षुर्जहाति सर्वाण्येनम्भूतान्यभिक्षरन्ति ॥ ९ ॥ देवो भूत्वा देवानप्येति। य ऽएवं विद्वानेतदुपास्ते हस्त्यृषभः सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति क ऽएव ते किमब्रवीदिति ॥ १० ॥ अब्रवीन्मे गर्दभीविपीतो भारद्वाजः। श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनम्प्रति-

ष्ट्वान्न मेऽब्रवीदित्येकपाद्वा ऽएतत्सम्म्राडिति ॥ ११ ॥ स वै नो ब्रूहि याज्ञवल्क्य । श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त ऽइत्येनदुपासीत कानन्तता याज्ञवल्क्य दिश ऽएव सम्म्राडिति होवाच तस्म्माद्वै सम्म्राड्याङ्काञ्च दिशङ्गच्छति नैवास्या ऽअन्तङ्गच्छत्यनन्ता हि दिशः श्रोत्रꣳ हि दिशः श्रोत्रं वै सम्म्राट् परमम्ब्रह्म नैनꣳ श्रोत्रञ्जहाति सर्वाण्येनम्भूतान्यभिक्षरन्ति ॥ १२ ॥ देवो भूत्वा देवानप्येति । य ऽएवं विद्वानेतदुपास्ते हुस्त्वृषभꣳ सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति क ऽएव ते किमब्रवीदिति ॥ १३ ॥ अब्रवीन्मे सत्यकामो जावालः । मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तत्सत्यकामोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनम्प्रतिष्ठान्न मेऽब्रवीदित्येकपाद्वा ऽएतत्सम्म्राडिति ॥ १४ ॥ स वै नो ब्रूहि याज्ञवल्क्य । मन ऽएवायतनमाकाशः प्रतिष्ठानन्द ऽइत्येनदुपासीत कानन्दुता याज्ञवल्क्य मन ऽएव सम्म्राडिति होवाच मनसा वै सम्म्राट् स्त्रियमभिहर्य्यति तस्याम्प्रतिरूपः पुत्रो जायते स ऽआनन्दो मनो वै सम्म्राट् परमम्ब्रह्म नैनम्मनो जहाति सर्वाण्येनम्भूतान्यभिक्षरन्ति ॥ १५ ॥ देवो भूत्वा देवानप्येति । य ऽएवं विद्वानेतदुपास्ते हुस्त्वृषभꣳ सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य

हरेतेति क ऽएव ते किमब्रवीदिति ॥ १६ ॥ अब्रवीन्मे विदग्धः शाकल्यः हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनम्प्रतिष्ठान्न मेऽब्रवीदित्येकपाद्वा ऽएतत्सम्म्राडिति ॥ १७ ॥ स वै नो ब्रूहि याज्ञवल्क्य । हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितिता याज्ञवल्क्य हृदयमेव सम्म्राडिति होवाच हृदयं वै सम्म्राट् सर्वेषाम्भूतानाम्प्रतिष्ठा हृदयेन हि सर्वाणि भूतानि प्रतितिष्ठन्ति हृदयं वै सम्म्राट् परमम्ब्रह्म नैनꣳ हृदयꣳहाति सर्वाण्येनम्भूतान्यभिक्षरन्ति ॥ १८ ॥ देवो भूत्वा देवान्प्येति । य ऽएवं विद्वानेतदुपास्ते हस्त्यृषभः सहस्रन्ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ १९ ॥

षष्ठाध्याये दशमं ब्राह्मणम् ॥ १० ॥

अथ ह जनको वैदेहः कूर्च्चादुपावसर्प्पन्नुवाच । नमस्ते याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्म्राण्णमहान्तमद्धानमेष्यन्रथं वा नावं वा समादुदीतैवमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं त्वन्दारक ऽआढ्यः सन्नधीतवेद ऽउक्तोपनिषत्क ऽइतो विमुच्यमानः क्व गमिष्यसीति नाहन्तद्भगवन्वेद यत्र गमिष्यामीत्यथ

वै तेऽहन्तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥ स होवाच । इन्धो वै नामैष योऽयन्दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धः सन्तमिन्द्र इत्याचक्षते परोऽक्षेणेव परोऽक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥ अथैतद्वामेऽक्षिणि पुरुषरूपम् । एषास्य पत्नी विराट् तयोरेष सँस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदुन्नं य एषोऽन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं य एतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः सती सञ्चरणी यैषा हृदयाद्ऊर्ध्वा नाड्युच्चरति ॥ ३ ॥ ता वा एतस्यैताः । हिता नाम नाड्यो यथा केशः सहस्रधा भिन्न एताभिर्वा एतमात्रवद्रात्रवति तस्मादेष प्रविविक्ताहारतर इव भवत्यस्मात्छारीरादात्मनः ॥ ४ ॥ तस्य वा एतस्य पुरुषस्य । प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणाः प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः ॥५॥ स एष नेति नेत्यात्मा । अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथतेऽभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहो नमस्ते याज्ञवल्क्याभयन्त्वागच्छताद्यो नो भगवन्नभयं वेदयस इमे विदेहा अयमहमस्मीति ॥ ६ ॥

षष्ठाध्याय एकादशं ब्राह्मणम् ॥ ११ ॥

माध्यन्दिनीये शतपथब्राह्मणे पञ्चमः प्रपाठकः ॥५॥ कण्डिकासंख्या ॥१०७॥

इति षष्ठोऽध्यायः ॥ ६ ॥

[प्रस्तुतस्य ब्रह्मणो व्यतिरिक्तत्वशुद्धत्वाद्वैतत्वादिकप्रदर्शनम्]

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम । समेनेन वदिष्य ऽइत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदतुस्तस्मै ह याज्ञवल्क्यो वरन्ददौ स ह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳ ह सम्राडेव पूर्वꣳ पप्रच्छ ॥ १ ॥ याज्ञवल्क्य किञ्ज्योतिरयम्पुरुष ऽइति । आदित्यज्योतिः सम्राडिति होवाचादित्येनैवायञ्ज्योतिषास्ते पल्ल्ययते कर्म्म कुरुते विपर्य्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ २ ॥ अस्तमित ऽआदित्ये याज्ञवल्क्य । किञ्ज्योतिरेवायम्पुरुष ऽइति चन्द्रज्योतिः सम्राडिति होवाच चन्द्रेणैवायञ्ज्योतिषास्ते पल्ल्ययते कर्म्म कुरुते विपर्य्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३ ॥ अस्तमित ऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते किञ्ज्योतिरेवायम्पुरुष ऽइत्यग्निज्योतिः सम्राडिति होवाचाग्निनैवायञ्ज्योतिषास्ते पल्ल्ययते कर्म्म कुरुते विपर्य्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥ अस्तमित ऽआदित्ये याज्ञवल्क्य । चन्द्रमस्यस्तमिते शान्तेऽग्नौ किञ्ज्योतिरेवायम्पुरुष ऽइति वाग्ज्योतिः सम्राडिति होवाच वाचैवायञ्ज्योतिषास्ते पल्ल्ययते कर्म्म कुरुते विपर्य्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥ अस्तमित ऽआदित्ये याज्ञवल्क्य । चन्द्र-

(१) "न्येती०" इति 'ग' 'ञ' पुस्तकयोः ।

मस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किञ्ज्योतिरेवायम्पुरुष इत्यात्मज्योतिः सम्म्राडिति होवाचात्मनैवायञ्ज्योतिषास्ते पल्ल्ययते कर्म्म कुरुते विपर्य्येतीति ॥ ६ ॥* कतम आत्मेति । योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः स समानः सन्नुभौ लोकौ सञ्चरति ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वेमँल्लोकमतिक्रामति ॥ ७ ॥ स वा अयम्पुरुषो जायमानः । शरीरमभिसम्पद्यमानः पाप्मभिः सहसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति मृत्यो रूपाणि ॥ ८ ॥ तस्य वा एतस्य पुरुषस्य । द्वे एव स्थाने भवत इदञ्च परलोकस्थानञ्च सन्ध्यन्तृतीयꣳ स्वप्नस्थानन्तस्मिन्नन्तरे स्थाने तिष्ठन्नुभे स्थाने पश्यतीदञ्च परलोकस्थानञ्च ॥ ९ ॥ अथ यथाक्रमोऽयम्परलोकस्थाने भवति । तमाक्रममाक्रम्योभयान्पाप्मन आनन्दाँश्च पश्यति स यत्रायम्प्रस्वपिती(1)त्यस्य लोकस्य सर्व्वावतो मात्रामपादाय स्वयं विहृत्य स्वयन्निर्म्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायम्पुरुषः स्वयञ्ज्योतिर्भवति ॥ १० ॥ न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः स्रवन्त्यः(2) पुष्करिण्योः भवन्त्यथ वेशान्ताः स्रवन्तीः पुष्करिणीः

* शतम् ७४०० ।

(१) "प्रस्वपित्यस्य" इति 'ग' 'ज' पुस्तकयो ।

(२) "स्रवन्त्य." इत्युक्तपुस्तकयो ।

स्रजते स हि कर्त्ता ॥ ११ ॥ तदुप्येते श्लोकाः । स्वप्नेन शारीरमभिप्रहृत्यासुप्तः सुप्तानभिचाकशीति ॥ शुक्रमादाय पुनरेति स्थानः हिरण्मयः पौरुष एकहंसः ॥ १२ ॥ प्राणेन रक्षन्नपरङ्कुलायम्बहिष्कुलायादमृतश्चरित्वा ॥ स ईयते अमृतो यत्रकामः हिरण्मयः पौरुष एकहंसः ॥ १३ ॥ स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ॥ उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १४ ॥ आरामस्य पश्यन्ति । न तङ्कश्चन पश्यतीति तन्नायतम्बोधयेदित्याहुर्दुर्ब्भिषज्यः हास्मै भवति यमेष न प्रतिपद्यते ॥ १५ ॥ अथो खल्वाहुः । जागरितदेश एवास्यैष यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायम्पुरुषः स्वयञ्ज्योतिर्ब्भवतीत्येवमेवैतद्याज्ञवल्क्य सोऽहम्भगवते सहस्रन्ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥ स वा एष एतस्मिन्त्स्वप्नान्ते । रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायम्प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययम्पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहम्भगवते सहस्रन्ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति ॥ १७ ॥ तद्यथा महामत्स्यः । उभे कूले अनुसञ्चरति पूर्वञ्चापरञ्चैवमेवायम्पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तञ्च बुद्धान्तञ्च ॥ १८ ॥ तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः सहंहत्य पक्षौ संहत्यायैव ध्रियत एवमेवायम्पुरुष

ऽएतस्म्मा ऽअन्ताय धावति यत्र सुप्तो न कञ्चन कामङ्कामयते न कञ्चन स्वप्नम्पश्यति ॥१९॥ ता वा ऽअस्यैताः। हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्म्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा ऽअथ यत्रैनङ्घ्नन्तीव जिनन्तीव हस्तीव विच्छायया गर्त्तमिव पतति यदेव जाग्रद्भयम्पश्यति तदत्राविद्यया भयम्मन्यतेऽथ यत्र राजेव देव ऽइवाहमेवेदः सर्वमस्म्मीति मन्यते सोऽस्य परमो लोकोऽथ यत्र सुप्तो न कञ्चन कामङ्कामयते न कञ्चन स्वप्नम्पश्यति ॥ २० ॥ तद्वा ऽअस्यैतत्। आत्मकाममाप्तकाममकामरूपन्तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यङ्किञ्चन वेद नान्तरमेवमेवायः शारीर ऽआत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यङ्किञ्चन वेद नान्तरम् ॥ २१ ॥ तद्वा ऽअस्यैतत्। अतिच्छन्दोऽपहतपाप्माभयरूपमशोकान्तरमत्र पिनापिता भवति मातामाता लोका ऽअलोका देवा ऽअदेवा वेदा ऽअवेदा यज्ञा ऽअयज्ञा ऽअत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतम्पुण्येनानन्वागतम्पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥ यद्वै तन्न पश्यति । पश्यन्वै तद्दृष्टव्यन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्दि-

(१) "ऽनन्वागतः पुण्येनानन्वागत पापेन" इति 'ग' 'ञ' पुस्तकयोः पाठः ।

तीयमस्ति ततोऽन्यद्विभक्तं व्यृत्पश्येत् ॥ २३ ॥ यद्वै तन्न जिघ्रति । जिघ्रन्वै तद्घ्रातव्यन्न जिघ्रति न हि घ्रातुर्घ्राणाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यजिघ्रेत् ॥ २४ ॥ यद्वै तन्न रसयति । विजानन्वै तद्रसन्न रसयति न हि रसयितू रसाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यद्रसयेत् ॥ २५ ॥ यद्वै तन्न वदति । वदन्वै तद्वक्तव्यन्न वदति न हि वक्तुर्वचो विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यवदेत् ॥ २६ ॥ यद्वै तन्न शृणोति । शृण्वन्वै तच्छ्रोतव्यन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यशृणुयात् ॥ २७ ॥ यद्वै तन्न मनुते । मन्वानो वै तन्मन्तव्यन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यन्मन्वीत ॥ २८ ॥ यद्वै तन्न स्पृशति । पृस्शन्वै तत्स्प्रष्टव्यन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यस्पृशेत् ॥ २९ ॥ यद्वै तन्न विजानाति । विजानन्वै तद्विज्ञेयन्न विजानाति न हि विज्ञातुर्विज्ञानाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीयमस्ति ततोऽन्यद्विभक्तं व्यद्विजानीयात् ॥ ३० ॥ सलिल एको द्रष्टाद्वैतो भवति । एष ब्रह्मलोकः सम्राडिति हैनमुवा-

चैषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३१ ॥ स यो मनुष्याणाꣳ राद्धः समृद्धो भवति। अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणाम्परम आनन्दः ॥ ३२ ॥ अथ ये शतम्मनुष्याणामानन्दाः। स एकः पितॄणाञ्जितलोकानामानन्दः ॥ ३३ ॥ अथ ये शतम्पितॄणाञ्जितलोकानामानन्दाः। स एकः कर्म्मदेवानामानन्दो ये कर्म्मणा देवत्वमभिसम्पद्यन्ते ॥ ३४ ॥ अथ ये शतङ्कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥ ३५ ॥ अथ ये शतमाजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥ ३६ ॥ अथ ये शतन्देवलोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥ ३७ ॥ अथ ये शतङ्गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ॥ ३८ ॥ अथ ये शतम्प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहत एष ब्रह्मलोकः सम्म्राडिति हैनमनुशशासैतदमृतꣳ सोऽहम्भगवते सहस्रन्ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ ३९ ॥ स वा एष एतस्मिन्नन्तसम्प्रसादे । रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायम्प्रतियोन्याद्रवति बुद्धान्तायैव

स यदत्र किञ्चित्पश्यत्यनन्वावगतस्तेन भवत्यसङ्गो ह्ययम्पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहम्भगवते सहस्रन्ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति ॥ ४० ॥ अत्र ह याज्ञवल्क्यो विभयाञ्चकार । मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति स यत्राणिमानन्येति जरया वोपतपता वाणिमानन्निगच्छति यथाम्मूं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्येतैवमेवायꣳ शारीर आत्मैभ्योऽङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायम्प्रतियोन्याद्रवति प्राणायैव ॥ ४१ ॥ तद्यथा नः सुसमाहितम् । उत्सर्जयादेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जयाति ॥ ४२ ॥ तद्यथा राजानमायन्तम् । उग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदः सर्वाणि भूतानि प्रतिकल्पन्त इदम्ब्रह्मायातीदमागच्छतीति ॥ ४३ ॥ तद्यथा राजानम्प्रयियासन्तम् । उग्राः प्रत्येनसः सूतग्रामण्य उपसमायन्त्येवꣳ हैवंविदः सर्वे प्राणा उपसमायन्ति यत्रैतदूर्द्ध्वोच्छ्वासी भवति ॥ ४४ ॥

सप्तमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

———०———

[उक्तस्यात्मनोऽङ्गेभ्यः संप्रमोक्षणस्य विस्तरेणोपपादनम्]

स यत्रायꣳ शारीर आत्माबल्ल्यन्नीत्य । सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतान्

स्तेजोमात्राः समभ्याददानो हृदयमेवाभ्यवक्रामति ॥ १ ॥ स यत्रैष चाक्षुषः । पुरुषः पराङ् पर्य्यावर्त्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः ॥ २ ॥ तस्य हैतस्य । हृदयस्याग्रम्प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्द्धनो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तम्प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तः सर्वे प्राणा अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवति तं विद्याकर्म्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ ३ ॥ तद्यथा तृणजलायुका । तृणस्यान्तङ्गत्वात्मानमुपसंहरत्येवमेवायम्पुरुष इदं शरीरन्निहत्याविद्याङ्गमयित्वात्मानमुपसंहरति ॥ ४ ॥ तद्यथा पेशस्कारी । पेशसो मात्रामपादायान्यन्नवतरङ्कल्याणतरं रूपन्तनुत एवमेवायम्पुरुष इदं शरीरन्निहत्याविद्याङ्गमयित्वान्यन्नवतरङ्कल्याणतरं रूपन्तनुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येभ्यो वा भूतेभ्यः ॥ ५ ॥ स वा अयमात्मा । ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्म्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः क्रोधमयोऽक्रोधमयो हर्षमयोऽहर्षमयो धर्म्ममयोऽधर्म्ममयः सर्वमयस्तद्यदेदम्मयोऽ-

(१) "०० पवतरं रूपन्तनुते" इति 'ग' 'ज' पुस्तकयो ।

दोमय ऽइति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्म्मणा भवति पापः पापेनेति ॥ ६ ॥ अथो खल्वाहुः । काममय ऽएवायम्पुरुष ऽइति स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म्म कुरुते यत्कर्म्म कुरुते तदभिसम्पद्यत ऽइति ॥ ७ ॥ तदेष श्लोको भवति । तदेव सक्तः सह कर्म्मणैति लिङ्गम्मनो यत्र निषक्तमस्य ॥ प्राप्यान्तङ्कर्म्मणस्तस्य यत्किञ्चेह करोत्ययम् ॥ तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्म्मण ऽइति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम ऽआत्मकाम ऽआप्तकामो भवति न तस्मात्प्राणा ऽउत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येति ॥ ८ ॥ तदेष श्लोको भवति । यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत ऽइति ॥ ९ ॥ तद्यथाहिनिर्ल्वयनी । वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदः शरीरः शेतेऽथायमनस्थिकोऽशरीरः प्राज ऽआत्मा ब्रह्मैव लोक ऽएव सम्राडिति होवाच याज्ञवल्क्यः सोऽहम्भगवते सहस्रन्ददामीति होवाच जनको वैदेहः ॥ १० ॥ तदप्येते श्लोकाः । अणुः पन्था वितरः पुराणो माꣳ स्पृष्टोऽनुवित्तो मयैव । तेन धीरा ऽअपियन्ति ब्रह्मविद ऽउत्क्रम्य स्वर्गंल्लोकमितो विमुक्ताः ॥ ११ ॥ तस्मिन्शुक्लमुत

(१) "स्थिताः" इति 'ग' 'ञ' पुस्तकयोः ।

नीलमाहुः पिङ्गलः हरितँल्लोहितश्च ॥ एष पन्था ब्रह्मणा ह्यनुवित्तस्तेनैति ब्रह्मवित्तेजसः पुण्यकृच्च ॥ १२ ॥ अन्धन्तमः प्रविशन्ति येऽसम्भूतिमुपासते ॥ ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १३ ॥ असुर्या नाम ते लोकाः । अन्धेन तमसावृताः ॥ ताँस्ते प्रेत्यापिगच्छन्त्यविद्वाꣳसोऽबुधा जनाः ॥ १४ ॥ तदेव सन्तः । तदु तद्भवामो न चेदवेदी महती विनष्टिः ॥ ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति ॥१५॥ आत्मानञ्चेद्विजानीयात्। अयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनु सञ्चरेत् ॥ १६ ॥ यस्यानुवित्तः प्रतिबुद्ध आत्मा । अस्मिन्त्सन्देहे गहने प्रविष्टः ॥ स विश्वकृत्स हि सर्वस्य कर्त्ता तस्य लोकः स उ लोक एव ॥ १७ ॥ यदैतमनुपश्यति।आत्मानन्देवमञ्जसा ॥ ईशानम्भूतभव्यस्य न ततो विचिकित्सति ॥ १८ ॥ यस्मिन्पञ्च पञ्चजनाः । आकाशश्च प्रतिष्ठितः ॥ तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥१९॥ यस्मादुर्वाक्संवत्सरः । अहोभिः परिवर्त्तते ॥ तद्देवा ज्योतिषाञ्ज्योतिरायुर्ह्युपासतेऽमृतम् ॥२०॥ प्राणस्य प्राणम्। उत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नम्मनसो ये मनो विदुः ॥ ते निचिक्युर्ब्रह्म पुराणमग्र्यम्मनसैवाप्तव्यन्नेह नानास्ति किञ्चन ॥ २१ ॥ [अर्धः प्रपाठकः ॥६४॥] मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ मनसैवानुद्रष्टव्यं

---

(१) 'ग' 'ञ' पुस्तकयोः "पुरुष." इति पाठो दृश्यते । स तु प्रामादिक एव प्रतीयते 'पूरुषोऽवसाने' (शु० य० प्रा० शा० ३. १२०) इति दीर्घनिपातसूत्रात् ।

व्ययमेतदप्प्रमयन्ध्रुवम् ॥२२॥ विरजः पर ऽआकाशात् । अज ऽआत्मा महान्ध्रुवः ॥ तमेव धीरो विज्ञाय प्प्रज्ञाङ्कुर्वीत ब्राह्मणः॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति ॥२३॥ स वा ऽअयमात्मा । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदम्प्रशास्ति यदिदङ्किञ्च स न साधुना कर्म्मणा भूयान्नो ऽएवासाधुना कनीयानेष भूताधिपतिरेष लोकेश्वर ऽएष लोकपालः स सेतुर्विधरण ऽएषाँल्लोकानामसम्भेदाय ॥ २४ ॥ तमेतं वेदानुवचनेन विविदिषन्ति । ब्रह्मचर्य्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्ब्भवत्येतमेव प्प्रव्राजिनो लोकमीप्प्सन्तः प्प्रव्रजन्ति ॥ २५ ॥ एतद्ध स्म वै तत्पूर्वे ब्राह्मणा ऽअनूचाना विद्वाꣳसः प्प्रजान्न कामयन्ते किम्प्रजया करिष्यामो येषान्नोऽयमात्मायँल्लोक ऽइति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यञ्चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते ऽएषणे ऽएव भवतः ॥ २६ ॥ स ऽएष नेति नेत्यात्मा । अगृह्यो नहि गृह्यतेऽशीर्य्यो न हि शीर्य्यतेऽसङ्गोऽसितो न सज्यते न व्यथत ऽइत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे ऽउभे ह्येष ऽएते तरत्यमृतः साद्धसाधुनी नैनङ्कृताकृते तपतो नास्य केन चन कर्म्मणा लोको मीयते ॥ २७ ॥ तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न कर्म्मणा

(२) 'महा ध्रुवः" इति 'ग' 'ज' पुस्तकयोः ।

वर्द्धते नो कनीयान् ॥ तस्यैव स्यात्पदवित्तं विद्वित्वा न कर्म्मणा लिप्यते पापकेनेति तस्मादेवंवित्छान्तो दान्त ऽउपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानम्पश्येत्सर्व्वमेनम्पश्यति सर्व्वोऽस्यात्मा भवति सर्व्वस्यात्मा भवति सर्व्वम्पाप्मानन्तरति नैनम्पाप्मा तरति सर्व्वम्पाप्मानन्तपति नैनम्पाप्मा तपति विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य ऽएवं वेद ॥ २८ ॥ स वा ऽएष महानज ऽआत्मा । अन्नादो वसुदानः स यो हैवमेतन्महान्तमजमात्मानमन्नादं वसुदानं वेद विन्दते वसु ॥ २९ ॥ स वा ऽएष महानज ऽआत्मा । अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः सोऽहम्भगवते विदेहान्ददामि माञ्चापि सह दास्यायेति ॥ ३० ॥ स वा ऽएष महानज ऽआत्मा । अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभयः हि वै ब्रह्म भवति य ऽएवं वेद ॥ ३१ ॥

सप्तमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[आत्मज्ञाने आगमेनाधिगतस्यामृतत्वसाधनत्वस्य तर्केणापि प्रतिपादनम्, याज्ञवल्क्यकाण्डस्याचार्यपरम्परोपदेशश्च]

अथ ह याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः । मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव कात्यायनी सोऽन्यद्वृत्तमुपाकरिष्यमाणः ॥ १ ॥ याज्ञवल्क्यो मैत्रेयीति होवाच । प्रव्रजिष्यन्वा ऽअरेऽ-

हुमस्मात्स्थानादस्मि हुन्त तेऽनया कात्यायन्यान्तङ्करवाणीति ॥ २ ॥ सा होवाच मैत्रेयी । यन्नु म इयम्भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यान्नवहन्तेनामृताहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितन्तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥ सा होवाच मैत्रेयी । येनाहन्नामृता स्यां किमहन्तेन कुर्य्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥ स होवाच याज्ञवल्क्यः । प्रिया खलु नो भवती सती प्रियमवृतद्धन्त खलु भवति तेऽहन्तद्वक्ष्यामि व्याख्यास्यामि ते वाचन्तु मे व्याचक्षाणस्य निदिध्यासस्वेति ब्रवीतु भगवानिति ॥ ५ ॥ स होवाच याज्ञवल्क्यः । न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणाङ्कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तम्प्रियम्भवत्यात्मनस्तु कामाय वित्तम्प्रियम्भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियम्भवत्यात्मनस्तु कामाय ब्रह्म प्रियम्भवति न वा अरे क्षत्रस्य कामाय क्षत्रम्प्रियम्भवत्यात्मनस्तु कामाय क्षत्रम्प्रियम्भवति न वा अरे लोकानाङ्कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानाङ्कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे

वेदानाङ्कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति न वा ऽअरे यज्ञानाङ्कामाय यज्ञाः प्रिया भवन्त्यात्मनस्तु कामाय यज्ञाः प्रिया भवन्ति न वा ऽअरे भूतानाङ्कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा ऽअरे सर्वस्य कामाय सर्वम्प्रियम्भवत्यात्मनस्तु कामाय सर्वम्प्रियम्भवत्यात्मा [1]त्वरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि वा ऽअरे दृष्टे श्रुते मते विज्ञात ऽइदꣳ सर्वं विदितम् ॥ ६ ॥ ब्रह्म तम्परादात् । योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रन्तम्परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तम्परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तम्परादुर्योऽन्यत्रात्मनो देवान्वेद वेदास्तम्परादुर्योऽन्यत्रात्मनो वेदान्वेद यज्ञास्तम्परादुर्योऽन्यत्रात्मनो यज्ञान्वेद भूतानि तम्परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वन्तम्परादाद्योऽन्यत्रात्मनः सर्वं वेदेदम्ब्रह्मेदं क्षत्रमिमे लोका ऽइमे देवा ऽइमे वेदा ऽइमे यज्ञा ऽइमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा वीणायै वाद्यमानायै । न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥ स यथा शङ्खस्य ध्मायमानस्य । न

(१) "त्वरे" इति ग' 'ङ' पुस्तकयोः ।

वाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्कस्य तु ग्रहणेन शङ्कदुध्मस्य वा शब्दो गृहीतः ॥ १० ॥ स यथार्द्रेधाग्नेरभ्याहितस्य। पृथग्धूमा विनिश्चरन्त्येवं वा ऽअरेऽस्य महतो भूतस्य निश्श्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस ऽइतिहासः पुराणं विद्या ऽउपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि दत्तः हुतमाशितम्पायितमयञ्च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्श्वसितानि ॥ ११ ॥ स यथा सर्वासामपाथ्ं समुद्र ऽएकायनम्। एवः सर्वेषाथ्ं स्पर्शानान्त्वगेकायनमेवः सर्वेषाङ्गन्धानान्नासिके ऽएकायनमेवः सर्वेषाथ्ं रसानाञ्जिह्वैकायनमेवः सर्वेषाथ्ं रूपाणाञ्चक्षुरेकायनमेवः सर्वेषाथ्ं शब्दानाथ्ं श्रोत्रमेकायनमेवः सर्वेषाथ्ं सङ्कल्पानाम्मन ऽएकायनमेवः सर्वेषां वेदानाः हृदयमेकायनमेवः सर्वेषाङ्कर्म्मणाथ्ं हस्तावेकायनमेवः सर्वेषामद्धनाम्पादावेकायनमेवः सर्वेषामानन्दानामुपस्थ ऽएकायनमेवः सर्वेषां विसर्ग्गाणाम्पायुरेकायनमेवः सर्वासां विद्यानां वागेकायनम् ॥ १२ ॥ स यथा सैन्धवघनः । अनन्तरोऽबाह्यः कृत्स्नो रसघन ऽएव स्यादेवं वा ऽअर ऽइदम्महद्भूतमनन्तमपारङ्कृत्स्नः प्रज्ञानघन ऽएवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥ सा होवाच मैत्रेयी । अत्रैव मा भगवान्मोहान्तमापीपदन्न वा ऽअहमिदं विजानामि

न प्रेत्य संज्ञास्तीति ॥ १४ ॥ स होवाच याज्ञवल्क्यः । न वा ऽअरेऽहम्मोहम्ब्रवीम्यविनाशी वा ऽअरेऽयमात्मानुच्छित्तिधर्म्मा मात्रासꣳसर्ग्गस्त्वस्य भवति ॥ १५ ॥ यद्वै तन्न पश्यति । पश्यन्वै तद्दृष्टव्यन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥ १६ ॥ यद्वै तन्न जिघ्रति । जिघ्रन्वै तद्घ्रातव्यन्न जिघ्रति न हि घ्रातुर्घ्राणाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ १७ ॥ यद्वै तन्न रसयति । विजानन्वै तद्रसयन्न रसयति न हि रसयितू रसाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ १८ ॥ यद्वै तन्न वदति । वदन्वै तद्वक्तव्यन्न वदति न हि वक्तुर्वचो विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ १९ ॥ यद्वै तन्न शृणोति । शृण्वन्वै तच्छ्रोतव्यन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २० ॥ यद्वै तन्न मनुते । मन्वानो वै तन्मन्तव्यन्न मनुते न हि मन्तुर्म्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २१ ॥ यद्वै तन्न स्पृशति । स्पृशन्वै तत्स्प्रष्टव्यन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २२ ॥ यद्वै तन्न विजानाति ।

विजानन्वै तद्विज्ञेयन्न विजानाति न हि विज्ञातुर्विज्ञाना-द्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽ-न्यद्विभक्तं यद्विजानीयात् ॥ २३ ॥ यत्र वा ऽअन्यदिव स्यात्। तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्र-सयेदन्योऽन्यदभिवदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वी-तान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ २४ ॥ यत्र त्वस्य सर्वमात्मैवाभूत् । तत्केन कम्पश्येत्तत्केन कञ्जि-घ्रेत्तत्केन कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणु-यात्तत्केन कम्मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजा-नीयाद्येनेदꣳ सर्वं विजानाति तꣳ केन विजानीयाद्विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्ल्व-मृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रव्रव्राज ॥ २५ ॥ अथ वꣳशः । तदिदं वयꣳ शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौ-तमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्य्याच्च पाराशर्य्यः साङ्कृत्याच्च भारद्वाजाच्च भारद्वाज ऽऔदवाहेश्च शाण्डि-ल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैज-वापायनाच्च वैष्टपुरेयाच्च वैष्ट्रपुरेयः शाण्डिल्याच्च रौहि-णायनाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्ण्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्या-यनः कौण्डिन्याभ्याङ्कौण्डिन्या ऽऔर्णवाभेभ्य ऽऔ-र्णवाभाः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्यायाच्च ॥ २६ ॥ आग्निवेश्यः सैत-[illegible] ॥ सैतवाः पाराशर्व्यात्पाराशर्व्यो जातूकर्ण्याज्जातू-

कण्व्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौशिकाद्वलाकाकौशिकः काषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराशर्य्यात्पाराशर्य्यो जातूकण्यर्याज्जातूकण्यर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज ऽआग्नेयात् ॥ २७ ॥

आग्नेयो माण्टेः । माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्य्यात्काप्यात्कैशोर्य्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य ऽआङ्गिरस ऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच ऽआथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद्दथर्वा दैवो मृत्योः प्राद्धृःसनान्मृत्युः प्राद्धृःसनः प्रद्धृःसनात्प्रद्धृःसन ऽएकर्षेरेकर्षिर्विप्रजित्तेर्विप्रजित्तिर्व्यश्टेर्व्यश्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ २८ ॥

सप्तमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

[सत्यस्य ब्रह्मणः प्रथमजत्वप्रतिपादनम्]

आप ऽएवेदमग्र आसुः । ता ऽआपः सत्यमसृजन्त सत्यम्ब्रह्म ब्रह्म प्रजापतिम्प्रजापतिर्देवान् ॥ १ ॥ ते देवाः सत्यमित्युपासते । तदेतत्त्र्यक्षरꣳ सत्यमिति स ऽइत्येकमक्षरन्तीत्येकमक्षरमित्येकमक्षरम्प्रथमोत्तमे ऽअक्षरे सत्यम्मध्यतोऽनृतन्तदेतदनृतꣳ सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैवंविद्वाꣳसमनृतꣳ हिनस्ति ॥ २ ॥ तद्यत्तत्सत्यम् । असौ स ऽआदित्यो य ऽएष ऽएतस्मिन्नम्मण्डले पुरुषो यश्चायन्दक्षिणेऽक्षन्पुरुषस्तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ रश्मिभिर्व्वा ऽएषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्त्स[2] यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलम्पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥ ३ ॥ य ऽएष ऽएतस्मिन्मण्डले पुरुषः । तस्य भूरिति शिर ऽएकꣳ शिर ऽएकमेतदक्षरम्भुव ऽइति बाहू द्वौ बाहू द्वे ऽएते ऽअक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे ऽएते ऽअक्षरे तस्योपनिषदुहरिति हुन्ति पाप्मानमहरति च य ऽएवं वेद ॥ ४ ॥ अथ योऽयन्दक्षिणेऽक्षन्पुरुषः । तस्य भूरिति शिर ऽएकꣳ शिर ऽएकमेतदक्षरम्भुव ऽइति बाहू द्वौ बाहू द्वे ऽएते ऽअक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे ऽएते ऽअक्षरे तस्योपनिषदुहमिति हुन्ति पाप्मानमहरति च य ऽएवं वेद ॥ ५ ॥

अष्टमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

---

(१) 'ग' 'ज' पुस्तकयोः "ब्रह्म" इति नास्ति ।
(२) "स्व" इति 'ग' 'ज' पुस्तकयोः ।

[विद्युद्ब्रह्मेत्युपासनविधानम्]

विद्युद्ब्रह्मेत्याहुः । विद्धानाद्विद्युद्विद्यत्येनꣳ सर्वस्मात्पाप्मनो य ऽएवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥

अष्टमाध्याये सप्तमं ब्राह्मणम् ॥ ७ ॥

—०—

[मनउपाधिविशिष्टस्य ब्रह्मण उपास्तिः]

मनोमयोऽयम्पुरुषः । भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वैवमयमन्तरात्मन्पुरुषः स ऽएष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदम्प्रशास्ति यदिदङ्किञ्च य ऽएवं वेद ॥ १ ॥

अष्टमाध्यायेऽष्टमं ब्राह्मणम् ॥ ८ ॥

—०—

[वाग्धेनुः ब्रह्मेत्युपास्तिः]

वाचन्धेनुमुपासीत । तस्याश्चत्वार स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा ऽउपजीवन्ति स्वाहाकारश्च वषट्कारश्च हन्तकारम्मनुष्याः स्वधाकारम्पितरस्तस्याः प्राण ऽऋषभो मनो वत्सः ॥ १ ॥

अष्टमाध्याये नवमं ब्राह्मणम् ॥ ९ ॥

—०—

[वैश्वानराग्न्युपाधिकस्य ब्रह्मण उपासनम्]

अयमग्निर्वैश्वानरः । योऽयमन्तः पुरुषे येनेदमन्नꣳ पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैतꣳ शृणोति ॥ १ ॥

वपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैतङ्घोषः शृणोति ॥ १ ॥

अष्टमाध्याये दशमं ब्राह्मणम् ॥ १० ॥

[व्याधितस्तप्यमानस्य तापे तप इति दृष्टिः]

एतद्वै परमन्तपः । यद्व्याहितस्तप्यते परमः हैव लोकञ्जयति य ऽएवं वेदैतद्वै परमन्तपो यम्प्रेतमरण्यः हरन्ति परमः हैव लोकञ्जयति य ऽएवं वेदैतद्वै परमन्तपो यम्प्रेतमग्नावभ्यादधति परमः हैव लोकञ्जयति य ऽएवं वेद ॥ १ ॥

अष्टमाध्याय एकादशं ब्राह्मणम् ॥ ११ ॥

[एतत्प्रकरणस्थानां सर्वेषामुपासनानां गतिकथनम्, अश्रुतफलोपासनानां ब्रह्मलोकफलकथनञ्च]

यदा वै पुरुषः । अस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खन्तेन स ऽऊर्द्ध ऽआक्रमते स ऽआदित्यमागच्छति तस्मै स तत्र विजिहीते यथाऽम्बरस्य खन्तेन स ऽऊर्द्ध ऽआक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खन्तेन स ऽऊर्द्ध ऽआक्रमते स लोकमागच्छत्यशोकमहिमन्तस्मिन्वसति शश्वतीः समाः ॥ १ ॥

अष्टमाध्याये द्वादशं ब्राह्मणम् ॥ १२ ॥

[विरमितिगुणद्वयविशिष्टान्नप्राणोपाधिकब्रह्मोपासनम्]

अन्नम्ब्रह्मेत्येक ऽआहुः । तन्न तथा पूयति वा ऽअन्नमृते प्राणात्प्राणो ब्रह्मेत्येक ऽआहुस्तन्न तथा शुष्यति वै प्राण ऽऋतेऽन्नादेते ह्येव देवते ऽएकधाभूयम्भूत्वा परमताङ्गच्छतः ॥ १ ॥ तद्ध स्माह प्रातृदः पितरम् । किꣳ स्विदेवैवं विदुषे साधु कुर्य्यात्किमेवास्मा ऽअसाधु कुर्य्यादिति स ह स्माह पाणिना मा प्रातृदकस्त्वेनयोरेकधाभूयम्भूत्वा परमताङ्गच्छतीति ॥ २ ॥ तस्मा ऽउ हैतदुवाच । वीर्य्यन्नं वै व्यन्नेहीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रम्प्राणे हीमानि सर्वाणि भूतानि रतानि सर्वाणि ह वा ऽअस्मिन्नन्नभूतानि विशन्ते सर्वाणि भूतानि रमन्ते य ऽएवं वेद ॥ ३ ॥

अष्टमाध्याये त्रयोदशं ब्राह्मणम् ॥ १३ ॥

[उक्तस्य ब्रह्मण उक्थादिगुणविशिष्टत्वेनोपासनम्]

उक्थम् । प्राणो वा ऽउक्थम्प्राणो हीदꣳ सर्वमुत्थापयत्युद्वास्मा ऽउक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यꣳ सलोकताञ्जयति य ऽएवं वेद ॥ १ ॥ यजुः । प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यꣳ सलोकताञ्जयति य ऽएवं वेद ॥ २ ॥ साम । प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्म्यञ्चि

सम्म्यञ्चि हास्मिन्त्सर्वाणि भूतानि श्रैष्ठ्याय कॢप्यन्ते[1] साम्नः सायुज्यः सलोकताञ्जयति य ऽएवं वेद ॥ ३ ॥ क्षत्रम् । प्राणो वै क्षत्रम्प्राणो हि वै क्षत्रन्त्रायते हैनम्प्राणः क्षणितोः प्र क्षत्रमाप्नोति क्षत्रस्य सायुज्यः सलोकताञ्जयति य ऽएवं वेद ॥ ४ ॥

अष्टमाध्याये चतुर्दशं ब्राह्मणम् ॥ १४ ॥

माध्यन्दिनीये शतपथब्राह्मणे षष्ठः प्रपाठकः ॥ ६ ॥
कण्डिकासंख्या ॥ १२९ ॥

—०—

[गायत्र्युपाधिकब्रह्मोपासनम्]

भूमिरन्तरिक्षन्द्यौरिति । अष्टावक्षराण्यष्टाक्षरः ह वा ऽएकङ्गायत्र्यै पदुमेतदु हास्या ऽएतत्स यावदेषु लोकेषु तावद्ध जयति योऽस्या ऽएतदेवम्पदं वेद ॥ १ ॥ ऋचो यजूꣳषि सामानीति । अष्टावक्षराण्यष्टाक्षरः ह वा ऽएकङ्गायत्र्यै पदुमेतदु हैवास्या ऽएतत्स यावतीयन्त्रयी विद्या तावद्ध जयति योऽस्या ऽएतदेवम्पदं वेद ॥२॥ प्राणोऽपानो व्यान ऽइति । अष्टावक्षराण्यष्टाक्षरः ह वा ऽएकङ्गायत्र्यै पदुमेतदु हैवास्या ऽएतत्स यावदिदम्प्राणि तावद्ध जयति योऽस्या ऽएतदेवम्पदं वेद ॥ ३ ॥ अथास्या ऽएतदेव । तुरीयन्दर्शतम्पदम्परोरजा य ऽएष तपति यद्वै चतुर्थन्तत्तुरीयन्दर्शतम्पदमिति ददृश ऽइव ह्येष परोरजा ऽइति सर्वमु ह्येष रज ऽउपर्युपरि तपत्येवꣳ

(१) "कल्पन्ते" इति 'ग' 'ञ' पुस्तकयोः ।

हैव श्रिया यशसा तपति योऽस्या ऽएतदेवम्पदं वेद ॥ ४ ॥ सैषा गायत्री । एतस्मिँमस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठिता चक्षुर्वै सत्यञ्चक्षुर्हि वै सत्यन्तस्मादद्यदिदानीन्द्वौ विवदमानावेयाताम-हमद्राक्षमहमश्रौषमिति य ऽएव ब्रूयादहमद्राक्षमिति तस्मा ऽएव श्रद्दध्यात्[1] ॥ ५ ॥ तद्वै तत्सत्यम्बले प्रतिष्ठितम् । प्राणो वै बलन्तत्प्राणे प्रतिष्ठितन्तस्मादाहुर्बलꣳ सत्यादोजीय ऽइत्येवम्वेषा गायत्र्यध्यात्मम्प्रतिष्ठिता ॥ ६ ॥ सा हैषा गयाँस्तत्रे । प्राणा वै गयास्तत्प्राणाँस्तत्रे तद्यद्गयाँस्तत्रे तस्माद्गायत्री नाम स यामेवामूमन्वाहैषैव सा स यस्मा ऽअन्वाह तस्य प्राणाँस्त्रायते ॥ ७ ॥ ताꣳ हैके । सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुव्रूम ऽइति न तथा कुर्य्याद्गायत्रीमेवानुब्रूयाद्यदि ह वा ऽअपि बहुविव प्रतिगृह्णाति न हैव तद्गायत्र्या ऽएकञ्चन पदम्प्रति ॥ ८ ॥ स य ऽइमाँस्त्रीँल्लोकान् । पूर्णान्प्रतिगृह्णीयात्सोऽस्या ऽएतत्प्रथमम्पदमाप्नुयादथ यावतीयन्त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या ऽएतद्द्वितीयम्पदमाप्नुयादथ यावदिदम्प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या ऽएतत्तृतीयम्पदमाप्नुयादथास्या ऽएतदेव तुरीयन्दर्शतम्पदम्परोरजा य ऽएष तपति नैव केन चनाप्यकुत ऽउ ऽएतावत्प्रतिगृह्णीयात् ॥ ९ ॥ तस्या ऽउपस्थानम् । गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि

(१) "श्रद्दध्याम" इति 'क' पुस्तके ।

न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यन्द्विष्ट्यादसावस्मै कामो मा समर्द्धीति वा न हैवास्मै स कामः समृद्ध्यते यस्मा ऽएवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ १० ॥ एतद्ध वै तज्जनको वैदेहः । बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा ऽअथ कथं हस्ती भूतो वहसीति मुखꣳ ह्यस्याः सम्प्राप्तन विदाञ्चकरेति होवाच ॥ ११ ॥ तस्या ऽअग्निरेव मुखम् । यदि ह वा ऽअपि बह्विवाग्नावभ्यादधति सर्वमेव तत्सन्दहत्येवꣳ हैवैवंविद्यद्यपि बहूविव पापङ्करोति सर्वमेव तत्सम्पाय शुद्धः पूतोऽजरोऽमृतः सम्भवति ॥ १२ ॥

अष्टमाध्याये पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

[विहितस्य केवलस्य कर्मणस्तन्महितस्य च ज्ञानस्य निषिद्धयोश्च तयोः क्रमेण दक्षिणोदगधोमार्गकथनम्]

श्वेतकेतुर्ह वा ऽआरुणेयः । पञ्चालानाम्परिषदमाजगाम स ऽआजगाम जैवलम्प्रवाहणम्परिचार्यमाणन्तमुदीक्ष्याभ्युवाद कुमाराऽइति स भोऽइति प्रतिशुश्रावानुशिष्टो न्वसि पित्रेत्योमिति होवाच ॥ १ ॥ वेत्थ यथेमाः प्रजाः । प्रयत्यो विप्रतिपद्यान्ताऽइति नेति होवाच वेत्थ यथेमँल्लोकम्पुनरापद्यान्ताऽइति नेति हैवोवाच वेत्थ यथासौ लोक ऽएवम्बहुभिः पुनः पुनः प्रयन्निर्न सम्पूर्यताऽइति नेति हैवोवाच

॥ २ ॥ ब्रवीथ यतिस्थ्यामाहुत्याष्ठे हुतायाम् । आपः पुरुषवाचो भूत्वा समुत्थाय ब्रुवन्तीꣳ ऽइति नेति हैवोवाच ब्रवीथो देवयानस्य वा पथः प्रतिपदम्पितृयाणस्य वा यत्कुरुत्वा देवयानं वा पन्थानम्प्रतिपद्यते पितृयाणं वा ॥ ३ ॥ अपि हि न ऽऋषेर्ब्रुवः श्रुतम् । 'द्वे सृती ऽअशृणवम्पितृणामहन्देवानामुत मर्त्यानाम् ॥ ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरम्मातरञ्चे'ति नाहमत ऽएकञ्चन वेदेति होवाच ॥ ४ ॥ अथ हैनं ब्रुसत्योपमन्त्रयाञ्चक्रे । अनादृत्य ब्रुसतिङ्कुमारः प्रदुद्राव स ऽआजगाम पितरन्तः होवाचेति वाव किल नो भवाञ्पुरानुशिष्टान्वोच ऽइति कथः सुमेध ऽइति पञ्च मा प्रश्नान्प्राजञ्यबन्धुरप्राक्षीत्ततो नैकञ्चन वेदेति होवाच कतमे त ऽइतीम् ऽइति ह प्रतीकान्युदाजहार ॥ ५ ॥ स होवाच । तथा नस्त्वन्तात जानीथा यथा यदहङ्किञ्च ब्रेद सर्वमहन्तत्तुभ्यमवोचम्प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्य्यं वत्स्याव ऽइति भवानेव गच्छत्विति ॥ ६ ॥ स ऽआजगाम गौतमः । यत्र प्रवाहणस्य जैवलेरास तस्मा ऽआसनमाहार्य्योदकमाहारयाञ्चकाराथ हास्मा ऽअर्घञ्चकार ॥ ७ ॥ स होवाच । वरम्भवते गौतमाय दद्म ऽइति स होवाच प्रतिज्ञातो म ऽएष वरो यान्तु कुमारस्यान्ते वाचमभाषथास्ताम्मे ब्रूहीति ॥ ८ ॥ स होवाच । दैवेषु वै गौतम तद्वरेषु मानुषाणा-स्ब्रूहीति ॥ ९ ॥ स होवाच । विज्ञायते हास्ति हिरण्यय-

(१) बृ० व० सं० १९. ४७ ।

स्यापात्तङ्गो ऽअश्ववानान्दासीनाम्प्रवराणाम्परिधानानाम्मा नो भवान्बहोरनन्तस्यापर्य्यन्तस्याभ्यवदाश्यो भूदिति स वै गौतम तीर्त्थेनेच्छासा ऽइत्युपैम्यहम्भवन्तमिति वाचा ह स्मैव पूर्व्व ऽउपयन्ति ॥१०॥ स होपायनकीर्त्ता ऽउवाच । तथा नस्त्वङ्गौतम मापराधास्तव च पितामहा यथेयं विद्येतः पूर्व्वन्न कस्मिँमश्चन ब्राह्मण ऽउवास तान्त्वहन्तुभ्यं वक्ष्यामि को हि त्वैवम्ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥११॥ असौ वै लोकोऽग्निर्गौतम । तस्यादित्य ऽएव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा ऽअङ्गारा नक्षत्राणि विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धाञ्जुह्वति तस्या ऽआहुतेः सोमो राजा सम्भवति ॥१२॥ पर्जन्यो वा ऽअग्निर्गौतम । तस्य सँवत्सर ऽएव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमञ्जुह्वति तस्या ऽआहुतेर्व्वृष्टिः सम्भवति ॥ १३ ॥ अयं वै लोकोऽग्निर्गौतम । तस्य पृथिव्येव समिद्वायुर्द्धूमो रात्रिरर्चिर्दिशोऽङ्गारा ऽअवान्तरदिशो विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा व्वृष्टिञ्जुह्वति तस्या ऽआहुतेरन्नः सम्भवति ॥ १४ ॥ पुरुषो वा ऽअग्निर्गौतम । तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा ऽअन्नञ्जुह्वति तस्या ऽआहुते रेतः सम्भवति ॥ १५ ॥ योषा वा ऽअग्निर्गौतम । तस्या ऽउपस्थ ऽएव समिल्लोमानि धूमो योनिरर्चिर्य्यदन्तः करोति तेऽङ्गारा ऽअभिनन्दा विष्फुलिङ्गास्त-

स्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या ऽआहुतेः पुरुषः सम्भवति स जायते स जीवति यावज्जीवत्यथ यदा म्रियतेऽथैनमग्नये हरन्ति ॥ १६ ॥ तस्याग्निरेवाग्निर्भवति । समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा ऽअङ्गारा विष्फुलिङ्गा विष्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषञ्जुह्वति तस्या ऽआहुतेः पुरुषो भास्वरवर्णः सम्भवति ॥ १७ ॥ ते य ऽएवमेतद्विदुः । ये चामी ऽअरण्ये श्रद्धाꣳ सत्यमुपासते तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न ऽआपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य ऽएति मासेभ्यो देवलोकन्देवलोकादादित्यमादित्याद्वैद्युतन्तान्वैद्युतात्पुरुषो मानस ऽएत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषामिह न पुनरावृत्तिरस्ति ॥ १८ ॥ अथ ये यज्ञेन दानेन । तपसा लोकञ्जयन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्न्षण्मासान्दक्षिणादित्य ऽएति मासेभ्यः पितृलोकम्पितृलोकाच्चन्द्रन्ते चन्द्रम्प्राप्यान्नम्भवन्ति ताँस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वेत्येवमेनाँस्तत्र भक्षयन्ति तेषां यदा तत्पर्य्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त ऽआकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीन्ते पृथिवीम्प्राप्यान्नम्भवन्ति त ऽएवमेवानुपरिवर्त्तन्तेऽथ य ऽएतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदन्दन्दशुकम् ॥ १९ ॥

नवमाध्याये प्रथमं ब्राह्मणम् ॥ १ ॥

[ज्येष्ठत्वश्रेष्ठत्वादिगुणविशिष्टप्राणोपासनम्]

यो ह वै ज्येष्ठश्च श्रेष्ठश्च वेद । ज्येष्ठश्च श्रेष्ठश्च स्वानाम्भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानाम्भवत्यपि च येषाम्बुभूषति य ऽएवं वेद ॥ १ ॥ यो ह वै वसिष्ठां वेद । वसिष्ठः स्वानाम्भवति वाग्वै वसिष्ठा वसिष्ठः स्वानाम्भवति य ऽएवं वेद ॥ २ ॥ यो ह वै प्रतिष्ठां वेद । प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य ऽएवं वेद ॥ ३ ॥ यो ह वै सम्पदं वेद । सदः हास्मै पद्यते यङ्कामङ्कामयते श्रोत्रं वै सम्पच्छ्रोत्रे हीमे सर्वे वेदा ऽअभिसम्पन्नाः सदः हास्मै पद्यते यङ्कामङ्कामयते य ऽएवं वेद ॥ ४ ॥ यो ह वा ऽआयतनं वेद । आयतनꣳ स्वानाम्भवत्यायतनञ्जनानाम्मनो वा ऽआयतनमायतनꣳ स्वानाम्भवत्यायतनञ्जनानां य ऽएवं वेद ॥ ५ ॥ यो ह वै प्रजातिं वेद । प्रजायते प्रजया पशुभी रेतो वै प्रजातिः प्रजायते प्रजया पशुभिर्य ऽएवं वेद ॥ ६ ॥ ते हेमे प्राणाः । अहꣳ श्रेयसे विवदमाना ब्रह्म जग्मुः को नो वसिष्ठ ऽइति तद्धोवाच[1] यस्मिन्व ऽउत्क्रान्त ऽइदꣳ शरीरम्पापीयो मन्यते स वो वसिष्ठ ऽइति ॥ ७ ॥ वाग्घो-च्चक्राम । सा सँवत्सरम्प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा कडा ऽअवदन्तो वाचा प्राणन्तः

(१) 'ग' 'ज' पुस्तकयोः "तद्धोवाच" इति पाठो नास्ति ।

प्राणेन पश्श्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम । तत्सँवत्सरम्प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथान्धा ऽअपश्श्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रꣳ होच्चक्राम । तत्सँवत्सरम्प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा ऽअशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्श्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्काम । तत्सँवत्सरम्प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा ऽअविद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्श्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥ रेतो होच्चक्काम । तत्सँवत्सरम्प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा ऽअप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्श्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥ अथ ह प्राण ऽउत्क्रमिष्यन् । यथा महासुहयः सैन्धवः षड्वीशशङ्कून्त्संवृहेदेवꣳ हैवमान्प्राणान्त्सँववर्ह ते होचुर्म्मा भगव ऽउत्क्रमीर्न्न वै

शक्ष्यामस्त्वदृते जीवितुमिति तस्य वै मे बलिङ्कुरुतेति तथेति ॥ १३ ॥ सा ह वागुवाच । यद्वा ऽअहं वसिष्ठास्मि त्वन्तद्वसिष्ठोऽसीति चक्षुर्यद्वा ऽअहम्प्रतिष्ठास्मि त्वन्तत्प्रतिष्ठोऽसीति श्रोत्रं यद्वा ऽअहꣳ सम्पदस्मि त्वन्तत्सम्पदसीति मनो यद्वा ऽअहमायतनमस्मि त्वन्तदायतनमसीति रेतो यद्वा ऽअहम्प्रजातिरस्मि त्वन्तत्प्रजातिरसीति तस्यो मे किमन्नङ्किं वास ऽइति यदिदङ्किञ्चा इश्वभ्य आ क्रिमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास ऽइति न ह वा ऽअस्यानन्नꣳ गन्धम्भवति नानन्नम्प्रतिगृहीतं स्य ऽएवमेतदनस्यान्नं वेद ॥ १४ ॥ तद्विद्वाꣳसः श्रोत्रियाः । अशिष्यन्त ऽआचामन्त्यशित्वाचामन्त्येतमेव तदनमनग्नङ्कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वाचामेदेतमेव तदनमनग्नङ्कुरुते ॥ १५ ॥

नवमाध्याये द्वितीयं ब्राह्मणम् ॥ २ ॥

[श्रीमन्थाख्यं कर्म]

स यः कामयेत[1] । महत्प्राप्नुयामित्युदगयन ऽआपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा सर्वौषधम्फलानीति सम्भृत्य परिसमुह्य परिलिप्याग्निमुपसमाधायावृताज्यꣳ संस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳ सन्नीय जुहोति ॥ १ ॥ यावन्तो देवास्त्वयि जातवेदः । तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् ॥ तेभ्योऽहम्भागधेयञ्जुहोमि ते मा तृप्ताः कामैस्तर्पयन्तु

(१) "कामयते" इति 'ग' 'ज' पुस्तकयोः ।

स्वाहा ॥२॥ या तिरश्ची निपद्यसे ऽअहं विधरणी ऽइति। तान्त्वा घृतस्य धारया यजे सꣳराधनीमहꣳ स्वाहा ॥ 'प्रजापते न त्वदेतान्यन्य' ऽइति तृतीयाञ्जुहोति ॥ ३ ॥ ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेति। अग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति चक्षुषे स्वाहा सम्पदे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रोत्राय स्वाहायतनाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ४ ॥ भूताय स्वाहेति। अग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति विश्वस्राय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ५ ॥ [अर्धः प्रपाठकः ॥५१॥] पृथिव्यै स्वाहेति। अग्नौ हुत्वा मन्थे सꣳस्रवमवनयत्यन्तरिक्षाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति दिवे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति दिग्भ्यः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ६ ॥ भूः

(१) "निपद्यसेऽहं" इति 'ग' 'ज' पुस्तकयोः।
(२) ऋ० सं० ८. ७. ४। शु० य० सं० १०. २०।

स्वाहेति । अग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ७ ॥ अग्नये स्वाहेति । अग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति तेजसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रियै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति लक्ष्म्यै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सवित्रे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सरस्वत्यै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति विश्वेभ्यो देवेभ्यः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ८ ॥ अथैनमभिमृशति । भ्रमसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिङ्कृतमसि हिङ्क्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे सन्दीप्तमसि विभूरसि प्रभूरसि ज्योतिरस्यन्नमसि निधनमसि संवर्गोऽसीति ॥ ९ ॥ अथैनमुद्यच्छति । आमोऽस्यामꣳ हि ते मयि ॥ स हि राजेशानोऽधिपतिः स मा राजेशानोऽधिपतिङ्करोत्विति ॥ १० ॥ अथैनमाचामति । 'तत्सवितुर्वरेण्यम्'[1] ॥ 'मधु वाता ऽऋतायते मधु क्षरन्ति सिन्धवः ॥ माद्धीर्नः सन्त्वोषधीः'[2] ॥ भूः

(१) शु० य० सं० ३. ३५। (२) शु० य० सं० १३. २७।

स्वाहा ॥११॥ 'भर्गो देवस्य धीमहि' ॥ 'मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता' भुवः स्वाहा ॥ १२ ॥ 'धियो यो नः प्रचोदयात्' । 'मधुमान्नो वनस्पतिर्मधुमाँ२॥ ऽअस्तु सूर्यः ॥ माद्भीर्गावो भवन्तु नः' स्वः स्वाहेति सर्वाश्च सावित्रीमन्वाह सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीरहमेवेदꣳ सर्वम्भूयासम्भूर्भुवः स्वः स्वाहेत्यन्तत ऽआचम्य प्रक्षाल्य पाणी जघनेनाग्निम्प्राक्शिराः संविशति ॥ १३ ॥ प्रातरादित्यमुपतिष्ठते । दिशामेकपुण्डरीकमस्यहम्मनुष्याणामेकपुण्डरीकम्भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वदꣳशꣳसति ॥ १४ ॥ तꣳ हैतमुद्दालक ऽआरुणिः । वाजसनेयाय याज्ञवल्क्यायान्तेवासिन ऽउक्त्वोवाचापि य ऽएनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १५ ॥ एतमु हैव वाजसनेयो याज्ञवल्क्यः । मधुकाय पैङ्ग्यायान्तेवासिन ऽउक्त्वोवाचापि य ऽएनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १६ ॥ एतमु हैव मधुकः पैङ्ग्यः । चूडाय भागवित्तयेऽन्तेवासिन ऽउक्त्वोवाचापि य ऽएनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १७ ॥ एतमु हैव चूडो भागवित्तिः । जानकय ऽआयस्थूणायान्तेवासिन ऽउक्त्वोवाचापि य ऽएनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः

(१) शु० य० सं० ३. ३५। (२) शु० य० सं० १३. २८। (३) शु० य० सं० ३. ३५। (४) शु० य० सं० १३. २९।

प्ररोहेयुः पलाशानीति ॥ १८ ॥ एतमु हैव जानकिरायस्थूणः । सत्यकामाय जाबालायान्तेवासिन ऽउक्त्वोवाचापि य ऽएनः शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १९ ॥ एतमु हैव सत्यकामो जाबालः । अन्तेवासिभ्य ऽउक्त्वोवाचापि य ऽएनः शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति तमेतन्नापुत्राय वानन्तेवासिने वा ब्रूयात् ॥ २० ॥ चतुरौदुम्बरो भवति । औदुम्बरश्चमस ऽऔदुम्बरः स्रुव ऽऔदुम्बर ऽइद्ध्म ऽऔदुम्बर्ष्या ऽउपमन्थन्यौ ॥ २१ ॥ दश ग्राम्याणि धान्यानि भवन्ति । व्रीहियवास्तिलमाषा ऽअणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्त्सार्द्धम्पिष्ट्वा दद्ना मधुना घृतेनोपसिञ्चत्याज्यस्य जुहोति ॥२२॥

नवमाध्याये तृतीयं ब्राह्मणम् ॥ ३ ॥

[पुत्रमन्थाख्यं कर्म, आचार्यपरम्परोपदेशश्च]

एषां वै भूतानाम्पृथिवी रसः । पृथिव्या ऽआपोऽपामोषधय ऽओषधीनाम्पुष्पाणि पुष्पाणाम्फलानि फलानाम्पुरुषः पुरुषस्य रेतः ॥ १ ॥ स ह प्रजापतिरीक्षाञ्चक्रे । हन्तास्मै प्रतिष्ठाङ्कल्पयानीति स स्त्रियः ससृजे ताꣳ सृष्ट्वाध ऽउपास्त तस्मात्स्त्रियमध ऽउपासीत श्रीर्ह्येषा स ऽएतम्प्राञ्चङ्ग्रावाणमात्मन ऽएव समुदपारयत्तेनैनामभ्यसृजत् ॥ २ ॥ तस्या वेदिरुपस्थः । लोमानि बर्हिश्चर्म्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ

स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य ऽएवं विद्वानधोपहासञ्चरत्या स स्त्रीणाꣳ सुकृतं व्वृङ्क्तेऽथ य ऽइदमविद्वानधोपहासञ्चरत्यास्य स्त्रियः सुकृतं व्वृञ्जते ॥ ३ ॥ एतद्ध स्म वै तद्विद्वानुद्दालक ऽआरुणिराह । एतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य ऽआहैतद्ध स्म वै तद्विद्वान्कुमारहारित ऽआह बहवो मर्ष्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्मा-ल्लोकात्प्रयन्ति य ऽइदमविद्वाꣳसोऽधोपहासञ्चरन्तीति ॥४॥ बहु वा ऽइदꣳ सुप्तस्य वा जाग्रतो वा रेत स्कन्दति । तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्का-न्त्सीद्यदोषधीरप्यसरद्यदपः ॥ इदमहन्तद्रेत ऽआददे पुन-र्मामैत्विन्द्रियम्पुनस्तेज पुनर्भगः पुनरग्नयो धिष्ण्या यथा-स्थानङ्कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥ अथ यद्युदक ऽआत्मानम्पश्येत् । तदभिमन्त्रयेत मयि तेज ऽइन्द्रियं यशो द्रविणꣳ सुकृतमिति ॥ ६ ॥ श्रीर्ह वा ऽएषा स्त्रीणाम् । यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्वि-नीमभिक्रम्य्योपमन्त्रयेत सा चेदस्मै न दद्यात्काममेना-मुपक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते यशसा यश ऽआदद ऽइत्ययशा ऽएव भवति ॥ ७ ॥ स यामिच्छेत् । कामयेत मेति तस्यामर्थन्निष्ठाप्य मुखेन मुखꣳ सन्धायो-पस्थमस्या ऽअभिमृश्य जपेदङ्गादङ्गात्सम्भवसि हृदयादधि

जायसे ॥ स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेति ॥ ८ ॥ अथ यामिच्छेत् । न गर्भन्दधीतेति तस्यामर्थन्निष्ट्याप्य मुखेन मुखꣳ सन्धायाभिप्राण्यापान्याद्रिन्द्रियेण ते रेतसा रेत ऽआदद ऽइत्यरेता ऽएव भवति ॥ ९ ॥* अथ यामिच्छेत् । गर्भन्दुधीतेति तस्यामर्थन्निष्ट्याप्य मुखेन मुखꣳ सन्धायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत ऽआदधामीति गर्भिण्येव भवति ॥ १० ॥ अथ यस्य जायायै जारः स्यात् । तञ्चेद्दिष्ट्यादुमपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरबर्हिः स्तीर्त्वा तस्मिन्नेतास्तिस्रः शरभृष्टीः प्रतिलोमाः सर्पिषाक्त्वा जुहुयान्मम समिद्धेऽहौषीराशापराकाशौ त ऽआददेऽसाविति नाम गृह्णाति मम समिद्धेऽहौषीः पुत्रपशूँस्त ऽआददेऽसाविति नाम गृह्णाति मम समिद्धेऽहौषीः प्राणापानौ त ऽआददेऽसाविति नाम गृह्णाति स वा ऽएष निरिन्द्रियो विसुकृदस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य जायाया ऽउपहासन्नेच्छेदुत ह्येवंवित्परो भवति ॥ ११ ॥ अथ यस्य जायामार्त्तवं विन्देत् । त्र्यहङ्कꣳसे न पिबेदुहतवासा नैनां वृषलो न वृषल्युपहन्न्याद्विराव्रान्त ऽआप्लुत्य व्रीहीनवघातयेत् ॥ १२ ॥ स य ऽइच्छेत् । पुत्रो मे गौरो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनम्पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १३ ॥ अथ य ऽइच्छेत् । पुत्रो मे कपिलः पिङ्गलो

जायेत द्वौ वेदावनुब्ब्रुवीत सर्वमायुरियादिति दध्योदनम्पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥ अथ य ऽइच्छेत् । पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्ब्रुवीत सर्वमायुरियादित्युदौदनम्पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥ अथ य ऽइच्छेत् । दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनम्पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥ अथ य ऽइच्छेत् । पुत्रो मे पण्डितो विजिगीथः समितिङ्गमः शुश्रूषितां वाचम्भाषिता जायेत सर्वान्वेदाननुब्ब्रुवीत सर्वमायुरियादिति माषौदनम्पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा ऽऔक्षेण वार्षभेण वा ॥ १७ ॥ अथाभिप्रातरेव । स्थालीपाकावृताज्यञ्चेष्ट्वा स्थालीपाकस्योपघातञ्जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणी ऽउदपात्रम्पूरयित्वा तेनैनान्त्रिरभ्युक्षत्युत्तिष्ठातो विश्ववावसोऽन्यामिच्छ प्रपफ्ठ्यम् ॥ सजायाम्पत्या सहेति ॥ १८ ॥ अथैनामभिपद्यते । अमोऽहमस्मि सा त्वः सा त्वमस्यमो ऽअहम् ॥ सामाहमस्मि ऽऋक्त्वन्द्यौरहम्पृथिवी त्वम् ॥ तावेहि सः रभावहै सह रेतो दधावहै पुंसे पुत्राय वित्तय ऽइति ॥ १९ ॥ अथास्या ऽऊरू विहापयति । विजिहीथान्द्यावापृथिवी ऽइति तस्यामर्थन्निष्ट्वाप्य मुखेन मुखः सन्धाय त्रिरेनामनुलोमामनुमार्ष्टि 'विष्णुर्योनि-

निङ्क्ते[1]ल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिञ्चतु प्रजापतिर्धाता गर्भन्दधातु ते ॥ गर्भन्धेहि सिनीवालि गर्भन्धेहि पृथुष्टुके ॥ गर्भन्ते ऽअश्विनौ देवावाधत्ताम्पुष्करस्रजौ ॥ २० ॥ हिरण्मयी ऽअरणी । याभ्यान्निर्मन्थतामश्विनौ देवौ तन्ते गर्भन्दधामहे दशमे मासि सूतवे' ॥ यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी ॥ वायुर्दिशां ऽयथा गर्भ ऽएवङ्गर्भन्दधामि तेऽसाविति नाम गृह्णाति ॥ २० ॥ सोष्ण्यन्तीमद्भिरभ्युक्षति । 'यथा[2] वातः पुष्करिणीꣳ समिङ्गयति सर्वतः ॥ एवा ते गर्भ ऽएजतु' सहावैतु जरायुणा ॥ इन्द्रस्यायं व्रजः कृतः सार्गडः सपरिश्रयः ॥ तमिन्द्र निर्जहि गर्भेण सावरः सहेति ॥२२॥ जातेऽग्निमुपसमाधाय । अङ्क ऽआधाय कृत्से पृषदाज्यमानीय पृषदाज्यस्योपघातञ्जुहोत्यस्मिन्त्सहस्रम्पुष्यासमेधमानः स्वे[3] गृहे ॥ अस्योपसद्याम्माच्छैत्सीत्प्रजया च पशुभिश्च स्वाहा ॥ मयि प्राणास्त्वयि मनसा जुहोमि स्वाहा ॥२३॥ यत्कर्मणात्यरीरिचम् । यद्वा न्यूनमिहाकरम् ॥ अग्निष्ट्वत्तस्विष्टकृद्विद्वान्त्स्विष्टः सुहुतङ्करोतु स्वाहेति ॥२४॥ अथास्यायुष्यङ्करोति । दक्षिणङ्कर्णमभिनिधाय वाग्वागिति त्रिरथास्य नामधेयङ्करोति 'वेदोऽसी'[4]ति तदस्यैतद्गुह्यमेव नाम स्यादथ दधि मधु घृतः सदःस्तृज्ज्यानन्तर्हितेन जातरूपेण प्राशयति

(१) ऋ० सं० ८. ८. ४१ । (२) ऋ० स० ४. ४. २० ।

(३) "स्वगृहे" इति 'ग' 'ज' पुस्तकयोः । (४) शु० य० स० २. २१

भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वन्त्वयि दधामीति ॥ २५ ॥ अथैनमभिमृशति। अश्मा भव परशुर्भव हिरण्यमस्तृतम्भव ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति ॥ २६ ॥ अथास्य मातरमभिमन्त्रयते। इडासि मैत्रावरुणी वीरे वीरमजीजनथाः ॥ सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति ॥ २७ ॥ अथैनम्मात्रे प्रदाय स्तनम्प्रयच्छति। [1]यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ॥ येन विश्श्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेऽकरिति ॥ २८ ॥ तं वा ऽएतमाहुः। अतिपिता बताभूरतिपितामहो बताभूः परमाम्बत काष्ट्ठाम्प्राप श्रिया यशसा ब्ब्रह्मवर्च्चसेन य ऽएवंविदो ब्ब्राह्मणस्य पुत्रो जायत ऽइति ॥ २९ ॥ अथ वदःशः। तदिदं वयम्भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्स्रीमाण्डवीपुत्राद्वात्स्रीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्ग्गीपुत्राद्गार्ग्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्ग्गीपुत्राद्गार्ग्गीपुत्रो गार्ग्गीपुत्राद्गार्ग्गीपुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारिकण्णीपुत्राद्धारिकण्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ॥ ३० ॥ काश्श्यपीबालाक्क्यामाठरीपुत्रात्। काश्श्यपीबालाक्क्यामाठरीपुत्रः

(१) शु० य० सं० ३८. ५।

कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र ऽआत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्क्कारुणीपुत्राद्वार्क्कारुणीपुत्र ऽआर्त्तभागीपुत्रादार्त्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृतीपुत्रात्साङ्कृतीपुत्रः ॥ ३१ ॥ आलम्बीपुत्रात् । आलम्बीपुत्र ऽआलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्याङ्क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥ ३२ ॥ प्राश्नीपुत्रात् । आसुरिवासिनः प्राश्नीपुत्र ऽआसुरायणादासुरायण ऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य ऽउद्दालकादुद्दालकोऽरुणादरुण ऽउपवेशेरुपवेशिः कुश्रेः कुश्रिश्रवाजश्रवसो वाजश्रवा जिह्वावतो बाद्ध्योगाज्जिह्वावान्बाद्ध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो

(१) "बाद्ध्योगाज्जिह्वावा बाद्ध्यो-" इति 'ग' 'ज' पुस्तकयोः ।

वागभिण्या ऽअभिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ३३ ॥


नवमाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

माध्यन्दिनीये शतपथब्राह्मणे सप्तमः प्रपाठकः ॥७॥ कण्डिकासंख्यका ॥१०१॥

इति नवमोऽध्यायः ॥ ९ ॥

उपनिषन्नाम चतुर्दशं काण्डं * समाप्तम् ॥ १४ ॥

समाप्तश्चेदं माध्यन्दिनीयं शतपथब्राह्मणम् † ।



* अस्मिन्काण्डे कण्डिकासंख्या ७९६ ।

† अत्र शतमध्यायाः १०० ।